Dharmakīrti and Manorathanandin

# Pramāṇavārttika

— Pramāṇavārttikavṛtti

SARIT

SARIT

# Contents


Contents i

**Title Page** **iii**

**Index of verses in the Pramāṇavārttika** **v**

1 प्रथमः परिच्छेदः ॥: प्रमाणसिद्धिः 1
- 1.1 १. प्रमाणलक्षणम् . . . 2
- 1.2 २. भगवान् प्रमाणम् . . . 15

2 द्वितीयः परिच्छेदः : प्रत्यक्षम् 89
- 2.1 (१. प्रमाणसंख्याविप्रतिपत्तिनिरासः) . . . 89
- 2.2 (२. सत्यद्वयचिन्ता) . . . 90
- 2.3 (३. सामान्यतत्कल्यनानिरासः) . . . 91
- 2.4 ४. अनुमानचिन्ता . . . 106
- 2.5 ५. प्रत्यक्षचिन्ता . . . 123
- 2.6 (६. प्रत्यक्षभेदाः) . . . 141
- 2.7 ७. प्रत्यक्षाभासचिन्ता . . . 164
- 2.8 ८. प्रमाणफलचिन्ता . . . 167
- 2.9 ९. विक्षप्तिमात्रताचिन्ता . . . 171

3 तृतीयः परिच्छेदः : स्वार्थानुमानं 224
- 3.1 १---हेतुचिन्ता . . . 224
- 3.2 २ अनुपलब्धिचिन्ता . . . 226
- 3.3 ३. शब्दचिन्ता . . . 277
- 3.4 ४. आगमचिन्ता . . . 286
- 3.5 ५. अपौरुषेयत्वे . . . 289

4 चतुर्थः परिच्छेदः : परार्थानुमानं 325
- 4.1 १. परार्थानुमानलक्षणम् (दिग्नागस्य) . . . 325
- 4.2 २. पक्षचिन्ता . . . 330
- 4.3 ३. शब्दाप्रामाण्यचिन्ता . . . 340
- 4.4 ४. सामान्यचिन्ता . . . 360
- 4.5 ५---पक्षदोषाः . . . 364
- 4.6 ६. हेतुचिन्ता . . . 377
- 4.7 (७) अनुपलब्धिचिन्ता . . . 395
- 4.8 ८. भावस्वभावचिन्ता . . . 400

The TEI Header 402

# Title Page

Dharmakīrti's Pramāṇavārttika with a commentary by Manorathanandin
*Dharmakīrti Manorathanandin*

# Index of verses in the Pram av rttika


- chapter 1
- chapter 1
- section 1.1
- section 1.1
- section 1.1
- section 1.1
- section 1.1
- section 1.1
- section 1.1
- section 1.1
- section 1.1
- section 1.1
- section 1.1
- section 1.1
- section 1.1
- section 1.1
- section 1.1
- section 1.1
- section 1.1
- section 1.1
- section 1.1
- section 1.1
- section 1.1

- section 1.1
- section 1.1
- section 1.1
- section 1.1
- section 1.2
- section 1.2
- section 1.2
- section 1.2
- section 1.2
- section 1.2
- section 1.2
- section 1.2
- section 1.2
- section 1.2
- section 1.2
- section 1.2
- section 1.2
- section 1.2
- section 1.2
- section 1.2
- section 1.2
- section 1.2
- section 1.2
- section 1.2
- section 1.2

- section 1.2
- section 1.2
- section 1.2
- section 1.2
- section 1.2
- section 1.2
- section 1.2
- section 1.2
- section 1.2
- section 1.2
- section 1.2
- section 1.2
- section 1.2
- section 1.2
- section 1.2
- section 1.2
- section 1.2
- section 1.2
- section 1.2
- section 1.2
- section 1.2
- section 1.2
- section 1.2
- section 1.2
- section 1.2

- section 1.2
- section 1.2
- section 1.2
- section 1.2
- section 1.2
- section 1.2
- section 1.2
- section 1.2
- section 1.2
- section 1.2
- section 1.2
- section 1.2
- section 1.2
- section 1.2
- section 1.2
- section 1.2
- section 1.2
- section 1.2
- section 1.2
- section 1.2
- section 1.2
- section 1.2
- section 1.2
- section 1.2
- section 1.2

- section 1.2
- section 1.2
- section 1.2
- section 1.2
- section 1.2
- section 1.2
- section 1.2
- section 1.2
- section 1.2
- section 1.2
- section 1.2
- section 1.2
- section 1.2
- section 1.2
- section 1.2
- section 1.2
- section 1.2
- section 1.2
- section 1.2
- section 1.2
- section 1.2
- section 1.2
- section 1.2
- section 1.2
- section 1.2

- section 1.2
- section 1.2
- section 1.2
- section 1.2
- section 1.2
- section 1.2
- section 1.2
- section 1.2
- section 1.2
- section 1.2
- section 1.2
- section 1.2
- section 1.2
- section 1.2
- section 1.2
- section 1.2
- section 1.2
- section 1.2
- section 1.2
- section 1.2
- section 1.2
- section 1.2
- section 1.2
- section 1.2
- section 1.2

- section 1.2
- section 1.2
- section 1.2
- section 1.2
- section 1.2
- section 1.2
- section 1.2
- section 1.2
- section 1.2
- section 1.2
- section 1.2
- section 1.2
- section 1.2
- section 1.2
- section 1.2
- section 1.2
- section 1.2
- section 1.2
- section 1.2
- section 1.2
- section 1.2
- section 1.2
- section 1.2
- section 1.2
- section 1.2

- section 1.2
- section 1.2
- section 1.2
- section 1.2
- section 1.2
- section 1.2
- section 1.2
- section 1.2
- section 1.2
- section 1.2
- section 1.2
- section 1.2
- section 1.2
- section 1.2
- section 1.2
- section 1.2
- section 1.2
- section 1.2
- section 1.2
- section 1.2
- section 1.2
- section 1.2
- section 1.2
- section 1.2
- section 1.2

- section 1.2
- section 1.2
- section 1.2
- section 1.2
- section 1.2
- section 1.2
- section 2.1
- section 2.2
- section 2.3
- section 2.3
- section 2.3
- section 2.3
- section 2.3
- section 2.3
- section 2.3
- section 2.3
- section 2.3
- section 2.3
- section 2.3
- section 2.3
- section 2.3
- section 2.3
- section 2.3
- section 2.3
- section 2.3

- section 2.3
- section 2.3
- section 2.3
- section 2.3
- section 2.3
- section 2.3
- section 2.3
- section 2.3
- section 2.3
- section 2.3
- section 2.3
- section 2.3
- section 2.3
- section 2.3
- section 2.3
- section 2.3
- section 2.3
- section 2.3
- section 2.3
- section 2.3
- section 2.3
- section 2.3
- section 2.3
- section 2.3
- section 2.3

- section 2.3
- section 2.3
- section 2.3
- section 2.3
- section 2.3
- section 2.3
- section 2.4
- section 2.4
- section 2.4
- section 2.4
- section 2.4
- section 2.4
- section 2.4
- section 2.4
- section 2.4
- section 2.4
- section 2.4
- section 2.4
- section 2.4
- section 2.4
- section 2.4
- section 2.4
- section 2.4
- section 2.4
- section 2.4

- section 2.4
- section 2.4
- section 2.4
- section 2.4
- section 2.4
- section 2.4
- section 2.4
- section 2.4
- section 2.4
- section 2.4
- section 2.4
- section 2.4
- section 2.4
- section 2.4
- section 2.4
- section 2.4
- section 2.4
- section 2.4
- section 2.4
- section 2.4
- section 2.4
- section 2.4
- section 2.4
- section 2.4
- section 2.4

- section 2.4
- section 2.4
- section 2.4
- section 2.4
- section 2.4
- section 2.4
- section 2.4
- section 2.4
- section 2.4
- section 2.4
- section 2.4
- section 2.4
- section 2.4
- section 2.4
- section 2.4
- section 2.4
- section 2.4
- section 2.4
- section 2.4
- section 2.4
- section 2.5
- section 2.5
- section 2.5
- section 2.5
- section 2.5

- section 2.5
- section 2.5
- section 2.5
- section 2.5
- section 2.5
- section 2.5
- section 2.5
- section 2.5
- section 2.5
- section 2.5
- section 2.5
- section 2.5
- section 2.5
- section 2.5
- section 2.5
- section 2.5
- section 2.5
- section 2.5
- section 2.5
- section 2.5
- section 2.5
- section 2.5
- section 2.5
- section 2.5
- section 2.5

- section 2.5
- section 2.5
- section 2.5
- section 2.5
- section 2.5
- section 2.5
- section 2.5
- section 2.5
- section 2.5
- section 2.5
- section 2.5
- section 2.5
- section 2.5
- section 2.5
- section 2.5
- section 2.5
- section 2.5
- section 2.5
- section 2.5
- section 2.5
- section 2.5
- section 2.5
- section 2.5
- section 2.5
- section 2.5

- section 2.5
- section 2.5
- section 2.5
- section 2.5
- section 2.5
- section 2.5
- section 2.5
- section 2.5
- section 2.5
- section 2.5
- section 2.5
- section 2.6
- section 2.6
- section 2.6
- section 2.6
- section 2.6
- section 2.6
- section 2.6
- section 2.6
- section 2.6
- section 2.6
- section 2.6
- section 2.6
- section 2.6
- section 2.6

- section 2.6
- section 2.6
- section 2.6
- section 2.6
- section 2.6
- section 2.6
- section 2.6
- section 2.6
- section 2.6
- section 2.6
- section 2.6
- section 2.6
- section 2.6
- section 2.6
- section 2.6
- section 2.6
- section 2.6
- section 2.6
- section 2.6
- section 2.6
- section 2.6
- section 2.6
- section 2.6
- section 2.6
- section 2.6

- section 2.6
- section 2.6
- section 2.6
- section 2.6
- section 2.6
- section 2.6
- section 2.6
- section 2.6
- section 2.6
- section 2.6
- section 2.6
- section 2.6
- section 2.6
- section 2.6
- section 2.6
- section 2.6
- section 2.6
- section 2.6
- section 2.6
- section 2.6
- section 2.6
- section 2.6
- section 2.6
- section 2.6
- section 2.6
- section 2.6

- section 2.6
- section 2.6
- section 2.6
- section 2.6
- section 2.6
- section 2.6
- section 2.6
- section 2.6
- section 2.6
- section 2.6
- section 2.6
- section 2.6
- section 2.6
- section 2.6
- section 2.6
- section 2.6
- section 2.6
- section 2.6
- section 2.6
- section 2.6
- section 2.6
- section 2.6
- section 2.6
- section 2.6
- section 2.6

- section 2.6
- section 2.6
- section 2.6
- section 2.6
- section 2.6
- section 2.6
- section 2.6
- section 2.7
- section 2.7
- section 2.7
- section 2.7
- section 2.7
- section 2.7
- section 2.7
- section 2.7
- section 2.7
- section 2.7
- section 2.7
- section 2.7
- section 2.7
- section 2.8
- section 2.8
- section 2.8
- section 2.8
- section 2.8

- section 2.8
- section 2.8
- section 2.8
- section 2.8
- section 2.8
- section 2.8
- section 2.8
- section 2.8
- section 2.8
- section 2.8
- section 2.8
- section 2.8
- section 2.8
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9

- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9

- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9

- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9

- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9

- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9

- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9

- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9

- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 2.9
- section 3.1
- section 3.1
- section 3.2
- section 3.2
- section 3.2
- section 3.2
- section 3.2
- section 3.2

- section 3.2
- section 3.2
- section 3.2
- section 3.2
- section 3.2
- section 3.2
- section 3.2
- section 3.2
- section 3.2
- section 3.2
- section 3.2
- section 3.2
- section 3.2
- section 3.2
- section 3.2
- section 3.2
- section 3.2
- section 3.2
- section 3.2
- section 3.2
- section 3.2
- section 3.2
- section 3.2
- section 3.2
- section 3.2

- section 3.2
- section 3.2
- section 3.2
- section 3.2
- section 3.2
- section 3.2
- section 3.2
- section 3.2
- section 3.2
- section 3.2
- section 3.2
- section 3.2
- section 3.2
- section 3.2
- section 3.2
- section 3.2
- section 3.2
- section 3.2
- section 3.2
- section 3.2
- section 3.2
- section 3.2
- section 3.2
- section 3.2
- section 3.2

- section 3.2
- section 3.2
- section 3.2
- section 3.2
- section 3.2
- section 3.2
- section 3.2
- section 3.2
- section 3.2
- section 3.2
- section 3.2
- section 3.2
- section 3.2
- section 3.2
- section 3.2
- section 3.2
- section 3.2
- section 3.2
- section 3.2
- section 3.2
- section 3.2
- section 3.2
- section 3.2
- section 3.2
- section 3.2

- section 3.2
- section 3.2
- section 3.2
- section 3.2
- section 3.2
- section 3.2
- section 3.2
- section 3.2
- section 3.2
- section 3.2
- section 3.2
- section 3.2
- section 3.2
- section 3.2
- section 3.2
- section 3.2
- section 3.2
- section 3.2
- section 3.2
- section 3.2
- section 3.2
- section 3.2
- section 3.2
- section 3.2
- section 3.2

- section 3.2
- section 3.2
- section 3.2
- section 3.2
- section 3.2
- section 3.2
- section 3.2
- section 3.2
- section 3.2
- section 3.2
- section 3.2
- section 3.2
- section 3.2
- section 3.2
- section 3.2
- section 3.2
- section 3.2
- section 3.2
- section 3.2
- section 3.2
- section 3.2
- section 3.2
- section 3.2
- section 3.3
- section 3.3

- section 3.4
- section 3.4
- section 3.4
- section 3.4
- section 3.5
- section 3.5
- section 3.5
- section 3.5
- section 3.5
- section 3.5
- section 3.5
- section 3.5
- section 3.5
- section 3.5
- section 3.5
- section 3.5
- section 3.5
- section 3.5
- section 3.5
- section 3.5
- section 3.5
- section 3.5
- section 3.5
- section 3.5
- section 3.5

- section 3.5
- section 3.5
- section 3.5
- section 3.5
- section 3.5
- section 3.5
- section 3.5
- section 3.5
- section 3.5
- section 3.5
- section 3.5
- section 3.5
- section 3.5
- section 3.5
- section 3.5
- section 3.5
- section 3.5
- section 3.5
- section 3.5
- section 3.5
- section 3.5
- section 3.5
- section 3.5
- section 3.5
- section 3.5

- section 3.5
- section 3.5
- section 3.5
- section 3.5
- section 3.5
- section 3.5
- section 3.5
- section 3.5
- section 3.5
- section 3.5
- section 3.5
- section 3.5
- section 3.5
- section 3.5
- section 3.5
- section 3.5
- section 3.5
- section 3.5
- section 3.5
- section 3.5
- section 3.5
- section 3.5
- section 3.5
- section 3.5
- section 3.5

- section 3.5
- section 3.5
- section 3.5
- section 3.5
- section 3.5
- chapter 4
- section 4.1
- section 4.1
- section 4.1
- section 4.1
- section 4.1
- section 4.1
- section 4.1
- section 4.1
- section 4.1
- section 4.1
- section 4.1
- section 4.1
- section 4.1
- section 4.1
- section 4.2
- section 4.2
- section 4.2
- section 4.2
- section 4.2

- section 4.2
- section 4.2
- section 4.2
- section 4.2
- section 4.2
- section 4.2
- section 4.2
- section 4.2
- section 4.2
- section 4.2
- section 4.2
- section 4.2
- section 4.2
- section 4.2
- section 4.2
- section 4.2
- section 4.2
- section 4.2
- section 4.2
- section 4.2
- section 4.2
- section 4.2
- section 4.2
- section 4.2
- section 4.2

- section 4.2
- section 4.3
- section 4.3
- section 4.3
- section 4.3
- section 4.3
- section 4.3
- section 4.3
- section 4.3
- section 4.3
- section 4.3
- section 4.3
- section 4.3
- section 4.3
- section 4.3
- section 4.3
- section 4.3
- section 4.3
- section 4.3
- section 4.3
- section 4.3
- section 4.3
- section 4.3
- section 4.3
- section 4.3

- section 4.3
- section 4.3
- section 4.3
- section 4.3
- section 4.3
- section 4.3
- section 4.3
- section 4.3
- section 4.3
- section 4.3
- section 4.3
- section 4.3
- section 4.3
- section 4.3
- section 4.3
- section 4.3
- section 4.3
- section 4.3
- section 4.3
- section 4.3
- section 4.3
- section 4.3
- section 4.3
- section 4.3
- section 4.3

- section 4.3
- section 4.3
- section 4.3
- section 4.3
- section 4.3
- section 4.3
- section 4.3
- section 4.3
- section 4.3
- section 4.3
- section 4.3
- section 4.3
- section 4.3
- section 4.3
- section 4.3
- section 4.3
- section 4.3
- section 4.3
- section 4.3
- section 4.3
- section 4.3
- section 4.3
- section 4.3
- section 4.3
- section 4.3

- section 4.3
- section 4.3
- section 4.3
- section 4.3
- section 4.3
- section 4.3
- section 4.3
- section 4.3
- section 4.4
- section 4.4
- section 4.4
- section 4.4
- section 4.4
- section 4.4
- section 4.4
- section 4.4
- section 4.4
- section 4.4
- section 4.4
- section 4.4
- section 4.4
- section 4.4
- section 4.4
- section 4.5
- section 4.5

- section 4.5
- section 4.5
- section 4.5
- section 4.5
- section 4.5
- section 4.5
- section 4.5
- section 4.5
- section 4.5
- section 4.5
- section 4.5
- section 4.5
- section 4.5
- section 4.5
- section 4.5
- section 4.5
- section 4.5
- section 4.5
- section 4.5
- section 4.5
- section 4.5
- section 4.5
- section 4.6
- section 4.6
- section 4.6

- section 4.6
- section 4.6
- section 4.6
- section 4.6
- section 4.6
- section 4.6
- section 4.6
- section 4.6
- section 4.6
- section 4.6
- section 4.6
- section 4.6
- section 4.6
- section 4.6
- section 4.6
- section 4.6
- section 4.6
- section 4.6
- section 4.6
- section 4.6
- section 4.6
- section 4.6
- section 4.6
- section 4.6
- section 4.6

- section 4.6
- section 4.6
- section 4.6
- section 4.6
- section 4.6
- section 4.6
- section 4.6
- section 4.6
- section 4.6
- section 4.6
- section 4.6
- section 4.6
- section 4.6
- section 4.6
- section 4.6
- section 4.6
- section 4.6
- section 4.6
- section 4.6
- section 4.6
- section 4.6
- section 4.6
- section 4.6
- section 4.6
- section 4.6

- section 4.6
- section 4.6
- section 4.6
- section 4.6
- section 4.6
- section 4.6
- section 4.7
- section 4.7
- section 4.7
- section 4.7
- section 4.7
- section 4.7
- section 4.7
- section 4.7
- section 4.7
- section 4.7
- section 4.7
- section 4.7
- section 4.7
- section 4.7
- section 4.7
- section 4.7
- section 4.7
- section 4.7
- section 4.7

- section 4.8
- section 4.8
- section 4.8
- section 4.8
- section 4.8


नमो मञ्जुश्रिये ॥

# 1 प्रथमः परिच्छेदः ॥: प्रमाणसिद्धिः

[1b/MA]

विमुक्तावरणक्लेशं दीप्ताखिलगुणश्रियं ।
स्वैकवेद्यात्मसम्पत्तिं नमस्यामि महामुनिम् ॥

स्वयमपि कृतिनां महद्भिरन्यैरपि गमितो बहुविस्तरैर्न्न योयम् ।
तदपि च सुगमो न मद्विधानामिति विवृतिच्छलतः करोमि चिन्ताम् ॥

अहमपि न निजैकलाभलुब्धो न च परकृत्यरसाभिलाषमुक्तः ।
फलति पुनरियं परार्थवाञ्छाव्रततिरभीष्टफलानि पुण्यभाजाम् ॥

## क. नमस्कारश्लोकः

शास्त्रा[1] दावविघ्नेन तत्समाप्त्यर्थं भगवति प्रसादजनने श्रोतृ[2] जनानुग्रहार्थञ्च स्तुतिपूर्वकमाचार्यो नमस्कारश्लोकमाह ।

विधूतकल्पनाजालगम्भीरोदारमूर्तये ।
नमः समन्तभद्राय समन्तस्फरणत्विषे ॥ १ ॥

विधूतं[3] विध्वस्तं अनुत्पत्तिकधर्मतामापादितं 'कल्पना' ग्राह्यग्राहकाध्यारोपः सैव 'जालं' बन्धनहेतुत्वात् यासां ता विधूतकल्पनाजालाः । एतेन धर्मकाय उक्तः[4] । द्वयशून्यताया धर्मधातुत्वात् (।) तदधिगमस्य धर्मकायत्वात् । गम्भीराश्च खड्ग[002/s] श्रावकाद्यविषयत्वात् । उदाराश्च सकलज्ञेयसत्वार्थव्यापनादिति 'गम्भीरोदाराः' । आभ्यां साम्भोगिकनैर्म्माणिककायावुक्तौ तयोरेव स्वरूपत्वात् । विधूतकल्पनाजाला गम्भीरोदारा 'मूर्त्तयो' यस्य स 'विधूतकल्पनाजालगम्भोरोदारमर्त्तिः' (।) एतेन स्वार्थसम्पदुक्ता त्रिकायलक्षणत्वात्तस्याः ।

'समन्तं' निरवशेषं भद्रं कल्याणं परार्थसम्पत्सम्भारलक्षणं यस्मादसौ 'समन्तभद्रः' (।) अनया भगवन्नामव्युत्पत्त्या परार्थसम्पदभिहिता[5] । समन्ततः स्फरन्तीति समन्तस्फरण्यः त्विषः ताव (त्) त्विषो देशना यस्य स 'समन्तस्फरणत्विट्' वस्तुतत्त्वावभासनोपायता च त्विड्देशनयोः साधर्म्यं (।) अनेन परार्थसम्पदुपायो दर्शितः । देशनाद्वारेण भगवता जगदर्थकरणात् । एतेन स्तुतिरुक्ता असाधारणानां स्वपरार्थसम्पत्तितदुपायानामुपदर्शनात् । सर्व्वत्र नमःश[6] ब्दयोगाच्चतुर्थी । अनेन नमस्कारोभिहितः । यदा तु समन्तभद्रशब्दो रूढ्या बोधिसत्त्वविशेषे वर्तते तदापि पदव्याख्यानं पूर्ववदेव । अयन्तु विशेषः । विधूतकल्पनाजालत्वं बोधिसत्त्वभूम्यावरणप्रहाणतो वेदितव्यं । गाम्भीर्यन्तु खड्गश्रावकाविषयत्वात् । औदार्यन्तु दर्श भूमीश्वरबोधिसत्त्वमाहात्म्यातिशयतः । कायत्रयन्तु बोधिसत्त्वानामप्यस्ति प्रकर्षनिष्ठागमनात्तु भगवतां व्यवस्थाप्यते । देशना च प्रसिद्धैव तेषां ॥ (१) ॥

---

[1] १ स्तुत्या पुण्योपचयात् ।

[2] २ व्याख्यातुश्चेति परार्थदर्शनात् ।

[3] ३ सर्व्वावरणविगमात् ।

[4] ४ पूजेयं नमः शब्दात्प्रणामतः शिष्टैश्च तेश्च । तच्च स्वपरार्थतदुभयसम्पत्तिस्ततः अवृत्तिहानिगाम्भीर्य्यौदार्यविशेषैस्त्रिभिः स्वार्थ उक्तः ।

[5] १ तदर्थिनां यथा ।

[6] २ अकारान्तः सकारान्तस्तृतीयार्थ इत्यन्ये । जनकायः ।

ख. शास्त्रारम्भप्रयोजनम्

श्रोतृदोषबाहुल्याच्छास्त्रेण परोपकारमपश्यन् सूक्ताभ्यासभावितचित्ततामेवात्मनः शास्त्रारम्भकारणन्दर्शयन् वक्रोक्त्या दोषतापनयनेन शास्त्रे श्रोतृन् प्रवर्तयितुम(ा) ह ।

[7] प्रायः प्राकृतसक्तिरप्रतिबलप्रज्ञो जनः केवलं,नानर्थ्येव सुभाषितैः परिगता
विद्वेष्ट्यपीर्ष्यामलैः ।
तेनायं न परोपकार इति नश्चिन्तापि
चेतस्ततः,सूक्ताभ्यासविबर्द्धितव्यसनमित्यत्रानुबद्धस्पृहम्
॥ २ ॥

'प्रायो' भूयान् बाहुल्येन वा 'जनः प्राकृतेषु' बहिःशास्त्रेषु 'सक्ति'रभिष्वङ्गो यस्य स प्राकृतसक्तिरनेन कुप्रज्ञत्वं श्रोतृदोष उक्तः । 'अप्रतिबला' शास्त्रार्थग्रहणं प्रत्य'शक्ता प्रज्ञा' यस्यासावप्रतिबलप्रज्ञः अनेनाज्ञत्वमुक्तं । 'केवलं, नानर्थ्येव सूभाषितैः' । किन्तु सुभाषिताभिधायिनं ईर्ष्या परसंपत्तौ चेतसो व्यारोषः सैव मलश्चित्त[8] मलिनी[003/s] करणात् । तैः 'परिगतो' युक्तः सन् 'विद्वेष्ट्यपि । ईर्ष्यामलैरिति' व्यक्त्यपेक्षया बहुवचनं । अनेन यथाक्रममनर्थित्वममाध्यस्थ्यञ्चोक्तं (।) 'तेन श्रोतृदोषकलार्पेन अयमा'रिप्सितो वार्त्तिकाख्यो ग्रन्थः (।) परमुपकरोतीति 'परोपकार' इति 'नोऽस्माकश्चिन्तापि' नास्ति । कथन्तर्हि शास्त्रकरणे प्रवृत्तिरित्याह चेतश्चिरं 'दीर्घकालं [2a/MA] सूक्त'स्या'भ्यासेन विवर्द्धितव्यसनं' विस्तारिताभिष्वङ्ग'मिति'हेतो'रत्र वार्तिककरणेऽनुबद्धस्पृहं' जाताभिलाषं । एतेन कुप्रज्ञतादिदोषजातमात्मनो बोधिताः श्रोतारस्तत्परिहारेण शास्त्रे प्रवर्तिता एव भवन्ति ॥ (२)

ग. प्रमाणसिद्धिः

अयमाचा र्यो बृहदाचार्यीय प्र मा ण स मु च्च य शा स्त्रे वार्त्तिकं चिकीर्षुः स्वतः कृतभगवन्नमस्कार(:) तच्छास्त्रारम्भसमये तदाचार्यकृतभगवन्नमस्कारश्लोकं व्याख्यातुकामः प्रथमं[9] प्रमाणसामान्यलक्षणमाह (।)

## 1.1 १. प्रमाणलक्षणम्

(१) अविसंवादि ज्ञानम्

...v.1.3a प्रमाणमविसंवादि ज्ञानं;

ज्ञानं प्रमाणं[10] नाज्ञानमिन्द्रियार्थसन्निकर्षादि । कीदृशमविसंवादि । विसंवादनं विसंवादो वञ्चनं तद्योगाद्विसंवादि । न तथाऽसावविसंवादि । अविसम्वादनमुक्तमित्यर्थः । किं पुनरित्याह (।)

[7] * द्रष्टव्यं परिशिष्टं १।१-४

[8] ३ आत्मात्मीयास्त्रेधातुकाश्च चैत्ताः सवासनाः ।

[9] १ द्वितीयां सम्वित्तिसिद्धिम् । प्रमाणं भूतो जातो भगवान् मानमिव किन्तदित्याह ।

[10] २ प्रमाणं सम्यग्ज्ञानमपूर्वगोचरमिति लक्षणं ।

...v.1.3b अर्थक्रियास्थितिः ।
अविसंवादनं;

यथोपदर्शितार्थस्य क्रियायाः स्थितिः प्रमाणयोग्यताऽविसंवादनं(।) अतश्च यतो ज्ञानादर्थं परिच्छिद्यापि[11] न प्रवर्तते प्रवृत्तो वा कुतश्चित्प्रतिबन्धादेरर्थक्रियान्नाधिगच्छति । तदपि प्रमाणमेव प्रमाणयोग्यतालक्षणस्याविसंवादस्य सत्त्वात् । सैव प्रमाणयोग्यता कथमसत्यामर्थक्रियाप्राप्तौ निश्चीयत इति चेत् (।) यत्तावदसकृद्व्यवहाराभ्यासाद्दर्शनमात्रेणोपलक्षितभ्रमविविक्तस्वरूपविशेषं साधनाध्यक्षं तस्य[12] [004/s] स्वत एव प्रमाणयोग्यतानिश्चयः कृत्रिमाकृत्रिममणिरुप्यादितत्त्वनिश्चयवत् । अनुमानस्य च साध्यप्रतिबद्धजन्मनो व्यभिचाराशङ्काविरहात् । अर्थक्रियानिर्भासन्तु प्रत्यक्षं स्वत एवार्थक्रियानुभवात्मकं न तत्र परार्थक्रियाऽपेक्ष्यत इति तदपि स्वतो निश्चितप्रामाण्यं । अत एवार्थक्रियापरंपरानुसरणादनवस्थादोषोपि दुस्थ एव । यत्त्वनभ्यस्तदशायां संदिग्धप्रामाण्यमुत्पत्तौ[13] तस्यार्थक्रियाज्ञानादनुमानाद्वा प्रामाण्यं निश्चीयते । एतच्चाविसंवादनं बाह्यार्थेतरवादयोः समानं प्रमाणलक्षणं (।) वि ज्ञा न नयेपि[14] साधननिर्भासज्ञानानन्तर[15] मर्थक्रिया[16] निर्भासज्ञानमेव[17] संवादः । अतो विज्ञप्तिमात्रत्वे प्रमाणेतरविभागव्यवहारोऽसंकीर्णः ।

ननु शब्दगन्धरसस्पर्शान् चित्ररूपञ्च पश्यतो ज्ञानस्य परमर्थक्रियाज्ञानं नास्तीति तत्प्रमाणन्न[18] स्यादित्याह ।

...v.1.3c शाब्देप्यभिप्रायनिवेदनात् ॥ ३ ॥

'शाब्दे' शब्दजनिते ज्ञानेऽपि शब्दाद् गन्धादिविषयेऽपि 'अभिप्राय'स्याभिप्रेतार्थक्रिया (या) 'निवेदनात्' प्रतिपादनात्प्रामाण्यं (।) अर्थक्रिया हि क्वचित्स्वरूपप्रतिपत्तिरेव । क्वचित्ततोऽन्या यथासम्भवं व्यवहारविषयः । तत्प्रापणञ्च प्रामाण्यमिति नाव्यापकं प्रमाणलक्षणम् । (३)

ननु शब्दस्यार्थप्रतिबन्धाभावान्न प्रामाण्यं स्यादिष्यते चानुमानत्वादित्याह(।)

वक्तृव्यापारविषयो योर्थो बुद्धौ प्रकाशते ।
प्रामाण्यं तत्र शब्दस्य नार्थतत्त्वनिबन्धनम् ॥ ४ ॥

'वक्तृर्व्यापारो' विवक्षा 'तस्य विषयो योऽर्थः' समारोपितबही रूपो ज्ञानाकारः प्रकाशते 'बुद्धौ' विवक्षा[19] त्मिकायां (।) 'तत्र शब्दस्य प्रामाण्यं' लिङ्गत्वं । शब्दादुच्चरिताद्विवक्षितार्थप्रतिभासी विकल्पो[20] नुमीयत इत्यर्थः । तत्कार्यत्वात्तच्छब्दस्य । 'न पुनरर्थतत्त्वनिबन्धनं' तत्प्रतिबन्धाभावात् ॥ (४)

ननु घ[21] टोयमित्यादिज्ञानात्प्रवर्तमानस्य सम्बन्धोस्त्येवेति तत् प्रमाणं स्यात् (।) इत्याह

[11] ३ मरुमरीच्यादौ ।
[12] ४ प्रमेयस्य ।
[13] १ सत्यां ।
[14] २ अव्यापकत्वं निरस्यन्नाह ।
[15] ३ वह्निज्ञानान्तरं दाहादिज्ञानं ।
[16] ४ रविचन्द्राम्बुदचित्रादीनां दर्शनमेवार्थक्रियास्थितिः ।
[17] ५ यदर्थाकारं ज्ञानं तद् बाह्यार्थाविनाभावि यथा अर्थक्रियानिर्भासं ।
[18] ६ विना भ्रान्तिं प्रयुक्ते ।
[19] ७ संकेतबलात् ।
[20] ८ विकल्पशब्द . . . न नदी . . . . . . । . . .
[21] ९ येन ज्ञात्वा प्रवृत्तस्यार्थसंवादस्तच्चेत्प्रमाणं घटविकल्पोपि स्यात्प्रमा ॥

।

[005/s]

गृहीतग्रहणान्नेष्टं सांवृतं, धोप्रमाणता ।
प्रवृत्तेस्तत्प्रधानत्वात् हेयोपादेयवस्तुनि ॥ ५ ॥

'गृहीतग्रहणान्नेष्टं सांवृतं' दर्शनोत्तरकालं सांवृतं विकल्पज्ञानं प्रमाणं नेष्टं [2b/MA] दर्शनगृहीतस्यैव ग्रहणात् तेनैव च प्रापयितुं शक्यत्वात् सांवृतम[22] किञ्चित्करमेव । कस्मात्पुनर्द्धियः 'प्रमाण'तेष्यते नेन्द्रियादेः(।) 'हेयोपादेयवस्तु'विषयायाः 'प्रवृत्ते[23] स्तत्प्रधानत्वात्' ज्ञानप्रधानत्वात् धिय एव प्रामाण्यं (।) न हीन्द्रियमस्तीत्येव प्रवृत्तिः किन्तर्हि ज्ञानसद्भवात् साधकतमश्च प्रमाणं तस्याव्यवहितव्यापारत्वात् । (५)

एवं फलार्थिनां प्रवृत्तिव्यवहारकारित्वेन धियः प्रामाण्यं प्रतिपादितं । साम्प्रतमधिगमफलविभागकारित्वमाह ।

...v.1.6a विषयाकारभेदाच्च धियोधिगमभेदतः ।

'धियो' विषयस्येवाकारो 'विषयाकारः[24]' नीलादिस्तस्य 'भेदात् विशेषादधिगम[25]' स्यार्थप्रतीते'र्भेदा'द्विशेषाद्धिय एव प्रामाण्यं नीलस्वरूपं हि ज्ञानं नीलप्रतीतिरन्यादृशमन्यथेति धीरेव प्रमाणं ।

ननु यथाधिगमसाधन[26] माकारस्तथेन्द्रियमपि तदुत्पत्तेरत आह (।)

...v.1.6b भावादेवास्य तद्भावे;

तस्याकारस्य 'भावेऽस्या'धिगमस्य 'भावादेव' साधनमव्यवहितत्वात्न त्विन्द्रियादि तद्भावेपि ज्ञानानुत्पत्तावधिगमाभावात् । कश्चि[27] दाह (।) सर्वज्ञानानामबाधितत्वलक्षणं प्रामाण्यं [28] स्वत एव सिध्यते[29] बाधकारणदोषज्ञानाभ्यां क्वचित्तदपोह्यते यथा शुक्तिकायां रजतज्ञाने[30] चन्द्रद्वयदर्शने वा । तच्चेदमयुक्तं यतः (।)

...v.1.6c स्वरूपस्य स्वतो गतिः ॥ ६ ॥

[006/s]

'स्वरूपस्य स्वतो गति[31]' र्न प्रामाण्यस्य । स्वतो हि प्रामाण्यस्याभिव्यक्ति[32]र्वक्तव्या । न तूत्पत्तिः । ज्ञानात्मभूतस्य स्वस्मादुत्पत्तिविरोधात् । यदि च स्वतोऽबाधितत्वं प्रामाण्यमभिव्यक्त्या व्यवस्थापितं न तस्य बाधकानां सहस्रेणापि बाधोयुक्तः । अथ सम्भवति बाधके बाधकादर्शनं यत्र तत्राबाधितत्वमपोह्यते बाधकदर्शनेन । एवन्तर्हि बाधकादर्शनान्नाबाधितत्वं किन्तर्हि बाधका-

[22] १ . . . . . . . घटः । तद्गतसत्ता महासामान्यं । तत्संख्यान्तर्गतः । उत्क्षेपणं कर्म तस्यैवैते व्यपदेशा इति सांवृताः ।

[23] २ ज्ञात्वैव पुंसः प्रवृत्तेः ।

[24] ३ रूपं

[25] ४ धियः ।

[26] ५ अधिगमस्य साधनमिन्द्रियादुत्पत्तेः ॥

[27] ६ मीमांसकः ।

[28] ७ उत्तरकालभाविनानभ्यासजेन चेत् ।

[29] ८ विषयाकारस्य स्वसम्वेदनात् ज्ञानसत्तासिद्धिः ।

[30] ९ स्वतः प्रामाण्यस्य ज्ञाते ज्ञाने तदात्मभूतस्य प्रामाण्यस्यापि ज्ञातत्वात् ।

[31] १ ज्ञानं । साधनं ।

[32] १ ज्ञानं । साधनं ।

भावात् । तस्य चादर्शनादन्यन्न साधनं । तच्चेदसाधनं नाबाधितत्वं नाम प्रामाण्यं नाप्यस्य स्वतः सिद्धिः । अतः प्रथमं बाधकादर्शनात्प्रसक्तमबाधितत्वं बाधदर्शनादपोद्यत इति किमत्रायुक्तं । ईदृश एव बाध्य[33] बाधकभावः सर्व्वतः ॥

कीदशोऽत्र प्रस[34] ङ्गार्थः (।) किं सत्त्वमुत सत्त्वनिश्चयौ । सम्भावनामात्रम्वा । तत्र न तावदनयोः पक्षयोरपवादो युक्तः । सतः केनचिदपि बाधितुमशक्यत्वात् अन्त्येपि न स्व[35] तोऽबाधितत्वनिश्चयः तद्विरुद्धत्वात् सम्भावनायाः । अनिश्चितमेव तत्राबाधितत्वं कथ[36] मन्यथोत्पद्यत इति चेत् । न तर्हि स्वतःप्रामाण्यनिश्चय इति यत्रापि बाधदर्शनं नास्ति तत्राप्यनाश्वास एव (।) एवञ्च बाध्यबाधकभावः 'सदसत्तापक्षयोरसङ्ग[37] तो' वेदितव्यः ॥(६)

...v.1.7a [38] प्रामाण्यं व्यवहारेण;

यदि स्वरूपमात्रं स्वतो गम्यते न प्रामाण्यं कथन्तर्हि तदवगम्यमित्याह । 'प्रामाण्यम्व्यवहारेणार्थक्रियाज्ञानेन' (।) यस्य साधनज्ञानस्य तादात्म्यादनुभूतेपि प्रामाण्ये साशङ्का व्यवहर्त्तारोऽनभ्यासवशादनुत्पन्नानुरूपनिश्चयाः तत्रार्थक्रियाज्ञानेन प्रामाण्यनिश्चयः । अन्यत्र तु विभ्र[39] मशङ्कासङ्कोचादुत्पत्तावेव स्वरूप[40] स्य प्रामाण्यस्य स्वतो गतिरित्युक्तं ॥ अथवा[41] चक्षुर्विज्ञानेन रूपक्षण एको दृश्यते न भावी प्राप्यो नापि स्पर्शः तत्कयमन्यदर्शनमन्यप्राप्त्या प्रमाणं । एवं ह्यतिप्रसङ्गः स्यात् । [007/s] अनुमानञ्च व्याप्तिग्रहणसापेक्षं व्याप्तिश्च प्रत्यक्षेण पुरोवर्त्तिरूपमात्रग्राहिणा कथं शक्यग्रहा । देशकालव्यक्तिव्याप्त्या च व्याप्तिरुच्यते यत्र यत्र धूमस्तत्र तत्राग्नि[3a/MA]रिति प्रत्यक्षपृष्ठजश्च विकल्पो न प्रमाणं प्रमाणव्यापारानुकारी त्वसाविष्यते । यत्रायमध्यक्षव्यापारमतिक्रम्याधिकमारोपयति 'तत्र न प्रमाणं अमूलकत्वात्तस्य' प्रमाणप्रमेयस्य । विजातीयव्यावृत्तेरध्यक्षेण दृष्टत्वादस्त्येव मूलमिति चेत् न सजातीयव्यावृत्त्या विशेषितत्वात्तस्याः । अन्यथा शाबलेयनाशम्प्रतियता प्रत्यक्षेण गोमात्रनाशो व्यवस्थाप्येत । अनुमानाच्च व्याप्तिग्रहणेऽनवस्थापत्तिः । अत आह । 'स्वरूपस्य स्वतो गतिः' ॥

स्वरूपमात्रं स्वतो गम्यते न प्राप्यरूपसापेक्षं प्रामाण्यन्नाम किञ्चिदस्ति । कथन्तर्हि तद्व्यवस्थेत्याह । 'प्रामाण्यम्व्यवहारेण ।'

सांव्यवहारिकस्येदं प्रमाणस्य लक्षणं संव्यवहारश्च भाविभूतरूपादिक्षणानामेकत्वेन संवादविषयोनवगीतः सर्व्वस्य । साध्यसाधनयोरेकव्यक्ति[42] दर्शने 'समस्त'तज्जातीयतथात्वव्यवस्थानं सम्वा[43] दमवधारयन्ति व्यवह[44] र्त्तारः । तदनुरोधात् प्रामाण्यम्व्यवस्थाप्यते । तत्त्वतस्तु स्वसम्वेदनमात्रमप्रवृत्तिनिवृत्तिकं ॥

---

[33] २ सतो न वाचा सम्वादे वाऽसतः स्वयमेवासत्त्वात् । ---सिद्धान्ती

[34] ३ अबाधितत्वं प्रसक्तमिति ।

[35] ४ प्रमाणमिदमिति निश्चयरूपा न च व्यक्तिः । प्रमाणतदाभासयोरुत्पत्तिकाले संशयादभ्यासम्विना ॥

[36] ५ निश्चितत्वादित्वेन ।

[37] ६ स्वतःप्रमाण्यसिद्धिरित्युत्पत्तिर्व्यक्तिर्व्वा स्यात् सिद्धः शब्दः सिद्ध ओदनवत् । नोत्पत्तिः । जाताजातज्ञानयोरकारकत्वात् । असत्त्वे नाजातस्य जातस्य प्रामाण्यात्सत्वात् ।

[38] * द्रष्टव्यं परिशिष्टं १।६

[39] ७ इति बहिरर्थे प्रामाण्याभावोस्य ।

[40] ८ स्वसम्वेदनेन ।

[41] ९ स्वरूपस्य स्वतो गतिः । प्रामाण्यं व्यवहारेणेत्यस्य व्याख्यान्तरमाह ।

[42] १ यदि धूमो वह्नेरन्यतोपि जायेतेह वह्नेर्न जायेत द्विकारणमकारणं यतः ।

[43] २ साध्याधिगतिः साधनं सारूप्ये तयोः ।

[44] ३ प्रागदृष्टो धूमाधीः ।

ननु यत्र तावदभ्यस्तसाधनज्ञानादिषु निरस्तभ्रमा व्यवहारिणस्तेषां स्वत एव प्रामाण्यनिश्चयः यत्त्वनभ्यस्तसाधनं ज्ञानं तस्यापि व्यवहारेणेति निष्फलं शास्त्रप्रणयनमित्याह ।

...v.1.7b शास्त्रं मोहनिर्तनं ।

यदि व्यवहारतः प्रमाणस्वरूपसिद्धिः परस्परविरो[45] धीनि लक्षणशास्त्राणि न स्युः । तस्माच्छास्त्रेण लक्षणोपदर्शनात् तद्विषयः संमोहो निवर्तनीयः । येन[46] परलोकनिःश्रेयसादेर्व्यवहाराप्रसिद्धस्य सिद्धिर्भवति ।

## (२) अज्ञातार्थप्रकाशकम्

तदेवमविसम्वादनं प्रमाणलक्षणमुक्तमिदानीमन्यदाह ।
[008/s]

...v.1.7c अज्ञातार्थप्रकाशो वा;

प्रकाशनं प्रकाशोऽज्ञा[47] तस्यार्थस्य प्रकाशो ज्ञानं (।) तत्प्रमाणं । अर्थग्रहणेन द्विचन्द्रादिज्ञानस्य निरासः । अज्ञातग्रहणेन साम्वृतस्यावयव्यादिविषयस्य । पृथग् गृहीतानामेव रूपादीनामेकत्वेन विकल्पनात् (।) स्मरणश्च पूर्वगृहीतार्थविकल्परूपत्वान्नाधिकग्राहि (।) गृहीते च प्राक्तनमेव प्रमाणं । इदानीन्तु स्मरणमप्र[48] वर्तकं तस्यैव सन्देहात् ॥

नन्वविसम्वादादेवाज्ञातार्थप्रकाशो ज्ञातव्यः । अन्यथा पीतशंखज्ञानमपि प्रमाणं स्यात् । तथा चाविसम्वादित्वमेव प्रमाणमस्तु किमनेनाभि[49] हितेन (।) स्यादेतद्यदि सम्भवित्वमात्रे लक्षणं स्यात् । किं नूद्दिष्ट[50] त्वेनान्यथा ज्ञानत्वसत्त्वादिकमपि लक्षणं स्यात् ।

नन्वविसम्वादिभ्योऽज्ञातार्थप्रकाशकं ज्ञायते[51] न तु ज्ञानत्वादिभ्य इति पूर्वस्यापेक्षणीयता लक्षणेन । न तु परेषामिति विशेषः । यद्येवं तदाऽविसम्वादित्वेप्यज्ञातार्थप्रकाशनमपेक्षत एव (।) नान्यथा सांवृतस्य निरासः शक्यः कर्त्तुं (।) तस्मादुभयमपि परस्परसापेक्षमेव लक्षणम्बोद्धव्यं ॥ (७)

ननु स्वलक्षणप्रतीतेरूर्द्ध्वं सामा[52] न्यविषयं ज्ञानमज्ञातार्थप्रकाशकत्वात्प्रमाणं प्राप्तं तदेवाह (।)

...v.1.7d स्वरूपाधिगतेः परम् ॥ ७ ॥

...v.1.8a प्राप्तं सामान्यविज्ञानं ;

प्रमाणमिति शेषः[53] ।

अत्राह ।

---

[45] ४ सम्यग्ज्ञानाद् धर्मास्तित्वपरलोकनिश्चयः ततो मोक्षाधिगमात् प्रत्यक्षपृष्ठविकल्पाख्यं (।)

[46] ५ अस्याज्ञातस्य ग्राह्यत्वेपि नायमर्थः ।

[47] १ बुद्धोप्यन्याज्ञातज्ञानात् अत्राप्यविसम्वादादेव ।

[48] २ पूर्व्वदृष्टस्य यदस्तित्वं ।

[49] ३ ज्ञानश्वासच्च स्यान्न बाह्ये प्रकाशकं यथा विकल्पकं ।

[50] ४ यद्यनधि (गम) विषयं प्रमाणं प्रत्यक्षाग्र( ?गृ) हीतं सामान्यं स्वलक्ष णविषयत्वात् परन्तु प्रत्यक्षग्राह्यं रूपिसमवायात्तचाक्षुषमाह मीमांसकादेः ।

[51] ५ विसम्वादिनः प्रकाशकत्वायोगात् ।

[52] ६ प्रमाणसमुच्चये आगमे च ।

[53] ७ अस्तु वाऽनधिगमस्तथापि ।

...v.1.8b अविज्ञाते स्वलक्षणे (।)
यज्ज्ञानमित्यभिप्रायात्;

[009/s]

अज्ञातस्वलक्षणविष[54] यं 'यज्ज्ञानं'तत्प्रमाणं न ज्ञातविषय'मित्यभिप्रायान्नातिप्र'स[55] ङ्गः ॥ एवन्तर्हि अनुमानमपि सामा[56] न्यविषयत्वात् प्रमाणं न स्यात् । नैतदस्ति तदपि च लक्ष[57] णमेवानित्यादिरूपतया विषयीकरोति ॥

[3b/MA]

किं पुनरधिगतस्वलक्षणविषयमेव प्रमाणमिष्टं ।

...v.1.8d स्वलक्षणविचारतः ॥ ८ ॥

'स्वलक्षणविचारतो'ऽर्थक्रियार्थिभिः स्वलक्षण[58] मेव प्रमाणेनान्विष्यते तस्यैवार्थक्रियासा-धनत्वा[59] त् । यदेव च तैरन्विष्यते तदेव शास्त्रे विचार्यते सांव्यवहारिकप्रमाणाधिकारात्[60] ॥ (८)

## (३) भगवतः प्रामाण्यम्

यथोक्तद्विविधलक्षणमुक्तं यत्प्रमाणं (।)

...v.1.9a तद्वत् प्रमाणं भगवान्;

'तद्वद् भगवान् प्रमाणं' । यथाभिहितस्य सत्यचतुष्टयस्याविसम्वादनात्तस्यैव परैरज्ञातस्य प्र[61] काशनाच्च ॥

यद्येवं नमस्कारश्लोके प्रमाणायेत्येवास्तु 'प्रगाणभूताये'ति किमर्थमित्याह ।

...v.1.9b अभू[62] तविनिवृत्तये (।)
भूतोन्क्तिः;

[010/s]

'भूतशब्द'निर्देशोऽभूतस्य नित्यस्य निवृत्त्यर्थ 'नित्यं प्रमाणं ना'स्तीत्यर्थः ।

...v.1.9c साधनापेक्षा ततो युक्तां प्रमाणता ॥ ९ ॥

ततः साध[63] नापेक्षा प्रमाणता युक्ता भगवतश्च प्रामाण्यसाधनं वक्ष्यमाणं (९) ।

---

[54] १ ज्ञानत्वादीनां ।

[55] २ अनधिगते स्वलक्षणे यदनधि (गम) विषयमिति सविशेषणं लक्षणं वाच्यं ।

[56] ३ शब्दः प्रत्यक्षोऽन्यथाऽश्रयासिद्धिः स्यात् । दृष्टस्य शब्दानित्यत्वस्य प्रत्यायनात् ज्ञातस्य ग्राह्यत्वे . . . . . .।

[57] ४ अध्यक्षेण तु स एवागृहीतो यत्र निश्चयो जनितः । व्यावहारिकाधिकारात् अन्यापोहविषयाच्च ॥

[58] ५ अनुपलब्धिश्च प्रदेशः ज्ञानम्वेति वस्तुतो वस्त्वधिष्ठानैव ।

[59] ६ आत्माकाशादौ तद्वस्तुभूतशून्या तद्बुद्धिरेवाश्रयः ।

[60] ७ आकाशादिविभुत्ववदीश्वरप्रामाण्यं कटाक्षयति । द्विविधेन यथोक्तेन लक्षणेन निर्दिष्टं यदेतत् प्रमाणं । प्रमाणसाधर्म्यन्तु साधयिष्यमाणं सिद्धं कृत्वोदाहृतं ।

[61] ८ लक्षणं ।

[62] ९ अजातत्वनिवृत्त्यर्थ जातत्वोक्तं ।

[63] १ यदा भगवज्ज्ञानमुत्पन्नं तदा नाकस्मिकमिति स्वकारणं सूचयतीति अनुष्ठितप्रामाण्याविपरीतसाधनश्च भगवानिति स्वभावहेतुः ।

## (४) ईश्वरादेरप्रामाण्यम्

### क. नित्यानिंत्ययोरप्रमाणता

#### (क) नित्यस्याप्रमाणता

....1.10a नित्यं प्रमाणं नैवास्ति प्रामाण्यात्;

कस्मात् पुनर्नित्यं प्रमाणं नैवास्ति(।)आ[64]ह वस्तुनोर्थक्रियाकारिणः सतो गतेर्ज्ञानस्य 'प्रामाण्यान्नास्ति नित्यं प्रमाणं' । अत्रैव कारणमाह ।

....1.10b वस्तुसंगतेः ।
ज्ञेयानित्यतया तस्या अध्रौव्यात्;

'ज्ञेय'स्य वस्तुनोऽर्थक्रियाकारित्वेना'नित्य'त्वात् 'तस्या वस्तुसङ्गते'रपि तज्जन्यायाऽ(?अ)'ध्रौव्याद'नित्यत्वात् ।

स्यादेतद् (।) अनित्यविषयमनित्यमेव ज्ञानं केवलं यस्य तत् ज्ञानं स ज्ञाता 'नित्यो' भविष्यतीत्याह (।)

....1.10c क्रमजन्मनां ॥ १० ॥

....1.11a नित्यादुत्पत्तिविश्लेषादपेक्षाया अयोगतः ।

ज्ञानस्य नित्यात् ज्ञातुरु'त्पत्तेर्व्वि[65] श्लेषात्' । नित्यं हि सदैकरूपं यदि 'क्रमजन्मनां' ज्ञानानामर्जनसमर्थं । सकृदेव तानि कुर्य्यात् । अथ समर्थमपि नित्यं क्रमिसहकार्य्यपेक्षया क्रमेण करोति तदयुक्त'मपेक्षाया अयोगात्' ।

कस्मात् सहकार्यपेक्षा न युक्तेत्याह (।),

....1.11b कथञ्चिन्नोपकार्यत्वात्;

[011/s]

नित्यस्य सर्व्वदाऽविशिष्टस्वभावस्य परैः सहकारिभिः 'कथञ्चिन्नोपकार्यत्वात्' क्व तदपेक्षा । ततः सर्व्वज्ञानानि सकृदेव कुर्य्यादित्यवार्य्यः प्रसङ्गः ॥

#### (ख) अनित्यस्याप्यप्रमाणता

स्या[66] देतत् (।) सन्तानविशेषान्निसर्गसिद्धांपरापरक्षणात्मकं साधनापेक्षा[67] शून्यमनित्यमेव प्रमाणं भविष्यतीत्याह ।

....1.11c अनित्येप्यप्रमाणता ॥११ ॥

---

[64] २ नित्यमीश्वरं नैयायिकाः प्रमाणमाहुः । आसंसारमेकं प्रतिसत्त्वं बुद्धिं प्रमाणमाहुः सांख्याः ।

[65] ३ अयोगात्

[66] १ यो यत्साधनमविपरीतमनुतिष्ठति तस्य तत्प्राप्तिर्भवति । यथातुरस्यारोग्यसाधनमविपरीतमनुतिष्ठतः ।

[67] २ ईश्वरज्ञानं ।

‘अनित्येपि अपि’शब्दान्नित्येप्य‘प्रमाणता’ साधनाभाव इत्यर्थः ॥ (११)

ननु सन्त्येव साधनानि यथा स्थित्वा प्रवृत्तेः संस्थानविशेषादर्थक्रियासाधनत्वात् कार्यत्वादेश्च विमत्यधिकरणानि तनुभुवनकर[68] णादीन्युपादानाद्यभिज्ञबुद्धिमत्पूर्व्वकाणि तुर्य्यादिवत् प्रासादादिवत् वास्यादिवत् घटादिवच्चे[69] त्येवमादीनि । स्थित्वा प्रवृत्त्यादयः । तुरीतन्त्वादिषूपादानाद्यभिज्ञबुद्धिमत्पूर्व्वकत्वमात्रेणोपलब्धव्याप्तयोधिकरणसिद्धा[70] न्तन्यायेन नित्यव्यापिसर्व्वज्ञनित्यबुद्ध्याश्रयात्मविशेषविशिष्टमेव पक्षे साध्यमुपनयन्ति धूम इव पर्वतवर्त्तिनं दहनं । न ह्यनित्येनाव्यापिना वा नानादेशकालकार्यजातं शक्यक्रियं । नापि सर्व्वस्य कार्यस्योपादानकारणान्यसर्व्वविद् वेदितुं समर्थः । नाप्यनित्यया बुद्ध्याऽतीतानागतकालवर्त्ति वस्तुजातं ज्ञातुं शक्यं(।) तद्वेदनाच्च सर्व्ववित्(।) न चैते हेतवोऽसिद्धा धर्म्मिणि सत्त्वनिश्चयात् । न च विरुद्धाः सपक्षे सत्त्वात्(।) नानैकान्तिकाः साध्यसाधनयोर्व्याप्तिनिश्चयात् । न च कालात्ययापदिष्टाः साध्यसाधनबाधनाभावात्(।) नापि प्रकरणसमा विपर्ययसाधकहेत्वभावादिति । अत्राह ।

## (ख. ईश्वरदूषणम्)

### (क) सन्निवेशमात्रान्नेश्वरानुमानम्

....1.12a स्थित्वा प्रवृत्तिः संस्थानविशेषार्थक्रियादिषु ।
इष्टसिद्धिः;

[012/s]

‘स्थित्वा प्रवृ[71] त्तिः-संस्थानविशेषार्थक्रियार्थक्रियादिषु’ । साधनेषूपादानाद्यभिज्ञबुद्धिमत्पूर्व्वकत्वे साध्ये ‘इष्टसिद्धि’रस्माकं । वयमपि साधारणासाधारणचेतनालक्षणकर्मनिर्मितं जगद्विचित्रमिच्छामः(।) तत्साधयता च परेण साहाय्यकमनुष्ठितं । येन साध्यगतेन विशेषेण विना धर्म्मिणि लिङ्गमनुपपन्नं तस्यैवाधिकरणसिद्धान्तेन [4a/MA] प्रतीतिर्यथा पर्व्वतवर्त्तिनो धूमाद्वह्नेः पर्व्वतवर्त्तित्वस्य(।) न ह्यन्यदेशस्थेनाग्निना जन्यमानस्य धूमस्य पर्वतवर्त्तित्वमुपपद्यते(।) नत्वेवं नित्यत्वसर्व्वज्ञत्वव्यापित्वादि विना चेतनस्य तनुभुवनादिगतं स्थित्वा प्रवृत्त्यादिकमनुपपन्नं(।) नित्यत्वादिविपर्यययोगिनापि चेतनेन क्रियमाणं तद् घटत एव ॥

ननूक्तमेवानित्याव्यापिनः सर्व्वदेशकालवर्त्ति कार्यमकार्यं असर्व्वविदश्च सर्व्वोपादानाद्यभिज्ञता नास्तीत्यादिना । सत्यमुक्तमयुक्तन्तूक्तं कर्त्तुरेकत्वासिद्धेः । एकस्य कर्त्तुरनेकदेशकालं कार्यं कुर्व्वाणस्य तदुपादानादिकं जानानस्य नित्यत्वादिकमन्तरेण स्थित्वा प्रवृत्त्यादि नोपपद्यत इति स्यादपि तादृशस्याधिकरणसिद्धान्तेन प्रतिपत्तिः । अनेकेनापि तु नानादेशकालवर्त्तिना स्वस्वकार्यस्योपादानादिजानता क्रियमाणं स्थित्वा प्रवृत्त्यादिसङ्गतमेवात एवैकत्वस्यापि तत एव सिद्धिरयुक्ताऽनेकस्यापि हेतुत्वयोगात् । पक्षायोगव्यवच्छेद एव तु साध्यस्याधिकरणसिद्धान्तेन सिध्यतु न तु तदधिको वह्नेरिव चान्दनत्वादिः ॥

[68] ३ इन्द्रियशरीरादीनां कालान्तरं स्थित्वा प्रवृत्तेः कार्यहेतुषु ।

[69] ४ वैधर्म्येणात्यन्ताभावः ।

[70] ५ यत्प्रसिद्धावन्यप्रकरणसिद्धिः सोऽधिकरणसिद्धान्तः । (न्या॰ सू॰ १।१।३०) यथा सांख्यस्यान्तराभवनिषेधे आत्मैव सञ्चरत्यशरीर इति अपरीक्षिताभ्युपगमात् ॥

[71] १ उपदर्शितमर्थं प्राप्तुकामा कायवाग्व्यापारसहाया बुद्धिः प्रवृत्तिः ।

नन्वनेक एव ते चेतनावन्तोभिमताः[72] (।) न चोपादानादिकं तन्वादीनां ते जानते । नापि तत्कर्तृ त्वमात्मनो मन्यन्ते तत्कथममी कर्त्तारः । [73] अथाधिपत्यमात्रेणैषां कर्त्तृत्वं न तूपकरणाद्यायोजनेन व्यापारेण यथा चन्द्रस्य चन्द्रकान्तद्रुतौ । तेनोपादानाद्यभिज्ञता कर्तृत्वाभिमानश्च नैषां । एवन्तर्ह्युपादानाद्यभिज्ञचेतनपूर्व्वकत्वे साध्ये नेष्ट[74] सिद्धिर्व्वक्तव्या । यद्येवं भवत एव सूक्ष्मेक्षिका, तदा चेतनापूर्व्वकत्वमात्रं साधय, दृष्टान्ते च कुम्भकारत्ववत् सदप्युपादानाद्यभिज्ञत्वमप्रयोजकं मन्यस्व ॥

सत्कथं परिहर्त्तव्यमिति चेत्(।) तत्किं[75] कुम्भकारत्वमपरिहार्य । [76] अप्रयोजकत्वाद् त्यज्यत इति चेत् उपादानाद्यभि[77] ज्ञत्वेपि समानमेतत्(।) उपादानादिकमजानतोपि बुद्धिमतोऽनेकस्याधिष्ठा[78] नमात्रेणापि कार्य्याणामुत्पत्तियोगात् ।

[013/s]

....1.12b असिद्धिर्वा दृष्टान्ते संशयोऽथवा ॥ १२ ॥

अथ नित्यत्वादिविशिष्टपुरुषपूर्व्वकत्वमेव साध्यं तदाऽ'सिद्धिर्दृष्टान्ते' । साध्यशून्यो दृष्टान्त इत्यर्थः । न हि क्वचिद् दृष्टान्ते तादृशं साध्यमुपलब्धं येन व्याप्तिः प्रतीयेत(।) असिद्धव्याप्तिकश्च हेतुरनैकान्तिक एव । स्थित्वा प्रवृत्तेरर्थक्रियासमर्थत्वादिति हेत्वोः 'संश[79] योऽथवाऽ'नैकान्तिकत्वं तेनैव त्वभि[80] मतपुरुषेण । न ह्यसौ स्थि[81] त्वा प्रवर्तमानः कार्य्येष्वर्थ क्रिया[82] कारी वा तथा पुरुषाधिष्ठितः । अनवस्थाप्रसङ्गात् ।(१२)

....1.13a सिद्धं यादृगधिष्ठातृभावाभावानुवृत्तिमत् ।
सन्निवेशादि;

अथवा 'या[83] दृ'शबुद्धिमत्पूर्व्वकं 'सन्निवेशादि' दृष्टान्ते दृष्टं तस्य धर्मिण्यसिद्धिरित्याह । घटे दृष्टान्तधर्मिणि 'सन्निवेशादि यादृशं' पृथुबुध्नोदरादि दृष्टैकव्याक्तिजात्याविशेषितमधि'ष्ठातुः' पुंसोऽन्वयव्यतिरेकानुविधानवत् व्यवहारप्रगल्भपुरुषाणां तत्सिद्धान्तानुरोधरहितानां प्रत्यक्षबलेनानुरूपनिश्चयोत्पा'दात्सिद्धं' निश्चितं ॥

....1.13c तद्युक्तं तस्माद् यदनुमीयते ॥१३ ॥

तस्मात्सन्निवेशादपरत्रानुपलब्धपुरुषजन्मनि घटे यद् बुद्धिमदधिष्ठानम'नुमीयते तद्युक्तं' तस्यैव पुरुषकार्यत्वेन निश्चयात् ॥ [84] असन्निवेशव्यावृत्तं सन्निवेशमात्रं तु सदपि न तत्का-

---

[72] २ बौद्धेन ।

[73] ३ ईश्वरादिकं विशेषं त्यक्त्वा सामान्येन चेतनामात्रपूर्व्वत्वं बौद्धेनेष्टसिद्धिरुक्ता न युक्ता ।

[74] ४ बौ[द्धः] प्राह ।

[75] ५ साध्ये ।

[76] ६ ईश्वरं साधयतः

[77] ७ कुम्भकृच्चेत् युज्यते । ईश्वरोप्यत्र न प्रयोजको दृष्टः इति त्यज्यतां ।

[78] ८ मयूरचन्द्रिकोपादानं मयूरो न वेत्यर्थे च तदधिष्ठानाच्चन्द्रिकोत्पद्यते ।

[79] १ सन्दिग्धासिद्धोयं यथाग्निजन्यत्वेनानिश्चितो धूमः ।

[80] २ स यथाऽन्यानपेक्षः करोत्येवं दृष्टकारणेपि स्यात् स्थित्वा स्थित्वा कार्यं प्रवर्तयति ।

[81] ३ संशयश्चात्र दृष्टकारणस्य तदपेक्षत्वे सोपि तथा स्यात् । न च तथा । व...नामेकः प्रधानं मन्दाश्वर(?)भात्यत्र । एकाभावेप्यभावा कार्यस्य गुणप्रधानभाव इति कृत्वा स्थित्वेत्यादि उपयोगिनां ज्ञानस्य प्रधानत्वानिश्चयात् संशयः ।

[82] ४ क्रमकरणमपि न नित्यत्वादेव ।

[83] ५ अर्थक्रियाऽकरणेपि न वस्तुत्वमनव स्थातः । स्थित्वा प्रवृत्तिरपि न नित्यत्वादिति नित्यपक्षे ।

[84] ६ न पुनर्वस्तुभेदे ।

र्यतया प्रत्यक्षमुपस्थापयति । प्रत्यक्षव्यापारविवादे च पटुप्रचारा व्यवहारिणः शरणं (।) न हि कश्चिद् व्यवहारी घटं पुरुषकृतं पश्यन् शरावादि पर्व्वतादिकम्वा तत्कृतमवधारयति (।) यदा तु शरावादीनपि तत उदयमासादयतः पश्यति तदा तानपि तत्कृतानवैति (।) अतः सन्निवेशविशेषं[4b/MA] पुरुषकार्यं दृष्टवतः सन्निवेशमात्रात्तदनुमानमयुक्तं (। १३)
[014/s]

एतदेवाह (।)

...v.1.14 वस्तुभेदे प्रसिद्धस्य शब्दसाम्यादभेदिनः ।
न युक्तानुमितिः पाण्डुद्रव्यादिवद् हुताशने ॥ १४ ॥

'वस्तुभेदे' घटे 'प्रसिद्धस्य' पुरुषपूर्व्वकत्वस्य सन्निवेश इति 'शब्दसाम्यादभेदिनः' सन्निवेशमात्रात् पर्व्वतादौ 'न युक्तानुमितिः पाण्डुद्रव्यादिवद् हुताशने' । यथा पाण्डुविशेषस्य धूमस्य कारणत्वेन दृष्टे वह्नौ पाण्डुशब्दसाम्यादभेदिनो यतः कुतश्चिद् पाण्डुद्रव्याद् धूमादेरनुमानमनुचितमतो यत्तद् बुद्धिमद्व्याप्तं सन्निवेशा[85] दि त[86] द्धर्म्मिणि नास्तीत्यसिद्धिर्हेतूनां ॥ (१४)

ननु सन्निवेशादिसामान्यादसन्निवेशादिव्यावृत्त्या हेतवो भविष्यन्तीत्यत आह (।)

...v.1.15 अन्यथा कुम्भकारेण मृद्विकारस्य कस्यचित् ।
घटादेः करणात् सिध्येद् वल्मीकस्यापि तत्कृतिः ॥ १५ ॥

'अन्यथा' यदि साध्यव्याप्तं विशेषं त्यक्त्वा सामान्यं लिङ्गं क्रियते तदा 'कुम्भकारेण कस्यचिद् घटादेर्मृद्विकारस्य करणाद्वल्मीकस्यापि' मृद्वि[87] कारत्वा'त्तेन' कुम्भ[88]कारेण 'कृतिः' करणं 'सिध्येत।' । (१५)

स्यादेतत् (।) न मृद्विकारत्वं कुम्भकारव्याप्तं तमन्तरेणापि वल्मी[89]कस्योत्पत्तेः । यद्ये[90]वं बुद्धिमन्तमन्तरेणैतत्तन्वादि जायत इति तदपि पक्षो न स्यात् । अथ पक्षेण न व्यभिचारः वल्मीकेप्ययं न्यायः समानः (।) तस्मात्सन्निवेशादिसामान्यं व्याप्त्यसिद्धेरनैकान्तिकमेव ॥[91] न चैतत्कार्यसमं दूषणं यतः (।)

...v.1.16 साध्येनानुगमात् कार्ये सामान्येनापि साधने ।
सम्बन्धिभेदाद् भेदोक्तिदोषः कार्यसमो मतः ॥ १६ ॥

'साध्येनानि'त्यत्वेना'नुगमाद्' व्यापनात् 'कार्ये' कृतकत्वे 'सामान्येनापि साधने' कृते 'सम्बधिनोः' साध्यधर्मिदृष्टान्तधर्मिणो'र्भेदात्' सम्बद्धस्य साधनस्य 'भेदोक्त्या' यदि साध्यधर्मिगतं कार्यत्वं हेतुस्तदा नान्वयसिद्धिरथ दृष्टान्तगतं तदाऽसिद्धो हेतुरिति यो दोषः 'स कार्यसमो मतः' ॥ (१६)

अत्र तु सन्निवेशादिसामान्यं न साध्यव्या[92] प्तं सिद्धमिति विशेषेऽसिद्धत्वं सामान्ये [015/s]

---

[85] १ धटादेः ।
[86] २ पर्व्वतादौ ।
[87] ३ घटवत् ।
[88] ४ घटस्य कृतकृत्वं शब्दे नास्तीति यथाकार्यं जात्युत्तरं तथेदमिति चेत् ।
[89] २ पर्व्वतादौ ।
[90] ५ वह्नेः ।
[91] ६ नन्वेतत् कार्यसमं सामान्ये हेतौ विशेषपरिकल्पनादिति ॥
[92] ७ अविशिष्टसंस्थानसामान्यस्यैवाभावात् ।

चानैकान्तिकदू[93] षणं न जात्युत्तरं ॥

ननु सन्निवेशादिशब्दवाच्योऽर्थः 'कुम्भे बुद्धिमद्व्याप्तः प्रतीतः स च तन्वा-' दिष्वपि दृश्यते ततो विशेषे विकल्पो न युक्त इत्याह (।)

...v.1.17 जात्यन्तरे प्रसिद्धस्य शब्दसामान्यदर्शनात् ।
न युक्तं साधनं गोत्वाद् वागादीनां विषाणिवत् ॥ १७ ॥

'जात्यन्तरे' जातिविशेषे घटसन्निवेशादौ 'प्रसिद्धस्य' साध्यस्य बुद्धिमत्पूर्व्वकत्वस्य तं विशेषं परित्यज्य 'शब्दसामान्यदर्शनाद्' सन्निवेशादिमात्रेण 'न युक्तं साधनं' वागादीनां 'गोत्वात्' गोशब्दवाच्यत्वाद्विषाणिवत् विषाणित्वस्येव न युक्तं साधनं विशिष्टजातेरेव विषाणव्याप्त्युपलब्धेः । (१७)

किञ्च (।)

...v.1.18 विवक्षापरतन्त्रत्वान्न शब्दाः सन्ति कुत्र वा ।
तद्भावाद्; अर्थसिद्धौ तु सर्वं सर्वस्य सिध्यति ॥ १८ ॥

'विवक्षापरतन्त्रत्वान्न श[94] ब्दाः सन्ति कुत्र वा' सर्व्वत्रैव सन्ति । तस्य शब्दस्य 'भावात् । अर्थसिद्धौ' सत्यां 'सर्व्वं' यथासमीहितं साध्यं 'सर्व्वस्य' पुंसः 'सिध्यति' उक्तमीश्वरसाधनस्य दूषणं ॥ (१८)

अमुमेव न्यायमन्यत्राप्यतिदिशन्नाह ।

...v.1.19 एतेन का पि ला दीनामचैतन्यादि चिन्तितम् ।
अनित्यादेश्च चैतन्य मरणात् त्वगपोहतः ॥ १९ ॥

'एतेन' शब्दसामान्यमात्रस्यार्थशून्यस्याहेतुत्वकथनेन यत्का'पिलादे'र्बुद्धिसुखा'दीना[95] म'नित्यत्वोत्पत्तिमत्त्वादिहेतुतोऽचेतनत्वमिष्टं तथा दि ग म्ब रा णां चैतन्यं तरूणां सर्व्वस्याः 'त्वचोऽपोह'तोऽपगते'र्मर'णादभिमतं 'तच्चिन्तितं' वेदितव्यं (।) यथा ह्यप्रच्युतप्राच्यरूपस्य तिरोधानमनित्यत्वं सां[96] ख्य स्येष्टं बौ द्ध स्य तु निरन्वयविनाशित्वं । तस्य यथाक्रममुपादाने प्रतिवाद्यसिद्धता वाद्यसिद्धता च ।

[016/s]

ननूभयासिद्धमनित्यत्वमस्ति किञ्चिदृते शब्दसाम्याद् तथा विज्ञानेन्द्रियायुर्निरोधलक्षणं मरणमिष्टं बौद्धसिद्धान्ते तस्य च तरुष्व[97] सिद्धिः । चेतनत्वस्यै[98] व साध्यत्वात् । न ह्यसिद्धेषु त[99] न्निरोधो युक्तः शोष[100] मात्रन्तु तरुषु मरणमुपचारा[5a/MA] दुच्यते । यदि च मरणवाच्यत्वमात्रं

[93] १ कुम्भकारादिनैव कृतत्वसम्भावनया ।

[94] २ यद्यपि न प्रवर्त्तितः शब्दः । तथापि यदैव प्रवर्त्त्यते तदैव भवतीति ।

[95] ३ रूपादिवत् ।

[96] ४ आसर्गप्रलयान्नित्यैका बुद्धिर्न वेदना, प्रकृतिर्भोग्या भोक्ता पुरुषः सांख्यस्य (।) सांख्यः स्वस्वभावाच्युतस्य तिरोधानमनित्यतामाहातिरोधानं बौद्धस्यासिद्धं । निरन्वयनाशः सांख्यस्य । आत्मनः सञ्चरन्तो वृक्षाद्यवस्था भवन्तीति क्षपणः । अनित्यता सामान्या सिद्धिर्व्विनिश्चयेस्ति ।

[97] १ तत्सिद्धौ चैतन्यं सिद्धमिति साध्यं ।

[98] २ न शोषमात्रस्य ।

[99] ३ विज्ञानादिषु तत्र ।

[100] ४ शोषोमरणमित्यपि न वर्ण्णवादिनानेकान्तात् । अपि तु यच्छोषवत्तच्चेतनावन्न सिद्धं विपर्ययेऽबाधात् ॥

हेतुः तदा तैला[101] दिष्वपि तत्सत्त्वात् साधारणानैकान्तिकता ॥(१९)

नन्वेवं कृतकत्वादिकमपि हेतु[102] र्न स्यादाकाशगुणश्शब्दस्य धर्मो बौद्धस्यासिद्धः । अन्यथा चान्यस्येत्यत आह ।

...v.1.20 वस्तुस्वरूपेऽसिद्धेऽयं न्यायः सिद्धे विशेषणम् ।
अबाधकमसिद्धावप्याकाशाश्रयवद् ध्वनेः ॥ २० ॥

'वस्तुस्वरूपेऽसिद्धेऽयन्न्यायः' यथोक्तासिद्धिचोदनालक्षणः वस्तुस्वरूपे तु धर्मिणि हेतौ 'सिद्धे विशे[103] षणमसिद्धावप्यबाधकं' किमिवाका'शाश्रयवद् ध्वनेः' । यथा शब्दस्याकाशगुणत्वं विशेषणमपि न बाधकं धर्मितायाः कृतकत्वादिहेतोर्वा विशेषणासिद्धावपि हि शब्दो धर्मी-प्रत्यक्षसिद्धः । कृतकत्वादि चानुमानसि[104] द्धं तावतैव च साध्यसाधनभावो निर्विरोधः । (२०)

यत्र शब्दोप्यसिद्धो वस्तु तु सिद्धं तत्र कथमित्याह ।

...v.1.21 असिद्धावपि शब्दस्य सिद्धे वस्तुनि सिध्यति ।
औ लू क्य स्य यथा बौद्धेनोक्तं मूर्त्यादिसाधनम् ॥ २१ ॥

'असिद्धावपि शब्दस्य सिद्धे वस्तुनि' साधनाभिमते 'सिध्यति'[105] साध्यो[106] र्थो 'यथा औलूक्यस्य' वै शे षि क स्य परमाणूनामनित्यत्वसाधनार्थं 'बौद्धेन मूर्त्यादिसाधन'[107] [017/s] 'मुक्तं' शब्दासिद्धावपि सिध्यति (।) तथा हि वैशेषिकस्यासर्व[108] गतं द्रव्यपरिमाणं मूर्त्तिरिष्टा बौद्धस्य स्पर्शवति[109] सा प्रसिद्धा । ततो नोभयसम्प्रतिपन्ना मूर्त्तिशब्दवृत्तिर्वाच्यभेदात् ।---

---शब्दस्यासिद्धावपि च स्पर्शवत्त्वलक्षणोर्थो द्वयोरपि सिद्धः स एव हेतुत्वेनाभिप्रेत इति भवति साधनमतश्च (।)

...v.1.22 तस्यैव व्यभिचारादौ शब्देप्यव्यभिचारिणि ।
दोषवत् साधनं ज्ञेयं वस्तुनो वस्तुसिद्धितः ॥ २२ ॥

'तस्यैवा'र्थस्य 'व्यभिचारा'दावादिशब्दादसिद्धत्वे विपर्य्ययव्याप्तौ च 'शब्देप्य[110] व्यभिचा-रिणि दोषवत्साधनं ज्ञेयं' कस्मा'द्वस्तुनो' हेतो'र्वस्तुनः' साध्यस्य 'सिद्धितः' । एवं साध्यव्या-प्तार्थशून्यशब्दमात्रकाणीश्वरसाधनानि दोषवन्ति बोद्धव्यानि । (२२)

### (ख) ईश्वरबाधकं प्रमाणम्

ननु किं पुनरीश्वरस्य बाधकं[111] प्रमाणमित्याह (।)

---

[101] ५ घृतहिङ्ग्वादिषु ।

[102] ६ वैशेषिकेणापौरुषेयशब्दनिषेधाय मीमांसककृतः ।

[103] ७ व्याप्यो हेतुर्न चायं विशेषणव्याप्तः । हेतुवादीष्टश्च साध्यं विशेषणश्च तदनिष्टं ।

[104] ८ यः प्रत्ययभेदभेदी स कृतकः ।

[105] ९ वस्त्वेव वस्तुनः प्रतिबन्धाद् गमकं न शब्दः ।

[106] १० सप्रतिभासादिवादिनां ।

[107] ११ अनित्याः परमाणवो मूर्त्तत्वाद् घटादिवत् ।

[108] १ द्विविधं द्रव्यं सर्व्वगतं पृथिव्यादि असर्व्वगतं घटादि ।

[109] २ न हि स परिमाणं नाम किञ्चिदिच्छति ।

[110] ३ यथा विषाणी शाबलेयः कलभो वा गोत्वात् हस्तित्वाद्वा गमनात् हस्तयोगाद्वेत्यर्थः ।

[111] ४ विश्वकारणमीश्वर इत्यत्र ।

...v.1.23 यथा तत् कारणं वस्तु तथैव तदकारणम् ।
यदा तत् कारणं केन मतं नेष्टमकारणम् ॥ २३ ॥

'यथा' सदृशेन स्वभावेन 'तदी'[112] श्वराख्यं 'वस्तु कारणमिष्टं' सर्ग्गावस्थायां 'तथैव' तेनैव स्वभावेन सर्ग्गात् प्राक् तन्न 'कारणं' केन विशेषेण मतं । न त्व[113] कारणमिष्टं । कारणत्वं ह्यकारकावस्थाविशिष्टत्वेन व्याप्तं तदभावात्कारणत्वाभावः । (२३)

## a. अकारकं न कारणम्

यदि पुनरकारकावस्थाऽविशिष्टोपीश्वरः कारणमुच्यते तदा (।)

...v.1.24 शस्त्रौषधाभिसम्बन्धाच्चैत्रस्य व्रणरोहणे ।
असम्बद्धस्य किं स्थाणोः कारणत्वं न कल्प्यते ॥ २४ ॥

[018/s]

'चैत्रस्य शस्त्रौषधयोः सम्बन्धाद्' व्रणे 'व्रणरोहणे' च वृत्तेऽ'सम्बद्धस्य' व्यापारद्वारेणाप्रत्यासन्नस्य 'स्थाणोः किं कारणत्वं न कल्प्यते' निमित्तस्य समानत्वात् । (२४)

नन्वकारणावस्थातो व्यापारसमावेशादस्ति विशेषः कारणवस्थायामित्याह[114] ।

....1.25a स्वभावभेदेन विना व्यापारोपि न युज्यते ।

'स्वभावभेदेन विना' न केवलं कारकत्वं (।) 'व्यापारोपि' निर्व्यापारस्य नित्यस्य 'न युज्यते' (।)

किञ्च (।)

....1.25b नित्यस्याव्यतिरेकित्वात् सामर्थ्यञ्च दुरन्वयम् ॥ २५ ॥

'नित्यस्याव्यतिरेकित्वात् सामर्थ्यञ्च दुरन्वयं' दुरवगमं न ह्यस्तीति कारणम् (।)अपि तु यदभावात्कार्याभावः स तत्कारणमन्यथाऽकाशादीनामपि हेतुत्वप्रसङ्गः । (२५)

अपि च (।)

...v.1.26 येषु सत्सु भवत्येव यत् तेभ्योऽन्यस्य कल्पने ।
तद्धेतुत्वेन सर्वत्र हेतूनामनवस्थितिः ॥ २६ ॥

'येषु' कारणेषु 'सत्सु[115]' यत्कार्य'म्भवत्येव तेभ्यः' कारणेभ्यो'न्यस्य' पदार्थस्य तत्कार्य'हेतुत्वेन' क[116] ल्पने 'सर्व्वत्र' कार्य'हेतूनामनवस्थितिः' प्राप्नोत्यपरापरकल्पनया (।) तस्माद् दृष्टसामर्थ्या एव क्षितिबीजादयः कारणमङ्कुरस्य नेश्वरादिरदृष्टसामर्थ्यः । (२६)

ननु क्षित्यादिरप्यकारकावस्थातो न विशिष्टस्व[117] भावः कारणावस्थायामङ्कुरस्येत्याह (।)

...v.1.27 स्वभावपरिणामे-न हेतुरङ् कुरजन्मनि ।
भूम्यादिस्तस्य संस्कारे तद्विशेषस्य दर्शनात् ॥ २७ ॥

---

112 ५ योऽकारकावस्थाऽविशिष्टो न स करोति स इव अविशिष्टश्चायमिति व्यापकानुपलब्धिः ।

113 ६ अकारणमेवेष्यतां कारणवस्थायामप्यकारकावस्थाऽविशेषात् ।

114 १ पूर्व्वस्यासिद्धिं परिहरति शशविषाणवत् ।

115 २ निमित्तकारणमीशस्तन्तुवायवदित्याह ।

116 ३ यदा तदा तत्कारणं ।

117 ४ एतेन पूर्व्वस्यानेकान्तमाह । असंस्कृतक्षेत्रादयः (।)

उपसर्पणप्रत्यया[118] ददृष्टसह[119] कारिणः प्राप्तकार्योत्पादानुगुणातिशया ‘भूम्यादिः स्वभावपरिणामे-न’ कार्यानुगुणातिशयतारतम्यमुक्तापरापरक्षणलक्षणेनान्त्यावस्था[019/s] प्राप्ताऽ‘ङ्कुरजन्मनि हेतु’र्भवति (।) स तु पूर्व्वपरैकरूपः क्रमाक्रमयोरर्थक्रियाविरोधात् । कुत एतदिति चेत् तस्य भूम्यादेः कर्षणपांसुप्रक्षेपादिना ‘संस्कारे’ तस्याङकुरस्य पुष्टतरादि‘विशेषस्य दर्शनात्’ । (२७)

...v.1.28 यथा विशेषेण विना विषयेन्द्रियसंहतिः ।
बुद्धेर्हेतुस्तथेदं चेन्न तत्रापि विशेषतः ॥ २८ ॥

ननु ‘यथा विशेषेण विना विषयेन्द्रियसंहति’रक्षेपक्रियाधर्म्मिणी ‘बुद्धेर्हेतु’र्भवति1[5b/MA] ‘तथेदमी’श्वरादि वस्तुविशेष[120] म्विना सहकारिसन्निधानेन कार्यं करोतीति ‘चेत्’ । न (।) ‘तत्रापि’ विषयेन्द्रियादिसंहतौ प्रागवस्थावदुपसर्प्पणप्रत्ययजनिताद्विज्ञानजननशक्तक्षणप्रज्ञालक्षणा‘द्विशेषात्’ । (२८)

अन्य[121] था (।)

...v.1.29 पृथक् पृथगशक्तानां स्वभावातिशयेऽसति ।
संहतावप्यसामर्थ्यं स्यात् सिद्धोऽतिशयस्ततः ॥ २९ ॥

‘पृथक् पृथगशक्तानां’ विषयेन्द्रियाणां ‘स्वभावातिशयेऽसति संहतावप्य[122] सामर्थ्यं स्यात्’ । ज्ञानार्जनम्प्रति स्वरूपाभेदात् । उत्पद्यते च ज्ञानं ‘सिद्धोतिशयस्ततो’ ज्ञानोत्पादात् । (२९)

### b. संहतौ हेतुता नेश्वरादौ

...v.1.30 तस्मात् पृथगशक्तेषु येषु संभाव्यते गुणः ।
संहतौ हेतुता तेषां नेश्वरादेरभेदतः ॥ ३० ॥

‘तस्मात् पृथगशक्तेषु येषु सम्भाव्यते गुणः’ स्वरूपान्तरोत्पादलक्षणं ‘संहतौ हेतुता तेषां’ क्षणिकानां ‘नेश्वरादेर[123] भेदतः’ । ईश्वरप्रधानपुरुषादेरकारकाभिन्नस्वरूपत्वान्न हेतुत्वमित्यु[124] पसंहारः । उक्तमीश्वरादिदूषणं ॥ (३०) ॥

## 1.2 २. भगवान् प्रमाणम्

### (१) ज्ञानवत्त्वात्

भगवतोपि साधनाभावादप्रामाण्यं परमतेनाशङ्कते ।
[020/s]

[118] ५ आद्युत्पत्तौ जगतो निमित्तमिति चेन्न तेनैवानेकान्त ईश्वरान्तरप्रसङ्गात् तन्मात्रहेतुत्वे कर्मनैफल्यं ॥

[119] ६ वृष्ट्यादि ।

[120] १ पुनरनेकान्तत्वमिह ।

[121] २ नातिशयोत्पत्त्याऽपि तु संयोगं जनयन्ति सहिताः संयोगात्कार्यमित्याह यथाकार्यजननाय नालं तथा संयोगेपि ।

[122] ३ कार्यासामर्थ्यवत् ।

[123] ४ आदिना स्थिरात्मनां ग्रहः ।

[124] ५ तस्मात् स्थितमेव तत्र नित्यं प्रमाणमिति ।

...v.1.31 प्रामाण्यञ्च परोक्षार्थज्ञानं तत्साधनस्य च ।
अभावात्; नास्त्यनुष्ठानमिति केचित् प्रचक्षते ॥ ३१ ॥

'प्रामाण्यञ्च परोक्षार्थज्ञानं', न सर्व्वस्येष्यते । 'तत्साधनस्याभावात् । अनुष्ठा[125] नं' कस्यचिन्ना'स्तीति' कथन्तथाविधप्रमाणोपपत्तिरि'ति केचित्' जै मि नी याः 'प्रचक्षते' । (३१)
अत्राह ।

...v.1.32 ज्ञानवान् मृग्यते कश्चित् तदुक्तप्रतिपत्तये ।
अज्ञोपदेशकरणे विप्रलम्भनशङ्किभिः ॥ ३२ ॥

न खलु व्यसनितया प्रमाणमन्विष्यते प्रेक्षावद्भिरपि तु स्वर्ग्गापवर्गप्रधानपुरुषार्थं प्रेप्सुभिः तद्विषय'ज्ञानवान् कश्चिदन्विष्यते तदुक्त'स्योपायस्य 'प्रतिपत्तये'ऽनुष्ठानार्थं 'अज्ञोपदेशकरणे विप्रलम्भनशङ्किभिः' विसम्वादं सम्भावयद्भिः ॥ (३२)

...v.1.33 तस्मादनुष्ठेयगतं ज्ञानमस्य विचार्यताम् ।
कीटसंख्यापरिज्ञानं तस्य नः क्वोपयुज्यते ॥ ३३ ॥

'दुःखोपशमोपायोपदेष्टुर्ज्ञानं मृग्यते यतस्तस्मादनुष्ठेयगतं संसारदुःखप्रशमोपायं ज्ञानमस्य प्रमाणपुरुषस्य विचार्यतां । अनुपयोगि कीटसंख्यापरिज्ञानन्तस्योपदेष्टुर्नोऽस्माकं न क्वचित्पुरुषार्थे उपयुज्यते इति न तद्विचार्यमिति प्रतिज्ञा प्रत्युपकाराद्यपेक्षासमं सर्वसत्वेषु। तस्माद्य'देवं प्रेक्षावता'मनुष्ठेयन्त'द्विषयमुपदेष्टुं 'ज्ञानमु'पयुक्तं नान्यविषयं । (३३)

## (२) हेयोपादेयवेदकत्वात् न तु सर्ववेदकत्वात्

...v.1.34 हेयोपादेयतत्त्वस्य साभ्युपायस्य वेदकः ।
यः प्रमाणमसाविष्टो न तु सर्वस्य वेदकः ॥ ३४ ॥

तस्माद्धेयतत्त्वस्य दुःखसत्यस्य 'साभ्युपायस्य' समुदयसत्यान्वित'स्योपादेयतत्त्वस्य' निरोधसत्यस्य 'साभ्युपायस्य' मार्ग्गसत्यसहितस्य प्रमाणपरिशुद्धस्य यो वेदकः 'स प्रमाणमिष्टो न तु सर्व्वस्य' यस्य कस्यचिद्धि'वेदकः' । न खलु सकलज्ञानादार्यसत्यचतुष्टयदेशनाऽपि तु तज्ज्ञानत्वात् तदुपदेष्टृतयैव च प्रामाण्यमिष्यते (। ३४)
तदेवाह ॥
[021/s]

...v.1.35 दूरं पश्यतु वा मा वा तत्त्वमिष्टन्तु पश्यतु ।
प्रमाणं दूरदर्शी चेदेत गृध्रानुपास्महे ॥ ३५ ॥

'दू[126] रं पश्यतु वा मा वा द्राक्षीत्तत्वमिष्ट'न्त्वार्यसत्यचतुष्टयं 'पश्यति' तावतैव भगवान् 'प्रमाण'मन्यथाऽतत्त्वदर्श्यपि प्रमाणं 'दूरदर्शी चेदिष्यते । एतागच्छत मुमुक्षवो गृध्रानुपास्महे' दूरदर्शिनो दीर्घश्रुती[127] श्च (? न् च) वराहानित्युपहसति । उक्तमभिमतं प्रामा[128] ण्यं (३५) ॥

---

[125] १ यत्साधनानुष्ठानात्प्रामाण्यं ।

[126] १ अतीन्द्रियं सर्व्वातीन्द्रियं ।

[127] २ आकाशगान् तिरश्चः परचित्तानुसारिणः क्षणिकादीन् ।

[128] ३ पुरुषार्थज्ञत्वेन । यतः सत्यावबोधाद्धर्मचक्रादौ भगवान् सार्वज्ञं प्रतिज्ञातवात् ।

### (३) कारुणिकत्वात् प्रमाणम्

### क. जन्मान्तरसिद्धिः

### (करुणा जन्मान्तराभ्यासात्)

नन्वीदृशस्य प्रमाणस्य किं साधनमित्याह (।)

...v.1.36 साधनं करुणाभ्यासात् सा बुद्धेर्देहसंश्रयात् ।
असिद्धाऽभ्यास इति चेन्नाश्रयप्रतिषेधतः ॥ ३६ ॥

'साधनं करुणा' दुःखादुःखहेतोश्च समुद्धरणकामता करुणा सा भगवतः प्रामाण्यस्य साधनं । सैव करुणा इत्यत आह । 'अभ्यासात्सा' गौत्रविशेषात्कल्याणमित्रसंसर्गादनुशयदर्शनाच्च कश्चिन्महासत्त्वः कृपायामुपजातस्पृहः सा[129] दरनिरन्तरानेकजन्मपरम्पराप्रभवाभ्यासेन सात्मीभूतकृपया प्रेर्यमाणः सर्व्वसत्त्वानां समुदयहान्या दुःखहानाय मार्गभावनया निरोधप्रापणाय च देशनां कर्तुकामः स्वयमसाक्षात्कृतस्य देशनायां विप्रलम्भसम्भावनाच्चतुरार्यसत्यानि साक्षात् करोतीति भगवति साधनं कृपा प्रामाण्यस्य । 'बुद्धेर्देहसंश्रयादसिद्धोऽभ्यास इति चेत्' बुद्धिर्देहमाश्रिता कार्यत्वात् प्रदीपमिव प्रभा । शक्तिरूपत्वाद्वा मद्यमिव मदशक्तिः । गुणत्वाद्वा पटमिव शुक्लता । त्रेधाप्याश्रयविनाशे तस्य नाशात् । कुतो जन्मान्तराणि कथम्वा तेष्वभ्यासः कृपादेरिति चा र्वा काः ।

[022/s]

तदेतन्न युक्तमा'श्रयप्रतिषेधतो' बुद्धेः । बुद्धिरहितः कायो ना[130] श्रयः कारणत्वात् गुणित्वात् शक्तिमत्त्वाद्वा । (३६)

### (क) भूतचैतन्यमतनिरासः[[* द्रष्टव्यं परिशिष्टं १।९,३७]]

### बीजपक्षनिरासः

### a. तत्र कारणत्वं प्रतिषेद्धुमाह ।

...v.1.37 प्राणापानेन्द्रियधियां देहादेव न केवलात् ।
सजातिनिरपेक्षाणां जन्म जन्मपरिग्रहे ॥ ३७ ॥

....1.38a अतिप्रसङ्गात्;

'प्राणो' वायुरूद्ध्वंग तद्विपरीतो'ऽपानः इन्द्रि'याणि चक्षुरादीनि । 'धी'र्बुद्धिः तासां सजातिनिरपेक्षाणां कारणभूतपूर्व्व'सजाति'प्राणादिपुञ्ज'निरपेक्षाणां देहादेव [6a/MA] केवलान्न जन्म' भवति (।) कुत इत्याह (।) 'जन्मपरिग्रहे'ऽति (प्र) सङ्गात् (।) यदि महाभूतेभ्य एव केवलेभ्यः प्राणादीनां जन्मग्रहस्तदा सर्व्वस्माद् भवेयुरिति सर्वं प्राणिमयं जगत् स्यात् (।) न चास्त्येतत्तस्मात्पूर्व्वसजातिसापेक्षाणामेवाक्षादीनां देहाज्जन्मेति पूर्व्वजन्मप्रतिबन्धसिद्धिः । (३७)

....1.38b भाविजन्मपरम्परासिद्ध्यर्थमप्याह (।)

[129] ४ वृत्तिस्तु निरुपद्रवभूतार्थस्वभावस्ये??त्यत्रोक्तो ।

[130] १ कारणत्वेनाश्रयो न ।

....1.38c यद् दृष्टं प्रतिसन्धानशक्तिमत् ।
किमासीत् तस्य यन्नास्ति पश्चाद् येन न सन्धिमत् ॥ ३८ ॥

यत्प्राणापानादिमध्यावस्थायां[131] प्राणादीनामुत्पादनशक्तियुक्तं दृष्टं 'तस्य किमासीत् प्रतिसन्धान'कालेऽधिकं 'यत् पश्चा'न्मरणका[132] ले 'नास्ति[133] येन' तद्वैकल्यात्तदा 'न सन्धि'मत्समग्राप्रतिबद्धकारणत्वात् प्रतिसन्धानं प्राप्तमित्यर्थः । (३८)

b. स्यादेतत् (।) पूर्व्वसजातिहेतुकमिन्द्रियादि न भवति किन्तु देहहेतुकमेवेदं न चातिप्रसङ्गः केषाञ्चिदेव भूतपरिणामानां देहात्मकानां तद्धेतुत्वात् । अन्येषाञ्च तद्विरुद्धस्वभावानामहेतुत्वात् सुवर्ण्णबीजाबीजपाषाणवत् (।) अत्राह ।
[023/s]

...v.1.39 न स कश्चित् पृथिव्यादेरंशो यत्र न जन्तवः ।
संस्वेदजाद्या जायन्ते सर्वं बीजात्मकं ततः ॥ ३९ ॥

'न स कश्चित्पृथिव्यादेरंशः' प्रदेशो 'यत्र जन्तवः संस्वेदजाद्या' आद्यशब्दाज्जरायुजाण्डजप्रभृतयो 'न जायन्ते (।) ततः सर्वं' भूतपरिणतिजातं प्राणादिजनने 'बीजात्मक'मिति नास्ति बीजविरुद्धस्वभावता कस्यचित् । सुवर्ण्णासुवर्ण्णबीजत्वन्तु पाषाणादीनां सुवर्ण्णपरमाणूनामेव सदसत्त्वाभ्यामिति विषमो दृष्टान्तः । (३९)

ननु भूतमात्रहेतुकत्वाविशेषेपि परिणामस्य यथा विशेषः सुवर्ण्णपरमाणुमयत्वेतराभ्यान्तथा प्राणादिहेतुत्वाहेतुत्वाभ्यामपि स्यात् ।

उक्तमेवात्र सर्व्वत्र प्राणिनां दृष्टेः । सर्व्वं तद्बीजात्मकमिति नास्त्येवाबीजात्मकताकस्यचित्परिणामस्य । अत्रापि वा तुल्यः प्रसङ्गः । यदि भूतमात्रहेतुकोऽयं बीजपरिणामः सर्व्वस्तथा स्यात् हेत्वविशेषे कार्यविशेषायोगात् ।

## ii. शक्तिमत्त्वनिरासः

a. ननु भूतान्यप्यवान्तरानेकविविधविशेषभाञ्जि विचित्राः परिणतीर्जनयन्तीति न समानताप्रसङ्गः । न तावत्सविशेषो भूतमात्रात् सर्व्वत्र प्रसङ्गात् । न चान्यतोऽन्यस्याभावात् । अस्माकन्तु कर्म्मापि सहकारि सम्मतं तद्वैचित्र्यात् विचित्रं कार्यजातमुचितं । शक्तिपक्षं निषेद्धुमाह ।

...v.1.40 तत् स्वजात्यनपेक्षाणामक्षादीनां समुद्भवे ।
परिणामो यथैकस्य स्यात् सर्वस्याविशेषतः ॥ ४० ॥

तत्तस्माद् भूतमात्रहेतुत्वात् 'स्वजात्यनपेक्षाणामक्षादीनां समुद्भवे' स्वीक्रियमाणे 'परिणामो यथैकस्य' देहस्यातद्भूतप्राणापानेन्द्रियचैतन्यशक्तितया 'तथा सर्व्वस्य' लोष्टादेरपि स्याद्धेतोरविशेषतः । अत एव हि प्रसङ्गाद् गुणपक्षोपि प्रतिक्षिप्तो बोद्धव्यः । तस्मादाश्रयत्वमपि नास्त्यनिन्द्रियस्य कायस्य कारणत्वशक्तिमत्वे गुण[134] त्वानामयोगतः । (४०)

---

[131] २ वर्तमानायां । तदपि प्राणादीनां सत्त्वात् पूर्व्वावस्थावत् नाविकलकारणो न सन्धत्ते । प्राणापानेन्द्रियधियां ।

[132] ३ कुतस्तद्देहनाशे बुद्धेरभावः ।

[133] ४ तदापि प्राणादीनां सत्त्वात् पूर्व्वावस्थावत् नाविकलकारणो न संधत्ते ।

[134] १ चार्वाको नित्यानि भूतान्येव परिणत्याद्भुतचैतन्यानि सत्वव्यपदेशभाञ्जि । तान्येव विरोधिप्रत्ययादनभिव्यक्तचैतन्यानीत्युक्तेः ।

....1.41a b. सेन्द्रियोपि कायो बुद्धेराश्रयो न युक्त इति वक्तुमाह ।
प्रत्येकमुपघातेऽपि नेन्द्रियाणां मनोमतेः ।
उपघातोस्ति;

[024/s]

'इन्द्रियाणां प्रत्येकं' यथास्वं प्रत्ययैरु[135] 'पघातेपि'[136] सति 'मनो'मतेर्व्विकल्पबुद्धेरुपघात (ा) पटुमन्दतादिलक्षणो नास्ति (।) यद्धि यदाश्रितं तत्तद्विकारे विक्रियते यथा घटस्य दाहादौ तच्छुक्लत्वादि(।) तस्मान्न तदाश्रिता बुद्धिः ।

विपर्ययमेवाख्यातुमाह ।

....1.41b भङ्गेऽस्यास्तेषां भङ्गश्च दृश्यते ॥ ४१ ॥

भयशोकादिभिरस्या मनोबुद्धे'र्भङ्गे'[137] (नाशे) विकारे सति 'तेषा'मिन्द्रियाणां 'भङ्गो' विकार'श्च दृश्यते' । (४१)

...v.1.42 तस्मात् स्थित्याश्रयो बुद्धेर्बुद्धिमेव समाश्रितः ।
कश्चिन्निमित्तमक्षाणां तस्मादक्षाणि बुद्धितः ॥ ४२ ॥

हर्षादिना च परिपुष्टिरिति विकल्पबुद्धिविकारविकारित्वादिन्द्रियाण्येव तदाश्रितानि (।) तस्माद् 'बुद्धेः स्थि'तेराश्रयः समानजातीयः 'कश्चिन्न' सेन्द्रियः[138] कायः । स तर्हि तदाश्रितो भविष्यति न स च 'बुद्धिमेव समाश्रितः । निमि[139] त्तञ्चाक्षाणां तस्मादक्षाणि बुद्धितो' न बुद्धिस्तेभ्यः । (४२)

## (ख) विज्ञानसिद्धिः

### I. अन्वयतः

### A. प्रतिसन्धिः

#### a. कायाश्रयो बुद्धिः

#### b. प्रतिसन्ध्याक्षेपिका बुद्धिः

....1.43a यादृश्याक्षेपिका साऽसीत् पश्चादप्यस्तु तादृशी ।

ततो जन्मादौ 'यादृशी' दृष्टाऽत्मग्रहयोगिनी बुद्धिरा'क्षेपिका' बुद्धीन्द्रियादीनामासीत् 'पश्चादपि' मरणावस्थायामपि 'तादृ[140] श्या'क्षेपिका भवतु । जन्मान्तरस्य [025/s] शरीरा-[141]न्तरसम्बद्धबुद्धीन्द्रियाद्युत्पादनलक्षणस्येति पूर्व्वोक्तनिगमनं ॥

[135] १ प्रसुप्तिर्नाम व्याधिनाऽन्तर्ब्बहिः कायेन्द्रियेपि नाशिते बुद्धेर्भावात् ?

[136] २ नानिन्द्रियो भूतदेहे केशनखाग्रादौ चैतन्यप्रसङ्गात् ।

[137] ३ यस्मिँस्थिते यन्निवर्तते तत्ततो भिन्नं यथोदकेऽग्निः (।) स्थिते मृतशरीरे निवर्त(?र्त्य) ते प्राणादिभिरिति स्वभावहेतुः । यत्र पूर्व्वस्थिते प्रागविद्यमानं तत्र पश्चात् भवति तत्ततो भिन्नं तद्यथा पूर्व्वस्थिते घटे प्रागसन् पश्चात्क्रियमाणो दीपः (।) पूर्व्वस्थितेषु भूतेषु च तत्राविद्यमानाः स्युः प्राणादय इति स्वभावः पूर्व्वापरजन्मसाधनद्वयं ।

[138] ४ पूर्व्वक्षणो बुद्धेः ।

[139] ५ जनकश्च ।

[140] ६ अविकलकारणत्वात् ।

[141] १ सिद्धोऽभ्यासो जन्मान्तरसाधनात् । नापि बुद्धेर्देह आश्रयो येन देहनाशे बुद्धिनाशादभ्यासो न स्यात् ।

### C. कायाश्रितं मनोविज्ञानम्

न[142] नु कायाश्रितत्वं मनसोप्युक्तं भगवताऽन्योन्यानु[143] विधायित्वं कायमनसो-[6b/MA] रिति वदता । तत्कथमित्याह (।)

....1.43b तज्ज्ञानैरुपकार्यत्वादुक्तं कायाश्रितं मनः ॥ ४३ ॥

‘तज्ज्ञानैः’ कायविषयैर्ज्ञानैरूपादिग्राहि‘भिरुपकार्यत्वात्’ मनसः सुखोत्साहादिरूपे‘णोक्तं’ भ ग व ता ‘कायाश्रितं मनो’विज्ञानं न साक्षात्तदुत्पत्तेः । (४३)

### d. अन्योन्यहेतुके कायमनसी

न[144] न्विन्द्रियाणि विना न बुद्धि[145] रिति युक्तमाश्रयत्वमेषामित्याह ।

...v.1.44 यद्यप्यक्षैर्विना बुद्धिर्न्न तान्यपि तया विना ।
तथाप्यन्योन्यहेतुत्वं ततोऽप्यन्योन्यहेतुके ॥ ४४ ॥

‘यद्यप्यक्षै’र्विना बुद्धिर्न भवति । ‘तान्यप्य’क्षाणि ‘तया विना न’ भवन्ति । भूतमात्रादुत्पत्तेः सर्व्वस्मादुत्पत्तिप्रसङ्गादित्युक्तेः । ‘तथाप्यन्योन्यहेतुत्वमुक्तम्भवति । ततोप्यन्योन्यहेतुके’ कायमनसी मध्यावस्थावत् अनादितादृक्प्रवाहवती इति सिद्धः परलोकः ।(४४)

कि[146] ञ्च ।

...v.1.45 नाक्रमात् क्रमिणो भावो नाप्यपेक्षाऽविशेषिणः ।
क्रमाद् भवन्ती धीः कायात् क्रमं तस्यापि शंसति ॥ ४५ ॥

[026/s]

‘नाक्रमात् क्रमिणः’[147] कार्यस्य ‘भावः’ । क्रमरहितत्वात् कारणस्य । त[148] न्निष्पा-[149] द्यानि कार्याणि सकृज्जायेरन् । क्रमवतः सहकारिणोऽ‘पेक्ष्य’ क्रमाज्जनयिष्यतीति चेत् ‘नाप्यविशेषिणः’ स्थिरैकरूपस्य परैरनाधेयविशेषस्य परेषां सहकारिणामपेक्षाऽस्ति । तस्मा‘त्क्रमाद् भवन्ती धीः कायात्क्रमन्तस्यापि’ कायस्य शंसति[150] । (४५)

ततश्च (।)

...v.1.46 प्रतिक्षणमपूर्वस्य पूर्वः पूर्वः क्षणो भवेत् ।
तस्य हेतुरतो हेतुर्दृष्ट एवास्तु सर्वदा ॥ ४६ ॥

---

142 २ आगमविरोधमाह चार्व्वाकः ।

143 ३ अन्योन्यबीजकं ह्येतद्द्वयं यदुत सेन्द्रियत्वं कत्यो विज्ञानश्चेत्यभिधर्मो ।

144 ४ यतः समस्तव्यस्तेन्द्रियघातेपि न मनोघातः ।

145 ५ चक्षुरादिज्ञानपञ्चकं बुद्धिः । यथेन्द्रियधीरकल्पं रूपादि गृह्णाति तथा मनोपि गृह्णीयात् कायेन जनितत्वात्सेन्द्रियेण ।

146 ६ यदा कातरस्यान्यं शोणितादिविकृतं दृष्ट्वेन्द्रियज्ञानं विकृतं मनो विकारयति । यदि नित्यात्कायादेव प्राणादयस्तदा ।

147 १ क्षणिकस्य ।

148 २ सर्दथा विशेषेण हेतुरिति चेत् इत्यस्य न नियमः ।

149 ३ इन्द्रियविज्ञानादीनि ।

150 ४ अनुमापयति ।

'प्रतिक्षणमपूर्व्वस्य' बुद्धीन्द्रियकायसमुदायस्य कार्यस्य पूर्व्वः 'पूर्व्वः क्षण'स्तादृशो 'हेतुर्भवेदतः' कारणादनन्तरस्य बुद्धीन्द्रियादेर्हेतुर्मध्यावस्थावद् 'दृष्ट एव' बुद्धीन्द्रियादिकलापः 'सर्व्वदा' ऐहिकजन्मादौ वामुत्रिकजन्मादौ चा'स्तु' । (४६)

## e. चित्तान्तरेण सन्धानम्

ननु यदि सविज्ञानकायत्वात् तथाभूतजननानुमानेन परलोकसिद्धिः तदा मरणचित्तत्वाच्चित्तान्तराप्रतिसन्धानमर्हच्चरमचित्तवदिति कस्मान्नानुमीयत इत्याह (।)

...v.1.47 चित्तान्तरस्य सन्धाने को विरोधोन्त्यचेतसः ।
तद्वदप्यर्हतश्चित्तं असन्धानं कुतो मतम् ॥ ४७ ॥

'चित्तान्तरस्य सन्धाने को विरोधोऽन्त्यचेतसो' मरणचित्तस्य न कश्चित् । तथा हि(।)न तावन्मरणचित्तेन चित्तान्तरसन्धानस्य सहा[151] नवस्थानलक्षणो विरोधः निवर्त्त्यनिवर्तकत्वाभावात् । नापि परस्परपरिहारस्थितिलक्षणः[152] अम[153] रणचित्तव्यवच्छेदेन मरणचित्तस्यावस्थानात् । 'तद्वदप्यर्हतश्चित्तमसन्धानं कुतः' प्रमाणात् 'मतं' येन दृष्टान्तः स्यात् । न ह्यर्हन् भवतां[154] सिद्धः । तद्बाधनाय यत्वात् । (४७)

अथाभ्युपगम्यते तदा तस्य क्लेशविसंयोगकृतमसन्धानं नान्यथा स च न पृथग्जनानामिति कथन्तेषां मरणचित्तमसन्धानं । क्लेशविसंयोगो हि प्रतिसन्धानविरोधी लक्ष्यते न मरणचित्तं ॥[155]

[027/s]

स्यादेतद्(।) भवत्सिद्धान्तसिद्धमर्हच्चित्तमसन्धानन्तत एव दृष्टान्तसिद्धिः । अत्राह (।)

...v.1.48 असिद्धार्थः प्रमाणेन किं सिद्धान्तोऽनुगम्यते ॥
हेतोर्वैकल्यतस्तच्चेत् किन्तदेवाऽत्र नोदितम् ॥ ४८ ॥

'असिद्धार्थो'ऽनिश्चितार्थः 'प्रमाणेन किं सिद्धान्तोऽनुगम्यते' तदनुरोधेन परलोकस्याभ्युपगमप्रसङ्गात् । अथ 'हेतो'राश्वासप्रश्वासेन्द्रियपाट[156] वादे'र्वैकल्यतो भरणचित्तस्य' तदप्रतिसन्धानमिति चेत् । 'किन्तदेव' हेतुवैक[157] ल्य[158] मत्राप्रतिसन्धाने साधनत्वे 'नोदितं' । दृष्टान्तविकलन्तु मरणचित्तमुक्तं । आश्वासादिहेतुत्वनिषेधश्च वक्ष्यति । (४८)

## f. कायस्याहेतुत्वम्

[151] ५ प्रीतिदौर्मनस्यादित्वेन भिन्ना प्रतिक्षणं वेद्यमाना बुद्धिर्यदि नित्येष्यते तदातत्त्वान्तरं पञ्चमं स्यात् आलोकान्धकारवत् ।

[152] ६ भावाभाववत् ! मनोज्ञानं ।

[153] ७ न तु संतानचित्त (?) व्यवच्छेदेन ।

[154] ८ चार्व्वाकाणाम् ।

[155] ९ अनन्यसत्त्वनेयस्येत्यादिना प्रतिसन्धानं स्नेहात् वक्ष्यते न सोऽर्हतः । भाविकारणानुपलब्धिः । एवं मन्यते न परेण ।

[156] १ अर्हतश्चित्तस्य हेतोः ।

[157] २ मरणचित्तत्वादिति हित्वा ।

[158] ३ अत्र रथ्यापुरुषे ।

...v.1.49 तद्धीवद् ग्रहणप्राप्तेर्मनोज्ञानं न सेन्द्रियात् ।
ज्ञानोत्पादनसामर्थ्यभेदान्न सकलादपि ॥ ४९ ॥

कायश्च हेतुर्भवन् सेन्द्रियो वा स्यादनिन्द्रियो वा । सेन्द्रियोपि प्रत्येकमिन्द्रियैः सहितः समस्तैर्व्वा (।) तत्र प्रथमपक्षे तस्या इन्द्रियधिय[159] इव विकल्प्यमानेषु रूपादिषु स्पष्टतरस्य 'ग्रहणस्य प्राप्तेः । मनोज्ञानं न सेन्द्रियात कायात्' । इन्द्रियजन्यस्य स्पष्टतयाऽभ्रान्तज्ञानादिषु व्याप्तिदृष्टेः । द्वितीयपक्षेप्याह (।) प्रत्येकमिन्द्रियाणां रूपादिग्रहणप्रतिनियत'ज्ञानोत्पादनसा-मर्थ्यभेदात्' दृष्टात् । 'न सकला-' दपीन्द्रियकलापात् प्रतिनियतविषयाग्राहिणो मनोविज्ञानस्य सम्भवः[160] । एकेन्द्रि-[7a/MA] यवैकल्येप्यनुत्पादप्रस[161] ङ्गाच्च । (४९)

नाप्यनिन्द्रियो हेतुरित्याह

....1.50a अचेतनत्वान्नान्यस्माद्;

'अचेतनत्वान्नान्यस्माद'निन्द्रियात् केशनखादेरिव मनोज्ञानं ।

नन्वचेतनत्वं किमिन्द्रियज्ञानरहितत्वमुत मनोज्ञानविमुक्तत्वं(।) तत्राद्यमिष्टमेव [028/s] इन्द्रियस्याभावे तज्ज्ञानाभावात् । अन्त्ये साध्याविशिष्टत्वं हेतोः । मनोज्ञानस्यैव साध्यत्वात् ।

उच्यते (।) यथा स्पर्शा[162] दयः स्पर्शज्ञानेन चेतयन्ते न तथा नखकेशादय इत्यचेतनाः । चेतनाप्रतिबद्धञ्च मनोविज्ञानं तदभावे न स्यात् ।

(B.कर्म)

(a. कर्मभेदात् कायमनसोः सहस्थितिः)

ननु यदि न काय आश्रयः कथं 'सहस्थिति'रित्यत आह ।

....1.50b हेत्वभेदात् सहस्थितिः ।
अक्षवद् रूपरसवदर्थद्वारेण विक्रिया ॥ ५० ॥

हेतोः कर्म्मसंज्ञितस्याभेदात् । एकसामग्रीप्रतिबद्धत्वात् सहस्थितिः । न त्वाश्रयाश्रयिभावात् ।[163] 'अक्षवद्रूपरसवत्' । यथाऽक्षाणि रूपरसादयश्च परस्परमनाश्रयाश्रयिभूता अप्येकसा-मग्र्यधीनत्वात् सहस्थितिमन्तः ।[164] ननु यो यद्विकारेण विक्रियते स तदाश्रितो यथा चक्षुरा-दिविकारेण विक्रियमाणन्तज्ज्ञानं चक्षुराद्याश्रितं । विषश्लेष्मादिना कायविकारे च विक्रियते मनोविज्ञानं अतस्तदाश्रितमित्याह (।) तज्ज्ञानैरुपकार्यत्वादिनोक्तमपि । 'अर्थद्वारेण विक्रिया' आलम्ब्यमाना हि शस्त्रप्रहारादयो विकारयन्ति मानसं न त्वाश्रय[165] त्वेन ।(५०)

### i. उपकारको निवर्त्तकश्च हेतुः

159 ४ अव्यवधानेन च । तस्मादुत्तरबुद्धिजननसमर्था वासनारूपा कर्म्मसंज्ञिता पूर्व्वबुद्धिरेवाश्रय इति स्थितं ।

160 ५ सामान्यविषयत्वादस्य ।

161 ६ तृतीयः तदा सम्बन्धाद् गवाश्ववत् पृथग्भावः स्यात् ।

162 १ स्पर्शमात्रस्य केवलासम्भवादादिशब्दः । तज्ज्ञानैरुपकार्यत्वादिनोक्तमपि ।

163 २ किमिव ।

164 ३ नियतसहभावो नेति च तुल्यं देहमनसोर्वा कल्प्यमनोमात्रत्वात् ।

165 ४ एतेन कारणात्प्राङ् निष्पन्नं तत्सहभावि वा न कार्यमिति भिन्नाभिन्नसन्तानयोः सामान्यः कार्यकारणभावः ।

...v.1.51 सत्तोपकारिणो यस्य नित्यं तदनुबन्धतः ।
स हेतुः सप्तमी तस्मादुत्पादादिति चोच्यते ॥ ५१ ॥

न चोपकारक इत्येवाश्रयः किन्तु निर्व्वर्तकः । तदाह । 'यस्य' सत्ता निर्वर्त्यस्य 'उपकारिणी' स हेतुः स एवाश्रयः । कथमुपकारिणी(।) 'नित्यं तस्य' निर्वर्त्त्यस्या'नुबन्धतो'ऽनुवर्तनात् । यस्य तु कदा[166] चिदुपकारकत्वमसौ विशेषस्यैव हेतुर्न धर्मिणः [029/s] तदभावेऽपि तद्भावात् । चित्तमात्रप्रतिबद्धश्च चित्तं तद्विशेषस्तु कायादिहेतुकः । अतो नायं हेतुः न च तन्निवृ[167] त्त्या निवृत्तिश्चित्तस्य । नित्यानुबन्धितया हेतुत्वमभिप्रेत्य चास्मिन् सतीदं भवतीति सप्तम्युच्यते ।[168] तस्मादिति च पञ्चमी तद्धेत्वनुवद्धां कार्यताञ्चाभिप्रेत्यो'त्पादादिति चो[169] च्यते' । (५१)

ननु हेतुरुपकारकः कथ[170] ञ्चिदुपकुर्व्वन् दृश्यते च कदाचिद्देहश्चित्तमत आह (।)

...v.1.52 अस्तूपकारको वापि कदाचिच्चित्तसन्ततेः ।
वह्न्यादिवद् घटादीनां विनिवृत्तिर्न तावता ॥ ५२ ॥

'अस्तूपकार[171] को वापि कदाचिच्चित्तसन्तते'र्देहो 'वह्न्यादिवद् घटादीनां न च तावतो'पकारकनिवृत्त्या उपकार्यस्य 'निवृत्तिः' । न हि वह्निर्घटस्यापाकमुपकारं कुर्व्वन्नपि स्वनिवृत्त्या निवर्तकः । (५२)

किञ्च[172] (।)

....1.53a अनिवृत्तिप्रसङ्गश्च देहे तिष्ठति चेतसः ।

'अनेवृत्तिप्रसङ्गश्च देहे तिष्ठति चेतसः' । स्वजातिनिरपेक्षस्य देहमात्रहेतुकस्याविकलहेतोरनुत्पत्त्ययोगात् ततो यावद्धेतुस्तावन्न मरणं भवेत् ।

## (ii. न प्राणापानहेतुकं चित्तम्)

प्राणापानावपि चित्तकारणं तयोर्व्वैकल्यान्मरणावस्थायान्न चित्तोत्पाद इति चेत् । आह (।)

....1.53b तद्भावभावाद् वश्यत्वात् प्राणापनौ ततो न तत् ॥ ५३ ॥

तस्य चित्तस्य 'भावे भावात् प्राणापा[173] नौ ततो' भवतः । 'चित्तवश्यत्वाच्च' तत एव तौ न तु ताभ्यां तच्चित्तं विपर्ययात् ।(५३)
[030/s]

एतद्धेतुद्वयसिद्ध्यर्थमाह (।)

....1.54a प्रेरणाकर्षणो वायोः प्रयत्नेन विना कुतः ।

---

[166] ५ स्वसन्निधिभावेन. . . . त्या कार्यकारीत्यर्थः मृत्पिण्डं घटकारीव । यथोपाध्यायः तदसत्त्वेऽप्यस्य सत्त्वं ।

[167] १ आरूप्ये भावात् ।

[168] २ कार्योत्पादनसमर्थस्य पूर्व भावः कारणत्वं सप्तम्या पञ्चम्या च निर्दिष्टं तदुत्तरत्वं कार्यत्वं प्रथममाह ।

[169] ३ न चेदृशोन्वयः कायचित्तयोरस्ति दृश्यते वा ।

[170] ४ परं पृच्छति । यदि वह्न्यादिवत्तथा प्रदीपहेतुः तथा देहश्चैतन्यादेश्च ।

[171] ५ कायाश्रितज्ञानद्वारेण ।

[172] ६ यदि देहः कारणं बुद्धेः ।

[173] ७ आकुञ्चनप्रसारणवत् ।

बहिरन्तश्च 'प्रेरणाकर्षणे वायो'र्यथाक्रमं प्राणा[174] पानौ पुरुषस्य बुद्धिलक्षणं प्रयत्न'म्वि[175] ना' कुतः सम्भवतस्तस्मात् तदधीनौ ।
किञ्च (।)

....1.54b निर्ह्रासातिशयापत्तिनिर्ह्रासातिशयात् तयोः ॥ ५४ ॥

यदि प्राणापानहेतुकश्चितं तदा चित्तस्य 'निर्ह्रासातिशयापत्ति'रपकर्षोत्कर्षापत्तिः । 'निर्ह्रासातिशयात्तयोः' प्राणापानयोः कारणविशेषानुकारित्वात् कार्य[176] विशेषस्य । (५४)

....1.55a तुल्यः प्रसङ्गोपि तयोः;

[177] अपि च 'तयोरपि' प्राणापानयोर्देहे तिष्ठत्यनिवृ[178] त्ति'प्रसङ्गस्तुल्य'स्तद्धेतुत्वा'त्तयोः' । ततो मरणकाले प्राणापानवैकल्याभावाच्चित्तानिवृत्तिप्रसङ्गस्तदवस्थः ।
(b. स्थित्यावेधकत्वात् कारणं कर्म)
स्यादेतत् (।) 'चित्तकारणे'ऽपि चित्ते स्वीक्रियमाणे मरणसमये चित्तानपायात् चित्तोत्पत्तौ यावद्देहेऽनिवृत्तिप्रसङ्ग इत्याह (सिद्धान्ती)।

....1.55b न तुल्यं चित्तकारणे ।
स्थित्यावेधकमन्यच्च यतः कारणमिष्यते ॥ ५५ ॥

'न तुल्यं चित्तकारणे' चैतन्ये प्रसञ्जनं । न खल्वनुवर्तकमेव कारणमिष्टं येन नित्यं तस्मिन्नाश्रये स्यात् । किन्तर्हि (।) 'स्थित्यावेधकमन्यच्च' कर्म्माख्यं 'कारणं यत इष्यते' तस्मात्तेन कर्मणा यावत्कालं तद्देहे स्थितिराक्षिप्ता तत ऊर्ध्वं हेत्वपायान्न प्रवर्तते देहान्तरे तु वर्तत इत्यसमानत्वं ।(५५)
[031/s]

## (i. अन्यथा दोषाभावे पुनरुज्जीवनम्)

...v.1.56 न दोषैर्विगुणो दोहो हेतुर्वर्त्यादिवद् यदि ।
मृते शमीकृते दोषे पुनरुज्जीवनं भवेत् ॥ ५६ ॥

दोषैर्वातादिभिर्विगुणीकृतो 'देहो' न हेतुश्चैतन्यस्य प्राणापानादेश्च 'वर्त्यादिवद् यदि' । यथा विगुणीकृतो वर्त्यादिर्न दीपस्य हेतुः । तदा 'मृते'[179] शरीरे चैतन्यादि-[7b/MA] नाशान्मृतस्य शमीभवन्ति दोषा इति 'शमीकृते दोषे' विकारविकारिण्यारोग्यलाभाद्धेतोर्देहस्य 'पुनरुज्जीवनं' प्राणा[180] पानं चैतन्योत्पत्तिलक्ष'णम्भ[181] वेत्' । (५६)

[174] १ वृत्तिकृता (?) एतत्पदमनङ्गीकृत्य व्याख्यातम् । पुनः परमतमाशङ्कते न कार्यं चैतन्यस्य कारणं किन्तु ।
[175] २ तदभावात् प्रेरणाकर्षणवत् ।
[176] ३ यथा मृतावस्थायां शरीरे तिष्ठति किन्तचैतन्यं न भवतीति चोद्यं बौद्धेन तथा प्राणापानावपि कस्मान्निवर्त्येते येन तदभावान्न चैतन्यम् ।
[177] ४ परः मृतदेहे तिष्ठिति चित्तं किन्न स्यादिति बौद्धस्य प्रसङ्गेन सह ।
[178] ५ अनेकान्तत्वमुक्तं परस्य ।
[179] १ कस्यचित्स्वभावस्याकाराभिमतेनाकार्यत्वादकिञ्चित्करो नाश्रयः । असद्धि शशविषाणकल्पं किंमाश्रयेत ।
[180] २ तस्माद्दोषाभावेऽप्यभावान्न दोषसन्निधिमात्रं चैतन्यवृत्तिं प्रतिबध्नातीति स्थितं ।
[181] ३ परः प्राह ।

### ii. देहश्चित्तस्य नोपादानम्

...v.1.57 निवृत्तेप्यनले काष्ठविकाराविनिवृत्तिवत् ।
तस्याऽनिवृत्तिरिति चेन्न चिकित्साप्रयोगतः ॥ ५७ ॥

'निवृत्तेप्यनले' हेतौ 'काष्ठविकार'स्याङ्गारादेर'निवृत्तिवत् । तस्य' चैतन्यादिनिरोधस्या-'निवृत्तिर्निवृत्तिर्न' भवति तद्दोषे मृतशरीरान्निवृत्ते'पीति चेत्[182] । न चिकित्साप्रयोगतः' । (५७)

स्यादेतद् (।) यद्यनिवर्त्या दोषाणां विकार(ा)ः स्यात्(?स्युः) दृश्यन्ते च चिकित्स्यमाना दोषविकारा ज्वरादयः ।

एत[183] देवाह ।

...v.1.58 अपुनर्भावतः किञ्चिद् विकारजननं क्वचित् ।
किञ्चिद् विपर्ययादग्निर्यथा काष्ठसुवर्णयोः ॥ ५८ ॥

'किञ्चि'द्वस्तु 'क्वचि'द्विकार्ये 'विका'रस्य 'जननं' जनक'मपुनर्भावतो' यथा विकार्यस्या-पुनर्भावो निर्व्विकारत्वं पुनर्न भवति 'यथाग्नि काष्ठे (।) किञ्चिदेव तद्विपर्य्य-' याद्यथा'ग्नि सुवर्ण्णे' । (५८)

...v.1.59 आद्यस्याल्पोप्यसंहार्यः प्रत्यानेयस्तु यत्कृतः ।
विकारः स्यात् पुनर्भावः तस्य हेम्नि खरत्ववत् ॥ ५९ ॥

[032/s]

'तत्राद्यस्य' विकारस्या'ल्पोपि' विकारः श्यामतादिकोऽसंहार्योऽनिवर्तनीयः । 'प्रत्यानेयो' निवर्तनीयस्तु 'यत्कृतो विकारस्तस्य' विकार्यस्य 'पुनर्भावः स्या'त् विकारनिवृत्त्या पूर्व्वावस्था-पत्तिः । वह्निकृते द्रवत्वे निवृत्ते हेम्नि खरत्ववत् । दृढत्वमिव ॥ (५९)

ननु[184] यदि निवर्तनीयो दोषविकारस्तदा न कश्चिदसाध्यो वि[185] धिः स्यादित्याह ॥

...v.1.60 दुर्लभत्वात् समाधातुरसाध्यं किञ्चिदीरितम् ।
आयुःक्षयाद् वा; दोषे तु केवले नास्त्यसाध्यता ॥ ६० ॥

'यत्किञ्चिदसाध्यं' व्या[186] धिजातमुक्तं त'त्समाधातुः' सद्यो दोषशमनौषधरसायना-देर्दुर्ल[187] 'भत्वात्' कर्म्माक्षिप्तस्यायुषस्तच्छरीरसहचरचैतन्यादिस्थितिहेतोर्व्वा क्ष[188] यात् । भूतमात्रवादिनः 'केवले दोषे तु' स्वीक्रियमाणे 'नास्त्यसाध्यता' कस्यचिद् व्याधेः । भू-तमात्रारब्धस्य दोषस्य चिकित्सादृष्टेः । विशे[189] षकारिणश्च हेतोरभावात् । (६०)

तथा (।)

...v.1.61 मृते विषादिसंहारात् तद्दंशच्छेदतोऽपि वा ।
विकारहेतोर्विगमे स नोच्छ्वसिति किं पुनः ॥ ६१ ॥

[182] ४ परिहरति

[183] ५ पूर्व्वोक्तं स्पष्टयति ।

[184] १ चिकित्स्यते च ज्ञानादिकृतो विकारः तस्मात्पूर्व्वप्रसङ्गस्तदवस्थः ।

[185] २ काष्ठविकारवदेनमाह परः ।

[186] ३ सिद्धान्ती ।

[187] ४ असाध्यव्याधिश्च तत्तत्कर्मवशात् । अकालमरणे ॥

[188] ५ कालमरणे ।

[189] ६ तुल्यव्याध्योस्तुल्यौषधयोश्च चिरक्षिप्रोपशमश्च दृश्यत एव कर्मकृतः ।

विषादिना ‘मृते’ प्राणिनि सति दंश[190] स्थाने ‘विषादेः संहारात्’ संगणनात्तस्य ‘दंश’स्थानस्य ‘च्छेदतोपि वा विकारहेतो’र्मरणहेतोर्व्विषादे‘र्व्विगमात् स’ मृतः ‘पुनर्नोच्छ्वसिति’ । कस्मात् (।) चैतन्यहेतोर्देहस्य विकारत्वात् युक्तमुच्छ्वसितुं । (६१)

किञ्च (।)

...v.1.62 उपादानाविकारेण नोपादेयस्य विक्रिया ।
कर्त्तुं शक्याऽविकारेण मृदः कुण्डादिनो यथा ॥ ६२ ॥

यद्युपादानं देहश्चित्तस्य तदो‘पादान’स्य देहस्या‘विकारे’ण विकारं विनो‘पादेयस्य’ चित्तस्य ‘विक्रिया न कर्त्तुं शक्या’ स्यात् । ‘यथा’ कुण्डाद्युपादानभूताया ‘मृदो’ विकारेण [033/s] विना कु‘ण्डादिनो’ विकारः कर्त्तुभशक्यः । (६२)

कस्मादेवमित्याह (।)

...v.1.63 अविकृत्य हि यद् वस्तु यः पदार्थो विकार्यते ।
उपादानं न तत् तस्य युक्तं गोगवयादिवत् ॥ ६३ ॥

हिर्यस्मात् ‘अविकृत्य यद्वस्तु’ किञ्चिद्यः ‘पदार्थो विकार्यते उपादानन्न तत्तस्य’ पदार्थस्य यु‘क्तं गोगवयादिवत्’ गोगवययोरिव नोपादानोपादेयभावः । एकस्याविकारेणापरस्य विकारात् । (६३)

## (II. व्यतिरेकतः)

### A. आश्रयाश्रयिभावनिरासः

#### a. सामान्येन आश्रयाश्रयिभावनिरासः

##### i. न कायचेतसोः सहस्थितिराश्रयाश्रयितया

....1.64a चेतःशरीरयोरेवं तद्धेतोः कार्यजन्मनः ।

‘चेतःशरीरयोरेवं’ शरीरमविकृत्यैव भयशोकादिना समनन्तरप्रत्ययविकारमात्रेण चेतसो विकारोत्पत्तेः नोपादानोपादेयभावः । यदि नाम देहोऽपि कथञ्चिदुपकारकश्चित्तस्यावस्थाविशेषहेतुत्वात् तथापि सन्तानहेतुत्वाभावात् नोपादानमतस्तन्निवृत्त्या न चैतन्यनिवृत्तिः । अवस्थाविशेष एव निवर्तेत ।

कथन्तर्हि सहाव (स्था) नं ‘चेतःशरीरयो’रित्याह ॥

....1.64b सहकारात् सहस्थानमग्नितामद्रवत्ववत् ॥ ६४ ॥

तस्य चेतसः शरीरस्य च ‘हेतोः’ पूर्व्वचित्तक्षणस्य कललादेश्च । ‘सहकारात्सह-’ कारणात् ‘कार्य’योश्चित्तदेहयो‘र्जन्मन’ उत्पादात् तयोः सहस्थानं भवति । यथा‘ग्नितामद्र’जन्मनोर्व्वह्नितामद्रवत्वयोः सहावस्थितिः ॥ (६४)

##### (ii स्थितिस्थात्रोरव्यतिरेकात्)

ननु देहश्चित्तस्याश्रयस्ततः सहस्थितिः स्यादित्याह (।)

[190] ७ यावज्जीवति तावद् व्याप्नोति विषं मृते तु दंशस्थानं यातीति नियमः ।

...v.1.65 अनाश्रयात्सदसतोर्नाश्रयः स्थितिकारणम् ।
सतश्चेदाश्रयो नास्याः स्थातुरव्यतिरेकतः ॥ ६५ ॥

'अना[191] श्रयात् सदसतोर्नाश्रयः न' ह्यकारणमाश्रयः । अतिप्रसङ्गात् । 'सतश्च' [034/s] निष्पन्नत्वात् ना[192] श्रयः कश्चित् । असतोऽपि वा कारणं किञ्चित् स्याच्[193] न त्वाश्रयः स्वरूपस्यैवाभावात् ॥ सतः 'स्थितिकारण'माश्रयश्चेदिष्यते (।) नैतदपि युक्त'मस्याः स्थातुरव्यतिरेकतः' । न हि स्थितिर्नाम स्थातुः पदार्थात् भिन्ना यां कुर्वत आश्रयत्वं । (६५)

### (iii न्यतिरेकेऽपि नाश्रयः)

....1.66a व्यतिरेकेऽपि तद्धेतुस्तेन भावस्य किं कृतम् ।

'व्यतिरेके'ऽपि वा स्वीक्रियमाणे 'त[194] द्धे'तुराश्रयः स्यात् । 'तेन' चाश्रयाभिमतेन [8a/MA] 'भावस्य' स्थितिमतः 'किं कृतं' येनासावाश्रयः ।

### (iv. नोत्पन्नया स्थित्या भावस्थापना)

स्यादेतद् (।) भावसम्बन्धिनी स्थितिर्भावं स्थापयति तेन तत्कर्त्तुराश्रयत्वमित्याह (।)

....1.66b अविनाशप्रसङ्गः स नाशहेतोर्मतो यदि ॥ ६६ ॥

....1.67a तुल्यः प्रसङ्गस्तत्रापि;

यदि स्थित्योत्पन्नया भावः स्थाप्यते तदान कदाचिदस्य भा[195] वस्य विनाशः स्यात् 'स नाशहेतो'र्मुद्गरा'देर्मतो यदि' (। ६६) 'तुल्यः प्रसङ्गस्तत्रापि' । नाशोऽपि न तावद् भावादव्यतिरिक्तः क्रियते तस्योत्पन्नत्वात् । व्यतिरिक्तेऽपि नाशे कृते भावस्तदवस्थ इति प्राग्वदुपलम्भादिप्रसङ्गः ।

किञ्च (।)

### (v. नाशस्य सहेतुत्वे स्थितिहेतुर्निष्फलः)

....1.67b किं पुनः स्थितिहेतुना ॥
आ नाशकागमात् स्थानं ततश्चेद् वस्तुधर्मता ॥ ६७ ॥

....1.68a नाशास्य;

यदि नाशहेतुना नाशः क्रियते तदा 'किं पुनः स्थितिहेतुना'श्रयेण यावन्नाशहेतुर्नापतति तावत् स्वयमेव स्थास्यति । आपतिताच्च तस्मान्नैष रक्षणक्षम इति [035/s] किमनेन स्वीकृतेन ।

[191] १ आश्रयत्वायोगात् ।
[192] १ यस्य पुनरदृष्टं किञ्चिदपरं सहकारि नास्ति यच्छक्तिक्षयादस्थिभिश्चैतन्ये स्यात् ।
[193] २ एकाहिदष्टयोरपि कालदष्टो म्रियतेऽन्यो जीवतीत्यस्ति ।
[194] ३ स्थितेः ।
[195] ४ न स्थितिकारणात्कुण्डादिवाश्रयः किन्तु ।

‘आ नाशकागमाद्धि नाशकागमनं यावत्तत आश्रयात् स्थान’श्चेदिष्यते । एवन्तर्हि वस्तु‘धर्मता ना[196] शस्य’ । (६७)

यदि नश्वरो भावः[197] तदाश्रयेण नाशकोपनिपातं ‘यावत्स्थाप्येतान्य[198] था’ तु स्वयमेव स्थितिमान् किमाश्रयेण (।)

....1.68b सत्यबाधोसाविति किं स्थितिहेतुना ॥
यथा जलादेराधार इति चेत् तुल्यमत्र च ॥ ६८ ॥

एवं ‘सत्य[199] बाधोऽसाविति किं स्थितिहेतुना[200]’ विद्यमाने वस्तुनि स्वभा[201] वत्वा-त् अबाधो बाधरहितोसौ नाश इति किं स्थितिहेतुना स्वीकृतेनापि । ‘यथा जलादेः’ सत एवाधारो घटादिस्तथा चित्तस्य देह ‘इति चेत् । तुल्यमत्र च’ प्रागुक्तं सकलं ॥ (६८)

### (vi. भावसन्ततेर्हेतुत्वादाश्रयत्वम्)

कथन्तर्ह्याधारव्यवहारः समर्थनीय इत्या[202] ह ।

...v.1.69 प्रतिक्षणविनाशे हि भावानां भावसन्ततेः ।
तथोत्पत्तेः सहेतुत्वादाश्रयोऽयुक्तमन्यथा ॥ ६९ ॥

भावानां हि विनश्वरस्वभावतया ‘प्रतिक्षणविनाशे’ यो भावः सहकारी भवासन्ततेः तथा तादृश्याः स्वोपादानदे[203] शाया ‘उत्पत्ते’र्न्निमित्तं ‘सहेतुत्वादाश्रयो’ न ‘त्वन्यथा’ऽयुक्तत्वात् । (६९)

### (b. i विशेषणाश्रयाश्रयिभावदूषणम्)

### ii गुणसामान्यकर्मणां दूषणम्

एवं सामान्येनाश्रयाश्रयिभावदूषणमभिधाय द्रव्यदूषणादौ विशेषे दूषणं वक्तुमाह ।

...v.1.70 स्यादाधारो जलादीनां गमनप्रतिबन्धतः ।
अगतीनां किमाधारैर्गुणसामान्यकर्मणाम् ॥ ७० ॥

स्यादाधारो ‘जलादीनां’ प्रसर्पणधर्मणां ‘गमनप्रतिबन्धतः’ कुण्डादिः ‘अगती’नां [036/s] ‘निष्क्रियत्वात्किमाधारैः’ गुणिव्यक्त्यादि‘भिर्गुणसामान्यकर्मणां’ पदार्थानां । (७०)

### (B. समवायसमवायिभावनिरासः)

196 १ यदि स्थापकं विना न तिष्ठति ।
197 २ नाशशीलः स्वयश्चेद् स्यात ।
198 ३ अनश्वरत्वे ।
199 ४ विनाशित्वेऽस्य नाशहेतुनापि न किञ्चिन्नखवत्त्वादेव ।
200 ५ भावस्य नाशित्वात् ।
201 ६ कुण्डादयः किं कुर्व्वाणा आश्रय इति ।
202 ३ अनश्वरत्वे ।
203 ७ आधारस्य ।

...v.1.71 एतेन समवायश्च समवायि च कारणम् ।
व्यवस्थितत्वं जात्यादेर्निरस्तमनपाश्रयात् ॥ ७१ ॥

'एतेनाश्र'याश्रयिभावप्रतिषेधेन 'समवा'यो[204] ऽयुतसिद्धानामाधार्याधारभूतानामिहेति प्रत्ययहेतुर्यथा व्यक्तिसामान्ययोः 'समवायिकारणञ्च' स्वसमवेतकार्यजनकं यथात्मादि बुद्ध्यादीनां 'व्यवस्थितत्वं जात्यादेः' कासुचिदेव व्यक्तिषु[205] गोत्वं वर्तते केषु[206] चिदेव च देहाकारपरिणतेषु चैतन्यमित्या[207] दि 'निरस्तमनपाश्रयादा-' श्रयप्रतिषेधात् । तन्मूलत्वाद्यासां व्यवस्थानां । (७१)

(स्थितिस्थापकतानिरासे संग्रहश्लोकः)

उक्तमर्थं श्लोकत्रयेण संगृह्णन्नाह ।

...v.1.72 परतो भावनाशश्चेत् तस्य किं स्थितिहेतुना ।
स विनश्येद् विनाऽप्यन्यैरशक्ताः स्थितिहेतवः ॥ ७२ ॥

'परतो' मुद्गरादे'र्भाव'स्यानश्वरस्य 'नाशश्चेत् तस्य किं स्थितिहेतुना'श्रयेण स्वयमनश्वरत्वादेव न नक्ष्यति । अथ नश्वरस्वभावोसौ तदा 'स विनश्येत विनाप्यन्यै'र्नाशहेतुभिरं'शक्ताः स्थितिहेतवो' भावं नश्वरं स्थापयितुं नश्व[208] वरस्वभावस्यावश्यं नाशात् । (७२)

किञ्च (।)

....1.73a स्थितिमान् साश्रयः सर्वः सर्वोत्पत्तौ च साश्रयः ।

'स्थितिमान् साश्रयः सर्व्वो' भावः । तत्र यो नाम कश्चि[209] न्नित्याश्रयो यथा सुखादिरात्माश्रितः । सर्व्वः स नित्यं स्थितिमान् स्यात् स्थापकस्य सदा स्थितेः । कश्चिदनित्याश्रयो यथा शुक्लत्वादिः कार्यद्रव्याश्रितः । 'सर्व्वोत्पत्ताव'सर्व्वश्चोत्पद्यमानः । 'साश्रय' इति द्रव्यादिरपि साश्रयः । तदाश्रयोपि कपालादिः खण्डोवयविषु समवेतः ।
[037/s]

ते चान्येष्विति यावत् परमाणव आश्रयावध[210] यः तेषां नित्यत्वात्तदाश्रितं द्व्यणुकं नित्यमित्यनया परम्परया गुणोपि नित्यः सादित्याह (।)

....1.73b तस्मात् सर्वस्य भावस्य न विनाशः कदाचन ॥ ७३ ॥

'तस्मात्सर्व्वस्य भावस्य' बुद्ध्या[211] देः शुक्लादेश्च 'न विना[212] शः कदाचन' प्राप्नोति । (७३)

किञ्च (।)

[204] १ अपृथक् सिद्धानां द्रव्यगुणादीनां ।
[205] २ गव्येव ।
[206] ३ आदिना ।
[207] ४ आश्रयनिषेधे समवायादेव सिद्धेः । अंकुरादीनां वा ।
[208] ५ सर्व्वः । नाशयति
[209] ६ यो नामानित्याश्रयस्तस्याप्यन्यो यावन्नित्याः परमाणव इत्याह ।
[210] १ इति नित्यमेव स्थितिः ।
[211] २ नित्यभूताश्रितत्वात् चैतन्यस्यापि ।
[212] ३ अस्ति च नाश इति किमाश्रयस्वीकारेण ।

...v.1.74 स्वयं विनश्वरात्मा चेत् तस्य कः स्थापकः परः ।
स्वयं न नश्वरात्मा चेत् तस्य कः स्थापकः परः ॥ ७४ ॥

'स्वयम्विनश्व'रात्मा चेत् भावस्तस्य 'कः स्थापकः पर' आश्रया'भिमतो न कश्चि'दसामार्थ्यात् । 'स्वयं न नश्वरात्मा चेत् तस्य कः स्थापकः परः' स्वयमविनाशितयैव स्थितेर्वैयर्थ्यात्स्थापकस्य । (७४)

(c. उपादानोपादेयभावनिरासः)

पुनश्चित्तशरीरयोरुपादानोपादेयतां निषेद्धुमाह(।)

...v.1.75 बुद्धिव्यापारभेदेन निर्ह्रासातिशयावपि ।
प्रज्ञादेर्भवतो देहनिर्ह्रासातिशयौ विना ॥ ७५ ॥

'बुद्धिव्यापारभेदेन' न मनोज्ञानस्याभ्यासविशेषेण 'निर्ह्रासाति'शयावु[213] पचयापचया'वपि प्रज्ञादे'रादिशब्दान्मैत्रीकरुणावैराग्या[214] दीनां 'भवतो देहस्य निर्ह्रासातिशयौ विना' । तस्माद् बुद्धिरेवोपादानकारणं तद्विकारविकारित्वात् । न देहो विपर्ययात् । (७५)

....1.76a इदं दीपप्रभादीनामाश्रितानां न विद्यते ॥

इदमाश्रयविकारं विनापि विकारित्वं 'दीपप्रभादी[215] नामाश्रितानां न विद्यते' त[216] द्विकारविकारित्वात् ।
[038/s][8b/MA]

अथ देहादपि स्वस्थात्प्रज्ञादेरुत्कर्षो दृश्यत इति तद्विकारविकारित्वमस्त्येवेत्याह ।

....1.76b स्यात् ततोऽपि विशेषोऽस्य न चित्तेऽनुपकारिणि ॥ ७६ ॥

'स्यात् ततो' देहा'दपि विशेषो'स्य प्रज्ञादे[217] 'र्न चित्तेऽनुपकारिणि' । चित्तं हि स्वस्थदेहोपकृतसौमनस्यमभ्यासविशेषवत् प्रज्ञादिकमुत्कर्षयति । न गुणेपि चित्ते देह ए[218] व । (७६)

अमुमेव न्यायं रागादावाह ।

...v.1.77 रागादिवृद्धिः पुष्ट्यादेः कदाचित् सुखदुःखजा ।
तयोश्च धातुसाम्यादेरन्तरर्थस्य सन्निधेः ॥ ७७ ॥

या[219] पि 'रागादिवृद्धिः पुष्ट[220] यादेः' सापि न सर्व्वदापि तु 'कदाचित्' प्रकृत्या मन्दरागस्य प्रतिसंख्यानबलिनश्च पुष्टस्यापि रागावृद्धेः । यदापि भवति तदापि न केवलात्पुष्ट्यादेः किन्तु 'सुखदुःखजा' । सुखाद्रागः दुःखाद् द्वेषः इति न चित्तनिरपेक्षो रागादिहेतुर्देहः । 'तयोश्च' सुखदुःखयो'र्द्धातुसाम्यादेरन्तरर्थस्या'नुग्राहकस्यान्तः स्प्रष्टव्यविशेषस्यान्तरस्य स्पर्शज्ञानविषयी-

[213] ४ सन्मित्रासन्मित्रसंयोगादिना ।
[214] ५ नाशः सहेतुको निर्हेतुको वा उभयथा स्थितिहेतुवैफल्यार्थ ।
[215] ६ यत् प्रज्ञादीनां देहोत्कर्षापकर्षनिरपेक्षत्वं बुद्ध्यधीनत्वञ्च ।
[216] ७ तन्न दीपप्रभादीनां तन्न देहमाश्रय इत्यभिप्रायः ॥
[217] १ न मुख्यः किन्तु परम्परया ।
[218] २ उत्कर्षति ।
[219] ३ बुद्ध्युत्कर्षादिनिरपेक्षः केवलो देहो रागादिनिमित्तमित्याह ।
[220] ४ धातुसाम्याद् वैषम्याद्वान्तःस्प्रष्टव्यविशेषेण कायविज्ञानमनुगृह्यते विक्रियते च तद्विकल्पं जनयति ततो रागद्वेषौ परम्परया कायात् ।

कृतस्य 'सन्निधेर्जन्म' । सुखदुःखज्ञाने अपि विशिष्टविषयपूर्व्वज्ञानसापेक्षे एव न देहमात्रजन्ये इत्यर्थः । (७७)

...v.1.78 एतेन सन्निपातादेः स्मृतिभ्रंशादयो गताः ।
विकारयति धीरेव ह्यन्तरर्थविशेषजा ॥ ७८ ॥

'एते'नान्तरोक्तन्यायेन 'सन्निपातादे'रादिग्रहणाज्ज्वरादेः 'स्मृतिभ्रंशादयो गता' व्याख्याताः । धीरेव हि पूर्व्विकाऽ'न्तरर्थविशेषा'द्धातुवैषम्याज्जाता तद्ग्राहि[221]णीं चित्तसन्ततिं 'विकारयति' स्मृतिप्रमोषाद्युपहतां करोति । (७८)

...v.1.79 शार्दूलशोणितादीनां सन्तानातिशये क्वचित् ।
मोहादयः सम्भवन्ति श्रवणेक्षणतो यथा ॥ ७९ ॥

[039/s]

यथा 'शार्दू[222] लशोणितादीनां' यथाक्रमं 'श्रवणेक्षणतः सन्तानातिशये क्वचिद्' भीरुतमे 'मोहादय' आदिशब्दाद् भयरोमहर्षादयो विषयविकृतबुद्धिद्वारेणैव 'सम्भवन्ति' । न हि मोहादीनां शार्दूलशोणितादय उपादानकारणानि किन्तु विषयाः संन्तः परम्परयोपकारकाः तथा रागस्मृतिभ्रंशादयोपि बोद्धव्याः । (७९)

...v.1.80 तस्मात् स्वस्यैव संस्कारं नियमेनानुवर्तते ।
तन्नान्तरीयकं चित्तमतश्चित्तसमाश्रितम् ॥ ८० ॥

'तस्मा'त् स्व'स्यैव संस्कारं नियमेनानुव[223] र्तते । तन्नान्तरीयकं चित्त'मेषितव्य'मतश्चित्तमाश्रितं' चित्तं चित्तसँस्कारस्यैवानुवर्तनात् । देहसंस्कारन्तु व्यभिचरति प्रतिसंख्यानबलिनामित्युक्तं । (८०)

चेतःशरीरयोर्भेदपक्षेणाश्रयाश्रयिभावो ऽयुक्त इति प्रतिपाद्य शक्तिपक्षेप्यभेदात्मके दोषमाह (।)

...v.1.81 यथा श्रुतादिसंस्कारः कृतश्चेतसि चेतसि ।
कालेन व्यज्यतेऽभेदात् स्याद् देहेपि ततो गुणः ॥ ८१ ॥

'यथा श्रुतादिसंस्कारः कृतश्चेतसि' पुनर्यथा-प्रबोधप्रत्ययं चेतसि 'कालेन क्रम-' भाविना 'व्यज्यते' तथा 'अभेदाच्चित्त'शरीरयोः 'स्याद् देहेपि ततः' संस्कारप्रबोधकात् प्रत्ययात् गुणोऽभिव्यक्तः (।) ततश्च देहं पश्यता 'श्रुतादिसंस्कारोपि' तदात्मभूतो दृश्यो दृश्येत ।[224] तस्माद् देहस्याश्रयत्वप्रतिषेधात् तद्विनाशे चित्तविनाशो नेति जन्मपरम्परासु युक्तः कृपाभ्यासः । (८१)

### (ग) पुनर्जन्मपरिग्रहः

कथं पुनर्जन्मपरिग्रह इत्याह (।)

...v.1.82 अनन्यसत्वनेयस्य हीनस्थानपरिग्रहः ।
आत्मस्नेहवतो दुःखसुखत्यागाप्तिवाञ्छया ॥ ८२ ॥

[221] ५ वैषम्योपप्लुता

[222] १ देहश्चित्तमुपकरोति चित्तं प्रज्ञादीन् । चित्तेऽनुपकारिणि सति तु न विशेषः । व्याघ्र इहेति श्रुत्वा बिभेति ।

[223] २ समानजातीयविकल्पविज्ञानस्य पूर्वकस्य ।

[224] ३ न च दृश्यते । श्रुतादिसंस्कारेण संस्क्रियमाणेपि मनोविज्ञाने मनो न देहसंस्कारः ।

[040/s]

'अनन्यसत्वनेयस्य' ईश्वरप्रतिषेधात् । 'हीनस्थानप[225] रिग्रहो' गर्भस्याश्रयत्वेन स्वीकारः 'आत्मस्नेहवतः' सतृष्णस्य दुःखे सुखमिति विपर्यासः । तस्य 'दुःखसुखयोर्यथाक्रमं त्यागाप्तिवाञ्छया' । सतृष्णो हि दुःखे सुखमिति विपर्यस्तः आत्मनि स्निग्धो जन्माक्षेपककर्मवशात् सुखहेतुं गर्भस्थानं मन्यमानः परिगृह्णाति । (८२)

## I. अविद्या-तृष्णे बन्धकारणम्

ततश्च (।)

...v.1.83 दुःखे विपर्यासमतिः तृष्णा चाबन्धकारणम् ।
जन्मिनो यस्य ते न स्तो न स जन्माधिगच्छति ॥ ८३ ॥

'दुः[226] खे विपर्यासमतिस्तृष्णा चाबन्धकारणं' आश्लेषहेतु'र्जन्मिनः' । तृष्णया-आत्मस्नेहोप्याक्षिप्तो हेतुवद्वेदितव्यः । यस्य तून्मू[227] लितात्मग्रहस्य 'ते' विपर्यासस्तृष्णा 'च न स्तो' न विद्येते 'न स जन्माधिगच्छति' ॥ (८३)

## II. गत्यागत्योरदर्शनं इन्द्रियापाटवात्

...v.1.84 गत्यागती न दृष्टे चेदिन्द्रियाणामपाटवात् ।
अदृष्टिर्मन्दनेत्रस्य तनुधूमागतिर्यथा ॥ ८४ ॥

भाविजन्मन्यतीताद्य जन्मनो यथाक्रमं 'गत्यागती न दृष्टे चेत् । इन्द्रियाणामपाटवात्सा अदृष्टि'रदर्शनं ते सूक्ष्मस्यान्तराभवशरीरस्य । 'मन्दनेत्र[228] स्य' पुंसस्त[229] 'नधू'मस्यागतिरदर्शनं 'यथा' । न ह्यदृश्यस्यादर्शनादभावः । (८४)

## III. मूर्त्तस्याऽपि मूर्त्ते प्रवेशः

[9a/MA]

ननु मूर्त्तं न मूर्त्तान्तरमनुप्रविशति प्रतिघातात्(।) मूर्त्तश्चान्तराभवशरीरमित्य[230] त आह (।)

...v.1.85 तनुत्वान्मूर्तमपि तु किञ्चित् क्वचिदशक्तिमत् ।
जलवत् सूतवद्धेम्नि नादृष्टेनासदेव वा ॥ ८५ ॥

[041/s]

'तनुत्वान्मूर्त्तमपि तु किञ्चित्क्वचि'[231] न्मूर्त्ते'ऽशक्तिमद'प्रतिघातवत् 'जलवत्' घटे 'सूतवद्' हेम्नि । जलसूतौ हि मूर्त्तावपि घटहेम्नी भिन्दन्तौ दृश्ये[232] तेऽ( ?अ)न्तराभवशरीरमशक्तिमत् न दृष्टमिति चेत् 'नाद'ष्टेना'सदेव' वा भवति तादृशमन्तराभवशरीरं । (८५)

[225] १ अपराधीनस्य मक्षिकाणामशुचिस्थानग्रहकामिनां स्त्रीकुणपशरीरादिपरिग्रहवत् ।
[226] २ दुःखे गर्भादिस्थानेभिरतिः सुखमेतदिति ।
[227] ३ परिणतोऽभिरतिपुरःसरः प्रपातपातादिविलक्षणः ।
[228] ४ किमिवेत्याह उपहतचक्षुषः ।
[229] ५ विरलः ।
[230] ६ कथं गर्भ प्रविशति ।
[231] १ प्रविशति ।
[232] २ सूर्यरश्मयश्च स्फटिकं भित्वेन्धनं विशन्तीत्यनेकान्तः ।

## IV. नोपादानभूतं शरीरं बुद्धेः

### A. अवयविनिरासः

किञ्च (।) शरीरमुपादानं बुद्धेर्भवदे[233] कमवयविरूपं वा स्यात् । अनेकं परमाणुसञ्चयस्वभावं वा । तत्रावयविरूपं किमवयवा एव हस्तादय उत तेभ्योऽन्यत् (।) द्वयमपि प्रतिषेद्धुमाह[234] ।

...v.1.86 पाण्यादिकम्पे सर्वस्य कम्पप्राप्तेर्विरोधिनः ।
एकस्मिन् कर्मणोऽयोगात् स्यात् पृथक् सिद्धिरन्यथा ॥ ८६ ॥

'पाण्यादिकम्पे' सर्व्वस्य कम्पप्राप्तेः । यदि पाण्यादयोऽवयवा एव अवयव्येकरूपः तदा पाण्यादेः कम्पे सति सर्व्वस्य पादादेरपि कम्पः प्राप्नोति । 'एक'स्मिँस्तस्मिन् 'कर्मणः' कम्पस्य विरोधिनोऽकम्पस्या'योगात्' । एकन्तु द्रव्यं तत्समवेतश्च कम्प इति सर्व्वं कम्पेत । अवयवानामेकावयविरूपत्वं हेतुः पराभ्युपगमसिद्धः । सर्व्वस्य कम्पप्रसङ्गः । न च कम्पोस्ति इति साध्याभावेनैकावयविरूपत्वाभावप्रसङ्गविपर्ययः । एवम्वक्ष्यमाणावपि प्रसङ्गतद्विपर्ययौ वेदितव्यौ ॥ 'अथावयवेभ्यो' भिन्नोऽवयवी । अत एवैकस्मिन्नवयवे कम्पमाने नावयवान्तरस्य कम्पः तदापि 'स्यात् पृथ'क्'सिद्धिरन्य'थाऽवयवावयविनोर्भेदे पृथक्कम्पमानादवयवादकम्पमानस्यावयविनः समवेतस्य भेदेन तत्रै[235] वावयवे सिद्धिः स्यात् वस्त्रो[236] दकवत् । अत्राप्यवयवावयविनोर्भेदः पराभ्युपगमसिद्धो हेतुः । पृथक्सिद्धिः प्रसज्यते । साध्याभावे साध[237] नाभावो विपर्ययः । एवम्वक्ष्यमाणौ च प्रसङ्गविपर्ययौ । (८६)

...v.1.87 एकस्य चावृतौ सर्वस्यावृतिः स्यादनावृतौ ।
दृश्येत रक्ते चैकस्मिन् रागोऽरक्तस्य वाऽगतिः ॥ ८७ ॥

[042/s]

अथाभेदपक्षे 'एकस्या'वयवस्या'वृतौ सर्व्वस्यावृतिश्च स्यादि'ति प्रसङ्गः । भेदपक्षमाश्रित्या-'नावृ'तौ चावयविनः स्वीक्रियमाणायामावृत एवावयवेऽनावृतोसौ दृश्येतेति प्रसङ्गः । अथाभेदपक्षे 'रक्ते चैकस्मिन्न'वयवे सर्व्वत्रावयवे 'रागो' दृश्येतेति प्रसङ्गः । भेदपक्षे तु रक्त एवावयवेऽ'रक्तस्य' चावयविनो 'वाऽगतिः' स्यादिति 'प्रसङ्गः' । (८७)
सर्व्वत्र साध्याभावेन साधनाभावः प्रसङ्गविपर्ययः । तमाह (।)

....1.88a नास्त्येकसमुदायोऽस्मादनेकत्वेऽपि पूर्ववत् ।

'नास्त्येक'स्मिन् नास्त्येकोऽवयवी 'समुदा'योऽवयवाना'मस्मा'त्कम्पादिसाध्याभावात् । अ[238] वयवावयविनोर'नेकत्वेपि पूर्व्ववत्' । अभेदपक्ष इव साध्याभावेन साधनाभावो विपर्ययः ।

---

[233] ३ निरवयवं ।
[234] ४ एकश्चेत्
[235] ५ यथा एकदेशलग्नमुदकं वस्त्रैकदेश एव दृश्यते तद्वत् ।
[236] ६ पृथग्भावः स्यादवयवावयविनोः अवयवी भेदेन दृश्येत ।
[237] ७ सर्वाकम्पार्थं पृथक् स्वीकृतिः पृभगवयव्यसिद्धौ अवयवावयविभेदस्य साधनस्याभावः । ततः सर्व्वकम्पप्रसङ्गस्यापरिहारः ।
[238] १ आवृतावयवादवयविभेदपक्षेपि । अवयविदर्शनप्रसङ्गस्य साध्यस्याभावेनावृताद् भेदस्य साधनस्याभावो विपर्ययः । ततश्चाभेदपक्ष इव सर्व्वावरणादि स्यात् ।

....1.88b अविशेषादणुत्वाच्च न गतिश्चेन्न सिध्यति ॥ ८८ ॥

....1.89a अविशेषः;

अथ शरीरादौ प्रत्यक्षदृष्टे धर्म्मिणि कम्पाकम्पादिविरुद्धधर्म्माध्या[239] सात् । स्वतन्त्र[240] हेतोरेकत्वप्रतिषेधः साधनीय इति । अवयविनोऽभावात् परमाणुपुंजरूपं शरीरादि तदपि परस्परसङ्गमावस्थातः[241] पुञ्जावस्थाया'मविशेषाद्' विशेषाभावात् 'अणुत्वाच्च' । दर्शनानर्हसूक्ष्मतयापि शरीरादेर्न 'गतिश्चेत्[242] । न सिध्यति (८८) अविशेषः' ।

## (a. आवरणाद्यभावनिरासः)

....1.89b विशिष्टानामैन्द्रियत्वमतोऽनणुः ।

परस्परासङ्गतेभ्यः प[243] रमाणुभ्योऽदृष्टसहकारिभ्यो दृश्यानामेवान्योन्यसंहतानामुत्पत्तेः । तेषां 'विशिष्टानामैन्द्रिय'त्वमिन्द्रियग्राह्यत्वं अत[244] ऐन्द्रियत्वा'दनणु'रिष्टः (।) इन्द्रियागोचरेष्वणुत्वं प्रसिद्धं तदेव तु हेतुकृतं । पुञ्जीभूतास्तु दृश्यमाना नाणव [043/s] उच्यन्ते किन्तु शरीरादिव्यपदेश्याः । यथा तन्तवः पटावस्था न तन्तवः उच्यन्तेऽपि तु पट इत्यसिद्धौ हेतू[245] ।

....1.89c एतेनावरणादीनामभावश्च निराकृतः ॥ ८९ ॥

'एतेन' परमाणूनां पूर्व्वावस्थातो विशिष्टत्वकथनेनावर[246] 'णाधारादीनामभावः'[9b/MA] परैरसंहतावस्थायामिव यः प्रतिपादिततः 'स च निराकृतो' बोद्धव्यः । 'केचित् परमाणवः' संहता जाता आवरणधारणादिक्षमा भवन्ति नान्ये । (८९)

...v.1.90 कथं वा सूतहेमादिमिश्रं तप्तोपलादि वा ।
दृश्यं पृथगशक्तानामक्षादीनां गतिः कथम् ॥ ९० ॥

'कथम्वा सूतहेमादिमिश्रं' पिष्टिकावस्थायां तेजःपरमा[247] णुसञ्चयरूपे 'तप्तो'पलादि वा मिश्रं कथं दृश्यं विजातीयानां द्रव्यानारम्भात् न तदवयवि द्रव्यं । परमाणवश्च त्वन्मते न दृश्या इति न तेषां दर्शनं स्यात् । यदि च परमाणवः पृथगवस्थायां ज्ञानजननेऽशक्ता इति पुञ्जावस्था अपि तथा । तदा 'पृथगशक्तानामक्षादीनां'[248] ज्ञानजनने संहतौ 'गतिर्ज्ञानं कथं' । (९०)

---

239 २ अत्रोद्योतकरादय आहुर्यदि

240 ३ सिद्धान्त ।

241 ४ सकाशात् ।

242 ५ अस्माकं मते

243 ६ क्षणिकत्वात् ।

244 ७ येऽतीन्द्रिया अणवो न त एव पश्चात् किन्तु तानाश्रित्यान्य एव विशिष्टा उत्पद्यन्ते ।

245 १ अविशेषादणुत्वाच्चेति परोक्तौ ।

246 २ अवयवित्वायोगात् ।

247 ३ यथा यद्येकं द्रव्यं नेष्यते तदा यथा तेषां पूर्व्वावस्थायां परमाणुरूपं नावृनो/?/ति न दधाति च तथा पश्चादप्यविशेषान्नावृणुयान्न दध्याच्चेति निराकृतं । तैजसाः परमाणवः काष्ठोपलादिपरमाणुभिः परस्परसंभेदेनाविशन्तीति परः ।

248 ४ चक्षूरूपालोकमनसिकाराणां ।

...v.1.91 संयोगाच्चेत् समानोऽत्र प्रसङ्गो हेमसूतयोः ।
दृश्यः संयोग इति चेत् कुतोऽदृश्याश्रये गतिः ॥ ९१ ॥

तस्मादनैकान्तिकमपि हेतुद्वयं नेन्द्रियादेर्ज्ञानजन्म किन्तु संयो[249] गात्तदीयादिति चेत् । 'समानोऽत्र प्रसङ्गः' । यथा पृथगिन्द्रियादयः 'संयोगन्न जनयन्ति । तथा'मिलिता अपि न जनयेयुः । 'हेमसूतयोर्दृश्यः संयोगो' दृश्यत 'इति चेत् । कुतोऽदृश्याश्रये गतिः' । हेमसूतपरमाणवो हि संयोगस्याश्रयास्तेषामदृश्यत्वे कथन्तदाश्रितस्य संयोगस्य दर्शनं (।) न हि कश्चित् पिशाचयोः संयोगमुपलभते (।) किञ्च (।) नानाद्रव्यारब्धपानकादिरपि संयोगो गुण एषितव्यः । तस्मिन् 'मृष्टं पानकं स्वरूपं' पानकमिति निर्गुणत्वाद् गुणानां विरुद्धः ॥ (९१)

...v.1.92 रसरूपादियोगश्च संयोग उपचारतः ।
इष्टश्चेद् बुद्धिभेदोऽस्तु पंक्तिर्दीर्घेति वा कथम् ॥ ९२ ॥

[044/s]

नानागुणिद्रव्येषु संयोगो ॥ रसरूपादयश्च समवेता इत्येकार्थसमवायात्तद्धर्मस्य पानकादिषूप[250] 'चारतो रसरूपादियोग इष्टश्चेत्' । तर्हि क्षीरा[251] दौ पानकादौ च मुख्यामुख्यत्वेन स्पष्टास्पष्टतया मृष्टादि'बुद्धेर्भेदः' स्यात्[252] । न हि माणवकेऽग्निबुद्धिरुपचारादग्नाविव भवति । 'पंक्तिर्दीर्घेति वा कथं'[253] । पंक्तिषु समवेता पङक्तिः सं[254] ख्या गुणो वा स्यात्(।) न च तत्र दैर्ध्यमस्ति निर्गुणत्वाद् गुणानां (।) नापि पङक्तिषु दैर्ध्यमस्ति येनैकार्थसमवायादुपचारः स्यात् (। ९२)

## (b. संख्यादिनिरासः)

एतच्चाभ्युपगम्योक्तं न तु संख्यादयः सन्ति तदाह (।)

...v.1.93 संख्यासंयोगकर्मादिरपि तद्वत्-स्वरूपतः ।
अभिलापाच्च भेदेन रूपं बुद्धौ न भासते ॥ ९३ ॥

'संख्यासंयोगकर्म्मादि'(ः।) आदिशब्दाद्विभागपरत्वापरत्वसामान्यादेरपि 'तद्वत्स्वरूपतो' द्रव्यस्वभावाद् 'भेदेनाभिलापाच्च' । संख्यासंयोग इत्यादिकात् । 'बुद्धौ' द्रव्यग्राहिण्यां 'रूपं न भासते'ऽभासमानश्च दृश्याभिमतं दृश्यानुपलब्ध्या बाधितं ॥ (९३)

यदि संख्यादयो न सन्ति कथमेको घटः संयुक्तो महान् पततीत्यादि व्यपदिश्यते ऽर्थभेदाभावे पर्य्यायता प्राप्नोतीत्यत आह ।

...v.1.94 शब्दज्ञाने विकल्पेन वस्तुभेदानुसारिणा ।
गुणादिष्विव कल्प्यार्थे नष्टाजातेषु वा यथा ॥ ९४ ॥

[249] ५ आत्मा मनसा युज्यते मनः इन्द्रियेण इन्द्रियमर्थेन ततो ज्ञानोत्पत्तिः ।

[250] १ द्रव्यधर्मे गुणे ।

[251] २ आदिना क्षीरोदकादि ।

[252] ३ यदि यत्र परमाणुषु रसादयः समवेतास्तत्र संयोगोपीति संयोगो रसोपचारस्तर्हि क्षारादिवत्पानके रसबुद्धिर्माभूदस्ति च ।

[253] ४ यद्येकार्थसमवायात्तद्धर्मोपचारतो उपदेशः पंक्तिः संयोगत्वाद् गुणः । न तत्र दैर्ध्य गुणोस्ति नापि पक्षिषु कथमुपचारतोपि निर्द्देशः । न हि प्रत्येकं पङिक्तषु दैर्ध्यमस्ति तथाभूतं । येनैकार्थसमवाय उपचारवीजं स्यात् ।

[254] ५ यद्यवयविनं विनाऽदर्शनं तदा कथं सूतहेममिश्रं दृश्यते । न हि तद्द्रव्यारम्भकं विजातीयानारम्भात् अन्यथा सर्व सर्व्वैरारभ्येतेति सिद्धान्तः ।

'शब्दज्ञाने' एको घट इत्यादिके कल्प्यार्थे कल्पितार्थे 'विकल्पेन' (।) कीदृशेन 'वस्तुभेदानुसारिणा' वस्तुनो भेदो विजातीयाद् व्यावृत्तिस्ताम्विषयत्वेनानुसरता 'गुणादि'[045/s] 'ष्विव' यथा पङ्क्त्यादौ 'एका महती गच्छतीत्यादिशब्दज्ञाने । न हि तत्र संख्यादयः' सन्ति निर्गुणत्वाद् गुणानां । 'नष्टाजातेषु वा यथा । एको द्वौ बहवो नष्टा भवि-' ष्यन्ति वेति शब्दज्ञानवत् । 'नष्टमजातश्च स्वयमेव नास्ति किं पुनस्तत्र संख्यादयो' भविष्यन्ति । (९४)

...v.1.95 मतो यद्युपचारोऽत्र स इष्टो यन्निबन्धनः ।
स एव सर्वभावेषु हेतुः किं नेष्यते तयोः ॥ ९५ ॥

'मतो यद्युपचारोत्र' गुणादिषु संख्यादिव्यपदेशस्य 'स' उपचार 'इष्टो यन्निबन्धनो'[255] गुणादिषु संख्याद्युपचारस्य हेतुर्यः 'स एव सर्व्वभावेषु हेतुः किन्नेष्यते तयोः' शब्दज्ञानयोः येन संख्यादयः कल्प्यन्ते प्रमाणबाधिताः ॥ (९५)

...v.1.96 उपचारो न सर्वत्र यदि भिन्नविशेषणम् ।
मुख्यमित्येव च कुतोऽभिन्नेऽभिन्नार्थतेति चेत् ॥ ९६ ॥

'उपचारो न सर्व्वत्र यदि' मुख्ये सत्युपचारो भवति[256] न तु सर्व्वत्रैवा[257] सौ ॥ 'भिन्नविशेषणं' मुख्यं यत्र भिन्नं विशेषणमस्ति 'तन्मुख्यं अन्यत्रोपचारः । भिन्नविशेषणं'[10a/MA] 'मुख्यमित्ये'तदेव 'कुतो' निश्चितं 'अभिन्नेऽभिन्नार्थतेति चेत्' । (९६)

यदि संख्यादि भिन्नं नास्ति तदा घट एकः 'संयुक्तो महान् गच्छतीति शब्दानां' पर्यायता स्यात् । न चास्ति ॥

...v.1.97 अनर्थान्तरहेतुत्वेप्यपर्यायः सितादिषु ।
संख्यादियोगिनः शब्दास्तत्राप्यर्थान्तरं यदि ॥ ९७ ॥

'नन्व[258] नर्थान्तरहेतुत्वेप्यपर्यायः सितादि'गुणे[259] षु 'संख्या[260] दियोगिनः शब्दा' दृश्यन्ते । 'अत्राप्यर्थान्तरं यदि' । सितादौ संख्यादि तिष्ठति । 'ततस्तच्छब्दानाम'पर्यायतापत्तिः । (९७) [046/s]

...v.1.98 गुणद्रव्याविशेषः स्याद् भिन्नो व्यावृत्तिभेदतः ।
स्यादनर्थान्तरार्थत्वेप्यकर्माद्रव्यशब्दवत् ॥ ९८ ॥

एवञ्च सति 'गुणानां द्रव्याणाञ्चाविशेषः स्यात्' संकीर्ण्णलक्षणत्वात् । क्रियावत् गुणवत्समवायिकारणं द्रव्यमिति लक्षण[261] स्य द्वयोरपि भावात् । कथं पुनरभिन्नार्थत्वेप्यपर्यायत्व[262] मित्याह । विजातीयेभ्योऽनेकासंयुक्तादिभ्यो 'व्यावृत्तेर्भेदात् भिन्नः' प्रत्ययश्चैको घटः संयुक्तो

[255] १ लोकव्यवहारनिबन्धनः ।

[256] २ पृष्टः सिद्धान्तिनैकं मुख्यमिति आह ।

[257] ३ तादृशं ते मुख्यलक्षणं । अविशिष्टं स्वतो द्रव्यं विशिष्यते संख्यादिना तत् विशेषणं तस्य भिन्नं ।

[258] ४ तस्मान्नार्थविषयाः सिद्धा । अत्र बौद्ध आहानेकान्ततां ।

[259] ५ गुणेन गुणान्तरमित्यर्थान्तराभावात् यथैकं शुक्लं संयुक्तं विभक्तमित्यादि ।

[260] ६ अर्थान्तरनिमित्तं ।

[261] १ गुणद्रव्ययोः गुणकर्मणोश्च समवायात् ।

[262] २ बौद्धस्यापि ।

घट इत्यादि । अकर्म द्रव्यमद्रव्यं कर्मेति[263] शब्दाविव भिन्नो व्यतिरिक्तार्थाभावेपि । न हि त्वन्मतेप्यकर्मद्रव्यशब्दयोरर्थो द्रव्य[264] कर्मभ्यां भिन्नो वस्तुभूतोस्ति ॥ (९८)

### (B. संख्याद्यभावेऽप्येकत्वसंयोगयोर्व्यपदेशः)

यदि न सन्ति संख्यादयः कथं घटस्यै[265] कत्वं संयोगो वा इत्यादि व्यपदेश इत्याह ।

...v.1.99 व्यतिरेकीव यच्चापि सूच्यते भाववाचिभिः ।
संख्यादितद्वतः शब्दैस्तद्धर्मान्तरभेदकम् ॥ ९९ ॥

'व्यतिरे'कीव भेदवदिव 'यच्चापि संख्यादि तद्वतो' द्रव्याद् 'भाववाचिभिः' द्रव्याभिधायिभिः 'शब्दैः सूच्यते' घटस्यैकत्वमित्यादि । तत्सूच्यमानमेकत्वादि'धर्म्मान्तर'स्य शुक्लत्वादेः 'भेदकं' । यद्यपि घटानैकत्वादयो भिन्ना वस्तुतस्तथाप्येकत्वशुक्लत्वादयो घटात्परस्परं चानुवृत्त्यननुवृत्तिभ्यां कल्पितभेदाः । (९९)

....1.100 श्रुतिस्तन्मात्रजिज्ञासोरनाक्षिप्ताखिलापरा ।
भिन्नं धर्ममिवाचष्टे योगोऽङ्गुल्या इति क्वचित् ॥ १०० ॥

तेषु यदैको धर्मः प्रतिपि[266] त्सितः तदा भेदेन निर्दिष्टः स धर्मान्तरप्रतिक्षेपको भवति घटस्यैकत्वमित्यादि । तदा 'तन्मात्र'स्यैकधर्ममात्रप्रतिपित्सोः प्रतिपाद्यस्यान्'रोधेन च तथा' संकेतवशात् प्रयुक्ता 'श्रुतिरनाक्षिप्तो'ऽविषयीकृतोऽ'परोखिलो' धर्मो (व्यवच्छेदकं ।) यथासम्भवी यया सा तादृशी धर्मिणो धर्म्मान्तरेभ्यश्च 'भिन्नं' निष्कृष्टमिव 'धर्ममाचष्टे' यथाऽ'ङ्गुल्या योग' इति । (१००)

....1.101 युक्ताङ्गुलीति सर्वेषां आक्षेपाद् धर्मिवाचिनी ।
ख्यातैकार्थाभिधानेऽपि तथा विहितसंस्थितिः ॥ १०१ ॥

[047/s]

### (a. धर्मवाचिन्येव श्रुतिर्धर्मिवाचिनी)

यदा तु स एव धर्मो धर्मान्तरसम्बन्धयोगो जिज्ञासितस्तदा तथा संकेताद् 'युक्ताङ्गुली-'ति श्रुतिः 'सर्व्वेषां' धर्म्मान्तराणा[267] 'माक्षेपाद् धर्मिवाचिनी ख्याता' । एकस्य विजातीयव्यावृत्तिलक्षणस्यार्थस्या'भिधानेप्य'यम्विभागो युक्तः । 'यस्मात्तेन प्रकारेण विहितसंस्थितिः' कृतव्यवस्था सा श्रुतिः संकेतेन । (१०१)

### (b. समुदायवाचिनी श्रुति)

---

[263] ३ अकर्मकत्वादौ परेण व्यतिरेको नेष्टोऽभिमतादतो व्यावृत्तिमुखेनैव ते स्थाप्याः अकर्मत्वमद्रव्यत्वञ्चास्येति ।

[264] ४ अत्र व्यावृत्तिरेव शरणं ।

[265] ५ व्यतिरेकषष्ठी ।

[266] ६ प्रतिपत्तुमिच्छुः ।

[267] १ अङ्गुलीगतानां ।

तदेवं धर्मवाचिन्यपि श्रुतिर्द्धर्मान्तरप्रतिक्षेपाप्रतिक्षेपाभ्यां 'धर्मवाचिनी धर्मि'वाचिनी वेति निर्दिष्टं ।

इदानीं समु[268] दायवाचिनीं दर्शयति ।

....1.102 रूपादिशक्तिभेदानामनाक्षेपेण वर्त्तते ।
तत्समानफलाऽहेतुव्यवच्छेदे घटश्रुतिः ॥ १०२ ॥

घटव्यपदेशभाजां 'रूपादी'नामवान्तररंजना[269] 'दिशक्तिभेदानामनाक्षेपेण तेषां' रूपादीनां 'यत्समानं' फलमुदकाहरणादि तस्याहेतोरश्वादे'र्व्यवच्छेदे' प्रतिपाद्ये 'घट'[270]श्रुतिर्व्वर्तते उदकाहरणाद्यहेतुव्यावृत्तिं समुदायवाची घटशब्द आहेत्यर्थः । (१०२)

....1.103 अतो न रूपं घट इत्येकाधिकरण श्रुतिः ।
भेदोयमीदृशो जातिसमुदायाभिधायिनोः ॥ १०३ ॥

अतः समुदायाऽभिधायित्वात् न रूपं घट इत्येकाधिकरणा श्रुतिः । 'रूपशब्दो' हि धर्मवाची घटशब्दस्तु समुदायाभिधायी । कथमनयोरेकार्थता । 'भेदोऽयमी'दृ[271] शो 'जातिसमुदायाभिधायिनो'र्घटत्वघटशब्दयोश्च ज्ञेयः । (१०३)

समुदायाभिधायी चाप्रतिक्षिप्त[272] धर्मान्तर एव भवतीति सौव[273] र्णो घट इत्यादि सामानाधिकरण्यं । स च[274] द्विविधोऽनेकवृत्तिरन्यथा[275] च । 'तथा घटादि'शब्दो[276] वि न्ध्याद्रि शब्दश्च । यदि रूपादयः केवला नास्त्यवयवी तदा कथं घटस्य [048/s] रूपादय इति सम्बन्ध (।) इत्या[277] ह (।)

....1.104 रूपादयो घटस्येति तत्सामान्योपसर्जनाः ।
तच्छक्तिभेदाः ख्याप्यन्ते वाच्योऽन्योपि दिशाऽनया ॥ १०४ ॥

'रूपादयो घटस्य' इति सम्बन्धवाचिन्या श्रुत्या 'तत्सामान्योपसर्जना' घटत्व[10b/MA] सामान्यविशेषितास्तेषां रूपादीनां शक्तिभेदा रञ्जनादयः ख्याप्यन्ते घटव्यपदेशविषयसमुदायान्तर्ग्गतं रञ्जनक्षमरूपं निष्कृष्योच्यत इत्यर्थः । अन्योपि चन्दनस्य गन्ध इत्यादिव्यपदेशोऽनया दिशा वाच्यः । विस्तरस्तृतीयपरि[278] च्छेद एवास्य । तदेवमवयव्यादीनां प्रतिषेधात् पानकादिरिव परमाणुपुञ्जरूप एव देहः प्रत्यक्षेणेक्ष्यत इति स्थितं ॥ (१०४)

## (घ) विज्ञानं कारणम्

### I. परमाणूनां समुदितानां न बुद्धिहेतुत्वम्

[268] २ रूपरसादेः ।

[269] ३ रक्तं चित्तं स्याद्विशिष्टरूपादौ चक्षुर्व्विज्ञानादि ।

[270] ४ रूपरसाद्ये नैकत्र द्रव्ये एककार्यकारणशक्तिख्यापनाय ।

[271] ५ स्वविकल्पोपरचितं न मुख्यं गौर्व्वाहीकवदुपचारश्च, न गुणेषु संख्यादिवृत्तिः । न ह्येकं रूपं एको घट इति प्रत्यये लोकस्यावसायभेदः ।

[272] ६ जातिशब्दत्वात् ।

[273] ७ समुदायभेदापेक्षयाऽन्यानाक्षेपाय ।

[274] ८ समुदायाभिधायी ।

[275] ९ अनेकघटवृक्षादौ ।

[276] १० एकगिरौ स्वसमुदायापेक्षः ।

[277] १ द्विधा रूपादीनां शक्तिः सामान्या यथा घटादेरुदकाहरणादि । प्रतिनियता च चक्षुर्व्विज्ञानादिजनिका ।

[278] २ सामान्यादिचिन्तायां (३।५५) ।

न चास्य बुद्धिहेतुत्वं युक्तमिति प्रकृतमनुबन्धं परमाणूनां समुदितानां प्रत्येकं बुद्धिहेतुत्वाभावं वक्तुमाह ।

....1.105 हेतुत्वे च समस्तानामेकाङ्गविकलेपि न ।
प्रत्येकमपि सामर्थ्ये युगपद् बहुसम्भवः ॥ १०५ ॥

यदि 'समस्तानां' देहपरमाणूनां 'हेतुत्वं' तदाऽव[279] यवच्छेदादिना 'एकाङ्गविकलेपि' देहे न स्यात् बुद्धिः (।) न चैतदस्ति । अथ प्रत्येकं ते समर्थास्तदा 'प्रत्येकमपि सामर्थ्ये' स्वीक्रियमाणे 'युगपद् बहुसम्भवः' । परमाणुसंख्यानि ज्ञानानि युगपज्जायेरन् सर्व्वेषां प्रत्येकं सामर्थ्यात् । (१०५)

(II. प्राणापानयोरनियामकता)

अथ प्राणापानाभ्यां नियामकाभ्यामेकमेव ज्ञानमभिव्यज्यते ततो न युगपदनेका व्यक्तिरित्यत आह (।)

....1.106 नानेकत्वस्य तुल्यत्वात् प्राणापानौ नियामकौ ॥
एकत्वेऽपि बहुव्यक्तिस्तद्धेतोर्नित्यसन्निधेः ॥ १०६ ॥

तन्न । परमाणुसञ्चयात्मकत्वेन देहवत् प्राणापानयोर'प्यनेकत्वस्य तुल्यत्वात्' । 'तेषां प्रत्येकमभिव्यञ्जकत्वे युगपदनेका'भिव्यक्तिप्रसङ्गादेकज्ञानाभिव्यक्तौ [049/s] प्राणापानौ नियामकौ न युक्तौ । 'एकत्वेपि' प्राणस्या[280] पानस्य च 'बहूनां नाना'कालभाविनां ज्ञानानां युगपद'भिव्यक्तिः' स्यात् । तस्याभिव्य[281] क्ते'र्हेतोः' प्राणा[282] देर्नित्यं सन्निधेः ॥ (१०६)

....1.107 नानेकहेतुरिति चेन्नाविशेषात् क्रमादपि ॥
नैकप्राणेप्यनेकार्थग्रहणान्नियमस्ततः ॥ १०७ ॥

युगप'न्नानेक'स्या'भिव्यक्तिहेतुः' प्राणा'दिरिति चेत्'[283] (।) 'न' स्याद्धेतुर'विशेषात्' ।[284] 'क्रमादपि' ॥

किञ्चै[285] कस्मिन्नपि 'प्राणेऽनेकेषा'म'र्थानां ग्रहणाद'नेका'भिर्बु'द्धि[286] भिरेकः प्राणः एकां बुद्धिमभिव्यनक्तीति नायन्तत एकप्राणा'न्नियमः' । (१०७)

....1.108 एकयाऽनेकविज्ञाने बुद्ध्याऽस्तु सकृदेव तत् ।
अविरोधात्; क्रमेणापि मा भूत् तदविशेषतः ॥ १०८ ॥

'एक[287] या बुद्ध्याऽनेकवि[288] ज्ञाने' च स्वीक्रियमाणेऽ'स्तु सकृदेव तत्' यावद् ग्रहीतव्यग्रहण'मविरोधात्' यद्येकस्या अनेकग्रहणं विरुध्यते कतिचित्पदार्थग्रहणमप्येकदा न स्यात्

---

279 ३ कर्ण्णादि ।

280 १ अथ माभूदेव दोष इति प्राणादिरेकं द्रव्यमिष्यते ।

281 २ नित्यत्वादस्य । यत् सन्निहिताविकलकारणं तद् भवत्येवेति न्यायादाह ।

282 ३ देहस्य च ।

283 ४ प्राणापानदेहस्य य आत्मा विज्ञानहेतुः पश्चात्स पूर्व्वमपीति ।

284 ५ अनेकत्वेपि प्राणापानयोर्देहस्य च एकत्रैव ज्ञाने सामर्थ्यं न बहुषु चेत् क्रमेणानेकज्ञानहेतुत्वमनेनाभ्युपेयमेव ।

285 ६ यद्यप्युक्तमेकः प्राणादिरेकां धियं व्यनक्तीति तन्न ।

286 ७ अनेकक्षणभावित्वादेकप्राणस्य एकप्राणकालेऽनेका बुद्धिः प्रवर्तते निवर्तते च ।

। न विरुध्यते चेत् यावद्गृहीतव्यं गृह्णीया[289] त् । 'अन्यथा क्रमेणापि मा भूद'नेकग्रहणं । 'तदविशेषतो' बुद्धेर्व्विशेषाभावात् । (१०८)

....1.109 बहवः क्षणिकाः प्राणा अस्वजातीयकालिकाः ।
तादृशामेव चित्तानां कल्प्यन्ते यदि कारणम् ॥ १०९ ॥

'बह[290] वःक्षणिकाः प्राणा अस्वजातीयकालिका' असह[291] भाविनः । 'ताद'[292] शामेकक्षणिकानां बहूनामसहभाविनां 'चित्तानां कल्प्यन्ते यदि कारणं' । (। १०९)

[050/s]

....1.110 क्रमवन्तः कथं ते स्युः क्रमवद्धेतुना विना ।
पूर्वस्वजातिहेतुत्वे न स्यादाद्यस्य सम्भवः ॥ ११० ॥

तदां 'क्रमवन्तः कथन्ते' प्राणाः 'स्युः क्रमवद्धेतुना विना' । शरी[293] रं तेषां हेतुः तच्चाक्रमं । न चाक्रमात्क्रमिकार्यं युक्तं 'पूर्व्वस्वजा'तिहेतुत्वे 'न स्यादाद्यस्य' प्राणस्य 'सम्भवः' । (११०)

## (III. परलोकानागतस्य प्राणे निर्हेतुकता)

न हि परलोकागतः प्राणोस्ति य आद्यस्य शरीरसम्बन्धिनो हेतुः स्यात् । एतदेवाह ।

....1.111 तद्धेतुस्तादृशो नास्ति सति वाऽकनेता ध्रुवम् ।
प्राणानां भिन्नदेशत्वात् सकृज्जन्म धियामतः ॥ १११ ॥

[294] तद्धेतुस्तादृशो नास्ति । 'सति' च तद्धे[295] ताव'नेकता ध्रुवं प्राणानां भिन्नदेशत्वात्' । दे[296] शभेदात् प्राणाः प्रतिदेशं भिन्ना 'अतो'ऽनेकत्वात् प्राणानां प्रत्येकं समर्थानां तेभ्यो व्यञ्चकोऽनेकत्वादतो 'धियां जन्म सकृत्' स्यादिति प्रसङ्गः । (१११)

....1.112 यद्येककालिकोऽनेकोऽप्येकचैतन्यकारणम् ।
एकस्यापि न वैकल्ये स्यान्मन्दश्वसितादिषु ॥ ११२ ॥

'यद्येककालिकोऽनेकः' प्राण[297] 'एकचैतन्यकारण'मिष्यते तदे'कस्यापि' प्राणस्य 'मन्दश्वसितादिषु वैक ल्ये' सति 'न स्याच्चै'तन्यं कारणानामसमग्रत्वात् । (११२)

....1.113 अथ हेतुर्यथाभावं ज्ञानेऽपि स्याद् विशिष्टता ।
न हि तत् तस्य कार्यं यद् यस्य भेदान्न भिद्यते ॥ ११३ ॥

---

287 ८ आसर्गप्रलयादेरेकैव बुद्धिरिति सिद्धान्तात् ।

288 ९ अथ क्रमवत्येकैव तदा बुद्धिरिष्यते तदा ।

289 १० दीर्घश्च सितादौ यावन्तस्ते तत्रैव ।

290 ११ नैकः प्राणोऽनेकविज्ञानहेतुः किन्तु ।

291 १२ यदेकः प्राणो न तदाऽपरः ।

292 १३ क्रमिणां ।

293 १ अथैतद्दोषतया देहं त्यक्त्वा पूर्व्वपूर्व्वप्राणहेतुकाः प्राणा इष्टास्तदा ।

294 २ तदा ज्ञानेपि पटुत्वादि ।

295 ३ अभ्युपगम्याह ।

296 ४ बहुत्वं यूथवन्मन्यते ।

297 ५ युगपद्बहुसम्भवनिरासार्थं ।

'अथ हेतुर्यथाभावं' यथासम्भवं प्राणानां हेतुत्वं स्यात् । तदा 'ज्ञानेपि स्याद् विशिष्टता' (।) प्राणानामुपचयापचयाभ्यां ज्ञानमपि तादृशं स्यात् । 'न हि तत्तस्य कार्यं'[298] युक्तं 'यद्यस्य भेदान्न भिद्यते' । (११३)

### (IV. शक्तिनियमाद् न धियां सकृज्जन्त)

त्वन्मतेपि धियां सकृज्जन्म कस्मान्न भवतीत्याह ।
[051/s]

...1.114a विज्ञानं शक्तिनियमादेकमेकस्य कारणम् ।

'विज्ञानं शक्तिनियमादेकंविज्ञानमे[299] कं' । 'शक्तेः' स्वका[300] रणकृताया 'नियमादेकस्य' विज्ञानस्य 'कारण'मिति न सकृद् धियां जन्म ।

कुत एवदिति चेदाह ।

...1.114b अन्यार्थासक्तिविगुणे ज्ञाने नार्थान्तराग्रहात् ॥ ११४ ॥

अन्यस्मिन्नर्थे आसक्त्या पुनः पुनः प्रवृत्यात्मिकया 'विगुणे' विषयान्तरसञ्चारि-[11a/MA] ज्ञानोत्पादविरोधानि 'ज्ञाने' पूर्व्वके सति विषयान्तरस्याग्रहणात् । अविगुणे तु ग्रहणात्[301] । तस्मात् ज्ञानकार्यं ज्ञानं । तदन्वयव्यतिरेकानुविधानात् । (११४)

### (ङ) कर्मसिद्धिः

### I. सहस्थितिकारणं कर्म,

....1.115 शरीरात् सकृदुत्पन्ना धीः स्वजात्या नियम्यते ।
परतश्चेत् समर्थस्य देहस्य विरतिः कुतः ॥ ११५ ॥

अथ 'शरीरा[302] त्सकृ'त्प्रथममुत्पन्ना धीः 'स्वजात्या नियम्यते परत' एकस्या बुद्धेरेका बुद्धिर्भवतीति न सकृज्जन्मप्रसङ्गः । ननु बुद्धिजनने प्रथमं 'समर्थस्य देहस्य' पश्चा-'द्विरति'स्तज्जननात् 'कुतः' । येन बुद्धिर्न्नियामिका स्यात् परतः । (११५)

....1.116 अनाश्रयान्निवृत्ते स्याच्छरीरे चेतसः स्थितिः ।
केवलस्येति चेच्चित्तसन्तानस्थितिकारणम् ॥ ११६ ॥

ननु यदि बुद्धेर्न देह आश्रयस्तदाऽ'नाश्रयादाश्र'याभावात् 'निवृत्ते शरीरे केवलस्य चेतसः स्थितिः स्यादिति चेत्' । स्यादेतत्[303] शरीरेण सह 'चित्तसन्तानस्य स्थितिकारणं' दृष्टं[304] सहायं यत्कर्म (११६ ।)

[298] ६ न च ज्ञानं तदर्थकारि ।
[299] १ सजातीयं ।
[300] २ न युगपत्समानजातीयानि विज्ञानानि विजातीयानि तु स्युः ।
[301] ३ कालुष्यप्रसादादिमत्स्वपूर्व्वपूर्व्वविज्ञानेषूत्तराण्यपि तथा स्युः ।
[302] ४ गर्भादौ कायपरमाणवो जनयन्त्येकं चैतन्यं ।
[303] ५ आरूप्यभाव ।
[304] ६ पश्चायतनं

## (II. आमुत्रिकदेहहेतुः पश्चायतनमैहिकम्)

...1.117a तद्धेतुवृत्तिलाभाय नाङ्गतां यदि गच्छति ।

a. तद्यदि तस्य पारलौकिकस्य 'देहस्य हेतु'रैहिकमन्त्यं पश्चा[305] यतनं तस्य 'वृत्तिः' [052/s] पारलौकिकदेहजननाद्याभिमुख्यं । तस्य 'लाभाय' प्राप्तयेऽ'ङ्गतां' सहकारितां 'न गच्छति' तदा केवलं चित्तं तिष्ठति । यथा विरूपे धातौ ।

कः पुनरामुत्रिकदेहहेतुः यस्य चित्तं सहकारीत्याह ।

...1.117b हेतुर्देहान्तरोत्पत्तौ पश्चायतनमैहिकम् ॥ ११७ ॥

'हेतुर्देहान्तरोत्पत्तौ पश्चायतनं' पश्चेन्द्रियाणि । ऐहिकमिदं जन्मभवं (। ११७)

....1.118 तदङ्गभावहेतुत्वनिषेधेऽनुपलम्भनम् ।
अनिश्चयकरं प्रोक्तं । इन्द्रियाद्यपि शेषवत् ॥ ११८ ॥

यच्च तयोः कर्म-ऐहिकपश्चायतनयोर्यथाक्रम'मङ्गभावहेतुत्वयोः' सहकारितोपादानत्वयो'र्निषेधे' कर्त्तव्येऽ[306] 'नुपलम्भनं' परैरुच्यते । तद'निश्चयक'रमनैकान्तिकमदृश्यविषयत्वात् 'प्रोक्तं इन्द्रियाद्यपि शेषवत्' । यजपीन्द्रियादि शरीरान्तरसम्बन्धीन्द्रियादि प्रतिसन्धातृ न भ[307] [308] वतीन्द्रियत्वादेरिति तदपि शे[309] [310] षवदनैकान्तिकं बोद्धव्यं । आदिशब्दात्प्राणापानत्वादि ज्ञानत्वादि[311] च । (११८)

b विरुद्धत्वमपि दर्शयति ।

....1.119 दृष्टा च शक्तिः पूर्वेषामिन्द्रियाणां स्वजातिषु ।
विकारदर्शनात् सिद्धं अपरापरजन्म च ॥ ११९ ॥

'दृष्टा च शक्तिः पूर्व्वेषामिन्द्रियाणां स्वजातिषु' कर्त्तव्येषु मध्यावस्थायां तत इन्द्रियादित्वात् । स्वजातिप्रतिसन्धातृत्वमेवैषां युक्तं । मध्यावस्थायाश्च पूर्व्वावस्थातः पाट[312] वादि'विकारदर्शनात् सिद्धं' प्रतिक्षण'मपरापरजन्म चे'न्द्रियादीनामिति नादृष्टान्तो हेतुः । (११९)

c ननु शरीरादेवेन्द्रियादीनां जन्मेत्याह ।

....1.120 शरीराद् यदि तज्जन्म प्रसङ्गः पूर्ववद् भवेत् ।
चित्ताच्चेत् तत एवास्तु जन्म देहान्तरस्य च ॥ १२० ॥

---

305 ७ इन्द्रियं ।

306 १ न दृष्टमेतत्सहकारित्वादीति ।

307 २ मध्यावस्थेन्द्रियवत् । अव्याप्तेः ।

308 ३a अन्त्यं शरीरं ।
Placement of note uncertain; marked with a question mark in the edition (see encoding description for details).

309 ३ यथा चैत्रेन्द्रियं मैत्रेन्द्रियस्यातिपरस्य विजातीयासंन्धानं दृष्टान्तः । स्वस्य तु सजातीयं सन्धायकं पूर्व्वेन्द्रियेण परसन्धानदृष्टेः ।

310 ४a अन्त्यचित्तं न देहसहकारि देहान्तरोत्पादने चित्तत्वात् पूर्व्वचित्तवता
Placement of note uncertain; marked with a question mark in the edition (see encoding description for details)

311 ४ ज्ञानासहकारित्वे पूतीभावः स्यात् ।

312 ५ प्रसन्नाविलत्वादिना ।

[053/s]

‘शरीराद्यदि’ तेषामिन्द्रियादीनां ‘जन्म’तदा ‘पूर्व्वव’द्धे[313] तुत्वे च समस्तानामित्यादिनोक्तः ‘प्रसङ्गो भवेत्’ । ‘चित्ताच्चे’दिन्द्रियचित्तादीनां जन्म शरीराज्जन्मनि दोषदर्शनादिष्यते तदान्त्यावस्थायामप्यवि‘कलत्वा’च्चित्तस्य ‘तत’ एवास्तु ‘जन्म देहान्तरस्य’ पञ्चायतनरूपस्यानगतस्य । (१२०)

....1.121 तस्मान्न हेतुवैकल्यात् सर्वेषामन्त्यचेतसाम् ।
असन्धिरीदृशं तेन शेषवत् साधनं मतम् ॥ १२१ ॥

d यतश्चित्तमेव चित्तस्य हेतुः । तृष्णाकर्मसहायश्च पञ्चायतनस्य । ‘तस्मान्न हेतुवैकल्यात् । सर्व्वेषामन्त्यचेतसामसन्धिः’ चित्तस्य पञ्चायतनस्य ‘च’ हेत्ववैकल्यात् कार्योत्पादस्यावश्यम्भावित्वात् (।) तेनेदृशमन्त्यचित्तत्वादि ‘शेष’वदनैकान्तिकं ‘साधनं मतं’ ॥ (१२१)

## (ख. युक्तः करुणाभ्यासः)

### (क) चित्तमात्रप्रतिबद्धत्वात्

तदेवं चित्तमात्रप्रतिबद्धत्वाच्चित्तजन्मनो देहनिवृत्तावपि जन्मपरम्परासम्भवे युक्तः कृपाभ्यास इत्यभ्यासात्सेति समर्थितं ।

...1.122a अभ्यासेन विशेषेऽपि लङ्घनोदकतापवत् ।
स्वभावातिक्रमो मा भूदिति चेद्;

‘नन्वभ्यासेन विशेषेपि’ सत्यल्पीयसि ‘स्वभावस्य’ कृपादेस्तद्विपक्षसंकीर्णत्वस्यातिक्रमो विपक्षाव्यवकीर्ण्णस्वरसप्रवृत्तकृपादिमयता सात्मीभावो ‘मा भूत् लंघनोदकतापवत्’ ।

### (ख) पुनर्यत्नापेक्षा

न हि पुरुषोत्यर्थं लङ्घने कृताभ्यासो योजनमर्द्धयोजनं वा लङ्घयति । नाप्युदकमेकान्तं ताप्यमानं दहनीभवति । किन्तु प्रकृतिसिद्धात् लङ्घनात् स्पर्शाच्च विशेषमात्रं भवति यथा (।) तथोत्कर्षमात्रं स्यात् कृपया न तु सात्मीभाव ‘इति चेत्’ । अत्राह (।)

...1.122b आहितः स चेत् ॥ १२२ ॥

....1.123 पुनर्यत्नमपेक्षेत यदि स्याच्चास्थिराश्रयः ।
विशेषो नैव वर्द्धेत स्वभावश्च न तादृशः ॥ १२३ ॥

[054/s]

‘आहितः स चेत्’ विशेष (:। १२२) आधायकनिवृत्तावात्मलाभाय ‘पुनर्यत्नमपेक्षेत’ न स्वरसवाही स्यात् । लङ्घनं यथाभ्यस्तमपि पुनर्यत्नापेक्षयैव प्रवर्तते न ‘स्वरसवाहि’ । ‘यदि स्याच्चास्थिराश्रय’ उदकतापवत् । क्वाथ्यमानं ह्यदकं क्षीय[314] त एव इत्यस्थिराश्रय उदकतापः पुनर्यत्नापेक्षी च स्वरसवाहित्वाभावात् । तदा [11b/MA] ‘विशेषो नैव वर्द्धेत’ प्रकर्षनिष्ठां

[313] १ युगपद् बहुत्वं मृतेपि ।

न गच्छेत् (।) 'तादृशश्च' विशेषो 'नैव स्वभावः' ।[315] प्रकृतिर्व्विशेष[316] वत् । हे[317] तुसन्निधानव्यवधानसापेक्षत्वात् प्रवृत्तिनिवृत्त्योः । (१२३)

तथा च (।)

....1.124 तत्रोपयुक्तशक्तीनां विशेषानुत्तरान् प्रति ।
साधनानामसामर्थ्यान्नित्यश्चानाश्रयस्थितेः ॥ १२४ ॥

'तत्र' पूर्व्वदृष्ट एव विशेषे 'उपयुक्तशक्तीनां साधनानां' यत्नादीनां पुनरपि 'विशेषानुत्तरान् प्रत्यसामर्थ्यात् नित्यश्चानाश्रयस्थितेः' । (१२४)

....1.125 विशेषस्यास्वभावत्वाद् वृद्धावप्याहितो यदा ।
नापेक्षेत पूनर्यत्नं यत्नोन्यः स्याद् विशेषकृत् ॥ १२५ ॥

आश्रयस्थित्यभावात् तादृशस्य 'विशेषस्यास्वभावत्वात् वृद्धावपि' व्यवस्थितोत्कर्षतैव । पुनर्यत्नापेक्षित्वेनास्थिराश्रयत्वेन व्यवस्थितोत्कर्षता व्याप्तेत्यर्थः । 'यदा' तु विशेष 'आहितो नापेक्षेत पुनर्यत्नं' प्रागुत्पन्नस्यात्मनो लाभायापि तु स्वरसवाही 'भवति तदा यत्नोऽन्यः' क्रियमाणो 'विशेषकृत्' यथाभ्यासमुत्तरोत्तरविशेषाधायी भवति । (१२५)

## (ग) स्वरसेनाभ्यासजः करुणादिप्रवाहः

....1.126 काष्ठपारदहेमादेरग्न्यादेरिव चेतसि ।
अभ्यासजाः प्रवर्त्तन्ते स्वरसेन कृपादयः ॥ १२६ ॥

'काष्ठपारदेहमादेरग्न्यादेरिव' । यथाग्निना हेमचारणजार[318] णादिना पुटपाकादिना यथाक्रमं का[319] ष्ठे पा[320] रदे हेम्नी[321] व दरदाहः । रुप्यरञ्जनसामर्थ्यवर्णिका[322][055/s] वृद्धय आहिताः स्वरसवाहिन्यो न पुनर्यत्नसापेक्षाः । तेषु यदा पुनर्वह्न्यादयो व्याप्रियन्ते तदा समधिकमङ्गारा[323] दिविशेषमादधति (।) 'तथाभ्यासजाः कृपादयः' पुनर्यत्नानपेक्षित्वात् स्थिराश्रयत्वाच्च 'स्वरसेन प्रवर्तन्ते' । (१२६)

....1.127 तस्मात् स तेषामुत्पन्नः स्वभावो जायते गुणः ।
तदुत्तरोत्तरो यत्नो विशेषस्य विधायकः ॥ १२७ ॥

'तस्मात्' स्वरसवाहित्वात्स 'तेषा'मभ्यासवतां पुंसा'मुत्पन्नो' गुणः 'कृपादिः स्वभावो' जायते मनसः प्रकृतिर्भवति । 'तदुत्तरोत्तरो यत्नः' पूर्व्वपूर्व्वाभ्यासादपरापरः प्रयत्नो विशेषकृद् भवति पूर्व्वप्रयत्नकृतस्य 'विशेषस्य' सुस्थितत्वात् । आधिक्याधानमेवापरयत्नात् । (१२७)

[314] १ न ज्वलति ।
[315] २ लंघनादिविशेषवन्न प्रकृतिः । अन्यानपेक्षत्वात्स्वभावस्याकाशवत् ।
[316] ३ नैवं प्रज्ञादयोऽभ्यासात् काष्ठानिष्टां प्रतिष्ठिताः ।
[317] ४ विशेषस्य ।
[318] ५ तुषदाह्ये प्रक्षिप्तानां तत्रैव क्षयनयनं ।
[319] ६ अग्निना ।
[320] ७ हेमादिना ।
[321] ८ पुटादिना कल्याणसुवर्ण्णता ।
[322] ९ वानी (?) ।
[323] १ यावद् भस्मशात् स्यात् ।

....1.128 यस्माच्च तुल्यजातीयपूर्वबीजप्रवृद्धयः ।
कृपादिबुद्धयस्तासां सत्यभ्यासे कुतः स्थितिः ॥ १२८ ॥

'यस्माच्च' कारणा'तुल्यजातीया'त् 'पूर्व्व'स्मात् बीजाद्वासनागर्भसमनन्तरप्रत्यया-त् 'प्रवृद्धि'रुत्कर्षो यासान्तास्तथा 'कृपादिबुद्धयः' (।) 'तासां सत्यभ्यासे कुतः' स्थितिर्व्यवस्थितोत्कर्षता । (१२८)

....1.129 न चैवं लंघनादेव लंघनं बलयत्नयोः ।
तद्धेत्वोः स्थितशक्तित्वाल्लंघनस्य स्थितात्मता ॥ १२९ ॥

'न चैवं लंघनादेव लंघनं' यथा कृपादिभ्य एव कृपादयः । तथा न लंघनादेव लंघनमपि तु बलयत्नाभ्यां 'बलयत्नयोस्तद्धेत्वोः स्थितशक्तित्वात्' सामर्थ्यनियमात् लंघनस्य 'स्थितात्मता' व्यवस्थितोत्कर्षता भवति । (१२९)

यदि बलयत्नाभ्यामेव लंघनं न स्वभावजातीयात्तदाभ्यासात्प्रागपि तावत्परिमाणं स्यादित्याह (।)

....1.130 तस्यादौ देहवैगुण्यात् पश्चाद्वदविलंघनम् ।
शनैर्यत्नेन वैगुण्ये निरस्ते स्वबले स्थितिः ॥ १३० ॥

'तस्य' लंघयितुरादावभ्यासात् पूर्व्वं 'देहवैगुण्यात्' श्लेष्मादिकृतगौरवात् 'पश्चाद्व'दभ्यासानन्तरमिवा'विलंघनं शनैर्यत्नेन' व्यायामादिना 'वैगुण्ये निरस्ते स्वबले स्थितिः' शरीरस्य भवति । तेन पूर्व्वस्माल्लंघनं विशिष्यते बलानुरूपस्थितिकश्च । (१३०)

## (घ) करुणा स्वबीजप्रभवा

मनोगुणास्तु सत्यभ्यासे विपक्षानभ्यासे च प्रकर्षनिष्टां गच्छन्ति । तदाहे (।)
[056/s]

....1.131 कृपा स्वबीजप्रभवा स्वबीजप्रभवैर्न चेत् ।
विपक्षैर्बाध्यते चित्ते प्रयात्यत्यन्तसात्मताम् ॥ १३१ ॥

'कृपा स्वबीजप्रभवा' भूयोऽभ्यस्तस्वजा[324] तीयसँस्कारवत् समनन्तरप्रत्ययप्रसूतार्थ'बीजप्रभवैर्न चेत् विपक्षै'र्द्वेषादिभि'र्ब्बाध्यते' स्वोत्पत्त्या व्याहन्यते 'चित्ते' चित्तसन्ताने 'प्रयात्यत्यन्तसात्मतां' विपक्षासंकीर्ण्णसात्मतां प्रकृतितां । (१३१)

....1.132 तथापि मूलमभ्यासः पूर्वः पूर्वः परस्य तु ।
कृपावैराग्यबोधादेश्चित्तधर्मस्य पाटवे ॥ १३२ ॥

'तथा हि मूलं' कारणमभ्यासः 'पूर्व्वः पूर्व्वः परस्यो'त्तरस्य 'कृपावैराग्यबो[325] धादेश्चित्तधर्मस्य' मनोगुणस्य 'पाटवे' प्र[326] कर्षे न तूत्पत्तौ । तस्याः सम्भवात् । (। १३२)

## (ङ) अभ्यसात् करुणात्मकत्वम्

ततः (।)

[324] १ न सर्व्वः किन्तु यस्य बीजं कृपायामस्ति ।
[325] २ बुद्ध्यादेः ।
[326] ३ कारणमिति सम्बन्धः ।

....1.133 कृपात्मकत्वमभ्यासाद् घृणावैराग्यरागवत् ।
निष्पन्नकरुणोत्कर्षपरदुःखक्षमेस्तिः ॥ १३३ ॥

'कृपात्मकत्वमभ्यासाद्' भवति 'घृणावैराग्यरागवत्' । यथाभ्यासात् घृणा क्वचिद्विषये वैराग्यं रागश्च सात्मीभवति (।) तदेवमभ्यासात् 'कृपा' प्र'कर्ष'विशे[327]षवती 'निष्पद्यत' इति समर्थितर्मिय[328] ता च जगद्धितैषित्वञ्च (।) व्याख्यातं कृपायाः प्रामाण्यसाधनत्वं (। १३३)

## (४) शास्तृत्वात् भगवान् प्रमाणम्

### क. शास्तृत्वव्याख्यानम्

शास्तृत्वव्याख्यानाय (दयां) दर्शयितुमाह (।)

....1.134 दयावान् दुःखहानार्थमुपायेष्वभियुज्यते ।
परोक्षोपेयतद्धेतोस्तदाख्यानं हि दुष्करम् ॥ १३४ ॥

'दयावान्' बोधिसत्त्वः परदुःखं शमयितुकामः दुःखहानार्थमात्मनः 'उपायेषु' दुःखशमनोपायेष्व'भियुज्यते' । कस्मात्पुनः परदुःखशमनोपायेषु युज्यत [057/s] इत्याह (।) 'परोक्ष उपेयो' दुःखप्रशमः 'तद्धेतुश्च' मा[329] र्गो यस्य तस्य 'तदाख्यां[330] नं' यस्माद् 'दुष्करं' (। १३४)

### (ख. दुःखहेतुपरीक्षणम्)

तत्र साक्षात्करणे परीक्षणमङ्गं तदाह (।)

....1.135 युक्त्यागमाभ्यां विमृशन् दुःखहेतुं परीक्षते ।
तस्यानित्यादि रूपं च दुःखस्यैव विशेषणैः ॥ १३५ ॥

'यु[331] क्त्यागमाभ्या'मनुमानप्रवचनाभ्यां परस्परमविरुद्धाभ्यां 'विमृशन्' विचारयन् दुःखस्य जन्मनो 'हेतुं परीक्षते' मुमुक्षुः 'तस्य' दुःखहेतोर'नित्यादिरूपं' आदिशब्दान्निवर्तनयोग्यतादिकश्च परीक्षते । 'कथमित्याह । दुःखस्यैव विशेषणैः । कादाचित्कत्वादिभिः' । (१३५)
कस्मात् पुनर्दुःखस्य हेतोरनित्यत्वादि परीक्षणीयमित्याह ।

....1.136 यतस्तथा स्थिते हेतौ निवृत्तिर्नेति पश्यति ।
फलस्य हेतोर्हानार्थं तद्विपक्षं परीक्षते ॥ १३६ ॥

'यतस्तथा स्थिते हेतौ नित्यत्वात्सदास्थिते हेतौ फलस्य दुःखस्य निवृत्तिर्नेति पश्यति जानाति(।) तस्मात् दुःखस्य हेतोर्हानार्थञ्च तस्या विपक्षं परीक्षते दुःखहेतुविरुद्धं, यस्याभ्यासाद् दुःखहेतुरपैति' ।

....1.137 साध्यते तद्विपक्षोपि हेतो रूपावबोधतः ॥
आत्मात्मीयग्रहकृतः स्नेहः संस्कारगोचरः ॥ १३७ ॥

---

[327] ४ नैरात्म्यदर्शनं ।

[328] ५ साधनं करणेभिप्रस्तुत्य कृपावैराग्यरागवदित्यन्तेन ॥

[329] १ अशुचिविज्ञगुप्सा (?) सुखदुःखयोरुद्वेगानुद्वेगौ च घृणाद्यर्थः ।

[330] २ न ह्यमार्गज्ञोऽविपरीतमार्ग्गोपदेशोऽधिक्रियते ।

[331] ३ एतेन युक्त्यायुक्तिशून्यागमाग्रहः । तर्कमात्रत्याग आगमेन तत्र निग्रहस्थानानान्तत्वज्ञानान्मोक्ष इति नैयायिकः । प्रकृतिपुरुषान्तज्ञानादिति सांख्याः कर्मक्षयादिति दिगम्बराः ।

'साध्यते' निश्चीयते 'तद्विपक्षोपि हेतो रूपावबोधतः' । ज्ञाते हि हे[332] तौ तद्विरोधी बोद्धुं शक्यः । 'आत्मा[333] त्मीयग्रहा'भ्यां 'कृतः स्नेहः सँस्कारगोचरः' (। १३७)
[058/s]

(ग. नैरात्म्यदर्शनतो वासनाहानिः)

....1.138 हेतुविरोधि नैरात्म्यदर्शनं तस्य बाधकम् ॥
बहुशो बहुधोपायं कालेन बहुनास्य च ॥ १३८ ॥
[12a/MA]

अध्यात्मस्क[334] न्धेषु तदुपकारकेषु च बाह्येषु स्नेहोस्य 'हेतु'र्दुःखस्या[335] त्मात्मीयग्रहवतः स्निग्धस्य तृष्णया जन्मपरिग्रहात् । तस्य 'नैरात्म्यदर्शनं विरोधि' विपरीतालम्बनाकारत्वात् 'बाधकं' विपक्षः । एतं दुःखहेतुं तद्विपक्षञ्चागमादुपश्रुत्यानुमानान्निश्चित्य 'बहुशो' अनेकशो 'बहुधोपायम'नेकप्रकारं 'कालेन च बहुनास्य' बोधिसत्त्वस्य (। १३८)

....1.139 गच्छन्त्यभ्यस्यतस्तत्र गुणदोषाः प्रकाशताम् ।
बुद्धेश्च पाटवाद्धेतोर्वासनातः प्रहीयते ॥ १३९ ॥

'अभ्यस्यतो' भावयतः 'तत्र' दुःखहेतौ तद्विपक्षे च 'गुणदोषा' यथायोगं 'प्रकाशतां गच्छन्ति' । अभ्यासाधीनो हि भाव्यमानबुद्ध्याकारविशदीभावः ।

'अतो'ऽभ्यासाद् 'बुद्धेश्च पाटवाद्धेतो'रात्मग्रहस्य तृष्णायाश्च 'वासना' । कायवाग्बुद्धिवैगुण्यहेतुतः शक्तिलेशः 'प्रही[336] यते' निःशेषमपैति । (१३९)

(घ. प्रत्येकबुद्धादिभ्यो बुद्धे विशेषः

...1.140a परार्थवृत्तेः खड्गादेर्विशेषोऽयं महामुनेः ।

'अयमेव' वासनाहानिलक्षणः खड्गः प्रत्येकबुद्ध 'आदि'र्यस्य श्रा[337] वकस्य तस्मात् सकाशात् 'महामु[338] नेः' सम्यक्सम्बुद्धस्य 'विशेषः'[339] स्वार्थसम्पत्तेः ।

नन्वेवमुपायाभ्यासो दर्शितो न शास्तृत्वं तस्योपदेष्टृत्वादित्याह ।

...1.140b उपायाभ्यास एवायं तादर्थ्याच्छासनं मतम् ॥ १४० ॥

'उपायाभ्यास एवायं शासनं मतं तादर्थ्यात्' शासनार्थत्वात् । कारणे कार्योपचारात् । (१४०)
[059/s]

---

[332] ४ दुःखहेतौ नित्यशुच्याद्याकारे ।

[333] ५ तच्छून्ये तदभिनिवेशः । अस्य चाविद्या सहजा ।

[334] १ संस्काराख्येषु ।

[335] २ कः पुनरसौ जन्मलक्षणस्य दुःखस्य हेतुस्तद्विरुद्धो वा धर्म्म इत्याह (।) दुःखे विपर्य्यसेत्यादिनोक्तः स्नेहः कीदृश इत्यत्रात्मेत्यादिदुःखभूता आत्मीयरहिताः स्कन्धादय एवास्य गोचरो विषयः ।

[336] ३ एकमात्मानन्दमयिष्यामीति नैषामात्मग्रहोस्ति ।

[337] ४ वासनास्ति ।

[338] ५ क्लेशविसंयोगे

[339] ६ स च परार्थवृत्तित्वात् ।

...1.141a निष्पत्तेः प्रथमं भावाद्धेतुरुक्तमिदं द्वयम् ॥

सुगतत्त्वस्य फलस्य 'निष्पत्तेः प्रथमं भावा'त्ताव'देतत् द्वयं' हि हितैषित्वं शास्तृत्वं 'हेतुरुक्तं' हेत्वव्यवस्थाया अभिधानात् ॥

## (५) सुगतत्वात् भगवान् प्रमाणम्

सुगतत्वं व्याचिख्यासुराह (।)

...1.141b हेतोः प्रहाणं त्रिगुणं सुगतत्वमनिश्रयात् ॥ १४१ ॥

'हेतोः' समुदायस्य 'प्रहाणं' निरोधः 'सुगतत्वं' तच्च 'त्रिगुणं' गुणत्रययुक्तं (।) सुशब्दस्य त्रिविधोऽर्थः प्रशस्तता सुरूपवत् । अपुनरावृत्तिः अनष्टज्वरवत् । निःशेषता च अपूर्णघटवत् ।
तत्र प्रशस्तं भगवान् ज्ञातवान् सुगत इति प्रशस्तार्थमाह । 'अनिःश्रयाद'नाश्रय[340] णाद् । (१४१)

...1.142a दुःखस्य शस्तं नैरात्म्यदृष्टेश्च युक्तितोऽपि वा ।

'दुःखस्य' शस्तं सुगतत्वं । तत् पुनर्दुःखानाश्रयणं 'नैरात्म्यदृष्टेः' । आत्मदर्शी ह्यात्मनि स्निह्यन् तद्दुःखसुखपरिहारप्राप्तीच्छया जन्म दुःखरूपमादत्ते । प्रहीणात्मदर्शनस्तु नैतादृश इति प्रहीणदुःखोपायः 'युक्तितोपि वा' युक्तिपरिदृष्टेनोपा[341]येन वा गमनात्तत्सुगतत्त्वं प्रशस्तं ।
अथवाऽपुनरावृत्त्या गमनं सुगतत्वं (।) तदाख्यातुमाह ।

...1.142b पुनरावृत्तिरित्युक्तौ जन्मदोषसमुद्भवौ ॥ १४२ ॥

'जन्मनो' रागादेश्च 'दोषस्य समुद्भवौ' पुनः पुनरावर्तनात् 'पुनरावृत्तिरित्युक्तौ' (१४२)

## (क. आत्मदर्शनबीजहानात् मुक्तिः)

...1.143a आत्मदर्शनबीजस्य हानादपुनरागमः ।
तद्भूतभिन्नात्मतया;

नैरात्म्यभावनासात्म्ये तु । 'आत्मदर्शनस्य' जन्मप्रबन्ध'बीजस्य हानादपुनरागमो'ऽपुनरावृत्तिः । तत्पुनरात्मदर्शनबीजस्य हानं 'भूता'[342] त्सत्यात् नैरात्म्याद् 'भिन्ना' [060/s] 'त्मतया-'ऽन्यत्वात् । न हि सात्मीभूतप्रतिपक्षस्य विपक्षबीजसम्भवः । 'निःशेष'त्वागमनात् सुगतत्वं (।)
तदाह (।)

...1.143b शेषमक्लेशनिर्ज्वरम् ॥ १४३ ॥

...1.144a कायवाग्बुद्धिवैगुण्यं मार्गोक्त्यपटुताऽपि वा ।
अशेषहानमभ्यासाद्;

[340] १ लोके हि सुखं तदनुबन्धि च प्रशस्तं तद्विपरीतं सास्रवं ।

[341] २ अनन्तरोक्तेन ।

[342] ३ भूतत्वेनात्मदर्शनसमारोपान्याकारताभिज्ञत्वेन तद्विरुद्धता । आत्मत्वेन स्वभावता कथिता (।) भूतो भिन्न आत्मा यस्य तद्भावस्तया ।

'काय'वैगुण्यमचापलेप्युत्प्लुत्य गमनादि । वाग्वैगुण्यं मानाभावेपि वृषलीवादादि । 'बुद्धिवैगुण्यं' नित्या'समाधाना'दव्याकृतचित्तावस्थानं एतत् त्रयं शेषं सकलक्लेशोपक्लेशप्रशमादक्लेशं । निर्ज्वरश्चादोषमूलत्वात् । 'मार्ग्ग'स्य क्षणिकनैरात्म्यभावनादे'रुक्तावपटुतापि वा' शेषं । तत्परित्यागाद'शेषहानमभ्यासा'दिति निःशेषगमनात्सुगतत्वं ।

दर्शितं त्रिगुणं सुगतत्वं ॥ ० ॥

(ख. बुद्धत्वबाधकयुक्तिनिरासः

तदेवं सर्व्वज्ञस्य सम्भवानुमानं प्रतिपाद्य तद्बाधकं दूषयितुमाह (।)

...1.144b उत्त्यादेर्दोषसंक्षयः ॥ १४४ ॥

....1.145 नेत्येके व्यतिरेकोस्य संदिग्धो व्यभितचार्यतः ।
अक्षयित्वं च दोषाणां नित्यत्वादनुपायतः ॥ १४५ ॥

'एके' जै मि नी या उत्त्यादेर्हेतो रथ्यापुरुषवत् रागादिदो[343] षसंक्षयः कस्यचिन्नास्तीत्याहुः । 'व्यति[344] रेको' विपक्षाद् व्यावृत्तिः अस्य वक्तृत्वादिहेतोः 'संदिग्धोऽतो व्यभिचार्य'नैकान्तिकोयमिति विस्तरतो विपश्चयिष्यते ।

किञ्च (।) 'अक्षयित्वं दोषाणां' यो मन्यते स 'नित्यत्वाद्वा'ऽकाशवत् 'अनुपायत' उपायाभावात् वा । नष्टस्य पुनरुन्मज्जनवत् । (१४४) (१४५)

एषां त्रयाणामपि हेतूनामसिद्धत्वं दर्शयति (।)

....1.146 उपायस्यापरिज्ञानादपि वा परिकल्पयेत् ।
हेतुमत्त्वात् विरुद्धस्य हेतोरभ्यासतः क्षयात् ॥ १४६ ॥

[061/s]

'उपायस्यापरिज्ञानाद् वा' मूर्खस्य शब्दज्ञानवत् । 'परि[345] कल्पयेत्' ।

'हेतुमत्त्वाद् विरुद्धस्य' हेतुमत्त्वाद् दोषाणामनित्यत्वं ततोऽसिद्धं नित्यत्वं दोषाणां । हेतोरात्मदर्शनस्य विरुद्धस्य नैरात्म्यस्या'भ्यासतः क्षयादुपायाभावोप्यसिद्धः' । (१४६)

...1.147a हेतुस्वभावज्ञानेन तज्ज्ञानमपि साध्यते ॥ ० ॥

'हेतो'रात्मदर्शनस्य 'स्वभावज्ञानेन तत्-ज्ञानमपि' तन्निवृत्त्युपायस्य तद्वि-[12b/MA] पर्ययरूपस्य ज्ञानञ्च 'साध्यते' । यथा दाने ज्ञाते तद्विपर्ययरूपत्वान्मात्सर्यस्य तद्विपक्षताऽवसीयत इति तृतीयोप्यसिद्धः । प्रत्युक्तं सर्व्वज्ञस्य बाधनं ॥

(६) तायित्वाद् भगवान् प्रमाणम्

तायित्वं व्याख्यातुमाह ।

...1.147b तायः स्वदृष्टमार्गोक्तिः, वैफल्याद् वक्ति नानृतम् ॥ १४७ ॥

343 १ रागादिमान् विवक्षितः पुरुषो वक्तृत्वात् ।
344 २ असति रागादिमत्वे न भवति वक्तृत्वमिति ।
345 १ कश्चित्सवेता (?) ।

दुःखहेतुनिवर्तकत्वेन 'स्वयं दृष्टस्य [346] मार्ग्ग'स्यो'क्ते'र्देशना 'तायः' । कारणे[347] कार्योपचारात् । तया हि सत्त्वान् तायते तद्योगात् तायित्वं (।) स च 'वैफल्याद्वक्ति नानृतं' । आत्मसुखाद्यभिलाषादिना कश्चिदसत्यं वदति अज्ञानाद्वा । प्रहीणात्मदर्शनस्य साक्षात्कृततत्त्वस्य तदुभयं नास्ति । (१४७)

(करुणाहेतुकं सत्याभिधानम्)

विशेषतः सत्याभिधानहेतुरेव कृपाऽस्तीत्याह (।)

...1.148a दयालुत्वात् परार्थञ्च सर्वारम्भाभियोगतः ।
तस्मात् प्रमाणं;

'दयालुत्वा'च्च 'परार्थञ्च सर्व्वस्य' मार्ग्गाभ्यासादेरा'रम्भेऽभियोगतः' परार्थमेवोद्दिश्य भगवानभिसंबुद्धः कथन्तस्य मिथ्याभिधानेन सत्त्ववञ्चनाशङ्कापि । 'तस्मा'त्तायित्वात् 'प्रमाणं' भगवान् । यथादृष्टार्थप्रवक्तृत्वं हि सम्वादित्वमेवेति प्रथमप्रमाणलक्षणयोगात् प्रामाण्यमनेनोक्तं ।
[062/s]

क. तायः चतुःसत्त्यप्रकाशनम्

द्वितीयलक्षणयोगमप्याह[348] (।)

...1.148b तायो वा चतुःसत्यप्रकाशनम् ॥ १४८ ॥

'तायो वा चतुःसत्यप्रकाशनं' । परै[349] रज्ञातस्य सत्यचतुष्टयस्य प्रकाशनम्वा तायः । तद्योगात् तायी प्रमाणं भगवानुक्तः । (१४८)

ख. चत्वारि आर्य-सत्यानि

(क) दुःखसत्त्यम्

I. संसारिणः स्कन्धा दुःखम्

आर्यसत्येषु दुःखमाह ।

...1.149a दुःखं संसारिणः स्कन्धाः;

रूपवेदनासंज्ञासंस्कारविज्ञानाख्याः पञ्च 'स्कन्धाः' । जन्ममरणप्रबन्धः 'संसारः' । तद्व[350]न्तो 'दुःखं' तिसृभिर्दुः खताभिः ।

ननु यदि स्कन्धा एव प्रतीत्यसमुत्पन्ना न तु कश्चित्सत्त्वो यः संसरति तदा 'रागादयो' यादृच्छिका अहेतवः स्युरित्याह (।)

---

346 २ अनुलोमतः पूर्व्वपूर्व्वाङ्गसिद्धितैषित्वादेरुत्तरोत्तरस्य सम्भावनानुमानेनात्यन्ताभावनिरासः । नावश्यं कारणं कार्यवदिति न नियमहेतुः ।

347 ३ आस्रवक्षयाऽनुशासनीप्रातिहार्यनामके कारणे ।

348 १ अज्ञातार्थप्रकाशो वा द्वितीयलक्षणं ।

349 २ अनुलोमतो व्याख्यायेदानीं प्रतिलोमतः कार्यप्रतिपत्त्या कारणसिद्धिदर्शनेन प्रामाण्यमाह ।

350 ३ संसारिणः स्कन्धाः ।

...1.149b रागादेः पाटवेक्षणात् ।
अभ्यासान्न यदृच्छातोऽहेतोर्जन्मविरोधतः ॥ १४९ ॥

अभ्यासा'द्रागादेः पाटवस्येक्षणात् । अभ्यासादेव' ते भवन्ति 'न' तु 'यदृच्छातः' । न ह्यकारणाद्विशेषसम्भवः । नाप्यहेतुका रागादयोऽ'हेतो'र्हेतुरहितस्य 'जन्मविरोधतः' । न ह्याकाशं कदाचिज्जायते । (१४९)

## II. रागादीनां वातादिदोषजत्वनिरासः

स्यादेतत् (।) वातप्रकृतिर्मोहवान् । पित्तप्रकृतिर्द्वेषवान् । श्लेष्मप्रकृती रागवानिति वातादिधर्मो दोषगण इत्याह ।

[063/s]

....1.150 व्यभिचारान्न वातादिधर्मः प्रकृतिसंकरात् ।
अदोषश्च तदन्योऽपि धर्मः किं तस्य नेक्ष्यते ॥ १५० ॥

a. 'न व्यभिचाराद् वातादिधर्मो' रागादिः । वातप्रकृतिरपि 'न मोहबहुलः' । पित्तप्रकृतिरपि न पटुद्वेषः । श्लेष्मप्रकृतिश्च नोद्भूतरागविशेषः कश्चिद् दृश्यत इति वातादिव्यभिचारिणो मोहादयो न तद्धेतवः ॥ 'प्रकृतिसंकाराददोषश्चेत्' संकीर्ण्णप्रकृतयो हि पुरुषाः प्रत्येकं वातपित्तश्लेष्मणां सत्त्वात् । अतो 'दोषाणां न' कारणव्यभिचारः । यद्येवं तस्याद्वेषादेरन्यो[351] धर्मः खरत्वादिः[352] 'तस्य वातादेः किन्नेक्ष्यते[353]' । (१५०)

b. अथ प्रत्येकं स[354] र्वेषां रागादिर्धर्मस्ततो न व्यभिचार इत्याह (।)

....1.151 न सर्वधर्मः सर्वैषां समरागप्रसङ्गतः ।
रूपादिवददोषश्चेत तुल्यं तत्रापि चोदनम् ॥ १५१ ॥

'न सर्व्वधर्मः सर्व्वेषां स[355] मस्य रागस्य प्रसङ्गात्' । नानाप्रकृतिकत्वेपि रागादिहेतोः समानत्वात् । 'रूपादिवददोषश्चेत्' । यथा भूतमात्रहेतुकत्वेपि रू[356] पादय उत्कृष्यन्तेऽयकृष्यन्ते च क्वचित् तथा रागादयोपीति चेत् । 'तुल्यं तत्र' रूपादा'वपि चोदनं' समत्वस्य । (१५१)

...1.152a आधिपत्यं विशिष्टानां यदि तत्र न कर्मणाम् ।

'आधिपत्यं विशिष्टानां कर्मणां' श्रुताश्रुतलक्षणानां । 'यदि तत्र' रूपादौ कार्ये नेष्यते भूतसहकारिणां कर्मणां वैशिष्ट्यात् रूपादिविशेष इत्यर्थः ।

---

[351] १ एकः कोपनः प्राज्ञः प्रस्वेदादिमांश्च न स्यादस्ति च (।) पित्तगुणसमुदायः कोपपरिणामकाले प्रज्ञापरिणामोपि मा भूत् (।) न हि लाभे प्रवेशच्छेदेपि पित्तप्रकृतेः निःशरणं युक्तं ।

[352] २ गन्धादिर्न दृश्यते कुतः ।

Placement of note uncertain; marked with a question mark in the edition (see encoding description for details).

[353] ३ न दृश्यते च तदसदेतत् ।

Placement of note uncertain; marked with a question mark in the edition (see encoding description for details).

[354] ४ वातादीनां ।

[355] ५ एवं तुल्यद्वेषादयः ।

[356] ६ क्वचिद्रसः क्वचित् स्पर्शः ।

स्यादेतन्न दोषमात्राद्रागादयोऽपि तु तेषां परिणाम[357] विशेषात् यथा व्याधयः ।[358] ततो न समरागतादिप्रसङ्ग इत्याह (।)

...1.152b विशेषेपि च दोषाणामविशेषाद्;

[064/s]

'विशेषेपि चे दोषाणां' प्रकोपादिनाऽ'विशेषात्' रागादीनां न दोषपरिणामहेतुता । (१५२) नन्वविशेषादित्यसिद्धो हेतुः । कफाद्युत्कर्षे रागाद्युत्कर्षदृष्टेरित्या[359] ह ।

...1.152c असिद्धता ॥ १५२ ॥

...1.153a न विकाराद् विकारेण सर्वेषां न च सर्वजाः ।

C. 'नासिद्धता'ऽविशेषस्य । तथा हि 'सर्व्वेषां' कफादीनां विकारेणोत्कर्षेण पीडया विकारात् द्वेषो भवति न रागादयः । सर्व्वजत्वाददोष इति चेत् । न च 'सर्व्वजाः' । समरागतादिप्रसङ्गादित्युक्तेः ॥

किञ्च (।)

...1.153b कारणे वर्द्धमाने च कार्यहानिर्न युज्यते ॥ १५३ ॥

...1.154a तापादिष्विव;

सन्निपातावस्थायां कारणे कफादिके 'वर्द्धमाने कार्यस्य' रागादे'र्हानिर्न युज्यते' (१५३) 'तापादिष्विव' तापादीनामिव पित्तादिवृद्धौ ।

d. स्यादेतद् (।) दोषाणां साम्ये रागादयो भवन्ति वैषम्ये तु द्वेषादयः । ततो [13a/MA] विशेषेपि दोषाणां न विशिष्यन्ते रागादय इत्यसिद्धो हेतुरित्याह (।)

...1.154b रागादेर्विकारोऽपि सुखादिजः ।

'रागादेर्दो'षसाम्यावस्थायां 'विकारोपि' वृद्धिलक्षणो यः स 'सुखादिजः' आन्तरधातुसाम्यस्पर्शप्रभवेन सुखादिना वर्द्धन्ते रागाद[360] यः ।

...1.154c वैषम्यजेन दुःखेन रागास्यानुद्भवो यदि ॥ १५४ ॥

...1.155a वाच्यं केनोद्भवः साम्यान्मदवृद्धिः स्मरस्ततः ।

'वैषम्यजेन' दुःखेन द्वेषस्योत्पादनात् तद्विरुद्धस्य 'रागास्यानुद्भवो यदि' मतः (१५४) तदा 'वाच्यं केन' हेतुना राग'स्योद्भवः' । 'साम्याद्' दोषाणां 'मद'स्य शुक्रस्य 'वृद्धिः' (।) 'स्मरो' रागः । शुक्रवृद्धेर्यदीष्टमेतदप्ययुक्तं यतः (।)

...1.155b रागी विषमदोषोऽपि दृष्टः साम्येऽपि नापरः ॥ १५५ ॥

'रागी विषमदो[361] षोऽपि' रागचरितः कश्चिद् 'दृष्टः साम्येपि नापरः' प्रतिसंख्यानबली मन्दरागप्रकृतिर्व्वा दृष्टः । (१५५)

[065/s]

...1.156a क्षयादसृकस्रुतोऽप्यन्ये;

---

[357] ७ रागादेर्यः स्वस्वकीयः परिणामविशेषः तदभावात् ।

[358] ८ द्वेषपरिणामभावेपि ।

[359] १ निजो योस्ति कर्कशत्वादौ ।

[360] २ परा श्लेष्मादिवृद्धावपि यन्न रागादिवृद्धिः सा ।

[361] ३ धातुवैषम्येपि ।

'क्षया'च्छुक्रस्यासुकश्रु (? स्रु) तो रक्तं 'क्षर'[362] 'न्तोप्यन्ये रागबहुला दृष्टा इति' शुक्रमपि न रागहेतुः ।
किञ्च (।)

...1.156b नैकस्त्रीनियतो मदः ।

नैकस्त्रीनियतो मदः । न ह्येकां स्त्रियमपेक्ष्य शुक्रं शुक्रीभवति । अपि तु सर्व्वाः ।

...1.156c तेनैकस्यां न तीव्रः स्याद्, अङ्गरूपाद्यपीति चेत् ॥ १५६ ॥

'तेन' साधारणत्वेन शुक्रस्य तज्जन्यो राग 'एकस्यां' स्त्रियां 'न तीव्रः स्यात्[363]' किन्तु साधारणः । 'अङ्गरूपाद्य[364] पीति चेत्' । (१५६)
e. रूपयौवनोपचारादि च सहकारि रागवृद्धेरिति चेत् ।

....1.157 न सर्वेषामनेकान्तान्न चाप्यनियतो भवेत् ।
अगुणग्राहिणोऽपि स्यात् अङ्गं सो ऽपि गुणग्रहः ॥ १५७ ॥

न युक्तमेतत् । 'सर्व्वेषां' रूपादीना'मनेकान्त'त्वात् । रूपादिरहितेष्वपि रागोत्कर्षदृष्टेः । किञ्च (।) यदि शुक्रं रूपादि च स्त्रियाः कारणं 'रागस्य' तदा 'न चाप्यनियतोऽ'विषयीकृतस्त्रीविशेषः साधारणो रागो न 'भवेत्' । रूपादिसहकारिणोऽव्यापारात् । तथा रूपवत्या गुणमशुभाभावनाभावितं 'गृह्णतोपि' रागः स्यात् । शुक्ररूपयोस्तद्धेत्वोः सद्भावात् । अङ्गन्निमित्तं 'सोपि गुणग्रह'स्ततोऽशुभां भावयतो न स्याद्रागः (। १५७)

...1.158a यदि सर्वो गुणग्राही स्याद्, हेतोरविशेषतः ।

'यदि सर्व्वः' शुभाशुभभावको 'गुणग्राही' स्यात् । गुणग्रहस्य 'हेतो रूपादेः' सर्व्वान् 'प्रत्यविशेषतः' ।
किञ्च (।)

...1.158b यदवस्थो मतो रागी न द्वेषी स्याच्च तादृशः ॥ १५८ ॥

'यदवस्थः' श्लेष्मप्रकृतिस्थः पुरुषो 'रागी मतस्त'दपस्थो 'न द्वेषी स्यात्' । (१५८)
कुत इत्याह (।)
[066/s]

...1.159a तयोरसमरूपत्वान्नियमश्चात्र नेक्ष्यते ।

'तयो' रागद्वेषयोरसमरूपत्वाद्विरुद्धत्वात् तदुत्पादिकयोरवस्थयोरपि विरोधः ॥ स्यादेतद्रागोत्पादिकायामवस्थायां द्वेषो न भवत्येवेत्याह (।) 'नियमश्चात्र नेक्ष्यते' । श्लेष्मावस्थो रागी न द्वेषीति नात्र नियमः ।
तवापि कस्मादमी समरागप्रसङ्गादयो दोषा न भवन्तीत्याह (।)

...1.159b सजातिवासनाभेदप्रतिबद्धप्रवृत्तयः ॥ १५९ ॥

...1.160a यस्य रागादयस्तस्य नैते दोषाः प्रसङ्गिनः ।

[362] १ इन्द्रियेण ।
[363] २ कस्यचिद् भवति च ततो न मदः कारण रागस्य ।
[364] ३ रूप उपचारगुणरागी चेति त्रिविध आदिना रागी ।

'सजातिवासना' आत्मात्मीयग्रहमूलस्य स[365] जातेः पूर्व्वपूर्व्वाभ्यस्तस्य रागादेर्व्वासनाऽपरापररागादिजनिकाः शक्तयः तासां 'भेदः' परस्परतः तत्र 'प्रतिबद्धा प्रवृत्ति'र्जन्म येषां ते तथा (१५९) 'रागादयो यस्य' बौद्धस्य मते 'तस्य नैते'ऽनन्तरमुक्ता 'दोषाः प्रसङ्गिनः' ।

### III. रागादीनां भूतधर्मत्वनिरासः

...1.160b एतेन भूतधर्मत्वं निषिद्धं;

'एतेन' वातादिधर्मत्वनिषेधेन 'भूतधर्मत्वं निषिद्धं' रागादेर्ब्बोद्धव्यं 'दोषा[366] णां' मरुत्तेजोऽम्भः स्वभावत्वात् ॥

भवन्तु सभा[367] गहेतुकाः पृथिव्याद्याश्रितास्तु स्युर्द्धवलादिवदित्याह ।

...1.160c निश्चयस्य च ॥ १६० ॥

...1.161a निषेधान्न पृथिव्यादिनिःश्रिता धवलादयः ।

'निश्रयस्या'श्रयस्य 'निषेधाद'नाश्रयात्सदसतोरित्यादिना 'न पृथिव्यादिनिःश्रिता धवलादयोपि' । कुत एव रागादयः ।

कथन्तर्हि भूतान्याश्रित्योपादाय रूपमुत्पद्यत इतीष्टमित्याह (।)

...1.161b तदुपादाय-शब्दश्च हेत्वर्थः स्वाश्रयेण च ॥ १६१ ॥

...1.162a अविनिर्भागवर्तित्वाद् रूपादेराश्रयोऽपि वा

[067/s]

'तदुपादाय शब्दश्च' तानि भूतानि उपादाय शब्दश्च 'हेत्वर्थः' । भूतानि हेतूकृत्योपादाय रूपमुत्पद्यत इत्यर्थः । 'स्वा[368] श्रयेण' भूतचतुष्केण 'रूपादे'रेकसामग्र्यधीनत्वेन (१६१) 'अविनिर्भागवर्त्तित्वा'द्विभागेनानवस्थिते'राश्रयोपि वा' भूतचतुष्कं ॥

...1.162b मदादिशक्तेरिव चेद् विनिर्भागो;

स्यादेतत् (।) सुराया 'मद'शक्तेरा'दि'शब्दात् क[369] नकादेरुन्माद'शक्ते[370] रिवाश्रित'त्वेपि 'विनिर्भागो' भूतैः सह चैतन्यस्य स्यात् ।---

a. भूतचैन्ययोर्भेदात्

यथा मदशक्तिरहिता व्यापन्ना सुरा दृश्यते । एवं चैतन्यरहितानि भूतान्यपि स्युरिति चेत् (।)

...1.162c न वस्तुनः ॥ १६२ ॥

....1.163 शक्तिरर्थान्तरं वस्तु नश्येन्नाश्रितमाश्रये ।
तिष्ठत्यविकले याति, तत्तुल्यं चेन्न भेदतः ॥ १६३ ॥

---

365 १ सत्कायदर्शनस्य ।

366 २ वातपित्तश्लेष्मणां क्रमात् महदादित्वेन रागादेर्भूतधर्मत्वं न भूत/?/त्वे हेतुरयं ।

367 ३ स्वसदृशहेतुका रागादयः सुराशक्त्योरिव ।

368 १ अभ्युपगम्याह ।

369 २ धत्तूर

370 ३ शुक्तिभावे, मद्यनिवृत्तेर्व्वस्त्वनिवृत्तौ ।

...1.164a भूतचैतनयोः;

'न वस्तुनः' सुरादेः 'शक्तिरर्थान्तरं' किन्तु 'वस्त्वे'वार्थक्रियाशक्तं शुक्त्याद्यवस्थायां 'न[371] श्येत्' । असमर्थस्य चोत्पत्ति [372] 'र्नाश्रितं' शक्त्याद्य'विकल आश्रये तिष्ठति यात्य-' पति । 'तत्तुल्यश्चेत्' भूतचेतनयोर[373] प्यैकात्म्यं । तद्भूतचैतन्ये भूते नष्टे निश्चेतनं भूतान्तरमुत्पद्यत इति चेत् । 'न' युक्तमेतत् । 'भेदतो' (१६३) भूतचैतन्ययोः ।---
कथमित्याह (।)

...1.164b भिन्नप्रतिभासावबोधतः ।
अविकारश्च कायस्य तुल्यरूपं भवेन्मनः ॥ १६४ ॥

...1.165a रूपादिवत्;

'भिन्नप्रतिभासावबोधतः' । भिन्नाकारज्ञानविषयतया भिन्ने[374] भूतचैतन्ये 'नान्यथा' [068/s] 'क्वचिदपि भेदसिद्धिः' । यदि च देहचितयोरैक्यं तदा 'अविकारश्च कायस्य' यावन्न विक्रियते देहन्तावत्तुल्यमेकाकार'म्भवेन्मनो'[375] (१६४) 'रूपादिवत्' ।

## (b. वासनाभेदतो भेदात्)

स्यादेतत् (।) एकरूपत्वेपि देहस्यार्थानां नानारूपत्वात् ज्ञानमपि तथे[13b/MA] त्याह (।)

...1.165b विकल्पस्य कैवार्थपरतन्त्रता ।

'विकल्पस्य कैवार्थपरतन्त्रता' । येनार्थनानात्वात् कल्पनापि तथा स्यात् । अनपेक्षितसन्निधयः उपादानवशेन विकल्पाः प्रवर्तन्ते इति वासनाभेदादेषां भेदः ।

...1.165c अनपेक्ष्य यदा कायं वासनाबोधकारणम् ॥ १६५ ॥

....1.166 ज्ञानं स्यात् कस्यचित् किञ्चित् कुतश्चित् तेन किञ्चन ।
अविज्ञानस्य विज्ञानानुपादानाच्च सिध्यति ॥ १६६ ॥

एवञ्चा [376] 'नपेक्ष्य यदा कायं' किञ्चिज्ज्ञानं 'वासनाबोधस्य' प्रबोधस्य 'कारणं' स्यात् । (१६५) 'कस्य[377] चि'दुत्पद्यमानस्य ज्ञानस्य तदा 'तेन' प्रबोधकानुरोधेन 'कुतश्चि'ज्ज्ञानादनन्तरं 'किञ्चन ज्ञानं स्यादिति' सुस्थमस्य पक्षे । 'अविज्ञा'[378] 'नस्य' विज्ञानशून्यस्य लोष्टादे'र्विज्ञानानुपादानाच्च[379] सिध्यति' विज्ञानादेव विज्ञानं ।[380] (१६६)

## (c. अविज्ञानतो विज्ञानानुत्पादात् ।)

[371] ४ क्षणिकत्वात् ।
[372] ५ अथ सुरास्थितैव तदाह ।
[373] ६ शुक्लत्वादिवद् भूताश्रितत्वं ।
[374] ७ भिन्नाकारज्ञानाभ्यामनयोर्ग्रहादन्यथातिप्रसङ्गः विश्वमेकं स्यात् कायमनइन्द्रियाभ्यां च ग्राह्यत्वात् । यदा शरीरमनालम्ब्य विषयान्तरमालम्बते तदाऽशरीराकारोदयात् ।
[375] १ भिन्नभिन्नार्थाकारं मनोज्ञानं न स्यात् ।
[376] २ स्वमतं समर्थयते ।
[377] ३ कार्यस्य ।
[378] ४ एतच्च तयोर्विरोधात् ।
[379] ५ न भूतधर्मत्वप्रतिक्षेपादेरेव ।
[380] ६ अविज्ञानान्न विज्ञानमिति यदुक्तं तदिष्टमेव सांख्यस्येति सिद्धसाधनं ।

....1.167 विज्ञानशक्तिसम्बन्धादिष्टश्चेत् सर्ववस्तुनः ।
एतच्छांख्यपशोः कोऽन्यः सलज्जो वक्तुमीहते ॥ १६७ ॥

...1.168a अदृष्टपूर्वमस्तीति तृणाग्रे करिणां शतम् ।

'सर्व्वस्य वस्तुनो विज्ञानशक्तिसम्बन्धाद'विज्ञानाद्विज्ञानानुत्पादन'मिष्टं[381]' चेत् । ए[382] तद्विज्ञानस्य शक्तिरूपतयाऽवस्थानं सां ख्य'पशोः' 'कोऽन्यः सलज्जो वक्तुमीहते' । (१६७) यो ब्रूयाद'दृष्ट'मपि 'तृणाग्रे करिणां शतमस्तीति'।
[069/s]

तथाहि यदि शक्तिरभिव्यक्तिरूपाद् 'विज्ञानादन्या तदाऽविज्ञानत्वं सिद्धं' । अथान्यथा तदा (।)

...1.168b यद् रूपं दृश्यतां यातं तद् रूपं प्राङ् न दृश्यते ॥ १६८ ॥

...1.169a शतधा विप्रकीर्णेऽपि हेतौ तद् विद्यते कथम् ।

यद्रूपं ख्यानाख्यं 'दृश्यतां यात'मभिव्यक्तावस्थायां 'तद्रूपं प्राक्' शक्त्यवस्थायां 'शतधापि विप्रकीर्ण्णे हेतौ न दृश्यते' (१६८) । 'कथन्तद्विद्यत' इति नाविज्ञानत्वमसिद्धं (।)
किञ्च (।)

...1.169b रागाद्यनियमोऽपूर्वप्रादुर्भावे प्रसज्यते ॥ १६९ ॥

न चेत् परलोकादागच्छति चित्तसन्तानः तदाऽ'पूर्व्व'सत्त्व'प्रादुर्भावे रागाद्य'नियमश्चक्षुराद्यनियमवत् 'प्रसज्यते' । यथा चक्षुःकरचरणश्यामतानियमः पुरुषे नेक्ष्यते 'कदाचित् कस्यचिदभावदर्शनात्' । तथा रागी रागितरो नीरागश्च कश्चित् स्यात् । (१६९)
(d. भूतात्मतया समानरागताप्रसङ्गात् ।

....1.170 भूतात्मताऽनतिक्रान्तः सर्वो रागादिमान् यदि ।
सर्वः समानरागः स्याद् भूतातिशयतो न चेत् ॥ १७० ॥

....1.171 भूतानां प्राणिताऽभेदेऽप्ययं भेदो यदाश्रयः ।
तन्निर्ह्रासातिशयवत् तद्भावात् तानि हापयेत् ॥ १७१ ॥

'भूतात्मता'या 'अनतिक्रान्तेः सर्व्वः' पुमान् 'रागादि[383] मान् यदि' तदा 'सर्व्वः समानरागः स्यात्' । भूतात्मताया अविशेषात् । 'भूता'नामवान्तरा'दतिशयतः समानरागता'प्रसङ्गो 'न चेत्' (१७०) 'भूतानां प्राणि'ताया अ'भेदेप्य[384] यं भेद' उत्कटमन्दरागत्वादिको 'यदाश्रयो' यदवान्तरविशेषवत्[385] कारणमाश्रित्य । तत्कारणं 'निर्ह्रासातिशयवत्' अपच[386] यतारतम्यवत् 'तद्भावाद्रागादिमत्त्वात् तानि' भूतानि 'हापयेत्' भ्रंशयेदिति नीरागोपि कश्चित् सत्त्वः स्यात् । (१७१)
[070/s]

---

[381] ७ सर्व्वत्र शक्तिव्यक्ती तन्मतेन ।
[382] ८ सिद्धसाधनत्वं परिहरति ।
[383] १ आदिना सुखादयः ।
[384] २ अयं प्राणी प्राणितरः प्राणितम इत्यभेदे ।
[385] ३ भूतातिशयं ।
[386] ४ यो यत्रोत्कर्षवान् स तत्र सम्भवदुच्छेदधर्म्माद्यनिबन्धनं रागादि निवर्तयेत् तत्र शुक्लत्वादिहेतुवत् ।

....1.172 न चेद् भेदेऽपि रागादिहेतुतुल्यात्मताक्षयः ।
सर्वत्र रागः सदृशः स्याद्धेतोस्सदृशात्मनः ॥ १७२ ॥

'भेदे मन्दो'त्कटरागादिजनकेऽवान्तरभूतविशेषेपि 'रागादि'हेतुत्वेन या 'तुल्यात्म[387] ता' सदृशता तस्याः 'क्षयो न चेत् सर्व्वत्र' पुंसि 'सदृशो रागादिः स्यात्' । 'सदृशात्मनो हेतो'र्भावात् । (१७२)

....1.173 न हि गोप्रत्ययस्यास्ति समानात्मभुवः क्वचित् ।
तारतम्यं पृथिव्यादौ प्राणितादेरिहापि वा ॥ १७३ ॥

'न[388] हि गोप्रत्ययस्यास्ति समानात्मभुवः' सदृशकारणोत्पत्तेः । 'क्वचित्' शाबलेयादौ 'तार[389] तम्य'मपि तु सर्व्वत्र समानतैव । 'पृथिव्यादौ' सदृशे हेतौ 'प्राणितादेरिह' चा र्व्वाक मते'पि वा' विशेषो न विद्यते[390] । (१७३)

....1.174 औष्णयस्य तारतम्येऽपि नानुष्णोऽग्निः कदाचन ।
तथेहापीति चेन्नाग्नेरौष्ण्याद् भेदनिषेधतः ॥ १७४ ॥

'औष्ण्यस्य तारतम्येपि' खादिराग्न्यादौ[391] 'नानुष्णोऽग्निः कदाचन' । 'तथेह' रागादि'तारतम्येपि' न वीतरागः कश्चि'दिति' 'चेत्' कदाचन नैतद्युक्तं । 'अग्नेरौष्ण्याद् भेदस्य निषेधतः' । नैतद्युक्तं । भास्वररूपोष्णस्पर्शादिरग्निरुच्यते । तेनौष्ण्याभावेऽग्निरेव न स्यात् । रागादिस्तु भूतेभ्योऽन्यस्तदभावेपि तेषां भावात् । (१७४)

अतः सविशे[392] षणं हेतुन्दर्शयति ।

....1.175 तारतम्यानुभविनो यस्यान्यस्य सतो गुणाः ।
ते क्वचित् प्रतिहन्यन्ते तद्भेदे धवलादिवत् ॥ १७५ ॥

'गुणेभ्योऽन्यस्य' यस्य 'सतो' धर्मिणो ये 'तारतम्यानुभाविनो गुणास्ते क्वचिद्' धर्मिणि 'प्रतिह[393] न्यन्ते' । 'तद्भेदे' भूतभेदे 'धवलादिवत्' ।[394] न हि सर्व्वो भूतपरिणामः शुक्लः । (१७५)

[071/s]

## (f. न रूपवद् रागोऽपि भूतधर्मः)

स्यादेतद् (।) भूतधर्मो रूपादिर्यथावश्यं अभूत्वा भवति तथा रागोपि देहिनः स्यादित्याह (।)

....1.176 रूपादिवन्न नियमस्तेषां भूताविभागतः ॥
तत् तुल्यश्चेन्न रागादेः सहोत्पत्तिप्रसङ्गतः ॥ १७६ ॥

---

[387] १ रागादिहेतुः सामान्यं, तस्य यदि क्षयः स्यात्तदा विरागः स्यात्, न चास्ति क्षयः (।) यतोऽक्षयस्तेन वीतरागो न चेत् तदा ।

[388] २ तुल्यहेतुकं विशिष्यत इति दृष्टान्तमाह

[389] ३ गोतरो गोतम इति ।

[390] ४ यथा न प्राणी प्राणितर इति तथा रागी रागितर इत्यपि न युक्तं तुल्यहेतुसम्भवात् ।

[391] ५ सांख्यादिराह ।

[392] ६ धर्मिणो गुणा इति विशेषणं न चौष्ण्यस्याग्निर्धर्मी ।

[393] ७ उच्छिद्यन्ते ।

[394] ८ कृष्टस्य जन्तोर्दृ ष्टेः ।

‘रूपा[395][396] दिवन्न नियमो’ रागादे‘स्तेषां’ रूपादीनां ‘भूताविभागतः’ । न हि रूपादिसामान्यं विना भूता[397] नि वर्तते । रागादेरपि तद्भूताविनिर्भागवर्त्तित्वं ‘तुल्यश्चेत्’ । नैतदस्ति । ‘रागा[398]’ देर्भूतैः ‘सहोत्पत्तिप्रसङ्गतो’ ॥ विषयैः कादाचित्कसन्निधानैर्नियमितत्वात् । (१७६)

न सहोत्पादप्रसङ्ग इति चेदाह (।)

....1.177 विकल्प्यविषयत्वाच्च विषया न नियामकाः ।
सभागहेतुविरहाद् रागादेर्नियमो न वा ॥ १७७ ॥

विकल्प्यः कल्पितस्त‘द्विषयत्वाच्च’ रागादे‘र्व्विषया’ रूपादयोऽग्राह्यात्वान्न ‘नियामकाः’ । किञ्चाविज्ञानस्य विज्ञानहेतुत्वात् नेत्यु[399] क्तं । त्वन्मते ‘सभागस्य’ च[400] ‘हेतोर्विरहा[401] त् रागादेर्नियमो’ देशकालस्वभावविषयो ‘न वा’ स्यादहेतुत्वात् । (१७७)

## (f. न भूतान्येद हेतुः)

भूतान्येव हि हेतुरिति चेत् ।

...1.178a सर्वदा सर्वबुद्धीनां जन्म वा हेतुसन्निधेः ।[14a/MA]

तर्हि ‘सर्व्वदा सर्व्वबुद्धीनां’ सुखदुःखेच्छाद्वेषरागकृपादीनां ‘जन्म वा स्यात् । हेतो’र्भूतसंघातस्यं ‘सन्निधेः’ । तदेवं रा[402] गादेः पाटवेक्षणादित्यादिना चतुर्णामरूपिणां स्कन्धानां सभागहेतुकत्वे साधिते साधितं संसारित्वमुपादानस्कन्धानां । त एव दुःखमित्युक्ताः ।
[072/s]

## IV. चतुराकरं दुःखसत्यम्

दुःखसत्यञ्चानित्यतो दुःखतः शून्यतोऽनात्मतश्चेति चतुराकारमाख्यातुमाह (।)

...1.178b कदाचिदुपलम्भात् तदध्रुवं दोषनिश्रयात् ॥ १७८ ॥

...1.179a दुःखं हेतुवशत्वाच्च न चात्मा नाप्यधिष्ठितम् ।

‘कदाचिदुपलम्भाद्’ दुःखम‘ध्रुवम’नित्यं । ‘दोषनिश्रया[403] त्’ रागादिदोषाश्रयेणोत्पत्तेः । (१७८) ‘हेतुवशत्वाच्च’ । सर्व्वं परवशं ‘दुःख’मिति न्यायात् दुःखं तत् । ‘न चात्मा’श्रयं ।

---

[395] १ सामान्यमत्र विशेषे व्यभिचारात् ।

[396] 1a सहवृत्तिनियमेनेत्यर्थः ।
Placement of note uncertain; marked with a question mark in the edition (see encoding description for details).

[397] २ सामान्यं कर्तृ ।

[398] ३ द्वेषादेर्युगपत् रागादिहेतुः ।

[399] ४ अविज्ञानं न विज्ञानहेतुरित्युक्तं परं प्रति । इदानीमपि परं प्रत्याह ।

[400] ५ वा समुच्चयार्थः ।

[401] ६ यद्यपि तृणादयो हस्त्यात्मना परिणतास्तत्रापि तेषां न तच्छक्तिरस्ति ।

[402] ७ दुःखसत्यव्याख्यारम्भे ।

अना[404] त्मनः आत्मविलक्षणत्वात् । ‘ना[405] प्यधिष्ठितं’ । अधिष्ठातुरात्म[406] नोऽभावात् । अनेन शून्यत इत्याख्यातं ।

कस्मात्पुनरात्मा नाधिष्ठातेत्याह---

...1.179b नाकारणमधिष्ठाता नित्यं वा कारणं कथम् ॥ १७९॥

‘नाकारणमधिष्ठाता’ऽतिप्रसङ्गात् । ‘नित्यं वा’ द्रव्यं ‘कारणं कथं’ (।) तस्य क्रमयौगपद्याभ्यामर्थक्रियाविरहात् । (१७९)

...1.180a तस्मादनेकमेकस्माद् भिन्नकालं न जायते ।

‘तस्मादनेकं भिन्नकाल’दृश्यमानं सुखदुःखादिकार्यं ‘नैकस्माज्जायते’ एकस्यानेककरणे समर्थस्य सकृदेव तत्क्रियाप्रसङ्गात् ।

...1.180b कार्यानुत्पादतोऽन्येषु सङ्गतेष्वपि हेतुषु ॥ १८० ॥

...1.181a हेत्वन्तरानुमानं स्यान्नैतन् नित्येषु विद्यते ।

किञ्चानेकेषु ‘हेतुषु’ सङ्ग‘तेषु’ मिथो मिलितेष्वपि ‘कार्यानुत्पाद’तो (१८०) ‘हेत्वन्तरानुमानं स्यात्’ (।) यथा रूपालोकमनस्कारेषु सत्स्वपि चक्षुर्विज्ञानमनुत्पद्यमानं चक्षुरनुमापयति । ‘नैतत्का’र्यानुत्पत्त्याऽनुमानं ‘नित्येषु विद्यते’ तेषामव्यति[407] रेकित्वात् (।)

## (ख) समुदयसत्यम्

### I. चतुराकारः समुदयः

चतुराकारं दुःखं व्याख्याय समुदयतो हेतुतः प्रत्ययतः प्रभवतश्चेति चतुराकारं ‘समुदायं व्याख्यातुमाह’ (।)
[073/s]

...1.181b कादाचित्कतया सिद्धा दुःखस्यास्य सहेतुता ॥ १८१ ॥

...1.182a नित्यं सत्त्वमसत्त्वं वाऽहेतोर्बाह्यानपेक्षणात् ॥

a. ‘कादाचित्कतया दुःखस्य सहेतुता सिद्धा’ (१८१)। ‘नित्यं सत्त्वमसत्त्वंम्वा हेतो’र्भवति यथाऽऽकाशस्य शशविषाणस्य बाह्या‘नपेक्षणात्’ । य एव च दुःखहेतुः स एव समुदायः ।

...1.182b तैक्ष्ण्यादीनां यथा नास्ति कारणं कण्टकादिषु ॥ १८२ ॥

...1.183a तथाऽकारणमेतत् स्यादिति केचित् प्रचक्षते ।

न[408] नु ‘यथा कण्टकादिषु तैक्ष्ण्यादीनां कारणं नास्ति’ (१८२) ‘तथाऽकारणमेतत्’ दुःखं स्यात् । तत् कुतः समुदय ‘इति केचित्’ स्वभाववादिनः ‘प्रचक्षते’ (।)

b. ते एवं वक्तव्या (:।)

---

[403] १ सास्रवत्वात् उत्पत्त्या क्लिश्यन्ति विपाकेन च ।

[404] २ हेतुवशत्वाच्च ।

[405] ३ नात्मीयं

[406] ४ सभागतो जातत्वात् ।

[407] ५ तद्व्यतिरेकेपि कार्योत्पत्तेः ।

[408] १ कः पद्मनालदलकेशरकर्णिकानां संस्थानवर्णरचनामृदुतादिहेतुः (।) पत्राणि चित्रयति कोत्र पतत्रिणाम्वा स्वाभाविकं जगदिदं नियतं तथैव ॥ दुःखमहेतुकं चार्वाकः ।

...1.183b सत्येव यस्मिन् यज्जन्म विकारे वाऽपि विक्रिया ॥ १८३ ॥

...1.184a तत् तस्य कारणं प्राहुस्तत् तेषामपि विद्यते ।

'सत्येव यस्मिन्' वस्तुनि 'यस्य जन्म' । यस्य 'विकारे' सत्येव वा यस्य 'विक्रिया-' (१८३) 'तत्तस्य' जन्मिनो विकारिणश्च 'कारणं प्राहु'र्विद्वांसः । तज्जन्म सत्येव बी-जोदकपृथिव्यादिषु तदुत्कर्षापकर्षादिविकारे च विकृतत्वं 'तेषां' कण्टकादीनामप्यस्तीति तेपि सहेतुका एव । एवं स्कन्धा अपि ॥

न१नु स्पर्शे सति भवति चक्षुर्विज्ञानं । असति च न भवति[409] (।) न च तत् कारणमतोऽतिव्याप्तिरित्याह (।)

...1.184b स्पर्शस्य रूपहेतुत्वाद् दर्शनेऽस्ति निमित्तता ॥ १८४ ॥

'स्पर्शस्य' रूपाद्यविनिर्भा[410] गिनः सहकारिभावेन 'रूपहेतुत्वात् । दर्शने' चक्षुर्विज्ञानेऽ'स्ति निमित्तता' पारम्पर्येणेति नातिव्याप्तिः । (१८४)

एतच्च व्यतिरे[411] कमभ्युपगम्योक्तं न तु रूपमुपदर्श्य स्पर्शाभावे नेत्रबुद्धेरभावः शक्यदर्शनः । रूपस्पर्शयोरविनिर्भागवर्त्तित्वात् । तस्य च दुःखस्य (।)

[074/s]

...1.185a नित्यानां प्रतिषेधेन नेश्वरादेश्च सम्भवः ।
असामर्थ्यादतो हेतुर्भववाञ्छा;

'नित्यानां' क्रमाक्रमाभ्यामर्थक्रियायामसामर्थ्यात् । 'प्रतिषेधेन'[412] च 'नेश्वरादे'रा-दिग्रहणात् प्रधानपुरुषादेः कारणात्सम्भव उत्पादः । अतो नित्यादनुत्पत्तेर्दुःखस्य हेतु'र्भववाञ्छा' जन्मतृष्णा, जन्मस्थानावस्था[413] सत्त्वाद्यभिला[414] षात्मिका । (१८५)

...1.185b परिग्रहः ॥ १८५ ॥

...1.186a यस्माद् देशविशेषस्य तत्प्राप्त्याशाकृतो तृणाम् ।

'यस्माद् देशविशेषस्य' परिग्रहः 'तत्प्राप्ति'तृष्णा'कृतो नृणां' । नृशब्दः प्राण्युपलक्षणः । ततो गर्भस्थानादानमपि तत्तृष्णाकृतमेव । (१८६)

c. ननूक्तं भ ग व ता तत्र कतमस्समुदय आर्यसत्यं पौनर्भाविकी न[415] न्दी रा-गसहगता तत्र तत्राभिनान्दिनी यदुत कामतृष्णा भवतृष्णा विभवतृष्णा चे[416] ति तत्कथमेका भवतृष्णोच्यते समुदयसत्यमिति । अत्राह (।)

...1.186b सा भवेच्छाऽस्यनाप्तीच्छोः प्रवृत्तिः सुखदुःखयोः ॥ १८६ ॥

...1.187a यतोऽपि प्राणिनः कामविभवेच्छे च ते मते ।

---

409 २ स्पर्शवत्येवं संहते चक्षुर्विज्ञानं मन्यते ।
410 ३ स्पर्शीभूतचतुष्कात्मा उपादाय रूपस्य हेतुः ।
411 ४ अतिव्याप्ति ।
412 १ कारणम्विकृतिङ्गच्छञ्जायतेन्यस्य कारणमित्यादिना ।
413 २ अवस्था मनुष्यदेवादि ।
414 ३ सहायाः सत्त्वाः उपकरणश्चन्दनादि । गर्भादि ।
415 ४ द्वयो रागयोः समवधानाभावादाह । वर्तमानार्थालम्बनाकृष्टा प्रीतिर्नन्दी ।
416 * दीघनिकाय २।२२

'यतः' कारणात् प्राणिनः 'सुखदुःखयोः' क्रमेणा'स्यनाप्तीच्छोः' प्रवृत्तिर्गर्भस्थानपरिग्रहाया- तः 'सा भवेच्छापि' (१८६) 'कामविभवे'च्छे 'च ते मते' । सुखप्राप्तीच्छा कामतृष्णा । दुःखवियोगेच्छा विभवतृष्णा । भवतृष्णायां सुखदुःखप्राप्तिपरिहारेच्छापूर्व्विकायां गर्भस्थानोपा- दानेच्छात्मिकायां द्वयोरपि संग्रहादविरोधः । (१८७)

...1.187b सर्वत्र चात्मस्नेहस्य हेतुत्वात् संप्रवर्तते ॥ १८७ ॥

...1.188a असुखे सुखसंज्ञस्य;

समुदयस्य च समुदयात्मकत्वात् 'सर्व्वत्र' विषयेऽ'सुखे' सुखरहिते 'सुखसंज्ञ'स्य दुःखविपर्ययस्तस्यानेनाशुचौ शुचिविपर्यासोपि कथितः । न ह्यशुचौ तथा मन्यमान कस्यचित् सुखसंज्ञाऽऽत्मस्नेहेनेति 'आत्मस्नेहस्य हेतुत्वादिति' । अहङ्कारममकारो[075/s] त्थापितस्य ।[417] अनेनात्मनि आत्मस्नेहविपर्यास उक्तः । संप्रवर्तत इत्यनेनानित्यविपर्यासः सूचितः । न हि नित्यविपर्यासम्विना फलार्थी प्रवर्तते ।
[14b/MA]

...1.188b तस्मात् तृष्णा भवाश्रयः ॥ ॥

तदेवं चतुर्व्विपर्यासवासितमानस एवा'त्मस्नेहात्' सुखदुःखप्राप्तिपरिजिहीर्षया 'प्रवर्तते' । तथा गर्भस्थानेपि सुखदुःखप्राप्तिपरिहारेच्छैव तृष्णा । 'तस्मात्तृष्णा भवस्याश्रयो' हेतुः । अनेन हेतुत आख्यातं ।

...1.188c विरक्तजन्मादृष्टेरित्याचार्याः संप्रचक्षते ॥ १८८ ॥

...1.189a अदेहरागादृष्टेश्च देहाद् रागसमुद्भवः ।

ननु विरक्तस्य जन्मादृष्टेरि ?? 'त्याचार्या' गौ त मा द[418] योपि 'संप्रचक्षते' (। १८८) 'ऽदेहस्य रागादृष्टेश्च देहाद्रागसमुद्भवः' स्थितस्तंतो न देही वीतरागः ।
अत्राह (।)

...1.189b निमित्तोपगमादिष्टमुपादानं तु वार्यते ॥ १८९ ॥

निमित्तस्य सहकारिकारणस्यो'पगमात्' देहोस्य रागस्य सहाकारिकारण'मिष्टं' ततो ना- निष्टमापद्यते । 'उपादानन्तु' देहो रागस्य 'वार्यते' । राग एव तू[419] पादानकारणं । न च रागो जन्महेतुः । विरक्तस्य करुणया जन्मसम्भवात् । र[420] क्तस्यापि तृष्णयैव जन्मग्रहः । अनेन प्रत्ययत इति व्याख्या[421] तं । (१८९)

....1.190 इमां तु युक्तिमन्विच्छन् बाधते स्वमतं स्वयम् ।
जन्मना सहभावश्चेत् जातानां रागदर्शनात् ॥ १९० ॥

d. विरक्तजन्मादृष्टेरिती'मां युक्तिमन्विच्छन्' चा र्व्वा कः 'स्वमतं स्वयं बाधते' । रा- गहेतुको देहः तद्धेतुकश्च राग इति । अन्योन्यहेतुत्वात् जन्मप्रबन्धसिद्धेः । वीतरागाभ्युपगमाच्च स्वमतबाधास्य । 'जन्मना सहभावो' रागादीनां । न पूर्व्वं रागोस्ति जातानां 'रागदर्शनात्' । अतो न रागो देहहेतुरिति चेत् । (१९०)

[417] १ अहंकारममकारो यस्य ।
[418] २ वसुवन्धुनैवमुक्ते चार्व्वाक आह ।
[419] ३ देहस्य
[420] ४ न रागमात्रात्
[421] ५ प्रभवाकारमाह ।

...1.191a सभागजातेः प्राक् सिद्धिः;

[076/s]

(II. तृष्णा जन्मसमुदयः)

नन्वेवं देहोपि न स्यात् रागहेतुः सहभावात् । न चाहेतुकता । ततः सभागात् सजातीयाद्राग'ज्ञाते'रुत्पादात् । 'प्राग्रा'गस्य 'सिद्धि'रित्यायातं ।

(III. कर्माऽपि)

नन्वविद्या तृष्णा कर्म च जन्मकारणं तत्कथं तृष्णैव केवला समुदय उक्त इत्याह (।)

...1.191b कारणत्वेऽपि नोदितम् ।
अज्ञानं; उक्ता तृष्णैव सन्तानप्रेरणाद् भवे ॥ १९१ ॥

...1.192a आनन्तर्याच्च कर्मापि सति तस्मिन्नसंभवात् ।

'कारणत्वेपि नोदितमज्ञान'मविद्या मोहापरसंज्ञकं । 'उक्ता तृष्णैव' तयैव 'सन्तान'स्य पञ्चस्कन्धसन्ततेः 'प्रेरणात्[422]' किमर्थं 'भवे'(१९१) जन्मनिमित्तं 'कर्मापि' हेतुत्वेऽपि नोक्तं समुदयत्वेन 'सति तस्मिन्न'ज्ञाने कर्मणि च । तृष्णाऽसंमुखीभावेऽ'भावा'ज्जन्मनः । आनन्तर्याच्च तृष्णायाः सतोरपि मोहकर्मणोस्तृष्णाया असंमुखीभावे जन्मन आक्षेपकत्वासंभवात्[423] यथा विमुक्ति (:) चित्तस्येत्युक्तः समुदयः ।

...1.192b तदनात्यन्तिकं हेतोः प्रतिबन्धादिसम्भवात् ॥ १९२ ॥

तदेतद्यथोक्तकारण (समुदय) स्वभावं दुःखमनात्यन्तिकं संभवदुच्छेदं दुःखहेतोस्तृष्णायाः प्रतिबन्धस्य संभाव्यमानत्वात् । आदिशब्दादविद्यादेः सहकारिणो वैकल्य'सम्भवात्' ।

अनेन निरोध एव नास्तीति वादि[424] नः प्रतिनिरोधत इति कथितं ।

(ग) निरोधसत्यम्

...1.193a संसारित्वादनिर्मोक्षो नेष्टत्वादप्रसिद्धितः ।

ननु 'संसारित्वादनिर्म्मोक्षो' मुक्तिर्नास्ति कस्यचित् । तत्कथं निरोधसम्भावना । 'नैष दोष इष्टत्वात्' । को नाम मुक्तिं संसारिण इच्छति । 'अप्रसि'द्धितस्तस्य । न हि संसारीं कश्चिदस्ति । किन्तु दुःखं केवलं हेतुबलात्प्रवर्तते तदभावाच्च न भवतीति ब्रूमः ।

[077/s]

(I. संसार्यभावे मुक्तिव्यवस्था)

यदि संसारी कश्चिन्नास्ति को मुक्त्यर्थी किमर्थं प्रवर्तते इत्याह (।)

...1.193b यावच्चात्मनि न प्रेम्णो हानिः स परितस्यति ॥ १९३ ॥

422 १ इयमेव प्रभविष्णुत्वात् प्रभवः ।

423 २ आनन्तर्य्याच्च तृष्णायाः ।

424 ३ मीमांसकादयः ।

...1.194a तावद् दुःखितमारोप्य न च स्वस्थोऽवतिष्ठते ॥

‘यावद्यात्मनि’ एकत्वाहंकारविषयेषु स्कन्धेषु ‘प्रेम्णः’ स्नेहस्य ‘न हानि’स्तावद् दुःखितमात्मानमारोप्य ‘स’ प्राण्यभिमतो दुःखसन्तानः ‘परितस्यति’ (१९३) दुःखमास्ते । ‘न च’ दुःखहेत्वपगमोपायाभ्यां स क्लेशम्विना ‘स्वस्थोऽवतिष्ठते’ ।

[15a/MA]

किन्तु (।)

...1.194b मिथ्याध्यारोपहानार्थं यत्नोऽसत्यपि मोक्तरि ॥ १९४ ॥

‘मिथ्याध्यारो’पस्य संसारित्वाध्यवसायस्य ‘हानार्थं यत्नोऽसत्यपि’ कस्मिँश्चिदात्मादौ ‘मोक्तरि’ । न हि यथावस्त्वेव व्यवहारः । किन्तु यथावसायञ्च । तथाहि रज्जुरपि सर्पाध्यवसायविषयत्वात् परिहारविषयः । एवमहमेव बद्धोऽहमेव मोक्ष्यामीत्यध्यारोपान्मुक्त्यर्थं व्यायामः । (१९४)

## (II. मुक्तानां संसारे स्थितिः)

भवत्वात्मग्रहविपर्यस्तानां सुखाद्यभिलाषात्प्रवृत्तिलक्षणा संसारे स्थितिरुन्मीलितात्मग्रहयोनिसकलदोषराशयस्तु कस्मादासत इत्याह (।)

...1.195a अवस्था वीतरागाणां दयया कर्मणाऽपि वा ।

a. ‘अवस्था वीतरागाणां दययापि कर्मणापि वा’ वीतमोहानामपि दुःखाद् दुःखहेतोश्च लोकमुद्धर्तुकामतया स्थितिः । तावत्कालानुबन्धिशरीराक्षेपकेन कर्मणा वा स्थितिः ।

तदेवाह (।)

...1.195b आक्षिप्तेऽविनिवृत्तीष्टेः ।

‘आक्षिप्ते’ कर्मणा कायेऽविनिवृत्ते‘र्निवृत्य’भाव‘स्येष्टेः’ । यद्येवं जन्मान्तरा‘क्षेपकस्य’ कर्मणः सद्भावात् भवा[425] न्तरञ्च स्यादित्याह---

...1.195c सहकारिक्षयादलम् ॥ १९५ ॥

...1.196a नाक्षेप्तुमपरं कर्म भवतृष्णाविलंघिनाम् ।

[078/s]

‘सहकारिण’ आत्मात्मीयादिविपर्यासिज्ञानस्य तृष्णायाश्च ‘क्षयान्नालं’ (१९५) न शक्तं ‘कर्माक्षेप्तुम’परं भवं ‘भवतृष्णाविलंधिनां’ । तृष्णालंघना नैरात्म्यदृष्टिरित्यात्मात्मीयादिमोहनिवृत्तिश्चोक्ता । अनेन सहाकारिवैकल्यमुक्तं ।

ननु दया सत्त्वदर्शनात् तच्च क्षीणं मुक्तानां तत्कथन्दयया स्थितिरित्याह (।)

...1.196b दुःखज्ञानेऽविरुद्धस्य पूर्वसंस्कारवाहिनी ॥ १९६ ॥

...1.197a वस्तुधर्मो दयोत्पत्तिर्न सा सत्वानुरोधिनी ।

‘दुःख’स्यानित्यदुःखशून्यानात्मकाकारस्य ‘ज्ञाने’ सत्य‘विरुद्धस्य’ द्वेषाभावात् सर्व्वत्राप्रतिह[426] तस्य ‘पूर्व्वसंस्कारवाहिनी’ (१९६) पूर्व्वाभ्या[427] सप्रवृत्ता या ‘दयोत्पत्तिः सा न सत्त्वानुरोधिनी’ सत्त्वदृष्टिवशा किन्तु वस्तुनो दुःखस्य कृपाविषयतयाऽभ्यस्तस्य ध[428] र्मः

[425] १ तत्र च ते प्रेक्षकाः ।

। उन्मूलितात्मदृष्टीनामपि दुःखस्य कृपाविषयतयाऽभ्यस्तस्य संमुखीभावमात्रेण दयोत्पद्यत इत्यर्थः ।

b. एवन्तर्हि रागोपि मुक्तानां स्यादित्याह (।)

...1.197b आत्मान्तरसमारोपाद् रागो धर्मेऽतदात्मके ॥ १९७ ॥

'आ[429] त्मान्तरस्य' स्थिरसुखात्मात्मीयरूपस्या'रोपात् धर्मे' स्कन्धमात्ररूपेऽ'तदात्मके' वस्तुनोऽस्थिरादिस्वभावे 'रागो'ऽभिष्वङ्गरूपो भवति ॥ (१९७) ।

...1.198a दुःखसन्तानसंस्पर्शमात्रेणैव दयोदयः ।

'दयोदयस्तु दुःखसन्तानस्य संस्पर्शो' दर्शनं त'न्मात्रेणैवं' भ[430] वति । न तत्र सत्त्वदर्शनापेक्षा ।

c. यथा दुःखदर्शनात् दयोत्पत्तिस्तथापकारिणि द्वेषोपि स्यादित्याह (।)

...1.198b मोहश्च मूलं दोषाणां स च सत्वग्रहः;

'मोहश्च[431]' मूलमादिकारणं 'दोषाणां स च' मोहः 'सत्त्वग्रहः' । उन्मूलितसत्त्वदृष्टेश्च । (१९८)

...1.198c विना ॥ १९८ ॥

...1.199a तेनोद्यहेतौ न द्वेषो, न दोषोऽतः कृपा मता ।

[079/s]

'तेन' सत्त्वग्रहेण विनाऽ'द्यहेता'वपकारिणि 'न द्वेषो'स्ति आत्मनोऽदर्शनात्तदपकारभ्रान्त्यभावात् । 'अतो' दोषमूलस्यात्मग्रहस्याभावादुत्पद्यमाना 'कृपा न दोषो मता' (।)

b. यदि पूर्व्वकर्म्माविधतस्तदैव न निर्व्वाणं[432] तदा सांसारिकतैव स्यादित्याह (।)

...1.199b नामुक्तिः पूर्वसंस्कारक्षयेऽन्याप्रतिसन्धितः ॥ १९९ ॥

....1.200 अक्षीणशक्तिः संस्कारो येषां तिष्ठन्ति तेऽनधाः ॥
मन्दत्वात् करुणायाश्च न यत्नः स्थापने महान् ॥ २०० ॥

'नामुक्तिः' किन्तु मुक्तिरेव 'पूर्व्वसंस्कारक्षये' पूर्व्वकर्माविधक्षये 'सत्यन्यस्य' दुःखस्य हेतुवैकल्याद'प्रतिसन्धितः' । (१९९) येषां पुनर्महाकृपाणां प्राणिधानपरिपुष्टस्य जन्माक्षेपककर्मणः 'सँस्कारोऽक्षीणशक्तिस्तेऽनधाः' सम्यक्सम्बुद्धाः यावदाकाश'न्तिष्ठन्त्येव' । श्रावकाणान्तु कर्मणो नियतकालस्थितिकदेहाक्षेपकत्वा'न्मन्दत्वात्' करुणाया 'यत्नश्च महान् स्था-'पने नास्तीति 'न' सदा स्थितिः (। २००)

...1.201a तिष्ठन्त्येव पराधीना येषां तु महती कृपा ।

तिष्ठन्त्येव सर्व्वदा ते 'पराधीनाः' परेषामुपकरणीकृतात्मानो महामुनयः । येषामकारणवत्सलानां 'मह'ती 'कृपा' ।

[426] १ द्वेषो हि कृपाविरोधी स प्रहीणद्वेषः ।
[427] २ करुणाया । शास्तुः ।
[428] ३ एतेन धर्मालम्बनी कृपोक्ता
[429] ४ उक्तस्कन्धेभ्योऽन्यत्वादन्तशब्दः ।
[430] ५ इति रागादन्या कृपा ।
[431] ६ अमूढस्य पापावृत्तेः ।
[432] १ किन्तु स्थितिस्तर्हि कृपापरवशस्य ।

### III. सत्कार्यदृष्टेर्विगमः

...1.201b सत्कायदृष्टेर्विगमादाद्य एवाभवो भवेत् ॥ २०१ ॥

...1.202a मार्गे चेत् सहजाहानेर्न हानौ वा भवः कुतः ।

a. नन्वाद्य एव मार्ग्गे दर्शनमार्ग्गे 'सत्कायदृष्टेर्व्वि'गमात् स्रोत आपन्नस्य 'भवो' जन्मान्तरबन्धो 'न भवे'दिति 'चेत्' (२०१)। 'सहजाहानेर्न'। द्विधा हि सत्कायदृष्टिराभिसँस्कारिकी या स्कन्धव्यतिरिक्तात्माध्यवसायिनी, सहजा च । तत्र प्रथमा दर्शनमार्ग्गे हीयते 'न' द्वितीया भावनामार्गहेया । सा च मोहः तृष्णायाश्च हेतुरिति भवति जन्मप्रबन्धः । यदि तु पटुतरप्रज्ञस्याद्य एव मार्ग्गो मार्ग्गान्तरस्वभावः तदा 'हानौ वा' सहजाया आत्मदृष्टेः पुन'र्भवः कुत'ः ।

b. कीदृशं पुनस्तत्सहजसत्त्वदर्शनमित्याह (।)

...1.202b सुखी भवेयं दुःखी वा मा भूवमिति तृष्यतः ॥ २०२ ॥

...1.203a यैवाऽहमिति धीः सैव सहजं सत्त्वदर्शनम् ।

[080/s]

'सुखी भवेयं दुःखी वा माभूवमिति तृष्यतः' । कांक्षमाणस्य 'यैवाहमिति धीः सैव सहजं सत्त्वदर्शन'मुच्यते ।

c. तदप्रहीणं स्रोत-आपन्नस्येति कथं ज्ञायत इत्याह (।)

...1.203b न ह्यपश्यन्नहमिति कश्चिदात्मनि स्निह्यति ॥ २०३ ॥

...1.204a न चात्मनि विना प्रेम्णा सुखकामोऽभिधावति ।

'नह्यपश्यन्नहमिति कश्चिदात्मनि स्निह्यति' किन्तु पश्यन्नेव (२०३) ।

'न चात्मनि विना प्रेम्णा सुखकामः' कश्चिद् गर्भस्थानादि'मभिधावति' । अभिधावति [15b/MA] च गर्भस्थानं (।) प्रहीणाभिसंस्कारिक सत्त्वदृष्टिरपि स्रोत आपन्नं तस्याप्रहीणं सहजं सत्त्वदर्शनं ।

### (IV. बंधमोक्षव्यवस्था)

ननु सत्यात्मनि बन्धमोक्षावेकाधिकरणौ युक्तौ । नेत्याह ।[433]

...1.204b दुःखस्योत्पादहेतुत्वं बन्धः, नित्यस्य तत् कुतः ॥ २०४ ॥

...1.205a अदुःखोत्पादहेतुत्वं मोक्षः, नित्यस्य तत् कुतः ।

a. 'दुःखस्यो'पादानस्कन्धाना'मुत्पादहेतुत्वं' बन्धः । 'तत्कुतो नित्यस्य' क्रमयौगपद्याभ्यामर्थक्रिया विरहान् (२०४) । 'अदुःखोत्पादहेतुत्वं' दुःखं प्रत्ययहेतुता 'मोक्षः । तच्च नित्य[434]स्य कुतः' । न हि पूर्व्वापरैकस्य भावस्य दुःखहेतोः पश्चादहेतुत्वं युक्तं ।

b. स्यादेतत् (।) न नित्यस्य हेतुत्वं बन्धमोक्षौ च युक्ताविति । नित्यत्वानित्य 'त्वाभ्यामवाच्यस्य पुद्गलस्य' तौ भविष्यत इति मन्वानं वे भा षि क म्प्रत्याह (।)

[433] १ सत्यमप्यात्मनि बन्धाद्यभावमाह ।

[434] २ बन्धासिद्धो ।

...1.205b अनित्यत्वेन योऽवाच्यः स हेतुर्न हि कस्यचित् ॥ २०५ ॥

'अनित्यत्वेन योऽवाच्यः' । अनित्यत्वमुपलक्षणं । नित्यत्वेनाप्यवाच्यः 'सहेतुर्न हि कस्यचित्' । तस्यैवाभावात् । तथाहि यद्यसावनित्यो न भवति स्यान्नित्यः । (२०५)

अथ नित्यो न भवति स्यादनित्यः । अन्योन्याभावलक्षणत्वादनयोरेकविधि प्रतिषेधस्यापरप्रतिषधविधिनान्तरीयकत्वात् न क्वचिद्वस्तुनि द्वयप्रतिषेधसम्भव इति पुद्गलस्याभावादहेतु[435]त्वं अतो 'बन्धमोक्षावप्यवाच्ये' पुद्गले 'न युज्येते कथञ्चन' ।
[081/s]

C. अथ नित्यत्वेनावाच्यत्वान्न दोष इति चेत् । नन्वेवमनित्य एवोक्तः स्यात् । तथाहि[436] (।)

....1.206 नित्यं तमाहुर्विद्वांसो यः स्वभावो न नश्यति ॥ २०६ ॥

'नित्यं तमाहुर्व्विद्वांसो यः स्वभावो:' सर्वदा 'न नश्यति' स चेदीदृशो न भवत्यनित्य एव स्यात् । (२०६)

...1.207a त्यक्त्वेमां ह्रेपणीं दृष्टिमतोऽनित्यः स उच्यताम् ॥

अक्षे'मां' पुद्गल'दृष्टिं' पुद्गलनैरात्म्यवादिनः संस्कारानित्यतावा'दिनश्च शास्तुः' शिष्याणां 'ह्रेपणीं' लज्जावर्द्धनीं 'त्यक्त्वाऽनित्यः स' पुद्गल 'उच्यतां' येन 'बन्धमोक्षौ' युज्येते । एकाकारो निरोधो व्याख्यातः । X ॥ X ।

## (घ) मार्गसत्यम्

### (चतुराकारं मार्गसत्यम्)

त्रय आकारा वक्ष्यन्ते ।

...1.207b उक्तो मार्गः, तदभ्यासादाश्रयः परिवर्तते ॥ २०७ ॥

मार्गसत्यं चतुराकारं वक्तुमाह (।)

a. 'उक्तो मार्गः' शास्तृपदव्याख्यावसरे[437] नैरात्म्यदर्शनलक्षणः । 'तस्याभ्यासादाश्रयः' क्लेशवासनाभूतया ल य वि ज्ञा नं 'परिवर्तते' क्लिष्टदशानिरोधात् क्लेशविसंयुक्तचित्तप्रबन्धात्मना परिणमति । (२०७)

अनेन मार्गत इति मार्गाकारो दर्शितः क्लेशविसंयोगहेतुत्वात् ।

...1.208a सात्म्येऽपि दोषभावश्चेन्मार्गवत् ।

मार्गस्याभ्यासप्रकर्षात् 'सात्म्येपि' प्रकृतित्वे च प्राप्ते पुन'र्दोषा'णां मोहादीनां 'भावः' प्राप्नोति 'चेत् । मार्गवत्' यथा बन्धावस्थायां दोषसात्म्येपि मार्गोऽभ्यासवशादाविर्भवति ।

अत्राह (।)

...1.208b नाविभुत्वतः ।

---

[435] २ बन्धासिद्धो ।

[436] १ न नित्यमन्यदेव किञ्चिद्यावता ।

[437] २ उपायाभ्यास एवायन्तादात्म्याच्छासनं मतमि ?? त्यनेन भ्रान्तिनिवर्तकागमनकालमात्रमस्यावस्थानात् ।

[082/s]

'नाविभुत्वतः' असामर्थ्यात् । मार्गसात्म्येऽपि स्थितस्य चेतसि न दोषाणामुत्पत्तुं सामर्थ्य[438] मस्ति । तन्निदानभूतस्य सत्वदर्शनस्योन्मूलितत्वात् ।

'अनेन' शान्तत इति निरोधाकार उक्तो दोषाणां सर्व्वथा शान्तत्वात् ।

(ग. सत्कायदृष्टिः)

(क) सत्वदर्शनाभावे कारणम्

सत्वदर्शनमेव पुनः कस्मान्न भवतीत्याह (।)

...1.208c विषयग्रहणं धर्मो विज्ञानस्य यथास्ति सः ॥ २०८ ॥

...1.209a गृह्यते सोऽस्य जनको विद्यमानात्मनेति च ।

'विषयग्रहणम्विज्ञानस्य' तावत्सति ग्राह्यग्राहकभावो 'धर्म[439] : यथा' चास्ति 'स' स विषयस्तथा 'गृह्यते' । विज्ञानेन विषयिणा (२०८) । 'स' च विषयोस्य विज्ञानस्य 'जनको विद्यमानेनात्मना' यथावस्थितेन रूपेण ।

...1.209b एषा प्रकृतिरस्यास्तन्निमित्तान्तरतः स्खलत् ॥ २०९ ॥

...1.210a व्यावृत्तौ प्रत्ययापेक्षमदृढं सर्पबुद्धिवत् ।

यथावस्थितवस्तुग्रहणश्च 'नात्मैषा प्रकृतिः' स्वभावो ज्ञानस्य विषयिणः । यथास्वभावं स्वग्राहिज्ञानजननञ्च विषयस्य प्रकृतिः । अस्याः प्रकृतेस्तज्ज्ञानं 'निमित्तान्तरतः' आन्तरादविद्यारूपादागन्तुकाच्च विषयदोषादेः 'स्खलद्वि'षयग्रहण'विपरीताकारं[440]' भवति (। २०९) 'तच्च व्यावृत्तौ' विषयविपरीतग्रहणाकारताया निवृत्त्यर्थं 'प्रत्ययापेक्षं' भ्रान्तिनिवर्तककारणमपेक्ष्यमाण'मदृढम'स्था[441] ष्णु 'सर्पबुद्धिवत्' । यथा सर्पबुद्धी रज्वा भ्रान्तिनिमित्ता[442] जाता रज्जुस्वरूपग्राहिणः प्रत्ययान्निवृत्ता न पुनरुद्भवतीति । तथा भ्रान्तिनिमित्तनिरासात् दृष्टे नैरात्म्ये वस्तुनि सति नास्ति [16a/MA] सत्त्वे दृष्टिसम्भवः ज्ञानस्य विषयस्वरूपग्रहणप्रवणत्वात् । विषयस्य च स्वाकारार्पणप्रवृत्तत्वात् ।

a. किञ्च (।)

...1.210b प्रभास्वरमिदञ्चित्तं प्रकृत्यागन्तवो मलाः ॥ २१० ॥

'प्रभास्वरमना'त्मभूतदोषसञ्चय'मिदं चित्तं प्रकृत्या' स्वभावेन । ये तु मनोदोषा [083/s] दृश्यन्ते ते भ्रान्तिनिमित्तोपनीतत्वादा'गन्तवो'ऽस्वभावभूताश्चेतसः । तमः 'तुहिनादय' इव नभसः (२१०) ।

...1.211a तत्प्रागप्यसमर्थानां पश्चाच्छक्तिः क तन्मये ॥

[438] १ प्रकृतिशुद्धहेमवत् ।

[439] २ अर्थग्राहिज्ञानमिच्छतो वक्तव्यः ।

[440] ३ सत्वाध्यवसायि ।

[441] ४ मन्दमन्दप्रकाशे सर्प्पोचिते प्रदेशे ।

[442] ५ असहजागन्तुर्दोषः । नैरात्म्यं प्रकृतिः प्रमासिद्धिः ।

'तत्प्रागपि' तस्मान्नैरात्म्यदर्शनात्पूर्व्वमपि ततः श्रुतचिन्ताध्यवसानेप्यापातविष्कम्भनादुत्पत्तुम'समर्थानां' मलानां 'पश्चा'न्मार्गनिष्पत्तौ 'शक्ति'रुत्पत्तुं 'क्व तन्मये' मार्गसात्म्ये स्वरूपे (।)

एतदेवाह (।)

...1.211b नालं प्ररोढुमत्यन्तं स्यन्दिन्यामग्निवद् भुवि ॥ २११ ॥

...1.212a बाधकोत्पत्तिसामर्थ्यगर्भे शक्तोऽपि वस्तुनि ।

शक्तोऽप्युद्भतोपि मनोमलो 'नालमत्यन्तं प्ररोढुं वस्तुनि' चित्तसन्ताने कीदृशे बाधकोत्पत्तिसामर्थ्यगर्भे सर्वदृष्टि'बाधक'स्य नैरात्म्यदर्शनस्य मार्गसत्यो'त्पत्तिस्तस्यां सामर्थ्यं' प्रभविष्णुत्वं 'तद्गर्भे' आनन्तर्यस्य गर्भे तस्मिन् 'स्यन्दिन्यां[443] भुवि अग्निवत्' (२११) । यथा हि वह्नेर्हेतुबलादुत्पन्नोपि स्यन्दिन्यां भुवि बाधकवत्यां नात्यन्तं प्ररोहति तथा मार्गोत्पत्तिसामर्थ्यगर्भे चेतस्युत्पन्ना अपि मला नात्यन्तं विरोहन्ति । सात्मीभूतमार्ग्गे तु हेतुवैकल्यान्नोत्पद्यन्त एव ।

## (ख) नैरात्म्यदर्शने दोषोत्पत्तिव्यवस्था

कथञ्च नैरात्म्यदर्शिनो मलोत्पत्तिराशंक्यते । न तावत् हेतुसाकल्यात्सत्वदृष्टेर्हेतुभूताया अभावात् नैरात्म्यदर्शनवत् 'सत्त्वदर्शनञ्च भावनयोत्पन्नं हेतुरिति' चेत् ॥

कुतस्तस्य 'भावना' । किन्नैरात्म्यस्य सो[444] पद्रवत्वात् । किञ्चाभूतत्वेन भ्रमहेतुत्वात् । अस्वभावेनोपहन्तुं शक्यत्वाद्वा । एतत्त्रयमसङ्गतमित्याह (।)

...1.212b निरुपद्रवभूतार्थस्वभावस्य विपर्ययैः ॥ २१२ ॥

...1.213a न बाधा यत्नवत्त्वेऽपि बुद्धेस्तत्पक्षपाततः ॥

दोषराशेरुद्वेजकस्य प्रहाणेन 'निरुपद्रवस्य' प्रमाणसम्वादित्वेन 'भूतार्थस्य' सत्यार्थस्यानारोपितत्वेन 'स्वभावस्य' प्रकृतेर्नैरात्म्यस्याभिरुचितविषयस्य विपर्ययेष्वात्माद्याकारेष्वभ्यासे सोपद्रवत्वादिना 'प्रयत्न एव' तावन्न 'सम्भवति प्रेक्षस्य' । सम्भवेपि वा 'विपर्ययैः' (। २१२)

[084/s]

a. 'न बाधा' नैरात्म्यस्य सात्मीभूतस्य स्वभावस्यास्ति । [445] 'बुद्धेस्तत्र दोषप्रतिपक्षे गुणवति मार्ग्गे पक्षपातात्' ।

न हि स्वभावः साक्षात्कृतोऽन्यथा कर्तु शक्यः । अनेन प्रणीत इति निरोधाकारो दर्शितः ॥

b. ननु यदि नैरात्म्यसात्मत्वदर्शनयोः परस्परभेदाद् बा[446] धा तदा रागप्रतिघयोरपि स्या[447] दित्याह (।)

---

[443] १ नित्यमुदकस्राविण्यां ।

[444] २ नैरात्म्ये यदि दोषः स्यात्तदा सत्त्वदर्शनं भावयेत् । तच्च नास्ति दोषत्रयस्याप्यभावात् ।

[445] १ चित्तसंप्रयुक्तत्वात् चैत्तानां संप्रयुक्ताऽविद्येत्याह ।

[446] २ विरोधात् ।

[447] ३ न चास्त्येकभावनयाऽपरस्यात्यन्तनिरोधो लोक इत्यनेकान्तमाह ।

...1.213b आत्मग्रहैकयोनित्वात्;
कार्यकारणभावतः ॥ २१३ ॥

...1.214a रागप्रतिधयोर्बाधा भेदेऽपि न परस्परम् ।

'आत्मग्रह एको योनि'ष्कारणं ययोस्तौ तयोर्भावस्तस्मादेककारण'त्वात्' रागप्रतिधयोर्भेद[448] पि न परस्परं बाधा रूपरसयोरिव । तथा 'कार्यकारणभावतोपि' (२१३) नान्योन्यं 'बाधा' । तथाहि यदैकस्मिन् रागस्तदा तदपकारिणि द्वेषः । यदा च क्वचिद् द्वेषस्तदा तदपकारिणि रागोपीति परस्परकार्यकारणभावान्नास्ति विरोधः । चक्षु[449] रादिबुद्धीनामिव ।

c. ननु द्वेषादिप्रतिपक्षा मैत्र्यादयो न च तानुच्छिन्दन्तीत्याह (।)

...1.214b मोहाविरोधान्मैत्र्यादेर्नात्यन्तं दोषनिग्रहः ॥ २१४ ॥

...1.215a तन्मूलाश्च मलाः सर्वे;

'मोहाविरोधान्मैत्र्यादेः' । मैत्रीकरुणादयो मोहाविरोधिनोऽतश्च दोषकारणावैकल्या'न्नात्यन्तं' द्वेषादि'दोषा'णां 'निग्रहो' मैत्र्यादेः । आपातविष्कम्भनमात्रन्तु भवति मोहस्यानपायात् (२१४) । 'तन्मूलाश्च मलाः सर्व्वे' प्रसूयन्ते ।

### (ग) मोहः सत्कायदृष्टिः

ननु सत्त्वदर्शनं दोषमूलं न मोह इत्याह (।)

...1.215b स च सत्कायदर्शनम् ।

'स च' मोहः 'सत्कायदर्शनं' ।

[085/s]

ननु मोहोऽसंप्रख्यानरूपः । 'सत्त्वदृष्टिः तु विपरीतार्थप्रतिपत्तिरूपा । तत्कथं' मोह एव सत्त्वदर्शनमित्याह (।)

...1.215c विद्यायाः प्रतिपक्षत्वाच्चैत्तत्त्वेनोपलब्धितः ॥ २१५ ॥

...1.216a मिथ्योपलब्धिरज्ञानं युक्तेश्चान्यद्युक्तिमत् ॥

'विद्यायाः प्रतिपक्षत्वात्' । विद्याया नैरात्म्यदृष्टेर्व्विपक्षोऽविद्या । 'स चा'प्रख्यान[450] मात्रम्वा-[451] रूपादि वा न भवति निर्व्वाणेपि 'तयोर्भावात् ।[452] किन्तु मिथ्योप'लब्धिरज्ञानमविद्याऽधर्मानृतवत् । विद्यायाः सदर्थत्वात्[453] । 'चैत्तत्वेनोपलब्धितश्च' । चैत्तत्वेन करणेनोपलब्धिरूप[454] 'त्वाच्च' । (२१५) 'आश्रयालम्बनाकारकालद्रव्य'समतादिभिः समं प्रयुक्ताः संप्रयुक्ता इति संप्रयुक्तलक्षणं । 'न चासंप्रख्यानस्य' नीरूपस्यालम्बनाकारयोग इति 'मिथ्याज्ञान'मविद्या । 'उक्ते'[455] ऽर्थे विरोधात् । 'भ ग'वता प्युक्तं याः काश्चन लोकव्यवहारोपपत्तयः सर्व्वास्ता आत्माभिनिवेशतो[16b/MA] भवन्ति आत्माभिनिवेशविगमतो न भवन्ति इत्यनेन सत्त्वदृष्टिरेव

[448] ४ लक्षणभेदेपि नात्यन्तविरोधस्तयोः ।

[449] ५ भेदेप्येकमन्यहेतुः ।

जन्महेतुरुक्ता । आत्माभिनिवेशलक्षणत्वात्त[456] स्याः । 'अतोऽन्यदसंप्रख्यानलक्षणमज्ञानमयुक्तं निर्व्वा'णेपि तत्स[457] त्त्वात् ।

a. ननु यद्यविद्या दृष्टिरेव तथा च दृष्टिसंप्रयुक्ताऽविद्येति संप्रयुक्तार्थो न स्यात् । न सा तेनैव सम्प्रयुक्ता किन्तु सकलक्लेशानुगताऽविद्या[458] (।) सत्कायदृष्टिस्तु तदेकदे[459] शः ततश्चागमाविरोध इत्या[460] ह । (।)

...1.216b व्याख्येयोऽत्र विरोधो यः;

'अत्र' विद्यानिर्देशे आगम'विरोध यः' प्रसजति 'स सा[461] मान्यविशे[462] षभावेन' भेदकल्प[463] नया 'व्याख्येयः' समर्थनीयः । यथा पलाशयुक्तम्वनमिति । दृष्टिस्वभावाऽविद्या-प्राधान्येन क्लेशहेतुरित्युपदर्शनञ्च प्रयोजनं ।

b. प्रकृतमाह (।) यतश्चैवमात्मदर्शनप्रभूताः सर्व्वक्लेशाः ।
[086/s]

...1.216c तद्विरोधाच्च तन्मयैः ॥ २१६ ॥

...1.217a विरोधः शून्यतादृष्टेः सर्वदोषैः प्रसिध्यति ।

तया 'सत्त्व'दृष्ट्या विरोधाच्च 'शून्यतादृष्टे'र्नैरात्म्यदृष्टेः । 'तन्मयैः' (२१६) सत्त्वदृष्टिहेतुकैः 'सर्व्वदोषै'र्व्विरोधः 'सिध्यति' । शीतविरुद्धस्याग्नेरिव तत्कार्ये रोमहर्षादिभिरतः सात्मीभूतनैरात्म्यानां न पुनर्दोषलेशोत्पत्तिरनेन निःशरणत इति निरोधाकारो निर्द्दिष्टः दोषेभ्यः सर्व्वथा निःशरणात् ।

### (घ) दोषाः प्रतीत्यसमुत्पन्नाः

...1.217b नाक्षयः प्राणिधर्मत्वाद् रूपादिवदसिद्धितः ॥ २१७ ॥

...1.218a सम्बन्धे प्रतिपक्षस्य त्यागस्यादर्शनादपि ।

a. स्यादेत'दक्षयो' रागादिः 'प्राणिधर्मत्वाद्रूपादिवत् न' युक्तमेतद'सिद्धितः' । न हि 'प्राणी' कश्चिदस्ति यद्धर्मा रागादयः सिद्ध्यन्ति । सत्त्वे दृष्टौ तु सत्यां केवल[464] मुपलभ्यन्त इति

---

[450] १ अभावस्तस्य ।
[451] २ तदर्थः ।
[452] ३ विद्याविरुद्धाऽविद्या ।
[453] ४ युगपदनुत्पत्तिस्तु रागानिमित्ताद् ग्रहाघातवस्तुबहुलीकरणाद्यसाधारणं कारणवत्त्वात् ।
[454] ५ अविद्यायाः ।
[455] ६ युक्तिं प्रतिपाद्यागममाह ।
[456] ७ अविद्यायाः ।
[457] ८ असंप्रख्यानस्य सत्त्वात् ।
[458] ९ तस्मात्पूर्व्वोक्तैवाविद्या ।
[459] १० यथा पलाशादियुक्तं वनं पाण्यादियुक्तं शरीरं ॥
[460] ११ इत्यभिप्राय आह ।
[461] १२ अविद्या ।
[462] १३ दृष्टि ।
[463] १४ पाणेरिव शरीरात् ।

प्रतीत्यसमुत्पादमात्रमेतत् (२१७) । तेषां 'प्रतिपक्षस्य' नैरात्म्यदर्शनस्य सम्बन्धे संमुखीभावे त्यागस्यापातविष्कम्भणस्या'दर्शनादपि' सम्भवत्प्रतिपक्षत्वेनोच्छेदसम्भवात् नाक्षयित्वं ।

b. स्यादे[465] तत् (।)ताम्रादीनामग्नियोगाद् द्रवावस्थायां नष्टमपि काठिन्यं पुनः शीतसम्पर्कादुत्पद्यते । तद्वन्नष्टानामपि दोषाणां मार्गसात्म्ये पुनः कुतश्चिद्धेतोरुत्पत्तिः स्यात् । अत्राह (।)

...1.218b न काठिन्यवदुत्पत्तिः पुनर्दोषविरोधिनः ॥ २१८ ॥

...1.219a सात्मत्वेनानपायत्वात् अनेकान्ताच्च भस्मवत् ।

'न काठिन्यवदुत्पत्तिः पुनर्दो'षाणां । दोष'विरोधिनो' (२१८ ) नैरात्म्यस्य 'सात्मत्वेन' प्रकृतित्वेना'नपायात्' । न ह्यव्याहते विरोधिनि तद्विरुद्धस्योत्पत्तिरग्नाविव शीतकाठिन्यं कादाचित्कत्वादग्निनिवृत्तौ तद्विरोधिन्या द्रवतायाः स्वरसनिरोधादुत्पद्यतेऽ'नैकान्ताच्च भस्मवत्' । यथा भस्मनि भूते पुनर्न काष्ठोत्पत्तिस्तथा नैरात्म्यसात्मतायां न पुनर्नष्टानां दोषाणामुत्पत्तिरित्यनैकान्तिकता नष्टोत्पत्तेः ।

C. नन्वात्मभावनया'पि मोक्षोस्ति' तत्किं नैरात्म्यभावनया यदाहुरात्मा मन्तव्यो निदिध्यासितव्य इत्यादि । अत्राह (।)

...1.219b यः पश्यत्यात्मानं तत्रास्याहमिति शाश्वतः स्नेहः ॥ २१९ ॥

...1.220a स्नेहात् सुखेषु तृष्यति तृष्णा दोषांस्तिरस्कुरुते ।

[087/s]

'यः पश्यत्यात्मानं तत्रा'त्मन्य'स्य' द्रष्टु'रहमिति शाश्वतोऽनुपा'यि'स्नेहो' भवति (२१९) ।

'स्नेहा'दात्मस्नेहात्सुखेषु 'तृष्यति । तृष्णा'वान् भवतीति । 'तृष्णा च सुखसा-' धनत्वेनाध्यवसितानां वस्तूनां 'दोषान'शुचित्वादीन् 'तिरस्कुरुते' प्रच्छादयति दोषतिरस्करणात् ।

...1.220b गुणदर्शी परितृष्यन् ममेति तत्साधनान्युपादत्ते ॥ २२० ॥

...1.221a तेनात्माभिनिवेशो यावत् तावत् स संसारे ॥

'गुणदर्शी' शुचित्वेष्टत्वगुणान् पश्यन् 'परितृष्यन्' ममेति 'ममेदं सुखमिति' गर्द्धमानस्तस्य सुखस्य 'साधनानि' गर्भगमनादी'न्युपादत्ते' । (२२० )

तेनात्मदर्शनमूल[466] त्वेन जन्मादेरा'त्माभिनिवेशो यावत्तावत् स' आत्मदर्शी 'संसार' एव (।)

d. न केवलं जन्मप्रबन्धस्तस्य दोषा अपि समस्ताः सन्तीत्याह (।)

...1.221b अत्मनि सति परसंज्ञा स्वपरविभागात् परिग्रहद्वेषौ ॥ २२१ ॥

...1.222a अनयोः संप्रतिबद्धाः सर्वे दोषाः प्रजायन्ते ॥

'आत्मनि सति' ततोऽन्यस्मिन् 'परसंज्ञा' परबुद्धिर्भवति । 'स्वपरविभागाच्च' कारणात् स्वपरयोर्यथाक्रमं 'परिग्र'होऽभिष्व'ङ्गो द्वेषः' परित्यागस्तौ भवतः (२२१) । 'अनयो'रनुनयप्रतिषेधयोः 'संप्रतिबद्धाः सर्व्वे दोषा' रागमात्सर्येर्ष्यादयः 'प्रजायन्ते' ।

e. यद्यप्यात्मनि स्नेहवान् तथाप्यत्मीये 'सुखसाधने वैराग्यान्न संसरतीति चेत्' । नैतद्युक्तं यत (ः।)

[464] १ रज्ज्वां सर्पबुद्धिवदपैति च ।

[465] २ वैधर्म्यदृष्टान्तमाह ।

[466] १ आत्मदर्शनं मूलं यस्य जन्मादेः ।

...1.222b नियमेनात्मनि स्निह्यंस्तदीये न विरज्यते ॥ २२२ ॥

'आत्मनि स्निह्यन्' प्रीयमाण'स्तदीय आत्मी'ये 'सुखसा'धने 'नियमेन' ('न') 'विरज्यते'ऽभिष्वजत्येव तत्कथमात्मीयविरागान्मुक्तिः ॥ आत्मस्नेहस्यात्मीयवैराग्यविरोधित्वात् । (२२२)

f. तमे[467] व त्यजतीति चेत् आह (।)

....1.223 ने चास्त्यात्मनि निर्दोषे स्नेहापगमकारणम्[468] ॥
स्नेहः सदोष इति चेत् ततः किं तस्य वर्जनम् ॥ २२३ ॥

[088/s]

य[469] द्यप्यात्मा निर्दोषस्तथापि 'स्नेहः सदोष इति चेत् । ततः' सदोषत्वात् 'किं कर्तव्यं' तस्य स्नेहस्य 'वर्जनम्' (। २२३)

...1.224a अदुषितेऽस्य विषये न शक्यं तस्य वर्जनम् ।

'अदूषितेस्य विषय' आत्मनि 'न शक्यं तस्य वर्जनं' । न हि स्नेहः स्वगुणदोषा[17a/MA] भ्यामुपादीयते त्यज्यते वा किन्तु विषयस्य विषयश्च निर्दोष इति कथमस्य व[470] र्जनं ।

'किञ्च (।)'

...1.224b प्रहाणिरिच्छाद्वेषादेर्गुणदोषानुबन्धिनः ॥ २२४ ॥

...1.225a तयोरदृष्टिर्विषये;

'इच्छाद्वेषादेर्गुणदोषानुबन्धिनो' यथाक्रमं विषयस्य गुणदोषानुवर्तिनः प्रहाणिः प्रहाण्युपायः (२२४) । तयोर्गुणदोषयोर'दृष्टिर्विष[471] ये'ऽनन्योपायतादर्शनार्थमुपचारः । विषयगुणदोषादर्शने एवेच्छा द्वेषादि'प्रहाण्यु'पाय इत्यर्थः ॥

नन्वदृष्टोपि इत्यादिरनिच्छामात्रात् त्यज्यमानो दृश्यत[472] इत्याह (।)

...1.225b न तु बाह्येषु यः क्रमः ।

न तु बाह्येषु वस्तुषु यः क्रमोऽनिच्छामात्रकृतत्यागरूपः स आन्तरेष्वपि स्नेहादिषु युक्तः । बाह्याधीनं बाह्यमनिच्छया त्यक्तुं शक्यं आत्मदर्शनाधीनन्तु न शक्यपरिहारं । अविकलहेतुत्वेनोत्पत्तेः ।

किञ्च (।)

...1.225c न हि स्नेहगुणात् स्नेहः किन्त्वर्थगुणदर्शनात् ॥ २२५ ॥

...1.226a कारणेऽविकले तस्मिन् कार्यं केन निवार्यते ।

न हि 'स्नेहगुणात्स्नेहः क्रियते किन्त्वर्थ'स्य विषयस्य 'गुणदोषदर्शनात्' जायते (२२५) 'कारणेऽविकले तस्मिन्' विषयगुणे 'कार्यं' स्नेहः 'केन निवार्यते' । न केनचित् ।

...1.226b का वा सदोषता दृष्टा स्नेहे दुःखसमाश्रयः ॥ २२६ ॥

---

[467] २ आत्मस्नेहं ।

[468] ३ नैतच्छ्लोकार्द्धं विवृतं वृत्तिकृता ।

[469] १ नचात्मनि निर्दोषे स्नेहापगमकारणमस्ति इतिवक्तुमुचितं व्याख्यानम् ।

[470] २ इदमेव समर्थयते ।

[471] ३ इच्छाविषये गुणदृष्टेः प्रवर्ततो द्वेषो दोषदृष्टेः तेनात्मदृष्ट्याऽगतो भिष्वङ्गस्त(द्)दृष्टेरपैति ।

[472] ४ तत्किमात्मनि तद्विषयेऽवश्यन्तयाऽदर्शनमपेक्षते ।

[089/s]

'का वा सदोषता दृष्टा स्नेहे' येनायं वर्जयितव्यः ॥ 'दुःखस्य समाश्रयश्चेद्दोषः' । तथा ह्यात्मनि स्निह्यन् तत्सुखसाधनेषु तृष्णावान् दुःखभूतं संसारमुपादत्ते ॥ (२२६)

...1.227a तथापि न विरागोऽत्र स्वत्वदृष्टेर्यथात्मनि ।

'तथापि' दुःखहेतुत्वेपि 'न विरोगोऽत्र' स्नेहे 'यथा'त्मनि स्वत्व'दृष्टेः' दुःखनिदानभूताया हेता'वात्मनि' न विरागः ।

यदि दुःखहेतौ विरागस्तथा स्वत्वे दृष्टिद्वारेण सर्व्वं दुःखमिति तस्य हेतावात्मन्येव स युक्तः । न चास्त्येतत् ।

...1.227b न तैर्विना दुःखहेतुरात्मा चेत् तेऽपि तादृशाः ॥ २२७ ॥

'न तैः स्नेह'बुद्धीन्द्रियादिभिरात्मीयै'र्व्विना दुःखहेतु'रात्मा चेत् । 'तेपि' स्नेहादयः 'तादृशा' आत्मानमन्तरेण न दुःखहेतवः । (२२७)

....1.228 निर्दोषं द्वयमप्येवं वैराग्यान्न द्वयोस्ततः ॥
दुःखभावनया स्याच्चेदहिदष्टाङ्गहानिवत् ॥ २२८ ॥

'एवं' परस्परसापेक्षत्वे 'निर्दोषं द्वयमपि' स्नेहादिरात्मा च । 'वैराग्यन्न द्वयो'रपि 'ततः' का[473] र्यं । तथा च संसारो दोषाश्च दुर्व्वारा हेतुसाकल्यात् ॥ प्रवृत्तिः यदि स्नेहादिषु 'दुःखभावनया' हानिः 'स्यात् । अहिदष्टस्याङ्गस्य हानिवत्' । यथात्मीयमप्यहिदष्टमङ्गं दुःखवशाद् विरज्य त्यज्यते । अनुपभोगाश्रयत्वात् । (२२८)

....1.229 आत्मीयबुद्धिहान्याऽत्र त्यागो न तु विपर्यये ॥
उपभोगाश्रयत्वेन गृहीतेष्विन्द्रियादिषु ॥ २२९ ॥

...1.230a स्वत्वधीः केन वार्येत वैराग्यं तत्र तत् कुतः ॥

'आत्मीयबुद्धिहान्या' । तत्राहिदष्टाङ्गे 'त्यागो न तु विपर्यये' आत्मीयबुद्धिसत्तायां । यस्मादु'पभोग'स्या'श्रयत्वेन' कारणत्वेन 'गृहीतेष्विन्द्रियादिषु' (२२९) 'स्वत्वे धीरा'त्मीयत्वबुद्धिः 'के[474] न' हेतुना 'वार्येत न' केनचित् । तत्कुत'स्तत्रो'पभोगसाधने स्वीयावयवे 'वैराग्यं' येन त्यज्यते । 'ततो' यत्त्यज्यते 'आत्मीयबुद्धिहान्या' एव । न चैवं स्नेहादिष्वात्मीयबुद्धिहानिरस्ति येनैषां त्यागः स्यात् ।

[090/s]

...1.230b प्रत्यक्षमेव सर्वस्य केशादिषु कलेवरात् ॥ २३० ॥

...1.231a च्युतेषु सघृणा बुद्धिर्जायतेऽन्येषु सस्पृहा ।*

एतच्च 'प्रत्यक्षमेव सर्व्वस्य केशादिषु कलेवरात्' । (२३० ) 'च्युतेष्वा'त्मीयबुद्धिविषयेषु 'सघृणा' बुद्धिर्जायते । जनस्यान्यत्राच्युतेष्वात्मीयबुद्धिविषयेषु सस्पृहा ।

### (ङ) आत्मात्मीयबुद्ध्योर्हानिः

दुःखभावनया आत्मीयबुद्धिरेव हीयत इति चेत् । न युक्तमिदं (।)

---

473 १ करणीयं ।
474 २ तस्मात्सा ।

...1.231b समवायादिसम्बन्धजनिता तत्र हि स्वधीः ॥ २३१ ॥

'समवायादिसम्बन्धजनिता' हि यस्मात्तत्र बुद्ध्यादौ 'स्वधीः' । तथा चात्मनः सुखादीना समवायः सम्बन्धः । शरीरेण संयोगः । शरीराश्रितैः रूपादिभिः संयुक्तसमवायः । श्रोत्रेन्द्रियेण संयोगश्चक्षुरादिभिः संयोगिसंयोग आत्मसम्बन्धः । (२३१)

....1.232 स तथैवेति सा दोषदृष्टावपि न हीयते ।
समवायाद्यभावेऽपि सर्वत्रास्त्युपकारिता ॥ २३२ ॥

'स' दुःखभावनायामपि 'तथैवेति सा' स्वधी'र्दोषदृष्टावपि न हीयते' निमित्तस्यावैकल्यात् । अथ स[475] मवायादिर्नास्त्येव तदा । 'समवायाद्यभावेऽपि सर्व्वत्र' बुद्ध्यादाव'स्त्युपकारिता' तत्कृता । (२३२)

....1.233 दुःखोपकारान्न भवेदङ्गुल्यामिव चेत् स्वधीः ।
न ह्येकान्तेन तद् दुखं भूयसा सविषान्नवत् ॥ २३३ ॥

तत्र स्वधीरश[476] क्यधारणा 'दुःखोपकारात्' दुःखोपनिधाना[477] त् 'न भवे'दहिदष्टाया'मङ्गुल्यामिव' स्नेहबुद्ध्यादौ 'स्वधी'रिति 'चेत् । न ह्येकान्तेन' तत्स्नेहादि'दुःखं' दुःखहेतुः पर्यायेण सुखहेतुत्वादपि । किन्तु 'भूयसा' तद्दुःखं 'सवि[478] षान्नवत्' । परिणतिदुःखहेतुरपि विषान्नमापातसुखं च । (२३३)

a. ननु सविषमन्नं सुखमिश्रञ्च वैराग्यविषयः स्वहितकामानामेवं स्नेहादिरपि स्यादित्याह (।)

...1.234a विशिष्टसुखसङ्गात् स्यात् तद्विरुद्धे विरागिता ।

'विशिष्टे' सुखे सुखसाधने तदात्वपरिणाभयोरनुग्रहीतरि विषादिदोषरहितभोजनादौ 'सङ्गाद'भिष्वङ्गात् 'स्यात्तद्विरुद्धे' सविषान्नादौ 'विरागिता' ।
[091/s]

वैराग्याच्च (।)

...1.234b किञ्चित् परित्यजेत् सौख्यं विशिष्टसुखतृष्णया ॥ २३४ ॥

'किञ्चित्सौख्यं' परिणतिदुःखबहुलं 'परित्यजे'दात्मकामो 'विशिष्टस्य सुखस्य' परिणामाविरुद्धस्य 'तृष्णया' अभिलाषेण । यदा त्वात्मनि सति न किञ्चित्सुखैकरूपं सर्व्वं सुखं दुःखसंभिश्रं तदा क्व परिहारः कस्मिन्ननुरागः स्वीकारो न चेच्छया[17b/MA] शक्यपरिहाराः स्नेहादयः तत्कारणस्यात्मनोऽवैकल्यादित्युक्तं ॥ (२३४)

b. नन्व[479] नैरात्म्यपक्षेपि दुःखं सकलं । 'तन्निरोधः परसुखं । तत्क्वचित्तृष्णया' प्रवृत्तिर्न स्यादित्याह (।)

....1.235 नैरात्म्ये तु यथालाभमात्मस्नेहात् प्रवर्तते ।
अलाभे मत्तकासिन्या दृष्टा तिर्यक्षु कामिता ॥ २३५ ॥

---

[475] १ सांख्यं प्रत्याह (।) प्रकृतिपुरुषान्तरज्ञानान्मुक्तेः ।

[476] २ उपभोगाङ्गत्वेन वृत्तेः ।

[477] ३ उपसमीपे निधानमर्पणन्ततः

[478] ४ यथात्मा न त्यज्यते तथायमपि ।

[479] १ यदि नैरात्म्यमेव सर्व्वधर्म्माणां वस्तुतस्तदाऽप्रवृत्तिस्तत्कार्य स्यान्न चास्तीत्याह । नैराश्ये नैरात्म्ये तत्त्वे मूलव्याख्या, स्यादेतद्यदि नैरात्म्यज्ञानं स्यात् किन्त्वज्ञानादारोपात् प्रवर्तते ।

'नैरात्म्यत'त्त्वेऽधायोपादा[480] 'त्मस्नेहा'त्सुखविपर्यासात् दुःखेष्वपि सुखतयाऽध्यवसितेषु विषयेषु यथालाभं प्राप्त्यनुक्रमेण प्रवृत्तिर्भवति निर्व्वाणसुखव्युत्पत्त्यभावात् । व्युत्पत्तावपि तन्मार्गसात्मत्वाभावात् । सात्मीकृतमार्ग्गास्तु क्वचिन्न प्रवर्त्तन्त एव । तथा 'चालाभे मत्तकासिन्या' मत्तगजगामिन्या कामुकस्य 'तिर्यक्षु कामिता दृष्टा' । बलवानात्मस्नेहो विशिष्टसुखसाधनस्यालाभे सुखाभासहेतौ च प्रवर्तयति । (२३५)

c. किञ्च (।) यदि बुद्धीन्द्रियशरीरादीनां दुःखहेतुत्वात् तेषु वैराग्यात्तत्त्यागात् कैवल्यमा'त्मन इष्टं' । मुक्तिदशायान्तदात्मभोगादिसकलपरिच्छेदाभावात् नाशाविशेषान्नाश एवेष्टः स्यात् (।) तच्चेदमयुक्तमित्याह (।)

...1.236a यस्यात्मा वल्लभस्तस्य स नाशं कथमिच्छति ।

'य[481] स्यात्मा वल्लभ[482] स्तस्य स कथं नाशमिच्छति' न नाशं 'कैवल्यमप्रतीति'विषयत्वादिच्छति ।

कथं पुनः केवलमात्मानमिच्छन् नाशमिच्छतीत्याह (।)

...1.236b निवृत्तसर्वानुभवव्यवहारगुणश्रयम् ॥ २३६ ॥

...1.237a इच्छेत् प्रेम कथं;

[092/s]

'निवृत्तः सर्व्व'स्याव'नुभवव्यव[483] हार'स्य समाश्रय आश्रयणं यस्मात्तं नाशलक्षणाविशिष्टमित्यर्थः । नाशा[484]विशिष्टश्चात्मानं 'कथं प्रेम' स्नेहातिशय 'इच्छेत्' । 'यस्मात्' (।)

...1.237b प्रेम्णः प्रकृतिर्न हि तादृशी ।

'प्रेम्णः प्रकृतिस्तादृशी' स्वविषयनाशैषणस्वभावा न भवति (।) तस्मात् (।)

...1.237c सर्वथात्मग्रहः स्नेहमात्मनि द्रढयत्यलम् ॥ २३७ ॥

'सर्व्वथा आत्मग्रह आत्मनि स्नेहमलम'त्यर्थ 'द्रढयति' (। २३७)

स आत्मग्रहश्चात्मोपकारिषु ।

...1.238a आत्मीयस्नेहबीजन्तु तदवस्थं व्यवस्थितम् ।

'आत्मीयस्नेहबीजं तदवस्थं व्यवस्थित'मिति तत्प्रतिबद्धानां दोषाणाञ्चानिवृत्तिः ॥

d. स्यादेतद् (।) आत्मीये दोषदर्शनाद्वैराग्यमुत्पद्यते इत्याह (।)

...1.238b यत्नेऽप्यात्मीयवैराग्यं गुणलेशसमाश्रयात् ॥ २३८ ॥

...1.239a वृत्तिमान् प्रतिबध्नाति, तद्दोषान् संवृणोति च ।

दोषदर्शनात् 'यत्नेपि' सति तावत्कालमा'त्मीये'षु 'वैराग्यं' यदुत्पन्नं तदात्मस्नेहो 'वृत्तिमाना'त्मीयेषु 'गुणले'शस्य सुखसाधनत्वस्य 'समाश्रय'णात् (२३८) 'प्रतिबध्नाति । तद्दोषाँश्च' दुःखसाधनादीन् 'संवृणोति' । तत् कुत आत्मस्नेहवत आत्मीये वैराग्ययोगः । आत्मस्नेहस्य सर्व्वदोषमूलत्वात् (।)

[480] २ आत्मारोपात् ।
[481] ३ सांख्यस्य ।
[482] ४ देही एव मुक्तः ।
[483] १ सुखादिभोक्तेत्यादि ।
[484] २ नैरात्म्ये विशेषात् ।

...1.239b आत्मन्यपि विरागश्चेदिदानीं यो विरज्यते ॥ २३९ ॥

‘आत्मन्यपि विरागश्चे’द्बाध्यते । ननूक्तमत्र । न चात्मनि निर्दोषे स्नेहापगमकारणमस्ति । भवतु तावत्तथापीदानीमत्रापि पक्षे यो तत्र ‘विरज्यते’ (। २३९)

....1.240 त्यजत्यसौ यथात्मानं व्यर्थाऽतो दुःखभावना ।
दुःखभावनयाऽप्येष दुःखमेव विभावयेत् ॥ २४० ॥

तेन स तं ‘त्यजति यथात्मानं’ । न ह्यात्मनि विरक्तोपि तं त्यजति, तथात्मीयेपि विरक्तस्तं न त्यक्ष्यतीति ‘व्यर्थ[ा]तो दुःखभाव’नाऽत्मनोऽत्यागात् । ‘दुःख-’ [093/s] ‘भावनयापि’ एष भावको ‘दुःखमेव’ भाव्यमानं ‘विभावयेत्’ प्रका[485] श्येत् । (२४०)

....1.241 प्रत्यक्षं पूर्वमपि तत् तथापि न विरागवान् ॥
यद्यप्येकत्र दोषेण तत्क्षणं चलिता मतिः ॥ २४१ ॥

तच्च भावनातः ‘पूर्व्वमपि प्रत्यक्ष’मेव दुःखमात्म[486] स्नेहादिशस्त्रप्रहाराद्यनुभवकाले ‘तथापि’ प्रत्यक्षीकृतात्मस्नेहादिदुःखत्वे‘पि’ न ‘विरागवान्’ तेषु कश्चित्तदा । ततो भावनाप्रकर्षेप्येवं स्यात् साक्षात्करणत्वात्तस्य । ‘तच्च न’ विरागहेतुः प्रागिव । यद्यप्येकत्रापराधकारिणि दोषदर्शनात् ‘तत्क्षणं’ नियतकालमनुरागा‘च्चलिता मति-’ र्व्विरागभजनात् (। २४१)

....1.242 विरक्तो नैव तत्रापि कामीव वनितान्तरे ॥
त्याज्योपादेयभेदे हि सक्तिर्य्यैवैकभाविनी ॥ २४२ ॥

तथाप्यसौ ‘तत्र विरक्तः’ सर्व्वथा पर्यायेण रागोत्पत्तेः । किं पुनरन्यत्र ‘कामीव’ क्वचित् कामिन्यां रागकारिण्यां विरक्तोपि ‘न वनितान्तरे’ विरक्तः । तस्यामपि वा क्रमेण ।

किञ्च (।) प्रतिधानुनयविषयत्वात् ‘त्याज्योपादेयभे[487] दे हि सति सक्तिरासक्तिर्य्यैवे’कस्मिन् ‘भाविनी’ द्वेषविषयतयाऽनुरागविषयतया वा (। २४२)

....1.243 सा बीजं सर्वसक्तीनां पर्यायेण समुद्भवे ॥
निर्दोषविषयः स्नेहो निर्दोषः साधनानि च ॥ २४३ ॥

e. ‘सा’ सक्ति‘र्बीजं’ कारणं ‘सर्व्वसक्तीनां पर्यायेण’ परिपाट्या ‘समुद्भव’निमित्तं । तथा हि क्वचिद् द्वेषासत्त्या तदनुकूलप्रतिकूलयोः प्रतिधानुनयौ भवतः । तथानुरागासत्त्यापि क्वचित्तयोरेवानु‘नयद्वेषौ भवतः’ । तदेवममात्वो निर्दोषत्वा‘न्निर्दोषविषयः’ स्नेहो ‘निर्दोषः’ स्वयं ‘उपभोगसाधनानि’ चेन्द्रियशरीरादिनि शब्दरसरूपादीनि निर्दोषाणि । आत्मादीनां सर्व्वेषां प्रत्येकं दुःखहेतुत्वाभावात् ।[488] (२४३)

....1.244 एतावदेव च जगत् क्वेदानीं स विरज्यते ॥
सदोषताऽपि चेत् तस्य तत्रात्मन्यपि सा समा ॥ २४४ ॥

[094/s]

‘एता[489] वदेव च जगत्’ । त्रिभिर्जगतः संग्रहात् । ‘क्वेदानीं स मो’क्तुकामो ‘विरज्यते’ ॥ समुदायाद्दोषदर्शनात् तत एव विरज्यते चेत् । नन्वेवमात्मन्यपि वैराग्यं प्राप्तं ॥ न केवलं

[485] १ प्रत्यक्षावसानत्वाद् भावनायाः ।

[486] २ इति व्यर्था भावना ।

[487] ३ आत्मनीत्यादिवदयमुपदेशः ।

[488] ४ निर्द्दोषस्यात्मनः सतः ।

गुणवत्ता 'सदोषतापि चे[490] त्तस्य' स्नेहेन्द्रियादेः । 'तत्रात्मन्यपि' कैवल्येनेष्टे 'सा' सदोषता 'समा' तस्या अपि स्नेहादिदोषवत्त्वात् । (२४४)
[18a/MA]

f. एवन्तर्ह्यात्मदोषमेव वैराग्यभावनाया जह्यादिति चेत् ।

...1.245a तत्राविरक्तस्तद्दोषे क्वेदानीं स विरज्यते ।

'तत्रात्म'न्य'विरक्त'स्त'द्दोषे क्वेदा'नीमात्मदर्शनकाले 'स' मुमुक्षु'र्विर'ज्यते । यथा-सदोषेप्यात्मन्यात्मदर्शनादविरक्तस्तथा तद्दोषेपि स्नेहादात्मीयत्वदर्शनान्न विरज्येत (।) अपि च (।)

...1.245b गुणदर्शनसम्भूतं स्नेहं बाधितदोषदृक् ॥ २४५ ॥

'गुणदर्शनसम्भूतं स्नेहं बाधितदोष'स्य 'दृक्' दृष्टिः (२४५)

....1.246 स चेन्द्रियादौ न त्वेवं बालादेरपि सम्भवात् ।
दोषवत्यपि सद्भावात् स्वभावाद् गुणवत्यपि ॥ २४६ ॥

...1.247a अन्यत्र;

'स च' स्नेहजे'न्द्रियादावे'वं गुण[491] दर्शनान्न दृष्टः । 'बालादेरपि' गुणपरीक्षाऽभ्यु(पग)म्य चक्षुरादावात्मीयत्वमात्रेण स्नेहस्य 'सम्भवात्' । गुणदोषदर्शनात् न स्नेहभावाभावी । किन्त्वा-त्मीयत्वदर्शनादर्शनात्तदन्वयव्यतिरेकानुविधानादि[492] ति । दर्शयति च[493] स्वकीये चक्षुरादौ गुणविकले काणत्वादि'दोषवत्यप्या'त्मीयत्वपरामर्शात् स्नेहस्य 'सद्भावाद'न्यत्र परकीये नेत्रादौ दोषरहिते 'गुणवत्य'[494] पि (। २४६)

...1.247b आत्मीयतायां वा व्यतीतादौ विहानितः ।
तत एव च नात्मीयबुद्धेरपि गुणेक्षणम् ॥ २४७ ॥

...1.248a कारणम्;

'आत्मीयतायामपि वाऽतीतादौ' केशनखादौ आदिशब्दाल्लूनाङ्गुल्यादौ वर्तमानेन स्नेह आत्मीयत्वेनादृष्टे'र्विहानितः' परित्यागात् स्वत्वस्य 'तत एव च' बालादेरपि भावात् । 'आत्मी-यबुद्धेरपि न गुणेक्षणं कारणं' किन्त्वात्मदर्शनमेव (। २४७)
[095/s]

...1.248b हीयते साऽपि तस्मान्नागुणदर्शनात् ।

'तस्माद् गुण'दर्शनहेतुकत्वाभावात् सा आत्मीयबुद्धिरपि अगुणस्य 'दोषस्य दर्शना'न्न ही-यते । कारणविरुद्धो हि धर्मी निवर्तकः 'कस्यचिद्यथाग्नी रोमाञ्च'विशेषस्य । आत्मदर्शनं हि स्नेहात्मीयदृशादेः कारणं न च तद्विरोधिनी 'दोषदृक्' ।

...1.248c अपि चासद्गुणारोपः स्नेहात् तत्र हि दृश्यते ॥ २४८ ॥

---

[489] १ आत्मस्नेहः साधनञ्च ।

[490] २ दुःखाश्रयत्वात् ।

[491] ३ आत्मीयबुद्धेरबाधकं दुःखदर्शनं कथमात्मीयस्नेहमपनुदेत् ।

[492] ४ तदेवाह ।

[493] ५ शिष्यान् परतः पूर्व्वार्थसमर्थनमाचार्यः ।

[494] ६ स्नेहाभावात् ।

...1.249a तस्मात् तत्कारणबाधी विधिस्तं बाधते कथम् ।

'अपि चासतां गुणानामारोपस्तत्रा'त्मीये 'स्नेहाद्धि' यस्माद् 'दृश्यते' (२४८) 'तस्मात्त'स्य स्नेहादेः 'कारण'स्यात्मदर्शनस्या'बाधी' अबाधको 'विधि'र्दीक्षा दुःखभावनादिरूपः 'तं' स्नेहादिं 'बाधते कथं' । कारणानिवृत्त्या कार्यनिषेधस्य कर्तुमशक्यत्वात् ।

## (च) प्रकृतिपुरुषयोर्भेदप्रतीतावपि न मोक्षः

सां ख्या स्तु मन्यंते । चेतनाचेतनयोः पुरुषप्रधा[495] नयोर्यावदैक्यं मन्यते पुरुषः । तावत्स स्नेहवान् अयुक्तश्च भेदप्रतीतौ न स्नेहो वियुक्तश्चेति । अत्राह[496] (।)

...1.249b परापरप्रार्थनातो विनाशोत्पादबुद्धितः ॥ २४९ ॥

काणत्वादिदोषयुक्ता 'परापर'स्य विशिष्टविशिष्टस्य चक्षुःशरीरादिकस्य 'प्रार्थनातः' । आत्मनश्चान्यस्यानभिलाषतः । तस्मात्पृथग्भूतमात्मानमयममुक्तोपि जनो वेत्ति । तथा 'विनाशोत्पादबुद्धितः' (। २४९)

....1.250 इन्द्रियादौ पृथग्भूतमात्मानं वेत्त्ययं जनः ।
तस्मान्नैकत्वदृष्ट्यापि स्नेहः । स्निह्यन् स आत्मनि ॥ २५० ॥

शरीरे'न्द्रियादौ' विपर्ययाच्चात्मनि 'भिन्नमात्मानं' तेभ्यो 'वेत्ति । तस्मान्नैकत्वदृष्ट्यापि स्नेहः' किन्त्वात्मदर्शनात् ॥ 'स' आत्मदर्शी 'स्निह्यन्नात्मनि' (। २५०)

....1.251 उपलम्भान्तरङ्गेषु प्रकृत्यैवानुरज्यते ॥
प्रत्युत्पन्नात् तु यो दुःखान्निर्वेदो द्वेष ईदृशः ॥ २५१ ॥

...1.252a न वैराग्यं;

'उपलम्भान्तरङ्गेषू'पभोगसाधनेष्विन्द्रियादिषु 'प्रकृत्या' स्वभावेनै'वानुरज्यते' । 'प्रत्युत्पन्नात्तु' वर्तमानात्पुन'र्दुःखान्निर्वेदो यः' स न 'वैराग्यं' किन्तु 'द्वेष ईदृशः[497]' । (२५१)
[096/s]

...1.252b तदप्यस्य स्नेहोऽवस्थान्तरेषणात् ।
द्वेषस्य दुःखयोनित्वात् स तावन्मात्रसंस्थितिः ॥ २५२ ॥

यस्मा'त्तदपि' निर्वेदावस्थायां 'स्नेहो'स्यास्ति न च विरक्तस्य स्नेहसम्भवः । तदस्तित्वमेव कुत इति चेत् । 'अवस्थान्त'रस्य दुःखहेतोर्निर्वेदकारिण्यां अवस्थायां विलक्षणस्यै'षणात्' । न हि स्नेहमन्तरेणैकत्यागादपरवाञ्छा । 'द्वेषस्य दुःखस्य योनित्वात् । स' निर्वेदाख्यो द्वेषो यावद् दुःखमनुवर्तते 'तावन्मात्रं' तावत्कालपरिमाणं 'संस्थिति'रस्येति (। २५२)

## (छ) हानोपादानहानित औदासीन्यम्

...1.253a तस्मिन् निवृत्तेप्रकृतिं स्वामेव भजते पुनः ।

[495] १ प्रकृतिः

[496] २ एकबुद्धिरेवेन्द्रियादिष्वात्मनो नास्त्यतः पृथगात्मनो वेदनादित्याह ।

[497] ३ स्यादेतदात्मीयस्नेहस्यात्मीयबुद्धिरेव हेतुः सा तु गुणदर्शनादित्याह ।

तथा ‘तस्मिन्’ दुःखे कारणनिरोधा‘न्निवृत्ते पुनः स्वामेव प्रकृतिं’ विषयेष्वविरागलक्षणां ‘भजते’ सत्त्वदर्शी ।

कीदृशं तर्हि वैराग्यं युक्तं[498] ।

...1.253b औदासीन्यं तु सर्वत्र त्यागोपादानहानितः ॥ २५३ ॥

...1.254a वासीचन्दनकल्पानां वैराग्यं नाम कथ्यते ।

सत्त्वदृष्ट्यभावात् सर्वत्र विष[499] ये प्रतिकूलत्वानुकूलत्वाभ्यां ‘अनध्यवसिते त्यागोप[500] दानयोर्हानितो (२५३) वासीचन्द्रनकल्पनां’ वासीचन्दनयोः कल्पाः सदृशा ये वासी-चन्दनकल्पा वा ये तेषां साक्षात्कृतनैरात्म्यतत्त्वानामौदासीन्यमनुनयप्रतिघरहितत्वं ‘पुनर्वैराग्यं नाम’ आगमप्रसिद्धं ‘कथ्यते’ ।

## I. संस्कारदुःखभावात् दुःखभावना

ननु यदि दुःखभावनया स्नेहादिहान्या न मुक्तिः तत्कथं भगवतोक्ता दुःखभावनेत्याह (।)

...1.254b संस्कारदुःखतां मत्वा कथिता दुःखभावना ॥ २५४ ॥

‘संस्कारदुःखतां मत्त्वा कथिता दुःखभावना’ । न हि दुःखदुःखतामभिसन्धाय तद्भावनोक्ता किन्तर्हि संस्कारदुःखतां । (२५४)

a. सैव किमुच्यत इत्याह (।)

...1.255a सा च नः प्रत्ययोत्पत्तिः सा नैरात्म्यदृगाश्रयः ।

[097/s]

‘सा च संस्कारदुःखता नो’ऽस्माकं सौ ग ता नां ‘प्रत्ययोत्पत्ति’र्हेतुपारतन्त्र्यं । ‘सा’ प्रत्ययोत्पत्ति‘र्नैरात्म्यस्य[501] दृशो’ दर्शनस्या‘श्रयः’ कारणं ।

[18b/MA]

b. तथा हि हेतुफलभूताः ‘क्षणक्षयिणो भावाः प्रवृत्तयो नात्मरूपा नाप्यात्माधि’ष्ठिता इति संस्कारदुःखताभावना नैरात्म्यदर्शनानुकूला सैव च मुक्तिहेतुरित्याह(।)

...1.255b मुक्तिस्तु शून्यतादृष्टेस्तदर्थाः शेषभावनाः ॥ २५५ ॥

‘मुक्तिस्तु शून्यताया’ निरात्मताया ‘दृष्टेः । शेषस्य’ नित्यदुःखादे‘र्भावनास्तदर्था’ निरात्मदर्शनार्थाः । (२५५)

## II. अनित्यदुःखानात्मता

...1.256a अनित्यात् प्राह तेनैव दुःखं; दुःखान्निरात्मताम् ॥

[498] १ आह ।
[499] २ आत्मभावे तदुपकरणे च ।
[500] ३ उद्वेगोहं ममेति ग्रहश्च ।
[501] १ सापि न साक्षाद्भाविनामुक्तमिति ।

'तेनैवा'नित्यदुःखभावनायाः शून्यताभावनानुकूलत्वेन भगवानित्यादनित्यत्वाद् 'दुःखं' संसारिस्कन्धानां हा (नाद्) 'दुःखाद् दुःखत्वान्निरात्मतामाह' (।) तद्यथा रूपं भिक्षवो नित्यमनित्यं वा । अनित्यं भदन्त । यदनित्यं तद् दुःखं सुखम्वा । दुःखम्भदन्त । यदनित्यं दुःखं विपरिणाम धर्मकं कल्प्यन्नु तदेवं द्रष्टुः एतन्मम एषोहमस्मि एष मे आत्मेति । नो हीदं भदन्त ।[502] इत्येवं हेतुफलभाव[503] नेनात्मदर्शनमेव मुक्तेरुपाय इति कथितं । तदेवाचार्येणोक्तं (।) उक्तो मार्गः तदभ्यासादाश्रयः परिवर्तत इति नास्ति विरोधः ।

यः पुनरात्मदर्शी सोऽविरक्त एव ।

...1.256b अविरक्तश्च तृष्णावान् सर्वारम्भसमाश्रितः ॥ २५६ ॥

'अविरक्तश्च तृष्णावान्' । हान्युपादानलक्षणान् कर्मप्रसवहेतून् 'समाश्रितः' । (२५६)

....1.257 सोऽमुक्तः क्लेशकर्मभ्यां संसारी नाम तादृशः ॥
आत्मीयमेव यो नेच्छेद् भोक्ताप्यस्य न विद्यते ॥ २५७ ॥

'सोऽमुक्तः क्लेशकर्मभ्यां' आत्मदर्शनप्रवृत्तिकारणकाभ्यां 'संसारी नाम प्रसिद्धः तादृशः' । तदेवमात्मनि सति नात्मीयत्यागः । तथाऽमुक्तिरित्युक्तं । भवतु वाऽत्मीयत्यागस्तथाप्या'त्मीयमेव यो नेच्छे'त्तन्मतेऽस्यात्मीयस्य 'भोक्ता न विद्यते' । भोग्यापेक्षत्वात् भोक्तृत्वस्य (२५७) ।

[098/s]

## III. संसारी क्लेशकर्मभ्याममुक्तः

### (ज) सत्कायदृष्टिर्मूलम्

....1.258 आत्माऽपि न तदा तस्य क्रियाभोगौ हि लक्षणम् ।
तस्मादनादिसन्तानतुल्यजातीयबीजिकाम् ॥ २५८ ॥

...1.259a उत्खातमूलां कुरुत सत्त्वदृष्टिं मुमुक्षवः ।

भोक्त्रभावे 'आत्मापि ना'स्तीति प्रसङ्गात् । कुत इति चेत् । हिर्यस्मादस्यात्मनः 'क्रियाभोगौ लक्षणं' कर्त्ता भोक्ता चात्मोच्यते (।) यदा चात्मीयमेव नास्ति । किमर्थं कर्म कर्तव्यं किम्वा भोक्तव्यं । कर्तृत्वभोक्तृत्वाभावादात्माभाव एव स्वीकृतः स्यात् । तस्मात्सत्यात्मनि आत्मीयं तत्स्नेहादिसत्त्वेऽनुच्छेद एवं संसारस्य । 'तस्मात्' संसारादुद्विजमाना मुमुक्षव उ[504] त्खातमूलामुद्धृतकारणां सत्त्वदृष्टिं कुरुत ।

ननु किमस्या मूलमित्याह (।)

'अनादिसन्तानस्तुल्यजातीयः' पूर्व्वपूर्व्वसत्त्वदर्शनस्वभावोऽविद्यारूपो 'बीजं' कारणं यस्यास्तां (२५८) 'सत्त्वद'र्शनमविद्यास्वभावं पूर्व्वपूर्व्वमुत्तरोत्तरस्य 'सत्त्व'दर्शनस्य हेतुरित्यर्थः ।

### (आगममात्रेण न मुक्तिः)

502 २ मज्झिमनिकाये महापुण्णमसुत्तन्ते (१०९) ।

503 ३ हेतुफलभावकथनेनात्मदर्शनमेव ।

504 १ यथोक्तमिह यावच्चतुर्थः श्रमणः शून्याः परप्रवादाः श्रमणैर्ब्राह्मणैर्वा ।

ननूक्तमीश्वरेणागमेऽस्त्यात्मा मोक्षश्चास्य दीक्षाविधिनेति । तत्किमत्र चिन्त्यते तत्कारणा वा धीविधिस्तं बाधते कथमित्यादिनोक्तत्वात् (।) अत्राह (।)

...1.259b आगमस्य तथाभावनिबन्धनमपश्यताम् ॥ २५९ ॥

...1.260a मुक्तिमागममात्रेण वदन्न परितोषकृद् ।

'आगमस्य तथाभावस्य' प्रतिपादितार्थसम्वादित्वस्य 'निबन्धनं' हेतुम'पश्यतां' । (२५९) मुमुक्षूणा'मागममात्रेण मुक्तिं वदन्' न 'परितोष'कृद् भवति ।
'दीक्षाऽकिंचित्करी---'
नन्वस्ति प्रामाण्यनिबन्धनमागमस्य दीक्षाविधिस्पृष्टस्यानारोहधर्मकत्वदर्शनं । यथा हि बीजं दीक्षाविधिस्पृष्टं न प्ररोहति तथा पुमानपि दीक्षितो न पुनर्भवतीत्याह (।)
[099/s]

...1.260b नालं बीजादिसंसिद्धो विधिः पुंसामजन्मने ॥ २६० ॥

...1.261a तैलाभ्यङ्गाग्निदाहादेरपि मुक्ति प्रसङ्गतः ॥

नालं शक्तो 'बीजादिषु संसिद्धो विधिर्दी'क्षायाः 'पुंसामजन्मने' । (२६०) 'तैलाभ्यङ्गाग्निदाहदेरपि' संसार'न्मुक्तिप्रसङ्गतः' । तैलेनाभ्यक्तं बीजमग्निना च स्पृष्टं न प्ररोहति[505] तथा पुरुषोपि तैलाभ्यङ्गाग्निदाहाभ्यां न पुनर्भवेत् ।

### I. आत्मनोऽमूर्त्तत्वे न पापगौरवलाघवम्

a. स्यादेतत् । दीक्षायाः 'प्राक्' पापगुरोरुत्तरं तुलया लाघवात् । पापाभावोपलम्भ आगमप्रामाण्यनिबन्धनमित्याह (।)

...1.261b प्राग् गुरोर्लाघवात् पश्चान्न पापहरणं कृतम् ॥ २६१ ॥

...1.262a मा भूद् गौरवमेवास्य न पापं गुर्वमूर्त्तितः ॥

प्राग् गुरोर्लाघवात् पश्चान्न पापहरणं कृतं । दीक्षायाः 'प्राग् गुरोः पश्चाल्लाघवात्' दीक्षया 'न पापहरण'स्य दीक्षितस्य किन्तु 'गौरवमेवास्य कृतं' सत् (२६१) 'मा भूदि'ति कस्मान्न कल्प्यते । लाघवं हि गौरवविरोधि दृश्यमानं तदभावमेव गमयेत् । न पापभावं । पापमेव गुर्वितिचेत् । 'न पापं गुरु । अमूर्त्तितो' मूर्त्तत्वाभावात् । भूर्त्तधर्मो हि गौरवं कथं पापस्यामूर्त्तस्य स्यात् ।
ननु त्वत्पक्षेऽपि नैरात्म्यदर्शने भूतेपि कस्मान्न जन्मेत्याह (।)

...1.262b मिथ्याज्ञानतदुद्भूततर्षसञ्चेतनावशात् ॥ २६२ ॥

...1.263a हीनस्थानगतिर्जन्म ततस्तच्छिन्न जायते ।

'मिथ्याज्ञानं' दुःखे विपर्यासमतिः । 'तदुद्भूतस्तर्षो' मिथ्याज्ञानप्रभवा तृष्णा । ताभ्यां संप्रयुक्ते 'चेतने' । तद्वशाद्या 'हीनस्थानगति'स्त'ज्जन्मे'त्युक्तं । 'अतस्तच्छित्' । अज्ञानतृष्णाच्छेदको नैरात्म्यदर्शी 'न जातये' कारणाभावात् ।
तदेवाह (।)

...1.263b तयोरेव हि सामर्थ्यं जातौ तन्मात्रभावतः ॥ २६३ ॥

[505] १ क्षोदश्वेदविदलनमादिना ।

‘तयोरेवा’ज्ञानतृष्णयो‘र्हि सामर्थ्यं जातौ’ जन्मनिमित्तं ‘तन्मात्रेण[506] भावतः’ ॥
[19a/MA]
ते च दीक्षितस्यापि स्त इति स जायते । (२६३)
[100/s]
c. ननु कर्मापि जन्मकारणमिष्टं तत्कथमज्ञानतृष्णे एवोक्ते इत्याह (।)

....1.264 ते चेतने स्वयं कर्मेत्यखण्डं जन्मकारणम् ॥
गतिप्रतीत्योःकरणान्याश्रयस्तान्यदृष्टतः ॥ २६४ ॥

...1.265a अदृष्टनाशादगतिः तत्संस्कारो न चेतना ॥

‘ते चेतने’ मिथ्याज्ञानतदुद्भूतर्षसंचेतने ‘स्वय’मात्मना पूर्व्वशुभाशुभकर्मसँस्कारसहाये ‘कर्म’ कर्मस्वभावे ‘इत्यखण्डम’न्यूनं ‘जन्मकारण’मुक्तमिति न विरोधः । स्यादेतद्(।) ‘गतिप्रतीत्यो’रभिमतदेशगमनस्य ज्ञानस्य च ‘करणानी’न्द्रियाणि । ‘आश्रयः’ कारणं इन्द्रियेभ्य उत्पन्नेन ज्ञानेन विषयं परिच्छिद्य प्रवृत्तेः । तानीन्द्रियाणि ‘चादृष्टतः’ शुभादिलक्षणाद् (२६४) । दीक्षया चा‘दृष्टनाशात्त’त्कार्याणां कारणानामनुत्पत्तेर्व्विषयस्य परिच्छेदतृष्णयोरभावात् ‘अगति’र्जन्मस्थान इति नास्ति पुनर्भवो दीक्षितस्य (।) ‘तदट्’[507] ष्टश्चात्म‘संस्कारो न चे[508] तना’ स्यात् दीक्षितस्यापि सास्तीति जन्मापि[509] स्यात ।
b. अत्रा[510] ह (।)

...1.265b सामर्थ्यं करणोत्पत्तेर्भावाभावानुवृत्तितः ॥ २६५ ॥

...1.266a दृष्टं बुद्धेर्न चान्यस्या सन्ति तानि नयन्ति किम् ।

बुद्धे[511] ‘र्भावाभावानुवृत्तितो’ऽन्वयव्यतिरेकानुवृत्त्या ‘करणा’नामेकस्माद्देशादप[512] रदेशसम्बद्धाना‘मुत्पत्तेः’ कारणा‘त्सामार्थ्यं बुद्धे’रिन्द्रियजननं प्रति(२६५)‘दृष्टं’ नान्यस्य संस्काररूपस्यादृष्टस्य तदन्वयव्यतिरेकानुविधानानुपलम्भात् । सा बुद्धिश्चास्ति देशान्तरसम्बद्धकरणजनिका दीक्षितस्या ‘तत्कि’न्तानि करणानि गर्भस्थानन्न ‘यन्ति’ गच्छन्ति हेत्ववैकल्याद् भवितव्यं (२६६) । 5
c. गमनेनावश्यं दीक्षयोपहता बुद्धिर्देशान्तरं नेतुमिन्द्रियाण्यशक्ता चेत् ।

...1.266b धारणप्रेरणक्षोभनिरोधाश्चेतनावशाः ॥ २६६ ॥

....1.267 न स्युस्तेषामसामर्थ्ये तस्य दीक्षाद्यनन्तरम् ।
अथ बुद्धेस्तदाभावान्न स्युः सन्धीयते मलैः ॥ २६७ ॥

---

[506] २ इह च तृष्णया देशान्तरं कुर्य्यात् । तृष्णाज्ञानभावाभावानुकारात् ।
[507] १ विंशति कुशलाकुशलाः ।
[508] २ बौद्धोक्तः ।
[509] ३ इति पराभिप्रायः ।
[510] ४ समाधानं ।
[511] ५ मिथ्याज्ञानतर्षयुतायाः ।
[512] ६ यत्रोत्पत्स्यते ।

नन्वेवन्तस्य मुमुक्षोर्दी‘क्षानन्तरं’ बुद्धेर‘सामर्थ्ये तेषा’मिन्द्रियाणां स्वविषये व्यवस्थापनं धारणं । तत्रा[513] योजनं ‘प्रेरणं । क्षोभो’[514] विकारः । स्वविषयान्निवर्तनं [101/s] ‘निरोधः’ । ते बुद्धिनिबन्धनवृत्तयो ‘न स्युः’ ॥ ‘अथ बुद्धेस्तदा’ मरणकाले‘ऽभावान्न स्युः’ धारणप्रेरणादयः ।
अत्राह । सन्धीयते जन्यते ‘मलै’र्मिथ्याज्ञानैर्मिथ्याज्ञानात्मस्नेहादिभिर्बुद्धिर्मरणसमयेपीति कुतो बुद्ध्यभावः । (२६७)

....1.268 बुद्धेस्तेषामसामर्थ्ये जीवतोऽपि स्युरक्षमाः ॥
निर्ह्रासातिशयात् पुष्टौ प्रतिपक्षस्वपक्षयोः ॥ २६८ ॥

...1.269a दोषाः स्वबीजसन्ताना दीक्षितेऽप्यनिवारिताः ॥

‘अथ’ मला अपि दीक्षयोपहतसामर्थ्या न बुद्धिं सन्दधति । तदा ‘तेषां’ मलानाम‘सामर्थ्ये’ स्वीक्रियमाणे ‘जीवतोपि’ दीक्षितस्य मला बुद्धिसन्धानं ‘प्रत्यक्षमाः स्युः’ । दीक्षा मलानां बाधिकेत्यपि मिथ्या । तथा प्रतिपक्षस्य नैरात्म्यभावनायाः स्वपक्षस्यायोनिशोमनस्कारस्याभ्यासात् ‘पुष्टौ’ सत्यां दोषाणां यथाक्रमं ‘नर्ह्रा’सादपचयात् । ‘अतिशया’दभिवृद्धेः (२६८) ‘दोषाः’ स्वकीयाद् ‘बीजा’त्तुल्यजातीयकारणात् ‘सन्तानो’ येषां ते ‘दीक्षितेपि’ दोषबीजे परिपोषवत्य‘निवारिताः’ ।

## II. आत्मनो नित्यत्वे न पुनर्जन्म

स्यादेतद् (।) आत्मनोपि गर्भगतकरणादिजनने व्यापारः स एव दीक्षया निरुद्ध इति न पुनर्जन्मेत्याह (।)

...1.269b नित्यस्य निरपेक्षत्वात् क्रमोत्पत्तिर्विरुध्यते ॥ २६९ ॥

....1.270 क्रियायामक्रियायाश्च क्रिययोः सदृशात्मनः ॥
ऐक्यञ्च हेतुफलयोर्व्यतिरेकस्ततस्तयोः ॥ २७० ॥

नित्यस्यानुपकार्यतया ‘निरपेक्षत्वात्’ करणादीनां ‘क्रमे[515] णोत्पत्तिर्वि’रुध्यते समत्वहेतुसद्भावात् सकृदुत्पादप्रसक्तेः । (२६९) इन्द्रियादेः क्रियायामक्रियायाश्च सदृशात्मनस्तुल्यरूपस्यात्मनस्तयोः कालयोस्ते ते ‘विरुध्येते’ ।
यद्यसौ कार्यकरणस्वभावः तदा कार्यादिव ‘क्रियावि’रामोस्य विरुध्यते । एव‘मक्रियायामपि’ वाच्यं । किञ्च (।) आत्मनः कर्मकर्तृता हेतुत्वं भोक्तृत्वञ्च ‘फलं’ ते चात्मन एकरूपस्य रूपे इति हेतुफलाभेदप्रसङ्गः । ‘व्यतिरेको भेदस्तत आत्मनस्तयोः’ कर्तृ त्वभोक्तृत्वयोर्धर्मयोस्ततो नैक्यप्रसङ्ग इति चेत् । (२७० ।)
[102/s]

## III. नैरात्म्ये स्मृतिसंगतिः

...1.271a कर्तृभोक्तृत्वहानिः स्यात् सामर्थ्यञ्च न सिध्यति ।

513 ७ आकृष्य नयनं ।
514 ८ भ्रूभङ्गादि ।
515 १पूर्वं कृतवान् पश्चादपि गर्भे व्याप्रियत इति क्रमः ।

एवं 'कर्तृ त्वभोक्तृत्वाहानिः स्यात्' । आत्मनोऽतत्स्वभावत्वात् । तत्सम्बन्धात् कर्ता भोक्ता च । अनुपकृतस्य सम्बन्धित्वेऽतिप्रसङ्गात् उपकृतत्वं वेदितव्यं तच्चाशक्यसाधनं यस्मान्नित्यस्याव्यतिरेकित्वात् 'सामर्थ्यश्च न सिध्यति' ।

ननु यद्यात्मा नास्ति । तदाऽन्येनानुभूतं कर्म च कृतमन्यः स्मरति भुङक्ते फलमिति स्यात्तथा चातिप्रसङ्ग इत्याह (।)

...1.271b अन्यस्मरणभोगादिप्रसङ्गश्च न बाधकाः ॥ २७१ ॥

...1.272a अस्मृतेः; कस्य चित् । तेन ह्यनुभूतेः स्मृतोद्भवः ।

'अन्यस्य स्मरणभोगादिप्रसङ्गाश्च न बाधका' भवन्ति (२७१) अस्मृतेः । 'कस्यचित्' स्मर्त्तुरभावात् । एवं भोगोपि नास्ति भोक्तभावात् । 'तेन' हि तस्मात् [19b/MA] स्मर्त्रभावात् कारणाद्विषयाणाम'नुभूतेः' सकाशात् 'स्मृति'रेव स्मृतं तस्यो'द्भवः' । वस्तुधर्मो ह्येष यदनुभवः पटीयान् स्मरणबीजाधानद्वारेण स्मरणं जनयति । शुभाशुभचेतनाश्च संस्कारा भोगाकारं सम्विदं प्रवर्तयन्ति (।) तत्किं स्मर्तृभोक्तृदुर्ग्रहेण । तत्तदाकारः प्रतीत्यसमुत्पन्नो बुद्धिप्रबन्ध एव केवलो न तु संसारी नाम कश्चित् ॥

h. यदि नास्त्यात्मा कथं स कोपदृष्टिः संसारप्रवृत्तिर्व्वेत्याह (।)

...1.272b स्थिरं सुखं ममाहञ्चेत्यादि सत्यचतुष्टये ॥ २७२ ॥

...1.273a अभूतान् षोडशाकारान् आरोप्य परितृष्यति ॥

'स्थिर[516] म'क्षणिकं सुखं त्रिदुःखताविपरीतं ममेत्यात्मीयमहमित्यात्माहंकारश्चेति दुःखसत्यस्य विपरीता आकारा इत्याद्यान् प्रति सत्यं[517] चतुरः कृत्वा 'षोडशाकारान्-भूतान्' प्राक् यथोक्तभूताकारविपरीतान् 'सत्यचतुष्टये' (२७२)ऽरोपयतीति भ्रान्तिरेव सत्कायदृष्टिः स्वबीजप्रभवा । 'आरो'[518] प्य च किञ्चित् स्वसूखसाधनञ्च मन्यमानस्तदर्थं 'परितृष्यति' । तृष्णया च जन्मस्थानोपांदानमिति संसारप्रवृत्तिः ।

[103/s]

## घ. सम्यग्दृष्टिनैरात्म्यदृष्टिः

मार्गविपर्ययं संसारहेतुमुक्त्वा मार्गमाह (।)

...1.273b तत्रैव तद्विरुद्धार्थतत्त्वाकारानुरोधिनी ॥ २७३ ॥

...1.274a हन्ति सानुचरां तृष्णां सम्यग्दृष्टिः सुभाविता ॥

'तत्र' सत्यचतुष्टय 'एव म्यग्दृष्टिर्नै'रात्म्यदृष्टिः 'तद्विरुद्धार्थतत्त्वाकारानुरोधिनी' (२७३) तेषां स्थिरसुखाद्याकाराणामविद्यारोपितानां विरुद्धोऽर्थस्तस्य तत्त्वानि भूता आकारा अनित्या सुखादयः षोडशाकारास्ताननुरोद्धुं 'शीलं यस्याः' सा तथा सुभाविता सादरनिरन्तरदीर्घकालाभ्यासप्राप्तवैशद्या 'हन्ति तृष्णां जन्म-' हेतुं 'सानुचरां' मात्सर्यादिपरिवारां ॥

### (क) तृष्णाक्षयात् मोक्षः

516 १ नित्यमिति वाच्ये क्षणात् परं स्थायी सर्व्वो नित्य इत्यर्थः ।

517 २ असमुदया हेत्वप्रभवाद्याः ।

518 ३ स सत्कायदृष्टिमान् तामारोप्य च ।

ननु तृष्णाक्षयेपि कर्मदेहयोर्जन्महेत्वोर्भावात् जन्म किं न भवतीत्याह (।)

...1.274b त्रिहेतोर्नोद्भवः कर्मदेहयोः स्थितयोरपि ॥ २७४ ॥

...1.275a एकाभावाद् विना बीजं नाङ्कुरस्येव सम्भवः ॥

त्रिहेतोस्तृष्णाकर्मदेहहेतोर्जन्मनस्तृष्णायाः क्षये कर्म'देहयोः स्थितयोरपि नोद्भवः' उत्पत्तिर्न भवति (२७४) 'एकाभावात्' हेतुसामग्र्यवैकल्यात् । 'विना' 'बीजं' क्षित्युदकादिभावेपि 'नाङ्कुरस्योद्भवः' ।

a. ननु त्रिहेतोर्जन्मन एकाभावेपि चेदनुत्पत्तिः तत्किं क[519] र्म्मणो देहस्य वा क्षयो नाभ्यस्यते । परे चाहुः कर्मक्षयान्मुक्तिरिति । अत्राह (।)

...1.275b असम्भवाद् विपक्षस्य न हानिः कर्मदेहयोः ॥ २७५ ॥

...1.276a अशक्यत्वाच्च तृष्णायां स्थितायां पुनरुद्भवात् ॥

'असम्भवाद्विपक्षस्य न हानिः कर्मदेहयोरस्ति' । (२७५) 'अशक्यत्वाच्च'। सत्यपि वा विपक्षे[520] तदभ्यासाद् देहकर्मनिवृत्तिरशक्यक्रिया । 'तृष्णायां स्थितायां' तत्प्रचितस्यात्मग्रहवतो गर्भस्थानपरिग्रहे सति 'पुनरुद्भवात्' देहस्य शरीरि'णश्च' तृष्णयैव प्रवृत्त्या सर्व्वत्र शुभाशुभप्रवृत्तेश्च (।)

b. एवन्तर्हि तृष्णा कर्म च क्षपयितव्यं मुमुक्षुणेत्याह (।)

...1.276b द्वयक्षयार्थं यत्ने च व्यर्थः कर्मक्षर्थ श्रमः ॥ २७६ ॥

[104/s]

'द्वयक्षयार्थं यत्ने' क्रियमाणे 'कर्मक्षये व्यर्थः श्रमः' । तृष्णाक्षयमात्राज्जन्माभावसिद्धेः सदपि कर्मानुपयुक्तमित्यलं तत्क्षयप्रयासेन । न च कर्मक्षयः प्रति[521] पक्षाभावात् शक्य इत्युक्तं ।

## (ख) अक्षीणकर्मणो न मोक्षः

सन्तापक्लेशोपभोगात् पूर्व्वार्जितकर्मक्षयोऽपरस्य चाकारणं ततो मुक्तिरित्यपि मो[522] हः । (२७६)

तथाहि (।)

....1.277 फलवैचित्र्यदृष्टेश्च शक्तिभेदोऽनुमीयते ।
कर्मणां तापसंक्लेशात् नैकरूपात् ततः क्षयः ॥ २७७ ॥

कर्मणां 'फलवैचित्र्यस्य[523]' नानागत्युपभोग्याने कविधोपकरणसाध्यविविधसुखदुःखोपभोगप्रकारस्य 'दृष्टेश्च शक्तिभेदः' सामर्थ्यनानात्वम'नुमीयतेऽतो' नानाप्रकारफलजननसामर्थ्यात् का[524] रणा'देकरूपा'त् फला'त्तापसंक्लेशान्न कर्मणां क्षयः' । (२७७)

सर्व्वेषां कर्मणां ताप एव फलमिति चेत् ।

[519] १ तृष्णामुपेक्ष्याप्रहीणामेव ।

[520] २ बोद्धमशक्ये ।

[521] १ सत्यां तृष्णायां ।

[522] २ दिगम्बरस्य ।

[523] ३ भोगाभोगरोगारोग्यादिः ।

[524] ४ उत्पित्सुश्लोकावताराय परमतं लिख्यते । स्यादेतत् (।) तृष्णा हि कर्मनिदानं तस्याश्च मार्ग्गात् क्षयो निदानिनोपि कर्मणः क्षयात् त्वयापि कर्मणां क्षय एवेष्टः । येपि दोषविरोधिन उपाया नैरात्म्यदर्शनलक्षणा

...1.278 फलं कथञ्चित् तज्जन्यमल्पं स्यान्न विजातिमत् ॥
अथाऽपि तपसः शक्त्या शक्तिसङ्करसंक्षयैः ॥ २७८ ॥

'तस्य' कर्मणो 'जन्यं फलं[525] कथञ्चित्' जुगुप्सादिभिरल्पं 'स्यात् न' तु 'विजाति[20a/MA] मत्' । दानं दत्त्वा हिंसित्वा वा जुगुप्सुस्तयोः फलमल्पीयोऽनुभवति । कारणता न वापादानात् । न तु शुभस्यदुःखमशुभस्य वा सुखं फलं भवितुमर्हति ॥ 'अथापि तपसः शक्त्या शक्तिसंकरेण' तापक्लेशमात्रफलेन तानि हीयन्ते । तपःशक्त्या कर्मणां संक्षयेण वा जन्माभावः । (२७८)
[105/s]

...1.279a क्लेशात् कुतश्चिद्धीयेताशेषमक्लेशलेशतः ॥

b. यच्च किञ्चिदवशिष्टं तत् 'क्लेशात् कुतश्चित्' केशोल्लु'ञ्चनादेः क्षीयते' । कर्मक्षयाच्च मुक्तिः । अत्राह[526] (।)

'हीयेताशेषमक्लेशलेशतः' । यदि तपसा कर्मक्षयोऽशेषं कर्म हीयेताक्लेशतो विनैव केशोल्लुञ्चनादिदुःखात्कर्मणः क्षीणत्वाद्यथा नारकादि दुःखं न भवति तथाऽल्पीयोपि न स्यात् । शक्तिसांकर्येपि लेशतः सन्तापक्लेशात् केवलात् कर्म हीयेत । न दुःखान्तरानुबन्धी संसारप्रबन्धः तपस्विनः स्यात् ।

...1.279b यदीष्टमपरं क्लेशात् तत् तपः क्लेश एव चेत् ॥ २७९ ॥

...1.280a तत् कर्मफलमित्यस्मान्न शक्तेः सङ्करादिकम् ॥

तपसः शक्त्या शक्तिसङ्करसंक्षयश्च तदा वक्तुं शक्यो 'यदि स्यादिष्टं क्लेशादपर[527]'मन्यत्तपो नान्यथा । 'क्लेश एव चेत्तत्तपः' । (२७९) 'तत्क्लेशरूपं' तपः 'कर्मफलं' (तपोऽवशेषितस्य कर्मणः फलमिष्ट) 'मित्यस्मात्कर्मफलभूतात्तप[528] सः शक्तिसंकरादिकं न' युक्तं । आदिशब्दात्संक्षयश्च ।

C. तस्य[529] मते तु (।)

...1.280b उत्पित्सुदोषनिर्घाताद् येऽपि दोषविरोधिनः ॥ २८० ॥

...1.281a तज्जे कर्माणि शक्ताः स्युः कृतहानिः कथं भवेत् ॥

उत्पित्सोस्तृष्णादे'र्दोष'स्य 'निर्घातात् येपि दोषविरोधिनो' नैरात्म्याभ्यासादय उपायाः (२८०) 'तज्जे' तृष्णादिदोषप्रभवे 'कर्मणि' कारणवारणद्वारेण व्याहन्तुं शक्ता न प्रागुनिते तस्योत्प[530] न्नत्वात् । अतः 'कृतस्य' कर्मणो 'हानिः कथम्भवेत्' ।

d. ननु यथा दोषेभ्यः कर्म तथा कर्मणो दोषाश्च भवन्तीत्यक्षीणकर्मणो न स्यात् मुक्तिरित्याह (।)

---

इष्यन्ते । दोषनिदानं तृष्णान्ते उपघ्नन्ति । असत्यां तृष्णायां अनागतदोषानुत्पत्तिः । उत्पित्सुदोषनिर्घातात्ते शक्ता । अनेन चातीतकर्मनिदानतृष्णादिबाधको न भवत्येव मार्ग्गस्तदुत्पत्तिकाले तस्याभावादेवेत्यसिद्धिरुक्ता परे (रेः?) । यवगोधूमाद्यनेकबीजेष्वनेकाङकुरवत् ।

525 ५ क्षेत्रासंस्कारेल्पफलवत् ।

526 १ अत्र शक्तेः क्षयः साङ्कर्यम्वेति पक्षौ द्वौ ।

527 २ केशोल्लुञ्चनादेरन्यत् कुशलरूपं तपोपीष्टं स्यात् ।

528 ३ फलस्य कर्तृत्वायोगात् संकरक्षये ।

529 ४ यन्मते मार्ग्गात्तृष्णाक्षये कर्मणोपि क्षय इष्टः ।

530 ५ पूर्व्वकृतकमेक्षयो नेति न कृतस्य हानिः ।

...1.281b दोषा न कर्मणो दुष्टः करोति न विपर्ययात् ॥ २८१ ॥

[106/s]

'दोषा न कर्मणो' भवन्ति किन्तु दोषै'र्दुष्टः' प्राणी कर्मकरो भवति 'न विपर्ययात्' । नादुष्टः कर्म करोति नैरात्म्यदर्शिनस्तृष्णाभावात् । क्वचित् प्रवृत्तिनिवृत्त्यसम्भवात् । (२८१)

ननु कर्मणः शुभात् सुखं सुखादभिलाषोऽभिलाषाच्च राग इति कर्मणो दोषजन्मेत्याह (।)

...1.282a मिथ्याविकल्पेन विना नाभिलाषः सुखादपि ।

यश्च 'सुखादप्यभिलाषो' रागहेतुर्दृश्यते स च 'मिथ्याविकल्पेन विना' स्थिरसुखमदीयाहंकारविकल्पनमन्तरेण न भवतीत्यायोनिशोमनस्कार एव दोषहेतुः न कर्म । ततः सत्यपि कर्मण्युन्मूलितात्मदृष्टयो निर्दोषा निर्व्वान्ति । निर्व्वाणश्च दुःखनिरोधलक्षणं । दुःखं परिज्ञाय तत्समुदयं मार्गभावनया प्रहाय प्राप्यते नान्यथेति ।

चतुःसत्यप्रकाशक एव मुमुक्षूणामुपास्य इति तायित्वमुक्तं ।

## ङ. तायात् सुगतत्वसिद्धिः

तदेवमनुलोमतः >प्रमाणभूताये त्यादि पञ्चपदानि व्याख्याय प्रतिलोमतो लिङ्गलैङ्गिकत्वं दर्शयन्नाह (।)

...1.282b तायात् तत्त्वस्थिराशेषविशेषज्ञानसाधनम् ॥ २८२ ॥

'तायाच्चतुः'सत्यप्रकाशलक्षणात् लिङ्गात् 'तत्त्वस्थिराशेष'विशेष'ज्ञान'स्य[531] त्रिगुणस्य सुगतत्वस्य 'साध[532]नं' सिद्धिः । तत्त्वस्य क्षणिकनैरात्म्यस्य ज्ञानात् प्रशस्तं । (२८२)

...1.283a बोधार्थत्वाद् गमेः;

अपुनरावृत्त्या च स्थिरं निःशेषं विशेषज्ञानं त्रिगुणं सुगतत्वं 'बोधार्थत्वाद्' गमेर्गतशब्दः प्रकृतिः । न हि सम्वादिनोऽसाक्षात्कृतस्यार्थस्य उपदेशः शक्यक्रियः (।) न चानुमानेन ज्ञातस्योपदेश इति युक्तमुक्तं । क्षणिकत्वनैरात्म्यादिविषयस्यानुमानस्य भगवदुपदेशमन्तरेणोत्पत्तिबीजाभावात् अगृहीतोपदेशानामभावात् । न च नित्यपरोक्षस्यार्थस्य स्थैर्यादिविपर्ययाध्यवसायिनः कश्चिन्निश्चयोऽस्ति । [107/s] तस्मात्प्रमाणसम्वादिनः परोक्षार्थस्योपदेशस्तत्साक्षात्कारपूर्व्वक एवेति युक्तं तायित्वात् सुगतत्वानुमानं भगवतः । स च भगवान् तायः सुगतत्वात् त्रिगुणात् गुणानुक्रमेण ।

...1.283b बाह्यशैक्षाशैक्षाधिकस्ततः ॥

'बाह्यशैक्षाशैक्षे'भ्योऽ'धिकः' ये लौकिकभावनामार्गेण वीतरागा बाह्या अतत्वदर्शिनस्तेभ्यः तत्त्वदर्शित्वादधिकः । ये शैक्षा अबाह्याः परिहाणिधर्माणस्तेभ्योऽपुनरावृत्त्या । ये चाशैक्षाः श्रावका अप्रहीणक्लेशवासना असाक्षात्कृतसर्व्वाकारवस्तवस्तेभ्यो निःशेषप्रतीत्या । तस्मात् सुगतत्वात् शासनं शास्तृत्वमनुमीयते ।

कि पुनः शासनमित्याह (।)

...1.283c परार्थज्ञानघटनं तस्मात् तच्छासनं ततः ॥ २८३ ॥

---

[531] १ तत्त्वश्च स्थिरश्चाशेषश्च तैर्व्विशिष्यत इति विशेषज्ञानं ।

[532] २ चतुःसत्यविषयमशेषत्वं ।

...1.284a दयापरार्थतंत्रत्वं ;

'तच्छासनं' कारणे कार्योपचारात् 'परार्थं यज्ज्ञानं' सुगतत्वं तदर्थं 'घटनं' व्यायामः । बुद्धत्वसाधनमार्गाभ्यास इत्यर्थः । न ह्युपायमन्तरेणोपेयसम्भवः । 'ततः' शासनाद् (२८३) 'दयापरार्थतन्त्रत्वं' परार्थप्रधानत्वं जगद्धितैषित्वमनुमीयते इत्यर्थः ।

ननु नावश्यं कारुणिकस्य मोक्षमार्गाभ्यासः । 'स्वार्थबुद्ध्यापि बाह्यानामिव' सम्भवात् तत्कथमुपायाभ्यासाद्दयानुमानमित्याह (।)

...1.284b सिद्धार्थस्याऽविरामतः ॥

'सिद्धार्थस्य' निष्पन्नमोक्षलक्षणात्मसम्वादस्यापि सुगतस्य खड्गादिवत् परार्थक्रिया-तो'ऽविरामतो'ऽनिवृत्तेः फलावस्थायान्दयासद्भावाद्धेत्ववस्थायामपि तस्यास्तित्वमनुमानञ्च ।

जगद्धितैषित्वस्य सुगतत्वशास्तृत्वतायित्वसहितस्य प्रामाण्यसाधनत्वमाह (।)

...1.284c दयया श्रेय आचष्टे;

यतो 'दयया' जगद्धितैषित्वेन 'श्रेय आचष्टे' । निर्दयस्तु विसम्वादनाभिप्रायोपि ब्रूयात् । सदयोप्यभूतमज्ञो वक्तीत्याह (।)

...1.284d ज्ञानात् सत्यं ससाधनम् ॥ २८४ ॥

'ज्ञाना'त् सुगतत्वात् भूतमाचष्टे । तच्च ज्ञानं 'ससाधनं' विद्यमानोपायाभ्यासं विद्यमा-नशास्तृत्वमित्यर्थः । (२८४)

...1.285a तच्चाभियोगवान् वक्तुं यतस्तस्मात् प्रमाणता ॥

[108/s]

'तच्च' सत्यचतुष्टयं विनेयानां 'वक्तुमभियोगः' सादरसततप्रवृत्तिस्तद्वान् तायी चेत्यर्थः । 'तस्मात्' कारुणिकत्वात् सुगतत्वात् शास्तृत्वात् तायित्वाच्च भगवतः 'प्रमाणता' यथोपदर्शिता-र्थसम्वादकताऽन्यैरज्ञातचतुःसत्यार्थप्रकाशकता वाऽनुमीयत इत्यर्थः ।

एवञ्चानुमानानुमेयव्यवहारे स्थिते प्रामाण्यात्तायित्वं हितैषित्वादुपाया[20b/MA] भ्यासाच्च सुगतत्वम्भवतीत्युक्तं ।

## (७) संवादकत्वात् भगवान् प्रमाणम्

कस्मा[533] त्पुनरनेकगुणसम्भारसम्भवेपि प्रामाण्येनैव भगवतः स्तुतिरित्याह (।)

...1.285b उपदेशतथाभावस्तुतिस्तदुपदेशतः ॥ २८५ ॥

...1.286a प्रमाणतत्त्वसिध्यर्थं;

'उपदेशस्य तथाभावः' सम्वादकत्वं प्रामाण्यं । तेन 'स्तुति'राचार्येण कृता । तस्य भगवत 'उपदेशतः' (२८५) 'प्रमाण'स्य 'तत्त्वं' लक्षणं त'त्सिध्य'र्थं भ ग व द्दे शनायाः[534] 'प्रमा-णविनिश्चयो' नोत्प्रेक्षामात्रेणेत्याख्यातुमित्यर्थः ।

---

[533] १ प्रमाणभूतायेत्येव स्तुतिपदमाह ?? । [

प्रमाणभूताय जगद्धितैषिणे प्रणम्य शास्त्रे सुगताय तायिने ।
प्रमाणसिद्धये स्वमतात् समुच्चयः करिष्यते विप्रसृतादिहैकतः ॥ (१।१) ॥

]

[534] २ सकाशात्प्रमाणयोः ।

a. ननु नीलसमङ्गी पुरुषो नीलं जानाति नो तु नीलमिति ब्रुवता भगवता प्रत्यक्षं दर्शितं । अनुमानं नोक्तं । कथमागमात् प्रत्येतव्यमित्याह (।)

...1.286b अनुमानेऽप्यवारणात् ।

...1.286c प्रयोगदर्शनाद् वाऽस्य;

'अनुमानेप्यवारणादि'ष्टिर्दर्शिता । शून्याः परप्रवादा इत्यादिना शाब्दादेरेव 'निषेधात् प्रयोग'[535] स्य परार्थानुमानरूपस्य 'दर्शनाद्वागमेऽस्या'नुमानस्य निर्देशः कृत एव 'भगवता' (।)

तमेव प्रयोगमाह (।)

...1.286d यत् किञ्चिदुदयात्मकम् ॥ २८६ ॥

...1.287a निरोधधर्मकं सर्वं तदित्यादावनेकधा ॥

[109/s]

'यत्किञ्चिदुदयात्मकं' (२८६) 'तत्सर्वं निरोधधर्मकमित्यादावागमवाक्येऽनेकधा' स्वभावादिलिङ्गजमनेकप्रकारमनुमानं दृश्यते ।

b. कथं पुनरनेनानुमानमुक्तमित्याह (।)

...1.287b अनुमानाश्रयो लिङ्गमविनाभावलक्षणम् ॥ २८७ ॥

....1.288 व्याप्तिप्रदर्शनाद्धेतोः साध्येनोक्तश्च तत् स्फुटम् ॥

'अनुमानस्याश्रयः' कारणं 'लिङ्ग'म्वक्तव्यमनुमाननिर्देशार्थमन्यथाऽशक्यत्वात् ।

किं लक्षणमित्याह (।) 'अविनाभावः' साध्याव्यभिचारित्वं 'तल्लक्षणं' यस्य तत्तथा । (२८७) स चाविनाभावो लिङ्गं लक्षणं 'हेतो'रुदयधर्मकत्वस्य 'साध्येन' निरोधधर्मकत्वेन 'व्याप्तेः प्रदर्शनात्' यत्किञ्चिदुदयधर्मकं 'तत्सर्व्वं निरोधधर्म-' कमि [536] त्यादिना 'स्फुटः' प्रव्यक्तो दर्शित (:।)

इत्यनुमानप्रामाण्यनिर्देशोपि भगवदुपज्ञमेव (।) तदेवं भगवानेव प्रमाणभूतस्तायीमुमुक्षुभिरुपास्यो नेतर इति दर्शनार्थमा चा र्ये ण 'तस्य स्तुतिरुक्तेति युक्तं' ॥

आचार्य म नो र थ न न्दि कृतायां प्रमाणावर्त्तिकवृत्तौ प्रथमः परिच्छेदः ॥

# 2 द्वतीयः परिच्छेदः[537]: प्रत्यक्षम्

[110/s]प्रथमपरिच्छेदेन प्रमाणसामान्यलक्षणं व्यवस्थाप्य विशेषलक्षणमाख्यातुं द्वितीयपरिच्छेदारम्भः ।

## 2.1 (१. प्रमाणसंख्याविप्रतिपत्तिनिरासः)

विप्रतिपत्तयश्चात्र संख्यालक्षणगोचरफलविषयाः सन्ति । तत्र संख्याविप्रतिपत्तिनिराकरणार्थमाह (।)

[535] ३ अन्यान्यप्याक्षिप्तानीति ग्राह्याणि स्युरित्याह ।

[536] १ महावग्गे १।१।८

[537]* द्रष्टव्यं परिशिष्टं १।५

...v.2.1a मानं द्विविधं विषयद्वैविध्यात्;

'मानं द्विविधं' । यत्तत्प्रमाणमविसम्वादित्वादज्ञातार्थप्रकाशकत्वात्सामान्य- लक्षणमुक्तं तद् द्विविधं । प्रत्यक्षानुमानभेदेन । कस्माद् (।) 'विषय'स्य स्वलक्षणसामान्यलक्षणरूपतया- 'द्वैविध्यात्' । शाब्दादिकमपि हि प्रमाणम्भवत्सविषयं वक्तव्यं (।) विषयश्च स्वसामान्यलक्षणा- दतिरिक्तो नास्ति । ततस्तद्विषयत्वे प्रत्यक्षानुमानतैव । नापि सामान्यविशेषात्मक एकोस्ति विषयः[538] । परस्परविरुद्धयोरैकात्म्यायोगात् ।

ननु कथं विषयद्वैविध्यसिद्धिः (।) न प्रत्यक्षान्नाप्यनुमानतो यथाक्रमं स्वलक्षणसामा- न्यलक्षणत्वादनयोः । द्वाभ्यां द्वयसिद्धिरिति चेत् ।

ननु प्रत्यक्षस्य सामान्याविषयत्वे साध्यसाधनसम्बन्धाग्रहणादनुमानमेव न स्यात् । सा- मान्यविषयत्वे च प्रत्यक्षत्वादेव तत्सिद्धेर्व्विफलमनुमानस्य प्रामाण्यकल्पनं ।

अत्रोच्यते । प्रत्यक्षमपि स्वलक्षणं विषयीकुर्व्वत् तत्सम्भवि विजातीयव्यावृत्त्युपकल्पितं सामान्यं पृष्ठविकल्पेन निश्चिन्वत्तद्विषयमपि निश्चयविषयेण [111/s] च प्रत्यक्षविषयव्यवस्था । एवन्तर्हि स्वलक्षणविषयता न स्यादिति चेत्[539] । न(।) सजातीयव्यावृत्तत्वेनापि ततो निश्चयात्। द्वे च व्यावृत्ती स्वलक्षणे स्तो निश्चिते च प्रत्यक्षबलात्। न चैवमप्यनुमानस्य वैयर्थ्य (।) न हि सामान्यमित्येव प्रत्यक्षविषयः । परोक्षे तस्याप्रवृत्तेः । न च यदेकदाऽपरोक्षं तत्सर्वदा तथा । स्वलक्षणं कदाचिदपरोक्षमप्यन्यदा परोक्षं एवं सामान्यमपि । ततोऽपरोक्षे सामान्ये गृहीतायां व्याप्तौ परोक्षे तस्मिन्ननुमानवृत्तिरिति न कश्चिद्विरोधः । तस्मात् प्रत्यक्षत्वाद्वा विषयद्वैविध्यसिद्धिः प्रत्यक्षानुमानाभ्यां 'वेत्युभय'थाप्युपपन्नं ।

विषयद्वैविध्यमेव कस्मादित्याह (।)

...v.2.1b शक्त्यशक्तितः ।
अर्थक्रियायां;

'शक्त्यशक्तितोऽर्थक्रियायां' । स्वलक्षणस्यार्थक्रियाशक्तत्वात् । 'विजातीयव्या- 'वृत्त्युपकल्पितस्य च सामान्यस्याशक्तत्वात् विषयद्वैविध्यं । न ह्येकस्य 'विरुद्धाविमौ' धर्मौ युज्येते । यद्यनर्थक्रियाकारि सामान्यं 'केशोण्डुकज्ञानप्रतिभासि केशाद्यपि' सामान्यं स्यात् ।

...v.2.1c केशादिर्न्नार्थोनर्थाधिमोक्षतः ॥ १ ॥

न 'के[540] शादिर'र्थः सामान्यरूपोऽ'नर्थाधिमोक्षतः' । (१) यत्र हि व्यवहर्तॄ[541] णा-

---

[538] १ नीलोत्पलादि परस्य अर्थसामर्थ्ये स्वलक्षणत्वमेव ।

[539] १ ननु यदतीन्द्रियं केशादिव्यवहितं स्वलक्षणं, यच्च सामान्यं न गोचरोनुमानस्य, तस्य कथं व्यवस्था ।

> यज्ज्ञातीयैः प्रमाणैश्च यज्ज्ञातीयार्थदर्शनं ।
> भवेदिदानीं लोकस्य तथा कालान्तरेष्वपी

ति ?? ।

[540] २ अनर्थक्रियातो न स्वलक्षणं, स्पष्टप्रतिभास्यनन्वयित्वाभ्यां न च सामान्यमिति विषयान्तरत्वमस्य ॥

[541] ३ अथारोप्यैतत् अन्यथोत्पत्तिसारूप्याभ्यां विषयत्वे आकारो बहिर्भासिकेशादेर्नोत्पादको न सरूपको नापि सम्वित्तस्येति चोद्यानवकाश एव सांव्यवहारि प्रमाणमेतत् । देशादिविप्रकृष्टन्तु (।)

> यज्ज्ञातीयैः प्रमाणैश्च यज्ज्ञातीयार्थदर्शनं ।
> भवेदिदानीं लोकस्य तथा कालान्तरेष्वपि

?? ॥

-[21a/MA] मर्थाध्यवसायः सोऽर्थः स्वलक्षणं सामान्यम्वा स्यात् । यत्र पुनरर्थबुद्धिरेव नास्ति स कथं सामान्यमुच्यतां ।
[112/s]

...pv.2.2 सदृशासदृशत्वाच्च विषयाविषयत्वतः ।
शब्दस्यान्यनिमित्तानां भावे धीः सदसत्त्वतः ॥ २ ॥

'तथा[542] तदृशासदृशत्वाच्च' विषयद्वैविध्यं । सदृशं सामान्यं सर्वव्यक्तिसाधारणत्वात् । असदृशं स्वलक्षणं सर्व्वतो व्यावृत्तत्वात् । अनयोश्चान्योन्यव्यवच्छेदरूपत्वात् न राश्यन्तरं । ततो यदि कल्प्यमानं सदृशं तदा सामान्यमेव तत् । अथासदृशं स्वलक्षणमेवेति द्वैविध्यमेव विषयस्य । तथा[543] शब्दस्य विषयाविषयत्वतश्च द्वैविध्यं । 'शब्दस्य' विषयः 'सामान्यं' । अविषयः स्वलक्षणं । न च शब्दविषयाविषयाभ्या'मन्यो'स्ति सर्व्वस्य संग्रहात् द्वैविध्यमेव । तथा विषयाद'न्यषान्निमित्तानां' मनस्कारवत् साद्गुण्यसंकेतग्रहणानां 'भावे' ग्राहिकाया धियः सा[544] मान्ये 'सत्त्वात्' स्वल[545] क्षणे चाभावात् विषयद्वैविध्यं । यत्र विषयव्यतिरिक्तनिमित्तसद्भावे भवति बुद्धिस्तत्सामान्यं (।) यत्र[546] तु न भवति तत् स्वलक्षणं । प्रकारान्तरञ्च न सम्भवतीति बुद्धिविषयाविषयत्वे सामान्यस्वलक्षणतैवेति द्वैविध्यमेव विषयस्य । (२)

## 2.2 (२. सत्यद्वयचिन्ता)

तदेवार्थक्रियासामर्थ्यादिकं स्वलक्षणादौ योजयन्नाह ।

...pv.2.3 अर्थक्रियासमर्थ यत् तदत्र परमार्थसत् ।
अन्यत् संवृतिसत् प्रोक्तं; ते स्वसामान्यलक्षणो ॥ ३ ॥

'अर्थक्रियायां' ज्ञानादिकायां स्वरूपोपधानेन 'समर्थं यत्तदत्र' वस्तुविचारो 'परमार्थसत्' । एवं यदसदृशं शब्दाविषयोऽन्यनिमित्तभावे ज्ञानाभावश्च तत्परमार्थसत् । 'अतोऽन्यद'शक्तं सदृशं शब्दविषयः । अन्यनिमित्तभावे बुद्धेर्व्विषयश्च तत् 'संवृतिसत् प्रोक्तं' कल्पनामात्रव्यवहार्यत्वात् । ते परमार्थसंवृती 'स्वसामान्यलक्षणे' । (३)

## 2.3 (३. सामान्यतत्कल्यनानिरासः)

...v.2.4a अशक्तं सर्वमिति चेद् बीजादेरङ्कुरादिषु ।
दृष्टा शक्तिः;

स्वलक्षणसामान्यलक्षणे इष्टे ॥ 'सर्व्व'मर्थकारित्वेने[547]ष्ट'मशक्तं' । न किञ्चित् कर्त्तुं सम'र्थमिति चेत् । बीजादेः' कारणाभिमतस्या'ङ्कुरादौ' कार्यसंमते 'दृष्टा शक्ति-' [113/s] र्जननलक्षणा । बीजान्वयव्यतिरेकानुविधाय्यङ्कुरो दृश्यते (।) इदमेव कारणस्य शक्तत्वं यत्प्रागदृष्टस्य तद्भाव एव भावः ॥

...v.2.4b मता सा चेत् संवृत्या;

542 १ सांख्यमतेनाह ।
543 २ ज्ञानद्वारेण निराकृत्य शब्दमुखेनाह ।
544 ३ व्यवहर्तृ व्यवसायान्न वस्तुतः ।
545 ४ मनस्कारादीनां भावेपि यदभावे धियोऽभावस्तत्स्वलक्षणं ।
546 ५ विषये सत्येव बुद्धिर्भवति ।
547 ६ माध्यमिको सिद्धतामाह ।

सा शक्तिः 'संवृत्या मता चेत्' कार्यकारणभावो हि व्यवहारमात्रतः सिद्धः न परमार्थतः । न तावत्प्रत्यक्षं तद्ग्रहणसमर्थं बीजाङ्कुरग्राहिणोः प्रत्यक्षयोः स्वविषयमात्रव्यवस्थापनात् केनान्वयव्यतिरेकग्रहणं । क्रमेण द्वयोर्गृहीतयोस्तद्बलभाविना स्मरणेन ग्रहणमिति चेत् ।

ननु केनान्वयव्यतिरेकौ गृहीतौ । न प्रत्येकं बीजाङ्कुरज्ञानाभ्यां स्वस्वविषयग्रहणात् । नापि द्वाभ्यां ज्ञानयोर्ज्ञेययोश्च साहित्याभावात् । असाहित्ये बीजाङ्कुरमात्रस्य ग्रहणं नान्वयव्यतिरेकयोः । क्रमग्रहणमेव कार्यकारणभावग्रहणम् । तत्तु घटकुलालयोरप्यस्ति इति चेत् (।) न च क्रमोपि केनचिच्छक्यग्रहणः[548] प्रतियोग्यवेदना[549] त् । पूर्वापरग्रहणमत एव नास्ति स्वज्ञानेन वर्तमानताग्रहणाच्च । कार्यकाले च कारणं पूर्वमुच्यते तदा च तदेव नास्ति । तदेतन्मृतस्यारोग्यं । अथ यदेव बीजं तदैवाङ्कुरात् पूर्वं न तु पश्चात् अस्य पूर्वत्वं सम्भवति ॥

नन्वेवं पूर्वतया प्रतिभासोस्य प्राप्तः । न चैतदस्ति । अङ्कुरसाहित्यं पूर्वत्वं तच्च गृह्यत एवेति चेत् । तादृशं पूर्वत्वमन्येषामप्यस्तीति तेपि कारणानि स्युः । किञ्च (।) पूर्वत्वं वर्तमानकालात्प्राग्भावित्वमुच्यते (।) तद्यदि वस्तुनो रूपं तदा वर्तमानं कदापि न स्यात् । वर्तमानतातत्प्राग्भावित्वयोर्विरोधात् । स्यादेतदङ्कुरवर्तमानतायाः प्राग्भावित्वं पूर्वत्वं । तच्च बीजस्य वर्तमानत्वेनाविरुद्धमिति न तस्याभावः । एवन्तर्हि बीजग्रहणे पूर्वताग्रहणं प्राप्तं । न च बीजस्वरूपमिव पूर्वतामपि तद्ग्राहिणि ज्ञाने कश्चिदुपलभते ।

न[550] न्वापेक्षिकमिदं पूर्वत्वं प्रतियोगिनोऽप्रतीतौ कथं प्रतीयतां । य[551]द्येवं वस्तुनो नेदं केवलं भावान्तरापेक्षया व्यवह्रियत इत्या(या)तं(।) न हि वस्तुरूपं सति वस्तुनि[21b/MA] नास्ति (।) यच्चास्ति तेन वस्तुरूपावभासिनि ज्ञाने प्रतिभासितव्यमेव । अन्यथा ज्ञानज्ञेययोर्विषयविषयितैव न स्यात् (।) तस्मान्नाध्यक्षात् कार्यकारणताग्रहः । अतश्च नानुमानादपि । न हि सर्वदा परोक्षेऽन्येऽनुमानवृत्तिः व्याप्तिग्रहणपूर्वकत्वात्तस्य । नापि प्रत्यक्षबलभाविस्मरणं तद्ग्रहणप्रवणं(।)न हि तत्स्वतन्त्रं प्रमाणं किन्तु प्रमाण[114/s] व्यापारव्यवस्थापकं । यदि यथानुभवं प्रवर्तते नान्यथा । न च कार्यकारणभावानुभवो भूत इत्युक्तं । अतः स्मरणत्वमप्यस्य नास्ति । अनूभूतविकल्पनस्य स्मरणत्वात् (।) ततो विकल्पमात्रमेतत् न ततो वस्तुव्यवस्थेति संवृत्त्यैवाविचारितरमणीयया कार्यकारणभावव्यवहारो न परमार्थतः ।

...v.2.4c अस्तु यथा तथा ॥ ४ ॥

'अस्तु[552] यथा तथा' । सांवृतमपि कार्यकारणभावमाश्रित्य साध्यसाधनादिव्यवहारसम्वादसम्प्रत्ययात् समाप्तो लोकव्यवहारः । सांव्यवहारिकश्च प्रमाणं तावतैव सुस्थं । (४)

## (१) सामान्यचिन्ता

### (क) सामान्ये नार्थक्रियासामर्थ्यम्

...pv.2.5 सास्ति सर्वत्र चेद् बुद्धेर्नान्वयव्यतिरेकयोः ।
सामान्यलक्षणेऽदृष्टेः चक्षूरूपादिबुद्धिवत् ॥ ५ ॥

---

[548] १ स्वरूपमात्रवेदनात् ।

[549] २ अक्रमवेद(ना)पेक्षत्वात् ।

[550] ३ परः ।

[551] ४ माध्यमिकः ।

[552] १ सिद्धान्ती(---)अर्थक्रिया तावदस्ति । अन्यथा जगद्व्यालोपः ।

'सार्थ'क्रिया 'सर्व्वत्र' स्वलक्षणे सामा[553] न्येप्य'स्ति चेत् न' सामान्यलक्षणे । अस्तु तावदन्यस्य कार्यस्य 'बुद्धेरप्यन्वयव्यतिरेक'योरदृष्टेः । अन्त्यं हि भावानां कार्यं बुद्धिः । सापि यदन्वयव्यतिरेकौ नानुविधत्ते (।) तस्य कुतोऽर्थक्रिया । प्रत्यक्षं तावन्न 'सामान्य'विषयं 'स्वलक्षण'मात्रस्य प्रतिभासनात् । घट इत्यादिविकल्पबुद्धिस्तु सामान्यावसायात् त[554] द्विषया । सापि समयाभो[555]गादिमात्रादुत्पत्तेर्न सामान्यान्वयव्यतिरेकानुविधायिनी । 'चक्षूरूपादिबुद्धिवत्' चक्षूरूपादिजबुद्धेः । चक्षुराद्यन्वयव्यतिरेकानुविधानमिव सामर्थ्ये सति भावादेकापायेप्यभावाच्च । नैवं सामान्यबुद्धिराभोगमात्रादुत्पत्तेः । (५)

...pv.2.6 एतेन समयाभोगाद्यन्तरङ्गानुरोधतः ।
घटोत्क्षेपणसामान्यसंख्यादिषु धियो गताः ॥ ६ ॥

'एतेन' सामान्यस्य ज्ञानमात्रकार्येप्यसामर्थ्यकथनेन 'समयाभोगादे'रन्तरङ्गस्या'नुरोधतः । घटो'ऽवयवि द्रव्यं । 'उत्क्षेपणं' कर्म । 'सामान्यं संख्या' गुणः समवायः 'आदि' शब्दात्संयोगविभागादयः । तेषु या 'धियो' विकल्पिका भवन्ति ता 'गता' व्याख्याताः । [115/s] न हि रूपा[556] दिव्यतिरिक्तं द्रव्यं । अपरापरदेशिजन्यहस्तादिक्षणाद् भिन्नं कर्म, व्यक्तिव्यतिरेकि सामान्यं प्रत्यक्षबुद्धावभासते । विकल्पबुद्धिरस्तु कल्पिका । सा च[557] संकेतसँस्कारप्रबोधमात्रभाविनी नार्थाधीनेति न ते[558] षां सामर्थ्यं समर्थयति ॥ (६)

ननु यद्यर्थनिरपेक्षाणामन्यनिमित्तानां भावे यत्र बुद्धिस्तत्सामान्यं तदा तैमिरिकबुद्धिप्रतिभासिनः केशादयोपि सामान्यं स्तुः । तेष्वपि धियोऽर्थनिरपेक्षचक्षुरादिमात्रनिमित्तत्वादित्याह ।

...v.2.7a केशादयो न सामान्यमनर्थाभिनिवेशतः ॥

'केशादय'स्तैमिरिकप्रतिभासिनो 'न सामान्यमनर्थाभिनिवेश[559] तः' । न हि तेषु विषयबुद्धिर्व्यवहारिणां विषये च सामान्यचिन्तेयं । यदि ज्ञेयत्वेनाध्यवसायाभावान्न सामान्यं तदाऽभावोप्यनुपलब्धिविषयः 'सामान्यं न स्यात्' ।---

ततश्चानुपलब्धिरनुमानं न भवेदित्याह (।)

...v.2.7b ज्ञेयत्वेन ग्रहाद् दोषो नाभावेषु प्रसज्यते ॥ ७ ॥

'नाभावेषु' सामान्यरूपत्वाभाव'दोषः प्रसज्यते ज्ञेयत्वेन ग्रहात्' । यद्यप्यभावेऽर्थरूपताया अध्यवसायो नास्ति ज्ञे[560]यतया त्वस्ति लोकस्य (।) 'तच्च ज्ञेयं' यदर्थकारि तत्सामान्यमेव । (७)

यदि तु (।)

...v.2.8a तेषामपि तथाभावेऽप्रतिषेधात्;

---

553 २ चक्षुःश्रोत्रादिरूपशब्दादि ।
554 ३ सामान्यविषया ।
555 ४ चित्ताभोगो मनस्कारः ।
556 १ ननु प्रत्यक्षगम्यमेवोत्क्षेपणादीत्याह (।)
557 २ समयाभोगं व्याचष्टे ।
558 ३ अर्थानामनुमाजनने ।
559 ४ प्रत्यक्षविषयेप्यर्थाभिनिवेशमात्रं नार्थ इति सूचनया मध्याप्रवेशमाह ।
560 ५ भावव्यावृत्तिः ।

'तेषां' तैमिरिकगम्यानां केशादीना'मपि तथाभावे' ज्ञानान्तरेण ज्ञेयत्वे समानरूपतेष्यते तदाऽ'प्रतिषेधादि'ष्टमेवास्माकं । तैमिरिकज्ञानगम्याः केशादय इति यदा बुद्ध्यन्तरेण परामृश्यन्ते तदा केशादयो ज्ञेयत्वेन सामान्यमिष्टा एव ॥

यदि तैमिरिकदृष्टाः केशादयो न वस्तु तदा 'स्फुटाभता' न स्यादित्याह ।

...v.2.8b स्फुटाभता ।
ज्ञानरूपतयार्थत्वात्;

'ज्ञानरूपतया' ज्ञानाकारतया केशादीनामर्थत्वात्। स्वलक्षणत्वात्स्फुटाभता ॥
[22a/MA]

यदि ज्ञानाकारतया केशादयः स्वलक्षणन्तदा सामान्यं कथमित्याह (।)
[116/s]

...v.2.8c केशादीति मतिः पुनः ॥ ८ ॥

...v.2.9a सामान्यविषया;

'केशादीति पुन'र्व्विकल्पिका 'मतिः' तैमिरिकोपलब्धकेशाद्यध्यवसायिनी 'सामान्यविषया' । अयमर्थः (।) तैमिरिकदृष्टं केशादि सामान्यरूपेण व्यवस्यन्ती विकल्पिका बुद्धिरध्यवसायेन विषयेण सामान्यविषया । तैमिरिकधीस्तु स्वलक्षणविषया बुद्ध्याकारस्य स्वलक्षणत्वात् ॥ (८)

किन्तर्हि निर्व्विषयमित्याह (।)

...v.2.9b केशप्रतिभासमनर्थकम् ।

तैमिरिक'केशप्रतिभासं' ज्ञान'मनर्थ'कम्बाह्यकेशाभावात् ।

...v.2.9c ज्ञानरूपतयार्थत्वे सामान्ये चेत् प्रसज्यते ॥ ९ ॥

ननु 'ज्ञानरूपतयार्थत्वे' केशादीति विकल्पबुद्धिप्रतिभासिनि 'सामान्ये' स्वलक्षणता 'प्रसज्यते चेत्' (। ९)

....2.10a तथेष्टत्वाददोषः;

तथा ज्ञानाकारतया सामान्यस्यापि स्वलक्षणताया 'इष्टत्वाददोषः' ॥

### (ख) सामान्यस्य ज्ञानाकारता

कथन्तर्हि सामान्यरूपतेत्याह (।)

....2.10b अर्थरूपत्वेन समानता ।

अर्थरूपत्वेनाध्यवसीयमानज्ञेयरूपत्वेन समानता न तु बुद्ध्याकारत्वेन ।

### (ग) विजातीयव्यावर्तकं सामान्यम्

'कथं पुनरर्थरूपत्वे'नापि 'समानते'त्याह (।)

....2.10c सर्वत्र समरूपत्वात् तद्व्यावृत्तिसमाश्रयात् ॥ १० ॥

'सर्व्वत्र' व्यक्तिषु 'तद्व्यावृत्तिसमाश्रयात्' विजातीयव्यावृत्त्याश्रयेण दृश्यविकल्प्यैकत्वाध्यवसायादुपकल्पितस्य सामान्यस्य 'समरूपत्वात्' साधारणरूपत्वादर्थत्वेन सामान्यमुच्यते ज्ञानाकारस्य सामान्यस्य संप्रति व्यतिरिक्तस्य[561] च पूर्व्वं प्रतिषेधात् ॥ (१०)

[117/s]

रूपादिस्वभावमेवाविशेषेण सामान्यं किन्नेष्यत इत्याह (।)

....2.11a न तद्वस्त्वभिधेयत्वात् साफल्यादक्षसंहतेः ॥

तत्सामान्यं न 'वस्तुरू'पादिस्वभाव'मभिधेयत्वात्' । शब्द[562] धर्मवत् 'सामान्यं' शब्दज्ञानगोचरः । न च शब्दविषयो वस्तु (।) कस्मादित्याह (।) 'साफल्यादक्षसंहतेः' । यदि शब्दविषयो वस्तु भवेत् तदा रूपादिशब्दादेवार्थादेरपि रूपादिप्रतीतौ न किञ्चिदक्षैः । न चैवं । ततो वस्तुविषयेणेन्द्रियज्ञानेन शब्दस्य न तुल्यविषयता । तथा चावस्तुतैव शाब्दज्ञानावभासिनः सामान्यस्य न रूपादिता ॥

न[563] नु रूपादयो न शब्दस्य विषयः किन्तर्हि ना[564] मनिमित्ते विप्रयुक्तसंस्कारसंज्ञे ते विज्ञानाद् व्यतिरिक्ते वै भा षि क स्येष्टे । तदापि (।)

....2.11b नामादिवचने वक्तृश्रोतृवाच्यानुबन्धिनि ॥ ११ ॥

'नामादिवचन' इष्यमाणे किन्तन्नामादिकं वक्तरि श्रोतर्यर्थे वा 'सम्बद्धम-' सम्बद्धमेव वा क्वचित्[565] । सर्व्वथा 'वक्तृश्रोतृवाच्यानुबन्धिनि'[566] । (११)

....2.12a असम्बन्धिनि नामादावर्थे स्यादप्रवर्त्तनम् ॥

'असम्बन्धिनि वा नामादौ' शब्देन चोदिते'ऽर्थेऽप्रवर्तनं स्याद'चोदितत्वात् ॥[567]

भवतु तावदन्यसम्बन्धिनि असम्बन्धिनि वा नामादावर्थेऽप्रवर्तनं । अर्थसम्बन्धिनि तु कथमप्रवृत्तिः ।[568] अचोदितत्वात् ।

....2.12b सारूप्याद् भ्रान्तितो वृत्तिरर्थे चेत् स्यान्न सर्वदा ॥ १२ ॥

....2.13a **देशभ्रान्तिश्च,**

न हि देवदत्ते प्रतिपादिते तत्पितरि प्रवृत्तिः ॥ निमित्तस्यार्थ'सारूप्यात् । तद्भ्रान्तितोऽर्थे' प्रवृत्ति'श्चेत्' सम्भाव्यत एतत् किन्तु 'न स्यात् सर्व्वदा' । न हि यमलकयोर्नियमेन भ्रान्त्याऽ[569] न्यत्र प्रवृत्तिः । कदाचित्तत्रापि दर्शनात् । तथा[570] [118/s] 'देशभ्रान्तिश्च न' स्यात् ।

561 १ ज्ञानाकारात् ।

562 १ शब्दस्यायन्धर्मो यदुत शब्दज्ञानगोचरत्वं ।

563 २ वैभाषिकमतमाशङ्कते ।

564 ३ विज्ञानवाद्यतिरिक्ते ।

565 ४ इति चत्वारो विकल्पाः ।

566 ५ वक्तृसम्बन्धिनि । श्रोतृसम्बन्धिनि । अर्थसम्बन्धिनि ।

567 ६ वै० ।

568 ७ सिद्धान्ती, अर्थस्य शब्देनाचोदितत्वात् ।

569 ८ यावताऽयं पुरुषः सर्व्वदार्थ एव दृष्टः शब्दात्प्रवर्तमानः । न कदाचिन्नास्ति वक्त्रादिसम्बद्धे । तन्न भ्रान्त्या वृत्तिः ।

570 ९ देशभ्रान्त्यार्थे वृत्तिरिति चेत् ।

वक्तृश्रोत्रादिसम्बन्धिनि नियतदेशे नामादौ प्रतिपादिते तदन्यदेशे घटादौ सारूप्यादपि न यु[571] क्ता प्रवृत्तिः ॥ (१२)

ननु त्वन्मतेऽपि ज्ञानाकारस्याभिधेयत्वात्कथं बाह्ये प्रवृत्तिरित्याह (।)

....2.13b न ज्ञाने तुल्यमुत्पत्तितो धियः ।
तथाविधायाः;

'न ज्ञाने' ज्ञानाकारे वाच्येऽर्थेऽप्रवर्तनं 'तुल्यं' । धियस्त'थाविधाया' बहिस्त्वेनाध्यवसिताकाराया 'उत्पत्तितः' । शब्दजनिता हि बुद्धिर्व्वस्तुतः स्वांशालम्बनाप्यनाद्यविद्यावशाद् बहिर्व्विषया व्य[572] वसीयत इतियुक्तमर्थे प्रवर्तनं ॥

....2.13c अन्यत्र तत्रानुपगमाद् धियः ॥ १३ ॥

'अन्यत्र' नामादिविष[573] यिणि ज्ञाने तदर्थाध्यवसायात् । अर्थे प्रवर्तनं न युक्तं । 'निराकार'बुद्धिवादि 'वै भा षि क' मते बाह्यार्थप्रतिभासाया ज्ञानाकाराया धियोऽनुपगमतः । (१३)

....2.14a बाह्यार्थप्रतिभासाया उपाये वाऽप्रमाणाता ।
विज्ञानव्यतिरिक्तस्य;

यदि ज्ञेयाकारा बुद्धिः स्यात् स्यात्तत्प्रतीत्याऽभिमानात्प्रवृत्तिरपि । अप्रवृत्तिदोषदर्शनाद् 'बाह्यार्थप्रतिभासाया' बुद्धेरु[574] पाये स्वीकारे 'वाऽप्रमाणता' नामादेः विप्रयुक्तसंस्कारस्य 'विज्ञानव्यतिरिक्तस्य' (।)

कथमित्याह (।)

....2.14b व्यतिरेकाप्रसिद्धितः ॥ १४ ॥

[22b/MA]

'व्यतिरेकाप्रसिद्धितः' । प्रतिभासमानस्याकारस्य ज्ञानत्वात् । न चेन्द्रियादिषु सत्स्वपि विज्ञानकार्यानुत्पत्तितोऽर्थ इव नामादिरपि शक्यव्यवस्थानः । न हि गृहीतसंकेतस्य शब्दश्रुतौ क्वचिदर्थाप्रति[575] पत्तिः ॥ (१४)

....2.15a सर्वज्ञानार्थवत्वाचेत् स्वप्नादावन्यथेक्षणात् ।
अयुक्तं;

[119/s]

नन्वस्ति प्रमाणं 'सर्व्व'स्य 'ज्ञान'स्या'र्थवत्त्वात्' । शाब्दमपि ज्ञानमर्थवदेव । न च रूपादयो विषय इति पारिशेष्यान्नामादिकमेवेति चेत् । 'स्वप्नादावा'दिशब्दात् तैमिरिकज्ञानादिष्व'न्यथा' अर्थशून्य'स्येक्षणात्' स[576] र्व्वज्ञानार्थवच्छाब्दस्य नामादिविषयत्वानुमानमयुक्तं । स्वप्नविज्ञानमपि निमित्तविषयमेवेति चेदाह (।)

....2.15b न च संस्कारान्नीलादिप्रतिभासतः ॥ १५ ॥

---

[571] १ तथाहि त्वयेदं करणीयमिति नियुक्तः पुमान् सारूप्यादन्यत्र न प्रवर्तत एवेति दृष्टेः ।

[572] २ दृश्यविकल्पयोरैक्येन वृत्तेः ।

[573] ३ यस्यापि न नामादिर्व्विप्रयुक्तोऽभिधेयः ।

[574] ४ अभ्युपगमे ।

[575] ५ परार्थानुमानेन ।

[576] १ अनैकान्तिक ।

न च 'संस्कारान्नि'मित्ताख्यात् स्वप्नज्ञानं 'नीलादे'र्वर्णसंस्थानविशेषतः 'प्रतिभासतः' । न च विप्रयुक्तसंस[577] का/?/रो वर्णसंस्थानविशेषवान् ॥ (१५)

नीलादिरेवासावर्थ इति चेत् (।)

....2.16a नीलाद्यप्रतिघातान्न;

स्वप्नप्रतिभासि न 'नीलादि' वस्तु 'अप्रतिघातात्' । नीलादयो 'ह्यर्थाः' स्वदेशे पदार्थान्तरस्य व्याघातकाः स्वप्नोपलब्धास्तु नैवं । पिहितद्वारावरकोदरसुप्तस्थानान्तरगमना(त्) हस्तियूथादिदर्शनात् ।

किन्तर्हि तदित्याह (।)

....2.16b ज्ञानं तद्योग्यदेशकैः ।
अज्ञातस्य स्वयं ज्ञानात्;

'ज्ञानं तत्' नीलादि 'योग्यदेशकैः' स्वप्नायमा[578] नेन समानदेशैः पुरुषान्तरै'रज्ञा'तस्य स्वयं 'ज्ञानात्' । स्वयम्वेद्यमसामान्यमिति ज्ञानलक्षणं । तच्च स्वप्नदृष्टनीलादिषु व्यक्तं ।

....2.16c नामाद्येतेन वर्णितम् ॥ १६ ॥

'एतेन' स्वप्नदृष्टस्य ज्ञानत्वसाधनेन 'नामादि वर्णितं' । नामादिकमपि तन्न भवति योग्यदेशकैरज्ञातस्य स्वयं ज्ञानात् ज्ञानं तत्[579] । तस्मान्नास्त्यर्थः सामान्यबुद्धिरिति । (१६)

अपि च (।)

...v.2.17 सैवेष्टार्थवती केन चक्षुरादिमतिः स्मृता ।
अर्थसामर्थ्यदृष्टेश्चेदन्यत् प्राप्तमनर्थकम् ॥ १७ ॥

यैव रूपादिविषयत्वे'नेष्टा सैव' चक्षुरादिमति'रर्थवती केन' हेतुना 'मता । अर्थ'स्य रूपा'देश्चक्षुरादिमति'जनने 'सामर्थ्यदृष्टेश्चेत् । अन्य'सामान्यविषयं [120/s] विकल्पज्ञान'मनर्थकं प्राप्तं'(।) न हि यथा चक्षुरादिबुद्धेरर्थव्यतिरेकाद् व्यतिरेकः तथा सामान्यबुद्धेर्व्यतिरेकः । आभोगमात्रेण भावात् ॥ (१७)

....2.18a अप्रवृत्तिरसम्बन्धेप्यर्थसम्बन्धवद् यदि ।

न[580] केवलं वक्तृश्रोतृसम्बन्धिनि[581] 'असम्बन्धेपि' नामादावर्थेऽ'प्रवृत्तिः' स्यात् । 'अर्थसम्ब[582] न्धवत्' नामाद्यर्थे प्रवृत्त्यर्थं 'यदी'ष्यते तदा अतीतानागतं नामादि तदभिधायिनां शब्दानां वाच्यं न स्यात् । अभूत् मा न्धा ता भविष्यति शं ख श्चक्रवर्त्तीति (।)

कस्मादित्याह (।)

....2.18b अतीतानागतं वाच्यं न स्यादर्थेन तत्क्षयात् ॥ १८ ॥

'अर्थेनातीतानागतेन' सह तस्य नामादेः सम्बन्धिनः 'स्यात्' स्वरूपा[583] भावात् ॥ (१८)

(२) परमते दोषः

[577] २ सुखादिवत् ।
[578] ३ यदुत्पाद्यरूपं योगी पश्यति न तेन व्यभिचारस्तत्रान्यस्यायोग्यत्वात् ।
[579] ४ नामादि ।
[580] १ तदेवं नामादावप्रवृत्तिः ।
[581] २ सम्बन्धेपि ।
[582] ३ अर्थेन सम्बद्धं ।
[583] ४ अनागतस्य चानुत्पत्तेः ।

### क. व्यक्तिसामान्ययोर्भेदे दोषः

अथ (।)

...v.2.19 सामान्यग्रहणाच्छब्दादप्रसंगो मतो यदि ।
तन्न केवलसामान्याग्रहणाद् ग्रहणेपि वा ॥ १९ ॥

'शब्दात् सामान्यग्र[584] हणात्' तत्प्रतीत्या फलवन्त्यक्षाणीति तेषां वैफल्यस्या'प्रसङ्गो मतो यदि'(।) तदेतन्न युक्तं (।) 'केवल'स्य व्यक्तिशून्यस्य 'सामान्यस्याग्रहणात्' । व्यक्तिव्यंग्यं हि सामान्यं व्यञ्जकाग्रहणे कथं गृह्यते । केवलस्य 'ग्रहणेपि वा' । (१९)

...v.2.20 अतत्समानता-व्यक्ती तेन नित्योपलम्भनम् ।
नित्यत्वाच्च यदि व्यक्तिर्व्यक्तेः प्रत्यक्षतां प्रति ॥ २० ॥

'अतत्स[585] मानता'-व्य क्ती । यत्प्रतीत्या यत्प्रतीयते तत्तस्य सामान्यं व्यंग्यश्च । स्वतन्त्रप्रतीतिस्तु न सामान्यं व्यङ्ग्यं वा । 'तेना'पराधीनप्रतीतित्वेन 'नित्योपलम्भनं' सामान्यं प्राप्तं । व्यक्तिसदसत्त्वयोरप्युपलब्धिः स्यात् । स्वप्रतीतौ व्यक्तिनिरपेक्षत्वात् । तथोपलभ्यस्वभाव[586]स्य सामान्यस्य 'नित्यत्वाच्च नित्यमुपलम्भनं' भवेत् । [121/s] यदि व्यक्तेर्विशेषात् व्यक्तिरभि'व्यक्तिः' सामान्यस्य 'प्रत्यक्षतां प्रति' प्रत्यक्षभावनिमित्तमिष्टा । प्रत्यक्षभूतसामान्यविषया प्रतीतिर्व्यञ्जिकाया व्यक्तेर्भवति । अन्या तु सामान्यबुद्धिर्व्यञ्जकमन्तरेणापि ॥ (२०)

ननु (।)

...v.2.21 आत्मनि ज्ञानजनने यच्छक्तं शक्तमेव तत् ।
अथाशक्तं कदाचिच्चेदशक्तं सर्वदैव तत् ॥ २१ ॥

'य[587] त्सा'मान्य'मात्मनि' प्रत्यक्षात्मक'ज्ञानजनने' व्यञ्जकव्यापारकाले 'शक्त-' मन्यदापि 'शक्तमे'व तन्नित्यैकस्वभावतयाऽनुपकार्यत्वात् । ततश्च केवलस्य सामान्यस्य प्रत्यक्षजननादक्षवैकल्यप्रसङ्गः । 'अथाशक्तं तत्कदाचित्' केवलाद्यवस्था-[23a/MA] याश्चेत् तदा 'सर्व्वदे'वाशक्तं 'तदु'पेयं एकस्य स्वभावद्वयायोगात् स्वभावभेदलक्षणत्वाद्वस्तुभेदस्य । (२१)

एतदेव स्फुटयति (।)

...v.2.22 तस्य शक्तिरशक्तिर्वा या स्वभावेन संस्थिता ।
नित्यत्वादपि किं तस्य कस्तां क्षपयितुं क्षमः ॥ २२ ॥

तस्य सामान्यस्य 'शक्तिरशक्तिर्व्वा' स्वविषयज्ञानजननादौ 'या स्वभावेन' संस्थिता । तां शक्तिमशक्तिम्वा 'नित्यत्वादचिकि'त्स्यस्यानपनेयप्राचीनस्वभावस्य कोऽन्यः 'क्षपयितुं क्षमः' । (२२)

...v.2.23 तच्च सामान्यविज्ञानमनुरुन्धन् विभाव्यते ।
नीलाद्याकारलेशो यः स तस्मिन् केन निर्मितः ॥ २३ ॥

किन्तु यत्तद्व्यक्तिनिरपेक्षमि[588] ष्टं'तच्च सामान्यविज्ञानमनुरुन्धन्' विषयभावेनानुवर्तमानो 'यो विभाव्यते नीलाद्याकारलेशोऽसं'पूर्णस्फुटीभावः 'स [589] तस्मिन्' सामान्यज्ञाने 'केना-

[584] ५ आनुषङ्गिकमपनीय प्रकृतं सामान्यमाह (।) शब्देन सामान्यस्यैव ग्रहाद्रूपादौ सफलमक्षं ॥

[585] ६ समानानां भावः समानता व्यक्तेः सामान्यं न स्यादित्यर्थः । व्यक्तिरभिव्यक्तिरपि न स्यात् ।

[586] ७ व्यक्त्यनुत्पत्तिविनाशेपि ।

[587] १ सिद्धान्त्याह (।) सामान्यं तत्स्वभावतः प्रत्यक्षजनकं न वेति ।

[588] २ सामान्यविषयं ।

[589] ३ विकल्पाविकल्पा तन्मतेन ।

'र्थेन 'निर्मितः' । न तावज्ज्ञात्या तस्यास्त[590] दसम्भवात् । नापि व्यक्त्यातत्र तस्या[591] अप्रतिभासनात् । ततश्च केवलसामान्यग्राहि तत् ज्ञानमिति न युक्तं । विशेषग्रहणे चाक्षवैफल्यं तदवस्थं[592] ॥ (२३)

स्यादेतत् (।) द्विविधो भावानां प्रत्ययः । प्रत्यक्षोऽप्रत्यक्षश्च । तत्र (।)
[122/s]

....2.24a प्रत्यक्षप्रत्ययार्थत्वान्नाक्षाणां व्यर्थतेति चेत् ।

शब्दादिभावेषु प्रत्ययोऽप्रत्यक्षः । प्रत्यक्षस्तु अक्षेभ्य इति न तद्वैफल्यं । अत्राह (।)

....2.24b सैवैकरूपाच्छब्दादेर्भिन्नाभासा मतिः कुतः ॥ २४ ॥

'सैव'[593] प्रत्यक्षाप्रत्यक्षाभासा 'भिन्नाभासा' म[594] तिरेकरूपात् शब्दादेरादिशब्दाद् गन्धरसादेः कुतः । एकरूपविषया च भिन्नप्रतिभासा चेति विरुद्धं । (२४)

किञ्च (।) जातिर्जातिमतो रूपाद् भिन्नाऽभिन्ना वा ।

...v.2.25 न जातिर्जातिमद् व्यक्तिरूपं येनापराश्रयम् ।
सिद्धं; पृथक् चेत् कार्यत्वं ह्यपेक्षेत्यभिधीयते ॥ २५ ॥

तत्र न ताव'ज्जातिर्जातिम[595] देव व्यक्तिरूपं येन' कारणेना'पराश्रयमन'न्यानुयायि 'सिद्धं' । न ह्येकस्या व्यक्ते रूपमन्यत्रास्ति । सर्व्वानुयायि च सामान्यमिष्टं व्यक्तेः सकाशात् 'पृथक् चेत्सा'मान्यं । अस्येदं सामान्यमिति भाविकसम्बन्धानुपपत्तिः । अपेक्षालक्षणः सम्बन्धश्चेत् । 'नन्वपेक्षेति कार्यत्व'मुच्यते तत्सामान्यस्य नित्यस्यासम्भवि ॥ (२५)

...v.2.26 निष्पत्तेरपराधीनमपि कार्यं स्वहेतुतः ।
सम्बध्यते कल्पनया किमकार्यं कथञ्चन ॥ २६ ॥

'कार्यमपि निष्पत्ते'र्नित्यत्वाद'पर[596] ाधीनं' सर्व्वत्र निराशंसं वस्तुतो न क्वचि'त्सम्बध्यते' । केवलं 'कल्प[597] नया' कारणात्मनि सम्बध्यते । यत्तु 'कथञ्चन' सामान्य'मकार्य तत्किं' क्वचित् सम्भ[598] त्स्यते । (२६)

....2.27a अन्यत्वे तदसम्बद्धं । सिद्धाऽतो निःस्वभावता ।
जातिप्रसंगोऽभावस्य न;

तस्माद् (।)

व्यक्तेः सकाशा'दन्यत्वे तत्' सामान्य'मसम्बद्धमतो'ऽस्य 'निःस्वभावता सिद्धा-' व्यक्तिभ्यस्तत्त्वान्यत्वाभ्यां व्यवस्थापयितुमशक्यत्वात् ॥ यद्यपि निः स्वभावा जातिस्तथापि ना'भाव'स्य शशविषाणादेरपि जातेर्जातिरूपतायाः प्रसङ्गः । न हि यो योऽभावः स जातिरुच्यते । किन्तु सामान्यं यत्तन्निःस्वभावं ।

[590] ४ व्यक्त्याकारासम्भवात् ।
[591] ५ ? व्यक्तिरिति ।
[592] ६ ? अभ्युपगन्तव्यं ।
[593] १ स्पष्टास्पष्टा ।
[594] २ तत्त्वान्यत्वावाच्यस्य सामान्यत्वे शशशृङ्गादेः प्रसङ्गश्चेत् ।
[595] ३ अभेदः ।
[596] ४ यदप्यङ्कुरादि बीजादेः तदपि निष्पन्नमपराधीनं ।
[597] ५ बीजादेरङ्कुरादीति ।
[598] ६ सम्बन्धमनुभविष्यति ।

[123/s]

ननु निःस्वभावत्वे कथं सामान्यमित्याह (।)

....2.27b अपेक्षाभावतस्तयोः ॥ २७ ॥

'अपेक्षाभावतस्तयोः' । शाबलेयागोव्यावृत्त्योः परस्परमपेक्षाभावतस्तद्व्यावृत्तिरेव सामान्यं न शशविषाणादिः । न हि तदपेक्षा क्वचिदस्ति । अतद्व्यावृत्तिस्तु निःस्वभावाप्यनुगामिप्रत्ययहेतुः सामान्यं । अभावत्वमिव प्रागभावादिषु पदार्थत्वमिव द्रव्यादिषु ॥ (२७)

...v.2.28 तस्मादरूपा रूपाणां माश्रयेणोपकल्पिता ।
तद्विशेषावगाहार्थैर्जातिः शब्दैः प्रकाश्यते ॥ २८ ॥

'तस्माद्व'स्तुतो जा'तिररूपा' निःस्वभावा 'रूपाणां' शाबलेयादीनां 'नाश्रयेणोपकल्पिता' जातिः । शब्दैस्तद्विशेषावगाहार्थैः । ते च ते विशेषाश्च तद्वि'शेषा'स्तेषाम'वगाहः' प्रवृत्तिविषयत्वेन व्यापनं 'सोऽर्थः' प्रयोजनं येषां तैः सकृदेककार्यानेकप्रतिपत्त्यर्थं तदाश्रयेणोपकल्पिता 'जाति'रतद्व्यावृत्तिलक्षणा 'शब्दै'रभिधेया । (२८)

यदि जातिर्निःस्वभावा कथं स्वभावविशिष्टा व्यवसीयत इत्याह (।)

....2.29a तस्यां रूपावभासोयं तत्वेनार्थस्य वा ग्रहः ।
भ्रान्तिः सा;

'तस्यां' जातौ रूपस्य स्वभावस्या'वभासो यस्तत्वेन' जातिस्वभावेन 'वार्थस्य यो ग्रग्रो भ्रान्तिः सा' जातेनिःस्वभावत्वात् विशेषात्मकत्वाभावात् ।

किन्तर्हि भ्रान्तेर्बीजमित्याह (।)

....2.29b अनादिकालीनदर्शनाभ्यासनिर्मिता ॥ २९ ॥

'अनादिकालीना'नामनादिकालिकानां तथाभूताध्यवसायज्ञानानाम'भ्यासेन निर्मिता' । (२९)

[23b/MA]

यद्यन्यव्यावृत्तिः सामान्यं किन्तस्य रूपमित्याह (।)

...v.2.30 अर्थानां यच्च सामान्यमन्यव्यावृत्तिलक्षणम् ।
यन्निष्ठास्त इमे शब्दा न रूपं तस्य किञ्चन ॥ ३० ॥

'अर्थानां' विशेषाणां 'यच्च सामान्यमन्यव्यावृत्तिलक्षणं । यन्निष्ठा' यद्विषया'स्ते इमे' सांकेतिकाः 'शब्दास्तस्य रूपं' स्वभावो 'न किञ्चन' । वस्तुतः कल्पितत्वात् । (३०)

ननु बुद्ध्याकारः स स्वभावः स एव तर्हि सामान्यम्भविष्यतीत्याह(।)

[124/s]

....2.31a सामान्यबुद्धौ सामान्येनारूपायामवीक्षणात् ।
अर्थभ्रान्तिरपीष्येत सामान्यं साऽपिः

'सामान्यबुद्धावरूपायां' ग्रा[599] ह्यरूपरहितायामपि 'सामान्येन' विजातीयव्यावृत्त्युपकल्पिता-भेदेनाकारेण भेदेष्वर्थेष्वी'क्षणात्' सामान्यमपि यद्व्यवस्थाप्यते सा'प्यर्थभ्रान्तिरिष्येत' विवेचकैः । न हि बुद्ध्याकारः 'सामान्य'मुक्तं स्वलक्षणत्वात् ।

....2.31b अभिप्लवात् ॥ ३१ ॥

[599] १ बुद्धिप्रतिभासः सामान्यमित्यत्राह ।

...v.2.32 अर्थरूपतया तत्वेनाभावाच्च न रूपिणी ।
निःस्वभावतयाऽवाच्यं कुतश्चिद् वचनान्मतम् ॥ ३२ ॥

अर्थनिष्ठ'तया' तु सामान्ये गृह्यमाणेऽर्थभ्रमः[600] । त[601] था बुद्ध्याकारस्यार्थरूपत्वेन व्यक्तिष्व[602] भिप्लवात् अभिसम्बन्धात् । 'त[603] त्त्वे'नार्थरूपत्वे'नाभावा[604] च्च' । 'न रू-पि[605] णी' तथा-भूतबाह्यविषयवती सामान्यबुद्धिः अतश्च । ततश्च 'निःस्वभावतया' सामान्यं भेदाभेदाभ्याम'वाच्यं' व्यक्तिभ्यः । स्वभावं हि भिन्नमभिन्नं वा स्यात् । 'कुतश्चिद्'सामान्यात् भेदेन 'वचनात्' यदि वस्तुसामान्यं 'मतं' । (३१, ३२)

...v.2.33 यदि वस्तुनि वस्तूनामवाच्यत्वं कथञ्चन ।
नैव वाच्यमुपादानभेदाद् भेदोपचारतः ॥ ३३ ॥

यद्येवं व्यक्तेर[606] पि भेदाभेदाभ्यां वाच्यं स्यात् । यस्मान्न 'वस्तूनामवाच्यत्वं कथञ्चन' । यथा हि सामान्यं स्वरूपवत्त्वात् सामान्यान्तराद् भेदेनोच्यते तथा व्यक्तेरपि तत्त्वान्यत्वा-भ्यां यथासम्भवमुच्येत[607] । तस्माद्यत् कुतश्चिदपि वस्तुनस्तत्वान्यत्वाभ्यामवाच्यं तदवस्त्विति सविशेषणो हेतुः । अथवा निर्विशेषणे हेतौ नासिद्धिः । यत[608] सामान्यान्तरादपि सामान्यं भेदेन 'नैव वाच्यमुपा'दानस्य कर्कशाबलेयादे'र्भेदा'त्तदाश्रयोत्पन्नबुद्ध्यालम्बना अश्वत्वगोत्वादी-नां 'भेद[609] स्योपचारात्' । (३३)
[125/s]

किञ्च (।)

...v.2.34 अतीतानागतेप्यर्थे सामान्यविनिबन्धनाः ।
श्रुतयो निविशन्ते सदसद्धर्मः कथम्भवेत् ॥ ३४ ॥

'अतीतानागतेप्यर्थे सामान्यनिबन्धना' सामान्याश्रयाः 'श्रुतयो निविशन्ते' व्यवतिष्ठन्ते । आसीत् घटो भविष्यतीत्यादयः । तथा चासतो घटस्य सामान्यं धर्म इत्युक्तं स्यात् । तच्च सामान्यं 'सदसतो'ऽतीतादे'र्धर्मः कथम्भवेत्' । न हि तैक्ष्ण्यं शशविषाणस्य भवति[610] । (३४)

...v.2.35 उपचारात् तदिष्टं चेद् वर्त्तमानघटस्य का ।
प्रत्यासत्तिरभावेन या पटादौ न विद्यते ॥ ३५ ॥

'अथोपचारात्त'दसद्धर्मत्व'मिष्टं' सामान्यस्य न वस्तुत इति 'चेत्' । स[611] ति घटे तद्धर्मतादृष्टेरसत्यपि तस्मिन् सा कल्प्यत इत्यर्थः ।

600 २ अतस्मिँस्तद्ग्रहात् ।
601 ३ तत्रैवाह हेतुं ।
602 ४ भाति स्वाकारमर्थेर्प्पयन्ती ।
603 ५ वस्तुतोर्थरूपतया ।
604 ६ नाप्यर्थधर्मोन्यापोहोत्र युक्तः ।
605 ७ निःस्वभावापूर्व्वहेतोश्च
606 ८ वस्तुत्वात् । ? अश्व ।
607 ९ वस्तुभवत्सत्तत्वान्यत्वम्वा नातिक्रामति ।
608 १० पटादपि घटत्वमन्यत्वेन नैव वाच्यं । न चोपचरितभेदेन वस्तुत्वं । न हि कलायविदलं स्वर्ण्णमुपचर्य हेमवान् ( ?वत्) स्यात् ।
609 ११ न तु भिन्नसामान्ये तद्रूपादय एव केवला भिन्नाः । उपचरितभेदान्न वस्तुत्वसिद्धिः ।
610 १ अतीतादौ न सामान्यनिबन्धना शब्दवृत्तिः किन्तूपचारादित्याह ।
611 २ घटस्य रूपादिभ्योऽवाच्यत्वेपि पटाद् घटे भिन्नता......वाच्य एव । वर्तमाने घटत्वदर्शनात् ।

ननु सामान्यसम्बन्धिनो[612] ऽपि घटस्या'भावे'नातीतादिघटलक्षणेन का 'प्रत्यास'त्तिरुपचारनिबन्धनमस्ति 'या पटादौ न विद्यते' यदभावा[613] त् घटसम्बन्धिता सामान्यस्य प[614] टे नोपचर्यते (।) सादृश्यं प्रत्यासत्तिरित चेत् । तन्न(।) सदसतो सादृश्याभावात् ॥ प्राक् तादृगासीदिति चेत् । यदासीन्न (तदा) तदुपचारः सम्बन्धस्य सत्त्वात् । यदा यनास्ति तदापि न सादृश्यं । सति च किञ्चिदुपचर्येत नासति । (३५)

किञ्च (।)

...v.2.36 बुद्धेरस्खलिता वृत्तिर्मुख्यारोपितयोः सदा ।
सिंहे माणवके तद्वद् घोषणाप्यस्ति लौकिकी ॥ ३६ ॥

'मुख्यारोपितयोरर्थयोर्बुद्धे'र्ग्राहिकाया 'अस्खलि[615] ता' दृढा 'वृत्तिः' । 'तन्वाद'वृत्तिश्च 'सदा' । यथा 'सिंहे माणवके' च सिंहबुद्धेरस्खलिता । स्खलिता च वृत्तिरिति 'लौकिक्यपि घोषणास्ति' न केवलं प्रामाणिकी । न चातीतानागतघटादिबुद्धिः स्खलन्ती जायते येनातीतानागतव्यक्तिधर्मता सामान्यस्यारोपिता स्यात् । (३६)

[126/s]

...v.2.37 यत्र रूढ्याऽसदर्थोपि जनैः शब्दो निवेशितः ।
स मुख्यस्तत्र तत्साम्याद् गौणोन्यत्र स्खलद्गतिः ॥ ३७ ॥

तस्मा'द्यत्र'[616] विषये'ऽसदर्थो' वाच्यरहितोपि 'शब्दो' रूढ्या वाचकत्वेन 'जनैर्निवेशितः' संकेतितः 'स मृख्यः तत्रार्थे । तत्साम्यात्' । तद्विषयसादृश्या'दन्यत्र' स शब्दः 'स्खलद्वत्तिर'दृढतया प्रत्ययहेतुः । 'गौणः' । ततश्च सदर्थविषयत्वं मुख्यत्वं असदर्थविषयत्वञ्चामुख्यत्वमिति मुख्यागौणलक्षणमपास्तं । संकेतवशेन नियमाभावात् । (३७)

...v.2.38 यथा भावेप्यभावाख्यां यथाकल्पनमेव वा ।
कुर्यादशक्ते शक्ते वा प्रधानादिश्रुतिं जनः ॥ ३८ ॥

'यथा भावेपि' पुत्रादौ तत्कार्यासमर्थत्वादसत्कल्पे'ऽभावाख्यां' शशविषाणं बन्ध्यासुत इत्यादिकां जनः कुर्य्यात् । तत्र भावेप्यमुख्योऽभावशब्दः । अभावे तु मुख्यः त[617] था 'यथा कल्पनमेव' सां ख्या द्यभिमते वस्तुतो'ऽशक्ते' प्रधानादौ 'शक्ते' वा पुरुषादा[24a/MA]वनेककार्यसम[618] र्थे तत्साम्यात् । 'प्रधानादिश्रुतिं जनः कुर्य्यात्' । स प्रधानशब्दोऽभां[619] व एव मुख्यो भावे चामुख्यः । तस्मात्सदसदर्थविषयता मुख्यगौणविषयतेति व्यभिचारिलक्षणं[620] । (३८)

यथासंकेतमेव तु शब्दवृत्तिरिति युक्तं न चैतद्वस्तुविष(य)त्वे न्याय्यं । तथा[621] हि (।)

612 ३ वर्त्तमानस्य ।

613 ४ यदि वस्तुभूतसामान्याश्रयेण शब्दवृत्तिस्तदातीतादौ न स्यात् ।

614 ५ पटे यस्याः प्रत्यासत्तेरभावान्नोपचार इति ।

615 ६ अस्खलिता वृत्तिरित्यावर्त्त्य यत्वात् ।

616 १ सिंहादौ ।

617 २ पुनर्व्यभिचारमाह ।

618 ३ अवस्तुनः कुतो भेदः ।

619 ४ कर्तृत्वादिमारोप्य त्रिगुणीमये प्रधानकल्पना तस्य च लोकेनानिष्टेरुपरतव्यापारेऽनेककार्यसमर्थेऽयं सांख्यपुरुष इति ।

620 ५ सांख्यमते प्राह ।

621 ६ अभिधया वाच्यत्वाभ्यामवस्तुत्वात्तत्रैवोपपत्त्यन्तरमाह ।

....2.39a शब्देभ्यो यादृशी बुद्धिर्नष्टेऽनष्टेपि दृश्यते ।
ताद‍ृश्येव;

'शब्देभ्यो यादृशी' यादृशाकारा 'बुद्धिः नष्टे' विषये । तादृश्येवानष्टेपि विषयेऽव्याप्ततेन्द्रियस्य 'दृश्यते' । न हि शब्दजनिता घटबुद्धिर्निमीलितनयनस्य नष्टेऽनष्टे वा घटे विशिष्यते । तुल्याकारत्वात् । व्याप्तेन्द्रियस्य तु शब्दं श्रृण्वतो या स्पष्टा बुद्धिः सा प्रत्यक्षैव न शब्दकृता । तस्मादवस्तुविषयैव शाब्दी बुद्धिः ।

....2.39b सदर्थानां नैतच्छ्रोत्रादिचेतसाम् ॥ ३९ ॥

[127/s]

'सदर्थानां' वस्तुविषयाणां तु 'श्रोत्रा'दीन्द्रियजातानां 'चेतसां नैत'द्विषयसदसत्ताकालयोः साम्यं शब्दबुद्धेरिवार्थाभावे इन्द्रियबुद्धेरनुत्पत्तेः । (३९)

ननु नष्टेऽनष्टेपि वस्तुनि ये शाब्दो चेतसी जायेते ।

....2.40a सामान्यमात्रग्रहणात् सामान्यं चेतसोर्द्वयोः ॥

ताभ्यां 'समान्यमात्रस्य ग्रहणात्' । तयो'र्द्वयोश्चेतसोः सामान्यं' साम्यं 'ग्राह्य'प्रतिभासकृतमस्ति । एतच्चायुक्तं यस्मात् (।)

....2.40b तस्यापि केवलस्य प्राग् ग्रहणं विनिवारितम् ॥ ४० ॥

'तस्यापि' सामान्यस्य 'केवलस्य' व्यक्तिशून्यस्य 'ग्रहणं' (२।१४) 'प्राग्निवारितम्' अतत्समानताऽव्यक्ती (२।२०) इत्यादिना (४०)

### ख. व्यक्तिसामान्ययोरभेदे दोषः

भिन्नं सामान्यं निषिध्याभिन्नमपि निषेद्धुमाह (।)

...v.2.41 परस्परविशिष्टानामविशिष्टं कथं भवेत् ।
तथा द्विरूपतायां वा तद् वस्त्वेकं कथं भवेत् ॥ ४१ ॥

'प[622] रस्परविशिष्टानां' विशेषाणा'मविशिष्टमभिन्नं रूपं कथम्भवेत्' । अवश्यं हि व्यक्तीनां भेदःकथञ्चिदङ्गीकर्त्तव्यः । सत्त्वर[623] जस्तमसामिव प्रकृतिचैतन्ययोरिव वाऽन्यथा सामान्यमेव न स्यात् । भिन्नानामभिन्नस्य रूपस्य तत्त्वा[624] त् । ये च भिन्नस्वभावास्ते नाभिन्ना भवितुमर्हन्ति विरुद्धत्वात् । अथैकस्यापि समानमसमानञ्च द्वे रूपे । तथा 'द्विरूपतायां तद्वस्त्वेकं कथम्भवेत्' । अन्यो हि समानादसमानः स्वभावः । अतश्च द्वे वस्तुनी स्यातां नत्वेकं द्विरूपं । (४१)

अथ द्वयोरेकं तद्रूपं सामान्यं ।

....2.42a ताभ्यां तदन्यदेव स्याद् यदि रूपं समं तयोः ।

'यदि तयो'र्द्वयोः 'समं' समानं 'रूपं' तदा (।) 'ताभ्या'मेवा'न्यदेव तत्स्यात्' । पृथग्भूतमेव सामान्यं भविष्यति को दोष इति चेदाह (।)

....2.42b तयोरिति न सम्बन्धो व्यावृत्तिस्तु न दुष्यति ॥ ४२ ॥

[622] १ पूर्वं न जातिर्जातिमदेव केवलमित्युक्तमधुना तत्र युक्तिरुच्यते ।

[623] २ योपि जगत एकत्वमिच्छति तेनापि ।

[624] ३ सामान्यत्वात् ।

[128/s]

'तयो'स्तत्सामान्य'मिति न सम्बन्धः' । उपकार्योपकारकत्वाभावात् । तथा-सम्बन्धेऽतिप्रसङ्गात् । अस्मन्मते 'तु व्यावृत्तिः' सामान्यं 'न दुष्यति' । अतत्कार्यव्यावृ[625]त्तेरवस्तुत्वात् । अन्यथाऽन्यानन्यत्वपक्षोक्तो दोषः । (४२)

....2.43a तस्मात् समानतैवास्मिन् सामान्येऽवस्तुलक्षणम् ।

यतः समानत्वेनावस्तुता 'तस्मात्समानतैवास्मिन् सामा'न्येऽ'वस्तुलक्षणं' यत्सामान्यं तदवस्थितिव्याप्तिसिद्धेः । भेदेऽभेदे च वस्तुत्वायोगात् प्रकारान्तरस्य चाभावात् ।

किञ्च (।)

....2.43b कार्यश्चेत् तदनेकं स्यान्नश्वरश्च न तन्मतम् ॥ ४३ ॥

सामान्यं कार्यमकार्यम्वा स्यात् । सम्बन्धिनीनां व्यक्तीनां 'कार्यश्चेत्' प्रतिव्यक्ति सामा-न्योक्ता'वनेकं स्यात्' । एकश्च सामा न्यमिष्टं । अनेकत्वे सामान्यरूपतानाशः । 'नश्वरश्च न तत्सा'मान्यं 'मतं' । कार्यत्वान्नश्वरश्च तत्प्राप्नोति कार्यत्वस्य नाशित्वेन स्वभावस्य व्याप्तेः । (४३)

किञ्च (।)

....2.44a वस्तुमात्रानुबन्धित्वाद् विनाशस्य न नित्यता ।

'वस्तु'मात्रा'नुबन्धित्वात् नाशस्य' वस्तुनो[626] 'न नित्यता' स्यात् । अ[627] नित्यताविरहे तु वस्तुविरहोपि व्याप्याभावस्य व्यापकाभावनियतत्वात् ।

अथ द्वितीयः पक्षः । तदा (।)

....2.44b असम्बन्धश्च जातीनामकार्यत्वादरूपता ॥ ४४ ॥

'अकार्यत्वात्' जातीनां स्वव्यक्तिभिः सह सम्बन्धश्च न स्यात् । कार्यकारणभावाभावे तस्येदमिति सम्बन्धस्यानुत्पत्तिरित्युक्तं कार्यत्वं ह्यपेक्षेत्यभिधीयते (२।२५) इत्यत्रान्तरेऽ'का-र्यत्वाज्जातीनामरूप'ता निःस्वभावता । उत्पद्यमानं हि सस्वभावं भवेन्नेतरत् । नि[628] यामका-भावेन स्वभावाभावप्रसङ्गात् । (४४)

शाब्दप्रत्ययस्यावस्तुविषयतायामुपपत्त्यन्तरमाह (।)

[129/s]

...v.2.45 यच्च वस्तुबलाज्ज्ञानं जायते तदपेक्षते ।
न सङ्केतं न सामान्यबुद्धिष्वेतद् विभाव्यते ॥ ४५ ॥

'यच्च' ज्ञानमिन्द्रियजं 'वस्तुनो रूपादेर्बलाज्जायते तन्न संकेतमपेक्षते,' बालबधिरादेरपि भावात् । 'सामान्यबुद्धिषु त्वेतत् संकेतानपेक्षत्वं न विभाव्यते' संकेतग्रहणस्मरणापेक्षत्वात् । तस्मान्न वस्तुबलभाविन्यस्ता[629] : । तथात्वे सतीन्द्रियार्थसन्निपाते क्षेपायोगात्[630] । (४५)

...v.2.46 याप्यभेदानुगा बुद्धिः काचिद् वस्तुद्वयेक्षणे ।
सङ्केतेन विना सार्थप्रत्यासत्तिनिबन्धना ॥ ४६ ॥

[625] १ तर्ज्जन्या यथाङगुष्ठाद् भेदस्तथा परिशिष्टानामेव । वस्तुत्वे ।

[626] २ किन्तु क्षणिकता स्यात् ।

[627] ३ वस्तुत्वे च सामान्यस्यानित्यतैव । अनित्यत्वेऽनेकत्वादसामान्यत्वं ।

[628] ४ लोकेनासम्मतत्वादसन्मुख्यः प्रधानं कुतः । देवदत्तादिः सन्नमुख्यः

[629] १ सामान्यबुद्धयः ।

[630] २ ? संकेतापेक्षा न स्यात्

या[631] पि 'संकेतेन विना वस्तुद्वयेक्षणे' शावलेयं दृष्ट्वा बाहुलेयं पश्यतः अभेदानुगमात् स एवायमित्यभेदमध्यवस्यन्ती बुद्धिरुत्पद्यते शावलेयकर्कदर्शने तु नोत्पद्यते । 'साऽर्था[632] नां' शावलेयादीनामसत्यपि सामान्ये या 'प्रत्यासत्तिरे-' कबुद्ध्यादिकार्यत्वं त'न्निबन्धना' । (४६)
सामान्यं विनैककार्यतैव न स्यादित्याह (।)

...v.2.47 प्रत्यासत्तिर्विना जात्या यथेष्टा चक्षुरादिषु ।
ज्ञानकार्येषु जातिर्वा ययान्वेति विभागतः ॥ ४७ ॥

'प्रत्यासत्तिर्विना जान्या । चक्षुरादिर्ये'षां विषयालोकमनस्काराणां तेषु[24b/MA] ज्ञानकार्येषु ज्ञानहेतुषु जात्यादि विना रूपज्ञानैककार्यजनकत्वं प्रत्यासत्ति'र्यथेष्टा' । यथा वा शावलेयाद्वाहुलेयादीनां कर्कादीनाञ्च तुल्ये भेदे 'यथा' प्रत्यासत्या जात्यन्तरं विनैव 'विभागतो जातिरन्वेति' । शावलेयबाहुलेयादिष्वेव गोत्वं समवेतं न कर्कादिषु । सैवानुगामिप्रत्ययनिबन्धनमास्तामलं जात्या । (४७)

## >ग. न चक्षुरादिभिः प्रत्येयं सामान्यम्

इतश्च न वस्तु सामान्यं (।)

....2.48a कथञ्चिदपि विज्ञाने तद्रूपानवभासतः ।

दृश्यत्वेनाभिमतस्य 'तद्रूपस्य' स्वग्राहिणि 'विज्ञाने कथञ्चिदप्यनवभासतः' ।
[130/s]

ननु सन्त्यपीन्द्रियाणि नोपलभ्यन्ते । ततोऽत्रानुपलम्भादसत्वं न । न हीन्द्रियाणि स्वग्राहिणि ज्ञाने प्रत्यवभासमानत्वात् सन्तीष्यन्ते (।) किन्तर्हि (।) सत्स्वपि विषयमनस्कारादिषु कदाचित्प्रवर्तते ज्ञानं कदाचिन्नेति व्यभिचारबलादतीन्द्रियाणि कानिचिदिन्द्रियव्यपदेश्यानि व्यवस्थाप्यन्ते ।

....2.48b यदि नामेन्द्रियाणां स्याद् द्रष्टा भासेत तद्वपुः ॥ ४८ ॥

....2.49a रूपवत्वात्;

यदि त्वतीन्द्रियाणामतीन्द्रियदर्शी द्रष्टा नाम स्यात् । 'भासेत' रूपवत्वात्तेषामिन्द्रियाणां 'वपुः' । (४८)

....2.49b न जातीनां केवलानामदर्शनात् ।
व्यक्तिग्रहे च तच्छब्दरूपादन्यन्न दृश्यते ॥ ४९ ॥

'जाती'नान्तु दुश्याभिमतानां 'केवलानां' व्यक्तिस्वरूपव्यतिरिक्तानाम'दर्शनादभाव' एव । 'व्यक्तिग्रहे' तस्या व्यक्तेः । 'शब्दस्य' गौरित्यस्य 'रूपादन्यत्' सामान्यं 'न दृश्यते' । (४९)

...v.2.50 ज्ञानमात्रार्थकरणेप्ययोग्यमत् एव तत् ।
तदयोग्यतयाऽरूपं तद्ध्यवस्तुषु लक्षणम् ॥ ५० ॥

[631] ३ प्रत्यक्षं सामान्यमिति वादिनं शङ्कते ।
[632] ४ सिद्धान्तयति

'अत एवा'दृश्यमानत्वात् 'ज्ञानमात्र'स्यार्थस्यार्थक्रियायाः 'करणेप्ययोग्यमेव तत्' । अन्त्या हीयं भावानामर्थक्रिया यदुत स्वज्ञानजननं । तत्राप्य'योग्यतया' तत्सामान्यम'रूपं' निःस्वभावं । हिर्यस्मात् सर्व्वार्थक्रियायामशक्तत्व'मवस्तुषु लक्षणं' सर्वसामर्थ्यरहितं ह्यवस्विष्यते । (५०) तथा च सामान्यमिति न वस्तु[633] ।

....2.51a यथोक्तविपरीतं यत् तत् स्वलक्षणमिष्यते ।

'यथो'क्तात्सामान्या'द्विपरीतं' यत्त'त्स्वलक्षण'मुच्यते । इदश्च वैपरीत्यं । अनभिधेयत्वं । तत्वान्यत्वाभ्यां वाच्यत्वं । असदर्थप्रत्ययाविशिष्टप्रतिभासविषयत्वं (।) असाधारणत्वं । संकेतस्मरणानपेक्षप्रतिपत्तिकत्वं । अन्यरूपविविक्तस्वरूपप्रतिभासवत्त्वं (।) अर्थक्रियाक्षमत्वश्च । एतद्युक्तं स्वलक्षणमिष्यते । एतद्विपर्ययस्यावस्तुत्वसाधनस्य सामान्यलक्षणत्वात् । यच्चातत्कार्यव्यवच्छेदलक्षणमुक्तं (।)
[131/s]

....2.51b सामान्यं त्रिविधं, तच्च भावाभावोभयाश्रयात् ॥ ५१ ॥

'सामान्यं तच्च त्रिविधं' बोद्धव्यं 'भावाभावोभयाश्रयात्' । किञ्चिद् भावोपादानं सामान्यं यथा रूपादीन् भावानाश्रित्य कृ[634] तकत्वादिशब्दवाच्यं लिङ्गं । अभावोपादानं यथोपलब्धिलक्षणप्राप्तस्यासतोऽनुपलब्धिरनुत्पत्तिमत्त्वादि च । तद्ध्यभावाश्रयं सामान्यं लिङ्गं । उभयाश्रयमनुपलब्धिमात्रं[635] ज्ञेयत्वादि च भावाभावसाधरणत्वात् । (५१)

...v.2.52 यदि भावाश्रयं ज्ञानं भावे भावानुबन्धतः ॥
नोक्तोत्तरत्वाद् दृष्टत्वाद्; अतीतादिषु चान्यथा ॥ ५२ ॥

'यदि' किञ्चित्सामान्यं 'भावाश्रयं' तत् 'ज्ञानं तद्भावे' भावविषयं प्राप्नोति । भावानुबन्धतो भावान्वयव्यतिरेकानुविधानात् । नैतद्युक्तं न तद्वस्तु । अभि[636] धेयत्वादिनोक्तोत्तरत्वात् । निषिद्धं हि सामान्यस्य वस्तुत्वमनन्तरमेव प्रपञ्चेनेत्यनुमानबाधितत्वं प्रतिज्ञा[637] याः । दृष्टत्वात् । 'अतीतादिषु चान्यथा' वस्तुव्यतिरेकेणैवासीद् घटो भविष्यति चेति सामान्यबुद्धिरुत्पद्यते इत्यसिद्धतापि भावानुबन्धत इति हेतोः । (५२)

....2.53a भावधर्मत्वहानिश्चेद् भावग्रहणपूर्वकम् ।
तज्ज्ञानमित्यदोषोयं;

वस्तु विना सामान्यबुद्ध्युत्पादे 'भावधर्मत्वहानिः' सामान्यस्य प्रसज्यते चेत् । 'भाव'स्य रूपादे'र्ग्रहणपूर्व्वकं'[638] तस्य सामान्यस्य साधारणबाह्यरूपतयाऽध्यवसितबुद्ध्याकारलक्षणस्याध्यवसायेन 'ज्ञानमित्य'यमवस्तु[639] धर्मत्वलक्षणोऽदोषो 'दोषो' न भवति । न हि सामान्यं[640]

[633] १ रूपाहितवासनामाश्रित्योत्पत्तेः ।
[634] १ पंक्तिसेनादिवत् ।
[635] २ किं पिशाचादयोऽत्यन्तमसन्तोऽथ सन्तोपि नेक्ष्यन्त इत्युभयोपादानत्वं प्रत्येतुं ज्ञानधर्ममुक्त्वा-विषयधर्ममाह ज्ञेयत्वादि ।
[636] ३ यद्यपि भावानुविधानं पारम्पर्येण तथापि न साक्षाद्वस्तुविषयत्वं सिध्यति ।
[637] ४ भावविषयत्वमिति परप्रतिज्ञाऽभिधेयत्वादिनानुमानेन बाध्यते । परंपरया भावानुविधानेपि न साक्षाद्वस्तुविषयता सिद्ध्यति ।
[638] ५ रूपाहितवासनामाश्रित्योत्पत्तेः ।
[639] ६ वस्तुधर्मत्वहान्या ।
[640] ७ ? भावस्य सत्वे भवत् । भावाश्रयत्वात् ।

रूपादिरिव भावरूपतया ज्ञानविषय इति भावधर्म इष्टं[641] ।
[132/s]

....2.53b मेयं त्वेकं स्वलक्षणाम् ॥ ५३ ॥

किन्तु भाववासनाप्रबोधप्रसूतविकल्पकल्पितत्वात्[642] । परमार्थतो 'मेयं त्वेकं स्वलक्षणं' । तस्यैव रूपबुद्ध्युत्पादकत्वात् । (५३)

....2.54a तस्मादर्थक्रियासिद्धेः सदसत्ताविचारणात् ॥
[25a/MA]

'सामान्यस्य' तु कल्पितत्वात् । सामर्थ्याभावात्स्वलक्षणमेकं प्रमेयं 'तस्मादर्थक्रियासिद्धेः' । अर्थक्रियार्थिभिः 'सदसत्ताभ्यां' तस्यैव 'विचारणात्' । असत्त्वमपि स्वलक्षण[643] स्यैव विचिन्त्यते ।

यद्येकमेव प्रमेयं तदा[644] चार्येण प्रमेयद्वैविध्यं यदुक्तं न स्वसामान्यलक्षणाभ्यामन्यत्प्रमेयमस्तीति तद् विरुध्यते इत्याह ।

....2.54b तस्य स्वपररूपाभ्यां गतेर्मेयद्वयं मतम् ॥ ५४ ॥

'तस्य' स्वलक्षणस्य प्रत्यक्षतः 'स्व'रूपेणानुमानतः 'पररूपेण' सामान्याकारेण 'गतेर्मेयद्वयं मतं' न तु भूतसामान्यस्य सत्त्वात् (५४) ।

## 2.4 ४. अनुमानचिन्ता

### (१) अनुमानसिद्धिः

#### क. भ्रान्तमनुमानं प्रमाणाम्

....2.55a अयथाभिनिवेशेन द्वितीया भ्रान्तिरिष्यते ।

या च 'द्वितीया' पररूपेण गति'रयथाभिनिवेशेन भ्रान्तिरिष्यते' साऽनुमानं यथाऽर्थोस्ति यथा वा स्वाकारस्तथा नाभिनिविशते किन्तु स्वाकारं बाह्यं साधारणतया मन्यते ।

....2.55b गतिश्चेत् पररूपेण न च भ्रान्तेः प्रमाणता ॥ ५५ ॥

नन्वनुमानं 'पररूपेण गतिश्चेत्' तदा भ्रान्तिरेव । 'न च भ्रान्तेः प्रमाणते'ष्यते मृगतृष्णादेरिव । (५५)
[133/s]

अत्रोच्यते ।

....2.56a अभिप्रायाविसंवादादपि भ्रान्तेः प्रमाणता ॥[645]

641 ८ ? रूपादिरिव ।

642 १ यत एवं नान्यदर्थक्रियाक्षमं ।

643 २ व्याप्तिः पक्षधर्मता चेत्यत्र नेदं वाच्यं । अन्वयव्यतिरेकपक्षधर्मताकालेपि न वाच्यं । अन्वयव्यतिरेकमात्रे तु वाच्यं । अस्ति न वेति कृत्वा । दृष्टत्वात

644 ३ दिग्नागेन ।

645 *द्रष्टव्यं परिशिष्टं १।११

....2.56b गतिरप्यन्यथा दृष्टा;

'भ्रान्तेरपि प्रमाणता । अभिप्रायस्या'र्थक्रियार्थिभिः ज्ञानगोचरतयाऽभिप्रायविष[646] यीकृतस्यार्थक्रियासमर्थस्यार्थस्य 'संवादात्' । अर्थक्रियार्थिनो हि तत्साधनसमर्थार्थप्रापकं प्रमाणमिच्छन्ति । 'अन्यथा' पररूपेण 'गतिरपि' काचिदभिप्रेतार्थसम्वादिका 'दृष्टे'ति प्रमाणमेव ।

नन्वनुमानं वस्त्वेव गृह्णत् प्रमाणमस्तु किं भ्रान्तिरिष्यते इत्याह ।

....2.56c पक्षश्चायं कृतोत्तरः ॥ ५६ ॥

'पक्षश्चायं' प्रागेव न तद्वस्तु अभिधेयत्वादित्यादिना (२।११) 'कृतोत्तरः' । (५६)

ननु भ्रान्तमपि यद्यनुमानं प्रमाणं तदा सर्व्वैव भ्रान्तिः प्रमाणं स्यादित्याह ।

...v.2.57 [647]मणिप्रदीपप्रभयोर्मणिबुद्ध्याभिधावतोः ।
मिथ्याज्ञानाविशेषेपि विशेषोर्थक्रियां प्राति ॥ ५७ ॥

'मणिप्रदीपयो'र्ये 'प्रभे' तयो'र्मणिबुद्ध्या' मणिरेवायमित्यध्यवसायेन तद्ग्रहणार्थं 'धावतो मिथ्याज्ञानस्य' भ्रान्तत्वस्या'विशेषेपि विशेषोऽर्थक्रियाम्प्रति' । मणिप्रभायांमप्यध्यवसायी मणिसाध्यामर्थक्रियां प्राप्नोति । (५७)

...v.2.58 यथा तथाऽयथार्थत्वेप्यनुमानतदाभयोः ।
अर्थक्रियानुरोधेन प्रमाणत्वं व्यवस्थितम् ॥ ५८ ॥

दीपप्रभायान्तु मणिव्यवसायी तन्न प्राप्नोतीति 'यथा तथा' त्रिरूपलिङ्गज'मनुमानं । तदा'भञ्च तन्न न तथा । तयोः स्वाकारे बाह्यध्यवसायप्रवृत्तत्वात् अयथार्थत्वेपि 'प्रमाण'त्वं 'व्यवस्थितं' । विशेषेणावस्थित'मर्थक्रियानुरोधेना'नुमानमेव प्रमाणं । परम्परयाऽर्थादुत्पत्तेः तत्प्रापकत्वात् । नेतरद्विपर्ययात् । तस्मात्प्रमेयद्वित्वं गतिभेदात् । (५८)

तयोर्लक्षणं ग्रहणञ्चाख्यातुमाह ।

...v.2.59 बुद्धिर्यत्रार्थसामर्थ्यादन्वयव्यतिरेकिणी ।
तस्य स्वतत्रं ग्रहणमतोऽन्यद् वस्त्वतीन्द्रियम् ॥ ५९ ॥

[134/s]

अर्थसामर्थ्याज्जायमाना बुद्धिर्यत्रान्वयव्यतिरेकिणी तत्स्वलक्षणन्तस्य ग्रहणमपराश्रयं स्वरूपग्रहणं स्वजन्ययाऽर्थस्वरूपया बुद्ध्या साक्षात्तस्य ग्रहणात् । अतः स्वलक्षणत्वादन्यद्वस्तु यदन्वयव्यतिरेकौ नानुकरोति बुद्धिः साक्षादप्रतिभासमानं केवलमध्यवसायविषयः तत्सामान्यलक्षण'मतीन्द्रियं' बुद्धिष्वप्रतिभासनात् (५९) ।

कथन्तत्प्रत्येतव्यमित्याह (।)

...v.2.60 तस्यादृष्टात्मरूपस्य गतेरन्योर्थ आश्रयः ।
तदाश्रयेण सम्बन्धी यदि स्याद् गमकस्तदा ॥ ६० ॥

'तस्य' सामान्यस्य स्वलक्षणविशेषेण स्वलक्षणविवेकेना'दृष्टात्मरूपस्य[648]' गतेः प्रतीतेः तस्माद'न्योऽर्थो' लिङ्गभूत 'आश्रयः' सिद्धिनिमित्तं 'यदि' ततः प्रत्येतव्येनानाग्निव्यवच्छेदा-

[646] १ प्रवृत्तिविषयस्य ।

[647] *द्रष्टव्यं परिशिष्टं १।११

[648] १ साक्षान्न गतिः । तत्सत्तामात्रस्य । ? तस्यैव क्षणज्ञानस्य ।

दिना 'तदाश्रयेण' च धर्मिणा 'सम्बन्धी' सम्बन्धवान् 'स्यात्तदा गमको' नान्यथा । अनने साध्यप्रतिबन्धोऽन्वयव्यतिरेकरूपः पक्षधर्मता च लिङ्गस्योक्ता (६०) ।

नन्वन्याश्रयेण च स्वरूपप्रतीतिर्भविष्यति तथापि परोक्षता कथमित्याह (।)

...v.2.61 गमकानुगसामान्यरूपेणैव तदा गतिः ।
तस्मात् सर्वः परोक्षोर्थो विशेषेण न गम्यते ॥ ६१ ॥

'तदाऽर्था'न्तरात्प्रतीतिकाले 'गमकं' पक्षसपक्षानुयायि लिङ्गं ।[649] तदनुयायिना तद्व्यापकेन 'सामान्यरूपेणैव' परोक्षोर्थो गम्यते । न तु सर्व्वतो व्यावृत्तेन विशिष्टेन रूपेण । 'तस्मात्सर्वः परोक्षोऽर्थः' प्रतीयमानो 'न विशेषेण' कथञ्चिद् 'गम्यते' येन परोक्षताहानिः स्यात् । (६१)

...v.2.62 या च सम्बन्धिनो धर्माद् भूतिर्धर्मिणि ज्ञायते ।
सानुमानं परोक्षाणामेकान्तेनैव साधनम् ॥ ६२ ॥

'या च सम्बन्धिनो धर्माद'न्वयव्यतिरेकतो लिङ्गात् तदाश्रये 'धर्मिणि ज्ञायते' परोक्षार्थप्रतीतिः । 'सानुमानं' त्रिरूपलिङ्गप्रभवत्त्वात् । तदेवानुमानं 'परोक्षाणामेकान्तेनैव साधनं' । प्रत्यक्षस्य तत्रावृत्तेः । (६२)

...v.2.63 न प्रत्यक्षपरोक्षाभ्यां मेयस्यान्यस्य सम्भवः ।
तस्मात् प्रमेयद्वित्वेन प्रमाणद्वित्वमिष्यते ॥ ६३ ॥

'न' च 'प्रत्यक्षपरोक्षाभ्यामन्यस्य प्रमेयस्य सम्भव' इति दर्शितं प्राक् । 'तस्मात्प्रमेयस्य द्वित्वेन प्रमाणद्वित्वमिष्यते' । प्रमेयमधिगच्छत् प्रमाणमुच्यते । (६३)
[135/s]

## ख. द्वितीयं प्रमाणमनुमानम्

....2.64a त्र्येकसंख्यानिरासो वा प्रमेयद्वयदर्शनात् ॥

तच्च द्विधमिति तद्ग्राहकं द्वयमपि प्रमाणमेव ॥ 'प्रमेयद्वयस्य दर्शनात्' । 'त्र्येकसंख्यानिरासो वा' बोद्धव्यः (।) तृतीयादिकं न प्रमाणं तृतीयादिप्रमेयाभावात् । नाप्येकं द्वितीयस्य प्रमेयस्य तेनानधिगतेः । न हि प्रत्यक्षं स्वलक्षणसामर्थ्यात् तदा-[25b/MA] कारग्राहि जातं सामान्यं प्रत्येति कल्पनागम्यत्वात्तस्य ॥

....2.64b एकमेवाप्रमेयत्वादसतश्चेन्मतं च नः ॥ ६४ ॥

ननु प्रत्यक्ष'मेकमेव' प्रमाणमसतो'ऽप्रमेयत्वात्' । असच्च सामान्यमत्राह (।) 'असतोऽप्रमेयत्वं म[650] तच्च नः' । (६४)

....2.65a अनेकान्तोऽप्रमेयत्वेऽसद्भावस्य विनिश्चयः ।
तन्निश्चयप्रमाणां वा द्वितीयं;

किमनिष्टमापद्यते । स्वलक्षणमेव तु पररूपेण गतेः सामान्यलक्षणमिष्टं । तच्च सदेवेति कथमप्रमेयं ततस्तत्साधनमपि प्रमाणमेव ॥ तथाऽसतोऽ'प्रमेयत्वे' साध्येऽसत्त्वादिति हेतुर'नेकान्तोपि' । तथा हि परलोकादेरसत्तया चा र्वा के णापीष्यत एव केनापि प्रमाणेन

649 २ हेतुसत्तयैव साध्यसत्त्वात् ।

650 १ चार्वाकं 'प्रति सिद्धसाधनमाह ? तत्सत्तामात्रस्य' ।

निश्चयः । अथवा प्रमेयत्वाभावस्याप्यसत्त्वहेतुनैव निश्चय इति व्यक्तमनैकान्तिकत्वं । अतश्च यत एव प्रमाणात्तस्या'भावस्य निश्चय'स्तदेवद्वितीयम्प्रमाणमनुमानं नाध्यक्षं ।

कस्मादेवमित्याह (।)

....2.65b नाक्षजा मतिः ॥ ३५ ॥

...v.2.66 अभावेऽर्थबलाज्जातेरर्थशक्त्यनपेक्षणो ।
व्यवधानादिभावेपि जायेतेन्द्रियजा मतिः ॥ ६६ ॥

'ना[651] क्षजा मति'रभावे विषये प्रवर्ततेऽर्थस्य ग्राह्यस्य बलाज्जातेः । यद्बलेन प्रत्यक्षं प्रवर्तते तदेव[652] प्रतिपद्यते न चाभावस्य सामर्थ्यं नाम । यदि पुनरर्थसामर्थ्यानपेक्षणमस्य तदा ग्राह्यस्यार्थस्य शक्त्यनपेक्षणे तद्व्यवधानादिभावेपीन्द्रियजा मतिर्जायेत । न चैतदस्ति । ततोऽर्थसामर्थ्यापेक्षि नाभावविषयं भवितुमर्हति । (६५,६६)

स्यादेतत् (।)
[136/s]

...v.2.67 अभावे विनिवृत्तिश्चेत् प्रत्यक्षस्यैव निश्चयः ।
विरुद्धं सैव वा लिङ्गमन्वयव्यतिरेकिणी ॥ ६७ ॥

'प्रत्यक्षस्यैव' प्रवृत्तिर्भावे सत्त्वनिश्चयो 'विनिवृत्तिश्चाभावे' नि[653] श्चयो न तु प्रमाणान्तरवृत्तिरिति चेत् ।[654] विरुद्धमिदं यः प्रत्यक्षाभावान्निश्चयः स प्रत्यक्षादिति । न हि प्रत्यक्षतन्निवृत्त्योरैका[655]त्म्यं तथा ह्यभावो भाव एव स्यात् । भावोपि चाभावः । न च प्रत्यक्षतन्निवृत्तावप्यवश्यमभावः । व्यवधानादिष्वर्थसत्त्वेपि तस्याभावात् । अथार्थान्वयव्यतिरेकानुविधायिनी प्रत्यक्षनिवृत्तिरेकज्ञानसंसर्गिपदार्थान्तरोपलब्धिरूपाऽभावनिश्चयहेतुस्तदा 'सैव' प्रत्यक्षनिवृत्तिरनुपलब्ध्याख्या'न्वयव्यतिरेकिणी लिङ्गमिति' तज्जा प्रतीतिरनुमानमेवेति कथं नाप्रत्यक्षं प्रमाणं । (६७)

## (ग. प्रमाणद्वयसिद्धिः)

किञ्च (।)

....2.68a सिद्धं च परचैतन्यप्रतिपत्तेः प्रमाद्वयम् ।

'परचैतन्यप्रतिपत्तेः प्रमाणद्वयं सिद्धं' । न हि प्रत्यक्षादर्वाग्दर्शनः परचैतन्यमवैति । किन्तु स्वसन्ताने बुद्धिपूर्वकत्वेनोपलब्धचेष्टादिदर्शनात्तदनुमानं परचित्तनिश्चयः किमस्तीत्याह (।)

....2.68b व्यवहारादौ प्रवृत्तेश्च सिद्धस्तद्भावनिश्चयः ॥ ६८ ॥

परस्परप्रेषणाध्येषणव्यवहारादौ 'प्रवृत्तेश्च सिद्धश्च' तस्याः परचैतन्यप्रतिपत्ते'र्भावनिश्चयः' । (६८)

## (घ. अविसंवादादनुमानं प्रमाणम्)

651 २ परलोकादेः प्रत्यक्षादेवाभावनिश्चयोऽस्तीत्याह ।

652 ३ प्रत्यक्षं निश्चिनोति ।

653 १ प्रत्यक्षनिवृत्त्याभावस्य निश्चयश्च स्यात् ।

654 २ स्ववचनविरुद्धं ।

655 ३ ऐकात्म्यभाव एव स्यात् । ? अवैति । स्वपुत्रादौ ।

नन्वनुमानाभिमता प्रतीतिर्नास्त्येवेति न ब्रूमः । किन्तु प्रामाण्ये तस्याः विप्रतिपद्यामह इत्याह (।)

...v.2.69 प्रमाणमविसंवादात् तत् क्वचिद् व्यभिचारतः ।
नाश्वास इति चेल्लिङ्ग-दुर्दृष्टिरतदीदृशम् ॥ ६९ ॥

'प्रमाणन्त'दनुमानम'विसम्वादात्'। प्रत्यक्षमपि हि सम्वादकत्वात् प्रमाणं तच्चानुमानस्यापि समानं। 'क्वचि'च्छ्यामतादिसाधनार्थमुपात्ते तत्पुत्रादौ लिङ्गे [137/s] 'व्यभिचारतः' सम्वादेऽ'नाश्वास' इति चेत्। लिङ्गस्य 'दुर्वृष्टि'र्भ्रान्तिरलिङ्ग एव लिङ्गबुद्धिस्तस्या एतल्लि'ङ्गमीदृशं' व्यभिचारि भवतः प्रतिभाति। न खलु त्रिविधं लिङ्गं साध्यव्यभिचारि। यच्च व्यभिचारि तन्निविधमेव न भवति। (६९)

एतदेवाह (।)

...v.2.70 यतः कदाचित्सिद्धाऽस्य प्रतीतिर्वस्तुनः क्वचित् ।
तदवश्यं ततो जातं तत्स्वभावोपि वा भवेत् ॥ ७० ॥

'यतो वस्तुनो' धूमशिंशपादेः लिङ्गा'दस्य' साध्यस्य वह्निवृक्षादेः 'क्वचिद्धर्मिणि कदाचिद'नुमानकाले 'प्रतीतिः सिद्धा तद्' धूमादिकं 'ततो' वह्न्यादेर'वश्यं जातं'। तच्छिंशपादिकं तस्य वृक्षस्य 'स्वभावोपि वाऽवश्यम्भवेत्'। (७०)

न च कार्यस्वभावयोः कारणव्यापकव्यभिचारो यस्मात् (।)

...v.2.71 स्वनिमित्तात् स्वभावाद् वा विना नार्थस्य सम्भवः ॥
यच्च रूपं तयोर्दृष्टं तेदवान्यत्र लक्षणम् ॥ ७१ ॥

'स्वस्य निमित्ता'त्कारणाद्विना, 'स्वभावाद्' व्यापकाद्वा 'विनाऽर्थस्य' कार्यस्य[26a/MA] व्याप्यस्य च न 'सम्भवः'। तदुत्पाद्यत्वात्तद्रूपत्वाच्च। ततस्तदाश्रयेणोत्पन्नाऽनुमानप्रतीतिरव्यभिचारिण्येव 'यच्च तयोर्धू'मशिंशपयो 'रूपं' साध्यकार्यस्वभाव[656]त्वस्याव्यभिचारनिमित्तं 'दृष्टं तदेवान्य'त्रापि हेतौ 'लक्षणं' बोद्धव्यं। न च तत्पुत्रत्वं श्यामत्वस्य कार्यं स्वभावो वा। ततो यद् व्यभिचारि तदलिङ्गमेव। (७१)

### (ङ. अनुपलब्धेः प्रतिबन्धः)

अनुपलब्धेरव्यभिचारं दर्शयितुमाह (।)

...v.2.72 स्वभावे स्वनिमित्ते वा दृश्ये दर्शनहेतुषु ।
अन्येषु सत्स्वदृश्ये च सत्ता वा तद्वतः कथम् ॥ ७२ ॥

प्रतिषेधस्य 'स्वभावे' स्वस्य निषेध्यात्मनो 'निमित्ते' का[657] रणे। 'दृश्ये' दर्शनयोग्ये 'दर्शन'स्य हेतुष्विन्द्रियमनस्कारादिष्वन्येषु सत्सु विद्यमानेषुदृश्येऽनुपलभ्यमाने च 'तद्वतो' दृश्यानुपलम्भवतो भावस्य 'सत्ता वा कथं[658]' युज्यते। न हि 'सत्स्वन्येषू'पलम्भप्रत्ययेषु दृश्यस्य सतः कदाचिदनुपलम्भसम्भवः। [138/s] तस्माद् दृश्यानुपलब्धिरर्थाभाव एव भवतीति तत्प्रभवाऽभावप्रतीतिरविसम्वादिनी। तस्मात्साध्यप्रतिबद्धलिङ्ग-प्रसूतत्वात् त्रिविधलिङ्गजेप्यनुमाने नास्त्यनाश्वासः। (७२)

[656] १ साध्येन सह कार्यस्य स्वभावस्य चाव्यभिचारनिमित्तं ।
[657] २ सत्स्वप्यन्येषु ज्ञानानुत्पादात्
[658] ३ सर्वथा नैवेत्यर्थः ।

(नः अनुमानं त्रिविधम्)

(छः तत्र वार्वाकमतनिरासः)

....2.73a अप्रामाण्ये च सामान्यबुद्धेस्तल्लोप आगतः ।
प्रेत्यभाववद्;

एवमपि 'त्वप्रामाण्ये' सामान्यबुद्धेरिष्यमाणे तस्य परोक्षस्यार्थस्यानुमानव्यवस्थाप्यमानस्य 'लोपो'ऽभाव 'आगतः' । 'प्रेत्यभाववत्' परलोकस्येव । यदि हि प्रत्यक्षमेकं प्रमाणं तदा यत्र तन्न प्रवर्तते तस्याप्य[659] भाव एव स्यात् । न चैतदस्ति । न हि चार्वाको देशान्तरस्थं स्वपितरमनुपलभमानस्तभावं व्यवस्थापयितुमर्हति ।

स्यादेतत् (।)

....2.73b अक्षैस्तत् पर्यायेण प्रतीयते ॥ ७३ ॥

नोपलभ्यमानमेवास्ति किन्तु 'पर्य्यायेण' परिपाट्याऽक्षैर्यत् 'प्रतीयते' तदप्यस्ति चेत् । पित्रादयश्चोपलब्धा उपलप्स्यन्ते चेति सन्त्येव । (७३)

...v.2.74 तच्च नेन्द्रियशक्त्यादावक्षबुद्धेरसम्भवात् ।
अभावप्रतिपत्तौ स्याद् बुद्धेर्जन्मानिमित्तकम् ॥ ७४ ॥

'तच्च न युक्तं' इन्द्रियाख्यायां 'शक्ता'वादिग्रहणादाहारादेः क्षुदुपघातादिसामर्थ्ये च पर्य्यायेणापीन्द्रिय'बुद्धेरसम्भवादभावप्रतीतौ' सत्यां प्रत्यक्षाया 'बुद्धेर्जन्मानिमित्तकं स्यात्' । न हि दृष्टमात्रेभ्यो विषयालोकमनस्कारचक्षुर्गोलकेभ्योऽध्यक्षजन्म सत्स्वपि तेष्वभावात् व्यतिरे[660]कादतिरिक्तं किञ्चिददृश्यं कारणमिष्यते यस्येन्द्रियमिति व्यपदेशः । तस्य पर्य्यायेणापि नाध्यक्षं ग्राहकमस्तीत्यभावः स्यात् । ततश्चाकारण[661] कं प्रत्यक्षजन्म प्राप्तं । अहेतोश्च नित्यं सत्वमसत्त्वम्वा स्यादि (१।८२)त्युक्तं ॥ (७४)

(जः प्रत्यक्षान्न सामान्यप्रतीतिः)

स्यादेतत् (।) प्रत्यक्षादेव सामान्यप्रतीतिर्भविष्यति किमनुमानेनेत्याह (।)
[139/s]

...v.2.75 स्वलक्षणे च प्रत्यक्षमविकल्पतया विना ।
विकल्पेन न सामान्यग्रहस्तस्मिस्ततोऽनुमा ॥ ७५ ॥

'स्वलक्षणे च प्रत्यक्षमविकल्पतया प्रवर्तते सामान्यस्य तु ग्रहो विकल्पेन विना न' भवति । 'ततः' कारणा'त्तस्मिन्' सामान्येऽनुमैव विकल्पिका । नाध्यक्षमविकल्पकं ॥ (७५)

ननु (।)

...v.2.76 प्रमेयनियमे वर्णानित्यता न प्रतीयते ।
प्रमाणमन्यत् तद्-बुद्धिर्विना लिङ्गेन संभवात् ॥ ७६ ॥

---

[659] १ एवञ्च कारकं तत् ज्ञापकञ्चेष्यते ।

[660] २ अनित्यः शब्द इत्येकां बुद्धिं मन्यते ।

[661] ३ असकलकारणं ।

प्रत्यक्षं स्वलक्षणविषयमनुमानं सामान्यविषयमिति प्रमेयस्य 'नियमे' स्वीक्रियमाणे 'व-र्ण'स्य नीलादे[662] र्विषयस्या'नित्यता'ऽनित्यतासामान्यात्मता 'न प्रतीयत' इति प्राप्तं । न हि सामान्यविशेषात्मकं प्रमेयं विशेषमात्रविषयेणाध्यक्षेण सामान्यमात्रविषयेणानुमानेन वा प्रत्येतुं शक्यं ।[663] प्रतीयते चात'स्तद्बुद्धिर्प्रमाणमन्यत्' स्यात् । न प्रत्यक्षं सामान्यस्य ग्रहणात् । नाप्यनुमानं 'विना लिङ्गेन सम्भवात्' । विशेषस्यापि ग्रहणाच्च । (७६)
तथा (।)

...v.2.77 विशेषदृष्टे लिङ्गस्य सम्बन्धस्याप्रसिद्धितः ।
तत्प्रमाणान्तरं मेयबहुत्वाद् बहुतापि वा ॥ ७७ ॥

'वि[664] शेषदृष्टे' प्रत्यक्षेणाग्निं दृष्ट्वा क्रमात्तमेव धूमाल्लिङ्गात् स एवायं व[665] ह्निरिति निश्चिनोत्यनुमानेन । 'लिङ्गस्य सम्बन्धासिद्धितः तत्प्रमाणान्तरं'[26b/MA] स्यात् । न हि तत्प्रत्यक्षं लिङ्गं-बलादुत्पत्तेः । नाप्यनुमानं दहनधूम[666]विशेषयोः सम्बन्धाग्रहणात् । तस्मात् 'मेया'नां प्रत्यक्षं लक्षणं सामान्यं सामान्यविशेषाणां 'बहुत्वात् बहुतापि वा' (७७)

...v.2.78 प्रमाणानामनेकस्य वृत्तेरेकत्र वा यथा ।
विशेषदृष्टेरेकत्रिसंख्यापोहो न वा भवेत् ॥ ७८ ॥

'प्रमाणानां स्यात् । अनेकस्य' वा प्रमाणस्यैकत्र विषये वृत्तेः प्रमाणबहुता स्यात् । [140/s] यथैकमेव स्वलक्षणं प्रत्यक्षेण विशेषदृष्टेन चानुमानेन प्रतीयते । प्रमेयस्य द्वित्वग्रहणयोर्नियमे प्रमाद्वित्वं स्यात् नान्यथा । त्र्येकसंख्याया अपोहो य उक्तः प्रमेयद्वित्वात् स 'न वा भवेत्' ॥ (७८)

....2.79a विषयानियमादन्यप्रमेयस्य च सम्भवात् ।

'विषयस्य' ग्रहणा'नियमात्' यदा ह्येकेनापि प्रमाणेनानेकं गृह्यते तदा प्रमेयद्वित्वेप्येकमेव प्रमाणं स्यात् । प्रमेयद्वया'दन्यस्य च' सामान्यविशेषस्य 'मेयस्य सम्भवात्' । त्र्यादिकम्वा तद्ग्राहकं मानं भवेत् ।[667]
अत्रोच्यते (।)

....2.79b योजनाद् वर्णसामान्ये नायं दोषः प्रसज्यते ॥ ७९ ॥

विक[668] ल्पकेन ज्ञानेनानित्यताया 'वर्णसा[669] मान्ये योजनादयं' सामान्यविशेषात्मकप्रमेयग्राहकप्रमाणान्तराभ्युपगमलक्षणो 'दोषो न प्रसंज्यते' । न हि विशेषोऽनित्यतया योज्यते । विकल्पानामतद्विषयत्वस्योक्तेर्व्वक्ष्यमाणत्वाच्च । (७९)

## (फ. अनित्यादयो नावस्तुधर्माः)

[662] १ अन्यक्षणे नाशं दृष्ट्वा । आदिना शब्दस्यान्त्यक्षणस्यानित्यता । तथा हि शब्दादि स्वलक्षणं । अनित्यतादि सामान्यं । अनयोः संकरेण ग्रहणात् प्रमेयान्तरमेतत् ।

[663] २ अनित्यः शब्द इत्येकां बुद्धिं मन्यते ।

[664] ३ असकृद्वेति [प्रमाण]समुच्चयं व्याचष्टे । विशेषदष्टे च यज्ज्ञानं तदपि प्रमान्तरमित्याह ।

[665] ४ न सकृद्वृत्तेन समाप्तिः किन्तु तत्र पुनर्मानवृत्तिः समयान्तरे ।

[666] ५ पर्व्वतवर्त्तिधूमेन वह्नेः सम्बन्धासिद्धेः ।

[667] १ अन्त्यमध्यक्षं प्रवाहविच्छेदे तद्विविक्तोपलम्भश्चेत्यध्यक्षद्वयजनितेन ।

[668] २ तदेवं प्रत्यक्षमनुमानश्च प्रमाणे लक्षणद्वयं प्रमेयमित्याख्याय तस्य सन्धानेन प्रमाणान्तरं न च पुनः पुनरभिज्ञानेऽनिष्टासक्तेः स्मृतादिवत्यस्य वृत्तिर्यत्तर्हीदमनित्यादिभिराकारैर्वर्ण्णादि गृह्यतेऽसकृद्वेति व्याख्याता ।

[669] ३ न तु विशेषे विशेषस्य विकल्पकेनाग्रहात् ।

ननु वर्णसामान्यस्यावस्तुत्वात्तद्योजिताऽनित्यतादयोऽवस्तु[670] धर्माः स्युरित्याह (।)

...v.2.80 नावस्तुरूपं तस्यैव तथा सिद्धे प्रसाधनात् ।
अन्यत्र नान्यसिद्धिश्चेन्न तस्यैव प्रसिद्धितः ॥ ८० ॥

'नावस्तुनो' रूपमनित्यत्वादि । 'तस्यैव' वस्तुनस्तथाऽनित्यत्वादिभिराकारैः 'सिद्धे' निश्चयस्य प्राक् 'प्रसाधनात्' । अध्यवसायानुरोधेन हि विकल्पानां विषयव्यवस्था (।) यद्यपि चैते स्वाकारग्राहिणस्तथापि बाह्यमेव विषयतया व्यवस्थाप्यन्ते अनाद्यभ्यासविशेषात् । अनुमानन्तु वस्तुप्रतिबद्धलिङ्गप्रभवत्वाद्यथावस्थितमेव वस्तु व्यवस्यतीति वस्त्वेव क्षणस्थितिधर्मकमस्मात्सिद्धं । ततो नावस्तुरूपमनित्यत्वादि ॥

[141/s]

स्यादेतद् (।) अ (न्य) त्रावस्तुनि सामान्येऽनित्यतादिसम्बन्धिनि सिध्यत्यन्यस्य वस्तुनोऽनित्यरूपस्य न सिद्धिरिति चेत् । नैतद्युक्तं 'त[671] स्यैव' वस्तुनः तस्यैवानित्यरूपस्याध्यवसायवशेनानुमानात् 'प्रसिद्धितः' । (८०)

## (ञ. लिङ्गधीसंवादकता)

कथं पुनर्द्वेस्त्वध्यवसायेऽपि तत्सम्वाद[672] कतेत्याह (।)

...v.2.81 यो हि भावो यथाभूतो स तादृग्लिङ्गचेतसः ।
हेतुस्तज्ञा तथाभूते तस्माद् वस्तुनि लिङ्गिधीः ॥ ८१ ॥

'यो हि' साध्यधर्मो 'यथाभूतः' का[673] रणव्यापकस्वभावः'स तादृशः' कारणकार्यतया व्यापकव्याप्यतया गृहीतव्याप्तिकस्य 'लिङ्गस्य चेतसः' परंपराहेतुः ।[674] 'तज्ञा तस्मा'ल्लिङ्गचेतसो जाता । 'तथाभूते वस्तुनि' कारणव्यापकरूपे साध्यधर्मे 'लिङ्गिधीः' । तस्मात्परंपरया साध्यप्रतिबन्धात् लिङ्गिधीः सत्येव वस्तुनि भवन्ती तत्सम्वादात्प्रमाणमेव । (८१)

ननु लिङ्गमपि लिङ्गिवत्सामान्यमेव । तथा धूमः कृतकं वेत्येव न लिङ्गं किन्तर्हि वह्निकार्यतयाऽनित्यत्वव्याप्यतया च गृहीतं । न च विशेषे व्याप्तिग्रहः । सामान्यञ्च नाध्यक्षगम्यं । विकल्पमात्रेण तत्प्रतीतावनाश्वासः । नैष दोषः । प्रत्यक्षेण कारणकार्ययोर्व्यावृत्तिद्वयविशिष्टयोर्गृ हीतयोर्व्विजातीयव्यावृत्त्याश्रयेणोत्पन्नविकल्पेन क्वचिदनुमानेन व्याप्तिं गृहीतवतः पश्चाद् धूमकृतकत्वादिदर्शनात्तादूप्ये कार्यव्याप्यबुद्धिर्लिङ्गबुद्धिः (।) सा च तत्प्रतिबन्धादनुमानमेवेति नास्त्यनाश्वास (:।) एतदेवाह (।)

...v.2.82 लिङ्गलिङ्गिधियोरेवं पारम्पर्येण वस्तुनि ।
प्रतिबन्धात् तदाभासशून्ययोरप्यवंचनम् ॥ ८२ ॥

670 ४ सामान्यधर्माः । ? न स्वलक्षणस्य
671 १ स्वयं विप्लुतोपि वस्तुप्रतिबद्धजन्मतया वस्तु साधयन् प्रमाणं ।
672 २ दर्प्पणप्रतिबिम्बे तिलकादिसिद्ध्या मुखे तिलकादिसिद्धिवत् ।
673 ३ वह्निधूमादिजनकः । अनित्याकारवान् शब्दः । तल्लिङ्गयतीति तादृग्लिङ्गम् ।
674 ४ इति कृत्वा

लिङ्गलिङ्गि‘धियोरेवमुक्त’क्रमात् ‘पारम्पर्येण वस्तुनि प्रतिबन्धात्त’योर्लिङ्ग[142/s] लिङ्गिनो‘राभासः’ साक्षात् स्वरूपप्रतिभासः । ‘तच्छून्य[675][676] योरपि’ लिङ्गलिङ्गिवस्तुनि [27a/MA] ‘अवञ्चनं’ सम्वादनं । (८२)

ननु लिङ्गबुद्धेरपि लिङ्गिबुद्धित्वात् पृथक् उपादानमनर्थकं (।) नानर्थकं । प्रत्यक्षमुद्भूतविकल्पो वा तद्बुद्धिरिति विप्रतिपत्तिनिरासार्थत्वात् ।[677] यदि प्रमाणे लिङ्गलिङ्गिधियौ तदा प्रत्यक्षवदभ्रान्ते स्यातामित्याह (।)

...v.2.83 तद्रूपाध्यवसायाच्च तयोस्तद्रूपशून्ययोः ।
तद्रूपावञ्चकत्वेपि कृता भ्रान्तिव्यवस्थितिः ॥ ८३ ॥

‘तयो’र्द्वयोः ‘तद्रूप’स्य लिङ्गलिङ्गि‘रूप’स्या‘ध्यवसायात्’ प्रवर्तने सति वस्तुनि परम्परया तत्प्रतिबद्धतया च ‘तद्रूप’स्या‘वञ्चकत्वे’ सम्वादकत्वे‘पि भ्रान्तिव्यवस्थितिः’ कृता । कस्मादित्याह ‘तद्रूपशून्ययोः’ । न हि लिङ्गलिङ्गिस्वरूपप्रतिभासिन्यौ धियाविमे स्वप्रतिभासेऽनर्थेऽर्थाध्यावसायेन प्रवृत्तत्वात् । (८३)

...v.2.84 तस्माद् वस्तुनि बोद्धव्ये व्यापकं व्याप्यचेतसः
निमित्तं तत्स्वभावो वा कारणं, तच्च तद्धियः ॥ ८४ ॥

‘तस्माद्वस्तुनि’ विधि[678] ना ‘बोद्धव्ये व्यापकं’ साध्यं । ‘व्याप्यचेतसो’ लिङ्गबुद्धे‘र्निमित्ते[679]’ परम्परया । यस्मा‘त्स्वभावो’ वा तद् व्यापकं । व्याप्यस्य यथानित्यत्वं कृतकत्वस्य । ‘कारण’म्वा दहनो ‘धूमस्य । तच्च’ व्याप्यचेतस‘स्तद्धियः’ स्वभावकारणधियो निमित्तमिति तयाध्यवसितस्य सम्वादनियमः सम्वादित्वमेवं प्र[680] त्यक्षस्यापि प्रामाण्यलक्षणं । (८४)

## (२) अनुपलब्धिचिन्ता[[* द्रष्टव्यं परिशिष्टं १।८]]

...v.2.85 प्रतिषेधस्तु सर्वत्र साध्यतेऽनुपलम्भतः ।
सिद्धिं प्रमाणैर्वदतामर्थादेव विपर्ययात् ॥ ८५ ॥

[143/s]

‘प्रतिषेध’स्तु यत्र साक्षान्निषेध्यानुपलब्धिर्विरुद्धा ह्युपलब्धिर्वा दर्श्यते ‘तत्र सर्वत्रानुपलम्भतः साध्यते’ । यस्मा‘त्प्रमाणै’रर्थस्य ‘सिद्धिं वदतामर्था’त्सामार्थ्या‘देव विपर्यया’त्प्रमाणाभावादर्थाभावः सिध्यति । (८५)

ननु विरुद्धाद्युपलब्धावनुपलम्भः कथं निषेधसाधक इत्याह (।)

...v.2.86 दृष्टा विरुद्धधर्मोक्तिस्तस्य तत्कारणस्य वा ।
निषेधे यापि तस्यैव साऽप्रमाणत्वसूचना ॥ ८६ ॥

[675] 1a प्रत्यक्षेण धूमादिः प्रतीयते न तस्य लिङ्गतापि निर्विकल्पेन ।
Placement of note uncertain; marked with a question mark in the edition (see encoding description for details).

[676] १ वासनाप्रबोधात्तयोः कल्पनं वह्निर्न भात्येव लिङ्गत्वेनापि न भानं धूमस्यैव भानात् ।

[677] २ परम्परया वस्त्वविसंवादात् । ? वस्तुनि ।

[678] ३ विधिद्वारेण, न प्रतिषेधमुखेन ।

[679] ४ सद्व्यापकबलेन लिङ्गबुद्ध्युत्पत्तेः । ? निमित्तं ।

[680] ५ स्वलक्षणेन जनितं । स्वलक्षणव्यवस्थापकश्च ।

दृष्टा विरुद्धधर्मस्योक्तिर्या ‘तस्य’ निषेध्यस्य ‘तत्कारणस्य वा निषेधे’ कर्तव्ये यथा नात्र शीतस्पर्शो न वा रोमहर्षयुक्तपुरुषवानयं प्रदेशो वह्नेरिति (।) ‘सापि तस्यैव’ निषेध्यस्यैवा‘प्रमाणत्वस्य’ प्रमाणरहितत्वस्य ‘सूचना’ । विरुद्धस्य कारणविरुद्धत्वस्य चोपलम्भेन निषेध्यानुपलम्भ एव ख्याप्यते । (८६)

....2.87a अन्यथैकस्य धर्मस्य स्वभावोक्त्या परस्य तत् ।
नास्तित्वं केन गम्येत;

‘अन्यथैकस्य’ विरुद्धादे‘र्धर्मस्य स्वभावोक्त्या’ सत्ताप्रतिपादनेन ‘परस्य’ निषेध्यस्य तन्नास्तित्वं सिसाधयिषितं ‘केन’ कारणेन ‘गम्येत’ । न ह्यन्यसत्त्वेऽपरस्य सत्त्वाभावोतिप्रसङ्गात् । अनिषिद्धोपलब्धेरभावासिद्धेः ॥

....2.87b विरोधाच्चेदसावपि ॥ ८७ ॥

....2.88a सिद्धः केन;

अथ यन्निषिध्यते यच्चोपदर्श्यते तयो‘र्व्विरोधात्’ सहानवस्थानलक्षणादेकभावेऽन्याभाव इति ‘चेत्’ । नन्व‘सावपि’ (८७) विरोधः ‘केन’ प्रका[681] रेण ‘सिद्धः’ ॥

....2.88b असहस्थानादिति चेत् तत् कुतो मतम् ॥
दृश्यस्य दर्शनाभावादिति चेत् साऽप्रमाणता ॥ ८८ ॥

द्वयोः सहानवस्थानाद्विरोधः सिद्ध इति चेत् । तत्सहानवस्थानं कुतो हेतोर्मतं येन विरोधव्यवस्था ॥ अविकलकारणस्य प्रवर्तमानस्य ‘दृश्यस्या’न्यभावेऽ‘दर्शनात्’ सहानवस्थानगति‘रिति चेत्’ । ननु यदेवादर्शनं ‘सा(ऽ)प्रमाणता’ प्रमाणरहितताऽनुपलब्धिरित्यर्थः । (८८)

...v.2.89 तस्मात् स्वशब्देनोक्ताऽपि साऽभावस्य प्रसाधिका ।
यस्याप्रमाणं साऽवाच्यो निषेधस्तेन सर्वथा ॥ ८९ ॥

[144/s]

यस्मादवश्यं परम्परयानुपलब्धेरेव प्रतिषेधः । ‘तस्मात्स्वशब्देना’नुपलम्भस्वरूप वाचकशब्देनो‘क्ता’ स्वभावानुपलम्भादा‘वपि’ शब्दादनुक्तापि विरुद्धोपलब्ध्यादौ ‘सानु’पलब्धिर‘भावसाधिका’ । तस्या एव प्रतिपाद्यत्वात् । ‘यस्य’ तु चा र्वा क स्य साऽनुपलब्धिर‘प्रमाणं’ प्रतिषेधे साध्ये ‘तेन सर्व्वथा निषेधोऽवाच्यः’ प्रत्यक्षस्य भावमात्रविषयत्वात् । प्रमाणान्तरस्य चाभावात् । (८९)

...v.2.90 एतेन तद्विरुद्धार्थकार्योक्तिरुपवर्णिता ।
प्रयोगः केवलं भिन्नः सर्वत्रार्थो न भिद्यते ॥ ९० ॥

‘एतेन’ स्वभाव[682] ‘त’त्कारणविरुद्धोपलब्ध्योरनुपलब्धित्वप्रतिपादनेन तयोः [27b/MA] स्वभावतत्कार[683] णयोर्व्विरुद्धार्थस्य ‘कार्योक्तिरुपवर्ण्णिता’ बोद्धव्या । यथा नात्र शीतस्पर्शो रोमहर्षवान्वा पुरुषो धूमादिति । अत्रापि निषेध्यानुपलम्भस्य परंपरया प्रतिपादनात् । उपलक्षणञ्चैतद् व्यापकविरुद्धतत्कार्योपलब्धी अपि बोद्धव्ये । यथा नात्र तुषारस्पर्शो वह्नेर्धूमादिति । एतासु स्वभावानुपलब्धिविरुद्धोपलब्ध्यादिषु ‘प्रयोगः’ शब्दाभिधाव्यापारः

[681] १ प्रमाणेन ।

[682] १ विरुद्धोपलब्धि ।

[683] २ स्वभावविरुद्धकार्योपलब्धिः । कारणविरुद्धकार्योपलब्धिश्च ।

परमनुपलम्भोपलम्भप्रतिपादकत्वेन भिद्यते । 'सर्व्वत्रार्थो' निषेध्यानुपलम्भलक्षणो 'न भिद्यते' तस्यैव सर्व्वत्र प्रतिपाद्यत्वात् । (९०)

...v.2.91 विरुद्धं तच्च सोपायमविधायापिधाय च ।
प्रमाणोक्तिर्निषेधे या न साम्नायानुसारिणी ॥ ९१ ॥

[684] या पुनर्द्विविधेनापि विरोधेन विरुद्धमर्थमभिधा[685] य यं कश्चिदर्थमुपदर्श्यते तन्निषेध्यश्च सहा[686] भावनिश्चयोपायेन कारणव्यापककार्यानुपलम्भे वर्तमानम'विधाया'त एवा'पिधाय' च पिधानमिव पिधानं स्वरूपप्रतीतिविरोधित्वा[687]दनुपलम्भः। तमकृत्वा कारणाद्यनुपलम्भाप्रदर्शनात्तदुपलम्भसंभावना न व्याहतैव । एवं [145/s] निषेध्योपलम्भसम्भावनामनिवार्यान्यविधिना 'निषेधे' कर्तव्ये 'प्रमा[688] णोक्तिर्या न साम्नायानुसारिणी' । (९१)

....2.92a उत्त्यादेः सर्ववित्प्रेत्यभावादिप्रतिषेधवत् ।

'उक्त्यादेर्हेतोः । सर्व्वविदः प्रेत्यभावस्य' परलोकस्य 'निषेधवत्' । यथा न सर्व्वज्ञत्वमस्य पुरुषस्य वक्तृत्वात् प्रेत्यभावो पु[689] रुषत्वादित्यादि । (।)

कस्मात्पुनरियं विरुद्धोक्तिरेव नेत्याह (।)

....2.92b अतीन्द्रियाणामर्थानां विरोधस्याप्रसिद्धितः ॥ ९२ ॥

'अतीन्द्रियाणां' सार्व्वज्ञपरलोकादीना'मर्थानां' केनचित् वक्तृत्वादिना 'विरोधस्याप्रसिद्धितः' । ज्ञानोत्कर्षापकर्षयोर्व्वचनापकर्षोत्कर्षादर्शनाद्विपर्ययदर्शनाच्च । (९२)

...v.2.93 बाध्यबाधकभावः कः स्यातां यद्युक्तिसंविदौ ।
तादृशोऽनुपलब्धेश्चेद् उच्यतां सैव साधनम् ॥ ९३ ॥

यदि चो'क्तिसम्विदौ' सह 'स्यातां क'स्तयोः परस्परं 'बाध्यबाधकभावः' । न हि ज्ञानवचनयोर्व्विरोधः सिद्धः येनैकसत्वेऽपरस्याभावः । अविरोधोपि न सिद्ध इतिचेत् सत्यं किन्तु संशयेपि न वक्तृत्वमनैकान्तिकं । 'तादृशः' सर्व्वज्ञस्य 'वक्तुरनुपलब्धे'रभावश्चेत् 'उच्यतां' निषेधे साध्ये सैवानुपलब्धिः 'साधनं' नात्रान्यस्य शक्तिः । (९३)

...v.2.94 अनिश्चयकरं प्रोक्तमीदृक् क्वानुपलम्भनम् ।
तन्नात्यन्तपरोक्षेषु सदसत्ताविनिश्चयौ ॥ ९४ ॥

किन्त्वीदृगतीन्द्रियार्थविषय'मनुपलम्भनमनिश्चयकरं प्रोक्तं' सत्यप्यर्थे सम्भवात् । 'तत्' तस्मा'वत्यन्तपरोक्षेषु सदसत्तानिश्चयौ न सतः' । सत्यपि प्रमाणाव[690] त्तेः । प्रमाणनिवृत्तावप्य[691] र्थाभावासिद्धेः । तस्मान्नानुप[692] लब्धेः कुतश्चिदन्य[693]स्मादभावसिद्धिः । किन्तु

[684] ३ सांख्येन प्रतिबन्धान्तरं विरोध इष्टस्तादात्म्यतदुत्पत्तिभ्यामस्यासंग्रहादिति सोत्र स्वभावानुपलम्भेऽन्तर्भावितो विरोधस्यापि दृश्यानुपलम्भबलादेव सिद्धेः । तीर्थ्यास्तु विना विरुद्धविधिमनुपलम्भश्च स्वतो निवृत्तेरित्याहुस्तानाह । या पुनरित्यादि ।

[685] ४ क्रियते प्रमाणोक्तिः । अकृत्वा ।

[686] ५ सहानवस्थानपरस्परपरिहारविरोधाभ्यां ।

[687] ६ उपलब्धिलक्षणप्राप्तस्यानुपलब्धिमकृत्वाऽप्रदर्श्य ।

[688] १ आगमे सर्व्वविदो वचनकौशलदृष्टेः ।

[689] २ अर्हत्पुरुषवत् । सन्धानं ।

[690] ३ सुमेर्व्वादौ ।

[691] ४ पिशाचादेः ।

[692] ५ अदृश्यानुपलब्धेः ।

[693] ६ अविरुद्धात् ।

विरुद्धादेव । (९४)

...v.2.95 भिन्नोऽभिन्नोपि वा धर्मः स विरुद्धः प्रयुज्यते ।
यथाऽग्निरहिमे साध्ये सत्ता वा जन्मबाधनी ॥ ९५ ॥

'स च विरुद्धो धर्मः' क्वचिद् 'भिन्नो वा प्रयुज्यते यथाग्निरहिमे' हिमाभावे 'साध्ये' (।) 'क्वचिदभिन्नो वा यथा सत्ता जन्मनो बाधनी' महदादीनां जन्माभावप्रसङ्गः [146/s] सत्त्वादिति सत्ताजन्मनोश्चाभेदः सां-ख्या[694] भ्युपगमादुच्यते । न तु परमार्थतः तादात्म्यं विरुद्धयोरस्ति । विरुद्धे च सत्ताजन्मनी प्रागसत्तया हि अभिव्यक्तिरूपताय लाभो जन्मोच्यते । सत्ता तु विद्यमानता । ततो येन रूपेण सत्त्वं न तेन जन्म । येन च जन्म तेन न सत्त्वमिति व्यक्तः परस्परपरिहारस्थितिर्व्विरोधः । (९५)

...v.2.96 यथा वस्त्वेव वस्तूनां साधने साधनं मतम् ।
तथा वस्त्वेव वस्तूनां स्वनिवृत्तौ निवर्त्तकम् ॥ ९६ ॥

'यथा' च 'वस्तूनां' साध्यानां 'साधने साधनं वस्त्वेव मतं' नावस्तु । 'तथा वस्त्वेव स्वस्य निवृत्तौ वस्तूनां निवर्त्तकं' नावस्तु । (९६)

...v.2.97 एतेन कल्पनान्यस्तो यत्र क्वचन सम्भवात् ।
धर्मः पक्षसपक्षान्यतरत्वादिरपोदितः ॥ ९७ ॥

'एतेन' वस्तुनः साधनत्वप्रतिपा[695] दनेन 'विकल्पनान्यस्तो धर्मः पक्षसपक्षान्यतरत्वादि' । आदिशब्दान्मदुपगमादिश्चा'पोदितः' प्रतिक्षिप्तो बोद्धव्यः । तादृशस्य [28a/MA] साधनस्य 'यत्र क्वचन' साध्ये 'सम्भवात्' । न हि पक्षत्वं सपक्षत्वम्वा जातिनियतं किन्तु वाञ्छाधीनमवस्तु । अतः समीहितसिद्धौ सर्व्वं सर्व्वस्य सिध्येत् । (९७)

...v.2.98 तत्रापि व्यापको धर्मो निवृत्तेर्गमको मतः ।
व्याप्यस्य स्वनिवृत्तिश्चेत् परिच्छिन्ना कथञ्चन ॥ ९८ ॥

'तत्र वस्तुन्यपि व्यापको धर्मः' कारणं स्वभावो वा । 'व्याप्यस्य' कार्यस्य 'स्वभा'वस्य 'निवृत्तेर्गमको मतः' । व्यापकस्य कारणस्वभावस्य स्वनिवृत्तिः 'कथञ्चन' साक्षात्परम्परया वा 'परिच्छिन्ना' चेत् स्यात् । (९८)

....2.99a यदप्रमाणताभावे लिङ्गं तस्यैव कथ्यते ।
तदत्यन्तविमूढार्थं;

तथा यस्यार्थस्य एकज्ञानसंसर्ग्गिणोऽ'प्रमाणता' प्रमाणनिवृत्तिस्तस्यैवा'भावे-' ऽभा-वव्यवहारे च साध्ये सा प्रमाणनिवृत्तिः स्वभावानुपलम्भाख्या 'लिङ्गं कथ्यते । तत्स्व'भा-वानुपलब्धिलिङ्गम'त्यन्तविमूढार्थं' । ये ह्यनुपलभ्यमानमपि दृश्यमसत्तया मोहान्न व्यवहरन्ति तान् प्रति व्यवहारसाधकं तल्लिङ्गं ।
[147/s]

कस्मात्पुनरमूढार्थमपि तन्नेत्याह (।)

....2.99b आगोपालमसंवृत्तेः ॥ ९९ ॥

[694] १ सदुत्पद्यते आविर्भावतिरोभावः परं वैभाष्योपि सद्वादी ।

[695] २ अनित्यः शब्दः पक्षसपक्षान्यतरत्वाद् घटवदित्यनित्येन प्रत्यासत्तौ दर्शितायां । तदैव वक्तुरिच्छावशान्नित्यः शब्दः पक्षसपक्षान्यतरत्वादाकाशवदिति नित्येन प्रत्यासत्तिरिति कम्बलिप्रोक्तं हेतुमपाकर्त्तुमाह ।

'आगोपालम'स्यार्थस्या'संवृ[696] त्ते'रगूढत्वात् प्रसिद्धेरित्यर्थः । (९९)

....2.100 एतावन्निश्चयफलमभावेनुपलम्भनम् ।
तच्च हेतौ स्वभावे वाऽदृश्ये दृश्यतया मते ॥ १०० ॥

'एताव'त्त्रिविधम् । कारणव्यापकस्वभा'वानुपलम्भनं ।' अभावेऽभावव्यवहारे च 'निश्चयफलं' । कारणविरुद्धोपलम्भादयस्तु कारणाद्यनुपलम्भोपलक्षणत्वात् त्रिविध एवान्तर्भूताः । 'तच्चा'भावनिश्चयफलत्वमनुपलम्भस्य 'हेतौ स्वभावे च' व्यापके निषेध्यरूपे च 'दृश्यतया' दर्शनयोग्यतया मतेऽ'दृश्ये'ऽनुपलभ्यमाने सति नान्यथा ।

तदेवं त्रिविधलिङ्गजमनुमानं प्रमाणं वस्तुसम्वादात् । ततस्तत्प्रसिद्धस्यानित्यतादेर्न वस्तुधर्मतेति स्थितं ।[697] (१००)

नन्वनित्योऽयं वर्ण्ण इति स्वलक्षणे योजना तत्कथं योजनाद्वर्ण्णसामान्य?? इत्युक्तं । अत्राह (।)

....2.101 अनुमानादनित्यादेर्ग्रहणेऽयं क्रमो मतः ।
प्रामाण्यमेव नान्यत्र गृहीतग्रहणान्मतम् ॥ १०१ ॥

'अनुमाना'त्परोक्षस्या'नित्यादे'र्धर्मस्य 'ग्र[698]हणे' वस्तुसामान्यमनित्यत्वेन गृह्यत इत्ययं 'क्रमो मतः' । वर्ण्णसामान्यञ्च प्रत्य[699]क्षतः सिद्धं तद्बलभाविना विकल्पेन विजातीयव्यावृत्त्याश्रयेण व्यवस्थापनात् । यस्तु विनश्वरं वर्ण्णं दृष्ट्वाऽनित्योऽयमिति विशेषविषयः अनुमानादन्यत्र । तत्र 'प्रामाण्यमेव न मतं गृहीतग्रहणात्' (। १०१)

कथं गृहीतग्राहित्वमित्याह (।)

...2.102a नान्यास्यानित्यता भावात् पूर्वसिद्धः स चेन्द्रियात् ।
नानेकरूपो वाच्योऽसौ;

[148/s]

'नान्या भावाद्व[700]र्ण्णादेरनित्यता' तस्यैव क्षणक्षयिस्वभावत्वात् । 'स च भाव ऐन्द्रियात्प्रत्यक्षात्सिद्धः' । पूर्व्वं विकल्पात् । ततस्तमेव यथागृहीतं विकल्पयन् विकल्पो गृहीतग्राही । यत एव नान्याभावादनित्यता । अत एवाभावोऽसौ धर्मिधर्मरूपतया 'नानेकरूपः' । तथा न 'वाच्योऽसौ' शब्दानां धर्मिधर्माभावस्य तैर्व्वचनात् । तस्य च वस्तुन्यसम्भवात् ।

कस्तर्हि वाच्य इत्याह (।)

...2.102b वाच्यो धर्मो विकल्पजः ॥ १०२ ॥

'विकल्पजो' विजातीयाश्रयेण विकल्पकल्पितो 'धर्मः' परस्परं यथासंकेतमसंकीर्ण्णः शब्दानां 'वाच्यः' । (१०२)

....2.103 सामान्याश्रयसंसिद्धौ सामान्यं सिद्धमेव तत् ।
तदसिद्धौ तथास्यैव ह्यनुमानं प्रवर्तते ॥ १०३ ॥

[696] १ विवृतौ
[697] २ आनुषङ्गिकं समाप्य प्रकृतमाह ।
[698] ३ सति नान्यदायं क्रमः ।
[699] ४ सन्तानोपलम्भावस्थायामनित्यमेतद्वर्ण्णादिकं । विकारित्वात् । जलादिवदिति स्वभावहेतुरतो वस्तुन एवात्र सिद्धिः ।
[700] १ चलात् ।

तस्मात्सामान्यस्यानित्यादेराश्रयस्य वर्ण्णादेः प्रत्यक्षात् 'संसिद्धौ सिद्धमेव तत्सामान्यं' । यदि त्वभ्यासाद्यभावादनुरूपनिश्चयाभावादज्ञानं तदा प्रत्यक्षा'त्तदसिद्धावस्यैव' हि वर्ण्णादेस्तथा नित्यत्वेन तदव्यभिचारिलि'ङ्गादनुमानं प्रवर्तते' । (१०३)

कस्मात्पुनर्गृहीतेप्यपरिज्ञानमित्याह (।)

....2.104 क्वचित्तदपरिज्ञानं सदृशापरसम्भवात् ।
भ्रान्तेरपश्यतो भेदं मायागोलकभेदवत् ॥ १०४ ॥

'क्वचिद'नित्यतादौ गृहीतेप्यनुरूपनिश्चयाभावाद'परिज्ञानं' । पूर्व्वक्षणविनाशकाले तत्सदृशस्यापरस्य 'सम्भवात्' । भावशून्यान्तरा लक्षणाभावात् । स एवायमिति [28b/MA] भ्रान्तेः स्थैर्यग्राहिण्याः क्षणानां 'भेदमपश्यतो'ऽनिश्चिन्वतः पुंसो दृष्टान्तमाह (।) 'मायागोलकभेदवत्' । मायाकारदर्शितौ गोलकौ भिन्नावध्यक्षेण गृहीत्वापि सादृश्याल्लाघवाच्च विप्रलब्धबुद्धिरेकत्वेनाध्यवस्यति यथा तथा स्थिराध्यवसायः । (१०४)

ननु यदि क्वचिन्नाशो दृश्येत तदास्या[701] हेतुकस्य स्वभावत्वात् क्षणक्षयिषु भावेषु एकताबुद्धेर्भ्रान्तत्वं भवेदित्याह (।)

....2.105 तथा ह्यलिङ्गमाबालमसंश्लिष्टोत्तरोदयम् ।
पश्यन् परिच्छिनत्त्येव दीपादिं नाशिनं जनः ॥ १०५ ॥

[149/s]

'तथा' हि 'दीपादि'(।) आदिशब्दात्तुरङ्गदिसन्तानविच्छेदकालेऽ'संश्लिष्टोत्तरो-' दयमघटित उत्तरस्य उदयो जन्म यस्मिन् तमेकस्य स्वरसनिरोधित्वेऽपरस्य कारणाभावात् । अनुत्पत्तौ 'नाशिनम'ध्यक्षतः 'पश्यन्न'लिङ्गङ्गमकलिङ्गरहितमाबालं बालपर्यन्तं जनः 'परिच्छिनत्त्येव' । ततः प्रागपि सतः स्वरसनिरोधात् सदृशापरापरक्षणप्रचये स एवायमिति बुद्धिभ्रान्तिरेव । (१०५)

यथा (।)

....2.106 भावस्वभावभूतायामपि शक्तौ फलेऽदृशः ।
अनानन्तर्यतो मोहो विनिश्चेतुरपाटवात् ॥ १०६ ॥

'भावस्य'बीजादेः 'स्वभावभूतायामपि' अङ्कुरादिजनिकायां 'शक्तौ फलेऽङ्कुरादौ अनान[702]न्तर्यतोऽदृशो'ऽदर्शनात् 'विनिश्चेतुः' पुन्सोऽ'पाटवात् मोहो'ऽशक्तभ्रमः । तथा क्षणिकेषु भावेषु सदृशापरापरोत्पत्तेर्भावशून्यक्षणादर्शनाच्च स्थिरभ्रमः । (१०६)

....2.107 तस्यैव विनिवृत्यर्थमनुमानोपवर्णनम् ।
व्यवस्यन्तीक्षणादेव सर्वाकारान् महाधियः ॥ १०७ ॥

तस्यैकत्वभ्रमस्यैव 'निवृत्त्यर्थं' सम्वादिलिङ्गजस्य क्षणिकता विषयस्यानु'मानस्योपवर्ण्णनं' निश्चयारोपमनसोर्ब्बाध्यबाधकभावत (१।५०) इति न्यायात् । ये तु 'महाधियो' विपरीतव्यवसायानाक्रान्तप्रत्यक्षा योगिनस्ते पदार्थस्य 'ईक्षणादेव सर्व्वानाकारन् व्यवस्यन्ति' निश्चिन्वन्ति । (१०७)

एवञ्च (।)

---

[701] २ दृश्येतैव दीपादिरिति नित्यं गौः भावी ।

[702] १ फलस्यानन्तरमभावात्

....2.108 व्यावृत्ते सर्वतस्तस्मिन् व्यावृत्तिविनिबन्धनाः ।
बुद्धयोऽर्थे प्रवर्त्तन्तेऽभिन्ने भिन्नाश्रया इव ॥ १०८ ॥

'तस्मिन्नर्थे' वस्तुतोऽभिन्ने निरंशे 'सर्व्वतः' सजातीयाद् विजातीयाच्च 'व्यावृत्ते' यावत्त्यो व्यावृत्तयः सन्ति तावद् 'व्यावृत्तिविनिबन्धना' निश्चयात्मिका 'बुद्धयो भिन्नाश्रया इव' तत्तद्व्यावृत्तिमात्रविषयत्वेन भिन्नधर्मिधर्म्मादिगोचरा इव 'प्रवर्तन्ते' । (१०८)

....2.109 यथाचोदनमाख्याश्च । सोऽसति भ्रान्तिकारणे ।
प्रतिभाः प्रतिसन्धत्ते स्वानुरूपाः स्वभावतः ॥ १०९ ॥

'यथाचोदनं' यथासंकेत'माख्याः' शब्दा'श्च' प्रवर्तन्ते । यत्र व्यावृत्तौ यः शब्दो विनिवेशितः । 'स' च तस्यां निश्चितायां प्रवर्तते स भावोऽ'सति भ्रान्तिकारणे' यथाभ्यासं 'स्वानुरूपाः' स्वव्यावृत्तिसमुचिताः 'प्रतिभा' निश्चयबुद्धीः 'स्वभावतः प्रति-' [150/s] 'संधत्ते' उत्पादयति । तस्मादभ्यासवतामीक्षणादेवानित्यादिनिश्चयः अन्येषान्तु स्थिरारोपणार्थमनुमानमिति स्थितमेतत् । (१०९)

अन्ये त्वाचार्याः प्राहुः ।[703]

...2.110a सिद्धोऽत्राप्यथवा ध्वंसो लिङ्गादनुपलम्भनात् ।

'अत्र' वर्णसन्तानविच्छेदकालेपि सन्तानविच्छेदलक्षणो ध्वंसोऽनित्यता न भावस्वभावात्मिका । स 'चानुप[704] लम्भनाल्लिङ्गत्सिद्धः'। नाध्यक्षाद् भावविषयत्वात्तस्य ।

कस्मात्पुनर्ध्वंसोऽनित्यता इत्याह (।)

...2.110b प्राग् भूत्वा ह्यभवद्भावोनित्य इत्यभिधीयते ॥ ११० ॥

'प्राग् भूत्वा हि भावः' पश्चाद'भवन्ननित्य इत्यभिधीयते' न तु भाव इत्येव । तथा ध्वंस एवानित्यता सा चानुपलब्धिलिङ्गजाऽनुमानगम्या । (११०)

ननु प्राक् पश्चादभावयोर्व्यवधायकः सत्तासम्बन्धोऽनित्यता न प्रध्वंसाभाव इत्याह (।)

....2.111 यस्योभयान्तव्यवधिसत्तासम्बन्धवाचिनी ।
अनित्यता-श्रुतिस्तेन तावन्ताविति कौ स्मृतौ ॥ १११ ॥

'यस्य' नै या यि का देरु'भय'स्य प्राक् पश्चादभा[705] वस्या'न्त'रस्य यो 'व्यवधा'यकः सत्ता'सम्बन्ध'स्तद्वाचिन्यनित्यता 'श्रुति'रिष्टा 'तेन' वादिना 'ताव'न्ताविति कौ[706] 'स्मृतौ' । (१११)

....2.112 प्राक् पश्चादप्यभावश्चेत् स एवानित्यता न किम् ।
षष्ठ्याद्ययोगादिति चेद् अन्तयोः स कथं भवेत् ॥ ११२ ॥

'प्राग्'भावः 'पश्चादभावोपि चेत् स एव' प्रागभावः पश्चादभावोऽ'नित्यता कि-' न्नेष्यते । सत्ताविशेषणत्वेनापि तदभ्युपगमस्येष्टत्वात् ॥ पटस्य घटे चा[707] भाव इति [29a/MA] 'षष्ट्या-'दिविभक्त्ययोगात् प्रध्वंसा[708]भावो नानित्यता । न हि भावाभावयोः संयो[151/s] गादिः

703 १ तेषां प्रध्वंसाभावेऽनित्यताभिमता स यथा सिध्यति तद्दर्शयति ।
704 २ उपलब्धिलक्षणप्राप्तस्यान्त्यक्षणस्य ।
705 ३ आकाशश्चासदि (ति) विशिनष्टि द्विमध्यस्थेति ।
706 ४ पृच्छत्ययुक्तत्वात् ।
707 ५ भावाभावयोर्व्विरोधान्न सम्बन्धषष्ट्यादि ॥
708 ६ कार्यस्य सत्तया सहाशेषः ।

कश्चित्सम्बन्धोस्ति य उच्येत षष्ट्यादिभिरिति 'चेत् एवन्तर्ह्यन्तयोः' स षष्ट्यादियोगः 'कथं भवेत्' । अभावयोर्व्यवधिभूता सत्तेत्यादि । (११२)

किञ्च (।)

...2.113a सत्तासम्बन्धयोर्ध्रौव्यादन्ताभ्यां न विशेषणम् ।

'सत्ता तत्सम्बन्धे' परमते 'ध्रौव्यादन्ताभ्यां' प्राक्प्रध्वंसाभावाभ्यां 'न विशेषणं' स्यादन्तद्वयविशिष्टा सत्ता तत्सम्बन्धो वेति (।) न हि निंत्यस्य सर्वकालव्यापिनोऽन्तसम्भवः ।[709][710]

...2.113b अविशेषणमेव स्यादन्तौ चेत् कार्यकारणे ॥ ११३ ॥

'कार्यकारणे अन्ता'वभिमते इति 'चेत्' तदा ताभ्यां सत्तास'म्बन्धयोरविशेषणमेव स्यात्' । (११३)

....2.114 असम्बन्धान्न भावस्य प्रागभावं स वांछति ॥
तदुपाधिसमाख्याने तेप्यस्य च न सिध्यतः ॥ ११४ ॥

यस्मात् स नै या यि का दिर्भावस्या'सम्बन्धात् प्राग'भावं सम्बन्धिनं 'न वाञ्छति' । तथा च 'तदुपाधिसमाख्याने' प्रागभावविशेषणं कार्यकारणमिति समाख्यानं व्यपदेशो ययोस्ते तथा ते कार्यकारणे'प्यस्य न सिध्यतः' । यस्य हि प्रागभावः स भवन् कार्यं स्यात् । न च तत्सम्बन्धो भावस्येति कार्याभावः । कार्याभावाच्च कारणाभावः । तदुत्पादकस्य कारणत्वात् । (११४)

किञ्च (।)

....2.115 सत्ता स्वकारणश्लेषकरणात् कारणं किल ।
सा सत्ता स च सम्बन्धो नित्यौ कार्यमथेह किम् ॥ ११५ ॥

जन्म सत्ताश्लेषः 'सत्ता'समवायः स्वकारणेन समवायिना सह नित्यः । तयोः 'करणात् किल' त्वयेष्टं 'कारणं । सा च सत्ता स च सम्बन्धो नित्यौ' द्वावपि 'कार्यम[711] थेह' द्वयोर्मध्ये 'किं' युक्तं । (११५)

अपि च(।)

[152/s]

....2.116 यस्याभावः क्रियेतासौ न भावः प्रागभाववान् ।
सम्बन्धानभ्युपगमान्नित्यं विश्वमिदं ततः ॥ ११६ ॥

'यस्याभाव[712] स्यो'त्पत्तेः प्रागभावः कारणैरसौ 'क्रियते । न[713]' च कश्चिद् 'भावः प्राग्भाववान् सम्बन्ध'वानन'भ्युपगमात् । ततः' कार्याभावा'न्नित्यं विश्वमिदं' प्राप्तं । (११६)

कथन्तर्ह्यभावेन सम्बन्धः । न कथञ्चित् । किन्तु बुद्धिपरिकल्पित एवासावित्याह (।)

[709] १ वक्तव्यः ।

[710] 1a भावस्य परं ।

Placement of note uncertain; marked with a question mark in the edition (see encoding description for details).

[711] २ अतो यस्माद् भावः प्रागभावरहितस्ततो न क्रियते ।

[712] १ प्रध्वंसाभावस्य मृतकरणप्रसङ्गः ।

[713] २ प्रागभावश्चेतन्न असम्बन्धात् ।

....2.117 तस्मादनर्थास्कन्दिन्योऽभिन्नार्थाभिमतेष्वपि ।
शब्देषु वाच्यभेदिन्यो व्यतिरेकास्पदं धियः ॥ ११७ ॥

यस्माद्वास्तवसम्बन्धाभ्युपगमे दोषस्तस्माद् भावस्य प्रागभाव इत्य‘भिन्नार्थ’त्वेनाभिमतेष्वपि शब्दाद् भिन्नार्थाभिमतेषु च बीजस्याङ्कुर इत्यादिषु ‘शब्देषु धियोऽनर्थास्कन्दिन्यः’ कल्पितसम्बन्धविषया ‘वाच्यभेदिन्यः’ । संकेतानुरोधादुपकल्पितसम्बन्धिसम्बन्धलक्षणवाच्यभेदवत्यो ‘व्यति’रेकस्य सम्बन्धिसम्बन्धस्या‘स्पदं’ निमित्तं[714] भवन्ति । अलं वास्तवसम्बन्धानुबन्धेन दोषाश्रयेण । (११७)

तदेवं मेयबहुत्वाद् (व) हुतापि चेत्यत्र सानुषङ्गं प्रतिविहितं । अनेकस्य वृत्तेरेकत्र वा यथा विशेषदृष्टेनेत्यत्राह (।)

...2.118a विशेषप्रत्यभिज्ञानं न प्रतिक्षणभेदतः ।

अग्निं दृष्ट्वा क्रमेण धूमाल्लिङ्गात् तस्यैव ‘विशेष’स्य स एवायं वह्निरिति ‘यत्प्रत्यभिज्ञानं न’ तत्प्रमा[715] णं । ‘प्रतिक्षणं’ भावस्य ‘भेदतः’ एकार्थसाध्यार्थक्रियायाः सम्वादाभावात् ।

स्यादेतन्न यथा दृष्ट एव विशेषो गृह्यते किन्तु तत्सामान्यमित्याह (।)

...2.118b न वा विशेषविषयं दृष्टसाम्येन तद्ग्रहात् ॥ ११८ ॥

‘न वा विशेषविषयं’ तद्विशेष‘दृष्ट’मनुमानं वक्तव्यं प्राग्दृष्टस्य विशेषस्य ‘साम्ये’न तस्योत्तरस्य ‘ग्रहणात्’ । (११८)

[153/s]

स्यादेतदत्र (।) यत्र दृष्टान्तदार्ष्टान्तिकयोर्भेदस्तत्र सामान्यतो दृष्टमनुमानं इह तु ।

....2.119 निदर्शनं तदेवेति सामान्याग्रहणं यदि ।
निदर्शनत्वात् सिद्धस्य प्रमाणेनास्य किं पुनः ॥ ११९ ॥

‘तदेव’ दार्ष्टान्तिकं ‘निदर्शनमिति सामान्याग्रहणं’ यद्युच्यते तदा ‘निदर्शनत्वात्सिद्धस्य’ निश्चितस्या‘स्य’ दार्ष्टान्तिकस्य ‘प्रमाणेन किं’ कर्तव्यं । (११९)

...2.120a विस्मृतत्वाददोषश्चेत् तत एवानिदर्शनम् ॥
दृष्टे तद्भावसिद्धिश्चेत् प्रमाणाद्;

नाप्रसिद्धो दृष्टान्तः स चेत् सिद्धः किमनुमानेन गृहीतस्यापि ‘विस्मृतत्वात्’ । पुनरनुमानप्रतीताव‘दोषश्चेत् । ततो’ विस्मृतत्वा‘देवानिदर्शनं’ । न हि गृहीतविस्मृतस्य दृष्टान्तता । पूर्व्वप्रत्ययेन ‘दृष्टे’ऽर्थ ‘प्रमाणाद्वि’शेषदृष्टानुमानाद्य एव प्राग्दृष्टः स एवायमिति ‘तद्भाव’स्य पूर्व्वस्य ‘सिद्धिश्चेदि’ष्यते (।)

नन्वयं तद्भावः किमन्यवस्तुनि साध्यते उत तत्रैव ।

...2.120b अन्यवस्तुनि ॥ १२० ॥

....2.121 तत्त्वारोपे विपर्यासस्तत्सिद्धेरप्रमाणता ।
प्रत्यक्षेतरयोरैक्यादेकसिद्धिर्द्वयोरपि ॥ १२१ ॥

तत्रान्यवस्तुनि (१२०) वर्तमाने ‘तत्त्व’स्यातीतवस्त्वात्मक‘स्यारोपे’ स्वीक्रियमाणे ‘विपर्यासो’ऽयथार्थत्वं स्यात् । न ह्यन्यस्यान्यात्मत्वमस्ति तदशक्यप्रापण[29b/MA]मुपदर्शयदप्रमाणं स्यात्

[714] ३ धिय एव ।
[715] ४ विशिष्टत्वाभावात् पूर्व्वनाशापरोत्पत्तेः स एवायमिति मिथ्याज्ञानं । अवस्था ।

। अथ तत्रैव तद्भावसिद्धिरिति द्वितीयः पक्षः । तदा 'तत्सिद्धे'रेकसिद्धेर्व्विशेषदृष्टस्यानुमानस्या'प्रमाणता' गृहीतग्राहित्वात् । न ह्येकस्य निर्भागस्य किञ्चिदगृहीतं नाम । तथा हि 'प्रत्यक्षेतरयो'रध्यक्षानुमानविषययोरै'क्यात् द्वयोरपि' प्रत्यक्षेऽनुमाने च 'एकस्यार्थस्य सिद्धिः' । (१२१)

ततश्च दृष्टान्तग्राहिणैवाभ्रष्टस्मृतिसंस्कारेण प्रत्यक्षेण सिद्धत्वात् विफलमनुमानं । प्रत्यक्षसंस्कारभ्रंशे तु नादृष्टान्तमनुमानमस्ति (।) तस्माद् (।)

....2.122 सन्धीयमानं चान्येन व्यवसायं स्मृतिं विदुः ।
तल्लिङ्गापेक्षणान्नो चेत् स्मृतिर्न व्यभिचारतः ॥ १२२ ॥

अन्येनातीतदर्शनेन एकविषयतया 'सन्धीय[716] मानं' घट्यमानं परं 'व्यवसायं'[717] [154/s] 'स्मृतिं विदु'र्व्विद्वांसः । गृहीतार्थविकल्पेन स्मृतित्वं तच्चेहाविकलं । तस्य प्रतिपत्तव्यस्य चिह्नमव्यभिचारि 'लिङ्गं'[718] न्त'दपेक्षणान्नोचे'द्विशेषदृष्टमनुमानं 'स्मृतिः' सा तु लिङ्गनिरपेक्ष्या । नैतद्युक्तं 'व्यभिचार[719] तः' ।[720] तथा हि यदि लिङ्गन्त्रिरूपन्तदा व्याप्तिग्रहणविषयत्वेनैव तत्सिद्धेर्व्यर्थमनुमानं । अथ न त्रिरूपन्तदा नाव्य[721] भिचारनिश्चयः । तस्माद्विशेषदृष्टस्याप्रमाणत्वादेकत्रानेकवृत्तेरपि त्र्येकसंख्यापोहनाभावो निरस्तः । तस्मात्स्थितमेतन्मानं द्विविधं मेयद्वैविध्यादिति ॥ (१२२) ॥

## 2.5 ५. प्रत्यक्षचिन्ता

### (१) प्रत्यक्षलक्षणविप्रतिपत्तिनिरासः

#### क. कल्पनापोढं प्रत्यक्षम्

इदानीमवसरप्राप्तां प्रत्यक्षस्य लक्षणविप्रतिपत्तिं निराकर्त्तुमाह ।

....2.123 प्रत्यक्षं कल्पनापोढं प्रत्यक्षेणैव सिध्यति ।
प्रत्यात्मवेद्यः सर्वेषां विकल्पो नामसंश्रयः ॥ १२३ ॥

यत्त'त्प्रत्यक्ष'मिति प्रसिद्धंतत् 'कल्पनाया अपोढं' द्रष्टव्यं कल्पनार्थरहितमित्यर्थः । तच्चैतदीदृशं 'प्रत्यक्षेणैव' स्वसम्वेदनेनैव 'सिध्यति' । कल्पनारहितस्यार्थस्य रूपस्य सम्वेदनस्यापरोक्षत्वात् । यदि तु कल्पनास्वभावत्वमस्य स्यात्तथैव प्रकाशेत । विकल्पस्यापरोक्षत्वात् । तथा हि 'प्रत्यात्मवेद्यः सर्व्वेषां' प्राणिनां 'विकल्पो नामसंश्रयः' शब्दसंसर्गवान् । स यदि स्यादुपलभ्य एव भवेत् (। १२३)

तस्मात् (।)

....2.124 संहृत्य सर्वतश्चिन्तां स्तिमितेनान्तरात्मना ।
स्थितोपि चक्षुषा रूपमीक्षते साक्षजा मतिः ॥ १२४ ॥

[716] १ अभ्रष्टदर्शनसंस्कारं ।

[717] २ निश्चयं ।

[718] १ स्मृतेर्धूमाद्यपेक्षा नान्त्यस्यास्ति ।

[719] २ न स्मृतिरनिमित्तैव ।

[720] ३ विशेषदृष्टे हि विशेषेणान्वयाभावात् त्रैरूप्यं । तदेवं लिङ्गजं प्रत्यभिज्ञानं दूषितं प्रत्यक्षजं दूषयिष्यते ।

[721] ४ देशादिकथयापि स्यात् प्रत्यभिज्ञानं न तदव्यभिचारि ।

'संहृत्या'कृष्य 'सर्व्वतो' विकल्पनीया'च्चिन्तां स्तिमितेन' सर्व्वाविकल्पविगमात् अधिक्षिप्तेना-'न्तरात्मना' चेतसा 'स्थितोऽपि' पुरुष'श्चक्षु'र्व्विज्ञानेन 'रूपमीक्षते साक्ष'जा निर्व्विकल्पा 'मतिः' सर्व सम्विदितैव । (१२४)
[155/s]

सन्त्येवेन्द्रियधियः कल्पनास्तास्तु नोपलभ्यन्त इत्यप्यसत् । तथा हि ।

....2.125 पुनर्विकल्पयन् किञ्चिदासीन्मे कल्पनेदृशी ।
वेत्ति चेति न पूर्व्वोक्तावस्थायामिन्द्रियाद् गतौ ॥ १२५ ॥

विकल्पावस्थाया ऊर्ध्वं 'पुनर्व्विकल्पयन्' पुमाना'सीन्मे कल्पनेदृशीति' वेति 'नेन्द्रिया-दु'त्पन्नायां 'गतौ' बुद्धौ संहृत्येत्यादिना 'पूर्व्वमुक्तावस्था' यस्यास्तस्याः कल्पनां वेति । यदि सा तत्र स्यादतत्संस्कारस्य स्मृतिर्जायते । तस्मान्नास्तीति निश्चीयते (। १२५)
किञ्च (।) वाच्यवाचकाकारसंसर्गवती प्रतीतिः कल्पना । न चेन्द्रियविषयेऽनन्वयात् संकेताऽसम्भवाच्च शब्दयोजनास्ति (।) तथाहि (।)

....2.126 एकत्र दृष्टो भेदो हि क्वचिन्नान्यत्र दृश्यते ॥
न तस्माद् भिन्नमस्त्यन्यत् सामान्यं बुद्धयभेदतः॥ १२६ ॥

'एकत्र' दे[722] शादौ 'न दृश्यते' न चाननुयायिनि शब्दसंकेतः । सामान्यमनुयायीति चेत् । 'तस्मा'द् भेदादन्यद् 'भिन्नं सामान्यं नास्ति बुद्धेरभेदतः' । (१२६)
यदि हि सामान्यं सामान्यं स्यात् द्व्याकारा बुद्धिर्भवेत् । विशेषमात्राकारैव तु प्रत्यक्षबुद्धि-रुपलभ्यते ।

....2.127 तस्माद् विशेषविषया सर्वैवेन्द्रियजा मतिः ॥
न विशेषेषु शब्दानां प्रवृत्तावस्ति सम्भवः ॥ १२७ ॥

'तस्मात्सर्व्वैवेन्द्रियजा मतिर्व्विशेष'मात्र'विषया'ऽन्यस्यानुपलब्धेः । 'न च विशेषेषु शब्दानां प्रवृत्तौ संभवोस्ति' (१२७)

....2.128 अनन्वयाद् विशेषाणां सङ्केतस्याप्रवृत्तितः ॥
विषयो यश्च शब्दानां संयोज्येत स एव तैः ॥ १२८ ॥

'विशेषाणामनन्वयात्' तत्र 'संकेतस्याप्रवृत्तितः' । उत्तरकालं शब्दार्थप्रतिपत्त्यर्थं संकेतक्रिया । न च विशेषाः कालान्तरमनुवर्तन्ते । तस्माद्य एव 'शब्दानां विषयो'[30a/MA] व्यवच्छेदः 'स एव तैः संयोज्येत' । न स्वलक्षणं ॥ (१२८)

....2.129 अस्येदमिति सम्बन्धे यावर्थौ प्रतिभासिनौ
तयोरेव हि सम्बन्धो न तदेन्द्रियगोचरः ॥ १२९ ॥

तस्मादस्या'र्थस्येद'म्वाचक'मिति सम्बन्धे' वाच्यवाचकभावलक्षणे 'यावर्थौ प्रतिभासिनौ तयोरेव हि सम्बन्धो' वक्तव्यः । यदा चार्थन्दृष्ट्वा सकेतं तत्र प्रवर्तयति । 'तदेन्द्रियगोचरोऽर्थो' नास्ति (। १२९)
[156/s]

....2.130 विशदप्रतिभासस्य तदार्थस्याविभावनात् ।
विज्ञानाभासभेदश्च पदार्थानां विशेषकः ॥ १३० ॥

[722] १ शब्दादेकत्र नियुक्तात्सर्व्वत्रार्थप्रतीतिः स्यात् ।

संहृतेन्द्रियव्यापारस्य तदा संकेतसंकल्पकाले 'विष (श ?)दप्रतिभासस्यार्थस्याविभावनात्' । यदि तत्रार्थः प्रतिभाति तदेन्द्रियज्ञानवत् स्फुटः प्रतीयते । न च प्रतिभासभेदेपि शब्देन्द्रियज्ञानयोरेकविषयत्वं यस्मा'द्विज्ञान'स्या'भासभेद' आकारभेदः 'पदार्थानां' ग्राह्याना- (? णां) 'विशेषको' भेदकः । यदि तु प्रतिभासभेदेप्यर्थभेदस्तदा विश्वमेकं द्रव्यं स्यात् ॥(१३०)

स्यादेतत् । यदा स्वलक्षणमुपदर्श्य शब्दो निवेश्यते तदा स्वलक्षणमेव वाच्यवाचकमित्याह (।)

....2.131 चक्षुषाऽर्थावभासेऽपि यं परोऽस्येति शंसति ।
स एव योज्यते शब्दैर्न खल्विन्द्रियगोचरः ॥ १३१ ॥

'चक्षुषार्थवभासेपि' जाते तथा श्रोत्राच्छाब्दावभासेपि यमर्थमन्यव्यवच्छेदं बुद्धिपरिवर्त्तिनं परः प्रतिपादकोऽस्यार्थस्यायं वाचक इति 'शंसति' कथयति 'स एवा'न्यव्यवच्छेदः 'शब्दैर्योज्यते न खल्विन्द्रियगोचरः' स्वलक्षणमनन्वयात्तस्य । तद्दर्शनान्तरं संकेतसंकल्पे च विनाशाच्च । (१३१)

...2.132a अव्यापृतेन्द्रियस्यान्यवाङ्गमात्रेणाविभावनात् ।

'तथाऽव्यापृतेन्द्रियस्यान्यवाङ्मात्रेण' स्वलक्षणा'विभावनात्' प्रत्यक्ष इव ।

स्यादेतत् (।) संकेताविषयत्वेपि शब्दसंसृष्टमेव स्वलक्षणमध्यक्षं प्रकृत्या प्रत्येष्यतीत्याह (।)

...2.132b न चानुदितसंबन्धः स्वयं ज्ञानप्रसङ्गतः ॥ १३२ ॥

'न चानुदितसम्बन्धो' वाच्यवाचकभावो यस्य स शब्दः प्रत्यायको दृष्ट इति शेषः (।) तथाभ्युपगमे तु 'स्वयं' संकेतमनपेक्ष्यैव श्रुताच्छब्दादर्थस्य 'ज्ञानप्रसङ्गतः' । (१३२)

नन्विन्द्रियव्यापारसमकालमहिरहिरिति धारावाहिसविकल्पकमध्यक्षं प्रवर्तते । यदि तु तत्र विकल्पकमविकल्पकञ्च द्वयमिष्यते तदा विकल्पेन निर्व्विकल्पस्य व्यवधानाद् दर्शनं विच्छिन्नं स्यात् । न चैतदस्ति । न युगपज्ज्ञानसम्भवः (।) अत्राह (।)

....2.133 मनसो युगपद्वृत्तेः सविकल्पाविकल्पयोः
विमूढो लघुवृत्तेर्व्वा तयोरैक्यं व्यवस्यति ॥ १३३ ॥

[157/s]

'मनसोः सविकल्पाविकल्पयो'रेकस्मात्समनन्तरा'द्युगपद् वृत्तेः' कारणात्तयोरैक्यं 'विमूढः' प्रतिपत्ता व्यवस्यति । निर्व्विकल्पकं हि स्वलक्षणविषयं विकल्पश्च वस्तुतोऽतद्विषयत्वेप्यवसायानुरोधात्तद्विषयः[723] । सहोत्पत्तिश्चानुभवसिद्धत्वात् दुरपह्नवा । ततः सहोत्पन्नयोरेकविषययोरैक्यभ्रम एषः । पराभिमतायां युगपदनुत्पत्तावपि सविकल्पाविकल्पयोर्लघुवृत्तेः शीघ्र'वृत्ते'र्व्वा कारणात् 'तयोर्मू'ढमतिः प्रतिपत्ता 'ऐक्यं व्यवस्यति' अलातभ्रान्तौ चक्रमिव । (१३३)

यदि दर्शनमविकल्पं तदनन्तरन्तु विकल्पः पुनस्तदनन्तरं दर्शनं तदा (।)

....2.134 विकल्पव्यवधानेन विच्छिन्नं दर्शनम्भवेत् ।
इति चेद् भिन्नजातीयविकल्पेन्यस्य वा कथम् ॥ १३४ ॥

'विकल्पेन' व्यवधाना'द्विच्छिन्नं दर्शनं भवेत्' । न धारावाहीति चेत् । 'नन्वस्य' परस्यापि गां पश्यतो निर्व्विकल्पेन प्रत्यक्षेण भिन्नजातीयस्याश्वादेर्व्विकल्पे जायमाने दर्शनं कथमविच्छिन्नं

[723] १ अस्पष्टः ।

। न ह्यश्ववाचकशब्देन संयोज्य गौर्गृह्यते । येनैकमेव सविकल्पं तदध्यक्षं भवेत् । एकत्वे वाश्वप्रतीतिर्न स्यात् । गोविषयत्वात्तस्य । (१३४)
स्यादेतत् ।

....2.135 अलातदृष्टिवद् भावपक्षश्चेद् बलवान् मतः ।
अन्यत्रापि समानं तद् वर्णयोर्वा सकृच्छ्रु तिः ॥ १३५ ॥

अलातस्य भ्रम्यमानस्य नानादेशेषु लाघवाद् भावपक्षबलवत्वाच्च दर्शनप्रतिसन्धानेन चक्रदृ'ष्टिवत्' विजातीयव्यवकीर्यमाणस्य दर्शनस्यान्तरा अभावेपि[30b/MA] 'भावपक्षो बलवान् मत' इति दर्शनाविच्छेदबुद्धिरति 'चेत् । अन्यत्राभावपक्षेपि' तद्बलवत्त्वे लाघवसामर्थ्यात् 'समानं[724]' । ततो दर्शनविच्छेदलाघवाद्विच्छेदधीरेवास्तु । सरो रस इत्यादौ 'वर्णयो'र्वा लाघवा'त्स[725] कृत्श्रुतिः' प्राप्ता ॥(१३५)

## ख. परमतदूषणम्

किञ्च (।)

....2.136 सकृत् सङ्गतशब्दार्थेष्विन्द्रियेष्विह सत्स्वपि ।
पञ्चभिर्व्यवधानेपि भात्यव्यवहितेव या ॥ १३६ ॥

[158/s]

'सकृत्' यु[726] गप'त्संगताः' स्वस्वगोचरीभूताः सर्व्वेऽ'र्था'[727] येषु ते'ष्विन्द्रियेषु' चक्षुरादिषु मनःपर्यन्तेषु 'सत्स्वपीह' सङ्क्रान्तकान्तावदनप्रतिबिम्बस्य सहकारसुगन्धिनः शीतस्य भ्रमद्भ्रमरोपगीतस्य स्वादुनो मधुनः सार्व्वगुणानुभवकाले प्रसरत्संकल्पजन्मनां यूनां या मतिः 'पञ्चभि'रिन्द्रियबुद्धि'भिर्व्यवधानेपि' त्वत्पक्षे'ऽव्यव'हितेव समकालेव 'भाति' । (१३६)

....2.137 सा मतिर्नामपर्यन्तक्षणिकज्ञानमिश्रणात् ।
विच्छिन्नाभेति तच्चित्रं तस्मात् सन्तु सकृद्धियः ॥ १३७ ॥

'सेन्द्रियमतिर्नाम्नः' शब्दस्य 'पर्यन्तो' वर्णस्तस्य 'क्षणिकं ज्ञानं' तेन 'मिश्रणात्' सरो रस इत्यादिष्वविच्छिन्ना प्राप्नोति । विजातीय[728] विज्ञानान्तराव्यवधानात् । तथापि 'विच्छिन्नाभा' क्रमवती । यत्तु 'चित्रमा'श्चर्यं यदि लाघवकृतः सकृद्ग्रहाभिमानः तदा वर्णज्ञाने स नितरां युक्तो विजातीयाव्यवधानात् । इन्द्रियज्ञानेषु तु न युक्तः पञ्चभिर्व्यवधानात् । तस्मा'त्सकृद्धियः सन्तु' यथोक्तं मनसो युगपद्वृत्तेरि (२।१३३) ति ॥(१३७)
अन्य[729] था (।)

....2.138 प्रतिभासाविशेषश्च सान्तरानन्तरे कथम् ।
शुद्धे मनोविकल्पे च न क्रमग्रहणम्भवेत् ॥ १३८ ॥

---

724 २ दृष्टाविमृष्टादौ ।
725 ३ तथा क्रमाभेदात्सकृत्श्रुतिभेवो न स्यात् ।
726 १ युगपद्विज्ञानानुत्पत्तिर्मनसो लिङ्गमि?? ति दूषयन्नाह ।
727 २ युगपद्विज्ञानानुत्पत्तिपक्षे ।
728 ३ एकलोलीभूतवस्तुग्रहणात्मिका स्यात् ।
729 ४ युगपज्ज्ञानोत्पत्त्यनिष्टौ ।

'सान्तरे' पञ्चभिरिन्द्रियज्ञानैर्व्यवहितत्वात् । 'अनन्तरे' सरो रस इत्यादिके ज्ञाने विजातीयाव्यवधानात् 'प्रतिभास'स्या'विशेष'श्चाप्रसक्तः (।) स चानुभवबाधितत्वात् 'कथम'भ्युपगम इति शेषः । यदि लघुवृत्तित्वात् सकृद्ग्रहस्तदा 'शुद्धे' विजातीयाव्यवकीर्ण्णे 'मनोविकल्पे च' प्राबन्धिके 'क्रमग्रहणमनु'भवसिद्धं न 'भवेत्' ।(१३८)

...2.139a योऽग्रहः सङ्गतेप्यर्थे क्वचिदासक्तचेतसः ।

ननु यदि युगपत् ज्ञानोत्पत्तिस्तदैकत्रासक्तं पुनरुत्पत्तिधर्मकं चेतो यस्य तस्या'सक्तचेतसः क्वचिदर्थे' स्वेन्द्रियेण 'सङ्गतेपि' योऽग्रहो विज्ञानानुत्पत्तिः स कथं ।

आह (।)

...2.139b सक्त्या नोत्पत्तिवैगुण्याच्चोद्यं वै तद्द्वयोरपि ॥ १३९ ॥

[159/s]

एकत्र 'सक्त्या' विषयासञ्चारलक्षणयाऽन्यस्य भिन्नविषयस्य ज्ञानस्यो'त्पत्तिवैगुण्यात्' । अविगुणो हि समनन्तरप्रत्ययः स्वकार्यमारभते । न त्वासक्तिविगुणः । 'यच्चैतच्चोद्यं' परिहृतमस्माभिस्तद् 'द्वयोरपि' समानं युगपद्विज्ञानानुत्पत्तिवादिनोपि मते सर्व्वत्रैवेन्द्रियसंगमे समाने क्वचिदेव 'ज्ञानं क्वचिन्नेति' कुतः। (१३९)

तत्रासक्तिवैगुण्यमेव मनस उत्तरं तच्च समानमस्माकमलातदृष्टिवदिति दृष्टान्तस्यासिद्धिमाह (।)

....2.140 शीघ्रवृत्तेरलातादेरन्वयप्रतिधातिनी ।
चक्रभ्रान्तिं दृगाधत्ते न दृशां घटनेन सा ॥ १४० ॥

'शीघ्रा' प्र'वृत्तिर्भ्र'मणं यस्या'लाता'देस्त'स्यान्वयेनानुगमेन प्रतिघात' उपहतत्वं तद्वती-दृग् दृष्टि'श्चक्रा'कारां 'भ्रान्ति'मिन्द्रियजां 'धत्ते ।[730][731] न दृशां' भिन्नभिन्नदेशालातदर्शनानां 'घटनेन' योजनया 'सा' मानसी भ्रान्तिः स्फुटप्रतिभासत्वात् । 'मानसस्य' न विपर्ययात् । तस्मादहिरहिरिति विकल्पसमकालमध्यक्षं वस्तु स्फुटमवैति न तु विकल्प इति स्थितं । (१४०)

....2.141 केचिदिन्द्रियजत्वादेर्बालधीवदकल्पनाम् ।
आहुर्बालाविकल्पे च हेतुं सङ्केतमन्दताम् ॥ १४१ ॥

'केचि'दाचार्यीयाः श ङ्क र स्वा मि प्रभृतयः 'इन्द्रियजत्वा'दादिशब्दादमानसत्वानुभवाकारप्रवृत्तत्त्वादेर्हेतोः प्रत्यक्षबुद्धि'मकल्पनां बालधीवदाहुः' । दृष्टान्तसिद्ध्यर्थं । बालस्या'विकल्पे' विकल्पाभावे च 'संकेतमंदतां' हेतुमाहुः । वाच्यवाचकयोजना हि विकल्पः । सा च संकेतपूर्व्विका तदभावाद् बालस्य कल्पनाभावः । (१४१)

....2.142 तेषां प्रत्यक्षमेव स्याद् बालानामविकल्पनात् ।
सङ्केतोपायविगमात् पश्चादपि भवेन्न सः ॥ १४२ ॥

'तेषामेवं' वादिनां मते 'बालानां प्रत्यक्षमेव' ज्ञानं 'स्यान्न' विचारकं (।) किं कारणमविकल्पनात् । भवतु को दोष इति चेत् । आह 'संकेतोपायस्य' विचारस्य 'विग-

730 १ स्वमतमाख्याय परमतं निषेधति ।
731 1a तदालम्बनं ।
Placement of note uncertain; marked with a question mark in the edition (see encoding description for details).

[31a/MA] मात्’ बालानां ‘पश्चादपि’ स सङ्केतो ‘न भवेत्’ । तदभावाद्विकल्पाभावश्च । (१४२)

....2.143 मनो व्युत्पन्नसङ्केतमस्ति तेन स चेन्मतः ।
एवमिन्द्रियजेपि स्याद् शेषवच्चेदमीदृशम् ॥ १४३ ॥

[160/s]

जन्मान्तरागतं ‘व्युत्पन्न-संकेतं मनोस्ति’ बालानां ‘तेन’ संकेतः तेषां मतश्चेत् । ‘एवं’ सती‘न्द्रियजेपि’ ज्ञाने ‘स्यात्’ कल्पना तन्निवर्तकहेत्वभिधानात् ततो[732] दृष्टासिद्धिरेव । ‘इद’मिन्द्रियजत्वादि ‘ईदृशं’ निषेध्येन सहासिद्ध[733] विरोधं । शेषवच्चोक्तं । (१४३)

अथान्येन लिङ्गेनाव्यभिचारिणा बालज्ञानमविकल्पनं प्रसाध्य दृष्टान्तीक्रियते तदा (।)

....2.144 यदेव साधनं बाले तदेवात्रापि कथ्यताम् ।
साम्यादक्षधियामुक्तमनेनानुभवादिकम् ॥ १४४ ॥

‘यदेवा’व्यभिचारि ‘बाले’ बालस्येन्द्रियज्ञाने ‘साधनं तदेवात्र’ व्युत्पन्नसंकेतानामिन्द्रियज्ञानेपि ‘कथ्यतां’ किमिन्द्रिजत्वादिनोपन्यस्तेन । व्युत्पन्नाव्युत्पन्नयो‘रक्षधियाम’शब्दसंसृष्टत्वमात्रानुकरणेन ‘साम्यात्’ । अनेने’न्द्रियजत्वदूषणेना‘नुभव’ आदिर्यस्य मानसत्त्वादेस्तदुक्तं दोषवत्तया बोद्धव्यं । (१४४)

## (२) सामान्यनिरासः

### क. वर्णसंस्थानराहित्यादसिद्धिः

अविकल्पसिद्धौ पर[734] मतं दूषयित्वा स्वयं उपपत्त्यन्तरमाह (।)

....2.145 विशेषणं विशेष्यश्च सम्बन्धं लौकिकीं स्थितिम् ।
गृहीत्वा सङ्कलय्यैतत् तथा प्रत्येति नान्यथा ॥ १४५ ॥

‘विशेषणं’ व्यवच्छेदकं ‘विशेष्यं’ व्यवच्छेद्यं तयोः ‘सम्बन्धं’ यथासम्भवं समवायादिकं ‘लौकिकीं’ लोकप्रसिद्धां ‘स्थितिं’ व्यवस्थाञ्च जात्यादिकं विशेषणं विशेष्यं द्रव्यादि विशेषणविशेष्यशब्दयोश्च पूर्व्वापरनियम इति पृथक् प्रत्येकं स्वरूपेण ‘गृहीत्वा’ तदनन्तर‘मेतत्’ सर्व्वं ‘सङ्कलय्य’ संयोज्य ‘तथा’ विशेषणविशिष्टत्वेन ‘प्रत्येति’ विशिष्टबुद्धि‘र्नान्यथा’ । विशेषणाद्यग्रहणे । (१४५)

[161/s]

....2.146 यथा दण्डिनि । जात्यादेर्व्विवेकेनानिरूपणात् ।
तद्वता योजना नास्ति कल्पनाप्यत्र नास्त्यतः ॥ १४६ ॥

‘यथा दण्डिनि’ दण्डीति विशिष्टबुद्धिः दण्डपुरुषतत्सम्बन्धादिग्रहणपूर्व्विका तदग्रहे च न भवति । जातिरादिर्यस्य गुणकर्मादेः ‘स्वरूपस्य जात्या[735] दिमतो विवेकेनानिरूपणात् तद्वता’ जातिमता ‘योजना’ विशेषणविशेष्यभावो ‘नास्ति । अतो’ योजनाविरहात् ‘अत्र’ जातिमदादौ

[732] १ असिद्धिर्दृष्टे वस्तुनि ।

[733] २ विपक्षे बाधनादर्शनात् ।

[734] ३ जातिगुणक्रियाद्रव्यसम्बन्धभेदाच्चतुष्टयी शब्दानां प्रवृत्तिरिति सविकल्पवादिनं निषेधति ।

[735] १ इयं जातिरयं जातिमानित्यादिविवेकेन न भाति यतो योजना स्यात् दण्डिवत् ततो न जात्यादयः सन्ति ।

'कल्पनापि नास्तीति' तस्माज्जात्यादियोजनात्मिका कल्पना नास्ति । शब्दयोजनात्मिका तु 'सम्भाव्येत' । सापि स्वलक्षणे संकेताभावान्निरस्ता प्राक्॥ (१४६)

ननु यदि सामान्याभावस्तदा विभिन्नासु व्यक्तिषु कथमन्वयिप्रत्यय इत्याह (।)

...2.147a यदप्यन्वयिविज्ञानं शब्दव्यक्त्यवभासि तत् ।

'यदप्यन्वयिविज्ञानमु'त्पद्यते, तच्च 'शब्द'स्य गौरित्यादे'र्व्यक्ते'श्च वर्णसंस्थानविशेषस्य आभास आकारस्तद्वत्प्रतीयते न जात्याभासवत् ।

किं पुनः सामान्याभासमेव नेत्याह (।)

...2.147b वर्णाकृत्यक्षराकारशून्यं गोत्वं हि वर्ण्यते ॥ १४७ ॥

'वर्णो' नीलादिरा'कृतिः' संस्थान'मक्षरं' गवादिशब्दः । तेषामाकारो यथा प्रतीतः तेन 'शून्यं गोत्वं हि' सामान्यवादिभि'र्वर्ण्यते' (१४७)

अतोऽन्वयिविज्ञाने यद्वर्णसंस्थानादि प्रतिभासते न तत्सामान्यं (।)

....2.148 समानत्वेपि तस्यैव नेक्षणं नेत्रगोचरे ।
प्रतिभासद्वयाभावात् बुद्धे र्भेदश्च दुर्लभः ॥ १४८ ॥

'तस्यैव समानत्वे' वा स्वीक्रियमाणे 'नेत्रगोच'रेऽर्थे नाङ्गीकर्तव्यमीक्षणं । [विकल्पप्रतिभासिनः] 'प्रतिभासद्वयस्य' स्फुटास्फुटवर्णसंस्थानवतो'ऽभावात्' । एकाकारमेव ज्ञानं यद्युभयाभासमङ्गीक्रियते तदा 'बुद्धे'(र्भे)दः प्रत्यक्षत्वाप्रत्यक्षत्वादिना दुर्लभः । यदपि स्पष्टप्रतिभासमध्यक्षं तदप्यनक्षजं स्यात् । अस्पष्टप्रतिभासत्वात् । एवमनक्षजमध्यक्षं स्यात् । स्पष्टप्रतिभासत्वात् । तस्माददृष्टेन सामान्यादिना न योजयतीत्यकल्पनमध्यक्षं (। १४८)

[162/s]

### ख. समवायस्यातीन्द्रियत्वादसिद्धिः

किञ्च (।)

...2.149a समवायाग्रहादक्षैः सम्बन्धादर्शनं स्थितम् ।

'समवा[736] य'स्यातीन्द्रियस्या'ग्रहादक्षै'रक्षभवैर्विज्ञानैर्जातितद्वतोः 'सम्बन्ध'स्या[737]विशिष्टप्रतीत्या'ऽदर्शनं स्थितं' निश्चितं यद्बलेन यत्प्रतीतिस्तदग्रहे न युक्ता सा ।

य[738] दि नास्ति समवायस्तदेह तन्तुषु पट इत्यादयो बुद्धयो न स्युरित्याह (।)

...2.149b पटस्तन्तुष्विहेत्यादिशब्दाश्चेमे स्वयं कृताः ॥ १४९ ॥

[31b/MA]

इह 'तन्तुषु पट इत्यादि शब्दाः इमे स्वयं' समयानुलोचनैः 'कृता' न वस्तुपराधीनाः । (१४९)

तथा[739] हि (।)

...2.150a शृङ्गं गवीति लोके स्यात् शृङ्गे गौरित्यलौकिकम् ।

[736] १ इह बुद्धिनिबन्धनोनुमेय इष्टः ।

[737] २ सम्बन्धाग्रहे तद्विशिष्टाग्रहात् ।

[738] ३ समवायास्तित्वमाह ।

[739] ४ नापि लौकिका इत्याह ।

'शृङ्गं गवि' तिष्ट'तीति लोके स्यात्' प्रमाणप्रसिद्धोरनुरोधात् । 'शृङ्गे गौरिति तु' तदुपकल्पित'मलौकिकं' प्रमाणप्रसिद्धिबहिर्भावात् ।

### (३) अवयविनिरासः

यद्यवयवेभ्यो न गौर्भिन्नस्तदा गवि शृङ्गमित्यपि न स्यादित्याह[740] (।)

...2.150b गवाख्यपरिशिष्टाङ्गविच्छेदानुपलम्भनात् ॥ १५० ॥

शृङ्गस्य 'गवाख्यैः परिशिष्टा[741]ङ्गैर्विच्छेदेस्य' वियोगस्या'नुपलम्भनात्' शृङ्गं गवीत्युच्यते न त्ववयवातिरिक्तगोसद्भावात् । (१५०)

ननु तन्तुषु पट इति भवत्येव प्रतीतिरिति चेत् । आह (।)

....2.151 तैस्तन्तुभिरियं शाटीत्युत्तरं कार्यमुच्यते ।
तन्तुसंस्कारसम्भूतं नैककालं कथञ्चन ॥ १५१ ॥

'तैस्तन्तुभिः' पटावस्थाप्राग्भाविभि'रियं शाटीति' कारणभूततन्तूत्तरकालभावि'तन्तू'ना- 'सँस्कार'स्तुरीवेमकुविन्दकरादिसहकारी प्रभवावस्थाविशेषलाभः । तस्मात्त्वरसेन निरुध्यमानात्सं'भूतंकार्यमुच्यते' । न तु तन्तुभिः सहै'ककालं' कार्यं [163/s] तन्तुपट इति 'कथञ्चन कथ्यते' कार्यकारणयोः सम[742] कालत्वाभावात् (। १५१)

यदि नास्ति तन्तुपटयोर्भेदस्तदा कथमेते तन्तवः पटश्चायमिति व्यपदेश इत्याह (।)

....2.152 कारणारोपतः कश्चित् एकापोद्धारतोपि वा ।
तन्त्वाख्यां वर्त्तयेत् कार्ये दर्शयन् नाश्रयं श्रुतेः ॥ १५२ ॥

'कारणा'नान्तन्तूनामा'रोपतः' । 'एक'स्य तन्तोर'पोद्धारतो' बुद्ध्या निःकर्षणात् वा 'कश्चिद्' व्यवहर्त्ता कार्ये पटे 'तन्त्वाख्यां' तन्तुश्रुतिं 'वर्तयेत्' । पटश्रुतेराश्रयं कारणं 'दर्शयेन् न' तन्तुभ्यो व्यतिरिक्तः 'पटोस्ति' एवमाकारपरिणतास्तन्तवः पट इत्यर्थः । (१५२)

यदि तन्तवः केवला न तेभ्यः पटोऽन्यस्तदा पटव्यपदेशो निर्निबन्धनः स्यादित्याह (।)

...2.153a उपकार्योपकारित्वं विच्छेदाद् दृष्टिरेव वा ।

तन्तूनां परस्परं शीताद्यपनोदक्षमं साहित्य'मुपकार्योपकारित्वं' । अन्योन्यस्य 'विच्छेदाद् दृष्टिरेव वा' पटव्यपदेशनिब[743] न्धनमिति शेषः ॥

यदि व्यतिरिक्तं व्यपदेशनिबन्धनं नास्ति तदा पट इति व्यपदेशो न मुख्यः स्यात् । बाही के गोव्यपदेशवदित्याह (।)

...2.153b मुख्यं यदस्खलज्ज्ञानमादिसंकेतगोचरः ॥ १५३ ॥

'मुख्य'न्तदुच्यते 'यदादिसंकेत'स्य 'गोचरो' न व्यतिरिक्त इत्येव परस्पराविच्छेदावस्थेषु च पटश्रुतेः संकेता'दस्खल'द्गतिगोचरत्वान्मुख्यत्वं । [744] तस्मात्प्रत्यक्षतो जातेरनुपलम्भाद्योजनाविरहः । (१५३)

[740] ५ अतीन्द्रियत्वान्न समवायादयं व्यपदेशः किन्तु ।
[741] ६ सास्नाद्यैः ।
[742] १ समवायस्तु समकालयोरेव ।
[743] २ न समवायः ।
[744] ३ यथा सास्नादिमान् गौः ।

## (४) नानुमानतः सामान्यसिद्धिः

स्यादेतत् (।) विशिष्टप्रतीतिर्व्विशेषणप्रतीतिपूर्व्विका यथा दण्डिप्रतीतिः । विशिष्टप्रतीतिश्च शावलेयादिषु गौरिति विशेषणश्च शावलेयादिषु गोत्वमेवेत्यनुमानतो जातिसिद्धिरित्याह (।)
[164/s]

...2.154a अनुमानञ्च जात्यादौ वस्तुनो नास्ति भेदिनि ।

'अनुमानं वस्तुनः' शाबलेयादे'र्भेदिनि जात्यादौ नास्ति' । न हि व्यक्तिव्यतिरिक्तं विशेषणमुपलभ्यते शृङ्गाद्यवयवसन्निवेश एव त्वभिन्नो विशेषणमस्तु । तथा च नाभिमतसिद्धिः ।

दृष्टान्तासिद्धिमप्याह (।)

...2.154b सर्व्वत्र व्यपदेशो हि दण्डादेरपि सांवृतात् ॥ १५४ ॥

'सर्व्वत्र पुरुषादौ' दण्डीत्यादि'व्यपदेशो'पि 'हि' न 'दण्डादे'र्व्वस्तुनः किन्तु 'सांवृतात्[745]' । दण्डस्वलक्षणस्य व्युपदेशे हेतुत्वे सर्व्वत्र पुरुषे स्यात् । सम्बन्धिन्येवान्यत्रेति चेत् । तर्हि सम्बन्धो दण्डः कारणं दण्डि व्यपदेशस्य सम्बन्धश्च संयोगादिर्नास्तीति परं कार्यकारणभावः परिशिष्यते । तस्य निमित्तत्वे यथा दण्डी पुरुषस्तथा पुरुषी दण्ड इत्यपि स्यात् । समानत्वान्निमित्तस्य (।) तस्मात् कल्पितविशेषणभावनियमो दण्डः सम्बन्धी सांवृत एव विशेषणं । (१५४)

किञ्च (।)

....2.155 वस्तुप्रासादमालादिशब्दाश्चान्यानपेक्षिणः ।
गेहो यद्यपि संयोगस्तन्माला किन्तु तद्भवेत् ॥ १५५ ॥

षट्सु पदार्थेषु 'वस्तु' वस्त्विति सर्व्वानुयायी शब्दः प्रासादेषु 'प्रासादमाले'ति शब्दो गृहे[746]षु बहुषु नगरमित्या'दिशब्दाश्चान्यानपेक्षिणो' ऽर्थान्तरभूतविशेषणरहिता [32a/MA] इति व्यभिचारिता[747] हेतोः । न हि पदार्थेषु व्यतिरिक्तं सामा[748] न्यं वस्तुतात्वमभ्युपगम्यते वै शे षिकैः । न च प्रासादो द्रव्यं विजातीयानां द्रव्यानारम्भात् । ततश्च मालागु[749] णोपि 'गेहो[750] यद्यपि संयोगस्त'स्य 'माला किन्तु तद् भवे[751] त्' । न भावगुणो निर्गुणत्वात् गुणानां । (१५५)
[165/s]

### क. सामान्यस्वीकारे दोषः

....2.156 जातिश्चेद् गेह एकोपि मालेत्युच्येत वृक्षवत् ।
मालाबहुत्वे तच्छब्दः कथं जातेरजातितः ॥ १५६ ॥

---

745 १ दण्डदण्डिनोः परस्परोपकार्योपकारकभावोपकल्पितादवस्थाविशेषादर्थान्तरभूतात् ।

746 २ आदिना ।

747 ३ अनैकान्तिकता ।

748 ४ वस्तुवस्त्विति ।

749 ५ न द्रव्यं ।

750 ६ अर्थान्तरसंयोगाभावादभ्युपगम्योच्यते ।

751 ७ वस्त्वनन्तर्भा(वा)न्न किञ्चित् ।

'जातिश्चेद'भ्युपगम्यते 'एको गेहो मालेत्युच्येत वृक्षवत्' । यथा वृक्षत्वजातियोगादेको वृक्षो वृक्ष इत्युच्यते एवमेकोपि गेहो माला स्यात् । तथा गेहमालानां बहुत्वे 'तच्छब्दो' मालेत्यनुगामिशब्दः 'कथं जाते[752]' र्मालायां 'अजातितो' जात्यन्तरविरहात् । (१५६)

किञ्च (।)

....2.157 मालादौ च महत्वादिरिष्टो यश्चौपचारिकः ।
मुख्याविशिष्टविज्ञानग्राह्यत्वान्नौपचारिकः ॥ १५७ ॥

महती प्रासादमालेति कथं व्यपदेशः । महत्वं परिमाणं गुणः । तस्य मालायां न सत्त्वं(।) न हि प्रासादमाला किञ्चिदित्युक्तं । नापि संयोगलक्षणे प्रासादे महत्त्वं निर्गुणत्वा(त्) गुणानां । काष्ठादिषु द्रव्येषु प्रासादारम्भकेषु महत्त्वसत्त्वाद्वृक्षेषु कुसुमसम्भवाद्[753] वनसंख्यालक्षणं कुसुमितमिति यथोच्यते । तथा प्रासाद'मालादौ महत्वादिरौपचारिको' यश्चेष्टः स चायुक्तः काष्ठादिष्वपि तादृशस्य मह[754] त्त्वस्याभावात् ।

किञ्च(।) महान् पर्व्वत इति[755] 'मु'ख्यमहत्त्वग्राहकज्ञानेनास्खल[756] द्वृत्तित्वादविशिष्टेन ज्ञानेन ग्राह्यत्वात् प्रासादमालामहत्वादि'रौपचारिको' न युक्तः (।) न हि माणवक इव सिंहबुद्धिर्महत्त्वबुद्धिश्च मालायां स्खलति । (१५७)

किञ्च (।) भिन्नविशेषणं 'मुख्य'मभिन्नविशेषणञ्चामुख्यमिति यदुच्यते तदप्ययुक्तमित्याह (।)

....2.158 अनन्यहेतुता तुल्या सा मुख्याभिमतेष्वपि ॥
पदार्थशब्दः कं हेतुमन्यं षट्कं समीक्षते ॥ १५८ ॥

'मुख्याभिमतेष्वपि' दण्ड्यादिष्व'नन्यहेतुता' भिन्नविशेषणनिमित्तरहितता 'तुल्या' गौणेन [757] सर्व्वत्र व्यपदेशो हि दण्डा[758] देरपि सांवृतादि(२।१५४)त्युक्तेः । किञ्चा[166/s] नुयायी 'पदार्थशब्दः' षष्ठ्या पदार्थेषु 'कमन्यं हेतुं' निमित्तं प्रवृत्तौ 'समीक्ष्यते' (? क्षते)[759] । न हि षड्पदार्थातिरिक्तं किञ्चिदस्ति (।) (१५८)

...2.159a यो यथा रूढितः सिद्धः तत्साम्याद्यस्तथोच्यते ।

तस्माद्योऽर्थो येन प्रकारेण रूढितः आदिसंकेतानुसारेण सिद्धः स मुख्यः । यश्च तस्य मुख्यस्य साम्यात्तथामुख्यवाचकशब्देनोच्यते स गौणः (।)

कुत एतदित्याह (।)

...2.159b यत्र गौणश्च भावेष्वप्यभावस्योपचारतः ॥ १५९ ॥

'भावेष्वपि' कुपुत्रादिषु पुत्रादिरित्यभावो'पचारतः' । परमते तु भावे वृत्तत्वान्मुख्यत्वं भवेत् । (१५९)

---

[752] १ निःसामान्यानि सामान्यानीति वचनात् ।
[753] २ अवयव्यभावाद्वनसंख्या ।
[754] ३ प्रत्यवयदेषु ।
[755] ४ अस्मन्मते ।
[756] ५ मुख्यविषयौ यौ शब्दप्रत्ययौ ताभ्यामविशिष्टो यः प्रत्ययस्तेन ग्राह्य एतावन्मात्रनिमित्तत्वान्मुख्यत्वव्यवस्थायाः ।
[757] ६ सह मुख्येषु ।
[758] ७ असत एव विशेषणत्वेनोपनयात् ।
[759] १ पूर्व्वमनुमादूषणे उक्तेधुना मुख्योपचारलक्षणदूषणे ।

### ख. विवक्षान्वयिसंकेतानुगमत्वाद् रूढेः

स्यादेतद् (।) रूढ्यैव मुख्यता किन्तु सापि भिन्ने विशेषणे सतीत्याह (।) न (।)

....2.160 संकेतान्वयिनी रूढिर्वक्तुरिच्छान्वयी च सः ।
क्रियते व्यवहारार्थं छन्दः शब्दांशनाभवत् ॥ १६० ॥

'संकेतान्वयिनी' यथासंकेतं 'रूढिः स च' संकेतो 'वक्तुः[760]' संकेतयितु'रिच्छान्वयी व्य[761] वहारार्थं क्रियते । छन्दसो' गायत्र्या[762] देः 'शब्दां[763]'शस्य प्रकृतिप्रत्ययादे'र्नामवत्' । न हि विशिष्टानुपूर्व्वीकेषु वर्ण्णेषु पृथग्भूतं गायत्र्यादिशूब्दनिमित्तं किञ्चिदस्ति । शब्दांशेषु वाऽपि तु संकेतयितुरिच्छानुरोधादेव तथा व्यपदेशः । (१६०)

यदि व्यक्तिभ्यो न भिन्नं सामान्यं तदा कथमनुगामी प्रत्यय इत्याह (।)

....2.161 वस्तुधर्मतयैवार्थास्तादृग्विज्ञानकारणम् ।
भेदेपि यत्र तज्ज्ञानांत्तान्तथा प्रतिपद्यते ॥ १६१ ॥

[167/s]

'वस्तुधर्मतया' प्रकृ'त्यैव' केचि'दर्थाः' परस्परं 'भेदेपि तादृ'शस्यानुगामिनोऽतत्कार्यव्यावृत्तिविषयस्य 'विज्ञानस्य कारणं' । यत्र येष्वर्थेष्वनुगामि ज्ञानं तानभेदिनोऽर्थान् 'तथा' एकत्वे'न प्रतिपद्यते' न त्वेकसामान्यं (? न्य-) बलात्तथा ज्ञानं । (१६१)

स्यादेतत् । प्रतिव्यक्ति ज्ञानान्यपि भिन्नानीति कथमनुगामि ज्ञानमित्याह (।)

....2.162 ज्ञानान्यपि तथा भेदेऽभेदप्रत्यवमर्शने ।
इत्यतत्कार्यविश्लेषस्यान्वयो नैकवस्तुनः ॥ १६२ ॥

'ज्ञानान्यपि' परस्परतो 'भेदे तथा'ऽर्थवद्वस्तुधर्मितया'ऽभेदप्रत्यवमर्शने' निमित्तं ततो ज्ञानान्यपि तदेकपरामर्शगोचरतयाऽनुगामिप्रत्यय उच्यन्ते इत्यनेन प्रकारेण भेदिष्वर्थेष्वत'त्कार्या-'दर्थस्य 'विश्लेषो' व्यवच्छेदस्तस्या'न्वयो' विद्यते। 'न त्वेकस्य'[32b/MA] 'वस्तुनः' सामान्यस्य (। १६२)

...2.163a वस्तूनां विद्यते तस्मात्तन्निष्ठा वस्तुनि श्रुतिः ।

'व[764] स्तूनां' विशेषाणामन्वयो 'विद्यते'ऽनुपलम्भबाधितत्वात्तस्य । 'तस्मात् तन्निष्ठा' व्यावृत्तिविषया 'वस्तु'नि 'श्रुतिः' प्रवर्तते ।

## (५) अन्यापोहचिन्ता

### क. अतत्कार्यव्यावृत्तिः

नन्वतत्कार्यव्यावृत्तिर्वस्तुनः स्वभावभूता ततो व्यावृत्तिविषयत्वे 'वस्तुविषयतैव शब्दस्य' स्यादित्याह[765] (।)

[760] २ नान्तरनिमित्तः ।
[761] ३ एवं तर्हि किमर्थं क्रियते आह ।
[762] ४ अर्थान्तरविशेषणम्विना वृत्तेष्वनष्टवादिनामवत् ।
[763] ५ अवयव ।
[764] १ वस्तुषु ।
[765] २ न च शब्दो वस्तुस्पर्शीत्यनेनास्य विरोधं मन्यते ।

...2.163b बाह्यशक्तिव्यवच्छेदनिष्ठाभावेपि तच्छ्रुतिः ॥ १६३ ॥

'बाह्य'स्य वस्तुनः 'शक्ते'रतत्कार्याद्यो 'व्यवच्छेद'स्तत्र 'निष्ठा' विषयित्वं तस्याभावेपि 'तच्छ्रुति'र्व्यवच्छेदवाचिनी श्रु[766] तिः । (१६३)

....2.164 विकल्पप्रतिबिम्बेषु तन्निष्ठेषु निबध्यते ।
ततोन्यापोहनिष्ठत्वादुक्तान्यापोहकृच्छ्रुतिः ॥ १६४ ॥

विक'ल्पानां प्रतिबिम्बे'ष्वाकारेषु 'तन्निष्ठेषु' तद्व्यावृत्तिवस्तुत्वेन व्यवस्थाविषयतया तद्व्यवहारव्यवस्थितिषु संके[767]तकाले 'निबध्यते । ततो' विकल्पप्रति[168/s] बिम्बानां बाह्य[768] व्यावृत्तात्मत्वेन व्यवहारविषयत्वादन्या'पोहनिष्ठत्वा'त्कारणा'दुक्ता श्रुतिरन्यापोहकृत्' । अन्यव्यावृत्ताकारविकल्पजननात् अन्यव्यावृत्तेषु प्रव[769] र्तनाच्च शब्दोऽन्यापोहकृदुक्तः । (१६४)
ननु शाब्दे ज्ञाने ग्राह्यं बाह्यतयैव प्रतीयते न ज्ञानाकारतयेत्याह (।)

....2.165 व्यतिरेकीव यज्ज्ञाने भात्यर्थप्रतिबिम्बकम् ।
शब्दात्तदपि नार्थात्मा भ्रान्तिः सा वासनोद्भवा ॥ १६५ ॥

'शब्दादु'त्पन्न'ज्ञानेऽर्थप्रतिबिम्बकं व्यतिरेकीव' भिन्नं बाह्यमिव 'यदाभाति तदपि नार्थात्मा' बहिरर्थस्वरूपं किन्तु 'भ्रान्तिः सा वासना[770] निर्मिता' । यथा तैमिरिकदृष्टेषु केशादिषु बाह्यभ्रमः । एवं विकल्पाकारेपि बाह्यव्यवहारोऽविद्यावशादित्यर्थः । (१६५)
ज्ञाना[771] कारस्तर्हि वस्तुभूतो वाच्यः स्यादित्याह (।)

....2.166 तस्याभिधाने श्रुतिभिरर्थे कोंशोवगम्यते ।
तस्यागतौ च संकेतक्रिया व्यर्था तदर्थिका ॥ १६६ ॥

'तस्य' ज्ञानाकारस्य 'श्रुतिभिरभिधानेऽर्थे'ऽतत्कार्यव्यावृत्ते शब्देनाचोदिते कोंशोवगम्यते न कश्चित्तदकार्यव्याव'त्तस्या'र्थस्य शब्दा'दगतौ च' सत्यां 'संकेतक्रिया व्यर्था' य[772] स्मा'त्तदर्थिका' अतत्कार्यव्यावृत्तार्थप्रतीतिफला सेष्यते । (१६६)
एवन्तर्ह्यन्यापोहेपि संकेते कृते प्रवृत्तिरर्थेषु न स्यात् । तस्यार्थात्मत्वाभावादित्याह ।[773]

....2.167 शब्दोर्थांशंकमाहेति तत्रान्यापोह उच्यते ।
आकारः स च नार्थेस्ति तं वदन्नर्थभाक् कथम् ॥ १६७ ॥

'शब्दोऽर्थांशंकमाहेति' प्रश्ने 'तत्रान्यापोहो'ऽतत्कार्यव्यावृत्तिः सर्व्वविशेषसंभविनी वाच्यतयो'च्यते' । अतोऽर्थांशात्मन्यन्यापोहे गृहीतसंकेतः शब्दादुच्चरितार्थं प्रतीत्य तत्र प्रवर्त्तित इति युक्तं । यस्तत्रा[774] 'क्षाकारः स चार्थे नास्ति तं' बुद्ध्याकारं 'वदन् शब्दोऽर्थभाक्' बाह्यार्थाभिधायी कथमस्तु । (१६७)
[169/s]

[766] ३ कथमिति न वृत्तेन सम्बन्धनीयः ।
[767] ४ स्वलक्षणविकल्पविषययोरैक्यभ्रान्त्या ।
[768] १ वस्तुविवेकनिष्ठत्वात् ।
[769] २ दृश्यविकल्पयोरेकीकरणात् ।
[770] ३ स्वलक्षणानुभववासनाहेतु ।
[771] ४ सावतारः श्लोकः पूर्व्वपक्षः ।
[772] ५ कुत इत्याह ।
[773] ६ अत्राह सिद्धान्ती ।
[774] ७ बाह्यनीलादिदर्शनाभ्यासायातो ज्ञानीयः ।

किञ्च (।)

....2.168 शब्दस्यान्वयिनः कार्यमर्थेनान्वयिना स च ।
अनन्वयी धियोऽभेदाद् दर्शनाभ्यासनिर्म्मितः ॥ १६८ ॥

‘शब्दस्या[775] न्वयिनो’ऽन्वयिना‘र्थेन कार्यं’ व्यवहारकाले प्रतीतिलक्षणं प्रयोजनं । ‘स च’ बुद्ध्याकारः स्वलक्षण‘दर्शनाभ्यासेन’ वासना‘निर्म्मितोऽन[776] न्वयी धियो’ऽनन्वयिन्या ‘अभेदात्’ । (१६८)

ननु यद्यर्थः शब्दस्य न विषयस्तदा तदं शरूपोप्यन्यापोहः कथं वाच्य इत्याह (।)

....2.169 तद्रूपारोपगत्यान्यव्यावृत्ताधिगतेः पुनः ।
शब्दार्थार्थः स एवेति वचने न विरुध्यते ॥ १६९ ॥

बुद्ध्या[777] कारे तद्रूपस्यापर्थांशापोहस्या‘रोपगत्या’ एकत्वाध्यवसायेना‘न्यव्यावृत्तस्या’र्थ[778] स्या‘धिगतेः शब्दार्था’शापोहः शब्दार्थ उच्यते । न तु सामान्याच्छब्दादर्थप्रतीतेः । यदि पुनर्बुद्ध्याकारस्य व्यावृत्तार्थत्वेन प्रतीतेः स बुद्ध्याकार एव शब्दार्थ इत्युपचारादुच्यते बुद्ध्याकारशब्दार्थवादिना (।) तदेवं ‘वचने’ किञ्चिदपि ‘न विरुध्यते’ । बुद्ध्याकारस्यान्वयिनः शब्दार्थत्वानिष्टेः । (१६९)

### ख. अन्यापोहकृच्छब्दः

...2.170a मिथ्यावभासिनो वैते प्रत्ययाः शब्दनिर्म्मिताः ।

मिथ्या‘वभासिनो वा शब्दनिर्मिता एते प्रत्ययाः’ । तथा हि न तावदर्थः शब्दबुद्धेर्विषयः । तत्स्वरूपानवभासतः । तत्र शब्दसंकेताभावाच्च । नापि बुद्ध्याकारस्तस्य वेदनेपि विषयत्वेनानध्यवसायात् स्वलक्षणत्वात् संकेताभावाच्च । न हि बुद्ध्याकारस्य बहिष्ट्वं बाह्यस्य वा बुद्ध्याकरत्वमस्ति येन तथेति भासः सत्यप्रतिभासः स्यात् । तस्माद्वस्तुतोऽवस्तुप्रतिभासिनः शाब्दाः प्रत्ययाः ।

कथन्तर्हीदानीमर्थांशापोहकृच्छ्रुतिरुक्तेत्याह[779] (।)

...2.170b अनुयान्तीममर्थांशमिति वापोहकृच्छ्रुतिः ॥ १७० ॥

[170/s]

‘इमम’न्यापोहम‘र्थांशं’ शब्दा अतत्प्रतिभासित्वेपि ‘अनुयान्ति’ वृत्तिविषयत्वेन व्यवस्थापयन्ति । अर्थदर्शनायातत्वेन परस्परं या तत्प्रतिबन्धनादिति चान्या‘पोहकृच्छ्रुति’रु[780] क्ता । (१७०)

...2.171a तस्मात् संकेतकालेपि;

[775] १ गोगौ/?/रिति ।
[776] २ यत्र बुद्धौ भासते ततोऽभिन्नः ज्ञानवत् ।
[777] ३ विनारोपं व्यवहाराभावात् यथा संगतिस्तस्य तथाह ।
[778] ४ स्वलक्षणस्य ।
[779] ५ अनिष्टं परित्यज्य इष्टे प्रवर्तनात् शब्दाः ।
[780] १ नैतेषु विषये प्रवर्तयेयुरिति (दिग्)नागेन ।

[33a/MA]

यस्माद् व्यवहारकालेऽन्यव्यवच्छेदप्रतीतिः शब्दात् 'तस्मात्संकेतकालेप्य'न्यापोहः श्रुतौ वाच्यतया सम्बध्यते नान्यत् ।

नन्वर्थमुपदर्श्य संकेतः क्रियते तत्कथमपोह उच्यत इत्याह (।)

...2.171b निर्दिष्टार्थेन संयुतः ।
स्वप्रतीतिफलेनान्यापोहः संबध्यते श्रुतौ ॥ १७१ ॥

'निर्दिष्टेनार्थेना'न्यव्यावृत्तेन व्यवहारकाले 'स्व'स्य 'प्रतीतिः फलं' प्रयोजनं यस्य तेन 'संयुतो'ऽभेदाध्यवसायादेकत्वमुपनीतो'ऽन्यापोहो' बुद्ध्याकारस्वभावः 'श्रुतौ सम्बध्यते' न त्वर्थ एव । (१७१)

[781] तथा हि (।)

....2.172 अन्यात्रादृष्ट्यपेक्षत्वात् क्वचित्तद्दृष्ट्यपेक्षणात् ।
श्रुतौ संबध्यतेपोहो नैतद् वस्तुनि युज्यते ॥ १७२ ॥

संकेतस्या'न्यत्र' व्यवच्छेद्ये'ऽवृक्षेऽदर्शनापेक्षत्वात् । क्वचि'दव्यवच्छेद्ये वृक्षैकदेशे 'दृष्ट्यपेक्षणात् श्रुता'वपोहः 'सम्बध्यत' इति निश्चीयते । 'वस्तुनि'सामान्यादौ संकेतविषये एतत् व्यवच्छेद्याव्यवच्छेद्ययोर्दर्शनादर्शनापेक्षणं 'न युज्यते' ।[782] वस्तुनि विधिमुखेन प्रतिपाद्ये किमन्यत्रादर्शनापेक्षया । अपेक्ष्यते च ततोऽन्यव्यवच्छेद एव प्रतिपाद्यत इति गम्यते । अन्यव्यवच्छेदः सामान्यादिकं चापेक्ष्यते विपक्षपरिहारेण प्रतिपत्त्यर्थमिति चेत् ।[783] अलं तदा सामान्येन । अन्यव्यवच्छेदेनैव व्यवहारपरिसमाप्तेः । (१७२)

यतश्च जातिगुणक्रियादीनि विशेषणानि वस्तुग्राहिणि ज्ञाने नाभासन्ते (।)

....2.173 तस्माद् जात्यादितद्योगा नार्थे तेषु च न श्रुतिः ।
संयोज्यतेन्यव्यावृत्तौ शब्दानामेव योजनात् ॥ १७३ ॥

'तस्माज्जात्यादयस्तेषां योगा[784] श्चार्थे[785] न' सन्ति । 'अत'स्तेषु 'श्रुतिश्च नोप'युज्यते । 'अन्यव्यावृत्तावेव' प्रतीतिसिद्धायां 'शब्दानां योजनात्' । (१७३)

[171/s]

### (६) क. प्रत्यक्षे शब्दकल्पनानिरासः

तदेवं जात्यादिकल्पना तत्सम्बन्धकल्पना च नास्तीत्युक्तं । शब्दकल्पनापि न सम्भवतीत्याह (।)

....2.174 संकेतस्मरणोपायं दृष्टसंकलनात्मकम् ।
पूर्वापरपरामर्शशून्ये तच्चाक्षुषे कथम् ॥ १७४ ॥

शब्दकल्पनं हि पूर्वगृहीतस्य 'संकेत'स्य 'स्मरणमुपायो' यस्य संकेतस्मरणोपायं वाचकत्वेन 'दृष्ट'स्य शब्दस्य 'संकलनं' तथायोजन[786] 'मात्मा' यस्य तत् दृष्टसंकलनात्मकं

781 २ विधिमुखेन सामान्यनिमित्तशब्दप्रवृत्तौ दोषमाह ।
782 ३ तथा हि सामान्ये ।
783 ४ कल्पनानुविद्धार्थग्रहणं ।
784 ५ सम्बन्धाः ।
785 ६ इन्द्रियविषये ।
786 १ वर्त्तमानार्थेन ।

प्रसिद्धं । तच्च 'पूर्व्वं'स्य संकेतकालदृष्टवाचकशब्दस्या'परस्य' दृश्यमानार्थस्य 'परामर्शो' वाच्यवाचकतायोजनन्तेन शून्या शब्दामिश्रवस्तुस्वरूपग्राहिणि 'चाक्षुषे' ज्ञाने 'कथं' संभाव्यते । चाक्षुषं चाक्षजमात्रोपलक्षणमिन्द्रियज्ञानमित्यर्थः । (१७४)

किञ्च (।)

....2.175 अन्यत्र गतचित्तोपि चक्षुषा रूपमीक्षते ।
तत्संकेताग्रहस्तत्र स्पष्टस्तज्ज्ञा च कल्पना ॥ १७५ ॥

दृश्यमानादर्थाद'न्यत्रा'तीतादौ विकल्पनीये 'गतचित्तः' प्रवृत्तविकल्पोपि द्रष्टा 'चक्षुषा-' चक्षुर्व्विज्ञानेन 'रूपमीक्षते' । तस्य दृश्यमानार्थस्य 'संकेतः' संकेतविषयो वाचकं नाम तस्या'ग्रहो'ऽस्मरणं 'तत्र' चाक्षुषे ज्ञाने 'स्पष्टः' । तत'स्तज्ज्ञा' वाचकनामस्मरणप्रभवा 'कल्पना च' चाक्षुषे ज्ञाने नास्तीति शेषः । (१७५)

किञ्च (।)

....2.176 जायन्ते कल्पनास्तत्र यत्र शब्दो निवेशितः ।
तेनेच्छातः प्रवर्त्तेरन् नेक्षेरन् बाह्यमक्षजाः ॥ १७६ ॥

तत्र विषये शब्दयोजनात्मिकाः 'कल्पना जायन्ते । यत्र' संकेतकाले 'शब्दो निवेशितः' । न चेन्द्रियविषये शब्दसंकेत इति न तत् ज्ञानं शब्दयोजनात्मकं (प्राक्) । अथेन्द्रियविषय एव शब्दनिवेशस्तदा 'तेन' शब्दविषयत्वेन कारणे'नेच्छातः प्रवर्त्तेरन्नक्षजाः' प्रत्यया विकल्पवत् । न चैतदस्ति । इच्छाप्रभवत्वे वा बाह्यार्थसंनिधानानपेक्षत्वात् । 'बाह्यमर्थं नेक्षेरन्नक्षजाः' प्रत्ययविकल्पवत् । (१७६)

अपि च (।)

....2.177 रूपं रूपमितीक्षेत तद्धियं किमितीक्षते ॥
अस्ति चानुभवस्तस्याःसोविकल्पः कथं भवेत् ॥ १७७ ॥

[172/s][33b/MA]

सर्व्वविकल्पवादिनो मते 'रूपमिति' प्रवृत्तविकल्पबुद्धी 'रूपमीक्षेत ।[787] तद्धियं' रूपधियमपि कल्प्यमानां 'किमितीक्षते' ज्ञाता रूपबुद्ध्य'नुभवो' नास्तीति न युक्तं । यस्मादस्ति चानुभवस्तस्याः [788] सर्व्वेषां प्रतिपत्तॄणां । न च रूप इव तद्बुद्धावपि कल्पनाऽनुभूयते । ततश्च रूपबुद्धेरनुभवो'ऽविकल्पः कथम्भवेत्[789]' । (१७७)

....2.178 तयैवानुभवे दृष्टं न विकल्पद्वयं सकृत् ।
एतेन तुल्यकालान्यविज्ञानानुभवो गतः ॥ १७८ ॥

'तयै'व रूपबुद्ध्या रूपस्य स्वात्मनश्चाऽ'नुभवे'भ्युपगम्यमाने रूपमिति रूपानुभव इति च 'विकल्पद्वयं सकृत्' स्यात् । तच्च नास्त्य[790] नुभववाधितत्वात् । 'एतेन' सकृत्कल्पनाद्वयनिषेधेन 'तुल्यकालेनान्येन'[791] निर्व्विकल्पज्ञानेना'नुभवो' रूपबुद्धे'र्गतो' निर्णीतोत्तरो बोद्धव्यः । (१७८)

## ख. उत्तरकालभाविविकल्पज्ञानेनानुभवः

[787] १ निर्व्विकल्प एवैतद्युक्तं प्राक् रूपबुद्धिस्ततोस्याविकल्पो नात्र ।

[788] २ यदि रूपग्रहणे बुद्धेरननुभवस्तदोत्तरा स्मृतिर्न स्यादस्ति च तदप्रत्यक्षत्वेऽर्थाप्रत्यक्षत्वाच्च ।

[789] ३ त्वन्मतेन ।

[790] ४ अनुपलब्धेः ।

[791] ५ इन्द्रियज्ञानकालेन विकल्पेन रूपबुद्ध्यनुभवो निरस्तः इति वृत्तिः ।

उत्तरकालभाविना विकल्पज्ञानेनानुभव इति चेदाह (।)

....2.179 स्मृतिर्भवेदतीते च साऽगृहीते कथं भवेत् ।
स्याच्चान्यधीपरिच्छेदाभिन्नरूपा स्वबुद्धिधीः ॥ १७९ ॥

'अतीते च' रूपानुभवे 'स्मृतिः' पश्चात्तनेन विकल्पेन न भवेन्नानुभवः । 'सा' स्मृतिर'गृहीते'ऽनुभवे 'कथम्भवेत्' । यदि चातीतबुद्धिर्व्विकल्प्यते तदाऽन्यस्य पुंसो धियः 'परिच्छेदेन' परोक्षबुद्धिविकल्पात्मकेना'भिन्नरूपा' तथात्वेन 'स्वबुद्धिधीः' स्यात् । अस्ति च परबुद्धिप्रतीतिविलक्षणस्वबुद्ध्यनुभवः । तस्मादविकल्प एवासौ । (१७९)

किञ्च (।)

....2.180 अतीतमपदृष्टान्तमलिङ्गञ्चार्थवेदनम् ।
सिद्धं तत्केन तस्मिन् हि न प्रत्यक्षं न लैङ्गिकम् ॥ १८० ॥

सविकल्पकप्रत्यक्षवादिना निर्व्विकल्पस्याप्यस्वसंवेदनवा[792] दिनो मतेऽ'तीतमर्थवेदनं' न केवलमध्यक्षतो वर्तमानविषय[793]त्वान्न सिध्यति । किन्त्वनुमानादपि यस्माद'लिङ्गं' लिङ्गरहितं । तथा हि धर्मिणो ज्ञानस्यासिद्धत्वात् लिङ्गमाश्रया[173/s] 'सिद्धं । अनुमानात् ज्ञानसिद्धिवादिनः कस्यचिज्ज्ञानस्याध्यक्षासिद्धत्वात्' अनुमानसिद्धावनवस्थानात् 'अपदृष्टान्तं' । दृष्टान्तासिद्धौ न 'व्याप्तिसिद्धिरिति' लिङ्गरहितमेवातीतं रूपादिदर्शनं । 'तत्तस्मात्केन प्रमाणेन सिद्धं तस्मिन् हि' रूपादिदर्शने 'न प्रत्यक्ष'मभिमतत्वादस्ति । 'न च लैङ्गिकमनुमानमुक्तक्रमादिति' सकलमप्रतिपत्तिकमन्धमू[794] कं जगत्प्राप्तमिति ॥ (१८०)

अथ (।)

...2.181a तत्स्वरूपावभासिन्या बुद्ध्यानन्तरया यदि ।
रूपादिरिव गृह्येत;

'तत्स्वरूपावभासिन्या'ऽतीतरूपादिबुद्धिरूपप्रतिभासिन्या 'तज्जन्ययाऽनन्तया' धियाऽतीतबुद्धि'र्यदि गृह्यते' सौ त्रा न्ति क मते 'रूपादिरिव' तदनुकारिण्या 'तदनन्तरया' धिया तदा को 'दोष' इत्याह (।)

यदा चिरं बहुषु विषयेषु ज्ञा[795]नानि प्रवर्तन्ते तदा (।)

...2.181b न स्यात् तत्पूर्वधीग्रहः ॥ १८१ ॥

....2.182 सोविकल्पः स्वविषयो विज्ञानानुभवो यथा ।
अशक्यसमयं तद्वदन्यदप्यविकल्पकम् ॥ १८२ ॥

....2.183 सामान्यवाचिनः शब्दास्तदेकार्था च कल्पना ।
अभावे निर्विकल्पस्य विशेषाधिगमः कथम् ॥ १८३ ॥

....2.184 अस्ति चेन्निर्विकल्पश्च किञ्चित्तत्तुल्यहेतुकम् ।
सर्वं तथैव हेतोर्हि भेदाद् भेदः फलात्मनाम् ॥ १८४ ॥

तस्मादन्त्यात् ज्ञानात् याः 'पूर्व्वा' धियस्तासां 'ग्रहो न स्यादि'ति दोषः । अन्त्यबुद्धिजनितया हि धिया सैव गृह्यते न त्वन्या इति स्यात् । अस्ति चानुभवस्तासां यद्बलेन चिरमहमद्राक्षमिति

[792] ६ वैशेषिकस्य ।
[793] ७ हेतुः ।
[794] १ प्रत्यक्षासिद्ध्या । वचनाभावात् अननुभूतेनाविकल्प्य वचनं ।
[795] २ इन्द्रियज्ञानान्यसन्तानेन ।

भवति द्रष्टुः । तस्मा‘त्स्वविषयः’ स्वरूपालम्बनो ‘विज्ञाना’नां पूर्व्वभाविना‘मनुभवोऽविकल्पः’ । स यथा ‘तद्वदन्यदपि’ ज्ञानमन्त्यमप्रतिबद्धवृत्ति ‘चाविकल्पकं’ बोद्धव्यं । यस्मात्सकलमेव स्वरूप‘मशक्यसमयं’ शब्दसंकेताविषयः । ततश्च न विकल्पग्राह्यं (।) किञ्च विशेषसंकेताभावात् व्यवहारकालानुयायित्वाच्च ‘सामान्यवाचिनः शब्दास्तैः’ शब्दै‘रेकार्था’ एकविषया ‘च कल्पना’ शब्दयोजनया शब्दार्थ एव कल्पना । परमते च ‘निर्व्विकलपस्य’ ज्ञानस्या‘भावे’ विशेषस्य ‘विकल्पा’विषयस्या‘धिगमः कथं’ न कथञ्चि-[34a/MA] दित्यर्थः । विशेषानुभवदर्शनादस्ति किञ्चिन्निर्व्विकल्पं च’ ज्ञानं यथाहुर्मी मां स [174/s] ‘कादय इति चेत्’ । एवन्तर्हि तेन निर्व्विकल्पेन ‘तुल्यहेतुकं’ चक्षूरूपमनस्कारादिसमानहेतुकं विशेषविषयं ‘सर्व्वं’ ज्ञानं ‘तथैवा-’विकल्पकमस्तु (।) न तु स्वलक्षणविषयमपि किञ्चित्सविकल्पकं । हि‌र्यस्मा‘द्धतोर्भेदात्फलात्मनां भेदो’ भवति । हेत्वभेदे तु फलाभेद एव युक्तः । नान्यथा क्वचिदप्येकजातीयता स्यात् ॥[796] (१८१-८४)

किञ्च (।)

....2.185 अनपेक्षितबाह्यार्था योजना समयस्मृतेः ।
तथानपेक्ष्य समयं वस्तुशक्त्यैव नेत्रधीः ॥ १८५ ॥

‘योज[797] ना’ कल्पनाऽन‘पेक्षितबाह्यार्था’ बहिरर्थसंकेतविषयमनपेक्ष्यैव समयस्य प्राग्गृहीतस्य ‘स्मृतेः’ सकाशाद् भवति तावत् । ‘तथा समयमनपेक्ष्य वस्तुनः’ स्वलक्षणस्य ‘शक्त्या’ स्वाकारानुकारिविज्ञानजननसामर्थ्येनैव ‘नेत्रधीर्जा’यते ‘यदि’ तदा को विरोधः । (१८५)

स्यादेतद् (।)

....2.186 संकेतस्मरणापेक्ष रूपं यद्यक्षचेतसि ।
अनपेक्ष्य न चेच्छक्तं स्यात् स्मृतावेव लिङ्गवत् ॥ १८६ ॥

रूपम‘क्षचेतसि’ कर्तव्ये ‘संकेतस्मरणापेक्षं’ तदनपेक्षं पुनर्नाशक्तमिति एवं तर्हि श्रुतावेव रूपं शक्तमिति स्यात् । न त्विन्द्रियबुद्धौ ‘लिङ्गवत्’ । यथा हि लिंगं ‘न’ लिंगबुद्धौ साक्षाच्छक्तं किन्तु लिङ्गलिङ्गिनोः सम्म्बन्धिस्मृतावेव । तथा संकेतस्मरणे रूपं निमित्तं स्यात् । न चागृहीतं स्मृतिप्रतिबोधकमिति निर्व्विकल्पकमस्य ग्रहणं प्राक् ततः स्मृतिः । ततश्च योजनेति क्रमः । (१८६)

कथं पुनरर्थसम्मुखीभावात् स्मृतिजन्मेत्याह (।)

....2.187 तस्यास्तत्सङ्गमोत्पत्तेरक्षधीः स्यात् स्मृतेर्न्न वा ।
ततः कालान्तरेपि स्यात् क्वचिद् व्याक्षेपसम्भवात् ॥ १८७ ॥

‘तस्याः स्मृतेस्त’स्यार्थस्य ‘संगमेन’ सम्मुखीभावे‘नोत्पत्तेः[798] । न त्वक्षधी’रर्था‘त्स्यात्’ । सा तु स्मृतेरर्थजनितायाः स्यात् । न वा स्मृतेरपि भवेत् स्मृत्यधीनतायां नार्थाधीनता । यच्च स्मरणं भावि तन्नावश्यं[799] भवतीति कदाचिन्न भवेदपि । ‘ततः’ स्मृतेः ‘कालान्तरेणापि स्याद’ध्यक्षधीः स्मृत्यनन्तरं ‘क्वचि’द्विषयान्तरे ‘व्याक्षेपस्या-’ शक्तिलक्षणस्य ‘संभवात्’ । तन्निवृत्तौ सत्यां क्रमेण भवेत् । (१८७) 5

[175/s]

[796] १ प्रत्यक्षं कल्पनापोढमि त्यादि यत्रैषा कल्पना नास्तीत्यन्तः ?? ।

[797] २ शब्दार्थयोः ।

[798] ३ अर्थात्सैव स्मृतिः स्यात् ।

[799] ४ इच्छावशात् ।

स्यादेतत्प्रथममुभिमुखीभवन्नर्थः स्मृ[800] तेर्हेतुस्तत इन्द्रियज्ञानस्येति (।)

....2.188 क्रमेणोभयहेतुश्चेत् प्रागेव स्यादभेदतः ॥
अन्योक्षबुद्धिहेतुश्चेत् स्मृतिस्तत्राप्यनर्थिका ॥ १८८ ॥

'क्रमेणोभयहेतु'रभिमत'श्चेत्' । यद्येवं पूर्व्वापरे'कस्वभावसामर्थ्यस्य' भावस्या'भेदत-' स्त-ज्जन्यं द्वयमपि 'प्रागेव स्यात्' न क्रमतः ॥[801] स्यादेतद्(।) भावानां क्षणिकत्वाद्यान्यः स्मृति-प्रबोधकः क्षणोऽन्यश्चाक्षबुद्धेर्हेतुश्चेत् । 'तत्राद्येपि' क्षणे वाचक'शब्दस्मृतिरनर्थिका' (। १८८) यस्माद् (।)

....2.189 यथा समितसिध्यर्थमिष्यते समयस्मृतिः ।
भेदश्चासमितो ग्राह्यः स्मृतिस्तत्र किमर्थिका ॥ १८९ ॥

'यथा समित'स्य शब्दवाच्यतयाऽ[802] र्थस्य 'सिद्ध्यर्थं समयस्मृतिरिष्यते ।[803] भेदो' विशेषो'ऽसमितः' संकेताविषयश्चाक्षधिया 'ग्राह्यः' । तत्र स्मृतिः समयस्य 'किमर्थिका' निष्प्रयोजना (। १८९)

सामान्ये कालान्तरानुवर्त्तिनि संकेतः स एव स्मर्यत इति चेदाह (।) न (।)

....2.190 सामान्यमात्रग्रहणे भेदापेक्षा न युज्यते ॥
तस्माच्चक्षुश्च रूपञ्च प्रतीत्योदेति नेत्रधीः ॥ १९० ॥

'सामान्यमात्रस्य ग्रहणे'ऽभ्युपगम्यमाने 'भेद'स्य विशेषस्य संकेतविषयस्या'पेक्षा' न यु-ज्यते यथा गौरित्युक्ते कीदृशो गौरिति । तस्मात्सामान्यवति विशेषे संकेतस्तेनैवार्थित्वाद् व्यवहारिणां । तथा च भेदश्चासमितो ग्राह्य इत्युक्तं । 'तस्माच्चक्षुश्च रूपञ्च[804] प्रतीत्यासा-द्योदेति नेत्रधी'रित्यभ्युपगन्तव्यं ॥ (१९०)

व्यवधानेनापि रूपकारणता स्यादिति चेत् । आह (।)

...2.191a साक्षाच्चेत् ज्ञानजनने समर्थो विषयोक्षवत् ।

'साक्षाच्च विषयो' रूपादिः स्वग्राहक'ज्ञानजनने समर्थोऽक्षवत्' । न व्यवधानेन । स्मृत्यधीनतायां दोषस्योक्तत्वात् (।) तस्मादशब्दसंसृ/?/ष्टार्थबलभावितद्रूपानुकारि[34b/MA] प्रत्यक्षमनाविष्टाभिलापमविकल्पकमेव युक्तं ॥ X X ॥

## 2.6 (६. प्रत्यक्षभेदाः)

### (१) इन्द्रियप्रत्यक्षम्

[176/s]

...2.191b अथ कस्माद् द्वयाधीनजन्म तत्तेन नोच्यते ॥ १९१ ॥

800 १ इन्द्रियज्ञानहेतोः ।

801 २ अतत्स्वभावत्वेन वा पश्चादपि अक्षणिकपक्षे ।

802 ३ स्मृतिविषयस्याक्षज्ञानेन ग्रहार्थं हि स्मृतिः ।

803 ४ यत्र स्मृतिविषयादन्यो ।

804 ५ अथ कस्माद् द्वयाधीनायामुत्पत्तौ प्रत्यक्षमुच्यते न प्रतिविषयमिति[प्रमाण] समुच्चयं व्याख्यातुमुपक्रमते ॥

'अथ द्वयाधीनजन्म'विषयेन्द्रियोत्पत्ति'तदि'न्द्रियज्ञानमिन्द्रियेणो'च्यते' व्यपदिश्यते प्रत्यक्ष-मिति प्रतिगतमक्षम्प्रत्यक्षमिन्द्रियाश्रितमित्यर्थः : (।) कस्मात्पुनर्व्विषयेण 'नोच्यते' प्रतिविषय-मिति ॥ (१९१)

न खलु व्यसनितया व्यपदेशो नियुज्यते । अपि तु (।)

....2.192 समीक्ष्य गमकत्वं हि व्यपदेशो न गृह्यते ।
तच्चाक्षव्यपदेशेस्ति तद्धर्मश्च नियोज्यताम् ॥ १९२ ॥

'गमकत्वं समीक्ष्य' परिभाव्य । 'तच्च गमकत्वमक्षेण व्यपदेशे' प्रत्यक्षमित्यत्रास्ति[805] तस्य गमकत्वस्य व्यापकस्य 'धर्म्मो' व्याप्यभूतो 'नियोज्यतां ।'[806] (१९२)

....2.193 ततो लिङ्गस्वभावोत्र व्यपदेशे नियोज्यताम् ।
निवर्त्तते व्यापकस्य स्वभावस्य निवृत्तितः ॥ १९३ ॥

'ततो' व्याप[807] काभावात् 'व्यपदेशे' धर्म्मिणि 'अत्र' गमकत्वे साध्ये 'नियोज्यतां' लिङ्गं । प्रतिविषयमिति व्यपदेशात् 'व्यापकस्य' गमकत्वस्य 'निवृत्तितो निवर्तते' नियोज्यतेति व्यापकानुपलब्ध्या तत्र नियोज्यत्वाभावः सिद्धः । (१९३)

## क. अक्षाणां गमकत्वात् प्रत्यक्षम्

....2.194 सञ्चितः समुदायः स सामान्यं तत्र चाक्षधीः ।
सामान्यबुद्धिश्चावश्यं विकल्पेनानुबध्यते ॥ १९४ ॥

ननु सञ्चितालम्बनाः पञ्च विज्ञानकाया इति सिद्धान्तः । तत्रा[808] नेकार्थजन्यत्वात् स्वार्थे सामान्यगोतर मिति चोक्तं[809] । तथा च परमाणूनां 'समुदा[810]यः' [177/s] सञ्चित इत्युच्यते । 'स' एव च सामान्ये मतः 'तत्र च' सामान्येऽ'क्षधी'र्ज्ञायते (।) 'सामान्यबुद्धिश्चावश्यं विक[811] ल्पेनानुबध्यते' अनुसीव्यते । (१९४)

तत्कथ[812] मविकल्पं प्रत्यक्षमुच्यते ॥

अत्रा[813] ह (।)

....2.195 अर्थान्तराभिसम्बन्धाज्जायन्ते येऽणवोऽपरे ।
उक्तास्ते सञ्चितास्ते हि निमित्तं ज्ञानजन्मनः ॥ १९५ ॥

---

805 १ रूपशब्दादेः ।

806 २ अर्हता ।

807 ३ पूर्व्वार्द्धेनान्वयो द्वितीयेन व्यतिरेकः ।

808 ४ यच्च वसुबन्धुनोक्तं । आयतनस्वलक्षणं चक्षुर्ग्राह्यत्वादि तत्प्रतिज्ञानानि स्वलक्षणविषयाणि, न द्रव्यं स्वलक्षणं प्रति । एकपरमाणु ।

809 ५ ?? ।

810 ६ रूपशब्दादेः अष्टद्रव्यत्वात् ।

811 १ सामान्यविषयाऽक्षधीः सविकल्पा परस्य ।

812 २ यदि रूपशब्दादिसमुदायालम्बना अपि पञ्च विज्ञानकायाः कथमेषां स्वलक्षणविषयत्वं न व्याहृतं कल्पनापोहत्वञ्च ।

813 ३ पूर्व्वपक्षद्वये बौद्धः ।

'अर्थान्तराणां परमाण्वन्तराणामभिसम्बन्धात्[814]' सन्निधानविशेषेणोपसर्पणप्रत्ययेभ्यः पूर्व्वकेभ्यः[815] परमसन्निहितेभ्योऽपरेन्ये'येऽण[816] वो जायन्ते' ते सञ्चिता 'उक्ताः सञ्चि'तालम्बना विज्ञानकाय इत्यादौ । 'ज्ञानजन्म[817]'नस्त एव हि 'निमित्त'मुक्ताः तत्रानेकार्थजन्यत्वादित्यादिना । (१९५)

....2.196 अणूनां स विशेषश्च नान्तरेणापरानणून ।
तदेकानियमाज्ज्ञानमुक्तं सामान्यगोचरम् ॥ १९६ ॥

'अणूनां' स च ज्ञानजननसामर्थ्यलक्षणो 'विशेषोऽपरानणून'व्यवधानवर्त्तिनो[818] ऽन्तरेण विना न भवति । न हि प्रत्येकमणवो दृश्याः किं तु सहिता एव । 'तत्तस्मादेक'स्मिन्नर्थे परमाणौ ज्ञानस्या'नियमात्[819] सामान्यगोचरं' संचितपरमाणुसंघातविषयं 'ज्ञानमुक्तं' तत्त्ववादिना । न तु परमाण्वतिरिक्तसामान्यविषयं । तत्कथं सामान्यविषयत्वात् सविकल्पत्वप्रसङ्गः ॥ (१९६)

....2.197 अथैकायतनत्वेपि नानेकं दृश्यते सकृत् ।
सकृद्ग्रहावभासः किं वियुक्तेषु तिलादिषु ॥ १९७ ॥

अथैकेन्द्रियज्ञानज[820]नकत्वात् नीलपीतादीना'मेकायतनत्वे' रूपायतनत्वसंग्रहेपि 'नानेकं' नीलादि 'सकृद् दृश्यते' किन्तु क्रमेण तत्कथमणूना 'बहूनामेकदा' [178/s] 'ग्रहणं ।[821] अत्रोच्यते' । यदि नानेकमेकदा गृह्यते तदा 'तिलादिषु वियु[822] क्तेषु' विभिन्न'देशेषु सकृद्ग्र'हाव'भासो' युगपद् ग्रहणानुभवः किं कस्माद्धे तोः । (१९७)

ज्ञानानां लघुवृत्तित्वात् सकृद् ग्रहणभ्रमश्चेत् । आह (।)

....2.198 प्रत्युक्तं लाघवश्चात्र तेष्वेव क्रमपातिषु ।
किं नाक्रमग्रहस्तुल्यकालाः सर्व्वाश्च बुद्धयः ॥ १९८ ॥

'प्रत्युक्तं' प्रतिक्षिप्तं 'चात्र' सकृद्ग्रहावभासे 'लाघवं' बुद्धीनां । अन्यत्रापि समानं तद्वर्णयोर्व्वा सकृच्छ्रुति[823] (२।१३५)रित्यादिना । तथाप्युच्यते । 'तेष्वेव' तिलादिषु हस्तादिभ्यः 'क्रमपातिषु किं' कस्मा'न्नाक्रमग्रहणं' भवति । 'सर्व्वाश्च बुद्धयः[824]' सहावस्थितेषु सम्भवन्त्य'स्तुल्यकालाः' । (१९८)

ततः (।)

....2.199 काश्चित्तास्वक्रमाभासाः क्रमवत्योपराश्च किम् ।
सर्वार्थग्रहणे तस्मादक्रमोयं प्रसज्यते ॥ १९९ ॥

814 ४ विज्ञानजननसमर्थस्वभावोत्पादनप्रत्ययसन्निधानात् ।

815 ५ असमर्थेभ्यः ।

816 ६ समर्थाः प्रत्येकं । नान्यदेव सामान्यं ।

817 ७ द्वितीयं परिहरति ।

818 ८ सर्वेषां तत्साधारणं कार्यमित्यर्थः । न पुनरायतनसामान्यस्य ग्रहणात् ।

819 ९ न द्रव्यस्वलक्षणमिति व्याचष्टे । नियमेनानुत्पत्तेः ।

820 १० न विषयव्यपदेशि मनोज्ञानस्यापि विषयज्ञानत्वात् । असाधारणहेतुत्त्वादक्षैस्तद् व्यपदिश्यते इति दिग्नागः । अवयविद्रव्यमेकं जनकं न बहवः ।

821 १ येन सामान्यविषयत्वं स्यात् ।

822 २ माषमुद्गादेः संयोगस्य सहकारिणो नियुक्तत्वेऽभावान्नावयवी ।

823 ३ युगपत्पञ्चज्ञानसाधने ।

824 ४ क्षणिकत्वात् ।

'तासु काश्चिदक्रमाभासायाः' सहस्थितवस्तुविषयाया अपराश्च बुद्धयः [35a/MA] 'क्रमवत्यो'ऽयुगपत्प्रतिभासाः 'किं' भवन्ति याः क्रमपातिवस्तुविषयाः (।)अस्ति चायं भेदः । 'तस्मात्सर्व्व'स्यार्थस्य क्रमिणोऽक्रमिणश्च 'ग्रहणेऽक्रमोऽयं' लाघवाविशेषा'त्प्रसज्यते' । (१९९)
किञ्च (।)

....2.200 नैकं चित्रपतङ्गादि रूपं वा दृश्यते कथम् ।
चित्रं तदेकमिति चेदिदं चित्रतरन्ततः ॥ २०० ॥

'चित्रपतङ्गादि नैकम'नेकं नीलादिरूपं 'वा दृश्यते कथं' यदि नानेकमेकेन गृह्यते । 'चित्रं' नीलपीताद्यात्मकं तत्पतङ्गादिक'मेकमिति[825] चेत्' इदञ्चित्र'मेकं' यदुच्यते त'त्तत'श्चित्रपतङ्गादपि 'चित्रतरमा'श्चर्यतरं । चित्रमिति नानारूपाणि तदेव पुनरेकमुच्यत इत्युपहसति (॥ २००)
तथा च (।)

....2.201 नैकं स्वभावं चित्रं हि मणिरूपं यथैव तत् ।
नीलादि प्रतिभासश्च तुल्यश्चित्रपटादिषु ॥ २०१ ॥

[179/s]

'चित्रम'नेकरूपं 'हि' यस्मात्तस्मान्नैकं पतङ्गादि । 'यथैव' संस्थानविशेषेण सन्नि[826]विष्टानां बहूनां 'मणी'नां 'रूपं त'च्चित्रमनेकं नैकमवयवि द्रव्यं विजातीयानां द्रव्यानारम्भात् । चित्रबुद्धिरेकत्वान्मुख्या पतङ्गे[827] मणिरूपादिषु पुनरुपचरितेति चेत् । आह(।) नीलादिप्रतिभासश्चित्रप्रतिभासः स 'चित्रपट आदि'र्येषां मणिरूपादीनां तेषु चित्रपतङ्गे 'च तुल्यः' । न त्वग्निमाणवकयोर्दहनबुद्धिरिव स्खलदस्खलद्वृत्तिर्लक्ष्यते । (२०१)

....2.202 तत्रावयवरूपश्चेत् केवलं दृश्यते तथा ।
नीलादीनि निरस्यान्यच्चित्रं चित्रं यदीक्षसे ॥ २०२ ॥

'तत्र' चित्रपटादिषु केवलमव'यवरूपं तथा चित्रतया दृश्यते' नावयवी विजातीयानां द्रव्यानारम्भादिति चेत् । चित्रपतङ्गादावपि 'नीलादीनि निरस्य' पृथक्कृत्य 'तेभ्योऽन्यच्चित्र'मवयविरूपं 'यदीक्षसे' त्वं त'च्चित्र'माश्चर्यं । स्वसिद्धान्तानुरागभेषजविशोधितचक्षुरीक्षसे त्वमेव यदीदृशमवयविनं परं नात्रान्येषामधिका[828] रः । (२०२)
अपि च(।)

....2.203 तुल्यार्थाकारकालत्वेनोपलक्षितयोर्द्वयोः ।
नानार्था क्रमवत्येका किमेकार्थाक्रमापरा ॥ २०३ ॥

तुल्या[829] र्थाकारत्वेन तुल्यकालत्त्वेन 'चोपलक्षितयोः' कृत्रिमाकृत्रिमपतङ्गविशेषणयोर्द्वयोर्म्मध्ये 'एका' कृत्रिमपतङ्गविषया 'धीर्नानार्था' विजातीयात्मकद्रव्यानारम्भात् 'क्रमवती' च नीलानां बहूनां क्रमेण ग्रहणात् । 'अपरा' अकृत्रिमपतङ्गविषया एकार्थावियविविषया अत एवाक्रमा च किं कस्मादिष्यते । द्वयोरपि समानता युक्ता निमित्तस्य साम्यात् । (२०३)
किञ्च ।

[825] ५ सकृद्दर्शनमविरुद्धं ।
[826] १ द्रव्याणि द्रव्यान्तरमारभन्ते गुणा गुणान्तरमत्र तु नानारूपा मणयः ।
[827] २ एकोत्रावयवी । अवयवास्तु विभिन्नाः दृश्यन्ते ।
[828] ३ इति स्वभावानुपलम्भ उक्तः ।
[829] ४ अर्थाकारश्च कालश्च ।

....2.204 वैश्वरूप्याद्धियामेव भावानां विश्वरूपता ॥
तच्चेदनङ्गं केनेयं सिद्धा भेदव्यवस्थितिः ॥ २०४ ॥

'धियामेव वैश्वरू[830] प्यान्ना'नाकारत्वाद् 'भावानां' ग्राह्यानां (? णां) 'विश्वरूपता' व्यवस्थाप्यते । चित्रस्यावयविन[831] एकतास्वीकारे तद्बुद्धिषु प्रतिभासनानात्वं भेदव्यवस्थिता-'वनङ्गं चेत्' । तदा भावानां 'भेदव्यवस्थिति'रपहनूयेतैव । 'केना-' न्येन निबन्धेन 'सिद्धा' भविष्यति । (२०४)

[180/s]

अपि च[832] (।)

....2.205 विजातीनामनारम्भादालेख्यादौ न चित्रधीः ।
अरूपत्वान्न संयोगश्चित्रो भक्तेश्च नाश्रयः ॥ २०५ ॥

'विजातीनां' भिन्नजातीनां रागद्रव्याणां कार्यद्रव्या'नारम्भात् आलेख्यादौ चित्रधीर्न' स्यात् ॥ आलेख्यं संयोगस्तस्य चित्रं रूपमिति चेत् (।)'न' (।)'संयोगो'पि चित्रस्तस्या'रूपत्वात्' ।[833] संयोगो गुणस्तथा रूपञ्च । न च गुणे गुणान्तरमस्ति ॥

स्यादेतत्(।)यथा तरुषु संख्यालक्षणं वनं कुसुमितत्वं चात एकार्थसमवायात् वने कुसुमितबुद्धिः । तथावयवेषु चित्रसंयोगयोः समवायाच्चित्रं चित्रमिति बुद्धिरुपचारादित्यादि भक्तेरुपचारस्य च संयोग 'आश्रयो न' युक्तः । (२०५)

....2.206 प्रत्येकमविचित्रत्वाद् गृहीतेषु क्रमेण च ।
न चित्रधीसङ्कलनमनेकस्यैकयाऽग्रहात् ॥ २०६ ॥

'प्रत्येक'मवय(व)नाम'विचित्रत्वात्' । नीलादिषु 'क्रमेण' स्वबुद्धिभि'र्गृहीतेषु'[834] बुद्ध्यन्तरेण चित्रसंकलनं संक्षिप्य ग्रहणञ्च न युक्तं । 'एकया' धियाऽ'नेकस्याग्रहात्' । (२०६)

....2.207 नानार्थैका भवेत्तस्मात् सिद्धातोप्यविकल्पिका ।
विकल्पयन्नायेकार्थं यतोन्यदपि पश्यति ॥ २०७ ॥

कथं नीलानामेकबुद्ध्या 'संकलनं' । इष्टौ वा तस्मात्संकलनस्वीकारादेवैका बुद्धिर्नानार्थाऽनेकविषया भवेत्[835] । अतोऽनेकार्थवेदनादपि बुद्धिर'विकल्पिका सिद्धा' । यतः शब्दयोजित'मेकमर्थं विकल्प'यन्ना'न्यद'संयोजितमर्थान्तर'मपि पश्यति' द्रष्टा । न ह्येकदानेकशब्दयोजना तस्मादर्थसञ्चयविषयत्वात् सामान्यविषयत्वं (।) तथापि त्वविकल्पिते तेन विरोधः । (२०७)

### ख. चित्रैकत्वचिन्ता

ननु (।)

....2.208 चित्रावभासेष्वर्थेषु यद्येकत्वं न युज्यते ।
सैव तावत् कथं बुद्धिरेका चित्रावभासिनी ॥ २०८ ॥

[830] ५ सम्विनष्टत्वाद्विषयस्थितेः ।
[831] ६ चित्रपतङ्गे ।
[832] १ एकोऽवयवी यदि ज्ञानजनको न नीलादयस्तदा ।
[833] २ संयोगस्य रूपत्वे रूपे रूपं स्यात् ।
[834] ३ पश्चात् ।
[835] ४ यदुक्तमेकायतनत्वेपि नानेकं दृश्यते सकृदिति?? तद् ध्वस्तं स्यात् ।

[181/s]

'चित्रं' नानाकारोऽ[836] 'वभासो' येषां पतङ्गादीनां तेष्वर्थेष्वे'कत्वं' न युज्यते । 'यदि सैव' चित्रार्थग्राहिणी बुद्धिश्चित्रावभासिनी चित्रा[837] कारा 'कथमेका' संमता । यथा चित्रत्वेपि बुद्धिरेका तथा कार्यद्रव्यञ्चैकं स्यात् । (२०८)[35b/MA]

अत्राह (।)

...2.209a इदं वस्तुबलायातं यद् वदन्ति विपश्चितः ।

इदं वस्तु[838] नोऽव्यभिचारि लिङ्गस्य 'बलादायातं यद्व[839] दन्ति विपश्चितो' बु द्धा भगवन्तः ।

किं तदित्याह (।)

...2.209b यथा यथार्था चिन्त्यन्ते विशीर्यन्ते तथा तथा ॥ २०९ ॥

'यथा यथा' येन प्रकारेण एकत्वेनानेकत्वेन 'वाऽर्था' नीलादयो बाह्यज्ञानात्मानो वा 'विचिन्त्यन्ते तथा' विशीर्यन्ते क्वचिदपि 'न' व्यवतिष्ठन्त इति यावत् । न हि ज्ञानमेकं नानाकारत्वात् । तल्लक्षणत्वाच्च भेदस्य । नाप्यनेकं चित्रप्रतिभासानुपपत्तेः । परस्परमवेदनात् । अन्यस्य च ग्राहकस्याभावात् । (२०९)

...2.210a किं स्यात् सा चित्रतैकस्यां;

ननु यदि 'सा चित्रता' बुद्धा'वेकस्यां' स्यात् तया च चित्रमे[840] कं द्रव्यं व्यवस्थाप्येत (।) तदा 'किं' दूषणं 'स्यात्' ।

आह (।)

...2.210b न स्यात्तस्यां मतावपि ।

'न' केवलं द्रव्ये तस्यां मतावप्ये'कस्यां न स्या च्चित्रता' । आकारनानात्वलक्षणत्वाद् भेदस्य । नानात्वेपि चित्रता कथम् (।) अनेकपुरुषप्रतीतिवत् ।

कथन्तर्हि प्रतीतिरित्याह (।)

...2.210c यदीदं स्वयमर्थानां रोचते तत्र के वयम् ॥ २१० ॥

'यदीद'मताद्रूप्येपि ताद्रूप्यप्रथन'मर्था'नां भासमानानां नीलादीनां 'स्वयम'परप्रेरणया- 'रोचते । तत्र' तथाप्रतिभासे 'के वयम'सहमानाऽ(? अ) पि निषेद्धुं । अवस्तु च प्रति[841] भासते चेति व्यक्तमालीक्यं । (२१०)

[182/s]

....2.211 तस्मान्नार्थेषु न ज्ञाने स्थूलाभासस्तदात्मनः ।
एकत्र प्रतिषिद्धत्वाद् बहुष्वपि न सम्भवः ॥ २११ ॥

'तस्मान्ना[842] र्थेषु बाह्येषु न ज्ञाने' तद्ग्राहके 'स्थूलाभासः' स्थूल आकारः संगच्छते । 'तदात्मनः' स्थूलस्वरूप'स्यैकत्रा'वयवे परमाणौ वा 'प्रतिषिद्धत्वात् । बहुष्वपि' तेषु 'सम्भवो

836 १ परो दूषयति पूर्व्वोक्तं ।
837 २ परमुखेनोपन्यासो धर्मनैरात्म्यसूचनाय ।
838 ३ तात्विकाकारवादिनोयं दोषो न ममेत्याह ।
839 ४ धर्मनैरात्म्यं ।
840 ५ प्रष्टुः साध्यं ।
841 ६ अविद्यावशादुपलम्भः ।
842 १ एकानेकोभयरूपरहिता स्वसम्वित्तिरविरुद्धैव ।

ना'स्ति मिलिता अपि हि त[843] 'एव' । ते च प्रत्येकं स्थौल्यविकला इति समुदिता अपि तथैव स्युः । तथा नीलाद्याकारेषु प्रत्येकं चित्रस्य स्थौल्यस्याभावात् समुदायेप्यभावः । (२११)

ननु सुखाद्यात्मकं[844] स्वप्रकाशं विज्ञानमेकमिदमिति यो गा चा र मतमव्याहत'मित्याह' (।)

....2.212 परिच्छेदोन्तरन्योऽयं भागो बहिरिव स्थितः ।
ज्ञानस्याभेदिनो भिन्नौ प्रतिभासो ह्युपप्लवः ॥ २१२ ॥

'परिच्छेदो' ग्राहकाकारः सुखादे'रन्तर'बहिर्देशे परिच्छेदा'दन्योयं' भागो ग्राह्यो नीलादिर्ब्बहिःस्थित 'इवा'भाति सर्व्वेषां । 'हि'र्यस्मात् 'ज्ञानस्याभेदिनो भि'न्नावाकारौ तत्त्वतो 'न' युक्तौ (।) तस्मादन्तर्ब्बहिर्देशसम्बन्धतया 'प्रतिभास उपप्लवो न सत्यः' । (२१२)

....2.213 तत्रैकस्याप्यभावेन द्वयमप्यवहीयते ।
तस्मात्तदेव तस्यापि तत्त्वं या द्वयशून्यता ॥ २१३ ॥

'तत्र' एकज्ञानात्मनि विरुद्धं द्वयं न युक्तमि'त्येकस्य' ग्राह्यत्वस्य ग्राहकत्वस्य वावश्याभ्युपगन्तव्ये'नाभावेन द्वयमप्यवहीयते' । अन्योन्यसापेक्षयोरेकाभावेऽपराभावस्य न्यायप्राप्तत्वात् । 'तस्मात्तस्य' ज्ञानस्या'पि तत्त्वं तदेव या' द्वयेन ग्राह्यग्राहककाकारेण शून्यता नाम । (२१३)

....2.214 तद्भेदाश्रयिणी चेयं भावानां भेदसंस्थितिः ।
तदुपप्लवभावे च तेषां भेदोप्युपप्लवः ॥ २१४ ॥

'इयं च भावानां' रूपवेदनादीनां 'भेदसं'स्थितिः (।) तस्य ग्राह्यग्राहकस्य 'भेदः' स 'आश्रयो' यस्याः सा तथा । तस्य ग्राह्यग्राहकभावस्य भेदव्यवस्थानिबन्धनस्यो'पप्लवभावे' मिथ्यात्वे च तेषां रूपादीनां 'भेदो'ऽपि तद्व्यवस्थापित उपप्लवः । न केवलं रूपादीनां भेदाभेदावुपप्लवः । (२१४)
[183/s]

लक्षणशून्यत्वान्निःस्वभावत्वमपीत्याह (।)

....2.215 न ग्राह्यग्राहकाकारबाह्यमस्ति च लक्षणम् ।
अतो लक्षणशून्यत्वान्निःस्वभावाः प्रकाशिताः ॥ २१५ ॥

रूपादीनां 'ग्राह्यग्राहककाकारा'भ्यां 'बाह्यं' भिन्नं 'लक्षणं न चास्ति' । तथा हि विषयतया किञ्चिन्निर्द्दिश्यते । यथा रूप्यत इति कृत्वा रूपं । किञ्चिद्विषयितया विजानातीत्यादि[845] व्युत्पत्त्या यथा रूपिणः स्कन्धाः । न त्वेतद्व्यतिरिक्तं किञ्चिल्लक्षणमस्ति । 'अतो लक्षणेन' ग्राह्यग्राहकत्वे[846] न 'शून्यत्वान्निःस्वभावाः' सर्व्वधर्म्माः 'प्रकाशिता' भगवद्भिर्बु द्धैः । (२१५)

किञ्च (।) बहिरर्थवादेपि लक्षणशून्यत्वात् निःस्वभावतां धर्म्माणामाख्यातुमाह (।)

....2.216 व्यापारोपाधिकं सर्वं स्कन्धादीनां विशेषतः ।
लक्षणं स च तत्त्वन्न तेनाप्येते विलक्षणाः ॥ २१६ ॥

'स्कन्ध' आदिर्येषां धात्वायतना'नां' तेषां यल्लक्षणं राशीभवन्तीति राश्यर्थः स्कन्धानां (।) कार्योत्पादकत्वेनाकारार्थो धातूनां । आयन्तन्व[847] न्तीत्यायद्वारार्थ आयतनानां (।) 'तत्सर्वं

[843] २ परमाणव एव न स्थूलाः स्वरूपहानेः ।
[844] ३ तत्त्वतो द्वयप्रतिभासि ।
[845] १ संजानातीति संज्ञा, अनुभवतीत्यनुभव इत्यादि ।
[846] २ न तु सम्वित्त्या ।

लक्षणं व्यापारोपाधिकं' व्यापारविशेषणं । 'स च' व्यापारो-[36a/MA] ऽप्रतीतेर्भेदपक्षे न तत्त्वं । अभेदेपि प्रागभावी भाव एव स्यात् । स च तत्त्वं न भवति । अशक्तं सर्वमिति चेदि ?? त्यत्रोक्तक्रमात् । 'तेन' व्यापारोपाधिकलक्षणायोगेनापि 'विलक्षणा' निःस्व'भावा एते' स्कन्धादयः । (२१६)

कथं तर्हि बाह्यस्कन्धादिदेशना भगवतामित्याह (।)

....2.217 यथास्वंप्रत्ययापेक्षादविद्योपप्लुतात्मनाम् ।
विज्ञप्तिर्वितथाकारा जायते तिमिरादिवत् ॥ २१७ ॥

अनाद्य'विद्योपप्लुतात्म'नामप्रहीणाक्लिष्टज्ञा[848] नानां पुंसां य[849] थास्वं यस्य भ्रमस्य य अत्मीयः[850] प्रत्ययो 'यथास्वंप्रत्य'यस्तस्या'पेक्षण'मपेक्षः । तस्माद्वितथौ ग्राह्यग्राहकाकारौ यस्याः सा तादृशी 'विज्ञप्तिर्जायते । तिमिरादिवत्' तिमिरादाविव, 'वितथाकार'चन्द्रद्वया-दिविज्ञाप्तिः । (२१७)

[184/s]

...2.218a असंविदिततत्त्वा च सा सर्व्वापरदर्शनैः ।

सा च विज्ञप्तिः सर्व्वैरपरद[851] र्शनैरनुत्कृष्टदर्श'नैरसम्विदिता' द्वयशून्यतातत्त्वं यस्याः सा-ऽसंविदिततत्वा (।)

कस्मादित्याह (।)

...2.218b असंभवाद्विना तेषां ग्राह्यग्राहकविप्लवैः ॥ २१८ ॥

'ग्राह्यग्राहकविप्लवैर्व्विना तेषा'मपरदर्शनानां विज्ञप्तेर'सम्भवात्' । ग्राह्यग्राहकोपप्लुतदर्शनत्वमेव चानुत्कृष्टदर्शनत्वं । (२१८)

....2.219 तदुपेक्षिततत्त्वार्थैः कृत्वा गजनिमीलनम् ।
केवलं लोकबुध्यैव बाह्यचिन्ता प्रयन्यते ॥ २१९ ॥

'तद् भ्रा'न्तदर्शनानुरोधा'दुपेक्षिततत्वार्थै'रवधारिततदद्वयविवेकै'र्भगवद्भिर्बुद्धैर्गजनिमीलनं कृत्वा' गजस्येव पार्श्वद्वयं पश्यतोपि नयननिमीलनकलया तत्त्वमपश्यन्तमिवात्मानं दर्शय-द्भि[852] 'र्लोक'स्याविद्योपहतस्य 'बुद्ध्या' द्वयग्राहिण्या 'बाह्य'स्य 'चिन्ता'स्कन्धायतनादित्वेन 'प्रतन्यते' । स्कन्धादिदेशनया हि लोकबुद्ध्यनुरोधप्रवर्तितपाषण्डग्रा[853] हनिवृत्तौ मुख्यया येषु मुमुक्षवोऽवतार्यन्त इति देशनाक्रमः । (२१९)

अथवा चित्रत्वेपि बाह्यमेकं न युक्तं बुद्धिस्तु चित्राप्येकैवेति दर्शयितु[854] माह (।)

...2.220a नीलादिश्चित्रविज्ञाने ज्ञानोपाधिरनन्यभाक् ॥
अशक्यदर्शनः;

847 ३ चित्तचैत्तानामुत्पत्तिम्विस्तृण्वन्ति ।
848 ४ ग्राह्यग्राहकाभिनिविष्टानां ।
849 ५ बाह्यानपेक्षत्वे सदा स्यादित्याह ।
850 ६ सन्तानपरिणाम उत्पत्तिनिमित्तं ।
851 १ बुद्धादन्यैः ।
852 २ केवलं ।
853 ३ आत्मग्रह ।
854 ४ प्रतिबिम्बवदाकाराः पारमार्थिकत्वेऽनेकान्तः स्यात् ।

'नीलादिश्चित्रे ज्ञाने ज्ञानोपाधिर'नुभवस्यात्मभूतः 'अनन्यभाक्' आकारान्तरासहचरः[855] केवल इत्यर्थः । तादृशोऽ'शक्यद[856] र्शनः' सहैवाकारान्तरवेदननियमात् । न हि चित्रे विज्ञाने समुत्पन्ने नीलं निरस्य पीतं शक्यदर्शनं । तस्मादशक्यविवेचनत्वं तुल्ययोगक्षेमत्वं सहप्रतिभासनियतत्वं ज्ञानात्मनां नीलादीनामेकत्वं । बाह्यात्मनां तु नैतत्संभवति । एकं पिधायापि द्रष्टुमन्यस्य शक्यत्वात् ।

ननु ज्ञानाकारोपि नीलः पीतानुभवकाले तदा नानुभूयते तदा शक्यविवेचन एवेत्याह (।)

...2.220b तं हि पतत्यर्थे विवेचयन् ॥ २२० ॥

[185/s]

तमनुभूयमानात् पीतात् 'वि[857] वेचयन्' भेदेन व्यवस्थापयन् प्रमाता 'अर्थ' एव नीले 'पतति' विवेचकत्वेन । परो[858] क्षं तदा नीलमर्थ एव । अपरोक्षतैव तु ज्ञानस्वभावः । अतो यद् विविच्यते तदज्ञानं । यज्ज्ञानं तन्न विवेच्यत एव । (२२०)

तस्माद् (।)

....2.221 यद् यथा भासते ज्ञानं तत्तथैव प्रकाशते ।
इति नामैकभावः स्याच्चित्राकारस्य चेतसि ॥ २२१ ॥

'यज्ज्ञानं यथा' नीलाद्यात्मतया जातं 'सत्तथा' भासते 'प्रकाशते' । भासमानस्वभावत्वात् 'ज्ञानं' तथा तेनैव स्वरूपेणानुभूयते सर्वैः प्रतिपत्तृभिः । न चोत्पन्नस्यापि ज्ञानस्य स्वप्रकाशकस्याविदितः कश्चिदाकारोस्ति 'इत्य'शक्यविवेचनत्वात् तुल्ययोगक्षेमत्वात् सहप्रतिभासनियमात् । 'चित्र'स्य नीलपीताद्या'कारस्य चे'तसि बुद्धावेकभावो नाम भवेत्तदा को दोषः ।[859] (२२१)

...2.222a पटादिरूपस्यैकत्वे तथा स्यादविवेकिता ।

ज्ञानवत् पटादिरूपस्य एकत्वेऽभ्युपगम्यमाने तथा ज्ञानस्येवाविवेकिताऽशक्यविवेचनत्वं स्यात् । न चास्ति (।) नीलादीनां ग्रहणाग्रहणभेदस्य दर्शनात् ।

स्यादेतद् (।) अवयवा नीलाद्याः परस्परतोऽवयविनश्च भिन्नास्तेषां भेदाद्विवेकेन ग्रहणं । यस्त्वभिन्नोऽवयवी न तस्य विवेकेन ग्रहणमित्याह (।)

...2.222b विवेकीनि निरस्यान्यदा विवेकि च नेक्षते ॥ २२२ ॥

विवेकीनि नीलाद्यवयवरूपाणि निरस्य पृथक् कृत्वा 'अन्यदा-विवेकिरूपश्च नेक्षते' ।[860] दृश्यसम्मतमनुपलभ्यमानं कथमभ्युपगमार्ह । (२२२)

यच्चोच्यते परमाणवः प्रत्येकम[861] तीन्द्रियत्वात् सञ्चिता अपि न ज्ञानगोचर इ[862] ति तत्राह(।)

....2.223 को वा विरोधो बहवः संजातातिशयाः (पृथक्)।

[855] ५ तज्ज्ञानवत् ।
[856] ६ स नीलादिरेकैकं ।
[857] १ उत्तरज्ञानेन पूर्वकं ।
[858] २ अतीतत्वात् ।
[859] ३ न ह्येवं बाह्यश्चित्रोर्थस्तथाहि ।
[860] ४ पिहितेष्वप्यवयवेषु निरवयत्वादवयवी दृश्यते ।
[861] ५ उद्योतकराद्यैः ।
[862] ६ नाप्युदकाभ्याहरणं विनावयविनमिति भावः ।

भवेयुः कारणं बुद्धेर्यदि नात्मेन्द्रियादिवत् ॥ २२३ ॥

[186/s][36b/MA]

‘यदि बहवः’ परमाणव उपसर्पणप्रत्ययात् ‘संजा[863] तातिशया’ विज्ञानजननयोग्याः संहता उत्पन्ना स्वग्राहि कार्यश्च ‘बुद्धेः कारणं भवे’युस्तदा ‘को विरोध इन्द्रिया’[864] दिवत् । इन्द्रियादयः प्रत्ये[865] कं न बुद्धेर्हेतुर्मिलितास्तु भवन्ति तद्वदणवोपि स्युः । न हि परेषामिवास्माकश्च नित्यैकस्वभावा अणवः । ते हि यथाप्रत्ययमतीन्द्रियाः सन्त ऐन्द्रिया अपि स्युः ॥ (२२३)

ननु हेतुत्वेपि कथमणवो ग्राह्या इत्याह (।)

...2.224a हेतुभावादृते नान्या ग्राह्यता नाम काचन ॥

‘हेतुभावदृते विना ग्राह्यता नाम’ या प्रसिद्ध सा नान्या ‘काचित्’ । अपि तु हेतुतैन ग्राह्यता ।

एवन्तर्हीन्द्रियादिकमपि हेतुत्वाद् ग्राह्यं स्यादित्याह (।)

...2.224b तत्र बुद्धिर्यदाकारा तस्यास्तद् ग्राह्यमुच्यते ॥ २२४ ॥

‘तत्र’ तेषु हेतुषु ‘बुद्धिर्यदाकारा’ भवति ‘तस्या’ बुद्धेस्तद् ग्राह्य‘मुच्यते’ अणुसञ्चयः । सैव च बुद्धिराकारमनुकरोति नेन्द्रियादेः । (२२४)

....2.225 कथं वाऽवयवी ग्राह्यः सकृत् स्वावयवैः सह ।
न हि गोप्रत्ययो दृष्टः सास्नादीनामदर्शने ॥ २२५ ॥

‘तत्कथं’ तद्ग्राह्यं । योप्याह (।) नानेकं ‘सकृ’द् गृह्यत इति । तन्मते‘ऽवयवी स्वावयवैः’ सास्नाककुद्लाङ्गूलादिभिः सह कथम्वा ग्राह्यो युक्तः । न गृह्यत एवेति चेत् । ‘न हि गो’रवयविनः ‘प्रत्ययः सास्नादीनाम’वयवा‘नामदर्शने’ क्वापि ‘दृष्टः’[866] । (२२५)

....2.226 गुणप्रधानाधिगमः सहाप्यभिमतो यदि ।
सम्पूर्णाङ्गो न गृह्येत सकृन्नापि गुणादिमान् ॥ २२६ ॥

‘यदि सहाप्यभिमतो गुण’प्रधानयोर्विशेषणविशेष्ययोर‘धिगमो’ नोपाधीनामन्योन्यं विशेषणविशेष्यभूतानां द्रव्यानां (? णां) वा तादृशानां (? णां) । एवन्तर्हि विषाणी [187/s] सास्नादिमानिति वा यदा गृह्यते तदा तेनैवावयवेन सम्बन्धव्यवसायादितरावयवसम्बन्धानवसायात् ‘संपूर्णाङ्गो’ऽवय[867] वी ‘न गृह्येत । सकृद्’ गृह्यते च । ‘नापि गुणादिमान्’ गृह्येत । विषाणी गौरिति बुद्ध्या विषाणविशिष्टो गौर्विषयीकृतो न त्वन्ये गुणकर्मसामान्यादयः । ततश्च नीलादिरूपं गुणः परिस्पन्दादि च कर्म्म । वस्तुत्वादि च सामान्यं न गृह्येत । दृष्टविरुद्धश्चैतत् । (२२६)

सर्व्वेषां गुणकर्म्मसामान्यावयवादीनां वस्तुतो विशेषणत्वात् ‘सर्व्वग्रहणमिति’ चेत् । आह (।)

---

[863] १ योग्यदेशत्वाव्यवहितत्वादिना ।

[864] २ अत्मेन्द्रियार्थसन्निकर्षाद् वैशेषिकाः । इन्द्रियार्थसन्निकर्षान्नैयायिकाः ।

[865] ३ पृथगर्थः ।

[866] ४ परस्परमनुपाधिभूतानेकद्रव्यग्रहणं नेष्यते न पुनर्गुणप्रधानभूतस्य । विशेषणभूताश्च सास्नादयोऽवयवा गोर्द्रव्यस्येति तेषां सहग्रहो युक्तः । न त्वणूनामने वंत्वात् ।

[867] १ न हि विषाणेनान्येप्युपाधयोऽवच्छिद्यन्ते तेषां विशेष्यत्वप्रसङ्गात् ।

....2.227 विवक्षा परतन्त्रत्वात् विशेषणविशेष्ययोः ।
यदङ्गभावेनोपात्तन्तत्तेनैव हि गृह्यते ॥ २२७ ॥

‘विशेषणविशेष्ययोर्व्विवक्षापरतन्त्रत्वान्’ पुरुषेच्छानुरोधात् न पारमार्थिकत्वं । तथा विषाणी गौरिति गोर्विषाणमित्यादौ विपर्ययो विशेषणविशेष्ययोः प्रयोक्तुरिच्छावशेन दृश्यते । तस्माद्यदेव ‘ह्यङ्गभावेन’ विशेषणभावेन स्वमनीषिकया प्रतिपादयित्रोपात्तं ‘तेनैव’ विशेषणेन विशिष्टं तद्विवक्षितं ‘गृह्यते’ न तदितरैः । तेषामविवक्षितत्वेनाविवक्षितत्वात् । ततश्च न संपूर्ण्णाङ्गो नापि गुणादिमान् गृह्येत । (२२७)

किञ्च (।)

....2.228 स्वतो वस्त्वन्तराभेदाद् गुणादेर्भेदकस्य च ।
अग्रहादेकबुद्धिः स्यात् पश्यतोपि परापरम् ॥ २२८ ॥

....2.229 गुणादिभेदग्रहणान्नानात्वप्रतिपद्यदि ।
अस्तु नाम तथाप्येषां भवेत् सम्बन्धिसंकरः ॥ २२९ ॥

वस्तुनः ‘स्वतो वस्त्वन्तराद् भेदाभावात्’ । वदन्ति हि स्वतो हि न गौर्नागौर्ग्गोत्वयोगात् गौः । तथा स्वतो हि शुक्लो नाशुक्लः शुक्लत्वयोगात् शुक्ल इत्यादि । ‘भेदकस्य च गुणा[868]’देरग्रहात् पदार्थैः सह । ततश्च ‘परापरम’र्थजातं ‘पश्यतोप्येक’पदार्थत्व‘बुद्धिः स्यात्’ । न हि द्रव्याणामन्योन्यस्य भेदका गुण[869] जात्यादयस्तैः[870] सह गृह्यन्ते येन भेदबुद्धिः स्यात् । द्रव्ये गृहीते पश्चाद् गुणादीनां भेदानां विशेषाणां नानात्वग्रहणं द्रव्या[871]णां यदीष्यते । ‘अस्तु नाम’ पश्चाद् गुणादिग्रहणं । ‘तथाप्येषां’ [188/s] गुणकर्म्मसामान्यादीनां ‘सम्बन्धिनः सांकर्यं’ स्यात् । स्वतो हि द्रव्यं भेदान्नोपलभ्यते । पश्चादुपलभ्यमानैस्तु गुणादिभिः संबन्धितयावगतैर्भेदेन तद् व्यवस्थापनीयं । ततश्चैकत्रैक[872] द्रव्ये गुणादयः सम्बन्धितया प्रतीयेरन् ॥ भिन्नदेशानां गुणानां भिन्नदेशेषु योजनान्न सम्बन्धिसांकर्यमिति चेत् । न (।) देशभेदस्यापि विशेषणत्वात् सोप्येकस्येति स्यात् । एकस्य विरुद्धधर्मायोगात् प्रतीयमानार्थाः पश्चात् प्रतीयमानै[37a/MA] रूपाधिभिर्भिन्ना व्यवस्थाप्यन्त इति चेत् । नन्वेवमपि स्वतोऽर्थानां भेदाभावात् । भेदनिबन्धनैश्चोपाधिभिः सह वेदनाभावान्नाध्यक्षसिद्धा भेदव्यवस्थितिः स्यात् । किन्तु विरुद्धोपाधिसम्बन्धान्यथानुपपत्त्या[873] कल्पनीया । तथा च प्रत्यक्षविरोधः[874] ।

अथ दृष्टेर्थे पश्चात्तनमध्यक्षमुपाधिग्राहकं तान् योजयेद् भेदग्राहकं । कथमदृश्यमाने योजनोपाधीनां प्रत्यक्षकृता विकल्पकृतैव तु स्यात् । तथा च व्यक्तं न भेददर्शनं स्यात् । विकल्पविषयस्यास्फुटत्वात् ।ृष्टेऽर्थे पश्चादुपाधिः प्रतीयमानस्तस्यैव दृष्ट इति चेत् । तस्येति किमुच्यते । न तावदनेकासूपाधिग्रहणात् पूर्व्वमनेकत्वस्याप्रतीतेः । एकं चेत् कथमुपाधिभिर्भेदनीयं । अनवधृतैकानेकभावं वस्तुमात्रं तदिति चेत् । तत्र तर्हि देशभेदादयोप्युपाधयः

[868] २ सकृदनेकार्थप्रतीतिप्रसङ्गात् ।
[869] ३ घटदर्शनेपि पटबोध एव विनोपाधिं पदार्थाग्रहात् ।
[870] ४ दीर्घत्वादि ।
[871] ५ नाना सामान्यादीनि नैकस्येति तद्विशिष्टानां ।
[872] १ भिन्नद्रव्यसमवायान्यपि संकलनात् सम्भिन्नग्रहतः ।
[873] २ भेदस्थितिः ।
[874] ३ अनध्यक्षत्वस्य ।
[875] ४ उपाधीन् । पूर्व्वके नष्टे । देशभेदादियोगे सति ।

पश्चादुपलभ्यमाना योज्यन्ते । तदनन्तरं दृष्टत्वात् तत[875] श्चानिवार्यः सम्बन्धिसंकरप्रस[876] ङ्गः । (२२८, २२९)

सां ख्य[877] मतेपि (।)

....2.230 शब्दादीनामनेकत्वात् सिद्धोनेकग्रहः सकृत् ।
सन्निवेशग्रहायोगादग्रहे सन्निवेशिनाम् ॥ २३० ॥

'शब्दादीनां' सु[878] खदुःखमोहात्मकतया अनेकत्वात् शब्दादिग्रहे 'सकृदनेकग्रहः सिद्धः । संन्निवेशिना[879] मग्रहे सन्निवे[880] शस्य ग्रहायोगात्' ।[881] न ह्यङ्गुल्यग्रहणे मुष्टिग्रहणं । (२३०)

## (ग. (क) कल्पनापोढत्वे धर्मधर्म्यादिसंगतिः)

यदि प्रत्यक्षमविकल्पं तदा कथं धर्म्मधर्म्यादिग्रहणमित्याह (।)

....2-231 सर्वतो विनिवृत्तस्य विनिवृत्तिर्यतो यतः ।
तद् भेदोन्नीतभेदा सा धर्म्मिणोऽनेकरूपता ॥ २३१ ॥

[189/s]

'सर्व्वतः[882]' परस्मा'द्विनिवृत्तस्या'र्थस्य 'यतो यतः' परस्मा'द्विनिवृत्तस्तैर्भेदै'र्व्यावृत्तिभिरुन्नीता साऽ'नेकरूपता' धर्म्मिधर्म्मात्मकतया 'धर्म्मिणो'ऽर्थस्य । सर्व्वतो व्यावृत्ते प्रत्यक्षेण गृहीते वस्तुनि तद्व्यावृत्त्यनुकारिणो विकल्पा (:) प्रत्यक्षदृष्टत्वेन धर्म्मिधर्म्मभावं व्यवस्थापयन्तीति प्रत्यक्षकृतः स उच्यते । न तु प्रत्यक्षप्रतिभासमानत्वात् । (२३१)

तथा हि (।)

....2.232 ते कल्पिता रूपभेदाद् निर्व्विकल्पस्य चेतसः ।
न विचित्रस्य चित्राभाः कादाचित्कस्य गोचरः ॥ २३२ ॥

'ते' धर्मिधर्मादयो 'रूपभेदाद्' बुद्ध्याकारविशेषा विजातीयव्यावृत्त्याश्रयेण 'कल्पिता' विचित्राभा वस्तुबलभावित्वात् 'का[883] दाचित्कस्य विचित्रस्य' धर्म्मिधर्म्मभेदप्रतिभासरहितस्य 'निर्व्विकल्पस्य चेतसः' प्रत्यक्षस्य 'न गोचरः' । प्रत्यक्षं हि वस्तुसामर्थ्योत्पन्नं तदाकारमनुकुर्यात् न विकल्पितं । (२३२)

## (ख) शब्दविकल्पविषयः सामान्यम्

[876] ५ अनेन क्रमेण ।

[877] ६ येनैकरूपत (।) इष्टा ।

[878] ७ श्रोत्रादीनां । सत्त्वरजस्तमः ।

[879] ८ सुखादीनां ।

[880] ९ शब्दादेः ।

[881] १० दृष्टान्तः ।

[882] १ स्वार्थे सामान्यगोचरं व्याख्याय ?? ।

धर्म्मिणो नैकरूपस्य नेन्द्रियात् सर्व्वथा गतिः ।
स्वसम्वेद्यन्त्वानिर्देश्यं रूपमिन्द्रियगोचर

इति व्याचष्टे ।

[883] २ कादाचित्कत्वादर्थसन्निधिसापेक्षत्वमाहान्यथा कल्पितधर्मभेदज्ञेयत्वादिविषयत्वे सर्व्वदा स्यात् । एतेन सामान्यं वस्तुसत्प्रतिषिद्धं ।

भवतु वा वस्त्वेव सामान्यं तथापि नासौ शब्दविकल्पविषय इत्याह (।)

....2.233 यद्यप्यस्ति सितत्वादि यादृगिन्द्रियगोचरः ।
न सोभिधीयते शब्दैर्ज्ञानयो रूपभेदतः ॥ २३३ ॥

'यद्यपि सितत्वादि' सामान्यमस्ति पटादौ धर्म्मिणि 'यादृक्' सितत्वादिविशदाकार 'इन्द्रियस्य गोचरः । स' इन्द्रियज्ञानगोचरोऽर्थोऽ'भिधीयते न शब्दैः । ज्ञानयो-' रिन्द्रियशब्दजनितयो 'रूप'स्याकारस्य स्फुटास्फुटत्वेन 'भेदतः' (२३३)

....2.234 एकार्थत्वेपि बुद्धीनां नानाश्रयतया स चेत् ।
श्रोत्रादिचित्तानीदानीं भिन्नार्थानीति तत्कुतः ॥ २३४ ॥

'बुद्धीना'मिन्द्रियशब्दजनिताना'मेकार्थ'त्वे एकवि[884] षयत्वे'पि नानाश्र[885]यतया' कारणभेदा'त्स'कस्य आकारभेद'श्चेत् । इदानी'मेवं स्थितौ 'श्रोत्रा'दीन्द्रिय'चित्तानि' [190/s] 'भिन्नार्थानि' शब्दरूपगन्धादिभिन्नविषयाणीति व्यपदिश्यके (।) 'तत्कुतः' प्रमाणादवधारितं । तान्यपि चितान्यभिन्नविषयत्वेपीन्द्रियाणामाश्रयभूतानां भेदाद् भिन्नाकाराणीति किन्न कल्प्यते । (२३४)

किञ्च (।)

....2.235 जातो नामाश्रयोन्योन्यः चेतसां तस्य वस्तुनः ।
एकस्यैव कुतो रूपं भिन्नाकारावभासि तत् ॥ २३५ ॥

'सामान्यादिचेतसामाश्रयः' कारणमिन्द्रियं शब्दश्चेति 'अन्योन्यो नाम जातः' । तथापि सामान्यादे'र्वस्तुन एकस्यैव रूपं तत्कुतो भिन्नाकारावभासि' स्फुटास्फुटावभासि स्फुटास्फुटप्रतिभासं । न हि स्वरूपेण भासमानमेकं भिन्नप्रतिभासं युक्तम् । (२३५)

यदप्युच्यते परैः (।) शाब्देन्द्रियज्ञानयोर्यादि नैकविषयत्वं तदा विषाणादिमन्तमर्थं गौरिति शब्दात्प्रतीत्य कालान्तरे व्यक्तिविशेषं दृष्टवतोऽयमसौ शब्दात् प्राङ्मया प्रतीतो गौरिति प्रत्यभिज्ञानमेकताध्यवसायि यदुत्पद्यते तन्न स्यादिति । तत्राह (।)

....2.236 वृत्तेर्दृश्यापरामर्शेनाभिधानविकल्पयोः ।
दर्शनात् प्रत्यभिज्ञानं गवादीनां निवारितम् ॥ २३६ ॥

[37b/MA]

'अभिधानविकल्प'योर्दृ श्यस्याध्यक्षविषयस्या'परामर्शेन' विषयीकरणेन 'वृत्तेः' पश्चाद् 'दर्शनात्' स एवायं शब्दनिर्दिष्टो गौरिति 'प्रत्य[886] भिज्ञानं गवादीनां' यदिष्यते 'तन्निवारितं' बोद्धव्यं । इन्द्रियशब्दज्ञानयोर्भिन्नाकारत्वेनैव विषयत्त्वाभावात् कथं त[887] देकताव्यवसायि वस्तुविषयं स्यात् ।(२३६)

....2.237 अन्वयाद्यानुमानं यदभिधानविकल्पयोः ।
दृश्ये गवादौ जात्यादेस्तदप्येतेन दूषितम् ॥ २३७ ॥

---

[884] ३ सामान्यमात्र ।
[885] ४ चक्षुरादिमनसी ।
[886] १ मिथ्यावत् ।
[887] २ पूर्व्वापरैकता इन्द्रियज्ञानोत्तरभावि ।

यच्च 'दृश्ये गवादा'वनेकत्राभिन्नाकारयोर'भिधानविकल्पयोरन्वयादनुवृत्तेर्जात्यादेरनुमानं परैरुच्यते तदप्येते'नाभिधानविकल्पयोर्दृश्यत्वापरामर्शेन हेतुना 'दूषितं' बोद्धव्यं । न ह्यन्वयिनावपि शब्दविकल्पौ वस्तु स्पृशतः । तत्कथं ताभ्यां वस्तुनः सामान्यस्य सिद्धिः । (२३७)

यदि नास्ति सामान्यं तथा कथमस्तु प्रत्यभिज्ञानमित्याह (।)

[191/s]

....2.238 दर्शनान्येव भिन्नान्यप्येकां कुर्वन्ति कल्पनाम् ।
प्रत्यभिज्ञानसंख्यातां स्वभावेनेति वर्णितम् ॥ २३८ ॥

'दर्शनानी'न्द्रियज्ञा'नान्येव भिन्नानि' नानाक्षणविषयाण्यनेका'न्यपि स्वभावेन' प्रत्यभिज्ञानकारणस्वरूपेण स्वकारणप्रसूतेन कल्पनात्मेकत्वाध्यवसायिनीं 'प्रत्यभिज्ञानसंख्याता-' प्रत्यभिज्ञाननाम्ना प्रसिद्धां 'कुर्वन्तीति वर्ण्णितं' प्राक्[888] ।

तस्मात्स्थितमेतत् प्रत्यक्षमनिर्देश्यत्वादविकल्पमिति । उक्तमिन्द्रियप्रत्यक्षं ॥ XX ॥ (२३८)

## (२) मानसप्रत्यक्षम्

मानसमाख्यातुमाह (।) तच्चेन्द्रियज्ञानानन्तरमिष्टं । तेन सहैकविषयं भिन्नविषयं वा स्यात् । उभयथापि तु दोष इत्याह (।)

....2.239 पूर्व्वानुभूतग्रहणे मानसस्याप्रमाणता ।
अदृष्टग्रहणेन्धादेरपि स्यादर्थदर्शनम् ॥ २३९ ॥

'पूर्व्वानुभूत'स्येन्द्रियज्ञानगृहीतस्य 'ग्रहणे मानसस्य' स्वीक्रियमाणे'ऽप्रमाणता' स्यात् । अज्ञाता(र्थ) प्रकाशस्य प्रमाणत्वात् । इन्द्रियज्ञाना'दृष्टस्य ग्रहणे' पुनरिष्यमाणे'ऽन्धादेरपि स्यादर्थ'स्य रूपादे'र्दर्शनं' । (२३९)

इन्द्रियज्ञानानुभूतविषयत्वेपि द्वौ विकल्पौ सोऽर्थः क्षणिको न वा ।

....2.240 क्षणिकत्वादतीतस्य दर्शने च न सम्भवः ।
वाच्यमक्षणिकत्वे स्याल्लक्षणं सविशेषणम् ॥ २४० ॥

प्रथमपक्ष इन्द्रियज्ञानविषयस्यार्थ[889] स्य [890] पूर्व्वकालस्य सहभु[891] वो वा 'क्षणिकत्वादतीतस्य' न[892] ष्टस्य मानसेन 'दर्शने' दर्शनस्य 'च न सम्भवो'स्ति । 'अक्षणिकत्वे' वा अधिगतार्थाधिगन्तृत्वादप्रमाणं स्यात् । अथ मानसमधिगतार्थाधिगन्तृप्रमाणमिष्यते तदापि मानसस्य 'सविशेषणं लक्षणं वाच्यं स्यात्' । यथाधिगतविषयत्वेपि कल्पनापोढमभ्रान्त मानसं प्रत्यक्षमिति (। २४०)

[192/s]

किञ्च (।)

888 १ प्रथमपरिच्छेदे ।

889 २ . . . . .... सौत्रान्तिकस्य ।

890 ३ मानसञ्चार्थरागादि स्वसम्वित्तिरकल्पिका योगिनां गुरुनिर्देशाव्यतिभिन्नार्थमात्रदृगि तिसवृत्ति व्याख्यातुं परोक्तदूषणं चतुःश्लोक्याह । वृत्तिर्मानसमपि रूपादिविषयमविकल्पकमनुभवाकारप्रवृत्तमिति ।

891 ४ वैशेषिकस्तुल्यं करामलवद्विषयविषयित्वमाह ।

892 ५ वैभाष्यस्य स ज्ञानविषयनिरोधः ।

....2.241 निष्पादितक्रिये किञ्चिद् विशेषमसमादधत् ।
कर्म्मण्यैन्द्रियमन्यद् वा साधनं किमितीष्यते ॥ २४१ ॥

'निष्पादिता क्रिया' यस्मिन् तत्र 'कर्मणि विशेषं कञ्चिदसमादधत् ऐन्द्रियमि'न्द्रियज्ञान'मन्यद्वा' प[893] रश्चादि 'साधनं किमितीष्यते' (।) क्रियानिर्व्वर्तनं हि साधनव्यापारः । तच्चेन्निष्पन्नं किमन्यत् कुर्व्वत्तत् साधनं स्यात् । (२४१)

अपि च (।)

....2.242 सकृद् भावश्च सर्व्वासां धियां तद्भावजन्मनाम् ।
अन्यैरकार्यभेदस्य तदपेक्षाविरोधतः ॥ २४२ ॥

तस्मात् स्थिराद् 'भावाज्जन्म' यासान्तासां 'सर्व्वासां धियां सकृद् भावश्च स्यात्' । न क्रमभावः । क्रमिसहकार्यपेक्षया क्रमेण स्थिरोप्यर्थः करोति बुद्धीरिति चेत् । अतो'ऽन्यैः' सहकारिभिर'कार्यो भेदो' विशेषो यस्य स्थिरैकरूपस्य तस्य 'तदपेक्षाया विरोधतः' ॥ (२४२)

यत एवं (।)

....2.243 तस्मादिन्द्रियविज्ञानानन्तरप्रत्ययोद्भवः ।
मनोन्यमेव गृह्णाति विषयं नान्धदृक् ततः ॥ २४३ ॥

'तस्मादिन्द्रियविज्ञान'मेवानन्तर'प्रत्यय'स्तस्मा'दुद्भवो' यस्य त'न्मनो' मानसं प्रत्यक्षं । इन्द्रियप्रत्यक्षग्राह्य (।) द्विषया'दन्यमेव विषयं गृह्णाति । तत' इन्द्रियज्ञानजन्यत्वात् मानसस्यान्धानां चक्षुर्व्विज्ञानविकलानां दृग् दर्शनं रूपस्य न भवति । गृहीतग्राहित्वं च विषयान्तरग्रहणादपास्तं (। २४३)

यद्यन्यविषयग्राहकं मानसं तदा भूतभविष्यद्ग्राहकमपि स्यादित्याह (।)

....2.244 स्वार्थान्वयार्थापेक्षैव हेतुरिन्द्रियजा मतिः ।
ततोन्यग्रहणेप्यस्य नियतग्राह्यता मता ॥ २४४ ॥

स्वार्थः स्वकीयो विषयस्तस्माद'न्वय' उत्पादो यस्यार्थस्य तद'पेक्षैव इन्द्रियजामति'र्मनोविज्ञानस्य 'हेतु'रिष्यते । 'ततोऽन्य'स्य विषयस्य 'ग्रहणेपि' मनोविज्ञानस्येष्यमाणे नियत इन्द्रियज्ञानग्राह्योपादेयक्षण एव ग्राह्यो यस्य तद्भावो 'नियतग्राह्यता सा मता'[894] । (२४४)

[193/s]

ननु स्वज्ञानेन स्वालम्बनज्ञानेन एककालिकस्तुल्यकालिकोर्थः ।

....2.245 तदतुल्यक्रियाकालः कथं स्वज्ञानकालिकः ।
सहकारी भवेदर्थ इति चेदक्षचेतसः ॥ २४५ ॥

तेन सहकारिसम्मतेन्द्रियज्ञाने'नातुल्यः क्रिया[895] कालो' यस्य भिन्नकालत्वात्[38a/MA] सोऽर्थः 'सहकारी' कथ'मक्षचेतसो भवेदिति चेत्' । (२४५)

अत्राह (।)

....2.246 असतः प्रागसामर्थ्यात् पश्चाच्चानुपयोगतः ।
प्राग्भावः सर्व्वहेतूनां नातोर्थः स्वधिया सह ॥ २४६ ॥

[893] १ मानसादि ।

[894] २ अभिधर्मेऽस्ति मनोविज्ञानसमङ्गी तु नीलमिदमिति च, मनो द्विधा । सविकल्पं निर्व्विकल्पञ्च तु तन्मानसं प्रत्यक्षं विमतिनिरासाय व्युत्पादितं ।

[895] १ स्वसत्ताकालः ।

कार्योत्पत्तेः प्रागसतस्तत्रासा'मर्थ्यात्' । सदधिष्ठानं हि 'सामर्थ्यमसतः कथं' स्यात् । कार्योत्पत्तेः 'पश्चात्' सतः कारणव्यापाराद्वा पश्चात् कार्यसमकालस्य सतो वा तत्रा-'नुपयोगतो' व्यापाराभावात् । कार्या'त्प्राग्भावः सर्व्वहेतूनामि'ति स्थितं । विषयश्च ज्ञानानां नाकारणमतिप्रसङ्गात् । 'अतो' विषयः कारणात्मकः 'स्वधिया' स्वालम्बनधिया 'सह न' भवति । पूर्व्वभावित्वे च विषयस्य तत्कालेन्द्रियज्ञानसहकारिता युक्तिमती । (२४६)

ननु (।)

....2.247 भिन्नकालं कथं ग्राह्यमिति चेद् ग्राह्यतां विदुः ।
हेतुत्वमेव युक्तिज्ञा ज्ञानाकारार्पणक्षमम् ॥ २४७ ॥

प्राग्भावभावित्वाद् 'भिन्नकालं' वस्तु 'कथं ग्राह्य'मिति 'चेत् । हेतुत्वमेव ज्ञानेऽकार'स्य स्वानुरूपस्या'र्पणक्षणं ग्राह्यतां युक्तिज्ञा विदुः' (।) न हि संदंशायोगोलयोरिव ज्ञानपदार्थयोर्ग्राह्यग्राहकभावः । कथन्तर्हि यदाकारमनुकरोति तत् ग्राह्यस्य ग्राहकमित्युच्यते । (२४७)

ननु यदि कारणं ग्राह्यंतदा समनन्तरप्रत्ययादिकं च तथा स्यात् । इत्याह (।)

....2.248 कार्यं ह्यनेकहेतुत्वेऽप्यनुकुर्व्वदुदेति यत् ।
तत्तेनाप्यत्र तद्रूपं गृहीतमिति चोच्यते ॥ २४८ ॥

'कार्यं' हि ज्ञानम'नेकहेतुत्वेऽपि' यत्कारणमाकारद्वारेणा'नुकुर्व्वदुदेति' तत्कारणमर्पि तद्रूपमुपरोपितस्वाकारं 'तेन' कारणाकारेण 'गृहीतमिति चोच्यते' । यथा पितृरूपं पुत्रेण गृहीतमिति कथ्यते । उक्तं 'मानसं' ॥ X X ॥ (२४८)

[194/s]

## (३) क. स्वसंवेदनप्रत्यक्षम्

स्वसम्वेदनमाख्यातुमाह (।)

....2.249 अशक्यसमयो ह्यात्मा रागादीनामनन्यभाक् ।
तेषामतः स्वसंवित्तिर्न्नाभिजल्पानुषङ्गिणी ॥ २४९ ॥

रागद्वेषसुखदुःखादीनां सर्व्वचित्तचैत्तानामात्मसंवेदनं प्रत्यक्षमविकल्पत्वात् ।

तथा हि । 'रागादीनामात्मा स्वरूपमनन्यभाक्' ना[896] न्यं भजते । स्वरूपमात्रावस्थितेः । तस्मा'दशक्यः समयः' संकेतोऽस्मिन् 'अतः' संकेताविषयत्वात् 'तेषां' रागादीनां 'स्व'स्यात्मनः 'सम्वित्तिः' प्रकाशोऽ'भिजल्पो' वाचकशब्दोल्लेखस्त'दनु'षङ्गो यस्यास्ति सा तथा न भवति । वा[897] च्यं हि वाचकेन संयोज्येत । न च रागाद्यात्मा वा[898] च्यस्ततस्तत्प्रकाशो न शब्दसंगतः । (२४९)

...2.250a अवेदकाः परस्यापि ते स्वरूपं कथं विदुः ।

---

[896] १ रागादिसुखादिषु स्वसम्वेदनमिन्द्रियानपेक्षत्वान्मानसं प्रत्यक्षमिति वृद्धिः । अत्र च नात्मसंयोगमात्रभावित्वं सुखादेर्दृष्टमिति दृष्टग्रहणात् ।

[897] २ वैशेषिका ज्ञानाद् व्यतिरिक्तं सुखादिकमात्मगुणमाहुः । सुखादिज्ञानबाह्यमिति सांख्या एतदपाकरणार्थं मानसग्रहणं । सातत्किं स्ववेदनं सर्व्वेन्द्रियकालिकत्वात् । धारवाहि च प्रत्यक्षसिद्धत्वात् । अविकल्पश्च स्वप्ने स्पष्टभासात् । कामशोकादिष्वपि सप्रयोजनश्च । विनानेन स्मृतेरयोगात् । स्वसम्वित्तेर्निर्व्विकल्पत्वं साध्यं सा च ज्ञानस्यापि नास्ति कुतः सुखादीनां ।

[898] ३ यादृशो यादृशादुत्पन्नो दृष्टस्तादृशोन्योपि तादृशादेव अन्यादृशस्तु यादृशा इति स्थिते ।

ननु रागसुखादय आत्मगुणाः 'परस्य' बाह्यस्या'प्यवेदना'ञ्ज्ञातत्वात् 'ते स्वरूपं कथं विदुः' । वेदकस्य कदाचित् स्ववेदनं संभाव्येत । अवेदकं च न क्वचिदुपयोगि ॥

यदि न स्ववेदना रागादयस्तदा कथं वेदयन्त इत्याह (।)

...2.250b एकार्थाश्रयिणा वेद्या विज्ञानेनेति केचन ॥ २५० ॥

'एकोर्थ' आत्मा 'आश्रयो' रागादिभिः सह यस्यास्ति 'तेने'कार्थाश्रयिणा 'ज्ञानेन वेद्या' रागादय 'इति केचन नै' या यि का दयः । (२५०)

अत्राह (।)

[195/s]

....2.251 तदतद्रूपिणो भावस्तदतद्रूपहेतुजाः ।
तत्सुखादि किमज्ञानं विज्ञानाभिन्नहेतुजम् ॥ २५१ ॥

'तद्रूपिणो' विवक्षितैकरूपवन्तोऽ'तद्रू'पिण इतररूपवन्तो भावा यथाक्रमं तद्रूपाद् दृष्टैकरूपाद्धेतोः सामग्रीलक्षणाज्जाता 'अतद्रूपहेतुजाता' विलक्षणसामग्रीजाता भवन्तीति तावत् स्थितं । तत् तस्मादिमं न्यायमुल्लङ्घ्य 'विज्ञानेन सहाभिन्न' एको 'हेतु'रिन्द्रियविषयमनस्कारादिसामग्रीलक्षणस्तस्मा (त्) जातं 'सुखादिकं' कस्मादज्ञानं समानसामग्रीप्रसूतत्वात् द्वयमपि ज्ञानं स्यान्न वा किञ्चित् । (२५१)

अभिन्नहेतुकतामेव समर्थयितुमाह (।)

....2.252 सार्थे सतीन्द्रिये योग्ये यथास्वमपि चेतसि ।
दृष्टं जन्म सुखादीनां तत्तुल्यं मनसामपि ॥ २५२ ॥

यस्य यदात्मीयं जनकं तस्मि'न्निन्द्रिये सार्थे' सविषये योग्ये कार्योत्पादनं प्रति 'चेतसि' समनन्तरप्रत्यये सति 'सुखादीना'मपि 'जन्म दृष्टं' । तद्यथास्वमिन्द्रियादिषु योग्येषु सत्सु जन्म दर्शनं 'मन'सां ज्ञानाना'मपि तुल्यं' । अतस्तुल्यहेतुकत्वात् तुल्यजातीयतैव युक्ता नान्यथा क्वचिदेकता स्यात् । (२५२)

तुल्यहेतुकत्वेपि संस्कारादेर्नियामकत्वात् सुखादिकमज्ञानं स्यादित्याह (।)

....2.253 असत्सु सत्सु चैतेषु न जन्माजन्म वा क्वचित् ।
दृष्टं सुखादेर्बुद्धेर्वा तत्ततो नान्यतश्च ते ॥ २५३ ॥

'अस'त्स्विन्द्रियादिषु दुःखादेर्बुद्धेर्वा जन्म न क्वचिदिष्टं । 'सत्सु' च एतेष्वि'न्द्रिया'दिषु अजन्म वा 'सुखादेर्बुद्धेर्वा न क्वचिद् दृष्टं' (।) तत् तस्मात् तत इन्द्रियादे-[38b/MA] र्दृष्टसामर्थ्यात् कारणात् ते सुखबुद्धी जायेते । 'अन्यतः' संस्कारादे'र्न ते' तस्य सामर्थ्यादर्शनात् । (२५३)

(ख. सुखादिपरवेद्यतानिरस)

नन्वभिन्नहेतुकत्वे सुखदुःखादिभेदश्च न स्यादित्याह (।)

....2.254 सुखदुःखादिभेदश्च तेषामेव विशेषतः ॥
तस्या एव यथा बुद्धेर्म्मान्द्यपाटवसंश्रयाः ॥ २५४ ॥

'सुखदुःखादिभेदश्चा'वान्तर'स्तेषामि'न्द्रियादीना'मेव' हेतूनां 'विशेषतो'ऽवान्तरात् । 'यथा तस्या बुद्धे'रेवान्तरहेतुविशेषात् 'मान्द्यपाटवसंश्रयाः' परस्परसंभविनो भवन्ति (।) तस्मात् सुखादयो विज्ञानेनाभिन्नहेतुकत्वाद्विज्ञानस्वभावा एवेति स्थितं । (२५४)

[196/s]

इदानीं परवेद्यतामेषां निषेद्धुमाह (।)

....2.255 यस्यार्थस्य निपातेन ते जाता धीसुखादयः ।
मुक्त्वा तं प्रतिपद्येत सुखादीनेव सा कथम् ॥ २५५ ॥

'यस्यार्थस्य' स्त्र्यादे'र्निपातेन' सन्निधानेन 'ते धीसुखादयो जाता'स्तं कारणभूतमाकारार्पणक्षमं 'मुक्त्वा' सुखादीनेव सहभाविनो विषयलक्षणरहितान् सा बुद्धिः 'कथं प्रतिपद्येत' । अकारणस्य विषयत्वेतिप्रसङ्गात् । (२५५)

....2.256 अविछिन्नाथ भासेत तत्संवित्तिः क्रमग्रहे ।
तल्लाघवाच्चेत्तत्तुल्यमित्यसंवेदनं न किम् ॥ २५६ ॥

'अथे'न्द्रियज्ञानेन विषयग्रहस्तदनन्तरं मानसाध्यक्षेण सुखादिग्रह इति 'क्रमग्रहे' स्त्रीक्रियमाणे तयोर्व्विषयसुखयोः 'संवित्तिरविच्छिन्ना' यौगपद्येन न 'भासेत' । अस्ति च युगपत्प्रतिभासः परिस्फुटः । तयोर्ब्बाह्यसुखग्राहिमनसोर्लाघवात् यौगपद्यप्रतिभास'श्चेत् । त'ल्लाघवं प्रतिक्षणमेकैकत्वसंवेदनाभावस्यापि 'तुल्यमित्यसम्वेदनमेव' साहित्यस्य 'किं न भवति' । (२५६)

इन्द्रियबुद्ध्यैवैकया बाह्यसुखयोः सकृद्ग्रहणमिति चेत् । आह ।

...2.257a न चैकया द्वयज्ञानं नियमादक्षचेतसः ।

'न चैकया द्वयस्य ज्ञानं' संभवति । 'अक्षचेतसो'र्ब्बाह्यरूपादिग्रहण एव 'नियमा न्नि'यतत्वात् 'सुखा[899] द्या'त्मगुणग्रहणा'भा'वात् ।
किञ्च (।)

...2.257b सुखाद्यभावेप्यर्थाच्च जातेस्तच्छक्त्यसिद्धितः ॥ २५७ ॥

नाकारणं विषयः 'सुखाद्यभावेपि' केवला'दर्थादि'न्द्रियबुद्धेर्जातिरुत्पादात् । तस्य सुखादेरिन्द्रियबुद्धिजननं प्रति 'शक्त्यसि'द्धेरविषयत्वं ।[900] (२५७)

...2.258a पृथक् पृथक् च सामर्थ्ये द्वयोर्नीलादिवत् सुखम् ।
गृह्येत केवलं;

'द्वयो' रूपिसुखाद्योः 'पृथक् पृथग्गा'नोपपत्तौ 'सामर्थ्ये' वाभ्युपगम्यमाने 'नीलादिवत् केवलं सुखं गृह्येत' ।
[197/s]

अयुक्तं चैतत् ।

...2.258b तस्य तद्धेत्वर्थमगृह्णतः ॥ २५८ ॥

'न हि तस्य' सुखादे'र्हेतुमर्थं' स्त्र्यादि'मगृह्णतः'[901] (। २५८)

...2.259a न हि संवेदनं युक्तमर्थेनैव सह ग्रहे ।

सुखस्य 'संवेदनं युक्तं । अर्थेनैव सह' सुखस्येन्द्रियधिया 'ग्रहे' नास्ति 'दोष' इति चेत् । न (।)

899 १ सुखाद्यात्मनः संयोगजमनसा गृह्यते इत्युपगमात् ।
900 २ सुखादयो नात्मानं विदुरिति बुद्ध्या वेद्येरन्निति किं सहजया उत्तरकालया वा तत्र । सहिता व्यस्ताश्च यथा नीलादयो ज्ञानहेतुस्तद्वत् सुखादिर्व्विषयश्च स्यादिति द्वयं ग्रहणमविरुद्धमित्याह ।
901 १ अर्थग्रहणनिरपेक्षं न तत् सिद्धिकल्पं ॥

...2.259b किं सामर्थ्यं सुखादीनां नेष्टा धीर्यत्तदुद्भवा ॥ २५९ ॥

‘सुखा’देरिन्द्रियबुद्धिजनने ‘किम’स्ति ‘सामर्थ्यं’ । येन तस्याः स विषयः सन् सह गृह्येत । ‘यद्य’स्मा‘त्तदुद्भवा’ सुखादुद्भवा नेन्द्रिय‘धीरिष्टा’ तस्मान्न तद्ग्राहिका । (२५९)

....2.260 विनार्थेन सुखादीनां वेदने चक्षुरादिभिः ।
रूपादिः स्त्यादिभेदोऽक्ष्णा न गृह्येत कदाचन ॥ २६० ॥

ततश्च कथमर्थसुखयोः सहवेदनं । ‘अर्थेन विनैव चक्षुरादि’भिश्चक्षुरादिज्ञानैः ‘सुखादीनां’ वेदने चाभ्युपगम्यमाने ‘स्त्यादेर्भेदो’ विशेषो ‘रूपादिः’ सुखहेतुरक्ष्णा चक्षुर्ज्ञानेन (न) ‘कदाचन गृह्येत’ । (२६०)

कस्मादेवमित्याह (।)

....2.261 न हि सत्यन्तरङ्गेऽर्थे शक्ते धीर्बाह्यदर्शनी ।
अर्थग्रहे सुखादीनां तज्ज्ञानां स्यादवेदनम् ॥ २६१ ॥

‘अन्त’रङ्गे सन्निहिते ‘अर्थे’ क्षेत्रज्ञसमवेते सुखादौ ‘शक्ते’ स्वग्राहिज्ञानोत्पादनक्षमे सति न हि ‘बाह्यदर्शनी धी’रर्थग्राहिणी युक्ता । बहिरङ्गो बाह्योऽर्थ इन्द्रियालोकादिसहकार्यपेक्षणात् । सुखादिस्तु न तत्सापेक्ष इति तस्माज्ज्ञाता धीस्तमेव गृह्णीयात् । इन्द्रियधिया‘ऽर्थग्रहे’ स्वीक्रियमाणे ‘सुखादीनां’ तज्ज्ञानामर्थदर्शनप्रसूतानाम‘र्थमवेदनं स्यात्’ । इन्द्रियबुद्धिरर्थग्रह एवोपयुक्ता तत्कालमन्या च धीर्नास्ति पश्चात् ज्ञानान्तरकाले विषयबलभाविनः सुखादे[902]रभाव इति कथं वेदनं । (२६१)

....2.262 धियोर्युगपदुत्पत्तौ तत्तद्-विषयसम्भवात् ।
सुखदुःखविदौ स्यातां सकृदर्थस्य सम्भवे ॥ २६२ ॥

[198/s]

विषयसुखग्राहिण्योर्द्वयोरिन्द्रियबुद्धिमनोबुद्ध्यात्मिकयोः । तस्य सुखहेतोर्दुःखहेतोश्च ‘विषयस्य सम्भवात् युगपदुत्पत्ता’वभिमतायां ‘सकृदर्थस्य’ सुखदुःखहेतोः ‘सम्भवे’ सति ‘सुखदुःखविदौ स्यातां’ । (२६२)

स्यादेतत् (।)

....2.263 सत्यान्तरेप्युपादाने ज्ञाने दुःखादिसम्भवः ।
नोपादानं विरुद्धस्य तच्चैकमिति चेन्मतम् ॥ २६३ ॥

न केवलमर्थे सति किन्तर्ह्या‘न्तरे’ समनन्तरप्रत्यये ‘ज्ञान उपादाने सति’ [39a/MA] ‘दुःखादिसंभवः’ । तच्चोपादानापेक्षं ज्ञानं ‘विरुद्धस्य’ सुखदुःखादेर्न कारणं भवितुमर्हती‘ति मतं चेत्’ (। २६३)

अत्राह (।)

....2.264 तदज्ञानस्य विज्ञानं केनोपादानकारणं ।
आधिपत्यं तु कुर्वीत तद्विरुद्धेपि दृश्यते ॥ २६४ ॥

902 २ विषयाभावादेव ।

'तद्विज्ञानमज्ञानस्य' सुखदुःखादेरु'पादानकारणं' केन हेतुना सम्मतं । समानजातीयं कारणमुपादानं नान्यत् । न च सुखादिर्विज्ञानामिष्टं । ज्ञानमज्ञानकार्ये आधिप[903] त्यं सहकारित्वं कुर्वीत । 'तदा'धिपत्यं 'विरुद्धेपि' का[904] र्ये दृश्यते । (२६४)

....2.265 अक्ष्णोर्यथैक आलोको नक्तञ्चरतदन्ययोः ।
रूपदर्शनवैगुण्यावैगुण्ये कुरुते सकृत् ॥ २६५ ॥

'यथा एक आलोको नक्तंच'रस्य मनुष्यादेरक्ष्णो रूपदर्शनस्य वैगुण्यावैगुण्ये यथाक्रमं 'सकृत् कुरुते' । (२६५)

....2.266 तस्मात् सुखादयोर्थानां स्वसंक्रान्तावभासिनाम् ।
वेदकाः स्वात्मनश्चैषामर्थेभ्यो जन्म केवलम् ॥ २६६ ॥

यस्माद[905] न्येन सुखादीनां वेदनं न घटते । 'तस्मात्सुखादयो' ज्ञानात्मानः स्वस्मिन् स्वरूपे प्रतिबन्धद्वारेण 'संक्रान्तावभासन'शीलाश्च ये'ऽर्थानां' तेषां 'वेदकाः' । 'आत्मनश्चा-'परोक्षत्वाद्वेदकाः । अर्थसरूपस्यात्मनोऽपरोक्षतैव अर्थवेदनं स्ववेदनञ्च । न ह्यन्यः कश्चिद् ग्रहणप्रकारः । तत'श्चैषां' सुखादीनामर्थसरूपाणा'मर्थेभ्यो जन्मैव केवलं' ग्रहीतृत्वं नापरः कश्चिद् व्यापारः । (२६६)

[199/s]

....2.267 अर्थात्मा स्वात्मभूतो हि तेषां तैरनुभूयते ।
तेनार्थानुभवख्यातिरालम्बस्तु तदाभता ॥ २६७ ॥

अत एवा'र्थानुभवः' कथं स्ववेदनमर्थज्ञानयोर्भेदात् । तद्वेदनयोश्च भेदस्य न्यायप्राप्तत्वादिति ब्रुवाणः प्रतिक्षिप्तः । तथा हि तेषां सुखादीना'मर्थात्मा' अर्थाकारः प्रतिबिम्बसंक्रान्त्या 'स्वात्मभूतः' स्वभावभूत'स्तैः' सुखादिभि'रनुभूयते'ऽपरोक्षत्वात् । तेनोपचारेणार्थस्य परभूतस्य प्रतिबिम्बहेतोरनुभवस्य ख्यातिः प्रसिद्धिः । ततश्च ज्ञानस्यालम्बोऽर्थालम्बनं तदाभता अर्थाकारत्वं विचार्यमाणमवशिष्यते न तु पारमार्थिकमालम्ब्यालम्बकत्वं नाम । (२६७)

### ग. स्वसंवेदने सांख्यमतनिरासः

इदानीं सां ख्य म तमुत्थापयन्नाह (।)

....2.268 कश्चिद् बहिःस्थितानेव सुखादीनप्रचेतनान् ।
ग्राह्यानाह न तस्यापि सकृद्युक्तो द्वयग्रहः ॥ २६८ ॥

'कश्चिद् बहिःस्थितानेव' न त्वात्मसमवायिनः । प्रधानपरिणामजत्वेन सुखदुःखमोहस्वभावत्वात् अर्थान'प्रचेतनात्' आत्मन एव चेतनत्वाद् । बुद्धिदर्पणे जडात्मनि स्वच्छेऽर्थचेतनयोः प्रतिबिम्बसंक्रान्तिद्वारेण च्छायापत्त्या चेतनस्य 'ग्राह्यानाह (।) तस्यापि' मते 'द्वयस्य' सुखस्य नीलादेश्च 'सकृद् ग्रहो' नियमेन 'न युक्तः' । कदाचिद्रूपनिरपेक्षमपि रूपसुखमनुभूयेत । (२६८)

....2.269 सुखाद्यभिन्नरूपत्वान्नीलादेश्चेत् सकृद् ग्रहः ।
भिन्नावभासिनोर्ग्राह्यं चेतसोस्तदभेदि किम् ॥ २६९ ॥

---

[903] १ सिद्धान्त्येवाह (।) आधिपत्यमानं स्यात् ।

[904] २ न च तावतोपादानत्त्वात् ।

[905] ३ महत्तत्त्वादिना ।

'सुखादेरभिन्नरूपत्वान्नीलादेः सकृन्नियमेन ग्रहश्चेत् । भिन्नावभासिनो'र्भिन्नाकारयोः सुखनील'चेतसोर्ग्राह्यं तत् किमभेदि' इष्यते । सुखदुःखादीनां नीलपीतादीनाञ्च भिन्नमनोग्राह्यानामेकत्वमेवं स्यात् । (२६९)

किञ्च (।)

....2.270 तस्याविशेषे बाह्यस्य भावनातारतम्यतः ।
तारतम्यञ्च बुद्धौ स्यान्न प्रीतिपरितापयोः ॥ २७० ॥

यदि नीलाद्येव सुखाद्यात्मकं तदा 'तस्य बाह्यस्य' सुखदुःखाद्यात्मतयाऽ'विशेषे' विशेषाभावे रुच्यरुचिविषयतया 'भावना'यास्ता'रतम्यतः । तारतम्यञ्च बुद्धौ प्रीतिपरितापयोर्न' स्यात् । न हि ग्राह्याविशेषे तज्ज्ञानं विशिष्यते । (२७०)

....2.271 सुखाद्यात्मतया बुद्धेरपि यद्यविरोधिता ।
स इदानीं कथं बाह्यः सुखाद्यात्मेति गम्यते ॥ २७१ ॥

[200/s]

बुद्धेरपि प्रधानपरिणामरूपाया भावनातारतम्यात् सुखाद्यात्म[906] ताविशेषाद् बाह्याविशेषेपि प्रीतिपरितापतारतम्यस्याविरोधितेष्यते । 'यदि इदानी'मन्याभ्युपगमे 'बाह्योऽर्थः' स सुखाद्यात्मेति कथं गम्यते । अनुभूयमानं सुखमन्यत्रासंभवद् बाह्ये व्यवस्थापनीयं । (२७१)

....2.272 अग्राह्यग्राहकत्वाचेद् भिन्नजातीययोः पुमान् ।
अग्राहकः स्यात् सर्व्वस्य ततो हीयेत भोक्तृता ॥ २७२ ॥

यदा तु बुद्धिरपि सुखात्मिका तदा किं बाह्यसुखकल्पनया । बाह्यमह[907] तोर[39b/MA] सुखरूपत्वाच्च 'भिन्नजातीययोर्ग्राह्यग्राहकत्वा'भावात् सुखाद्यात्मता बाह्यस्य गम्यत इति चेत्[908] । 'पुमान्' चेतनो निर्गुणत्वादसुखादिरूपो ग्राह्यस्याचेतनस्य सुखाद्यात्मकस्य सर्व्वस्य भिन्नजातीयत्वात् 'अग्राहकः' स्यात् । 'ततो'ऽग्राह[909] कत्वात् 'भोक्तृतास्य हीयते' । अनुभविता हि भोक्तोच्यतेऽनुभवाभावे कथं भोक्ता । (२७२)

....2.273 कार्यकारणतानेन प्रत्युक्ताऽकार्यकारणे ।
ग्राह्यग्राहकताभावाद् भावेन्यत्रापि सा भवेत् ॥ २७३ ॥

बुद्धिसुखयोर्ग्राह्यग्राहकाभावात् । नाकारणं विषय इति कार्यकारणता । ततो ग्राह्य[910] स्य सुखाद्यात्मकत्वात् तत्कार्यया बुद्ध्यापि सुखाद्यात्मिकया भवितव्यमिति परैरुक्ता 'कार्यकारणता' सानेनातिप्रसङ्गेन 'प्रत्युक्ता' । तथा हि भोक्तापि 'ग्राहक' इति स च कार्यसुखाद्यात्मकः कथं 'स्यात्' । अपि चाकार्यकारणे बुद्धिसुखे । ग्राह्यग्राहकतायाः कार्यकारणतानिबन्धनाया अभावात् । 'ग्राह्यग्राहकत्व'भावात् कार्यकारणभावस्य च 'भावे'ऽभ्युपगम्यमाने'ऽन्य'त्रात्मविषय[911] योरपि 'सा' कार्यकारणता स्यात् । ग्राह्यग्राहकताया भावात् । (२७३)

[201/s]

[906] १ नीलादि सुखादि च भिन्नमेव । नीलसंप्रहर्षणाकारयोर्भेदात् ।

[907] २ प्रधानान्महान्महतोहंकारस्ततः पञ्च शब्दादीनि ततः पञ्चाकाशादीनि पञ्च कर्म्मेन्द्रियाणि वाक्पाणिपादपायूपस्थानि पञ्च बुद्धीन्द्रियाणि मनश्च ... सांख्यस्य । ग्राह्यग्राहकत्वाभावः प्रसज्येद(? ना) स्ति स न स्यात् ।

[908] ३ विषयबुद्धयोः ।

[909] ४ न बाह्यं ज्ञाने संक्रामति स्वरूपेण वेद्यते वाऽग्न्यादाहप्रसङ्गात् ।

[910] ५ बुद्ध्या कटो विषयाकारः पुमांसमध्यारोहति ततोस्य भोक्तृत्वं ।

[911] ६ विजातीययोरपि ।

यस्मात्सुखादेर्ब्बाह्यस्य भावनातस्तारतम्यानुयोगयोगः ।

...2.274a तस्मात्त आन्तरा एव,

'तस्माद'सुखादय 'आन्तरा' ज्ञानस्वभावा अबाह्या अभ्युपगन्तव्याः ।
किञ्च (।)

...2.274b सम्वेद्यत्वाच्च चेतनाः ।
संवेदनं न यद् रूपं न हि तत्तस्य वेदनम् ॥ २७४ ॥

'सम्वेद्यत्वाच्च हेतोस्ते चेतनाः' । तथा हि सम्वेदनं तद्रूपं यद्विषयस्वरूपं न भवति 'तत्संवेदनं तस्य' विषयस्य 'वेदनं' यस्मा'न्न' भवति । न ह्यविषयस्वरूपं प्रतिविषयं भेदव्यवस्थां कर्त्तुमर्हतीति साकारं ग्राहकं । तथा च साकारं ज्ञानमेव सुखमस्तु तदुपधायकं तु बाह्यमयुक्तं । भावनाविशेषेण सुखादिवेदनस्याविशेषदर्शनात् । बाह्याधीनत्वे च तदयोगात् । (२७४)

स्यादेतद् (।)

...2.275 अतत्स्वभावोऽनुभवो बौद्धांस्तान् सन्नवैति चेत् ।
मुक्त्वाध्यक्षस्मृताकारां संवित्तिं बुद्धिरत्र का ॥ २७५ ॥

भावनातस्तारतम्ययोगिनस्तान् बुद्ध्यात्मकसुखादीन् 'अतत्स्वभावो'ऽसुख्याद्याकारोऽ'नुभवः सन्नवैति' प्रत्येतीति 'चेत् ।[912] संवित्तिमध्यक्षा'कारां हर्षविषादाकारां 'स्मृताकाराम'तीतसुखादिकल्पनारूपां सौमनस्यलक्षणां मुक्त्वा अत्र संवेदनावसरे 'का' परा बुद्धिरनुभूयते । यस्याः सुखाद्यात्मकत्वमध्य[913] वसायात्मकत्वञ्चेष्यते । (२७५)

...2.276 तांस्तानर्थानुपादाय सुखदुःखादिवेदनम् ।
एकमाविर्भवद् दृष्टं न दृष्टं त्वन्यदन्तरा ॥ २७६ ॥

'ताँस्तानर्थानि'ष्टाननिष्टा'नुपादाया'श्रित्यैकं 'सुखदुःखादिवेदनमाविर्भवद् दृष्टं' अन्यद् बुद्धिरूप'मन्तरा' विषयसंवेदनयोरन्तराले 'न दृष्टं' । (२७६)

...2.277 संसर्गादविभागश्चेदयोगोलकवह्निवत् ।
भेदाभेदव्यवस्थैवमुच्छिन्ना सर्ववस्तुषु ॥ २७७ ॥

बुद्धिचेतनयोः 'संसर्गादयोगो[914] लकवह्न्यो'रिवाविभागो भेदानुपलब्धिरिति 'चेत्' । एवं भिन्नाकारानुभवेप्यभेदकल्पनायां[915] 'सर्व्ववस्तुषु भेदाभेदव्यवस्थोच्छिन्ना' स्यात् । (२७७)
[202/s]

तथा हि (।)

...2.278 अभिन्नवेदनस्यैक्यं यन्नैवं तद् विभेदवत् ।
सिध्येदसाधनत्वेस्य न सिद्धं भेदसाधनम् ॥ २७८ ॥

'अभिन्न'मेकाकारं 'वेदनं' यस्य तस्यैक्यं । 'यन्नैवं' भिन्नवेदनं 'तद्विभेद[916] वत् सिध्येत्(।)' अस्यैकाकारज्ञानस्याभेदप्र'त्यसाधनत्वे' तद्विपरीतभिन्नाकारवेदनं 'भेदसाधनमसिद्धं' ॥ (२७८)

---

912 १ स्वप्रक्रियामात्रदीपनमेतत् ।

913 २ बुद्धिः ।

914 ३ अयःपिण्डमग्निदीप्तं ।

915 ४ तथा एकाकारेप्ययोगोलकवत्संसर्गकल्पनायां ।

916 १ विभेदोस्यास्तीति कृत्वा ।

....2.279 भिन्नाभः सितदुःखादिरभिन्नो बुद्धिवेदने ।
अभिन्नाभे विभिन्ने चेत् भेदाभेदौ किमाश्रयौ ॥ २७९ ॥

सां[917] ख्य स्य तु सितदुःखादिर्भिन्नाकारोऽभिन्न इष्टः । 'बुद्धिवेदने त्वभिन्नाभे विभिन्ने इष्टे चेत् । भेदाभेदौ किमाश्रयौ' किं निमित्तौ ते व्यवस्थापनीयौ । (२७९)

ननु वे[918] दनाचेतनासंज्ञादीनां चैत्तानां महाभूमिकादीनां सकृदुत्पन्नानां भेदः परस्परं[919] प्रतीयते । अथ चास्ति । तद्वद्बुद्धिसुखयोरपि स्यादित्याह ।[920]

....2.280 तिरस्कृतानां पटुनाप्येकदाऽभेददर्शनात् ।
प्रवाहे वित्तिभेदानां सिद्धा भेदव्यवस्थितिः ॥ २८० ॥

'पटुना' सुखदुःखादीनां वेदनास्कन्धसंगृहीतेन चैत्तेन 'तिरस्कृतानाम'भिभूतानां संज्ञादी- 'नामे'कदाऽ'भेददर्शनात् । प्रवाहे' चित्त[921] सन्ताने सुखाद्यभावकाले स्व[922] रूपेणोपलक्षिता- नां 'भेदव्यवस्थितिः सिद्धा' । रवेरुदये तारका अनुपलक्षिता अपि निशायामुपलक्ष्यमाणा भेदेन व्यवस्थाप्यन्त एव ।[923] तस्माज्ज्ञानात्मानः स्ववेदनाश्च सुखादय इत्याख्यातं स्ववेदनं ॥ X X ॥ (२८०)

## (४) योगिज्ञानप्रत्यक्षम्

योगिज्ञानमाख्यातुमाह (।)

....2.281 प्रागुक्तं योगिनां ज्ञानं तेषां तद् भावनामयम् ।
विधूतकल्पनाजालं स्पष्टमेवावभासते ॥ २८१ ॥

[203/s]

'प्राक्' प्रथमपरिच्छेदे[924] 'योगिनां ज्ञानं' सत्त्यविषयमुक्तं । 'तेषां' योगिनां 'भावनामयं' भावनाहेतुनिष्पत्तिकं 'तत्' ज्ञानं सत्त्यस्वरूपविषयत्वेन 'विधूतकल्पनाजालम-' विकल्पत्वाच्च 'स्पष्टं' विशदज्ञेयाकार'मेवावभासते' । (२८१)

भावनाभवं कथं स्पष्टमित्याह (।)

....2.282 कामशोकभयोन्मादचौरस्वप्नाद्युपप्लुताः ।
अभूतानपि पश्यन्ति पुरतोवस्थितानिव ॥ २८२ ॥

'कामश्च' शोकश्च भयञ्च तैरुन्मादाश्चौरस्वप्नादयश्चेति 'कामशोकभयोन्मादचौरस्वप्ना- दिभिरुपप्लुता' भ्रान्तास्ते'ऽभूतानप्य'र्थान् भावना[925] वशात् 'पुरतोऽवस्थिता-[40a/MA] निव पश्य[926] न्ति' । यस्मात्तदनुरूपां प्रवृत्तिं चेष्टन्ते ॥ (२८२)

भवतु भावनाजं स्पष्टमविकल्पं तु कथमित्याह (।)

---

917 २ भेदाभेदनिबन्धनाभावमाह ।

918 ३ वैभा ष्या वेदनादिसंप्रयुक्तविप्रयुक्तवादिनः प्रत्याहुः ।

919 ४ एकैकस्योपलब्धेः ।

920 ५ नैष दोषः ।

921 ६ यदा कमनीये तृष्यति अन्यत्र द्वेष्टि रज्यते विरज्यते ।

922 ७ कदाचित्तिरस्कारेपि चित्ताभिसंस्कारकाले चेतना वेद्यत एव यतः ।

923 ८ नैवं प्रवाहेपि बुद्धिसंवेदनयोर्भेदवेदनमस्ति ।

924 १ योगिनामप्यागमविकल्पाव्यवकीर्णमर्थमात्रदर्शनं प्रत्यक्षमिति व्याचष्टे ।

925 २ यद् भाव्यते तत् स्फुटं स्यादित्यस्य दृष्टान्तोयं श्लोकः ।

926 ३ अनुमेयं ।

...2.283a न विकल्पानुबद्धस्यास्ति स्फुटार्थावभासिता ॥

'न विकल्पेनानुबद्धस्य' संस्तुतस्य ज्ञानस्य 'स्फुटार्थावभासितास्ति' ॥

ननु विप्लववशात् विकल्पकमपि स्वप्ने स्पष्टाभं ज्ञानं भवतीत्याह (।)

...2.283b स्वप्नेपि स्मर्यते स्मार्त्तं न च तत्तादृगर्थवत् ॥ २८३ ॥

'स्वप्नेपि स्मार्त्तं' स्मरणं किञ्चिदुत्पद्यते । 'न च' तत्प्रबोधावस्थायां 'तादृगर्थवद्या'दृश्ओ निर्व्विकल्पेनानुभूतोऽर्थस्तादृशार्थेन युक्तं स्मर्यते । किन्तर्हि अस्पष्टार्थमेव स्वप्नस्मरणं स्मर्यते । (२८३)

नन्वभूतार्थभावनाबलजं भवतापि स्पष्टाभमविकल्पश्च सिद्धान्ते नेष्यते इति तेन सह विरोध इत्या[927] ह (।)

....2.284 अशुभा पृथिवी-कृत्स्नाद्यभूतमपि वर्ण्यते ।
स्पष्टाभं निर्विकल्पश्च भावनाबलनिर्मितम् ॥ २८४ ॥

'अशुभा' विनीलकविपूयकास्थिसंकलादिका 'पृथ्वीकृत्स्नादि' भूमयत्वादि 'अभूत'मसत्यमपि 'भावनाबलेन निर्मितं स्पष्टाभं निर्व्विकल्पकश्चा'स्मा'भिर्व्वर्ण्यत' इति नास्ति सिद्धान्तविरोधः । (२८४)
[204/s]

....2.285 तस्माद् भूतमभूतं वा यद् यदेवाभिभाव्यते ।
भावनापरिनिष्पत्तौ तत् स्फुटाकल्पधीफलं ॥ २८५ ॥

यतो भावनाया भाव्यस्पष्टतायामाधिपत्यं । 'तस्माद् भूत'मार्यसत्यादि 'अभूतम'शुभादि 'यद्यदेवा'त्यन्तं 'भाव्यते' । तद् भाव्यमानं 'भावनायाः' सादरनिरन्तरदीर्घकालप्रवर्त्तितायाः 'परिनिष्पत्तौ स्फुटा कल्पधीः' सा फलं यस्य तत्तथा । (२८५)

....2.286 तत्र प्रमाणां सम्वादि यत्; प्राङ् निर्णीतवस्तुवत् ।
तद् भावनाजं प्रत्यक्षमिष्टं शेषा उपप्लवाः ॥ २८६ ॥

'तत्र' भावनाबलभाविषु स्पष्टानिर्व्विकल्पेषु 'यत्संवादि' उपदर्शितार्थप्रापकं तद् भावनाजं प्रत्यक्षं 'प्रमाणमिष्टं' ।

किमिवेत्याह (।)

'प्राक्' प्रथमपरिच्छेदे 'निर्ण्णीतं वस्तु' सत्यचतुष्टयं तस्मिन्निव । यथा आर्यस[928] त्यविषयं भावनाबलजं संवादित्वात्प्रत्यक्षं प्रमाणमेवमन्यदपीदृशं । 'शेषा[929] अयथार्था उपप्लवा' भ्रमा यथा अशुभा पृथ्वीकृत्स्नादिप्रत्ययाः । (२८६)

कल्पनापि स्वसंवित्ताविष्टा नार्थे विकल्पनादिति व्याख्यातुमाह[930] (।)

....2.287 शब्दार्थग्राहि यद् यत्र तज्ज्ञानं तत्र कल्पना ।
स्वरूपश्च न शब्दार्थस्तत्राध्यक्षमतोऽखिलम् ॥ २८७ ॥

'शब्दार्थग्राहि' अन्यव्यवच्छेदस्य ग्राहकं 'यज्ज्ञानं यत्र' विषये 'तज्ज्ञानं तत्र कल्पनोच्यते' । ज्ञानानां 'स्वरूपश्च' स्वलक्षणात्मकं 'न शब्द'स्या'र्थो' विषयो'ऽतो' वाच्यत्वा'त्तत्र स्वरूपेऽखिलं' ज्ञानमविकल्पत्वा'दध्यक्षं' । उक्तं चतुर्व्विधं प्रत्यक्षं ॥ X X ॥ (२८७)

[927] ४ द्विधा स्वप्नज्ञानं स्पष्टमेकमन्यदतीतस्वप्नाकारं ।

[928] १ अव्यतिभिन्नाथो नरव्यापितार्थ उक्तः ।

[929] २ मात्रशब्दव्यवच्छेद्याः ।

[930] ३ अत्रापि स्मृतिरस्तीति निर्व्विषयत्वं स्फुटयति ।

## 2.7 ७. प्रत्यक्षाभासचिन्ता

प्रत्यक्षाभासमिदानीं वक्तव्यं ।

....2.288 त्रिविधं कल्पनाज्ञानमाश्रयोपप्लवोद्भवम् ।
अविकल्पकमेकञ्च प्रत्यज्ञाभं चतुर्विधम् ॥ २८८ ॥

[205/s]

'त्रिविधं कल्पनाज्ञानं[931]' प्रत्यक्षाभं मरीचिकायां जलाध्यवसायि भ्रान्तिज्ञानं संवृतौ वि[932] संवादिव्यवसायसांवृतज्ञानं । पूर्वदृष्टैकत्वकल्पनाप्रवृत्तं लिङ्गानुमेयादिज्ञानं । 'अविकल्पकञ्च एकं प्रत्यक्षाभं' । कीदृशमा'श्रयस्ये'न्द्रियस्यो'पप्लवस्ति'मिरा द्युपघातस्तस्मा'द् भवो' यस्य तत्तथा । एवञ्च 'चतुर्विधञ्च' प्रत्यक्षाभासं ॥ (२८८)

नन्वविकल्पकं प्रत्यक्षं । ततस्त्रयमपीदं सविकल्पकत्वादेकः प्रत्यक्षाभासः । तत् किं भ्रान्तिज्ञानं मृगतृष्णिकायां जलावसायि । संवृतिसतो द्रव्यादेर्ज्ञानं । अनुमानं लिङ्गज्ञानं आनुमानिकं लिङ्गिज्ञानं स्मार्त्त स्मृतिः आभिलापिकं चेति विकल्पप्रभेद आचार्य दि ग्ना गे नोक्त इत्याह (।)

....2.289 अनक्षजत्वसिद्ध्यर्थमुक्ते द्वे भ्रान्तिदशनात् ॥
सिद्धानुमादिवचनं साधनायैव पूर्वयोः ॥ २८९ ॥

द्वे सांवृतारोपितयोः कल्पनाज्ञानेऽ'नक्षजत्व'स्यानिन्द्रियत्वस्य 'सिद्ध्यर्थं' भेदे'नोक्ते' । परेषां तयोरक्षजत्वभ्रान्तिदर्शनाद् । घटोयं द्वौ[933] कम्पत इत्यादि । जलमिदमिति च व्यवसायात्मक'मिन्द्रियप्रत्यक्षमेव' प्रतिपद्यत इति परो मन्यते । तन्निरा सार्थं द्वयोरुपादानं । अनिन्द्रियत्वेन स्मृतिबलभावित्वेन सिद्धं च तद'नुमादि' च तस्य 'वचनं पूर्वयोः' संवृतारोपितकल्पनयोरेवा'नक्षजत्वसाधनाय' । तथा हि यत्पूर्वानुभूतसमयस्मृतिभावि न तत्प्रत्यक्षं । यथाऽनुमानादि । अनुभूतसमयस्मृतिसापेक्षा चावयविजलादिकल्पना इति विरुद्धोपलब्धिरुक्ता । (२८९)

ननु सांवृतारोपितकल्पनायाः कथं प्रत्यक्षताशङ्केत्याह (।)

....2.290 संकेतसंश्रयान्यार्थसमारोपविकल्पने ।
न प्रत्यक्षानुवृत्तित्वात् कदाचिद् भ्रान्तिकारणम् ॥ २९० ॥

बहूनां रूपादीनामेकार्थकारित्वख्यापनार्थं घट इत्यादिशब्दनिवेशः स संश्रयो हेतुर्यस्याः सा 'संकेत[934]संश्रया'कल्पना दृश्यमानान्मरीचिनिचयादेरन्यस्य जलादेरा[206/s] रोपितस्य कल्पना । 'अन्यार्थ'कल्पना । ते एते कल्पने प्रत्यक्षानन्तरभावित्वेन 'प्रत्यक्षानुवृत्तित्वादा-'त्मन्यपि 'कदाचिद'विमर्शकानां प्रत्यक्षता---'भ्रान्तिकारणं' भवतः । (२९०)

....2.291 यथैवेयं परोक्षार्थकल्पना स्मरणात्मिका ।
समयापेक्षिणी नार्थं प्रत्यक्षमध्यवस्यति ॥ २९१ ॥

[931] १ भ्रान्तिसंवृतिसत् ज्ञानमनुमा (ना) नुमानिकं । स्मार्त्ताभिलापिकञ्चेति प्रत्यक्षाभं सतैमिरं ॥ व्याचष्टे ॥ संकेताश्रयकल्पना घटादि । अर्थान्तरारोपकल्पना मरीचिषु जलं । परोक्षार्थकल्पनाऽनुमानानुमानिकादिषु सम्बन्धकालदृष्टैकत्वेन वृत्ता ॥

[932] २ सत्त्वं द्रव्यं घटसंख्याक्षेपणसत्ता घटत्वादिषु ।

[933] ३ कल्पनमपि स्वसम्वित्तावध्यक्षं स्वसम्वेद्यत्वात् सुखादिवत् ।

[934] ४ संकेतः परमाणुषु । संख्यासमच्चयव्यवच्छेदेन ।

[40b/MA]

अतो 'यथैवेयम'नुमानानुमानिकादि'परोक्षार्थकल्पना' पूर्वं गृहीत'समयापेक्षिणी' सती-'स्मरणा'दिरूपा 'प्रत्यक्षं' प्रत्यक्षविषय'मर्थं ना' ('ध्य') 'वस्यति' । किन्तु कल्पितमेव गृह्णाति (। २९१)

....2.292 तथानुभूतस्मरणमन्तरेण घटादिषु ।
न प्रत्ययोनुयँस्तच्च प्रत्यक्षात् परिहीयते ॥ २९२ ॥

'तथा' संकेतकाले व्यवहारलघवार्थं कल्पितस्य द्रव्यादेरनु'मानभूत'स्य पश्चा-'त्स्मरणमन्तरेण घटादिषु' घटोऽयमित्याद्येकवस्त्ववसायी 'प्रत्ययो' न भवति । 'तच्च' संकेतितमारोपितं चार्थमनुयन् घटोऽयं जलमिति च प्रत्ययः 'प्रत्यक्षात्' प्रत्यक्ष'त्वात् परिही-यते' । तस्य वस्तुविषयत्वात् संकेतापेक्षस्य च विपर्ययात् । (२९२)

....2.293 अपवादश्चतुर्थोत्र तेनोक्तमुपघातजम् ।
केवलन्तत्र तिमिरमुपघातोपलक्षणम् ॥ २९३ ॥

सतैमिरमिति 'चतुर्थो' हेत्वाभासः कल्पनारहितत्वेनातिप्रसक्तायाः प्रत्यक्षताया 'अपवादः' । अभ्रान्तत्वस्य लक्षणैकदेशत्वोपलक्षणत्वं च न तु कल्पनापोढत्वनिराकृतस्योदाहरणमिदं । 'केवलं सतैमिरमि'त्यत्र तिमिरं सबाह्यो'पघातस्य' ज्ञानविकृतिहेतो'रुपलक्षणं' । तेनान्ये[935] न्द्रियविकारजमिन्द्रियजञ्च निर्विकल्पं प्रत्यक्षाभासं सि[936] ध्यति (॥ २९३)

....2.294 मानसं तदपीत्येके तेषां ग्रन्थो विरुध्यते ।
नीलद्विचन्द्रादिधियां हेतुरक्षाण्यपीत्ययम् ॥ २९४ ॥

'तद्' द्विचन्द्रादिज्ञान'मपि मानसं' मनोभ्रम 'इत्येके'[937] आ चा र्याः । 'तेषा'मेवं वा-दिनां 'नीलद्विचन्द्रादिधियामक्षाण्यपि हेतु'रित्येतदर्थवाचको 'ग्रन्थो विरुध्यते । ग्रन्थः' पुनरयं यावच्चक्षुरादीनामप्या'लम्बनत्वप्रसङ्गः' । तेपि हि परमार्थ[207/s] तोऽन्यथा विद्य[938] माना नीलाद्याभासस्य द्विचन्द्राद्याभासस्य च ज्ञानस्य कारणीभवन्तीति । (२९४)
स्यादेतत् (।)

....2.295 पारम्पर्येण हेतुश्चेदिन्द्रियज्ञानगोचरे ।
विचार्यमाणे प्रस्तावो मानसस्येह कीदृशः ॥ २९५ ॥

मानसस्य प्रत्य[939] क्षस्येन्द्रियं 'पारम्पर्येण हेतुः' । तेन विरोधाभाव'श्चेत्[940]' वा द वि धि प्र करणे 'इन्द्रियज्ञान'स्य प्रत्यक्षस्य 'गोचरेविचार्यमाणे मानसस्य' विकल्पस्य इहावसरे कीदृशः 'प्रस्तावः' । येन परम्परया तद्धेतुरिन्द्रियमुच्यते । (२९५)

....2.296 किम्वैन्द्रियं यदक्षाणां भावाभावानुरोधि चेत् ।
तत्तुल्यं विक्रियावच्चेत् सैवेयं किं निषिध्यते ॥ २९६ ॥

[935] १ श्रोत्रादि ।
[936] २ उक्तं ।
[937] ३ कणादादयः ।
[938] १ अजाजीपुष्पतुल्येनासरूपकत्वेन ।
[939] २ तदनन्तरजत्वात् ।
[940] ३ यदुक्तं दिग्नागेन बौद्धं प्रत्येतत् ।

तिमिरज्ञानं भ्रममनिच्छतोपि 'किं' कीदृश'मैन्द्रिय'ज्ञानमिष्यते । 'यदक्षाणां भावाभावयोरनुरोधि' स्वभावाभ्यामनुवर्तकं तदैन्द्रियमिति 'चेत्' । तत् इन्द्रिय'भावाभा'वानुरोधित्वं तैमिरिकज्ञानस्यापि 'तुल्यं' (।) न हीन्द्रियव्यापारमन्तरेण तैमिरिकज्ञानमुत्पद्यते । इन्द्रि[941]यविकारेण विक्रियावत् ज्ञानमैन्द्रियं चेत् द्विचन्द्रादिज्ञानानां तिमिरादीन्द्रियविकारेण 'विक्रिया' (।) 'सैवेय'मभूतार्थोपदर्शनात्मिका भ्रान्तत्वनिमित्तमुक्ताऽस्माभिः 'किं निषिध्यते' । (२९६)

....2.297 सर्प्यादिभ्रान्तिवच्चास्याः स्यादक्षविकृतावपि ।
निवृत्तिर्न निवर्त्तेत निवृत्तेप्यक्षविप्लवे ॥ २९७ ॥

यदि च द्विचन्द्रादिधीर्मानसी भ्रान्तिस्तदा सर्पोचितदेशे मन्दमन्दालोके रज्ज्वादौ संस्थानसाम्यग्रहात् उत्पन्नायाः सर्पादिभ्रान्तेरिव मरीचिषु जलभ्रान्तेरिव यथा प्रत्यक्षं विचारात् । अस्य(ा) द्विचन्द्रादिभ्रान्तेरक्ष'विकृतावपि' सा निवृत्तिः स्यात् । अक्षविप्लवो हि न तस्या हेतुः (।) ततश्च सत्यपि तस्मिन् विमर्शान्निवर्तते सर्पबुद्धिरिव । तथा ह्यक्ष'विप्लवेपि' तिमिरादौ 'निवृत्तेपि' तत्त्वमविचारयतो 'न निवर्तते' तद्द्विचन्द्रबुद्धिः । अक्षविप्लवस्य तत्कारणत्वाभावात् । अकारणनिवृत्तौ च निवृत्त्ययोगात् । (२९७)
किञ्च (।)

....2.298 कदाचिदन्यसन्ताने तथैवार्प्येत वाचकैः ।
दृष्टस्मृतिमपेक्षेत न भासेत परिस्फुटम् ॥ २९८ ॥

[208/s]

यथानुभवं समदेशकालस्यान्यस्य चित्तसन्ताने यथा अहिरहिरित्युपदर्शनेन सर्पभ्रान्तिरर्प्यते । 'तथा' द्विचन्द्रादिभ्रान्तिरपि तस्या वाचकैः शब्दैर'र्प्येत' सामग्रीतुल्यत्वात् । तिमिरस्य चाहेतुकत्वात् । अपि च(।) यथा मरीचिषु तरङ्गजलसमासु पूर्व्वदृष्टजलस्मरणसापेक्षा जलभ्रान्तिः । तत्र द्विचन्द्रादिभ्रान्तिरपि मानसीत्वात् 'दृष्ट'चन्द्रद्वय'स्मृतिमपेक्षेत' । न चेयं स्मरणसापेक्षा चक्षुर्व्विस्फारणमात्रेण स्फरणात् । [942] तथा मानसीत्वात् 'परिस्फुटं' सुव्यक्तग्राह्याकारा 'न भासेत' ।[943] जलादिभ्रान्तिरिव । (२९८)

....2.299 सुप्तस्य जाग्रतो वापि यैव धीः स्फुटभासिनी ।
सा निर्व्विकल्पोभयथाप्यन्यथैव विकल्पिका ॥ २९९ ॥

तस्मा'त्सुप्तस्य जाग्रतोपि वा यैव धीः स्फुटावभासिनी' व्यक्तग्राह्याकारा सा [41a/MA] 'निर्व्विकल्पा'ऽभ्युपगन्तव्या 'अन्यथैव' ह्यस्फुटावभासिनी धीरुभयथा सुप्तस्य जाग्रतो पि वा 'कल्पिका' युक्ता । (२९९)
यत एवं (।)

....2.300 तस्मात्तस्याविकल्पेपि प्रामाण्यं प्रतिषिध्यते ।
विसंवादात्तदर्थं च प्रत्यक्षाभं द्विधोदितम् ॥ ३०० ॥

'तस्मात्' कल्पनापोढमित्युक्ते तिमिरज्ञानस्या'विकल्पे' निर्व्विकल्पत्वेपि सति 'प्रामाण्यं' प्रत्यक्षात्मकं प्राप्तं सतैमिरमित्यपवादेन 'विसम्वादात् प्रतिषिध्यते' । संवादलक्षणत्वात्प्रामा-

941 ४ अथ पूर्व्वकं हित्वा ।

942 १ न विकल्पानुबद्धस्य स्पष्टार्थप्रतिभासिता ।

943 २ कल्पनापोढवचनादेव निवृत्तेः । अभ्रान्तत्वे यत्नवैर्थ्यं स्यात् ।

ण्यस्य । 'तदर्थमु'पप्लुतज्ञाननिवृत्त्यर्थ चाचार्य दिङ् ना गे न प्रत्य 'क्षाभं' संक्षेपतो 'द्विधोक्तं' सविकल्पमविकल्पञ्च । उक्तं प्रत्यक्षाभं ॥ XX ॥(३००)

## 2.8 ८. प्रमाणफलचिन्ता

प्रमाणफलव्यवस्थां कर्तुमाह ।

....2.301 क्रियासाधनमित्येव सर्व्वं सर्व्वस्य कर्म्मणः ।
साधनं न हि तत्तस्य साधनं या क्रिया यतः ॥ ३०१ ॥

'क्रियायाः साधनं' हेतुरि'त्येव न' हि 'सर्व्वं' कारणं 'सर्व्वस्य कर्म्मणः' क्रियायाः 'साधनं' करणं (।) किन्तर्हि तद्वस्तु 'तस्य' कर्मणः 'साधनं' करणं 'या क्रिया यतः' पदार्थाद[209/s] व्यवधानेन भवति स तस्याः कारणमुच्यते । ततश्चेन्द्रियादेः प्रमितिं प्रत्यव्यवहितसाधकत्वाभावात् न प्रमाणं । (३०१)

किन्तर्हि प्रमाणमस्तीत्याह (।)

....2.302 तत्रानुभवमात्रेण ज्ञानस्य सदृशात्मनः ।
भाव्यन्तेनात्मना येन प्रतिकर्म्म विभज्यते ॥ ३०२ ॥

'तत्र' रूपादौ कर्मणि 'ज्ञानस्यानुभवमात्रेणा'नुभवात्मनो 'सदृशात्म'नस्तुल्यरूपस्य 'तेनात्मना' स्वरूपेण प्रतिविषयं व्यतिरेकिणा 'भाव्यं येन प्रतिकर्म्म' प्रतिविषयज्ञानं 'विभज्यते' । नीलस्येदं पीतस्येदमिति । अन्यथानुभवमात्रतया सर्व्वत्र विषये सदृशं ज्ञानं प्रतिविषयं कथं भेदेन व्यवस्थापयितुं शक्येत । (३०२)

स्यादेतदिन्द्रियादेर्हेतोः सव्यापा[944] रतादिलक्षणो विशेषो ज्ञानानां भेदेन नियामकमित्याह (।)

....2.303 अनात्मभूतो भेदोस्य विद्यमानोपि हेतुषु ।
भिन्ने कर्मण्यभिन्नस्य न भेदेन नियामकः ॥ ३०३ ॥

'हेतु'ष्विन्द्रियादिषु 'भेदो' विशेषः सव्यापारतादिलक्षणो 'विद्यमानोप्यस्य' ज्ञान[945]स्यानुभवमात्रात्मतया भिन्नस्य 'भिन्ने कर्म्मणि' नीलादौ ग्राह्ये 'भेदेन नियामको' न युक्तः । कस्मादित्याह (।) 'अनात्मभूतः' । ज्ञानास्वरूपत्वादिन्द्रियस्य विशेषः प्रतिकर्म्म न भेत्तुमर्हति । (३०३)

....2.304 तस्माद् यतोस्यात्मभेदादस्याधिगतिरित्ययम् ।
क्रियायाः कर्मनियमः सिद्धा सा तत्प्रसाधना ॥ ३०४ ॥

'तस्मादस्य' ज्ञानस्या'त्मभेदात् यतोऽस्या'र्थस्येयम'धिगतिरिति' क्रियाया अधिगतेः 'कर्मणि' वेद्ये 'नियमः सा क्रिया तत्प्रसाधना' तत्करणाऽभ्युपगन्तव्या । (३०४)

स्यादेतद् (।) इन्द्रियादिरेव स्वभेदाद् भेदको ज्ञानस्य प्रतिविषयमधिगतेर्नियामकः । ततश्चानुभवात्मत्वादविषय एवासिद्ध इत्याह (।)

....2.305 अर्थेन घटयत्येनां न हि मुक्त्वार्थरूपताम् ।
अन्यः स्वभेदाज्ज्ञानस्य भेदकोपि कथञ्चन ॥ ३०५ ॥

---

944 १ आविलतादि ।

945 २ विषयसारूप्यानधिगमे निराकारवादिनः सर्व्वं ज्ञानं बोधरूपतामात्रेणावशिष्टं विषयाधिगते हेतुरिति स्थितिः ।

[210/s]

'एनाम'धिगतिम'र्थरूपता'मर्थसरू[946] पतां 'मुक्त्वा न' ह्यन्यः कश्चिन्द्रियादिः 'स्वभेदात् कथश्चन' केनापि प्रकारेण 'ज्ञानस्य भेद[947] कोप्यर्थेव' ज्ञेयेन 'घटयति' योजयति नीलस्येयमधिगतिः पीतस्य चेयमित्यादि । तथा हि यद्यपि प्रत्यर्थं प्रतीन्द्रियश्च ज्ञानानामस्ति भेदः तथापि विषयसारूप्याभावे स एव विशेषोऽशक्यनिर्देशः । अथ विशेषोप्यधिगतेरेव व्यवस्थाप्यत इति चेत् । ननु तस्या एव[948] व्यवस्थापकमिष्यते । न चाव्यस्थिते व्यवस्थापके व्यवस्थाप्यसिद्धिः । ननु न सर्वत्र परशुव्यापारदृष्टिपूर्व्विकाच्छिदासिद्धिः । छिदादर्शनादपि परशुव्यापारव्यवस्थितेः । एवमिहाप्यधिगतिपूर्व्विकायां प्रमाणस्थितौ न दोषः । असमानमेतत् । तथा हि परशुच्छिदयोः कार्यकारणभावविशेषः क्रियाकरणभावः । अधिगतिज्ञानात्मभूतविशेष[949] योस्तु व्यवस्थाप्यव्यवस्थाकभाव एषितव्यः । उभयोरपि ज्ञानस्वरूपात्मत्वात् । तत्र कारणमज्ञातमपि स्वकार्यं निर्वर्तयतीति कार्यदर्श--'नाद्य तद्व्यवस्था' युक्तेव । व्यवस्थापकस्तु नानुपलक्षितो व्यवस्थाप्य व्यवस्थायां क्षमते । न ह्यप्रतीतं कल्प्यमानं आश्वस्त्यं[950] व्यवस्थापयति । (३०५)

....2.306 तस्मात्प्रमेयाधिगतेः साधनं मेयरूपता ।
साधनेऽन्यत्र तत्कर्मसम्बन्धो न प्रसिध्यति ॥ ३०६ ॥

'तस्मात्प्रमेयाधिगतेः' फलभूतायाः व्यवस्थाप्यायाः 'साधनं' प्रमाणं 'मेयरूपता' । [41b/MA] अथ न सारूप्यं तस्य प्रतिविषयं भिन्नस्य सूपलक्षणत्वात् सारूप्यात्पुनर 'न्यत्र साधने तस्याः' क्रियायाः 'कर्म्मसम्बन्धो' नीलस्येयमधिगतिः पीतस्य चेत्यादि 'न सिध्यति' । इन्द्रियाधिगतिविशेषस्य सम्भवेप्यनुभवमात्रात्मकज्ञानस्याविशेषकत्वायोगात् । ज्ञानगतस्यापरविशेषस्य लक्षणभेदेनानुपलक्षणात् । (३०६)

...2.307a सा च तस्यात्मभूतैव तेन नार्थान्तरं फलम् ।

'सा चा'धिगतिरनुभवस्वभावा ज्ञानस्या'त्मभूतैव । तेन' प्रमाणान्ना'र्थान्तरं फलं' । प्रमेयमेव फलमित्यर्थः ।

ग्राह्यग्राहकभावोपि भाक्त एवेति दर्शयितुमाह (।)

...2.307b दधानं तच्च तामात्मन्यर्थाधिगमनात्मना ॥ ३०७ ॥

[211/s]

'तच्च' ज्ञानमा'त्मनि' तामर्थ'सरूपतां दधानं' बिभ्रद् अर्थस्या'धिग[951] मनात्मना-'ऽधिगमलक्षणेन (३०७)

....2.308 सव्यापारमिवाभाति व्यापारेण स्वकर्मणि ।
तद्वशात्तद्व्यवस्थानादकारकमपि स्वयम् ॥ ३०८ ॥

व्यापारेण सव्यापार'मिव' स्वकर्म्मणि ग्राह्ये 'आभाति[952]' । व्यापारमपि वस्तुतोऽकारकमपि स्वयं तद्वशान्मेयसारूप्यवशात्तस्याधिगमस्य 'व्यवस्थानात्' । (३०८)

---

[946] १ अत्रैव तादात्म्यात् ।
[947] २ इन्द्रियमाविलं ज्ञानश्च तथा ।
[948] ३ अधिगतेरेव व्यवस्थापकं सारूप्यस्य ।
[949] ४ सारूप्यं ।
[950] ५ आश्वतस्तस्य भावः ।
[951] १ यदाकारमुत्पद्यते तत्र प्रमाणमुपचर्यते ।
[952] २ विना हि क्रियां न करणं । अथैतत् क्रियाव्याप्यं कर्म वेति विषयाधिगतिः कर्मव्यापारः प्रतिपत्तृधर्मत्वा-

....2.309 यथा फलस्य हेतूनां सदृशात्मतयोद्भवाद् ।
हेतुरूपग्रहो लोकेऽक्रियावत्वेपि कथ्यते ॥ ३०९ ॥

'यथा लोकेपि हेतूनां सदृशात्मतया' सदृशरूपतयो'द्भवात् । फलस्याक्रियावत्त्वेपि' हेतुरूपग्रहणव्यापाराभावेपि 'हेतुरूपग्रहः कथ्यते' पितू रूपं गृहीतं सुतेनेत्यादि । अतोऽर्थरूपतां मुक्त्वाऽधिगतिसाधनमन्यदयुक्तं । (३०९)

....2.310 आलोचनाक्षसम्बन्धविशेषणधियामतः ।
नेष्टम्प्रामाण्यमेतेषां व्यवधानात् क्रियाम्प्रति ॥ ३१० ॥

अत आ'लोचन'स्यार्थालोचनमा[953] त्रस्य जात्यादिविशिष्टनिश्चयफलं प्रति । 'अक्षसम्बन्धस्य' इन्द्रियार्थसन्निकर्षस्यालोचनफलं प्रति 'विशेषण'(स्य) वेद्यविशेष्यबुद्धिफलं प्रति 'प्रामाण्यं' साधनत्वं 'नेष्टं । एतेषा'मालोचनार्थसम्बन्धविशेषणज्ञानानां 'क्रिया'यामधिगतिविषयसारूप्येण 'व्यवधानात्' । (३१०)

व्यवस्थानेपि साधकतमत्वं स्यादिति चेत् । आह ।

....2.311 सर्वेषामुपयोगेपि कारकाणां क्रियाम्प्रति ।
यदन्त्यं भेदकं तस्यास्तत् साधकतमं मतम् ॥ ३११ ॥

[212/s]

'सर्व्वेषां कारकाणां' साक्षात्पारम्पर्येण 'क्रियां प्रत्युपयोगेपि' तेषु मध्ये 'यत्कारकमन्त्यं' कारकान्तरेणाव्यवहितव्याप्यारं सत् क्रिया'भेदकं तत्तस्याः साधकतमं मतं' नान्यत् । (३११)

तथा हि (।)

....2.312 सर्व-सामान्यहेतुत्वादक्षाणामस्ति नेदृशम् ।
तद्भेदेपि ह्यतद्रूपस्यास्येदमिति तत्कुतः ॥ ३१२ ॥

'अक्षाणां' तावदी'दृशं' साधकतमत्वं 'नास्ति सर्व्वं---सामान्यहेतुत्वात्' । [954] सर्व्वज्ञानसाधारणहेतुत्वात् । अवान्तराधिगतिभेदकत्वानुपपत्तेः । तेषामिन्द्रियाणां प्रमादाविलत्वादि'भेदेपि' ज्ञानस्यातद्रूपस्य विषयसारूप्यरहितस्य इदमस्य ग्राहकमिति ग्राहकत्वं यदिष्यते 'तत्कुतः' । (३१२)

....2.313 एतेन शेषं व्याख्यातं विशेषणधियां पुनः ।
अताद्रुप्ये न भेदोपि तद्वदन्यधियोपि वा ॥ ३१३ ॥

'एते'नाक्षाणामसाधनत्वदर्शनेन 'शेष'मालोचनार्थसम्बन्धादि 'व्याख्यातं' । तदप्यर्थसारूप्यरहितमसाधनं ।[955] सारूप्ये च स्वीकर्तव्ये तदेवाव्यवहितत्वात् साधनमस्तु । 'विशेषणधियां पुनर'यमधिको दोषः । 'अताद्रूप्ये' विशेषणसारूप्याभावे विशेष्यधियः सकाशा'द्भेदोपि' न स्यात् । द्वयोरप्याकाररहितत्वेन भेदस्थित्यनुपपत्तेः । ततश्चैका प्रमाणमन्या च फलमिति कुतः । अथ सारूप्यं विशेषणधियो भेदकमिष्यते । एवं च सति तदेव प्रमाणं फलं च स्या-

दस्या एतया हि विषयो व्याप्यते । व्यवसायवशाच्च कर्तृगतापि विषयगता व्यवस्थाप्यते यथाध्यवसायं सर्वव्यवहारवृत्तेः (।) तत्र च साधकतमस्वव्यापारेण तदानुकूल्योत्पत्त्या अर्थसारूप्यं करणमिति कर्त्ता कर्म करणं क्रिया चेति चतुष्टयमुक्तं ज्ञेयं ।

[953] ३ प्रथमं जगति किमप्येतदित्यालोचनं । नागृहीतविशेषण विशेष्ये धीः (।) विशेषणं जातिगुणक्रियादयः ।

[954] १ नीलादेः ।

त् । अर्थसरूपत्वादधिगतिरूपत्वाच्च । 'तद्वद्' विशेषणबुद्धेरिव 'अन्य[956]' बुद्धेर्विषयसारूप्यं फलात्मकञ्चेष्यतां । (३१३)

किञ्च (।)

....2.314 नेष्टो विषयभेदोपि क्रियासाधनयोर्द्वयोः ।
एकार्थत्वे द्वयं व्यर्थं न च स्यात् क्रमभाविता ॥ ३१४ ॥

'क्रियासाधनयोर्विषयभेदोपि नेष्टः' सर्व्वस्य । न ह्यन्य[957] त्र परशुव्यापारश्छिदा चान्यत्र । इह तु विशेषणे प्रमाणव्यापारः क्रिया च विशेष्य इति भिन्नविषयता कथमिष्टा ।
[213/s]

अथैतद्दोषतया 'द्वयोः' क्रियासाधनयोः क्रमभाविनो'रेकार्थत्वे' एकविषयत्वे च स्वीक्रियमाणे 'द्वयं' भिन्नं प्रमाणं फलं च 'व्यर्थं' विशेषणज्ञानं प्रमाणं फलं चास्तु विषयस्वरूपत्वादधिगमस्वभावाच्च । ततः परं तु विशेष्यज्ञानमधिगताधिगन्तृत्वादनुपयुक्तं । 'न चै'कविषययोर्ज्ञानयोः 'क्रमभाविता'स्ति विषयस्य तज्जननशक्तस्य क्रमेण स्वकार्यजननविरोधात् । (३१४)

सकृदुत्पत्तावेव विशेषणविशेष्यधियोः प्रमाणफलता भविष्यतीति चेत् ।[42a/MA] आह (।)

...2.315a साध्यसाधनताभावः सकृद्भावे;

'सकृद् भावे साध्यसाधनतायाः अभावः' । कार्यकारणभावविशेषत्वेन तस्या इ[958] ष्टत्वात् ।

नन्वेवमाकाराधिगमयोरेकज्ञानात्मत्वेपि प्रमाणफलताऽनुपपन्नेत्याह (।)

...2.315b धियोंशयोः ।
तद्व्यवस्थाश्रयत्वेन साध्यसाधनसंस्थितिः ॥ ३१५ ॥

'धियोऽशंयो'राकाराधिगमलक्षणयोः 'साध्यसाधनसंस्थितिः' क्रियाकरणव्यवस्था । 'तद्व्यवस्थाश्रयत्वे'नाकारवशेनाधिगतिविशेषव्यवस्थानात् । नास्त्यत्र कार्यकारणात्मकः क्रियाकरणभावः किं तु व्यवस्थाप्यव्यवस्थापकभावः । स च तादात्म्येप्यविरुद्धः । (३१५)

अर्थसन्निकर्षोपि न प्रमाणमित्याह (।)

....2.316 सर्वात्मनापि सम्बद्धं कैश्चिदेवावगम्यते ।
धर्मैः स नियमो न स्यात् सम्बन्धस्याविशेषतः ॥ ३१६ ॥

बाह्यं 'सर्व्वात्मना' सर्व्वैराकारैरिन्द्रियादिभिः 'सम्बद्धमपि कैश्चिदेय धर्म्मै'र्नीलत्वादिभि'र्गम्यते' न त्पणुपुञ्जत्वादिभिः[959] । 'स एष' ग्रहणस्य 'निय[960] मो न स्यात् । सम्ब'[961] 'न्ध'स्यापि गतिस्थितिहेतोर'विशेषतः' । (३१६)
[214/s]

---

[955] २ अस्येदमित्यालोचनमित्यसिद्धेः ।

[956] ३ विशेष्यबुद्धेः ।

[957] ४ द्वे ज्ञाने विशेषणविशेष्यभिन्नविषये इति विशेषणे तदधिगमरूपतया व्यापृतं विशेष्ये ।

[958] १ प्रमाणादन्यफलवादिना ।

[959] २ विज्ञानमेव हि विषयप्रतिभासमुत्पद्यमानं ग्राह्यग्राहकभेदवदुपलक्ष्यते तेन बाह्योर्थोस्तीति नार्थाधिगतिरूपा काचित् क्रियास्ति, या प्रमाणफलत्वेन व्यवस्थाप्यत इति वृत्तिः । प्राप्यकारीन्द्रियपक्षे सर्व्वात्मना विषयस्पर्शात् सर्व्वथावसायः स्यात् सारूप्ये तु यावन्मात्रेण प्रतिबिम्बस्तावतो ग्रहान्न दोषः ।

[960] ३ सन्निकर्षप्रमाणत्वे ।

[961] ४ सन्निकर्षस्य ।

....2.317 तदभेदेपि भेदोयं यस्मात्तस्य प्रमाणता ।
संस्काराच्चेदताद्रूप्ये न तस्याप्यव्यवस्थितेः ॥ ३१७ ॥

'यस्मा'दिन्द्रियसन्निकर्षादेः प्रामाण्यमयुक्तं 'तत्त'स्माद'भेदेपि' सन्निकर्षाद्यविशेषेपि यस्मान्नियामकात् तज्ज्ञानस्या'यं भेदो' नीलस्येदं ज्ञानं पीतस्य चेदमित्यादि 'तस्य प्रमाण'ता युक्ता । स च आकार एवेति स एव प्रमाणं ज्ञानजातज्ञानहेतोः 'संस्कारा'ज्ज्ञानस्य कैश्चिदेव धर्मैर्ग्रहणनियम इति चेत् 'न' (।) 'तस्य' संस्कारस्याप्य'ताद्रूप्ये' विषयासरूपत्वे'ऽव्यवस्थितेः' । (३१७)

यदाकारं ज्ञानं स्यात्तस्यानुभवः संस्कारश्च भवेत् । तस्माच्च ग्रहणप्रतिनियमः । अनुभवस्थित्यभावे तु सर्व्वमव्यवस्थितं ।

...2.318a क्रियाकरणयोरैक्यविरोध इति चेदसत् ।
धर्मभेदाभ्युपगमाद्;

'क्रियाकरणयो'रधिगमाकारयोरैकात्म्ये विरोध 'इति चेत् । असदे'तत् । 'धर्मभेद'स्य व्यावृत्त्युपकल्पितस्या'भ्युपगमात्' । अनाकारव्यावृत्तिः प्रमाणं । अनधिगतिव्यावृत्तिश्च फलमिति नानयोरैक्यं ।

कथन्तर्ह्युक्तं (।)

सा च तस्यात्मभूतैव तेन नार्थान्तरं फलमि

?? त्याह (।)

...2.318b वस्त्वभिन्नमितीष्यते ॥ ३१८ ॥

परमार्थतो ज्ञानात्मकं 'वस्त्वभिन्नमितीष्यते' । (३१८) न तु कल्पितधर्मद्वारेणपि । किं पुनस्तत्त्वत एव साधनाद् भिन्नाऽधिगतिश्छि दादिवन्नेष्यत इत्याह (।)

....2.319 एवं प्रकारा सर्व्वैव क्रियाकारकसंस्थितिः ।
भावस्य भिन्नाभिमतेष्वप्यारोपेण वृत्तितः ॥ ३१९ ॥

'सर्वैव क्रियाकारक'योः 'संस्थिति'र्व्यवस्था 'एवं-प्रकारा' कल्पितैव 'भिन्नाभिमतेष्वपि' दारुपरश्वादिषु क्रियाकरणभावस्या'रोपेण वृत्तितः' । न हि तत्रापि कार्यकारणवस्तुद्वयव्यतिरिक्ता क्रियास्ति । द्विधाभूतं काष्ठमेवातद्व्यावृत्त्या भेदान्तरप्रतिक्षेपेण छिदेत्युच्यते । तत्कारणेषु च पुरुषकरपरश्वादिषु सामग्र्यन्तरवर्त्तिनः कराच्छिदायाः अनुत्पत्तेः परशोरसाधारणं सहकारित्वमुपदर्शयितुमतद्व्यावृत्त्या करणव्यपदेशः । न तु क्रियाकरणत्वमन्यदेव कार्यकरणाभ्यां । अधिगमाकारयोस्तु व्यवस्थाप्यव्यवस्थापकभावः क्रियाकरणभावः (।) यथा यः कम्पते सोऽश्व इति (।) उक्ता प्रमाणफलव्यवस्था ॥ X X ॥ (३१९)

## 2.9 ९. विज्ञप्तिमात्रताचिन्ता

### (१) अर्थसंवेदनचिन्ता

#### क. अर्थसंविद्

[215/s]इदानीं यो गा चा रो वेद्यवेदकभावमपश्यन् सौ त्रा न्ति कं पृ[962] च्छति ।

...2.320a कार्थसंविद्;

'काऽर्थस्य संवित्' ज्ञानमुच्यते ।
अत आह (।)

...2.320b यदेवेदं प्रत्यक्षं प्रतिवेदनम् ।

'यदेवेदं प्रत्यक्ष'मनुभवसिद्धं 'प्रतिवेदनं' नीलाद्याकारेण प्रतिनियतं वेदनं प्रतिसन्ताननियतं वा सैवार्थसंविदुच्यते ।

...2.320c तदर्थवेदनं केन तादूप्याद् व्यभिचारि तत् ॥ ३२० ॥

ननु 'तत्' प्रतिनियतं 'वेदन'मनुभूयमानमर्थस्य वेदनं 'केन' हेतुनोच्यते स्वप्रकाशात्मकत्वात् स्ववेदनमेव तद्युक्तं नार्थवेदनं । तस्य सर्व्वदा परोक्षत्वात् । 'तादूप्या'दर्थसरूपत्वात् ज्ञानमर्थवेदनमिति चेत् । तदर्थसारूप्यं'व्यभि[963] चारि', द्विचन्द्रकेशोण्डूकज्ञानाद्याकारस्यार्थमन्तरेणापि भावात् । (३२०)

...2.321a अथ सोनुभवः क्वास्य

अथानुभाव्याभावे 'सोऽनुभवः' प्रत्यात्मवेद्यो'ऽस्य' ज्ञानस्य न कर्म्मणि व्यवस्थापनीयः । न हि कर्मरहिता क्रिया 'क्व'चिदस्ति ।
अत्राह (।)

...2.321b तदेवेदं विचार्यते ।

यदुच्यते व्यवहर्तृ भिरिदमनेनानुभूयते इति 'तदेवेद'मस्माभि'र्व्विचार्यते' । ज्ञानं स्वप्रकाशमुपलभ्यते प्रकाशश्चोच्यत इत्ययुक्तं ।
[42b/MA][216/s]

यच्चार्थसारूप्यमनुभवनिबन्धनमुक्तं तदप्यसम्भवीति दर्शयन्नाह (।)

...2.321c सरूपयन्ति तत् केन स्थूलाभासश्च तेऽणवः ॥ ३२१ ॥

'ते' परस्परं भिन्ना 'अणवः' तज्ज्ञानं 'स्थूलाभासं' स्थूलाकारं केन रूपेण स'रूपयन्ति[964]' । यदणुस्वरूपमस्थूलमस्ति न तत् ज्ञानारूढं । यच्च ज्ञानारूढं स्थौल्यं नाणुषु तदस्ति । (३२१)

....2.322 तन्नार्थरूपता तस्य सत्यांर्थाव्यभिचारिणी ।
तत्सम्वेदनभावस्य न समर्था प्रसाधने ॥ ३२२ ॥

तस्मात्तुल्यज्ञानस्य 'नार्थरूपता'ऽस्ति । सत्यां वार्थरूपतायां व्यभिचारिणी सा द्विचन्द्रज्ञानादिषु । ततश्च 'तत्संवेदनभावस्या'र्थसंवेदनत्वस्य 'प्रसाधने'षु साऽर्थरूपता न 'समर्था । न' केवलादर्थसारूप्यादर्थसंवेदनत्वं येन व्यभिचारः स्यात्(।) किन्तर्हि सारूप्यतदुत्पत्तिभ्यां(।) ते च द्विचन्द्रज्ञानादीनां न स्तः । चन्द्रद्वयस्याभावात् तदुत्पत्तेरयोगात् । (३२२)
एतदेवाह (।)

---

962 १ अन्तर्ब्बहिस्तीर्थ्या दूषिता(ः।) प्रमाद्वयं प्रमेयद्वैविध्यादुक्तं प्रत्यक्षलक्षणञ्च । सौत्रान्तिकप्रमाणं सारूप्यं बाह्योर्थः प्रमेयोधिगतिः फलं व्यवस्थाप्याधुना विज्ञप्तौ प्रमाणफलव्यवस्थां निर्दिदिक्षुः स्वसम्वित्तिः फलश्चात्र तद्रूपो ह्यर्थनिश्चय इति सम्वित्तिं व्याख्यातुमाह सौत्रान्तिकं ।

963 २ अतिव्याप्त्या ।

964 १ अवयवी सौन्त्रान्तिकेनैव निरस्तः ।

....2.323 तत्सारूप्यतदुत्पत्ती यदि सम्वेद्यलक्षणम् ।
सम्वेद्यं स्यात् समानार्थं विज्ञानं समनन्तरम् ॥ ३२३ ॥

'तेन' ग्राह्येण 'सारूप्यं तस्मादुत्पत्तिः' स्व'सम्वेद्य'स्य 'लक्षणं' यदि संमतं तदापि 'समन[965] न्तरं ज्ञान'मुत्तरज्ञानेन 'समानार्थं' समानग्राह्यं 'संवेद्यं स्यात्' । तत्सरूपतदुत्पत्त्योः संभवात् । (३२३)

## ख. दृश्यदर्शने प्रत्यासत्तिविचारः

स्यादेतत् (।)

...2.324a इदं दृष्टं श्रुतम्वेदमिति यत्रावसायधीः ।
स तस्यानुभवः;

सारूप्यतदुत्पत्तिमत्त्वेपीदं 'दृष्टं श्रुतम्वे[966] दमिति यत्रावसायधी'रुत्पद्यते 'तस्य सोऽनुभवो' नान्यस्य । न च समनन्तरप्रत्यये दृष्टश्रुताद्यवसायो भवति तन्न ग्राह्योऽसौ ।

अत्राह (।)

...2.324b सैव प्रत्यासत्तिर्व्विचार्यते ॥ ३२४ ॥

[217/s]

दृश्यदर्शनयोः 'सैव' प्रत्यासत्ति'र्व्विचार्यते'ऽस्मा[967] भिः । (३२४)

....2.325 दृश्यदर्शनयोर्येन तस्य तद् दर्शनम्मतम् ।
तयोः सम्बन्धमाश्रित्य द्रष्टुरेष विनिश्चयः ॥ ३२५ ॥

'येन' प्रत्यासत्तिसम्भवेन 'तस्य' बाह्यस्य तज्ज्ञानं 'दर्शनं मतं । तयोर्दृ श्यदर्शनयोः सम्बन्धं' प्रत्यासत्तिमा'श्रित्य द्रष्टुः' पुरुष'स्येदं दृष्टं श्रुतं वेदमित्यर्थनिश्चयः' । तत्सारूप्यतदुत्पत्तिलक्षणा च प्रत्यासत्तिः समनन्तरप्रत्ययेपि समानेति तन्निबन्धनो दृष्टश्रुताध्यवसाय(ो) पि तत्र स्यादित्यर्थः । (३२५)

....2.326 आत्मा स तस्यानुभवः स च नान्यस्य कस्यचित् ।
प्रत्यक्षप्रतिवेद्यत्वमपि तस्य तदात्मता ॥ ३२६ ॥

तस्माद्वेद्यरहितस्तस्य ज्ञानस्य स नीलादिरूप आत्मा'नुभवः (।) स चानुभवो नान्यस्य कस्यचिद्' बाह्यस्य । 'तस्य' ज्ञानस्य 'प्रत्यक्षप्रतिवेद्यत्वमपि' यदुच्यते । सा तदात्मताऽपरोक्षानुभवात्मता । (३२६)

....2.327 नान्योनुभाव्यस्तेनास्ति तस्य नानुभवोपरः ।
तस्यापि तुल्यचोद्यत्वात् स्वयं सैव प्रकाशते ॥ ३२७ ॥

यथा च स्वरू[968] पाद'न्यो' बुद्ध्या 'अनुभाव्यो नास्ति' । तथा 'तस्य' ज्ञानस्य चापरोऽ'नुभवो नास्ति' । तस्य [969] ज्ञानग्रहण[970] स्यापि 'तुल्यार्थचोद्यत्वात्' । स ह्यन्यत्व-

[965] २ पूर्व्वानुभूतस्मरणं ।

[966] ३ स्मार्त्तेनेदं प्रयोगः ।

[967] १ ज्ञानज्ञेययोः पृथगिष्टे न तादात्म्यं तद्रूपेर्थेऽसत्यपि तद्रूपज्ञानात् न तदुत्पत्तिः विषयव्यवस्थाश्रय इदं परामर्शः परामर्शाच्च तद्विषयव्यवस्था ।

निबन्धनो ग्राह्यग्राहकभावः । तच्चानुपपन्नमित्युक्तं । तत्तस्मात्तत् ज्ञानमपरोक्षतयोत्पन्नं 'स्वयं प्रकाशते' । नान्येन प्रकाश्यते । (३२७)

### ग. नीलाद्यनुभवप्रसिद्धिः

कथं तर्हि नीलाद्यनुभवप्रसिद्धिरित्याह (।)

....2.328 नीलादिरूपस्तस्यासौ स्वभावोनुभवश्च सः ॥
नीलाद्यनुभवात् ख्यातः स्वरूपानुभवोपि सन् ॥ ३२८ ॥

[218/s]

तस्य ज्ञानस्य नीला[971] दिरूपोऽसौ स्वभावोऽनुभवः प्रकाशात्मकश्च सः । तेन स्वरूपानुभवोपि सन्नीलाद्यनुभवोत् तथा संप्रसिद्धिः । (३२८)

....2.329 प्रकाशमानस्तादात्म्यात् स्वरूपस्य प्रकाशकः ।
यथा प्रकाशोभिमतस्तथा धीरात्मवेदिनी ॥ ३२९ ॥

'यथा प्रकाशस्तादात्म्यात्' प्रकाशात्मकत्वात् परनिरपेक्षः 'प्रकाशमानः स्वरूपस्य प्रकाशकोऽभिमतः । तथा धीः' परनिरपेक्षा प्रकाशात्मनोत्पन्ना प्रकाशमानाऽ'त्मवेदिनीति' उपचारादुच्यते । (३२९)

....2.330 तस्याश्चार्थान्तरे वेद्ये दुर्घटौ वेद्यवेदकौ ।
अवेद्यवेदकाकारा; यथा भ्रान्तैर्निरीक्ष्यते ॥ ३३० ॥

...2.331a विभक्तलक्षणग्राह्यग्राहकाकारविप्लवा ।

चकारो हेतौ । यस्मा'त्तस्या' धियोऽ'र्थान्तरे वेद्ये वेद्यवे (द) काकारौ दुर्घटौ' (।) तस्माद् वस्तुतोऽ'वेद्यवेदकाकारा' सा बुद्धिर्नीलप्रकाशात्मनोत्पन्ना तथा प्रकाशते । न तु तत्र कश्चिद् ग्राह्यस्य ग्राहकस्य चाकारः समस्ति । कथं तर्हि ग्राह्यग्राहकप्रतिभासव्यवसायावित्याह (।) 'भ्रान्तै'रप्रहीणद्वयवासनाविप्लवै'र्यथा विभक्तलक्षणौ ग्राह्यग्राहकाकारावेव विप्लवौ' यस्याः सा तादृशी 'निरीक्ष्यते विभाव्यते भ्रान्तदर्शनानुरोधेन' (। ३३०)

### घ. ग्राह्यग्राहकप्रतिभासव्यवसायः

...2.331b तथा कृतव्यवस्थेयं केशादिज्ञानभेदवत् ॥ ३३१ ॥

'तथा' ग्राह्यग्राहकभेदेन 'कृतव्यवस्था' स नीलादिबहिर्देशं ग्राह्यमान्तरश्च संवेदनं ग्राहकमिति विप्लव एष 'केशादिज्ञानभेदवत्' । न हि केशोण्डूकज्ञानविशेषस्य ग्राहकवद् ग्राह्यः केशावयवोस्ति (।) किं तर्हि केशाभासः प्रकाश एव [43a/MA] केवलः । (३३१)

....2.332 यदा तदा न संचोद्यग्राह्यग्राहकलक्षणी ।
तदान्यसम्विदोभावात् स्वसम्वित् फलमिष्यते ॥ ३३२ ॥

---

968 २ ग्राह्यग्राहकत्वायोगात् ।

969 ३ ग्राह्यत्वस्य ।

970 ४ यत् स्वसम्विद्रूपं तन्निरालम्बनं यथा स्वप्नज्ञानं स्वविद्रूपश्च जागरेपीति तन्मात्रानुबन्धित्वा (त्) स्वभावहेतुरुक्त (ः।) एतेन अप्रत्यक्षोपलम्भस्य नार्थदृष्टिः प्रसिध्यतीति नासिद्धत्वं ।

971 १ कल्पितः कर्मकर्त्रादीति वाच्यं ।

विप्लववशाच्च ग्राह्यग्राहकभेदेन बुद्धि'र्यदा' व्यवस्थाप्यते 'तदा न सं[972] चोद्य-' [219/s] 'ग्राह्यग्राहकलक्षणा सा' । न हि वस्तुतो ग्राह्यग्राहकभावः सम्भवति । न च विप्लववशा-द्वस्तुव्यवस्था केशद्विचन्द्रादेरपि तत्त्वप्रसङ्गात्(।) यदा च न ग्राह्यग्राहकता विज्ञप्तिमात्रतायां 'तदान्य'स्य ग्राह्यस्य 'संविदो' ज्ञानस्या'भावात् स्वसंवित् फलमिष्यते' । (३३२)

ङ. बाह्यार्थनिरासः

....2.333 यदि बाह्योनुभूयेत को दोषो नैव कश्चन ।
इदमेव किमुक्तं स्यात् स बाह्योर्थोनुभूयते ॥ ३३३ ॥

ननु 'यदि बाह्योऽर्थो' ज्ञानेना'नुभूयते' तदा 'को दोषः' । येन स्वसंवित् फलमिष्यते । आह (।) यद्यनुभूयते तदा 'नैव कश्चन' दोषः । अनुभव एव तु बाह्यस्य नास्तीत्युच्यते । तथा 'इदमेव किमुक्तं स्या[973] त् 'बाह्योऽर्थो' ज्ञानेना'नुभूयत'' इति[974] (३३३ ।)

....2.334 यदि बुद्धिस्तदाकारा सास्त्याकारविशेषिणी ।
सा बाह्यादन्यतो वेति विचारमिदमर्हति ॥ ३३४ ॥

'यदि बुद्धिस्तदाकारा' वा बाह्यसरूपेत्युच्यते । सत्यमस्ति 'सा बुद्धिराकारविशेषिणी' नीलानीलाद्याकारविशेषयुक्ता । किंतु सा बुद्धि'र्बाह्याद'र्थाज्जायेता'न्यतो' वासनाप्रतिनियमा'द्वा इति विचारमिदमर्हति' । न तावद् बुद्धिव्यतिरेकिणाऽर्थः कश्चिद्धेतुतयोपलभ्यते । बुद्धिस्वरू-पमात्रवेदनात् । कादाचित्कतया तु कारणं तस्याः किञ्चिद् व्यवस्थापनीयं तच्च बाह्यं वासना वा स्यात् उभयथाप्युपपत्तेः । (३३४)

...2.335a दर्शनोपाधिरहितस्याग्रहात्तद्ग्रहे ग्रहाद् ।
दर्शनं नीलनिर्भासं;

तत्र 'दर्शनेन' ज्ञानेनो'पाधि'ना विशेषणेन 'रहितस्य' नीलादेर'ग्रहात्'[975] तस्य ग्रहे च नीलस्य 'ग्र[976] हात्' सहैव नीलधियोर्वेदनात् 'द[977]र्शनं नीलादिनिर्भासं' नीलाकारं [220/s] 'व्यवस्थितं' । यत्तावत् नीलादिकं बाह्यमित्युच्यते । तज्ज्ञानेन सहोपलम्भनियमात् तदभिन्नस्वभावं द्विच[978] न्द्रादिवत् ।

कस्तर्हि नास्तीत्याह (।)

...2.335b नार्थो बाह्योस्ति केवलम् ॥ ३३५ ॥

'बाह्यो' नीलादि'रर्थः केवलं नास्ति' । तत्साधकत्वेनाभिमतस्याध्यक्षस्यासामर्थ्यात् । (३३५)

एवन्तर्हि ज्ञानस्य गजाद्याकारस्यालोकादिनिमित्तान्तरसद्भावेपि देशकालादिप्रतिनियमदर्शना-त् अर्थो [979] व्यवस्यतीत्याह (।)

---

[972] २ न संचोद्ये ग्राह्यग्राहकलक्षणे यस्याः ।

[973] १ रिक्तं पश्यन् पृच्छति परं ।

[974] २ यदि निराकारा बुद्धिर्विषयोऽर्थान्तरं तदा सम्बन्धासिद्धेः ।

[975] ३ तथा नीलाकारस्याग्रहे ज्ञानाग्रहात् ।

[976] ४ नीलग्रहे दर्शनाच्च ।

[977] ५ न हि ज्ञाने द्वावनुभवौ किन्तु स्वोपलम्भ एव ज्ञानस्यापि ।

[978] १ भ्रान्त्या ।

[979] २ प्यस्तीति । अन्यथा सदा सर्वत्र ज्ञानं स्यात् । यथा बीजादि सदा स्थितोपि कार्यकारी ।

....2.336 कस्यचित् किञ्चिदेवान्तर्व्वासनायाः प्रबोधकम् ।
ततो धियाम्विनियमो न बाह्यार्थव्यपेक्षया ॥ ३३६ ॥

'कस्यचिज्ज्ञा'नस्य गजाद्याकारस्य 'किञ्चिदेव' ज्ञानम'न्तर्व्वासनायाः' समनन्तरप्रत्यया[980]न्तर'वर्त्तिन्या' नियतज्ञानजननयोग्यतालक्षणायाः 'प्रबोध[981]कं' कार्योत्पादनाभिमुख्यकारकं । 'ततः' प्रबोधकवशात् 'धियां' नियताकारतया 'विनियमः। न बाह्यार्थव्यपेक्षया' (।) को हि विशेषो बाह्यो वा नियामकः प्रतिभासस्य प्रबुद्धवासनाविशेषः समनन्तरप्रत्ययो वा । तत्र वासनायाः सामर्थ्यं स्वप्नादावुपलब्धं । न तु बाह्यस्य नित्यपरोक्षत्वात् । न तथापि परोक्षस्य बाह्यस्य साधकस्याभावेपि नाभावस्थितिरिति चेत् । प्रतिभासमानं ज्ञानं बाह्यं तु न प्रतिभासत एवेति तावतैवाभिमतसिद्धेः । साधकप्रमाणरहितपिशाचायमानबहिरर्थनिषेधेनास्माकमादरः । यदि तु तन्निषेधनिर्बन्धो गरीयान् सांशत्वानंशत्वकल्पनया परमाणुप्रतिषेधे आ चा र्यी यः पर्येशि (? ।षि)तव्यः । (३३६)

(च. विज्ञानद्वैरूप्यम्)

....2.337 तस्माद् द्विरूपमस्त्येकं यदेवमनुभूयते ।
स्मर्यते चोभयाकारस्यास्य सम्वेदनं फलम् ॥ ३३७ ॥

यस्माद् बाह्योऽर्थो 'नानुभूयते तस्मा'देकं विज्ञानं अविद्योपप्लुतत्वात् 'द्विरूपं' बोधरूपं नीलादिरूपञ्चा'स्ति' । यत् यस्माज्ज्ञानमेवं द्व्याकारतयाऽनुभूयते स्ववेदनेन यथा[221/s] नुभवं कालान्तरे 'स्मर्यते च' (।) यथा चान्यस्य संवेदनाभावात् । 'उभयाद्याकारस्य' नीलाद्यनुभवरूपस्य 'संवेदनं फलं' । तदेवं प्रमेयो ग्राह्याकारः प्रमाणं ग्राहकाका[982] रः फलं स्वसंविदिति दर्शितं भवति ।[983] (३३७)

(छ. अर्थसंवित्फलम्)

....2.338 यदा निष्पन्नतद्भाव इष्टोनिष्टोपि वा परः ।
विज्ञप्तिहेतुर्व्विषयस्तस्याश्चानुभवस्तथा ॥ ३३८ ॥

'यदा' बहिरर्थवादेपि 'परो' वाह्योऽर्थ 'इष्टोऽनिष्टोऽ[984] पि वा निष्पन्नतद्भावो' भावनावशाद् व्यवस्थितेष्टानिष्टभावः सरूपाया 'विज्ञप्तेर्हेतुः' सन् 'विषयो' भवति । तदा 'तस्या'

[980] ३ आलयाख्य ।
[981] ४ आलयपरिणतेः सहकारिज्ञानं ।
[982] १

सव्यापारप्रतीतत्वात् प्रमाणं फलमेव सत् ।
स्वसम्वित्तिः फलम्वात्र तद्रूपो ह्यर्थनिश्चयः ।
विषयाभासतैवास्य प्रमाणन्तेन मीयते ।
यदाभासं प्रमेयन्तत् प्रमाणफलते पुनः ॥
ग्राह्यग्राहकसम्वित्ती त्रयन्नातः पृथक्कृतमि

ति सूत्रचतुष्टयानुरोधाच्चतुरावर्त्तितः फलविकल्पः । सम्भवमात्रेणामी विकल्पाः समाप्तिस्तु विज्ञानवाद एव कृता ॥

[983] २ असमर्थोयमेषः फलविकल्पः ।

विज्ञप्तेस्तथा इष्टानिष्टाकारेणानुभवो विषयस्य 'चानुभव' उच्यते । तेन विषयसारूप्यं प्रमाणमर्थसंवित् फलमु[985] क्तं । (३३८)

अथवा विज्ञानवादेप्यविरुद्धमित्याह (।)

....2.339 यदा सविषयं ज्ञानं ज्ञानांशेर्थव्यवस्थितेः ।
तदा य आत्मानुभवः स एवार्थविनिश्चयः ॥ ३३९ ॥

'यदा' ज्ञानस्यांशे आकारे विप्लववशात् 'अर्थ[986] स्य व्यवस्थितेर्ज्ञानं सविषय-' मि[987] ष्टं । 'तदा य आत्मनो' ज्ञानाकारस्या'नुभवः स एवार्थस्य निश्चयः' संवेदनमिष्यते[43b/MA] (।) ततश्च वि ज्ञा न वा दे प्य[988] र्थाकारः प्रमाणमर्थसंवित्फलमविरुद्धं । (३३९)

....2.340 यदीष्टाकार आत्मा स्यादन्यथा वानुभूयते ।
इष्टोनिष्टोपि वा तेन भवत्यर्थः प्रवेदितः ॥ ३४० ॥

[222/s]

बहिरर्थनयेपि बुद्धिवेदनस्यैवार्थवेदनत्वात् तथा 'यदीष्टाका'रोऽस्या बुद्धेरा'त्माऽनुभूयतेऽन्यथा'निष्टाकारो वा । तदा 'तेन' ज्ञानेने'ष्टोऽनिष्टो वार्थः प्रवेदितो भव'ति नान्यथा । (३४०)

....2.341 विद्यमानेपि बाह्येर्थे यथानुभवमेव सः ।
निश्चितात्मा स्वरूपेण नानेकात्मत्वदोषतः ॥ ३४१ ॥

यस्मा'द्विद्यमानेपि बाह्येऽर्थे यथानुभव'मनुभवाकारानतिक्रमेण स बाह्योऽर्थो 'निश्चितात्मा' व्यवस्थाप्यते नार्थ'स्वरूपेण' । यथा सम्भविना निश्चितात्मा व्यवतिष्ठते । इष्टानिष्टत्वेन पुरुषाभ्यामेकस्यार्थस्य ग्रहणाद'नेकात्मत्वदोषः' प्रसज्यते ।[989] (३४१)

....2.342 यदि बाह्यं न विद्येत कस्य संवेदनं भवेत् ।
यद्यगत्या स्वरूपस्य बाह्यस्यैव न किं मतम्[990] ३४२ ॥

....2.343 अभ्युपायेपि भेदेन न स्यादनुभवो द्वयोः ।
अदृष्टावरणात्स्यात् चेन्न नामार्थवशा गतिः ॥ ३४३ ॥

अनेका[991] त्मकत्वस्या'भ्युपाये' स्वीकारेपि[992] 'द्वयोः' पुरुषयो'र्भेदेने'ष्टत्वेनैकस्यान्यस्य चानिष्टत्वे'नानुभवो न स्यात्' । द्व्याकारत्वाद्वस्तुनस्तथै[993] व प्रतीतिप्रसक्तिः । अदृष्टेन सुखदुःखवेदनीयेन कर्मणावरणात् । द्वितीयस्याकारस्य एकात्मत्वेन प्रतिभासः स्यादिति चेत् । एवं सत्यर्थ'वशा ग[994] ति'र्ज्ञानमिति नाम प्रसिद्धं न स्यात् । अदृष्टवशेनेष्टानिष्टाकारयोः

[984] ३ रागद्वेषाभ्याम् ।

[985] ४ इति द्वितीयः फलविकल्पः

[986] ५ ग्राह्यस्य ।

[987] ६ अर्थशून्यं ।

[988] ७ ग्राह्याकारः प्रमेयः ।

[989] १ अर्थवशाद् बुद्धेर्व्यवस्थाने यावन्त आकारा ज्ञाने तेर्थगताः प्रसजन्तीत्यनेकाकारोर्थः स्यात् ।

[990] * वृत्तिकृता त्वविवृतैषा ॥

प्रतीतेरुपदर्शनात् । (३४२, ३४३)

किञ्च (।)

....2.344 तमनेकात्मकं भावमेकात्मत्वेन दर्शयत् ।
तददृष्टं कथं नाम भवेदर्थस्य दर्शकम् ॥ ३४४ ॥

भावम'नेकात्मकमेकात्मकत्वे'नैकाकारतया दर्श'यददृष्टं तत्कथमर्थस्य दर्शकं नाम भवेत्' । तदेव हि दर्शकमस्य यत् तत्स्वरूपं प्रतिभासयति । न चैकाकारोऽर्थः । ततस्तत्प्रतीतिर्नार्थप्रतीतिः । (३४४)

[223/s]

....2.345 इष्टानिष्टावभासिन्यः कल्पना नाक्षधीर्यदि ।
अनिष्टादावसन्धानं दृष्टं तत्रापि चेतसाम् ॥ ३४५ ॥

यथावस्थितवस्तुग्राहिण्य'क्षधी'स्तदनन्तर'मिष्टानिष्टावभासिन्यः कल्पनाऽयथार्था' । तेनानेकात्मकत्वदोषप्रसङ्ग इति 'यदी'ष्यते । 'तत्रेन्द्रियत्वेप्यनिष्टादावादि'शब्दात्कामलादौ 'चेतसामि'न्द्रियज्ञानानाम'सन्धा[995] नमर्था'कारानन्नुविधानं 'दृष्टं' । तस्मादिन्द्रियबुद्धिरयथार्थाकारा न भवतीति नास्ति । (३४५)

....2.346 तस्मात् प्रमेये बाह्येपि युक्तं स्वानुभवः फलम् ।
यतः स्वभावोस्य यथा तथैवार्थविनिश्चयः ॥ ३४६ ॥

'तस्मान्न' केवलं स्वरूपे 'बाह्येपि प्रमेये स्वानुभवः फलं युक्तं । यतः कारणात् स्वभावोस्य' ज्ञानस्य 'यथा' प्रतिभाति 'तथैव नार्थस्य विनिश्चयः' सिध्यति । (३४६)

....2.347 तदर्थाभासतैवास्य प्रमाणं न तु सन्नपि ।
ग्राहकाऽत्माऽपरार्थत्वाद् बाह्येष्वर्थेष्वपेक्षते ॥ ३४७ ॥

'तत्' तस्माद् 'बाह्येष्वर्थेषु' ग्राह्येष्वस्य ज्ञानस्या'र्थाभासताऽ'र्थाकारतैव 'प्रमाणम[996] पेक्षते' न त्वन्वयि'ग्राहकात्मा' ग्राहकाकारो'ऽपरार्थत्वात्'[997] आत्मविषयत्वात्तस्य । (३४७)

## (ज. आत्मसंविदेवार्थसंचिद्)

....2.348 यस्माद् यथा निविष्टोसावर्थात्मा प्रत्यये तथा ।
निश्चीयते निविष्टोसावेवमित्यात्मसंविदः ॥ ३४८ ॥

'यस्मा'त्कारण'द्यथा' इष्टत्वेनानिष्टत्वेन वार्थस्यात्माकारः 'प्रत्यये निविष्ट'स्तथाऽर्थो निश्चीयते तस्मादर्थाकारः प्रमाणं । 'असा'वर्थाकार एवमिष्टानिष्टत्वेन बुद्धौ 'निविष्ट' इत्यात्मसंविदः स्वसंवेदना'न्निश्चीयते' । (३४८)

991 २ सांख्यस्य बाह्यरूपाः सुखादयः त्रिगुणात्मकत्वाज्जगतः ।

992 ३ बाह्यवादिभिरपि यथानुभवमेवार्थनिश्चयोऽभ्युपगत इत्यात्मानुभव एवार्थस्य ।

993 ४ द्वयोरपीष्टानिष्टसङ्करप्रतीतिः स्यात् ।

994 ५ आलोकं चिकीर्षता सर्वमेवान्धीकृतं तर्हि ।

995 १ अन्याकारत्वं ।

996 २ ज्ञानारूढाकारसम्वेदनानुरूपेणार्थावसायव्यवस्थानात् ।

997 ३ परार्थं प्रमाणन्न च ग्राह्याकारवद् ग्राहकाकारो व्यवस्थाकारीति भावः ।

....2.349 इत्यर्थसंवित् सैवेष्टा यतोर्थात्मा न दृश्यते ।
तस्माद् बुद्धिनिवेश्यार्थः साधनं तस्य सा क्रिया ॥ ३४९ ॥

इति तस्मात् सैवात्मसंविद'र्थसंविदिष्टा । यतः' स्वरूपाद् बहिर्भूतो'ऽर्थात्मा न दृश्यते' बुद्ध्याकार एव तु वेद्यते । अतस्तद्वेदनदर्शनमेवार्थवेदनं । यस्माच्चार्थ[224/s] सारूप्यवशेनार्थाधिगतिव्यवस्था 'तस्मा'द् 'बुद्धि'निवे'श्यार्थो'ऽर्थप्रतिबिम्बं 'साधनं' प्रमाणं 'तस्य' प्रमाणस्य 'सा'धिगतिः 'क्रिया' फलमिष्यते । (३४९)

....2.350 यथा निविशते सोर्थो यतः सा प्रथते तथा ।
अर्थस्थितेस्तदात्मत्वात् स्ववित्दप्यर्थविन्मता ॥ ३५० ॥

यतः कारणात् 'यथार्थो' ज्ञानात्मनि 'निविशते' तथा सा स्वसंवित्तिः प्रथते ख्याति (।) तस्मादर्थस्य स्थितेरधिगतेस्तदात्मत्वात् परमार्थतः[998] 'स्वविदपि' सती 'अर्थविद् मता' । स्वसंवेदनमेवार्थवेदनमुपचारादुच्यत इति तादात्म्यमनयोः (।) (३५०)

...2.351a तस्माद् विषयभेदोपि न;

यस्मादर्थाकार एव प्रमाणं प्रतीतिसाधनत्वात् फलञ्च प्रतीयमानं 'तस्मा-' त्प्रमाणफलयो'र्विषयभेदोपि' नास्ति । यथा परमते आलोचनविशेषणज्ञानादीनामेकार्थापेक्षिण्यावेव हि सारूप्यप्रतिपत्ती प्रमाणफलत्वं प्रतिलभेते ।

यद्यर्थसंवेदनं फलं तदा स्ववित्फलं कथमुक्तमित्याह (।)

...2.351b स्वसंवेदनं फलम् ।
उक्तं स्वभावचिन्तायां तादात्म्यादर्थसंविदः ॥ ३५१ ॥

अर्थसंवेदनस्य वस्तुतः 'स्वभावचिन्तायां' स्वसंवेदनं फल'मुक्तं । अर्थसंविदस्ता'[44a/MA] 'दात्म्यात्' [999] स्वसंवेदनात्मत्वात् । न स्वाकारप्रतीतेरन्यास्त्यर्थप्रतीतिः स्वरूपेण तस्याः प्रतीतेः । (३५१)

ननु यदि यथार्थं नानुभवस्तदा स्ववासनाप्रबोधकमनुवर्तमानस्य ज्ञानस्यार्थो[1000] बाह्योस्तीत्येतदेव कुत इत्याह (।)

....2.352 तथावभासमानस्य तादृशोऽन्यादृशोपि वा ।
ज्ञानस्य हेतुरर्थोपीत्यर्थस्येष्टा प्रमेयता ॥ ३५२ ॥

'तथा' इष्टानिष्टाकारेणा'व[1001] भासमानस्य ज्ञानस्या'र्थो'पि ता[1002]दृशो'न्यादृशो वा-[225/s] हेतुरित्यर्थस्य 'प्रमेयतेष्टा' सौ त्रा न्ति क मते । सारूप्यस्य परमार्थतः 'सरूप'यन्ति तत् केन स्थूलाभासश्च तेणव ?? इति प्रतिषेधात्[1003] । (३५२)

...2.353a यथा कथञ्चित्तस्यार्थरूपं मुक्त्वावभासिनः ।
अर्थग्रहः कथं;

[998] १ तद्यद्यर्थसारूप्यं मानं स्ववित्फलं तदा विषयभेदः । आत्मविषया वित्तिर्बाह्यविषयं सारूप्यमित्याह । प्रतिभासमात्रेण तद्व्यवस्थाहेतुत्वात् ।

[999] २ विद्यमानेपि बाह्येर्थे यथानुभवमेव वे ??त्यादिना । यदा त्वबाह्य एवार्थः प्रमेय इत्यादि ?? ।

[1000] ३ विना च बाह्यं तत्स्वरूपाग्रहणे कथम्बाह्यार्थस्तृतीयः फलविकल्पः ।

[1001] ४ अर्थनिरपेक्षत्वं ।

[1002] ५ यथावभासोऽन्यादृशो आलोकादिभावेपि नीलादिरहितदेशेऽनुत्पत्तेरिन्द्रियसिद्धिवत् ।

[1003] १ ननु तादृशोऽन्यादृशोपि वार्थः प्रमेयो नेष्टः स्वपरयोस्तत् किमेवमुच्यते । परेण स्ववाचा बाह्यं निषेधयितुमुक्तं तदाह ।

यदि सारूप्याभावस्तदा तस्य ज्ञानस्यावभासिनो ‘यथा कथञ्चि’दिष्टानिष्टादिना भासमानमर्थरूपमर्थाकारं मुक्त्वा ‘कथं’ केन प्रकारेणार्थस्य ‘ग्रहः’ स्यात् । न ह्यर्थः स्वरूपेण दृश्यते । तत् स्वरूपबुद्धिवेदनादर्थग्रहव्यवस्था । सारूप्यमेव चेन्न संभवति कथमर्थग्रह इति मन्यते सौ त्रा न्ति कः

यो गा चा र स्तु तस्य साहाय्यकं मन्यमान आह (।)

...2.353b सत्यं न जानेहमपोदृशम् ॥ ३५३ ॥

‘स[1004] त्यं न जानेऽहमपीदृशमर्थग्रहः’ कथमिति । (३५३)

कथं तर्ह्यसत्यर्थे ग्राह्यग्राहकफलभेद इत्याह (।)

....2.354 अविभागोपि बुद्ध्यात्मविपर्यासितदर्शनैः ।
ग्राह्यग्राहकसंवित्तिभेदवानिव लक्ष्यते ॥ ३५४ ॥

पर[1005] मार्थतो‘ऽविभा’गो भेदरहितो‘पि बुद्ध्यात्मद्व’यवासनया ‘विपर्यासितं’ विभागेनोप‘दर्शितं’ दर्शनं येषां तैरतत्त्वदर्शिपुरुषै‘र्ग्राह्यग्राहकसंवित्ती’नां परस्परं भेदस्तद्वानिव लक्ष्यते । (३५४)

अत्र दृष्टान्तमाह (।)

....2.355 मन्त्राद्युपप्लुताक्षाणां यथा मृच्छकलादयः ।
अन्यथैवावभासन्ते तद्रूपरहिता अपि ॥ ३५५ ॥

‘यथा मृच्छकलादयो मन्त्रादिभिरुपप्लुत’यथार्थज्ञानहेतुकृत‘मक्षं’ येषां तेषामन्यथा सुवर्णादित्वे‘नैवावभासन्ते’ । तेन सुवर्णादिना रूपेण ‘रहिता अपि’ वस्तुतः । (३५५)

[226/s]

कस्मात्पुनर्म्मन्त्रादिसामर्थ्यात् सुवर्णादितामेव यातं मृत्खण्डमिति नाभ्युप(ग)म्यते इत्याह (।)

....2.356 तथैवादर्शनात्तेषामनुपप्लुतचक्षुषाम् ।
दूरे यथा वा मरुषु महानल्पोपि दृश्यते ॥ ३५६ ॥

‘मन्त्रादि’नाऽनुपप्लुतचक्षुषान्येन पुंसा तेषां मृच्छकलादीनां यथोपहताक्षेण ते दृश्यन्ते ‘तथैव दर्शनात्’ मृदात्मत्वेनैव दर्शनात् सुवर्णादित्वेन निष्पत्तिकल्पनमयुक्तं । ‘यथा मरुषु दूरेऽल्पोपि महान् दृश्यते’ तद्देशस्थैरल्पत्वेनैव भातस्य दर्शनात् । (३५६)

....2.357 यथानुदर्शनञ्चेयं मेयमानफलस्थितिः ।
क्रियतेऽविद्यमानापि ग्राह्यग्राहकसंविदाम् ॥ ३५७ ॥

तस्माद् ‘ग्राह्यग्राहकसंविदां’ परमार्थतो‘ऽविद्यमानापि मेयमानफलस्थितिर्यथादर्शनं क्रिय’ते । ग्राह्याका[1006] रो मेयः ग्राहकाकारो मानं संवित्तिः फलमिति व्यवस्थाप्यते । (३५७)

....2.358 अन्यथैकस्य भावस्य नानारूपावभासिनः ।
सत्यं कथं स्युराकारास्तदेकत्वस्य हानितः ॥ ३५८ ॥

---

[1004] २ य एवभिच्छति स पृच्छयतां ।

[1005] ३ आनुषङ्गिकमुक्त्वा विज्ञप्तौ प्रमादिमाह ।

[1006] १ प्रथमे विकल्पे नीलादिपरिच्छेदद्वारेव तज्ज्ञानं फलं आकारः प्रमा । द्वितीये विज्ञप्तौ ग्राह्यांशः प्रमेयो ग्राहकांशः प्रमा । तदुभयवेदनं फलं । तृतीये तु प्रतिपत्तृव्यवसाये नेष्टानिष्टादिरूपेण गृह्यमानोऽर्थः प्रमेयः तथा भानं मानं । तत्संवित् फलं । तदार्थाभासतैवासत्तैवास्य प्रमाणमित्युक्तः चतुर्थः ।

'अन्यथा' यदि वस्तुतो ग्राहकादिविभाग इष्यते त'दैकस्य भावस्य' ज्ञानात्मनो 'नानारूपा(व)भासिनो'ऽनेकाकारप्रतिभासवन्त आकारा ग्राह्यादिकाः 'कथं सत्यं स्युः' । तस्यैकज्ञानात्मन 'एकत्वस्य हानितः' । न ह्येकं प्रतिभासमानानेकाकारात्मकं भवितुमर्हति । प्रतिभासेन सर्व्वेषां भेदेन व्यवस्थापनात् । (३५८)

अनेकमेव तर्हि ज्ञानं परिच्छेदादित्वेन स्यादित्याह ।

...2.359a अन्यस्यान्यत्वहानेश्च ;

न चानेकं ज्ञानं एकमेवेष्टव्यं । वस्तुतो भिन्नस्याभेदे इष्यमाणे ग्राह्यादेः परस्परतो'ऽन्यस्यान्यत्वहानेः' । यदा हि भेदप्रतिभासेप्येकत्वमिष्टं तदा भेद एव न व्यवस्थितः । ततश्च सुखदुःखादयो नीलपीतादयश्च परस्परं न भिद्येरन् । प्रतिभासभेदस्य तत्साधनत्वात् । अन्यस्य च तत्साधनस्याभावात् ।

[227/s]

एवन्तर्ह्येकं तावत् ज्ञानं नानाकारं स्यादिति शङ्कायां नकारं काकाक्षिवत् संबन्धयन्नाह (।)

...2.359b नाभेदो रूपदर्शनात् ।
रूपाभेदेपि पश्यन्ती धीरभेदं व्यवस्यति ॥ ३५९ ॥

'ना[1007] भेदो' ज्ञानस्याभिबुद्धस्य 'रूप'[1008] स्याद'र्शनात्' । रूपाभेदश्चाद्रयादौ 'पश्यन्ती' धीरभेदं 'व्यवस्यति' । न च ग्राह्यग्राहकादिषु भिन्नाभासेष्वभेदप्रतिभासः । (३५९)

तस्याद् (।)

....2.360 भावा येन निरूप्यन्ते तद्रूपं नास्ति तत्त्वतः ।
यस्मादेकमनेकं च रूपं तेषां न विद्यते ॥ ३६० ॥

'भावा[1009]' ग्राह्यादयो 'येन' रूपेण ग्राह्यत्वादिना 'निरूप्यन्ते' अनुभूयन्ते 'तद्रूपं तत्त्वत-' स्तेषां 'नास्ति । यस्मादेकं' रूप'मनेकञ्च रूपं तेषां न विद्यते' । वस्तुभवदेकमनेकं वा स्यात् । न च ग्राह्याद्याभा एकोऽनेको वा युक्तः । तस्मादुप्पलव एवायं । (३६०)

ननु (।)

....2.361 साधर्म्यदर्शनाल्लोके भ्रान्तिर्नामोपजायते ।
अतदात्मनि तादात्म्यव्यवसायेना नेह तत् ॥ ३६१ ॥

...2.362a अदर्शनाज्जगत्यस्मिन्नेकस्यापि तदात्मनः ॥

'लोके साधर्म्यदर्शनादतदात्म[1010] नि तादात्म्यव्यवसायेन भ्रान्तिर्व्वि'तथा-[44b/MA] कारा बुद्धि'र्जायते' इति नाम प्रसिद्धं । 'इह' विज्ञप्तिनये तत् साधर्म्यदर्शनं 'ना'स्ति । (३६१) 'एकस्यापि तदात्मनो'ऽभूताकारस्य 'जगत्यदर्शनात्' ।

अत्राह (।)

...2.362b अस्तीयमपि या त्वन्तरुपप्लवसमुद्भवा ॥ ३६२ ॥

1007 १ अभिन्नरूपदर्शने हि अभेदः स्यात् ।

1008 २ बुद्धेन रूपन्न दृश्यते ।

1009 ३ चित्तगताः ।

1010 ४ मरीचिषु जलवत् ।

....2.363 दोषोद्भवा प्रकृत्या सा वितथप्रतिभासिनी ।
अनपेक्षितसाधर्म्यदृगादिस्तैमिरादिवत् ॥ ३६३ ॥

साधर्म्यदर्शनाद्या मानसी भ्रान्ति'रियमप्यस्ति ।[1011] या पुनरन्तरुपप्लवसमुद्भवा' अविद्याप्रभवा सा प्रकृत्या दोषोद्भवा । अविद्या तिमिरादिहेतुका वितथप्रतिभासिन्यभूताकारा-अनपेक्षितसाधर्म्यदृगादिस्तैमिरादिवत् । यथा तिमिरज्ञान[228/s] मिन्द्रियदोषादनपेक्षितसाधर्म्यमेव जायते तथा ग्राह्यादिभ्रान्तिरपीत्यर्थः, जायमानमेव हि ज्ञानं वासनासामर्थ्यादनुभवाननुभवत्वेनान्तर्बहिर्देशत्वेन सुखादि नीलादि दर्शयति । एवं तर्हि बहिरर्थोपदर्शनशक्तमेव स्वदर्शनहेतुबलात् कस्मान्नेष्यत ज्ञानमिति चेत् । न (।) स्वप्नादावविद्याया असद्ग्राह्याकारोपदर्शनसामर्थ्योपलब्धेः । आकारातिरिक्तबहिरर्थस्यादर्शनान्न ज्ञानस्य तदुपदर्शनसामर्थ्यकल्पना न्याय्येत्यास्तां तावदिदं ॥ (३६२, ३६३)

भ. विज्ञप्तिमात्रतायां प्रमाणफलव्यवस्था

विज्ञप्तिमात्रतायां प्रमाणफलव्यवस्थाप(ना)र्थमा[1012] ह (।)

....2.364 तत्र बुद्धेः परिच्छेदो ग्राहकाकारसम्मतः ।
तदात्म्यादात्मवित्तस्य स तस्य साधनं ततः ॥ ३६४ ॥

'तत्र' विज्ञप्तिमात्रतायां 'बुद्धेः' सग्राहकाकारः 'संमतः परिच्छेद' आकार 'आत्मवित्' तस्य ग्राहकाकारस्य फलं । 'तादात्म्यात्' परिच्छेदस्वभावत्वात् 'स्वसंवित्तिः फलम्वेति सूत्रे स्वाभासं विषयाभासञ्च ज्ञानमुत्पद्यते (।) तत्र यत् स्वसंवेदनन्तत् फलं विषय (:)' परिच्छेदात्मक एव हि ग्राहकाकारः स एव चात्मवेदनं । 'ततः' परिच्छेदवशेनात्मवेदनव्यवस्थानात् (।) स परिच्छेद'स्तस्या'त्मविदः[1013] फलभूतायाः 'साधनं' प्रमाणं । (३६४)

....2.365 तत्रात्मविषये माने यथा रागादिवेदनम् ।
इयं सर्व्वत्र संयोज्या मानमेयफलस्थितिः ॥ ३६५ ॥

'तत्र' एवं सत्या'त्मविषये माने' स्वसंवेदने प्रमाणे 'यथा रागादिवेदन[1014]' मानमेयफलात्मकं । 'इयं मानमेयफलस्थितिः' सर्व्वत्र विज्ञप्तिनयेपि संयोज्या । (३६५)

तथा हि (।)

....2.366 तत्राप्यनुभवात्मत्वात्ते योग्या स्वात्मसंविदि ।
इति सा योग्यता मानमात्मा मेयः फलं स्ववित् ॥ ३६६ ॥

'तत्रापि' रागादिवेदनेपि 'ते' रागादयोऽ'नुभवात्मत्वात् स्वा'त्मनः 'संविदि योग्या इति' तस्मात् 'सा' स्ववेदन'योग्यता' रागादीनां 'मानमा[1015] त्मा मेयः फलं स्ववित्' । (३६६) [229/s]

ननु रागादिष्टात्मसंवेदनं फलभूतं मानयुक्तमिह तु ग्राहकाकारो योग्यतालक्षणं प्रमाणमुच्यत इति व्या[1016] हतमिति शङ्कायामुत्तरं (।)

---

[1011] ५ इयमेवेति तु न नियमः । अनपेक्षितसाधर्म्याप्यस्ति ।

[1012] १ बाह्यविज्ञानवादौ द्विरावर्त्तितौ भेदकथनार्थं ।

[1013] २ विज्ञप्तौ ग्राह्यांशो मेयो यः पूर्व्वं प्रमाणमुक्तः । ग्राहकांशः प्रमा तदुभयसंवेदनं फलं ।

[1014] ३ स्वविनिष्ठं ।

[1015] ४ अनुभवनीयः ।

[1016] १ दिग्नागेनोक्तं रागादिषु च स्वसम्वेदनमिन्द्रियानपेक्षत्वात् मानसं प्रत्यक्षं । पुनः ग्राहकाकारसम्वित्ती प्रमाणफलते इति ग्राहकाकारः प्रमाणं । वार्त्तिके तु योग्यतोक्ता । आह एकाभिप्रायतां ।

....2.367 ग्राहकाकारसंख्याता परिच्छेदात्मतात्मनि ।
सा योग्यतेति च प्रोक्तं प्रमाणं स्वात्मवेदनम् ॥ ३६७ ॥

या 'ग्राहकाकारसंख्याता परिच्छेदात्मता साऽत्मनि' संवेदने 'योग्यता चेति' तस्माद्रागादिषु 'स्वात्मसंवेदनं प्रमाणं प्रोक्तं । न हि स्ववेदनं' फलभूतमिह विवक्षितं किन्तु योग्यता । तस्मादभिन्नार्थतैव । (३६७)

ननु स्वाभासं तावदस्तु ज्ञानं परिच्छेदस्व[1017] भावत्वात् । विषयाभासं तु कथं । यथा विषयं कारणं तथा चक्षुरादिरपीति तदाकारतापि स्यादित्याह (।)

....2.368 सर्व्वमेव हि विज्ञानं विषयेभ्यः समुद्भवद् ।
तदन्यस्यापि हेतुत्वे कथञ्चिद् विषयाकृति ॥ ३६८ ॥

'सर्वमेव हि ज्ञानं विषयेभ्यः समुद्भवदु'त्पद्यमानं तेभ्यो विषयेभ्योऽन्यस्येन्द्रियादेरपि हेतुत्वे कथञ्चित् स्वकारणायातविषयगतशक्तिभेदा'द्विषयाकृति' भ[1018] वति नेन्द्रियाद्याकारं । (३६८)

....2.369 यथैवाहारकालादेर्हेतुत्वेऽपत्यजन्मनि ।
पित्रोस्तदेकस्याकारं धत्ते नान्यस्य कस्यचित् ॥ ३६९ ॥

'यथैवापत्यजन्मनि' पित्रोर्माता'पित्रोराहारकालादे'[1019]श्च हेतुत्वेपि तदेकस्य पित्रोर्म्मध्ये एकस्य पितुर्म्मातुर्व्वा'कार'मपत्यं 'धत्तेऽन्यस्या'हारकालादेश्च 'कस्यचित्' (न) । (३६९)

....2.370 तद्धेतुत्वेन तुल्येपि तदन्यैर्विषये मतम् ।
विषयत्वं तदंशेन तदभावे न तद् भवेत् ॥ ३७० ॥

यत एवं 'तत्' तस्मात् ततो विषयादन्यैरिन्द्रियादिभि'र्हेतुत्वेन तुल्ये' सदृशेपि विषये रूपादौ 'विषयत्वं' ग्राह्यत्वं तेन स्वाकारार्पकत्वेनां'शेन' विशेषणं 'मतं' । यस्मादा[230/s] कारार्पकत्वं विषयलक्षणमवस्थितं । तस्मात्तस्याकारार्पकत्वस्याभावे तद्विषयत्वमिन्द्रियादिषु 'न भवेत्' । (३७०)

किञ्च (।)

....2.371 अनर्थाकारशङ्का स्यादप्यर्थवति चेतसि ।
अतीतार्थग्रहे सिद्धे द्विरूपत्वात्मवेदने ॥ ३७१ ॥

'अर्थवति चेत[1020] स्यनर्थाकार'ता अर्थाकाररहितता शङ्का 'स्यादपि' दृश्यमानस्याकारस्यार्थत्वेनैव सम्भाव्यमानत्वात् । 'अतीत'स्या'र्थस्य ग्रहे' विकल्पात्मके त्वर्थस्या[45a/MA]भा-[1021] वात् । अर्थाभासतया च 'द्विरूपत्वं' तथा चापरोक्षत्वादा'त्मसंवेदनं' चेति द्वे अप्यस्तु सिद्धे । न ह्यसन्नेवार्थो दृश्यते । ततोऽर्थाकारता सा ज्ञानस्यैव तथा[1022] र्थेन च परोक्षत्वाभावात् स्वाभासश्च तत् । न चान्येन ज्ञानेन तद् वेद्यते । वेद्यवेदकभावस्य निषिद्धत्वात् । अतः स्ववेदनमेव तत् । (३७१)

## ब. सामान्यस्य नित्यानित्यत्वप्रतिषेधः

[1017] २ ज्ञानं तज्ज्ञानविशेषात्तु द्विरूपता ज्ञानस्य ।

[1018] ३ आलम्बनच्छायमिति वस्तुधर्मता ।

[1019] ४ आदिनाऽदृष्टादिः ।

[1020] १ साकारत्वात्ततोन्यं भाविकमर्थं कल्पयतः किमयं ज्ञानीय एवार्थो बहिर्व्वा येन ज्ञानमनर्थकं स्यात् ।

[1021] २ सिद्धा ज्ञानस्यैव द्व्याभासता ।

[1022] ३ बुद्धेर्द्विरूपत्वमात्मवेदनञ्च ते सिद्धे ।

स्यादेतद् (।) अतीता व्यक्तिरसत्त्वान्न विकल्पविषयो जातिस्तु सत्त्वात् स्यादित्याह (।)

....2.372 नीलाद्याभासभेदित्वान्नार्थो जातिरतद्वती ।
सा वा-नित्या न जातिः स्यान्नित्या वा जनिका कथम् ॥ ३७२ ॥

अतीतविकल्पस्य 'नीलाद्याभासभेदित्वात्' वर्ण्णसंस्थानाद्याकारविशेषवत्त्वात् 'न जातिरतद्वती' वर्ण्णाद्याकाररहितार्थैर्विषयः । किञ्च (।) जातिर्ज्विषयीभवन्ती अनित्या वा भवेत् नित्या वा । 'सा चानित्या जातिर्न स्यात्' नित्यलक्षणत्वात्तस्याः 'नित्या' वा बुद्धे'र्जनिका कथं' स्यात् । (३७२)

नित्यस्य क्रमयौगपद्याभ्यां विरहात् ॥ ना[1023] मनिमित्ते विप्रयुक्तः संस्कारो विषयश्चेदित्याह (।)

....2.373 नामादिकं निषिद्धं प्राङ् नायमर्थवतां क्रमः ।
इच्छामात्रानुरोधित्वादर्थशक्तिर्न सिध्यति ॥ ३७३ ॥

[231/s]

'नामादिकं' विषयत्वेन 'निषिद्धं प्राक्' ?? नामादिवचने वक्तृश्रोतृवाच्यानुबन्धिनी ?? त्यादिना । किञ्चा'र्थवतां' सविषयाणां चक्षुर्व्विज्ञानादीना'मयं क्रमो'ऽर्थसामर्थ्येन विनोत्पाद इति नास्ति । मनोविज्ञानानां त्वर्थसन्निधानानपेक्षाणा'मिच्छामात्रानुरोधित्वात्' जनिका'र्थशक्तिर्न सिध्यति' । न चाहेतुरर्थो ग्राह्योऽतिप्रसङ्गात् । (३७३)

## (२) स्मृतिचिन्ता

भवत्वतीतार्थलम्बनं विज्ञानं विषयाकारमनुभवस्तु मा भूदित्याह (।)

....2.374 स्मृतिश्चेदृग्विधं ज्ञानं तस्याश्चानुभवाद्भवः ।
स चार्थाकाररहितः सेदानीं तद्वती कथम् ॥ ३७४ ॥

'ईदृग्विधम'तीतविकल्पनात्मकं 'ज्ञानञ्च' स्मृतिः । 'तस्याश्चानुभवाद् भव' उत्पादः । न ह्यनुभवमन्तरेण स्मृतिः । 'स चा'नुभवो भवन्मते'ऽर्था[1024] काररहितः । इदानी-'मस्मिन्नभ्युपगमे सा स्मृति'स्तद्वत्य'र्थाकारवती 'कथम'स्तु । यद्यनुभवारूढो नार्थाकारः कथमसौ विदितः । अविदितस्य का स्मृतिः । (३७४)

## क. नार्थात् स्मृतिः

अर्थात्स्मृतिरुत्पद्यत इति चेत् । आह (।)

....2.375 नार्थाद् भावस्तदाभावात् स्यात्तथानुभवेपि सः ।
आकारः स च नार्थस्य स्पष्टाकारविवेकतः ॥ ३७५ ॥

'नार्थाद् भाव'स्तस्या'स्तदा'[1025] स्मृतिकाले'ऽभावा'दतीतार्थस्य ।[1026] यथा चार्थादुत्पद्यमानायाः स्मृतेरर्थाकारो भवति । 'तथानुभवेप्य'र्थादुत्पद्यमाने 'सोऽर्थाकारः' स्यात्(।)

---

[1023] ४ संज्ञा नाम । अर्थसरूपन्निमित्तं ।

[1024] १ निराकारवादित्वात् ।

अपि च स्मृत्यारूढः 'सोऽ'स्पष्ट'श्चा'कारो 'नार्थ'स्या[1027]नुभवारूढात् 'स्पष्टादर्थाकाराद् विवेकतो' भेदात् । (३७५)

....2.376 व्यतिरिक्तं तदाकारं प्रतीयादपरस्तथा ।
नित्यमात्मनि सम्बन्धे प्रतीयात् कथितश्च न ॥ ३७६ ॥

यदि च बुद्धिव्यतिरिक्तोऽर्थ एव मनोविज्ञानग्राह्यस्तदा बुद्धे'र्व्यतिरिक्तमे'केन विकल्प्यमान'न्तदाकारमपरो'पि योग्यदेशस्थः प्रमा न प्रतीयात् । परोपलभ्यतां [232/s] निषेद्धुं 'नित्यमात्मन्यस्य' विकल्प्यस्यार्थस्य 'सम्बन्धे' वा[1028] स्वीक्रियमाणे यदा स्वयमनुचिन्तयितुं पर[1029]स्मै कथ्यते तदा कथञ्चित् परो न 'प्रतीयात्' । प्रत्येति च 'कथितं' (३७६)

....2.377 एकैकेनाभिसम्बन्धे प्रतिसन्धिर्न युज्यते ।
एकार्थाभिनिवेशात्मा प्रवक्तृश्रोतृचेतसोः ॥ ३७७ ॥

प्रतीत्यर्थ'मेकेनैकेन' वक्त्रा श्रोत्रा च भिन्नस्य भिन्नस्य अर्थस्या'भिसम्बन्धे-' ऽत्रा[1030]पि स्वीक्रिमाणे 'प्रवक्तृश्रोतृचेतसोः प्रतिसन्धिरेकार्थाभिनिवे[1031] शात्' यदेवानेन कथितं तदेव मया प्रतीतं यदेव मया कथितं[1032] तदेवानेन ज्ञातमित्यभिन्नार्थाध्यवसायरूपो 'न युज्यते' । (३७७)

....2.378 तदेकव्यवहारश्चेत् सादृश्यादतदाभयोः ।
भिन्नात्मार्थः कथं ग्राह्यस्तदा स्याद्धीरनर्थिका ॥ ३७८ ॥

वक्तृश्रोतृसम्बन्धिनोस्तयोरर्थयोरे'कव्यवहार' एकत्वावसायः 'सादृश्याचेत्' । तदुभयदर्शने सादृश्यं न चात्र दर्शनं । भवतु वा तथापि अतदाभयो'र्भिन्नात्म-' सम्बन्धार्थाप्रतिभासिनोर्व्वक्तृश्रोतृ चेतसो'र्भिन्नात्माऽर्थः [1033] कथं ग्राह्यः' । यदा चार्थभेदो नास्ति 'तदा-'ऽभिन्नार्थाध्यवसायिनी 'धी'र्व्वक्तृश्रोत्रो'रनर्थिका स्यात्' । यथार्थं बुद्धेरभावात् । यथाबुद्धि चार्थाभावात् । (३७८)

भवतु तावदेवं स्मृतिर्व्विषयाकाराऽनुभवज्ञानं त्वनाकृति स्यादित्या[1034] ह (।)

....2.379 तद्यानुभवविज्ञानेनोभयांशावलंबिना ।
एकाकारविशेषेण तज्ज्ञानेनानुबुध्यते ॥ ३७९ ॥

'तद्यानुभ[1035]'विषयेण स्मरणेनानुब [1036] ध्यतेऽनुगम्यते स्मर्यते इति यावत् ।

कीदृशेनो'भयांशावलम्बिना' ज्ञेयप्राचीनज्ञानगतविषयाकारानुभवरूपधर्मद्वयविषयेण । कथ'मनुबध्यत' इत्याह (।)

[1025] २ सिद्धमतः साकारं स्मरणं ।
[1026] ३ अभ्युपगम्य निराकारवादिनि प्रसङ्गमाह ।
[1027] ४ युक्तो (?) स्मृतौ नीलाद्यः ।
[1028] १ प्राप्यकारित्वात्कार्यस्य ।
[1029] २ किञ्चिन्तयसीति पृष्टे ।
[1030] ३ सर्वः पुरुषः प्रत्यात्मैकैकसंगतः परतः श्रवणेपि स्वार्थाबाधी ।
[1031] ४ यमलकयोरिव ।
[1032] ५ किं चिन्तयसीति पृष्टे ।
[1033] ६ भेदेनाभानात् ।
[1034] ७ विषयज्ञाने तज्ज्ञानाद्याचष्टेनुभवविज्ञानम् ।
[1035] ८ प्राचीन ।
[1036] ९ विषयाकारता नेष्टा परेणेति द्विरूपता साध्यते । शरीरान्तर्वर्त्तिनो यथा ।

'एक'स्मादविवादसिद्धादनुभवा'काराद्विशेषो' विषयाकारस्तेन स्मरणज्ञानेन हि विज्ञानमर्याकारानुभवाकारविशिष्टमेव स्मर्यते । ततस्तादृशमेव तत् । (३७९)

[233/s]

....2.380 अन्यथा ह्यतथारूपं कथं ज्ञानेधिरोहति ।
एकाकारोत्तरं ज्ञानं तथा ह्युत्तरमुत्तरम् ॥ ३८० ॥

अन्यथाऽतथारूपमाकारद्वयरहितमनुभवज्ञानं स्वग्राहिणि स्मरणज्ञाने 'कथं' ह्याकारमधिरोहति । अधिरूढं च । ततो ह्याकारं तत् । तथा 'ज्ञानमुत्तरमुत्तरं' बुद्धिपूर्व्वज्ञानालम्बन'मेकाकारोत्तर'मेकेनैकेनाकारेणाधिकं प्रतीयते । अर्थज्ञानेन तदालम्बक एकोऽर्थाकारः प्रतीयते । तदालम्बनेन[1037] तु विषयभूतज्ञानाकारस्तदा-[45b/MA] लम्बकश्च स्वाकारः । (३८०)

....2.381 तस्यार्थरूपेणाकारावात्माकारश्च कश्चन ।
द्वितीयस्य तृतीयेन ज्ञानेन हि विविच्यते ॥ ३८१ ॥

यस्मा'त्तस्य' द्वितीयस्य ज्ञानस्य तौ द्वावाकाराव'र्थरूपेण' विषयभावेन तदालम्बक 'आत्माकारश्च कश्चन' तृतीयेन द्वितीयज्ञानालम्बकेन हि यस्माद् विवेच्यते अवधार्यते । तस्मादर्थाकारं स्ववेदनञ्च ज्ञानमभ्युपगन्तव्यं । (३८१)

...2.382a अर्थकार्यतया ज्ञानस्मृतावर्थस्मृतेर्यदि ।
भ्रान्त्या सङ्कलनं;

अ[1038] थ निराकारमेव 'ज्ञानम'र्थस्य कार्यमनुभवरूप'मर्थकार्यतया' ज्ञात[1039] 'स्मृतौ' विशेषणत्वेना[1040] 'र्थस्य स्मृतेः' स्मर्यमाणस्यार्थस्य 'भ्रान्त्या' ज्ञानात्म[1041] नि 'संकलनं' सम्ब(न्ध)नं यदि स्यात्तदा को दोषः ।

आह ।

...2.382b ज्योतिर्मनस्कारे च सा भवेत् ॥ ३८२ ॥

अर्थवत् ज्योतिष आलोकस्य मनस्कारस्य च ज्ञानहेतुत्वात् । तत्कार्यज्ञाने स्मर्यमाणे सा स्मृति'र्ज्योतिर्मनस्कारे' आलोकसमनन्तरप्रत्यययोरपि स्यात् । तत्र भ्रान्त्या अर्थाकारमिवालोकमनस्काराकारमपि संकलनीयं । न त्वर्थाकारमेव नियमेन संकलयितुं युक्तं । (३८२)

....2.383 सर्व्वेषामपि कार्य्याणां कारणैः स्यात्तथा ग्रहः ।
कुलालादिविवेकेन न स्मर्येत घटस्ततः ॥ ३८३ ॥

[234/s]

यदि चा[1042] र्थकार्यं भ्रान्त्या स्मर्यते तदा 'सर्व्वेषामपि कार्य्याणां कारणैः' सह 'तथा ग्रहः' कारणात्मत्वेन ग्रहणं 'स्यात्' । ततश्च धटकुलालादिकार्यं 'कुलालादेर्व्विवेकेन' भेदेन

---

[1037] १ प्रथमज्ञानस्य यो बाह्यग्राहकाकारौ । तौ द्वितीयस्य ज्ञानस्य ग्रह्याकारौ जातौ ।

[1038] २ स्पष्टेप्यर्थे बाह्याभिनिवेशत्यागार्थ परप्रक्रियां दूषयितुं परमतमुपभिपति ।

[1039] ३ कार्यभूते विषयज्ञाने या स्मृतिः ।

[1040] ४ तत्कारणस्य स्मृतिर्भवति ततः ।

[1041] ५ निराकारेपि साकारवतः ।

'न स्मर्येत' । (३८३)

अथास्त्येव कश्चिदालोकादिभ्यो विषयस्य ज्ञानात्मन्यारोपणीयो विशेषस्ततस्तदाकारावग्रहेण स्मर्यते । नान्यथेत्याह (।)

....2.384 यस्मादतिशयाज्ज्ञानमर्थसंसर्गभाजनम् ।
सारूप्यात्तत् किमन्यत् स्याद् दृष्टेश्च यमलादिषु ॥ ३८४ ॥

'यस्माद'र्थारोपिताद'तिशयात् ज्ञानमर्थसंसर्ग'स्यार्थसंश्लेषस्य 'भाजनं' पात्रं भवति । अर्थेन सारूप्या'दन्यत् किन्तत् स्यात्' । सारूप्यादन्यस्यातिशयस्योपलक्षणत्वायोगात् । 'यमलादिषु' सारूप्याद् भ्रान्त्या तथार्थनिश्चयस्य 'दृष्टेश्च' । (३८४)

किञ्च ।

....2.385 आद्यानुभयरूपत्वे ह्येकरूपं व्यवस्थितम् ।
द्वितीयं व्यतिरिच्येत न परामर्शचेतसा ॥३८५ ॥

'आद्य'स्यार्थज्ञानस्या'नुभयरूपत्वे'ऽर्थाकाररहितत्वात् अनुभवैकरूपत्वे तदालम्बकं 'द्विती-यं' ज्ञान'मेक'स्मिन् 'रू[1043] पे'ऽनुभवात्मनि 'व्यवस्थितं परामर्शचेतसा' ज्ञानज्ञानालम्बकेन तृतीयज्ञानेन न व्यतिरिच्येत । न विषयज्ञानग्राहकतया भेदेन गृह्येत । स्वाभासमात्रत्वेन सर्व्वस्याविशेषात् । (३८५)

....2.386 अर्थसंकलनाश्लेषा धीर्द्वितीयावलम्बते ।
नीलादिरूपेण धियं भासमानां पुरस्ततः ॥ ३८६ ॥

यतो बुद्धेरनाकारत्वे दोषोऽयं 'ततः' पु'रोऽर्थस्य' धियं 'नीलादिरूपेण भासमानां द्वितीया धीरर्थसंकल'नस्यार्थाकारावग्रहस्या'श्लेषः' संसर्ग्गो यस्याः सा ताम'वलम्ब'ते । (३८६)

....2.387 अन्यथा ह्याद्यमेवैकं संयोज्येतार्थसम्भवात् ।
ज्ञानं नादृष्टसम्बन्धं पूर्व्वार्थेनोत्तरोत्तरम् ॥ ३८७ ॥

'अन्यथा' यद्यनाकारं ज्ञानमर्थकार्यतया भ्रान्त्याऽर्थाकारं स्मर्यत इत्याश्रीयते त[1044] 'दाद्यमेवैक'मर्थज्ञानं स्मृत्याऽर्थेन 'संयोज्येत । अर्थात्संभवात्' तस्य । न 'उत्तरोत्तरं ज्ञानं पूर्व्वस्य' ज्ञानस्या'र्थेना'कारणभूतेना'दृष्टसम्बन्धं' संयोज्येत ।
[235/s]

तस्मात्स्थितमेतत् ज्ञानानां विषयसारूप्यानुभवरूपत्वाभ्यां द्व्याकारत्वं । ततश्च सहोपलम्भनियमोऽर्थविज्ञानयोः । अर्थाकारताया अर्थोपलम्भात् । अनुभवरूपतायाः स्व'भे' (?वे) दनत्वात् ।(३८७)

तथा च (।)

....2.388 सकृत् सम्वेद्यमानस्य नियमेन धिया सह ।
विषयस्य ततोऽन्यत्वं केनाकारेण सिध्यति ॥ ३८८ ॥

'धिया सह नियमेन सकृत्संवेद्यमानस्य विषयस्य ततो' धियो'ऽन्यत्वं' भेदः 'केनाकारे'ण प्रकारेण 'सिध्यति' ।[1045] भिन्नयोः सहोपलम्भनियमायोगात् । (३८८)

यदि विषयज्ञानयोरभेदस्तदा ग्राह्यग्राहकतया भेदः कथं प्रतिभातीत्याह (।)

---

[1042] १ इत्यर्थाकारसमावेशितज्ञानम् ।

[1043] २ विषयज्ञानतज्ज्ञानविशेषात्तु द्विरूपतेति व्याख्याय स्वयमुपपत्तिमाह (।) अद्विरूपं विषयाभासाभावात् ।

[1044] ३ न विषयाकारोपधानात् ।

[1045] १ विषयस्याभावात्तदभेदो न साध्यः किन्तु बुद्धिरेव तदात्मिका साध्यते ।

...2.389a भेदश्च भ्रान्तविज्ञानैर्दृश्येतेन्दाविवाद्वये ।

'भेदश्च' वासनावशात् 'भ्रान्त'मुपप्लुताकारं 'ज्ञानं' येषां तैरर्वाग्दर्शिभि'र्दृश्येत । इन्दाविवाद्व'ये एकरूपे द्वैतं तिमिरोपहतबुद्धिभिः ।

भेदेपि कस्मान्न सहोपलम्भनियम इत्याह (।)

...2.389b संवित्तिनियमो नास्ति भिन्नयोर्नीलपीतयोः ॥ ३८९ ॥

भिन्नयोर्नीलपीतयोः 'संवित्तिनियमो नास्ति' । ततो यत्रास्ति तत्राभेदएव (। ३८९)

तथा हि (।)

....2.390 नार्थोऽसम्वेदनः कश्चिदनर्थम्वापि वेदनम् ।
दृष्टं सम्वेद्यमानन्तत् तयोर्नास्ति विवेकिता ॥ ३९० ॥

...2.391a तस्मादर्थस्य दुर्वारं ज्ञानकालावभासिनः ।
ज्ञानादव्यतिरेकित्वं;

नार्थोनुभवमन्तरेण कश्चिद् दृष्टः (।) वेदनश्चार्थाकारम्विना न दृष्टं सम्वेद्यमानं । तत्तस्मात्तयोरर्थतदुपलम्भयोर्नास्ति विवेधिता । (३९०)तस्मात् ज्ञानकालावभासिनोर्थस्य । अर्थज्ञानयोरपि सहसंवित्तिज्ञानादव्यतिरेकित्वमभिन्न[1046] त्वं दुर्व्वारमित्युपसंहारः ।

स्यादेतत् ।

...2.391b हेतुभेदानुमा भवेत् ॥ ३९१ ॥

[236/s]

....2.392 अभावादक्षबुद्धीनां सत्स्वप्यन्येषु हेतुषु ।
नियमं यदि न ब्रूयाद प्रत्ययात् समनन्तरात् ॥ ३९२ ॥

[46a/MA]

'सत्स्वप्यन्येष्वि'न्द्रियादिषु 'हेतुष्वक्षबुद्धीनामभावात्' । हेतुभेदस्य तदतिरिक्तस्य कारणविशेषस्यानुमा भवेत् । कारणसाकल्ये सति तन्मात्रसाध्यस्य कार्यस्यानुत्पादायोगात् । यश्चासौ कारणभेदः स बाह्योऽर्थो भविष्ययीति मन्यते परः । एवमप्यनुमानगम्यो बहिर्थो भवेन्न प्रत्यक्षो यथेष्यते । किन्तु व्यतिरेकसामर्थ्यादपि तदाऽर्थःसिध्येत । 'यदि' यो गा चा रो नानार्थप्रतिभासिनीनां धियामुत्पादक्रमस्य 'नियमं'यथाप्रत्ययं प्रबुद्धवासनागर्भात् 'समनन्तरप्रत्ययान्न ब्रूयात्' । (३९१, ३९२)

....2.393 बीजादंकुरजन्माग्नेर्धूमात् सिद्धिरितीदृशी ।
बाह्यार्थाश्रयिणी यापि कारकज्ञापकस्थितिः ॥ ३९३ ॥

ननु बाह्यार्था[1047] भावे 'बीजादङ्कुरस्य जन्मे'तीदृशी एवंजातीया यापि प्रतीतिसिद्धा कारकस्थितिः । 'धूमात्' कार्यात्कारणस्याग्नेः 'सिद्धिरितीदृशी' यापि 'ज्ञापकहेतुस्थितिः' तदुच्छेदः स्यात् । हेतुफलभावाश्रयस्य बाह्यस्यैवाभावात् । (३९३)

अत्राह[1048] (।)

....2.394 सापि तद्रूपनिर्भासा तथा नियतसङ्गमाः ।
बुद्धीराश्रित्य कल्प्येत यदि किं वा विरुध्यते ॥ ३९४ ॥

[1046] २ तादात्म्यप्रतिबन्ध उक्तः ।

[1047] १ विद्यमानेपि बाह्येर्थे यथानुभवमेव वे ?? त्यादिना यदा तु बाह्य एवार्थः प्रमेय इत्यादि ?? ।

[1048] २ विज्ञप्तौ कार्यकारणत्वस्थापनाय प्रत्यक्षानुपलम्भसाधनं हेतुफलभावं परमाशङ्कते ।

'सा' कारकज्ञापकस्थिति'रपि तद्रूपनिर्भा[1049] सा' बीजाङ्कुरधूमाग्निप्रतिभासवासना-प्रतिनियमात् । 'तथा' क्रम[1050] विशेषेण 'नियतः सङ्गम' उत्पादो यासां ता 'बुद्धीरा[1051] श्रित्य' यदि 'कल्प्यते' तदा 'किम्वा विरुध्येत' न किञ्चित् । हि बीजप्रतिभासं ज्ञानं स्वहेतोः प्रबुद्धाङ्कुरज्ञानवासनापाटवमङ्कुरज्ञानं जनयति । एवं धूमज्ञानमग्निज्ञानमुत्पादयति । तावतैव च ज्ञापकव्यवस्थाया अविरोधः । (३९४)

[237/s]

नन्वस्ति विरोधः । तथा हि (।)

....2.395 अनग्निजन्यो धूमः स्यात् तत्कार्यात् कारणेऽगतिः ।
न स्यात् कारणतायां वा कुत एकान्ततो गतिः ॥ ३९५ ॥

धूमज्ञानादग्निज्ञानोत्पादे'ऽनग्निजन्यो धूमः स्यात्' । अग्निप्रतिभासस्य प्रागविद्यमानत्वात् विपर्ययः स्यात् । 'तत्' तस्मा'त्कार्यात् कारणे गतिर्न स्यात्' । अग्निज्ञानं प्रति धूमज्ञानस्य 'कारणतायां वा' कारणात् कार्य[1052] 'एकान्त[1053] तो'ऽसंदिग्धा 'कुतो गति'रिति (३९५)

अत्राह (।)

....2.396 तत्रापि धूमाभासा धीः प्रबोधपटुवासनाम् ।
गमयेदग्निनिर्भासान्धियमेव न पावकम् ॥३९६ ॥

'तत्र' धूमादग्न्यनुमा'नेपि धूमाभासा धीर'ग्निवासनाप्रतिबद्धा 'एकसामगग्रय-' धीनतया-'ऽग्निनिर्भासान्धियमेव' धूमज्ञानादेव 'प्रबोधेन पटुज'ननोन्मुखा 'वासना' शक्तिर्यस्यास्ता-'ङ्गमयेत् । न पा[1054] वकं बाह्यरूपं' सर्व्वदाऽदर्शनात् । (३९६)

अग्निवासनाधूमज्ञानयोर्हेतुफलतामाख्यातुमाह (।)

....2.397 तद्योग्यवासनागर्भ एव धूमावभासिनीम् ।
व्यनक्ति चित्तसन्तानो धियं धूमोग्नितस्ततः ॥ ३९७ ॥

'त'स्याग्निप्रतिभासस्य 'योग्या' जननसमर्था 'वासनागर्भे' स्वभावभूता यस्य चित्तसन्तानस्य स 'चित्तसन्तानो धूमावभासिनीं धियं व्यनक्ति' उत्पादयति(।) 'त[1055] तोऽग्नित' एव 'धूमो' भवतीति न कार्यकारणताविपर्ययः । न च कारणात्कार्यानुमानमग्निवासनाप्रभवत्वात् धूमाग्निज्ञानयोः । धूमज्ञानात् प्रबुद्धाग्निवासनाद्वारेणाग्निज्ञानानुमितिरेकसामग्रयधीना । (३९७)

### (ख. ज्ञानद्वयरूपतासिद्धि)

a. एवन्तर्हि विज्ञाननय एव सर्व्वव्यवस्था नमविरोधात् कथमाचार्येण बहिरर्थापेक्षया ज्ञानद्विरूपतोक्तेत्याह (।)

[238/s]

---

[1049] ३ बुद्ध्योर्वस्तुत्वान्नावस्तुकं कार्यकारणत्वं ।

[1050] ४ यथा बीजादङ्कुरजन्मनि एवमेव बीजबुद्ध्यनन्तरमङ्कुरबुद्धिः ।

[1051] ५ न हि वस्तु केनचिद् गम्यते स्वयमात्मानं गमयति ज्ञानप्रतिभासस्यैव वेदनात् ।

[1052] १ अनुमातव्ये ।

[1053] २ नावश्यं कारणानि कार्यवन्ति स्युः ।

[1054] ३ येन लिङ्गबोधकाले धूमभासज्ञानस्यानग्निजन्यत्वं स्यात् ।

[1055] ४ बाह्यवादिनोपि तुल्यमेतद्येन वह्निना धूमो जनितः कथं तदनुमानं यश्च भावी तेनासौ न जनित इति भाव्यनुमीयते ।

....2.398 अस्त्येष विदुषां वादो बाह्यन्त्वाश्रित्य वर्ण्यते ।
द्वैरूप्यं सहसंवित्तिनियमात्तच्च सिध्यति ॥ ३९८ ॥

'अस्त्येष' सर्व्वव्यवस्थासु विज्ञप्तिमात्रताप्रतिपादको 'विदुषां' न्यायदर्शिनां 'यो गा' चा रा णां 'वादः' । सौ त्रा न्ति कै रिष्टं 'बाह्य'मर्थमा'श्रित्य' ज्ञानस्य द्वैरूप्यमा'चार्येण वर्ण्यते' । तच्च 'द्वैरूप्यं' सहसम्वेदन'नियमात्' सहोपलम्भनियमात् 'सिध्यति' । (३९८) भेदेपि सति तदभावात् ।

b. द्वैरूप्यसिद्धावुपपत्त्यन्तरं वक्तुमाह (।)

....2.399 ज्ञानमिन्द्रियभेदेन पटुमन्दाविलादिकाम् ।
प्रतिभासभिदामर्थे विभ्रदेकत्र दृश्यते ॥ ३९९ ॥

इन्द्रियस्य 'भेदेन' प्रसादोपघातादिना विशेषेण पुरु'षार्थे ज्ञानं पटुमन्दा'विलादिका- 'प्रतिभासभिदां विभ्रत्' दधत् 'दृश्यते' । (३९९)

....2.400 अर्थस्याभिन्नरूपत्वादेकरूपं भवेन्मनः ।
सर्वं तदर्थमर्थाचेत् तस्य नास्ति तदाभता ॥ ४०० ॥

'तस्य' ज्ञानस्यार्था'चेन्नास्ति तदाभताऽ'[1056] र्थाकारता तदा'र्थस्याभिन्नरूप[1057] त्वात् । तदर्थ' तद्विषयं 'सर्व्वं मनो'वेदन'मेकरूपम्भवेत्' । न पटुमन्दाविलतादिभिन्नं ज्ञानस्य स्वगताकारभेदानभ्युपगमात् । अर्थस्यैकरूपत्वात् प्रतिभास[1058] भेदविरोधात् । अस्ति [46b/MA] चायं तस्मादर्थरूपताऽनुभवरूपता चेति द्वैरूप्यसिद्धिः । (४००)

नन्वर्थरूपतायामप्यर्थस्यैकरूपत्वात् तत्सरूपं ज्ञानमेकाकारं स्यात् । न प्रसन्नाविलादिरूपमित्याह (।)

....2.401 अर्थाश्रयेणोद्भवतस्तद्रूपमनुकुर्व्वतः ।
तस्य केनचिदंशेन परतोपि भिदा भवेत् ॥ ४०१ ॥

'अर्थ'स्य सरूपस्या'श्रयेणोद्भवतस्तस्य' ज्ञानस्य 'तद्रूपम'र्थाकार'मनुकुर्व्वतः केनचिदंशेना- 'कारेण पटुमन्दत्वादिना 'परतो' वासनादेरपि कारणाद्[1059] 'भिदा भवेत्' । (४०१)
[239/s]

....2.402 तथा ह्याश्रित्य पितरं तद्रूपो हि सुतः पितुः ।
भेदं केनचिदंशेन कुतश्चिदवलम्बते ॥ ४०२ ॥

'तथा हि पितरमाश्रित्य तद्रूपः' पित्राकारोपि 'सुत' उत्पन्नः 'केनचिदंशेनाकारेण कुतश्चित्' कर्म्मादेर्हेतोः 'पितुः' शकासात् (? सकाशात्) 'भेदम'न्यादृशत्व'मवलम्वते पि'तापुत्रयोः सर्व्वथा साम्याभावात् । (४०२)

C. द्वैरूप्यसिद्धावुपपत्त्यन्तरमाह (।)

....2.403 मयूरचन्द्रकाकारं नीललोहितभास्वरम् ।
सम्पश्यन्ति प्रदीपादेर्म्मण्डलं मन्दचक्षुषः ॥ ४०३ ॥

[1056] १ निराकारत्वात् ।
[1057] २ एकरूप एवार्थः साकारः ।
[1058] ३ एकस्मिन्नर्थे नानाकारः ।
[1059] ४ यस्मिन् सति यत्स्यात् येन विना न भवति तदान्येषु सत्स्वपि तत्तस्य कारणं ।

'मयूरचन्द्रकाकारमन्तरान्तरा नीललोहितभास्वरं दीप्तं प्रदीपादेर्मण्डलमविद्य-' मानमेव 'मन्दचक्षुषः[1060][1061][1062] संपश्यन्ति' । दीपस्य तादृशस्वरूपाभावात् । 'ज्ञानस्यानु-' भवात्मनः स आकार इति द्वैरूप्यसिद्धिः । (४०३)

अथ तादृशं वस्त्वेवोत्पन्नं दृश्यत इति न ज्ञानाकार इत्याह (।)

....2.404 तस्य तद्वाह्यरूपत्वे का प्रसन्नेक्षणेऽक्षमा ।
भूतं पश्यँश्च तद्दर्शी कथञ्चोपहतेन्द्रियः ॥ ४०४ ॥

....2.405 शोधितं तिमिरेणास्य व्यक्तं चक्षुरतीन्द्रियम् ।
पश्यतोऽन्याक्षदृश्येर्थे तदव्यक्तं कथं पुनः ॥ ४०५ ॥

'तस्य' मण्डलस्य 'तद्वाह्यरूपत्वे'ऽभ्युपगम्यमाने 'प्रसन्नेक्षणे' द्रष्टरि 'काऽक्षमा द्वेषो' येनास्मै नात्मानमुपदर्शयेत् । यद्वस्तुपहतेन्द्रियेण दृश्यते । तदनुपहतेन्द्रियेण सुतरां दृश्यते । 'भूतं' सत्यं 'च पश्यन् तद्दर्शी' मण्डलदर्शी 'कथमुपहतेन्द्रियैः' (४०४) 'अपरैरदृश्यं' मण्डलं 'पश्य'तोऽस्य मन्दचक्षुष्ट्वेन नष्टस्य 'तिमिरेण व्यक्तं चक्षुः शोधित'मित्युपहसति । किन्तु तैमिरिकस्यातीन्द्रियार्थदर्शनक्षमं तच्चक्षुरन्यस्यातैमिरिकस्याक्षदृश्येऽर्थे प्रदीपे 'कथं पुनरव्यक्तम'स्फुटं यदतीन्द्रियं पश्यति तत् सर्वं दृश्यं सुतरां पश्यति । (४०५)

किञ्च (।)

....2.406 आलोकाक्षमनस्कारादन्यस्यैकस्य गम्यते ।
शक्तिर्हेतुस्ततो नान्योऽहेतुश्च विषयः कथम् ॥ ४०६ ॥

[240/s]

'आलोकाक्षमनस्कारादन्यस्य दीप[1063] स्य एकस्य' मण्डलज्ञानजनने 'शक्तिर्गम्यते' तन्मात्रभावेन भावात् । ततो दीपादन्यो मण्डलो न हेतुरहेतुश्चासौ मण्डलज्ञानस्य 'कथं विषयो'तिप्रसङ्गात् । (४०६)

...2.407a स एव यदि धीहेतुः किम्प्रदीपमपेक्षते ।

'स' मण्डल 'एव' मण्डलग्राहिण्या 'धियो हेतु'र्न दीपो 'यदी'ष्यते तदा मण्डलं 'किं' कस्मात् 'प्रदीपमपेक्षते' न ह्यहेतोरपेक्षाऽतिप्रसङ्गात् ।

दीपो मण्डलश्च मण्डलबुद्धिहेतुरित्याह (।)

...2.407b दीपमात्रेण धीभावादुभयन्नापि कारणम् ॥ ४०७ ॥

'उभयं न कारणं दीपमात्रेण' मण्डलधियो 'भावात्' ।[1064] (४०७)

....2.408 दूरासन्नादिभेदेन व्यक्ताव्यक्तं न युज्यते ।
तत्स्यादालोकभेदाच्चेत्तत्पिधानापिधानयोः ॥ ४०८ ॥

---

[1060] 1a चत्तगताः ।
Placement of note uncertain; marked with a question mark in the edition (see encoding description for details)

[1061] 1b रूपेण ।
Placement of note uncertain; marked with a question mark in the edition (see encoding description for details)

[1062] १ विप्लुताक्षः ।

[1063] १ एकमेष्टव्यं वस्तुतो भिन्नस्याभेदे इष्यमाणे । मरीचिषु जलवत् ।

[1064] २ बाह्यमभ्युपेत्य द्वैरूप्यमुक्त्वाधुना बाह्याभावमाह ।

यदि चार्थ एव साकारो ग्राह्यो ज्ञानन्त्वनाकारं तदार्थस्य ‘दूरासन्नादिना भेदेन विशेषेण व्यक्ताव्यक्तं न युज्यते’ एकात्मनः पदार्थस्य स्वरूपेण दृश्यमानत्वात् । दूरासन्नस्थाभ्यां समानः प्रतीयेत ।[1065] ज्ञानस्वगताकारभेदानभ्युपगमात् । व्यवधानाव्यवधानयोरा‘लोक’स्य मान्द्या-मान्द्य‘भेदात् । तद्’ व्यक्ताव्यक्तं वस्तु ‘स्यादि’ति चेत् (।) दूरस्थितौ[1066] तस्यालोकस्य ‘पिधानमपिधा’नञ्चाऽभ्युपगन्तव्यं तयो[47a/MA] ‘स्तुल्ययोः’ (।) (४०८)

....2.409 तुल्या दृष्टिरदृष्टिर्वा सूक्ष्मोंशस्तस्य कश्चन ।
आलोकेन च मन्देन दृश्यतेतो भिदा यदि ॥ ४०९ ॥

सर्व्वस्य प्रतिपत्तु‘र्दृष्टिरदृष्टि’र्व्वा ‘तुल्या’र्थस्य स्यात् । [1067]दूरस्थस्य रजोनीहारादिभिरुपहतत्वात् ‘मन्देनालोकेन तस्य’ दृश्यार्थस्य ‘सूक्ष्मोऽशो’ऽवयवः ‘कश्चन’ [241/s] न दृश्यतेऽतः । सन्निकृष्टाद् व्यक्तं दृश्यमानादर्थादव्यक्तत्वेन ‘भिदा यद्युच्यते’ । तदापि द्वयी कल्पना । (४०९)

योसौ स्थवीयान् दृश्यते स एकोऽनेको वा ।

....2.410 एकत्वेर्थस्य बाह्यस्य दृश्यादृश्यभिदा कुतः ॥
अनेकत्वेऽणुशो भिन्ने दृश्यादृश्यभिदा कुतः ॥ ४१० ॥

तत्रै‘कत्वेऽर्थस्य बाह्यस्या’भ्युपगम्यमाने ‘दृश्यादृश्यभिदा कुतः’ शङ्किता(।) एवं दृश्यमदृश्य-मेव वा स्यादेकान्तेन । अनेकत्वे दृश्यस्यार्थस्याभ्युपगम्यमानेऽणुशो भिन्नेऽस्मिन् दृश्यादृश्यभिदा कुतः । न ह्यणुष्वपि स्थूलसूक्ष्मभेदः । येन किञ्चिदुपलभ्येत किञ्चिन्नेति विभागः । (४१०)

....2.411 मान्द्यपाटवभेदेन भासो बुद्धिभिदा यदि ।
भिन्नेऽन्यस्मिन्नभिन्नस्य कुतो भेदेन भासनम् ॥ ४११ ॥

अथैकरूपेप्यर्थे ‘भास’ आलोकस्य ‘मान्द्यपाटवभेदेन’ स्पष्टास्पष्टतया ‘भेदो बुद्धेर्यदी’ष्यते । तदाप्य‘न्यस्मिन्ना’लोके पटुमन्दतया ‘भिन्नेऽभिन्नस्या’र्थस्य स्वरूपेण दृश्यमानस्य ‘कुतो भेदेन’ स्पष्टास्पष्टतया ‘भासनं’ युक्तं । (४११)

किञ्च (।)

....2.412 मन्दन्तदपि तेजः किमावृत्तेरिह सा न किम् ।
तनुत्वन्तेजसोप्येतदस्त्यन्यत्राप्यतानवम् ॥ ४१२ ॥

व्यवहितवस्त्वन्तरालवर्त्ति ‘तेजो मन्दं किं’ कस्माद्धेतो रजोनीहारादिभिस्तद्देशवर्त्तिभिरा-‘वृत्ते’रालोको मन्द इति चेत् । इह सन्निहितवस्त्वन्तरालवर्त्तिन्यालोके ‘सा’ रजोनीहारादिभिरावृत्तिः ‘किन्न’ भवति । ‘तनुत्वा’दावारकस्य नीहारादेर्न्नावृत्तिश्चेत् । ‘तत्तनुत्वं तेजसोपि’ सन्निहितवस्त्वन्तरालवर्त्तिनो‘ऽस्तीति’ सन्निहितञ्च वस्तु न स्फुटं प्रतीयते तथा‘ऽन्यत्र’ दूरस्थं वस्तु स्फुटं प्रतीयेत् । दूरस्थे वस्तुन्यावारकालोकयोः समानमतानवं, समीपस्थे च समं तानवमिति न स्यात् प्रतीतिभेदः । (४१२)

किञ्च (।)

....2.413 अत्यासन्ने च सुव्यक्तं तेजस्तत्स्यादतिस्फुटम् ।
तत्राप्यदृष्टमाश्रित्य भवेद्रूपान्तरं यदि ॥ ४१३ ॥

---

1065 ३ एकस्य नानात्वविरोधात् ।

1066 ४ अत्र द्वौ विकल्पौ ।

1067 ५ साव्यक्ताव्यक्तत्वं ।

लोचनस्या'त्यासन्ने' शलाकादौ 'सुव्यक्तं तेज' आवारकस्य तनुत्वादिति तदत्यासन्नं शलाकादिक'मतिस्फुटं स्यात्' । न च मनागव्यवहितमिवात्यासन्नं वस्तु स्फुट[242/s] मीक्ष्यते । 'तत्र' दूरात्यासत्तिभेदेन व्यक्ताव्यक्तदर्शने'प्यदृष्टं' धर्माधर्म'माश्रि'त्यापेक्ष्य 'रूपान्तरं' व्यक्ताव्यक्तं जायत इति यदुच्यते (। ४१३)

....2.414 अन्योन्यावरणात्तेषां स्यात्तेजोविहतिस्ततः ।
तत्रैकमेव दृश्येत तस्यानावरणे सकृत् ॥ ४१४ ॥

तदा 'तेषां' व्यक्ताव्यक्तानां रूपाणा'मन्योन्य'स्या'वरणात्' कदाचित्कस्यचिदुपलम्भो भवतीति वक्तव्यं । 'तत' एकोपलम्भकालेऽपरोपलम्भहेतो'स्तेजसोविहति'रावृतिरिति च 'स्यात्' । अन्यथा नावृत्ते तस्मिन्नपरस्याप्युपलब्धिः स्यादवैकल्यात्सामग्र्याः । 'तत्रा-'परोपलम्भहेतोरालोकस्यावरणे सति 'एकमेव' व्यक्तमव्यक्तस्वरूपं दूरासन्नादिदेशस्थितैः प्रतिपत्तृभिः सर्व्वैर्दृश्येत । न त्वेकेन व्यक्तमितरेण चाव्यक्तमिति स्यात् । 'तस्या'दृष्टोत्पन्नरूपस्य परस्परमनावरणे तेजसश्चा'नावरणे सकृत्' (। ४१४)

....2.415 पश्येत् स्फुटास्फुटं रूपमेकोऽदृष्टेन वारणे ।
अर्थानर्थौ न येन स्तस्तददृष्टं करोति किम् ॥ ४१५ ॥

[47b/MA]

'स्फुटास्फुटं रूपं पश्येदे'कः[1068] प्रतिपत्ता । दृश्यरूपद्व[1069] यस्य दर्शनहेतोश्चालोकस्यानावरणाददृष्टेन द्वितीयस्य रूपस्य । वरणे व्यक्तमव्यक्तमेव वा रूपमेकं दृश्यत इति[1070] चेत् । 'येन' द्वितीयरूपावरणेन कृतेन पुंसो'ऽर्थानर्थाव'दृष्टकार्यौ 'न स्तः' सम्भवत'स्तदावरणमदृष्टं' कर्त्तृ 'किं' कस्मात् 'करोति' शुभाशुभलक्षणं ह्यदृष्टमर्थानर्थफलं(।) यत्पुनरनुभवस्वभावं तत् दृष्टफलमेव भवति (। ४१५)

यस्मात् सर्व्वमनन्तरोक्तमसंगतं ।

....2.416 तस्मात् संविद् यथाहेतु जायमानार्थसंश्रयात् ।
प्रतिभासभिदां धत्ते शेषाः कुमति-दुर्न्नयाः ॥ ४१६ ॥

'तस्मादर्थसंश्रया[1071] ज्जायमाना संवित्' बुद्धिर्यथाहेतु वासनाप्रबोधहेत्वनतिक्रमेण 'प्रतिभास'स्याकारस्य व्यक्ताव्यक्तादे'र्भिदां धत्ते' विभर्त्तीति[1072] न्याय्यं । तदितरे पुनरालोकभेदोपन्यासाद्याः 'शेषाः कुमतिर्दुर्नयाः' परवादिनां कुमतीनां दुर्व्विमर्शाः[1073] (। ४१६)

[243/s]

किञ्च(।) अनाकारेण ज्ञानेनार्थःक्षणि[1074] कोऽक्षणिको वा व्यज्येत(।) तत्र(।)

....2.417 ज्ञानशब्दप्रदीपानां प्रत्यक्षस्येतरस्य वा ।
जनकत्वेन पूर्वेषां क्षणिकानां विनाशतः ॥ ४१७ ॥

---

1068 १ एकैको दूरासन्नस्थः सर्व्वः ।

1069 २ युगपत् स्फुटानि भवन्ति रूपाणि ॥

1070 ३ सौमनस्योत्पादनेनानुग्राहकं धर्मी दर्शयति । दुःखोत्पादनेने( ?नो)पपातकमावृणोति विपर्य्ययादधर्मः ।

1071 ४ अभ्युपगमेप्यर्थस्य ।

1072 ५ द्वैरूप्यं

1073 ६ अर्थव्यक्त्यसंभवन्दर्शयन् बुद्धेर्द्वैरूप्यमाह ।

1074 १ नित्यो दीपः कस्यचित् । शब्दो नित्यो वैयाकरणादेः बुद्धिर्नित्या सांख्यस्य ।

'क्षणिकानां ज्ञानशब्दप्रदीपादीनां' स्वविषयस्य 'प्र[1075] त्यक्ष'स्याप्रत्यक्षस्य 'वा' ज्ञानस्य 'जनकत्वेन' हे[1076] तूनां 'पू[1077] र्व्वेषां' ज्ञानकाले 'विनाशतः' (४१७)

...2.418a व्यक्तिः कुतोऽसतां ज्ञानाद्;

'असतां ज्ञानात् कुतो व्यक्तिः' । यदाऽर्थस्तदा न ज्ञानं यदा ज्ञानं 'तदा नार्थ इति' कुतो व्य[1078] ङ्ग्यव्यञ्जकभावस्तयोः । अथ शब्दादयो ज्ञानेन सह द्वितीयं स्वोपादेयक्षणं जनयन्ति स एव तेन ज्ञानेन व्यज्यते नेतरदित्याह (।)

...2.418b अन्यस्यानुपकारिणः ।
व्यक्तौ व्यज्येत सर्व्वोर्थस्तद्धेतोर्नियमो यदि ॥ ४१८ ॥

स्वकारणाद'न्यस्य' सहोत्पन्नस्या'नुपकारिणो व्यक्ति'विवक्षायां सर्व्वोऽर्थः समानकालेन ज्ञानेन 'व्यज्य'तामनुपकारकत्वाविशेषात् । 'तस्मा'त्सहोत्पादकात् 'हेतोर'नुपकारकत्वविशेषेष्वपि सहोत्पन्न एवार्थो 'ज्ञानेन' व्यज्यत इति 'नियमो' यदि कल्प्यते(४१८)

....2.419 नैषापि कल्पना ज्ञाने ज्ञानन्त्वर्थावभासतः ।
तं व्यनक्तीतिं कथ्येत तदभावेपि तत्कृतम् ॥ ४१९ ॥

तदैषापि 'कल्पना न' युक्ता ज्ञाने व्यञ्जकत्वस्य स[1079] होत्पन्नेन्द्रियादिव्यञ्जकत्वप्रसङ्गात् । अस्माकं मते तु साकारं तेनार्थेन कृतं 'ज्ञानमिति' ज्ञानस्य काले 'तस्यार्थ'स्या'भावे'प्यर्था-'वभासतो'र्थाकारात्संवेद्यमानात् 'तमर्थं व्यनक्तीति कथ्यते'ऽन्यस्यार्थव्यक्तिप्रकारस्यायोगात् (। ४१९)

सहोत्पन्नस्यापि तर्हि स्वाकारज्ञानेन व्यक्तिः स्यादित्याह (।)

....2.420 नाकारयति चान्योर्थोऽनुपकारात् सहोदितः ।
व्यक्तोनाकारयञ्ज्ञानं स्वाकारेण कथं भवेत् ॥ ४२० ॥

कारणादन्यस्या'न्यश्चार्थः सहो'त्पन्नो ज्ञानं 'नाकारयति स्वाकारेण' विशेषयति 'अनुपकारात्' । न ह्यनुपकार(का)कारेण विशिष्यतेऽतिप्रसङ्गात् । यश्चार्थो 'ज्ञानं नाकारयति स कथं व्यक्तो भवेत्' । (४२०)

[244/s]

## ग. अक्षणिकस्य व्यक्तिरसम्भवा

अक्षणिकस्याप्यर्थस्य व्यक्तिं निषेद्धुमाह (।)

....2.421 वज्रोपलादिरप्यर्थः स्थिरः सोन्यानपेक्षणात् ।
सकृत् सर्वस्य जनयेज्ज्ञानानि जगतः समम् ॥ ४२१ ॥

यो 'वज्रोपलादिः' स्थिरो'ऽर्थः सोऽपि' ज्ञानोत्पादनस्वभावत्वे'नान्यस्य' सहकारिणोऽनुपकारकस्या'नपेक्षणात् सकृत्सर्व्वस्य जगतः' स्वग्राहकाणि 'ज्ञाना'नि 'समम'ेककालं 'जनयेत्' । (४२१)

न चैतदस्ति (।)

[1075] २ यदा स्वरूपानुकारि ज्ञानमव्यवहितं विकल्पज्ञानजनने ।
[1076] ३ ज्ञानादीनां ।
[1077] ४ नाकारणं विषयः ।
[1078] ५ ज्ञानस्यैव विषयाकारः सिद्धः ।
[1079] ६ इन्द्रियेणापि ज्ञानहेतुना यज्जनितमिन्द्रियन्तद्विषयः स्यात् ।

....2.422 क्रमाद् भवन्ति तान्यस्य सहकार्युपकार्यतः ।
आहुः प्रतिक्षणं भेदं स दोषोऽत्रापि पूर्ववत् ॥ ४२२ ॥

[48a/MA]

क्रमेणोत्पादात् 'क्रमाद्' भवन्ति जायमानानि 'तानि' वज्रादिज्ञानान्यस्य वज्रोपलादेः । 'सहकारि'णामुपकारात् स्वभावान्तरलक्षणात् 'प्रतिक्षणं भेद'[1080] मन्यस्वभावता[1081]'माहुः', यथा च 'पू[1082] र्व्ववत्' शब्दादिष्वि'वात्र' वज्रादिष्वपि क्षणिकेषु विज्ञानात् पूर्व्वकालभाविषु 'सो'ऽव्यक्ति'दोष'प्रसङ्गस्तदवस्थः । (४२२)

## (३) a. स्वसंवेदनचिन्ता

### क. बुद्धिरर्थाकारा

पुनर्बुद्धेरर्थाकारसिद्ध्यर्थमाह (।)

....2.423 संवेदनस्य तादात्म्ये न विवादोस्ति कस्यचित् ।
तस्यार्थरूपताऽसिद्धा सापि सिध्यते संस्मृतेः ॥ ४२३ ॥

'सम्वेद[1083] नस्य तादात्म्ये'ऽनुभवरूपत्वे 'कस्यचि'द्विदुषो 'वा[1084] दो नास्ति । तस्य' संवेदनस्या'र्थरूपता' विवादाद'सिद्धा'[1085] 'साऽर्था'कारता'पि संस्मृतेर'र्थाभासानुभवस्य सम्य[1086] क् स्मरणात् 'सिध्य[1087] ति' । (४२३)

[245/s]

....2.424 भेदेनाननुभूतेस्मिन्नविभक्ते स्वगोचरैः ।
एवमेतन्न खल्वेवमिति सा स्यान्न भेदिनि ॥ ४२४ ॥

'अस्मिन्न'र्थसंवेदनेंन 'भेदेनानुभूते' स्व स्य 'गोचरैरर्थैः' स्वाकारसमर्पणद्वारेणा'विभक्ते' परस्परतो भेदेन व्यवस्थापिते 'एतज्ज्ञा'नमेवं घटग्रा[1088] हकं । 'न खल्वेवं नैव' घटग्राहक'मिति । सा' सम्वेदनस्मृति'र्भेदिनी' विभागवती 'न स्यात्' ज्ञानेन सह (। ४२४)

....2.425 न चानुभवमात्रेण कश्चिद् भेदो विवेचकः ।
विवेकिनी न चास्पष्टभेदे धीर्यमलादिवत् ॥ ४२५ ॥

'न चानुभवमात्रेणा'वान्तरभिन्नेन प्रतिज्ञानं 'कश्चिद् भेदो' विद्यमानोपि परस्परं 'विवेचको' भेदव्यवस्थापनहेतुः । तथाविधा'ऽस्पष्टे भेदे' सत्यपि 'धीः' स्मृतिरूपा 'विवेकिनी' न भवति । किन्त्वे[1089] कबोधाध्यवसायिनी प्रत्यभिज्ञैव स्या'द्यमलादि[1090] वद्य-' मलयोरर्था-

---

[1080] १ कारकाधारकत्वेन ।

[1081] २ क्षणिकत्वं ।

[1082] ३ विनाशादसतां कुतो ज्ञानाद् व्यक्तिरिति ग्राहिकया ।

[1083] ४ यस्माद्यानुभवोत्तरकालं विषय इव ज्ञाने स्मृतिरुत्पद्यते, तस्मादस्ति द्विरूपता ज्ञानस्येत्यादि व्याचष्टे ॥

[1084] ५ ज्ञानं न ज्ञानरूपमितिवत् ।

[1085] ६ विषयज्ञानतज्ज्ञानेत्यादौ एकत्र ज्ञाने विषयाकारोल्लेखेन द्वैरूप्यमुक्तमत्र ।

[1086] ७ यथा परस्परविलक्षणेषु रूपादिष्वनुभूतेष्वन्योन्यविवेकेन स्मृतिः स्यात्तथा ज्ञानेपि स्मृतिरुत्पद्यते तदस्ति द्वैरूप्यमर्थवेदनम्विनार्थस्मृतेरयोगादस्ति च सात्र ।

[1087] ८ कुत एतद्यस्मात् ।

[1088] १ स्वसत्ताकाले

न्तरभेदसद्भावेप्येको दृश्यमानो नापरस्माद् भेदेनावसीयते किन्त्वेकत्वेनैव प्रत्यभिज्ञायते । (४२५)

तस्मादर्थाकारानुभवाकारतया बुद्धिर्द्विरूपैव ॥

....2.426 द्वैरूप्यसाधनेनापि प्रायः सिद्धं स्ववेदनम् ।
स्वरूपभूताभासस्य तदा संवेदनेक्षणात् ॥ ४२६ ॥

ज्ञानानां 'द्वैरूप्यसाधनेनापि [1091] प्रायो' बाहुल्येन[1092] 'स्ववे[1093] द'नं ज्ञानं 'सिद्धं । तथा' ज्ञानस्य 'स्वरूपभूतस्याभासस्या'कारस्य 'तदा' द्विरूपज्ञानोत्पत्तिकाले 'संवेदनादनु'भूतेरीक्षणात् (। ४२६)

## ख. अर्थानुभवाकारा

ज्ञानान्तरेण सरूपेण ज्ञानमर्थवद्वेद्यते इति चेत् । तदा (।)

....2.427 धियाऽतद्रूपया ज्ञाने निरुद्धेऽनुभवः कथम् ॥
स्वञ्च रूपं न सा वेत्तीत्युत्सन्नोनुभवोऽखिलः ॥ ४२७ ॥

'धि[1094]याऽतद्रूपया'ऽग्राह्यज्ञानस्वरूपया 'निरुद्धे' ग्राह्ये 'ज्ञाने कथमनुभवः । स्वकाले'[246/s] ज्ञानं न वे[1095] द्यते ग्राहककाले ग्राह्यस्यैवाभाव इति कथं बुद्धिवेदनं । स्वञ्च रूपं त्वन्मते सा बुद्धिर्न 'वेत्तीत्यनुभवोऽखिलो'ऽर्थस्य ज्ञानस्य चो'त्सन्नः' स्यात् । ज्ञानप्रकाशो ह्यर्थप्रकाशः । स च स्वपरकालयोर्नास्तीति प्रकाशो न स्यात् सर्व्वस्य । (४२७)

किञ्च (।)

....2.428 बहिर्मुखञ्च तज्ज्ञानं भात्यर्थप्रतिभासवत् ।
बुद्धेश्च ग्राहिका वित्तिर्न्नित्यमन्तर्मुखात्मनि ॥ ४२८ ॥

अस्यार्थस्य ग्राह्यस्य प्रतिभासवदाकारवत्तद् बाह्यग्राहकं ज्ञानं 'बहिर्मुखं' बाह्यतया प्रतिभाति यथा नीलादिज्ञानं । 'बुद्धेश्चात्मनि ग्राहिका' वित्ति[1096] 'र्न्नित्यं' सर्व्वकाल'मन्तर्मुखा'ऽबाह्यतया ग्राहकत्वेन प्रतिभाति । तदेतत् स्ववेदनतायामेवोपपन्नं । (४२८)-

--- यदि तु बुद्ध्यन्तरग्राहिका बुद्धिः स्यात्तदा नीलादिवत् स्मर्यमाणाऽतीतस्वबुद्धि[1097] वच्च ग्राहकाकारत्वाद् बहिष्ट्वेनावभासेत तथा स्ववेदनताऽभावे (।)

....2.429 यो यस्य विषयाभासस्तं वेत्ति न तदित्यपि ।
प्राप्तां का संविदन्यास्ति ताद्रूप्यादिति चेन्मतम् ॥ ४२९ ॥

---

[1089] २ सारूप्यादन्य इन्द्रियादिभेदात् ।

[1090] ३ सामग्रीभेदात् सुखादिभेदवद्विवेकेन स्मृतिः सेत्स्यतीत्यपि न । यतः सदार्था स्पष्टानुभवपूर्व्वा साकारा नैवं सुखादिरन्तः प्रीत्यादिरूपः ।

[1091] ४ यथापरस्परविलक्षणेषु रूपादिष्वनुभूतेष्वन्योन्यविवेकेन ।

[1092] ५ ग्राहिकया

[1093] ६ तच्च वेद्यत इत्यर्थादात्मवेदनं न साक्षात्प्रायः शब्दाः ।

[1094] ७ अनुत्तरेण द्वैरूप्ये विषयसारूप्यमात्मभूतं ज्ञानस्य सिद्धं ।

[1095] १ तुल्यकालयोर्न ग्राह्यग्राहकत्वं स्वसम्वेदनं नाभ्युपेतं ।

[1096] २ प्रत्यक्षविरुद्धत्वं स्ववेदनाभावस्याह एतेन ।

[1097] ३ या विषयग्राहिका पूर्व्वा ।

'यो विषयस्याभास' आकारो 'यस्य' ज्ञानस्य 'तं' स्वाकारार्पकं विषयं 'तदा'कारवत् ज्ञानं न 'वेत्तीति' प्राप्तं विषयस्वरूपस्यात्मनो वेदने हि विषयवेदनं तत्परोक्षतया अर्थोपि परोक्षः स्यात् । यतोऽर्थस्वरूपधीवेदनादन्या 'का संविदर्थ'स्यास्ति । 'ताद्रूप्याद्वि'षयसारूप्या[1098] दस्वसंवेदनादर्थस्य संविदि'ति चेन्मतं' । (४२९)

एवं सति (।)

....2.430 प्राप्तं संवेदनं सर्व्वसदृशानां परस्परम् ।
बुद्धिः सरूपा तद्विद्येत् नेदानीं वित् सरूपिका ॥ ४३० ॥

'सर्व्वे'षां यमलकादीनां 'सदृशानां परस्परं सम्वेदनं प्राप्तं' न सदृश इत्येवानुभवः 'सरूपा तद्विद'र्थस्य संवेदन'श्चेत्' । 'इदानीम'स्मिन्नभ्युपगमे 'सरूपेका' विन्न भवति । सारूप्यं वेदनलक्षणं न भवति । किन्त्वनुभवरूपता । सत्यपि सारूप्ये यमलकादीनामनुभवत्वात् । नापि सारूप्यवाहितानुभवमात्रं वेदनं, किन्तु स्वसंवेदनं [48b/MA] सारूप्यं । (४३०)
[247/s]

यदि सारूप्यवशाद्वेदनं तदा बुद्ध्यात्मनापि सारूप्याद्वेदनं स्यात् । तथा ग्राह्यग्राहकयोर्भेद एव प्राप्त इत्याह (।)

...2.431a स्वयं सोनुभवस्तस्या न स सारूप्यकारणः ।

'तस्या' बुद्धेः 'सोऽनुभवो'ऽपरोक्षत्वं स्वयं स्वरूपेण तथोत्पत्तेर्न 'सारूप्य[1099] कारणः' सोऽनुभवो बुद्धेः । एवं तर्हि बाह्येप्यर्थे बुद्धिसारूप्यं निष्फलमित्याह (।)

...2.431b क्रियाकर्म्मव्यवस्थायास्तल्लोके स्यान्निबन्धनम् ॥ ४३१ ॥

'तदर्थ'सारूप्यं 'क्रियाया' अर्थादनुभूतेः । 'कर्मणो' बाह्यस्य 'व्यवस्थाया निबन्धनं लोके' बहिरध्यवसायिनि स्यात् । (४३१)

न ह्यस्य सारूप्यमन्तरेणेयमस्य संवित्तिरिति शक्यं व्यवस्थापयितुं[1100] (॥)

....2.432 स्वभावभूततद्रूपसंविदारोपविप्लवात् ।
नीलादेरनुभूताख्या नानुभूतेः परात्मनः ॥ ४३२ ॥

यस्या बुद्धेः 'स्वभावभूतस्य' रूपस्य विषयाकारस्य 'संविदो' बहिरर्थेष्वा[1101] 'रोपः' स एव 'विप्लवो' भ्रान्त्युपनीतत्वात् तस्मा'न्नीलादे'र्व्वस्तुतोऽदृश्यमानस्याप्य'नुभूताख्या'ऽनुभवव्यवहारो लोकस्य 'न' पुनर्ज्ञाना'त्परात्मनो'र्थस्य साक्षाद'नुभूते'रर्थानुभवव्यवहारः । (४३२)

...2.433a धियो नीलादिरूपत्वे बाह्योर्थः किं प्रमाणकः ।

परमार्थतस्तु 'धियो' नीला'दिरूपत्वे' स्वसम्वेद्ये तदाकारार्प्पको 'बाह्योऽर्थः' स्वरूपेणादृश्यमानः 'किं प्रमाणकः' । न ह्याकारद्वयं वेद्यते येनैको बाह्यस्यापरो ज्ञानस्येति स्यात् ।

बाह्य एवाकारवान् धीस्तु निराकारेति प्रत्यक्षसिद्धोऽर्थः स्यादित्याह (।)

...2.433b धियोऽनीलादिरूपत्वे स तस्यानुभवः कथम् ॥ ४३३ ॥

---

[1098] ४ नैयायिकः न स्वरूपबोधं मन्यते ।

[1099] १ सारूप्यकृतः ।

[1100] २ यदि स्वानुभवात्मतयैव प्रकाशो नार्थानुभवात्मतया तदा सम्बन्धाभावादर्थानुभवव्यपदेशो न युक्त इत्याह(।)

[1101] ३ असतोपि ।

'धियोऽनीलादिरूपत्वे सो'ऽर्थाकाररहितो'नुभवस्तस्य' नीलस्य ग्राहक इति 'कथं' शक्यव्यवस्थापनः । (४३३)

....2.434 यदा संवेदनात्मत्वं न सारूप्यनिबन्धनम् ।
सिद्धं तत् स्वत एवास्य किमर्थेनोपनीयते ॥ ४३४ ॥

अनुभवमात्रात्मतया सर्व्वत्र ज्ञानेऽविशेषात् विशेषव्यवस्थानशक्तया ।
[248/s]

'यदा सम्वेदनात्मकत्व'मपरोक्षत्वं 'न सारूप्यनिबन्धनं तदा स्वत एव' प्रकाशात्मतयोत्पत्तेस्तत्संवेदनात्मत्वं 'सिद्धं' । ततश्चार्थेनास्य ज्ञानस्य 'किमुन्नीयते' येन तस्य तद्वेदनमित्युच्यते(।) न हि ज्ञानस्य स्वप्रकाशेऽर्थापेक्षा । न च स्वस्माद् व्यतिरिक्तं तेन वेद्यते तत्कथमर्थवेदनमनेनेत्युच्यते (। ४३४)
किञ्च (।)

....2.435 नच सर्वात्मना साम्यमज्ञानत्वप्रसङ्गतः ।
न च केनचिदंशेन सर्वं सर्वस्य वेदनम् ॥ ४३५ ॥

ज्ञानं 'सर्व्वात्मना' वा एकदेशेन वाऽर्थस्य सरूपं यत्तद्ग्राहकं स्यात् । तत्र न तावत्सर्व्वेण जडत्वादिना 'साम्यमज्ञानत्वप्रसङ्गतः । न च' जडयोर्ग्राह्यग्राहकभावः 'केनचिदंशेन' वस्तुत्वनीलत्वादीना 'सर्व्वं' ज्ञानं सर्व्वस्यार्थस्य संवेदनं स्यात् । 'सर्व्वं' वा नीलज्ञानं सर्व्वस्य[1102] नीलस्य 'वेदनं स्यात्' । (४३५)

....2.436 यथा नीलादिरूपत्वान्नीलाद्यनुभवो मतः ।
तथानुभवरूपत्वात्तस्याप्यनुभवो भवेत् ॥ ४३६ ॥

'यथा नीलादिरूपत्वात्' ज्ञानं 'नीलादी'नाम'नुभवो मतः' तथा किमनुभव'रूपत्वात्' तस्यानुभवस्यार्थविषयस्यापि पूर्व्वकस्योत्तरं ज्ञानम'नुभवो न[1103] भवेत्' । (४३६)

....2.437 नानुभूतोनुभव इत्यर्थवद् (हि) विनिश्चयः ।
तस्माददोष इति चेत् नार्थेप्यस्त्येष सर्वदा ॥ ४३७ ॥

'ना'[1104] नुभवेऽ'नुभूतोऽनुभव इत्यर्थवदर्थ' इव गृहीते 'विनिश्चयो' भवति । 'तस्मा-'दनुभवस्याप्यनुभवो ग्राह्यः कः स्यादित्यय'मदोष इति चेत्' ।[1105] न केवलमनुभवे'ऽर्थेऽप्येषो'[1106] नुभूतत्वनिश्चयः 'सर्व्वदा ना'स्ति । न हि धारावाहिन्यर्थज्ञानेऽर्थेषु प्रतिक्षणमनुभूतनिश्चयः[1107] । ततश्चार्थोपि नानुभूतः स्यात् । (४३७)

....2.438 कस्माद्वाऽनुभवे नास्ति सति सत्तानिबन्धने ।
अपि चेदं यदाभाति दृश्यमाने सितादिके ॥ ४३८ ॥

[249/s]

1102 १ भिन्नाकारस्य न वेदनमिति शङ्का स्यात् नीलाकारस्तु सर्व्वनीलानुकारीति सर्व्वग्रहः ।

1103 २ तादूप्यमभिव्यापित्वाद्विषाणित्वमिव गौर्नानुभवलक्षणः ।

1104 ३ न चेष्यते ।

1105 ४ तदुत्पत्तिसारूप्ययोः सतोरपीदं मयानुभूतमिति निश्चयोऽर्थानुभवः । नैवमनुभवविषयोऽनुभवः स्मृतिरेव तु स्यात् ।

1106 ५ परामर्शयोगी ।

1107 ६ पश्यत एवार्थं विषयान्तरव्याक्षेपान्नानुभूतनिश्चयः ।

....2.439 पुंसः सिताद्यभिव्यक्तिरूपं संवेदनं स्फुटम् ।
तत्किं सिताद्यभिव्यक्तेः पररूपमथात्मनः ॥ ४३९ ॥

'कस्माद्वाऽनुभवे'ऽनुभूतनिश्चयस्य 'सत्तानिबन्धने' सारूप्ये तदुत्पादे च 'सति नास्ति' सत्तानिश्चयः । अर्थेप्यनुभूतनिबन्धने सारूप्यतदुत्पत्ती एव ते तज्ज्ञानेपि समाने । 'अपि च' स्वसंवेदनानभ्युपगमे 'सितादिके [1108] दृश्यमाने, यदिदं[1109]' (४३८) 'सिताद्यभिव्यक्तिरूपमन्तः' प्रकाशमानं 'संवेदनं स्फुटं पुंसः' प्रतिपत्तु'राभाति । तत् किं सिताद्यभिव्यक्तेः' पररूप'मथात्म'भूतमिति विकल्पौ, सतस्तत्त्वान्यत्वाव्यतिक्रमात् । (४३९)[49a/MA]

....2.440 पररूपेऽप्रकाशायां व्यक्तौ व्यक्तं कथं सितम् ।
ज्ञानं व्यक्तिर्न सा व्यक्तेत्यव्यक्तमखिलं जगत् ॥ ४४० ॥

'पररूपे'ऽभ्युपगम्यमाने सम्वेदनं यत्प्रकाशते तन्न सितादिव्यक्तिरूपमित्य'प्रका-' शायां शुक्लादि'व्यक्तौ सितं कथं व्यक्तं । ज्ञानं' हि 'व्यक्तिर्न च सा व्यक्ता' सितादिके दृश्यमाने इष्यत 'इत्यव्यक्तमखिलं जग'त्प्राप्तं । सिताद्यभिव्यक्तिरेषितव्या । (४४०)

तथा हि (।)

...2.441a व्यक्तेर्व्यक्त्यन्तरव्यक्तावपि दोषप्रसङ्गतः ।

अर्थ'व्यक्तेर्व्यक्तिरा'पद्यमाना न व्यक्ता स्यात् । अथ व्यक्तिरेव न सिध्येत् । तस्याः स्वप्रकाशत्वेऽर्थव्यक्तिरपि तथास्तु । अथार्थव्यक्तिर्व्यक्तेर्व्यक्त्यन्तराद् उत्तरकालभाविवेदनाद् व्यक्तिरेवं तस्याश्चा[1110] न्यत इत्यनवस्था दुर्वारा ।

किञ्च (।)

...2.441b दृष्ट्या वाज्ञातसम्बन्धं विशिनष्टि तया कथं ॥ ४४१ ॥

'दृष्ट्या' धि याऽ[1111] सम्विदितया सहा'ज्ञातसम्बन्धमर्थं कथं विशिनष्टि' प्रतिपत्ता दृष्टोयमिति । (४४१)

कथमर्थो दृष्ट्याऽज्ञातसम्बन्ध इत्याह (।)

....2.442 यस्माद् द्वयोरेकगतौ न द्वितीयस्य दर्शनम् ।
द्वयोः संसृष्टयोर्दृष्टौ स्याद् दृष्टमिति निश्चयः ॥ ४४२ ॥

'यस्माद्' द्वयोरर्थज्ञानयोर्मध्ये 'एकस्य गतौ' दर्शनकाले 'न द्वितीयस्य दर्शनमस्ति' । तथा हि न पदार्थो दृश्यते न तदा बुद्धिरुपलभ्यते तदुपलम्भस्य भावित्वात् ।

[250/s]

यदा च बुद्धिरुपलभ्यते न तदाऽन्योऽतीतत्वात् । तस्माद् 'द्वयो'रर्थज्ञानयोः 'संसृष्टयोरे'कोपलम्भात् 'दृष्टौ' सत्यां 'दृष्टमिदमिति निश्चयः' ततोऽन्योपलब्धिः स्वोपलब्धिरूपेव 'स्यादे'तत् । (४४२)

...2.443a सरूपं दर्शनं यस्य दृश्यतेन्येन चेतसा ।
दृष्टाख्येति न चेत्;

---

[1108] १ विच्छिन्ने ।

[1109] २ तदैवावेदनात् ।

[1110] ३ विषयज्ञानस्यापि स्वयमव्यक्तेः ।

[1111] ४ तत्समकालं, आह

‘यस्यार्थस्य सरूपं’ समानाकारं ‘दर्शनं’ ज्ञान‘मन्येन चेतसा दृश्यते’ तत्रार्थे ‘दृष्टाख्या’ दृष्टव्यवहार ‘इति चेत्’ ।

अत्राह (।)

...2.443b सिद्धं सारूप्येऽस्य स्ववेदनम् ॥ ४४३ ॥

अस्य ज्ञानस्यार्थेन सह ‘सारूप्ये’ सिद्धे ‘स्वसंवेदनं’ ज्ञानं सिद्धं । तथा ह्यर्थाकारस्तावत् ज्ञानकाले परिस्फुटं वेद्यमानो ज्ञानस्यात्मा चेत् ज्ञानमप्यर्थाकारवदपरोक्षमेव स्वभावत इति नान्यवेद्यं । (४४३)

...2.444a अथात्मरूपं नो वेत्ति पररूपस्य वित् कथम् ।

‘अथ’ ज्ञानमात्मरूपं ‘न वेत्ति पररूपस्य’ बाह्यरूपस्य ‘वित्[1112] कथं’ । न ह्यर्थाकारज्ञानवेदनमन्तरेणार्थवेदनमित्युक्तं ।

सारूप्यमात्रेणार्थवित्तिर्भविष्यतीति चेत् (।)

...2.444b सारूप्याद् वेदनाख्या च प्रागेव प्रतिवर्णिता ॥ ४४४ ॥

‘सारूप्यादनु’भवात्मतारहिता‘द्वेदनाख्या’ वेदनव्यवहृतिश्च ‘प्रागेव’ ?? प्राप्तं संवेदनं सर्वसदृशानां परस्परमित्यनेन प्रतिवर्णिता ‘प्रत्युक्ता’ । (४४४)

किञ्च[1113] (।)

....2.445 दृष्टयोरेव सारूप्यग्रहोर्थश्च न दृष्टवान् ।
प्राक् कथं दर्शनेनास्य सारूप्यं सोध्यवस्यति ॥ ४४५ ॥

‘दृष्टयोरेव’ कयोश्चित् ‘सारूप्यग्रहो’ दृष्टो यथा यमलकयोः । न च कश्चिद् द्रष्टा ज्ञानात्[1114] प्रागर्थं दृष्टवान् । तत्कथन्दर्शनेन सहास्यादृष्टस्यार्थस्य स द्रष्टा ‘सारूप्यमध्यवस्यति’ निश्चिनोति । (४४५)

किञ्च (।)
[251/s]

....2.446 सारूप्यभपि नेच्छेद्यः तस्य नोभयदर्शनम् ।
तदार्थो ज्ञानमिति च ज्ञाते चेति गता कथा ॥ ४४६ ॥

‘सारूप्यमपि’[1115] शब्दात् स्वसम्वेद‘नं यो’ वादी ‘नेच्छेत् न तस्योभय’स्यार्थस्य ज्ञानस्य च ‘दर्शनं’ संगच्छते । सारूप्याभावेऽर्थवेदनाऽयोगात् । स्ववेदनाभावे च न ज्ञानसम्वेदनं । अन्येन तद्ग्रहस्य निषिद्धत्वात्[1116] । यदा चैवं ‘तदार्थो ज्ञानमिति’ भेदः । ‘ते च ज्ञाते चोति कथापि गतेति’ कृत्स्नं जगदन्धमूकं भवेत् । प्रतीतिनिबन्धनत्वादस्य व्यवहारस्य । (४४६)

....2.447 अथ स्वरूपं सा तर्हि स्वयमेव प्रकाशते ।
यत्तस्यामप्रकाशायामर्थः स्यादप्रकाशितः ॥ ४४७ ॥

‘अथ’ यदेतत्सिताद्यभिव्यक्तिरूपं स्फुटसम्वेदनमाभाति तद् बुद्धेः ‘स्वरूपं’ (।) साबुद्धि‘स्तर्हि स्वयमेवा’परोक्षतया ‘प्रकाशते यद्यस्मादस्यां’ बुद्धाव‘प्रकाशायां’ परोक्षाया-

[1112] १ वेदकमप्रत्यक्षोपलम्भात् ।
[1113] २ सारूप्यमेव नास्तीत्याह(।)
[1114] ३ प्रथमज्ञाने ।
[1115] १ अनाकारवादी वैभाष्यादिः । साकारवाद्यपि नैयायिकादिर्यः सम्वेदनं नेच्छति ।
[1116] २ ज्ञानान्तरेण स्वयमविदिते नान्यग्रहायोगात् ।

'मर्थोऽप्रकाशितः स्यात्' । प्रकाशते चार्थ इति बुद्धिरप्यपरोक्षस्वभावेति स्वसम्वेदनसिद्धिः । (४४७)

....2.448 एतेनानात्मवित्पक्षे सर्व्वार्थादर्शनेन ये ।
अप्रत्यक्षां धियं प्राहुस्तेपि निर्व्वर्णितोत्तराः ॥ ४४८ ॥

'अनात्मवित्पक्षे' स्वसंवेदनाभावे[1117] एतेनानन्तरमुपदर्शितेन 'सर्व्व'स्या'र्थ'स्या'दर्शनेन' दर्शनाभावप्रसङ्गेन 'ये' जै मि नी या 'अप्रत्यक्षां धिय'मर्थापत्तिगम्यामा'हुः तेपि निर्व्वर्ण्णितोत्तरा' दत्तोत्तरा बोद्धव्याः । तथा ह्यर्थदर्शनान्यथानुपपत्त्या बुद्धिर्व्यवस्थापनीया । अर्थदर्शनमेव तु बुद्धिपरोक्षतायामसङ्गतमिति न तदन्यथानुपपद्यमानं बृद्धिं कल्पयितुमलं । (४४८)
अपि च (।)

....2.449 आश्रयालम्बनाभ्यासभेदाद् भिन्नप्रवृत्तयः ।
सुखदुःखाभिलाषादिभेदा बुद्ध्य एव ताः ॥ ४४९ ॥

'आश्रयस्ये'न्द्रियस्या'लम्बन'स्य सुखादिवेदनीयस्या'भ्यास'स्य च यथा वृत्तस्य 'भेदा-'द्विशेषात् 'सुखदुःखभिलाषादि[1118]भेदा भिन्नप्रवृत्तयो' नानाकाराः सम्वि[252/s] [49b/MA]दितरूपा जायन्ते 'बुद्ध्य[1119] एव' च ता बोधस्वभावत्वात् । ज्ञानेनाभिन्नहेतुकत्वा[1120] च्च । (४४९)

....2.450 प्रत्यक्षास्तद्विविक्तश्च नान्यत् किञ्चिद् विभाव्यते ।
यत्तज्ज्ञानं । परोप्येतान् भुञ्जीतांन्येन विद्यदि ॥ ४५० ॥

ततः 'प्रत्यक्षाः' । न च सामान्येन वेदनमिति स्ववेदनतैव । 'न च ते'भ्यः सुखादिभ्यो 'विविक्तं' भिन्न'मन्यत् किञ्चिद्' बृद्धिस्वरूपं 'विभाव्यते' उपलभ्यते 'यत्तत्' प्रत्यक्षं 'ज्ञानं' स्यात् । कि'श्चान्येन' ज्ञानेनान्यस्य ज्ञानस्य 'वित्' वेदनं यदीष्यते तदा भोक्तृसन्तानवर्त्तिन 'एता'न् सुखादीन् 'परः' प्रतिपत्ताऽल[1121] भ्यमानो 'भुञ्जीत' सुखाद्युपभोगवान्भवेत् भोक्तृपुरुषवत् । (४५०)

....2.451 तज्जा तत्प्रतिभासा वा यदि धीर्वेत्ति नापरा ।
आलम्बमानस्यान्यस्याप्यस्त्यवश्यमिदं द्वयम् ॥ ४५१ ॥

'तस्मा'त्सुखादेर्जाता 'तत्प्रतिभासा' सुखादिप्रतिभासा 'वा' तान् सुखादीन् 'वेत्ति' भोक्तृत्वेन 'नाप'रायाः काश्चिद् बु[1122] द्धिरिति यदीष्यते तदा भोक्तृसन्तानवर्त्तिनः सुखादीना-'लम्बमानस्यान्यस्य' पुरुषान्तरज्ञान'स्येदं' तज्जत्वं तत्प्रतिभासि[1123] त्वं 'द्वय'मालम्बनीयसुखाद्यपेक्षयाप्य'दश्यमस्ति' ततः सोपि भोक्ता स्यात् । (४५१)

...2.452a अथ नोत्पद्यते तस्मान्न च तत्प्रतिभासिनी ।
सा धोर्निर्विषया प्राप्ता;

---

1117 ३ यत्सर्व्वार्थादर्शनमुक्तं पूर्व्वं अर्थो ज्ञानमिति ते ।
1118 ४ द्वेषप्रत्यत्वादिरादिना ।
1119 १ सुखादिजातं प्रतिभासे ।
1120 २ पूर्व्वं बृद्धिरूपाः स्थापिताः ।
1121 ३ पाश्चात्यज्ञानं तदालम्बते न स्ववेदनं तदनुमातृसन्तानेप्यस्ति ।
1122 ४ तन्नान्यस्य भोगः ।
1123 ५ उत्पत्तिसारूप्याभ्यामालम्बनव्यवस्थानात् ।

'अथा'न्यस्य धीर्भोक्तृसुखादेः सकाशा'न्नोत्पद्यते नापि तत्प्रतिभासिनी'ष्य[1124] ते तदा 'सा धीर्निर्विषया प्राप्ता' । ग्राह्यस्य पररूपस्याभावेपि प्रकाशमाना स्वप्रकाशैव स्यात् ।

स्यादेतत् (।) भोक्तुः सुखं यद्यपि स्वरूपेण परबुद्ध्या न गृह्यते तत्सामान्यमात्रं तु गृह्यते इति भोक्तृत्वनिरालम्बनत्वयोरभाव इत्याह (।)

...2.452b सामान्यं च तदग्रहे ॥ ४५२ ॥

...2.453a न गृह्यत इति प्रोक्तं;

[253/s]

'तस्य' भोक्तृसुखविशेषस्या'ग्रहे' (४५२) तत्समवायि 'सामान्यं न गृह्यत इति प्रोक्तं' । अतत्समानता व्यक्ती तेन नित्योपलम्भनमि ?? त्यादिना ।

...2.453b न च तद्वस्तु किञ्चन ।
तस्मादर्थावभासोसौ नान्यस्तस्या धियस्ततः ॥ ४५३ ॥

न च तत्सामान्यं 'किञ्चन [1125] वस्तु' (।)यथा ह्युपगतस्यानुपलम्भबाधितत्वात् ।

'तस्माद'नन्तरोक्ताद् युक्तिकलापात् 'अर्थावभासोसौ' स्फुटं प्रकाशमान'स्तस्याः' परोक्षत्वेनेष्टाया 'धियो नान्यः' किन्तु तद्रूप एव (। ४५३)

....2.454 सिद्धे प्रत्यक्षभावात्मविदौ । गृह्णाति तत्पुनः ।
नाध्यक्षमिति चेदेष कुतो भेदः समार्थयोः ॥ ४५४ ॥

ततोऽर्थाभासज्ञानयोस्तादात्म्यात् 'प्रत्यक्षभावात्मविदौ' प्रत्यक्षत्वस्वसं'वित्ती सिद्धे' । ज्ञानस्यापरोक्षतया परनिरपेक्षप्रकाशत्वाच्च ।

स्यादेतत् (।) स्वसन्तानवर्त्तिनः सुखादीनध्य'क्षमालम्बते' ततः प्रीतिपरितापादियोगाद् भोक्तृता (।)

अन्यस्य 'पुन'स्तान् सुखादीन् 'नाध्यक्षं[1126] गृह्णाति' किन्तु बुद्धिमात्रं[1127] ततः प्रीतिपरितापाद्यभावात् न भोक्तृत्त्वमिति चेत् । 'समार्थयो'रेकविषययोः स्वपरसन्तानवर्त्तिनोर्ज्ञानयोरेष प्रत्यक्षाप्रत्यक्षलक्षणः 'कुतो[1128] भेदः'। सुखस्वरूपविषयत्वात् द्वयमपि प्रत्यक्षमप्रत्यक्षम्वा स्यात् । (४५४)

....2.455 अदृष्टैकार्थयोगादेः सम्विदो नियमो यदि ।
सर्वथान्यो न गृह्णीयात्सम्विद्भेदोप्यपोदितः ॥ ४५५ ॥

'अदृष्टा'च्छुभाशुभादिलक्षणादे'कार्थ'समवायादेर्व्वा निमित्तात्स्वसन्तानवर्त्तिसुखग्राहिकाया- : 'सम्विदो नियमो'[1129] भोगरूपत्वावधारणं । तेनान्यस्य न भोक्तृतेति यदीष्यते तदाऽदृष्टेनैकार्थसमवायेन वा नियमितं सुखाद्य'न्यो न गृह्णीया'देवेत्यस्तु स्वरूपप्रतिभासे[1130] भोक्तृत्वस्याप्रतिषेधात् । न ह्यात्मसमवायितामात्रेण सुखादेर्भोगः किन्तर्ह्युपलम्भेन । स च

[1124] ६ सुखाद्यनालम्बनत्वात् ।
[1125] १ तदा व्यतिरेकाव्यतिरेकोभयरूपेणायोगः प्रागुक्त एव ।
[1126] २ अन्यस्य ।
[1127] ३ अनुमा ।
[1128] ४ अस्वेवेदने ।

परस्याप्यस्तीति भोक्ता स्यात् । एकस्य विषयस्य 'सम्विद्भेदो' ग्रहणभेदे'पि' व्यक्ताव्यक्ततया 'उदितो' निराकृतः । ततः स्वरूपप्रतिभासस्यैकप्रकारत्वात् । (४५५)
[254/s]

....2.456 येषाञ्च योगिनोन्यस्य प्रत्यक्षेण सुखादिकम् ।
विदन्ति तुल्यानुभवास्तद्वत्तेपि स्युरातुराः ॥ ४५६ ॥

'येषाञ्च'[1131] परेषां कारणादीनां 'योगिनोन्यस्य सुखादिकं प्रत्यक्षेण' योगबलोत्पन्नेन 'विदन्ती'ति मतं । तेषां मते परेण सुखिना दुःखिना च सह 'तुल्यानुभवा' योगिन इति 'तद्वत्' दुःखिपुरुषवत् योगिनो'प्यातुरा' दुःखपीडिताः स्युः । (४५६)

....2.457 विषयेन्द्रियसम्पाताभावात्तेषां तदुद्भवम् ।
नोदेति दुःखमिति चेत् न वै दुःखसमुद्भवः ॥ ४५७ ॥
[50a/MA]

'विषयेन्द्रिययोः सम्पात'स्य संसर्गस्या'भावात् । तदुद्भवं' विषयेन्द्रियसंसर्गजं 'दुःखं तेषां' योगिनां 'नोदेतीति चेत् । न वै' नैव 'दुःख'स्य 'समुद्भव' उत्पत्तिः (४५७)

....2.458 दुःखस्य वेदनं किन्तु दुःखज्ञानसमुद्भवः ।
न हि दुःखाद्यसंवेद्यं पीडानुग्रहकारणम् ॥ ४५८ ॥

'दुःखस्य वेदनं' दुःखित्वं । 'किन्तु दुःख'विषय'ज्ञानसमुद्भवो' दुःखिता (।) न हि 'दुःखं आदि'शब्दात् सुख'मसम्वेद्यं' अज्ञायमानं 'पीडानुग्रहयोः कारणं' भवति येन दुःखसुखयोरुत्पत्ती दुःखितासुखिते स्यातां । (४५८)

## (ग. स्वसंवेदननये योगिनामनातुरता)

ननु बौद्धस्यापि मते योगिनः सुखाद्याकारेण ज्ञानेन परदुःखमालम्बमानाः कस्मादातुरा न भवन्ति दुःखिन इव योगिनोपि दुःखा[1132] कारं स्वसम्वेदनञ्च ज्ञानमिति न कश्चिद्विशेष इत्याह (।)

....2.459 भासमानं स्वरूपेण पीडा दुःखं स्वयं यदा ।
न तदालम्बनं ज्ञानं न तदैवं प्रयुज्यते ॥ ४५९ ॥

'दुःखं स्वयं'[1133] परनिरपेक्षप्रकाशं 'स्वरूपेण' प्रकाशस्वभावेन 'भासमानं पीडा' (।) तत्तस्मादुत्पन्नं तत्सरूपं 'तदालम्बनं' योगिनो 'ज्ञान'न्न पीडेति यदा बौद्धैरिष्यते 'तदैवं' योगिनोपि परदुःखालम्बका दुःखिनः स्युरिति 'न युज्यते' येनायं भेदः (४५९)
[255/s]

....2.460 भिन्ने ज्ञानस्य सर्व्वस्य तेनालम्बनवेदने ।
अर्थसारूप्यमालम्ब आत्मा वित्तिः स्वयं स्फुटा ॥ ४६० ॥

---

1129 ५ नान्यस्यैकात्मसमवायः । ईश्वरप्रसाद आदिना ।
1130 ६ परस्य स्वीकृते ।
1131 १ वैभाष्यादीनां ।
1132 २ परचित्ताभिज्ञया मनसा सुखादियुतं मनो वेत्ति योगी यथाग्न्यादयः स्वयमसश्चरन्तः स्वज्ञानेध्यक्षास्तदाभासमात्रेण । न हि दुःखादीति वृत्तौ सिद्धान्ते योजितं ।
1133 ३ स्वसन्ततिजं ।

तेन 'सर्व्वस्य ज्ञानस्यालम्बनवेदने भिन्ने' भिन्नलक्षणे तथा 'ह्यर्थ[1134] सारूप्यमालम्ब' आलम्बनार्थः । 'आत्मा स्वयं' प[1135] रनिरपेक्षः 'स्फुटा वित्ति'[1136] र्व्वेदनार्थः । (४६०)

....2.461 अपि चाध्यक्षताऽभावे धियः स्याल्लिङ्गतो गतिः ॥
तच्चाक्षमर्थो धीः पूर्व्वो मनस्कारोपि वा भवेत् ॥ ४६१ ॥

'अपि च' धियो'ऽध्यक्षताऽभावे लिङ्गतो गतिः स्यात् । तच्च' लिङ्गम्भवदक्षमिन्द्रिय'मर्थो' विषयो 'धी'[1137] रनन्तरा 'पूर्व्व'को 'मनस्कारो वा भवेत् ।' (४६१)

....2.462 कार्यकारणसामग्रयामस्यां सम्बन्धि नापराम् ।
सामर्थ्यादर्शनात्तत्र नेन्द्रियं व्यभिचारतः ॥ ४६२ ॥

....2.463 तथार्थो धीमनस्कारौ ज्ञानं तौ च न सिध्यतः ।
नाप्रसिद्धस्य लिङ्गत्वं व्यक्तिरर्थस्य चेन्मता ॥ ४६३ ॥

...2.464a लिङ्गं;

यस्मा'त्कार्यकारणसामग्रयामस्या'मेभ्यो'ऽपरमा'त्मनः संयोगादि'सम्बन्धि नास्ति सामर्थ्यादर्शनात् । तत्र' तेष्वि'[1138] न्द्रियं' तावन्न लिङ्गं 'व्यभिचारतः' सत्यपि तस्मिन् ज्ञानाभावात् । (४६२) 'तथार्थोपि' ज्ञानव्यभिचारान्न लिङ्गम् । 'धीमनस्कारौ' बोधस्वभावत्वात् 'ज्ञानं तौ च' लीङ्गज्ञाना[1139]त्प्राङ् 'न सिध्यतः' ज्ञानस्यानुमेयत्वात् (।) न चा'प्रसिद्धस्य' निश्चितस्य 'लिङ्गत्वं' सत्तामात्रेण लिङ्गत्वेऽतिप्रसङ्गात् । 'अर्थस्य व्यक्तिः' स्फुटता बुर्द्धेर्लिङ्गं 'मता चेत्' (४६३)

...2.464b सैव ननु ज्ञानं व्यक्तोर्थोनेन वर्ण्णितः ।
व्यक्तावननुभूतायां तद्व्यक्तत्वाविनिश्चयात् ॥ ४६४ ॥

'ननु सैव' व्यक्तिर्ज्ञानमर्थप्रकाशलक्षणत्वात् । न च तदेव लिङ्गि चेति युक्तं । अनेन व्यक्तेर्लिङ्गत्वकथनेन 'व्यक्तोऽर्थो वर्ण्णितः' प्रतिक्षिप्तः । तथा हि 'व्यक्तौ' [256/s] बुद्धिरूपायाम'ननुभूताया'मर्थसम्बन्धिन'स्तद्व्यक्तत्वस्य' व्यक्तिव्यक्तत्वस्या'विनिश्चयान्न' लि[1140] ङ्गत्वं सत्तामात्रेण लिङ्गत्वेऽतिप्रसङ्गात् । (४६४)

...2.465a अथार्थस्यैव कश्चित्स विशेषो व्यक्तिरिष्यते ।

'अथार्थस्यैव' स्वभावभूतः 'स कश्चित्' स्वभाव'विशेषो व्यक्तिरिष्यते' न ज्ञानं ।

...2.465b नानुत्पादव्ययवतो विशेषोऽर्थस्य कश्चन ॥ ४६५ ॥

तद'प्यर्थस्य' स्थिरैकरूपत्वाद'नुत्पादव्ययवतो[1141] विशेषो' व्यक्तिरूपः 'कश्चन' न सङ्गतः । (४६५)

---

[1134] १ अर्थान्तरात्सारूप्येणोत्पत्तिः ।

[1135] २ ग्राह्यग्राहकत्वादिजात्यादिरहितः ।

[1136] ३ स्वसम्वेदनरूपोत्पत्तिः

[1137] ४ धीः स्वयमिति वृत्तिः । यानुमेया सैव प्रकारान्तरेण लिङ्गं कल्प्येत यथा यत्कृतकं तदेवानित्यं । अनन्तरानुमानमेव युक्तं ।

[1138] ५ सुप्तमूर्च्छादौ ।

[1139] ६ सर्व्वं लिङ्गमात्मनि ज्ञानापेक्षं लिङ्गिबोधोपायो भवति ।

[1140] १ व्यक्तोऽर्थो लिङ्गन्नार्थमात्रमिति यत्कल्प्यते तस्य ।

[1141] २ यत् केनचिज्ज्ञानेन गृह्यमाणेस्य व्यक्तिर्व्यवस्थितिः ।

....2.466 तदिष्टौ वा प्रतिज्ञानं क्षणभङ्गः प्रसज्यते ।
स च ज्ञातोऽथवाऽज्ञातो भवेज्ज्ञातस्य लिङ्गता ॥ ४६६ ॥

तस्य विशेष'स्येष्टौ वा प्रतिज्ञान'मर्थस्य पूर्व्वस्वभावनाशे सति स्वभावान्तरोत्पादात् 'क्षणभङ्गः प्रसज्यते' (।) 'स चा'र्थस्वभावविशेषो 'ज्ञातोऽज्ञातो वा भवेत्' लिङ्गं ज्ञानस्य तत्र 'ज्ञातस्य यदि लीङ्गते'ष्यते (। ४६६)

तदा (।)

....2.467 यदि ज्ञानेऽपरिच्छिन्ने ज्ञातोसाविति तत्कुतः ।
ज्ञातत्वेनापरिच्छिन्नमपि तद् गमकं कथम् ॥ ४६७ ॥

'ज्ञानेऽपरिच्छिन्ने' तदुपाधिर्ज्ञातोसावर्थो लिङ्ग[1142] मिति यदिष्टं तत्कुत उपपद्यते (।) अथाज्ञातस्य लिङ्गता तदा 'ज्ञातत्वेनापरिच्छिन्नमपि' तद्वस्तु 'कथं गमकं' लिङ्गं सत्तामात्रेण गमकत्वेऽतिप्रसङ्गादित्युक्तं । न च ज्ञानादर्शने दृष्टता युक्ता । (४६७)

....2.468a अदृष्टादृष्टयोन्येन द्रष्ट्रा दृष्टा न हि क्वचित् ।

'हिर्य'स्माद'दृष्टा दृष्टि'र्ज्ञानं येषां तेऽर्थाः 'क्वचि'दन्येन 'द्रष्ट्रा दृष्टा' इति न दृष्टा-निश्चयविषयाः स्युः ।

अथार्थस्यै (व) वि[1143] शेषः कश्चिद् बुद्धिकृत आस्ते तेन बुद्ध्यनुमानमित्याह (।)

....2.468b विशेषः सोन्यदृष्टावप्यस्तीति स्यात्स्वधीगतिः ॥ ४६८ ॥

[257/s]

'स विशेषो'ऽर्थस्यान्येन पुरुषेण 'दृष्टावप्यस्तीति' पुरुषान्तरस्यातद्व्यापृतेन्द्रियस्य तस्मा-दर्थगतविशेषात् 'स्वधीग[1144] तिः स्यात्' । (४६८)

[50b/MA]

अथ धर्मस्य साधारणत्वात् तस्य बुद्ध्यव्यभिचारात् ।

....2.469 तस्मादनुमितिर्बुद्धेः स्वधर्मनिरपेक्षिणः ।
केवलान्नार्थधर्मात्कः; स्वधर्मः स्वधियो परः ॥ ४६९ ॥

'तस्मात् केवलादर्थधर्मात् स्वधर्मनिरपेक्षिणोऽ'नुमातृपुरुषात्मभूतज्ञाननिरपेक्षाद्बुद्धेरनुमितिर्न सम्भवति सर्व्वस्यैव तस्मात् स्वबुद्ध्यनुमानप्रसङ्गात् । अथात्मधर्म ए[1145] व स कश्चिद् बुद्धेर्गमक इति चेत् । आह (।) 'स्वस्या'त्मनो 'धर्मः स्व'बुद्धेरात्मसम्बन्धिन्या बुद्धेरपरोन्यः कः (। ४६९)

....2.470 प्रत्यक्षाधिगतो हेतुः तुल्यकारणजन्मनः ।
तस्य भेदः कुतो बुद्धेर्व्यभिचार्यन्यजश्च सः ॥ ४७० ॥

'प्रत्यक्षाधिगतो हेतुः' स्यात् । न ह्यप्रतीतस्य हेतुता । न च बुद्धेः प्रत्यक्षतेष्यते तद्व्यतिरिक्तिश्च कश्चिदात्मधर्मो न प्रत्यक्ष इति न स्याद् बुद्ध्यनुमानं (।) किञ्चात्मधर्मोसौ बुद्ध्या सममेककारणो वा स्यात् भिन्नकारणो वा (।) तत्र बुद्ध्या सह 'तुल्यात् कारणाज्जन्म' यस्य 'तस्या'त्मधर्मस्य 'बुद्धेः' सकाशात् 'कुतो भेदः' । अभिन्नहेतुकत्वेऽभिन्नतैव युक्ता । अथान्यहेतुकोसौ तदा-

[1142] ३ न कारकवज्ज्ञापकोऽज्ञातोपि कार्यकारी ।
[1143] ४ एकदृष्टावप्यन्यस्यास्त्यर्थस्याज्ञातो विशेषः ।
[1144] १ तमर्थमपश्यतोपि स्वबुद्ध्यनुमानं स्यान्न च युक्तं ।
[1145] २ पुरुषस्य ।

'न्यजश्च स व्य[1146] भिचारी' स्यात् । एकसामग्रयधीनयोरेकदर्शनादपरानुमानमव्यभिचारि नान्यथा ।[1147] (४७०)

उक्तमेवार्थं संगृह्णन्नाह (।)

....2.471 रूपादीन् पञ्चविषयानिन्द्रियाण्युपलम्भनम् ।
मुक्त्वा न कार्यमपरं तस्याः समुपलभ्यते ॥ ४७१ ॥

'रूप'मादिर्येषां तान् शब्दगन्धरसस्पर्शन् 'पञ्चविषयान्' पञ्चे'न्द्रियाणि' चक्षुःश्रोत्रादीनि 'उपलम्भनं' ज्ञानं 'मुक्त्वा तस्या' बुद्धेर्न 'कार्यमपरं समुपलभ्यते ।' इयतैव सर्व्वस्य संग्रहात् । (४७१)

[258/s]

....2.472 तत्रात्यक्षं द्वयं । पञ्चस्वर्थेष्वेकोपि नेक्ष्यते ।
रूपदर्शनतो जातो योन्यथा-व्यस्तसम्भवः ॥ ४७२ ॥

'तत्र' तेषु मध्ये 'द्वय'मिन्द्रियं ज्ञानञ्चा'त्यक्ष'मतीन्द्रियं इन्द्रियस्य ज्ञानान्यथानुपपत्त्या-व्यवस्थापनात् । ज्ञानस्य त्वन्मतेऽप्रत्यक्षत्वात् । रूपादिषु 'पञ्चस्वर्थेषु एकोपि नेक्ष्यते' बुद्धेरप्रत्यक्षत्वात् । 'यो या'वद् दृश्यमानोऽ'न्यथा' ज्ञानमन्तरेण व्य'स्तसम्भवः' प्रतिक्षिप्तसत्त्वो विषयस्य 'रूपदर्शनतो' बुद्धे'र्जातो'ऽभ्युपगम्यते । (४७२)

....2.473 यदेवमप्रतीतं तल्लिङ्गमित्यतिलौकिकम् ।
विद्यमानेपि लिङ्गे तान्तेन सार्द्धमपश्यतः ॥ ४७३ ॥

'यद्येवं' बुद्धिनान्तरयीकतया'ऽप्रतीतं' तद् बुद्धे'र्लिङ्गमि'त्यति'लौकिकं' लो [1148] कातिक्रान्तं । किञ्चाभ्युपगम्योच्यते । 'विद्यमानेपि' कस्मिंश्चिल्लि'ङ्गे' कदाचिद् बुद्धिं 'तां तेन' लि[1149] ङ्गेन 'सार्धमपश्यतो'ऽप्रतिपत्तेः । (४७३)

....2.474 कथं प्रतीतिर्लिङ्गं हि नादृष्टस्य प्रकाशकम् ।
तत एवास्य लिङ्गात्प्राक् प्रसिद्धेरुपवर्ण्णने ॥ ४७४ ॥

तस्माल्लिङ्गात् 'कथं' बुद्धि'प्रतीतिः । लिङ्गं ह्यन्व'यरहितम'दृष्ट'स्यार्थस्य 'न प्रकाश'कं यु[1150] क्तं (।) 'तत एव लिङ्गादस्य' ज्ञानस्यान्वयसिद्ध्यर्थमात्मन्यनुमाना'त्प्राक् सिद्धेर्निश्चय-स्योपवर्ण्णने' वाभिधीयमाने (४७४)

....2.475 दृष्टान्तान्तरसाध्यत्वं तस्यापीत्यनवस्थितिः ।
इत्यर्थस्य धियः सिद्धिः नार्थात्तस्याः कथञ्चन ॥ ४७५ ॥

'तस्या'न्वयसाधकस्याप्यनुमानस्य 'दृष्टान्तान्तरे'णानुमानसाध्येन 'साध्यत्व[1151]मित्यनवस्थितिः' स्यात् । तथा चैकस्यासिद्धौ सर्व्वस्यासिद्धिः प्रसज्यते ।

'इति' तस्मा'दर्थस्य धियः' सकाशात् 'सिद्धिर्नार्थात् तस्या' धियः 'कथं च न' सिद्धिरिति न्याय्यं (। ४७५)

---

[1146] ३ बुद्ध्यसिद्धेर्न तादात्म्यं नापि तदुत्पत्तिरनुमेयधिया ।

[1147] ४ बुद्धेर्लिङ्गादनुमाने तल्लिङ्गेन कार्येण भाव्यमिति ।

[1148] १ बालोपि सम्बद्धमेव लिङ्गमाह वह्नेरिव धूमः ।

[1149] २ आत्मनि बुद्धेरन्वयादृष्टेः ।

[1150] ३ स्यादेतद् (।) येन कायस्पन्दादिनात्मनि बुद्धिं साधयितुमिच्छति प्रमाता तत एव लिङ्गात् सपक्षे बुद्धिः सेत्स्यति तया सिद्ध्यात्मन्यनुमानमिति सपक्षेऽनुमानं विना दृष्टान्तबलेनेत्याह ।

[1151] ४ अन्यथा सपक्षे यदि दृष्टान्तं विना सिद्धिरात्मन्यपि किन्न सिद्धिः ।

....2.476 तदप्रसिद्धावर्थस्य स्वयमेवाप्रसिद्धितः ।
प्रत्यक्षाञ्च धियं दृष्ट्वा तस्याश्चेष्टाभिधादिकम् ॥ ४७६ ॥

[259/s]

यस्मात्तस्या धियो'ऽसिद्धावर्थस्य स्वयमेवाप्रसिद्धितः' कथं लिङ्गता ।

स्वप्रकाशत्वात् 'प्रत्यक्षां धियं तस्याश्च चेष्टाऽभिधाऽदिर्यस्य' सुखप्रसादवैवर्ण्यादिस्तं 'दृष्ट्वा' गृहीतव्याप्तिकस्यान्यसम्बन्धिचेष्टादिदर्शनात् । (४७६)

....2.477 परचित्तानुमानञ्च न स्यादात्मन्यदर्शनात् ।
सबन्धस्य मनोबुद्धावर्थलिङ्गाप्रसिद्धितः ॥ ४७७ ॥

'परचित्तानुमानश्चेष्टं न स्यात्' । बुद्धेरा'त्मनि' स्वसन्ततौ चेष्टादिभिः सह 'सम्बन्ध'स्या-'दर्शनात्' । अपि च वासनामात्रबलभाविन्या 'मनोबुद्धौ' विकल्पबुद्धौ विषयभूतस्यार्थस्याभा-वात्[1152] 'अर्थस्य लिङ्गस्यासिद्धितो'[1153] बुद्ध्यन्तराल्लिङ्गादनुमानं स्यात् ।[1154] (४७७)

....2.478 प्रकाशिता कथं वा स्यात् बुद्धिर्बुद्ध्यन्तरेण वः ।
अप्रकाशात्मनोः साम्याद् व्यङ्ग्यव्यञ्जकता कुतः ॥ ४७८ ॥

'कथम्वा बुद्ध्यन्तरेणा'प्रत्यक्षेण 'बुद्धिः प्रकाशिता स्यात् । वो' युष्माकं दर्शने[1155] ।[51a/MA] यस्माद'प्रकाशात्मनो'र्लिङ्गलिङ्गिनोरसिद्धत्वेन 'साम्यात् व्यङ्ग्यव्यञ्जकता कुतः' । यद्यप्रकाशा-त्मनोर्न व्यङ्ग्यव्यञ्जकता तदार्थज्ञानयोरपि कथं व्यङ्ग्यव्यञ्जकताभाव इति । (४७८)

...2.479a विषयस्य कथं व्यक्तिः;

'विषयस्य कथं व्यक्ति'रिति (।)

उत्तरमाह (।)

...2.479b प्रकाशे रूपसंक्रमात् ।
स च प्रकाशस्तद्रूपः स्वयमेव प्रकाशते ॥ ४७९ ॥

'प्रकाशे' स्वसम्विदिते ज्ञाने विषयस्य 'रूपसंक्रमात्' सारूप्यसंभवात् ज्ञानेनार्थप्रकाशित इत्युच्यते । 'स च प्रकाशस्तद्रूपो' विषयस्वरुपः 'स्वयमेवा'परोक्षप्रकाशात्मनोत्पन्नः 'प्रकाशते' न त्वन्येन प्रकाश्यते । (४७९)

[260/s]

स्यादेतद् (।) बुद्धिरपि बुद्ध्यन्तरसरूपोत्पन्ना प्रकाशमाना बुद्धेर्व्यञ्जिका मतेति चेत् । आह (।)

....2.480 तथाभ्युपगमे बुद्धेः बुद्धौ बुद्धिः स्ववेदिका ।
सिद्धान्यथा तुल्यधर्मा विषयोपि धिया सह ॥ ४८० ॥

'बुद्धेः' प्रकाश्यायाः 'बुद्धौ' व्यञ्जिकायां 'तथा' संक्रान्तसारूप्यप्रकाशद्वारेण 'वेदनाभ्युपगमे' व्यञ्जिका 'बुद्धिः स्वसंवेदिका सिद्धा' (।) धीसरूपाया 'बुद्धेः' स्वप्रकाशत्वे पूर्व्वबुद्धिः प्रकाशिता

---

[1152] १ न विकल्पोऽर्थापेक्षः ।

[1153] २ अनुमानं न स्यात् । ज्ञानान्तरवेद्यपक्षेपि ।

[1154] ३ तत्रापि

[1155] ४ पूर्व्वात्मरूपयोत्तरबुद्ध्येति चेदाह । एकस्य विकल्पाविकल्पजननविरोधात् पूर्व्वधिया परधीबोधजनने स्मृतेरजननात्तु द्वितीयतया धिया स्वविषया(व) बोधाद्यवधानं ।

स्यात् । 'अन्यथा' स्वप्रकाशत्वानभ्युपगमे 'विषयो'प्यप्रकाशस्वभावतया 'धिया सह तुल्यधर्मेति' सोपि बुद्धेर्व्यञ्जकः स्यात् । सरूपयोर्धीविषययोरन्योन्यं व्यञ्जकता भवेत् । (४८०)

....2.481 इति प्रकाशरूपा नः स्वयं धीः संप्रकाशते ।
अन्योस्यां रूपसंक्रान्त्या प्रकाशः सन् प्रकाशते ॥ ४८१ ॥

'इति' तस्मान्नोऽस्माकं मते 'धीः स्वय'मात्मना 'प्रकाशरूपो'त्पन्ना सती 'प्रकाशते' । न त्वन्येन प्रकाश्यते इति युक्तं । अन्यः पुनर'न्योस्यां' बुद्धौ प्रकाशायां 'रूपसं'[1156]क्रान्त्या 'प्रकाशः सन् प्रकाशते' । ततोऽर्थवेदनव्यवहारः । (४८१)

...2.482a सादृश्येपि हि धीरन्या प्रकाश्या न तया मता ।
स्वयं प्रकाशमाना ;

'सादृश्ये' सारूप्येपि सति 'तया' सरूपया धियाऽ'न्या' पूर्व्विका 'धीर्न प्रकाश्या मता' प्रकाशस्वभावस्य परेण प्रकाशायोगात् । किन्तु 'स्वयं प्रकाश'स्वभावतया प्रकाशमाना प्रकाशत इत्यभ्युपेयं ।

## घ. अर्थस्य ज्ञानरूपेण प्रकाशकता

एवन्तर्ह्यर्थस्याप्रकाशात्मनः कथं प्रकाशत इत्याह (।)

...2.482b अर्थस्तद्रूपेण प्रकाशते ॥ ४८२ ॥

'अर्थः' सारूप्यसंक्रान्ते'स्तद्रूपे'ण ज्ञानरूपेण 'प्रकाशते' न तु साक्षात् स्वरूपेण । (४८२)

दृष्टान्तमाह (।)

....2.483 यथा प्रदीपयोर्दीपघटयोश्च तदाश्रयः ।
व्यङ्ग्यव्यञ्जकभेदेन व्यवहारः प्रतन्यते ॥ ४८३ ॥

[261/s]

'यथा प्रदीपयोः' प्रकाशात्मनोर्न प्रकश्यप्रकाशकभावः । तथा बुद्ध्योरपि । यथा 'दीपघटयोः' प्रकाशाप्रकाशस्वभावयोरेकः प्रकाशकोऽन्यः प्रकाश्यः । तथा ज्ञानार्थयोरपि । 'तदाश्रयो'ऽप्रकाशप्रकाशात्मनिष्ठो 'व्यङ्ग्यव्यञ्जकभेदेन व्यवहारो' लोके 'प्रतन्य'ते (। ४८३)

....2.484 विषयेन्द्रियमात्रेण न दृष्टमिति निश्चयः ।
तस्माद्यतोयं तस्यापि वाच्यमन्यस्य दर्शनम् ॥ ४८४ ॥

यतश्च 'विषय'मात्रेण 'इन्द्रियमात्रेण' वे[1157] दं 'दृष्टमिति न निश्यस्त' स्माद्यतस्तद्व्यतिरिक्ताज्ज्ञानादिदं दृष्टमिति निश्चयस्तस्यापि विषयेन्द्रियाभ्या'मन्यस्य' ज्ञानस्य 'दर्शनम'परोक्षत्वं 'वाच्य'मिति बुद्धिपरोक्षतावादो न युक्तः । (४८४)

## (३) व. स्वसंवित्तिसिद्धिः

### क. स्मृतेः स्वसंवित्तिः

स्व[1158] संवित्तिसिद्ध्यर्थमुपपत्त्यन्तरमाह (।)

[1156] १ स्फटिकमणाविव जवा (कु) सुमं ।

[1157] १ नैयायिकजैमिनीयादेर्बुद्धिपरोक्षत्वात् न स्यादेव ।

[1158] २ स्वोपपत्तिभिः स्ववेदं प्रसाध्याचार्योपपत्तिमाह ।

...2.485a स्मृतेरप्यात्मवित्सिद्धा ज्ञानस्य;

ज्ञानस्यातीतस्य ‘स्मृतेरप्यात्मवित्’ सुसंवित्तिः ‘सिद्धा’ । प्रतीतमेव हि स्मर्यते यथार्थः ।[1159]

स्यादेतत् ज्ञानं प्रतीतमन्येन चेतसा न स्वसंवेदनेनेत्याह (।)

...2.485b अन्येन वेदने ।
दीर्घादिग्रहणन्न स्याद् बहुमात्रानवस्थितेः ॥ ४८५ ॥

अन्येन ज्ञानेन पूर्व्वकस्य ज्ञानस्य[1160] ‘वेदने’ऽभिधीयमाने [1161] ‘दीर्घ[1162]देः’ स्वरस्य [262/s] ‘ग्रहणं न स्यात्’ । क्षणिकस्य ज्ञानस्य एका[1163] ण्वत्ययकालमात्रस्थायि[1164] नोऽ[1165] नेकक्षणनिर्व्वर्त्त्यासु बह्वीषु ‘मात्रासु’ दीर्घादिनिर्व्वर्त्तनिकासु ग्राहकत्वेना‘नवस्थितेः’ । न ह्येकक्षणमात्रस्थापि ज्ञानमनेकक्षणकलापनिर्व्वर्तनीयमात्रासञ्चयात्मकं दीर्घा[51b/MA] दिकं शक्नोति ग्रहीतुं । किन्त्वकाराद्येकैकमात्रावयवलेशं गृह्णाति । तद्ग्राहकत्वेन द्वितीयज्ञानेन तत् प्रतीयते एवमपरापरैर्ज्ञानैरवयवलेशग्राहकैः स्वस्व[1166]ग्राहकज्ञानान्तरितैर्ग्रहणक्रमे केन मात्राग्रहणं । मात्राप्रचयदीर्घादिग्रहणं वा स्यात् । (४८५)

...2.486a अवस्थितावक्रमायां सकृदाभासनान्मतौ ।
वर्ण्णाः स्यादक्रमोऽदीर्घः;

अथा[1167] नेकमात्राकालमेकैव बुद्धिरस्तीत्युच्यते तदानेककाल‘मवस्थितौ’ सत्या‘मक्रमायां मतौ’ सर्व्वमात्राणां ‘सकृदाभासनाद्दीर्घादिर्व्वर्ण्णोऽक्रमः स्यात्’ । प्रतीतिनिबन्धनत्वाद्वस्तुव्यवस्थायाः । तथा चादीर्घो [1168] भवेत् । न ह्येककालमुच्चैरुच्चार्यमाणोप्येकमात्रिको दीर्घः ।

ननु क्रमवन्तो वर्ण्णा अवयवक्रमेणोत्पद्यमाना दीर्घादिबुद्धिमुत्पादयिष्यन्तीत्याह (।)

...2.486b क्रमवानक्रमां कथम् ॥ ४८६ ॥

...2.487a उपकुर्यादसंश्लिष्यन्वर्ण्णभागः परस्परम् (।)

[263/s]

---

[1159] ३ स्मर्यते च बुद्धिः ।

[1160] ४ परोक्तं सिद्धसाधनत्वं स्वयं परिह (र)ति ज्ञानान्तरेणानुभवेऽनिष्टा ।

[1161] ५ तत्रापि हि स्मृतिविषयान्तरसञ्चारस्तथा न स्यात् स चेक्षते इत्याद्याचार्यसिद्धान्तं मुक्त्वाधिकदोषाभिधानाय ।

[1162] ६ ह्रस्वप्लुतादेः ।

[1163] १ यावता कालेन परमाणुरिष्टः परमाण्वन्तरमेकमतिक्रामति तावत्कालः क्षणः (।) क्षणिका श्रोत्रधीः सर्व्वेषामनेकक्षणात्मकमेकवर्ण्णनिष्पत्तिकालं न तिष्ठति ।

[1164] २ एकवर्णभागग्राहिबुद्धौ नष्टायामनन्तरन्तदनुभवबुद्धिरिति व्यवहितं तदपरवर्ण्णभागज्ञानं तद्धिया तदज्ञानात् दीर्घग्रहो न स्यात् स्मृतिरपि न विकल्पाविकल्पयोरेकेन जननविरोधात् ।

[1165] ३ सर्व्वेषु वर्ण्णभागेषु बुद्धयः स्वसंविदिता इति स्मृतिसंकलं स्यात् न च स्ववेदनं मन्यते ।

[1166] ४ पूर्व्वपूर्व्वेण ।

[1167] ५ आसर्गप्रलयादेरेकैव बुद्धिः सांख्यस्य तमाह तां ।

[1168] ६ अपरापरबुद्धावपरापरमात्राभागप्रतिभासक्रमेण दीर्घभानं यतः ।

'क्रमवान् वर्णभागः' स्वस्वकालस्थायी 'प[1169] रस्परमसंश्लिष्यन्न'सम्बध्यमानो दीर्घबुद्धि'मक्रमां कथमुपकुर्य्या'दुत्पादये[1170] त् ।[1171] क्रमवति ज्ञेये ज्ञानमपि तथैव युक्तं । (४८६)

ख. क्रमभाविनां वर्णानां स्फोटेनासंगतिः

अथोत्पन्ना वर्णावयवा अन्त्यावयवोत्पत्तिपर्यन्तमनुवर्तन्ते । ततः क्रमग्रहणं सर्व्वग्रहणञ्चास्तीति युक्तं दीर्घादिग्रहणमित्याह (।)

...2.487b आन्त्यं पूर्वस्थितादूर्ध्वं वर्धमानो ध्वनिर्भवेत् ।

'आ' अन्त्य'मन्त्यं' वर्णावयवं यावत् 'पूर्व्व'पूर्व्वेषां वर्णावयवानां क्रमोत्पन्नानां 'स्थितौ' सत्यां प्रथमवर्णावयवा'दूर्ध्वं' पूर्व्वोत्पन्नस्यानुवृत्तावपूर्व्वस्य चापरस्योत्पत्तौ 'वर्द्धमानो ध्वनिर्भवेत्'[1172] । न चैतदस्ति । अवयवक्रमग्रहणेन दीर्घबुद्धेरुत्पा दात् ।

स्यादेतत् (।) क्रमेणोत्पन्नानामवयवानामन्त्यावयव[1173] काले ग्रहणमिति न वर्द्धमानध्वनिर्भवति पूर्व्वं कस्यचिद् ग्रहणाभावादित्याह (।)

...2.487c अक्रमेण ग्रहादन्ते क्रमवद्धीश्च नो भवेत् ॥ ४८७ ॥

'अक्रमेण' ग्रहणादन्त्यवर्णनिष्पत्तिकाले च तद्ग्राहिका 'क्रमवती धीर्नो भवेत्' । ततश्च न दीर्घग्रहणं । न ह्येककालमनेकैरुच्चार्यमाणेऽनेकस्मिन्नकारादौ दीर्घबुद्धिर्भवेत् । (४८७)

एकैकबुद्धिः सकृदुत्पन्ना क्रमेणावयवान् गृह्णात्यन्त्यावयवग्रहणकाले दीर्घग्राहिकेति चेत् आह (।)

....2.488 धियः स्वयश्च न स्थानं तदूर्ध्वविषयास्थितेः ॥ ४८८ ॥

[264/s]

'धियो'ऽवयवग्राहिकाया'स्तस्मा'देकायवग्रहणा'दूर्ध्वं' पूर्वगृहीतस्य विषय[1174] स्या- 'स्थितेर्हेतोर्न स्थानं' स्थितिर्युक्ता[1175] । (४८८)

....2.489 स्थाने स्वयन्न नश्येत् सा पश्चादप्यविशेषतः ।
दोषोयं सकृदुत्पन्नाक्रमवर्णस्थितावपि ॥ ४८९ ॥

अथ विषयानवस्थानेपि 'स्वयम'विनश्वरस्वभावतया बुद्धेः 'स्थाने' वा स्वीक्रियमाणे 'पश्चाद'न्तावयवग्रहणानन्तरमप्यविनश्वरस्वभावतया'ऽविशेषतो न नश्येत्' ॥ [1176] बुद्धेः सकृदुत्पन्ना-

[1169] १ उच्चारितैकवर्णभागनाशेऽपरोच्चारणमिति साहित्यं नास्ति ।

[1170] २ पूर्वभागस्य बुद्धिजनकत्वे परभागानामनुपयोगात् ।

[1171] ३ स्वाकारबुद्धिजननेन ।

[1172] ४ न द्विमात्र इति प्रत्यक्षविरोधः ।

[1173] ५

नादैराहितबीजायामन्त्येन ध्वनिना सह
आवृत्तपरिपाकायां बुद्धौ शब्दोवधार्यत

इति वै या क र णा स्तानाह ।

[1174] १ भागानामस्थितेरिति तुल्यकालम्विष (य) विषयित्वेऽयं येन दीर्घादिबुद्धिकाले न स्यात् ।

[1175] २ शब्दपरमाणून् तद्देशविभागेनापरापरदेशसंयोगेन श्रोत्रपथमानयत्यतो वर्णाभिव्यक्तिरिति प्रत्यभिज्ञा च ।

याश्चिरावस्थाने यो ‘दोषः’ सर्व्वदाऽविनाशप्रसङ्ग उक्तोऽयं ‘सकृदुत्पन्ना’नामक्रमाणां ‘वर्ण्णाना-’ क्रमग्राहिविज्ञानोत्पत्तिकालं यावद‘वस्थिताव’प्युच्यमानायां बोद्धव्यः । यदि सकृदुत्पन्ना अप्यविनश्वरस्वभावतया कश्चित्कालमनुवर्तते तदा चिरमपि तत्स्वभावाप्रच्यवादनुवर्तेरन् । (४८९)

किञ्च (।)

...2.490a सकृद्यत्नोद्भवाद् व्यर्थः स्याद्यत्नश्चोत्तरोत्तरः ।

‘सकृत् कृताद्यत्ना’त्ताल्वादिव्यापारात् वर्ण्णा[1177] ना‘मुत्पन्न’त्वादुत्तरोत्तरो यत्नश्च ‘व्यर्थः’ स्यात् ।

ग. न संयोगविभागद्वारेण शब्दाभिव्यक्तिः

योपि मन्यते (।) प्रयत्नप्रेरितेन वायुना स्तिमितस्य वायोराकाशसंयुक्तस्य संयोगविभागकृता शब्दस्याभिव्यक्तिर्भवतीति तं प्रत्याह (।)

...2.490b व्यक्तावप्येष वर्ण्णानां दोषः समनुषज्यते ॥ ४९० ॥

[265/s]

‘वर्ण्णाना’म्वायवीयसंयोगविभागद्वारेणाभि‘व्यक्ताव’पीष्यमाणायामयमनन्तरोक्तोऽक्रमाणां सकृदभिव्यक्तेरुत्तरो यत्नः प्राणप्रेरणादि[1178] को व्यर्थः स्यादिति ‘दोषः’[52a/MA] ‘समनु’[1179] षज्यते । (४९०)

स्या[1180] देतद् (।)

...2.491 अनेकया तद्ग्रहणे यान्त्या धीः सानुभूयते ।
न दीर्घग्राहिका सा च तन्न स्याद्दीर्घधीस्मृतिः ॥ ४९१ ॥

‘अनेक[1181] या’ धिया तस्यानेकाश्रयात्मकस्य वर्ण्णस्य ‘ग्रहणे’ कृते पश्चाद् ‘यान्त्या धी’रन्त्यावयवग्राहिका ‘सा’ बुद्ध्यन्तरेणा‘नुभूयते’ तया दीर्घादिबुद्धिर्भविष्यतीति चेत् । नन्वेवं पूर्व्वासां बुद्धीनामनेकावयवग्राहिकाणां न बुद्ध्यन्तरेण ग्रहो नापि स्वसम्वेदनेन वित्तिः । या चानुभूयते साऽन्त्यावयवग्राहिका धीः ‘सापि’ हि ‘न दीर्घा’[1182] दिवर्ण्ण‘ग्राहिका त’त्तस्मा‘द्दीर्घधीस्मृतिर्न स्यात्’ । (४९१)

...2.492 पृथक् पृथक् च बुद्धीनां सम्वित्तौ तद् ध्वनिः श्रुतेः ।
अविच्छिन्नाभता न स्याद् घटनञ्च निराकृतम् ॥ ४९२ ॥

न ह्यगृहीतमेव स्मर्यते वर्ण्णावयवग्राहिकाणां ‘बुद्धीनां पृथक् पृथक्’ स्व[1183] स्वग्राहिणीभिः बुद्धिभिः ‘संवित्ता’विष्यमाणायाञ्च तद् ‘ध्वनिश्रुते’र्दीर्घादिवर्ण्णबुद्धेर‘विच्छिन्ना’भतानिरन्तरप्रतिभासता ‘न स्यात्’ । अन्तरान्तरा बुद्धिग्राहिणीभिर्बुद्धिभिरवयवग्राहिबुद्धीनां व्यवधा-

---

[1176] ३ नैयायिकस्य ।

[1177] ४ मीमांसको वर्णस्फोटवादी न वर्ण्णातिरिक्तं पदं वाक्यं वाचकमस्तीत्याह श्रोत्रप्राप्यकारि । वर्ण्णाश्च नित्या देशकालनरान्तरेष्वेकाकारबुद्धिग्राह्यत्वात् यद्देशः शब्दस्तद्देशसन्निहितो वायुरदृष्टचोदितः ।

[1178] १ सकृदभिव्यक्तस्य सदा स्थितेर्नित्यत्वात्

[1179] २ उक्तमप्युत्तरप्रबन्धावतारार्थमाह ।

[1180] ३ सावयववादी मीमांसक आह ।

[1181] ४ निरन्तरया इति पूर्व्वतो विशेषः ।

[1182] ५ पूर्व्वाग्रहादेव ।

नात् । स्वग्राहिकाभिर्बुद्धिभिर्व्यवधानेपि बुद्धीनां लघुवृत्तित्वात् 'घटन'मव्यवधानाध्यवसानं 'निराकृत'मन्यत्रापि समानं तदि[1184] त्यादिना (२।१३५) यथावयवग्राहिका बुद्धयो लघुवृत्तयः तथा तद्ग्राहिबुद्धिकाले तदभावोपि लघुवृत्तिरिति बुद्ध्यवच्छेदवर्ण्णविच्छेदोऽपि मन्येतेत्युक्तं प्राक् । (४९२)

किञ्च (।)

....2.493 विच्छिन्नं शृण्वतोप्यस्य यद्यविच्छिन्नविभ्रमः ।
ह्रस्वद्वयोच्चारणेपि स्यादविच्छिन्नविभ्रमः ॥ ४९३ ॥

'विच्छिन्नं शृण्वतोपि' लघुवृत्ते'र्यद्यविच्छिन्नभ्रम'स्तदा 'ह्रस्वद्वयोच्चारणेपि' लघुवृत्तेर'विच्छिन्नविभ्रमः स्यादि'ति दीर्घबुद्धिर्भवेत् । (४९३)

[266/s]

....2.494 विच्छिन्ने दर्शने चाक्षादविच्छिन्नाधिरोपणम् ।
नाक्षात्सर्व्वाक्षबुद्धीनां वितथत्वप्रसङ्गतः ॥ ४९४ ॥

वर्ण्णावयवानाम[1185] क्षादिन्द्रिया'द्विच्छिन्ने' स्वबुद्धिभिर्व्यवहिते च वस्तुतो 'दर्शनेऽक्षादविच्छिन्न'स्य दर्शनस्या'धिरोपणमारोप' इति न युक्तं । एव 'सर्व्वा'सा'मक्षबुद्धीनां' रूपादिग्राहिणीनां 'वितथत्वप्रसङ्ग[1186] तो' न किञ्चिदभ्रान्तं स्यात् । (४९४)

## घ. बुद्धेर्बुद्ध्यन्तरेण गृहीतो नाविच्छेदप्रतिभासः

बुद्धेर्बुद्ध्यन्तरेण गृहीतावविच्छेदप्रतिभासो नास्तीति सोपपत्तिकमाख्यातुमाह (।)

....2.495 सर्व्वान्त्योपि हि वर्ण्णात्मा निमेषतुलितस्थितिः ।
स च क्रमादनेकाणुसम्बन्धेन नितिष्ठति ॥ ४९५ ॥

'सर्व्वे'षां दीर्घादीनामेकमात्रिकत्वा'दन्त्यो वर्ण्णात्मा'ऽकारादि'र्निमेषे'ण नयननि मीलनेन 'तुलिता' [1187] परिमिता 'स्थिति'र्यस्य स तथा । स चाक्षिनिमेषकालस्थाय्यकारादि'रनेके'षामाकाशतमःसंज्ञितानां पक्ष्ममालाद्वयवर्त्तिना'मणू'नां 'सम्बन्धे'नाक्रमणेन निमेषकालसंज्ञितेन 'क्रमाद् भूयः' क्षणव्यवधाना'न्नितिष्ठति' परिसमाप्यते । एतेनान्त्योपि वर्ण्णोऽनेकक्षणस्थायीत्युक्तं । (४९५)

....2.496 एकाण्वत्ययकालश्च कालोल्पोयान् क्षणो मतः ।
बुद्धिश्च क्षणिका तस्मात्क्रमाद्वर्ण्णान्प्रपद्यते ॥ ४९६ ॥

'एकस्याणोरत्यय' आक्रमणं स 'कालः' परिमाणं यस्य तादृशश्च 'कालो'ल्पीयान् लघुतमो भेत्तुमशक्यः 'क्ष[1188] णो' भवेत् । तावत्कालमात्रस्थाष्णुतया 'बुद्धिश्च क्षणिका[1189]

[1183] ६ पूर्व्वानुभवाभिः ।
[1184] ७ तद्वर्ण्णयोर्व्वा सकृत् श्रुतिः ।
[1185] १ श्रोत्रात् श्रवणे ।
[1186] २ व्यवधानेप्यव्यवहितभानात् ।
[1187] ३ निमेषमात्रेणाभिनिर्वृत्तिधर्म्मेति यावत् ।

तस्मा'त्क्षणिकत्वाद् बुद्धिः 'क्रमा'त्पुन[1190] र्धीर्व्यवहिता भूयसी भवन्ती 'वर्णान् प्रतिपद्यते' तत्कथमविच्छिन्नवर्णग्रहः सङ्गतः । (४९६)

[267/s]

....2.497 इति वर्णेपि रूपादावविच्छिन्नावभासिनी ।
विच्छिन्नाप्यन्यया बुद्धिः सर्व्वा स्याद्वितथार्थिका ॥ ४९७ ॥

'इति' तस्माद् 'वर्णेपि रू[1191] पादा'वपि बुद्धिस्तद्ग्राहिकयाऽन्यया धियाऽन्तरिता वस्तुतो 'विच्छिन्नाप्यविच्छिन्नावभासिनी' क्व[1192] तश्चिन्निमिताद् भवन्ती 'सर्व्वा[52b/MA] वितथार्थिका' शून्या भ्रान्तिः 'स्यात्' । (४९७)

....2.498 घटनं यच्च भावानामन्यत्रेन्द्रियविभ्रमात् ।
भेदालक्षणविभ्रान्तं स्मरणन्तद्विकल्पकं ॥ ४९८ ॥

'यच्च भावानां[1193]' सदृशापरापरेषामुत्पद्यमानानां स एवायमित्येकत्व'घटनं' तद् भावानां परस्परतो 'भेदालक्षणेन विभ्रान्तं विकल्पकं' ज्ञानं 'स्मरणं । अ[1194] न्यत्रेन्द्रियविभ्रमात्' । अतः पुनरलातादिषु भ्राम्यमाणेषु चक्राद्याकारं ज्ञानमुत्पद्यतेऽसाविन्द्रियक्रमो निर्व्विकल्पक एव । (४९८)

....2.499 तस्य स्पष्टावभासित्वं जल्पसंसर्गिणः कुतः ॥
नाक्षग्राह्येस्ति शब्दानां योजनेति विवेचितम् ॥ ४९९ ॥

'तस्य' विकल्पस्य 'जल्पसंसर्गिणः' शब्दसंसर्गवतः 'स्पष्टाव[1195] भासित्वं' ज्ञेयाकारवैशद्यं 'कुतः' ।[1196] यस्मा'दक्षग्राह्ये' स्वलक्षणे 'शब्दानां' संकेताग्रहणात् वाचकत्वेन 'योजना' नास्तीति 'विवेचितं' प्राक् । (४९९)

(ङ. तदा न विच्छिन्नं दर्शनम्)

...2.500a विच्छिन्नं पश्यतोप्यक्षैर्घटयेद्यदि कल्पना ।

अथाक्षैरिन्द्रियज्ञानैः स्वज्ञानव्यवहितैरपरापरमर्थं 'विच्छिन्नं पश्यतोपि' ज्ञानानुचरी 'कल्प[1197] ना' तदेवेदमित्येकत्वेन 'घटयेदिति यद्यु'च्यते (।)

[268/s]

तदा विच्छिन्नदर्शनमेव नास्तीति वक्तुमाह (।)

...2.500b अर्थस्य तत्संवित्तेश्च सततं भासमानयोः ॥ ५०० ॥

---

[1188] ४ अन्यस्य द्वित्रिपरमाणुव्यतिक्रमादिभेदेन कालो भेत्तुं शक्यः ।

[1189] ५ अनेकक्षणाभिनिर्वृत्तिधर्म्माश्च वर्णाः ।

[1190] ६ क्रमग्राहिकापि स्वग्राहिकयान्तरितेत्यविच्छिन्नग्रहः कुतः ।

[1191] १ यथा वर्णेषु प्रत्येकं विभ्रम एवं रूपादावपीति दार्ष्टान्तिककथनं ।

[1192] २ तन्माभूत् सर्व्वेन्द्रियज्ञानवितथत्वमिति नाविच्छिन्नभ्रमः स्वीकर्तव्यस्तदा च निरन्तरभानन्न स्यादस्ति चातः स्ववित्तिर्ज्ञानानां सिद्धा ।

[1193] ३ क्षणिकानां निरन्वयविनाशिनां । असति बाधके भानादेवानयोः प्रामाण्यं ।

[1194] ४ इन्द्रियवैगुण्ये तु न घटनं सकृदसदर्थप्रतिभासं स्पष्टमेव ज्ञानमत्र ।

[1195] ५ यतोनेन दीर्घादिवर्ण्णस्य प्रतिभासो गृह्येत ।

[1196] ६ यश्चाक्षप्रत्ययः स्पष्टप्रतिभासस्तस्य वर्णभागेष्वनुसन्धायी दीर्घादिप्रत्ययो नास्ति ।

[1197] ७ ग्राहकज्ञानानुभवस्यानन्तरजा तृतीया ।

'अर्थस्य' ग्राह्यस्य 'तत्संवित्तेश्च' विजातीयाव्यव[1198] कीर्णत्वात् । 'सततं भासमानयोर'नयोरविच्छेद[1199] भासनस्य (। ५००)

....2.501 बाधकेऽसति सन्न्याये विच्छिन्ने इति तत्कुतः ।
बुद्धीनां शक्तिनियमादिति चेत्स कुतो मतः ॥ ५०१ ॥

'बाधके' संश्चासौ 'न्यायश्च' तस्मिन् प्रमाणभूते बाधके'ऽसती'त्यर्थः । तेऽर्थसंवित्ती ज्ञानज्ञानेन 'विच्छिन्ने इति' यदुच्यते 'तत्कुतः[1200] । बुद्धीनामे'कैकबुद्धिजनन'शक्तिनियमात्' न ग्राह्यबुद्ध्या सह तद्ग्राहिका बुद्धिर्भवति । ततो विच्छिन्नतयाऽर्थदर्शन'मिति चेत् । स' युगपत् ज्ञानानुत्पादः 'कुतो' हेतोर्मतः । (५०१)

...2.502a युगपद् बुद्ध्यदृष्टेश्चेत् तदेवेदं विचार्यते ।

'युगपद् बु (द्) ध्यो'रुत्पन्नयोर'दृष्टेश्चेत्' यद्यदर्शनं प्रमाणं विच्छेदस्यापि तदस्तीति सोप्ययुक्ताभ्युपगमः । अथ विच्छेदादर्शनेपि विचारात् सा सिध्यति तदा 'तदेवेदं युगपद् बुद्ध्य'दर्शनमपि बाध्यतया न युगपद् बुद्ध्युत्पादबाधनासमर्थमिति 'विचार्यते' । तत् किमस्योपन्यासेन ।

### च. न युगपत् चित्तद्वयसंप्रतिपत्तिः

ननूक्तं भ ग व ता ऽस्था[1201] नमेतत् यत् द्वे चित्ते युगपत् संप्रतिपद्येयातामि ति । तत्कथमित्याह (।)

...2.502b तासां समानजातीये सामर्थ्यनियमो भवेत् ॥ ५०२ ॥

'ता[1202] सां' बुद्धीनां विकल्पिकानामिन्द्रियजानाञ्च 'समानजातीय' एकस्मिन् ज्ञाने कर्त्तव्ये 'सामर्थ्यनियम'स्तथा भगवता 'प्रतिपादितो भवेत्' । ततो ग्राह्य[1203] ग्राहकमसमानजातीयं बुद्धिद्वयमपि सह जायेत । समानजातीयन्तु न सह जायते । (५०२)
[269/s]

...2.503a तथा हि सम्यक् लक्ष्यन्ते विकल्पाः क्रमभाविनः ।

'तथा हि विकल्पाः क्रमभाविनः सम्यग् लक्ष्यन्ते' । इन्द्रियज्ञानानि च समानजातीयानि क्रमवन्ति च दृश्यन्ते । विकल्पेन्द्रियज्ञाने चक्षुःश्रोत्रादिज्ञाने च सहोत्पद्यते (न्ते) ।

### (४) प्रत्यभिज्ञाचिन्ता

### क. एकत्वमन्तरेण प्रत्यभिज्ञानम्

...2.503b एतेन यः समक्षेर्थे प्रत्यभिज्ञानकल्पनाम् ॥ ५०३ ॥

[1198] १ इन्द्रियज्ञाने अर्थोपि निरन्तरं भासते तज्ज्ञानमपि तदाकारं सम्वेद्यतेऽक्षसिद्धं ।
[1199] २ प्रत्यभिज्ञा नेह विच्छेदावसायसाधकं किञ्चित्प्रमाणमस्ति ।
[1200] ३ यस्मिन्विच्छेदे सति कल्पिकया घटनं ।
[1201] ४ वैभाष्यः स्ववित्तिं नेच्छति ।
[1202] ५ आभिप्रायिकमेतत् ।
[1203] ६ विषयज्ञानन्तदनुभवज्ञानश्च ।

...2.504a स्पष्टावभासां प्रत्यक्षां कल्पयेत् सोपि वारितः ॥

‘एतेन’ विकल्पाविकल्पयोः सहोत्पादेन यो ‘मीमांस[1204] कः समक्षे’ प्रत्यक्षे‘ऽर्थे स’ एवायमित्येक[1205] त्वविषयां ‘प्रत्यभिज्ञानाख्यां कल्पनां’ (५०३) ‘स्पष्टप्रतिभा[1206] सां प्रत्यक्षां’ प्रमाणं ‘कल्पयेत् सोपि निवारितः’ । विकल्पो हि विकल्पितार्थगोचरत्वादस्पष्टप्रतिभास एव । विष ( ?श) दप्रतिभासनेन्द्रियज्ञानेन सहभावित्वात् स्पष्ट-[53a/MA] ग्राह्यारोपोऽध्यवसीयते ।

किञ्चैकत्वमन्तरेणापि प्रत्यभिज्ञानं दृश्यते इति दर्शयन्नाह (।)

...2.504b केशगोलकदीपादावपि स्वष्टावभासनात् ॥ ५०४ ॥

लूनपुनर्जाते ‘केशादौ’ मायाकारदर्शिते ‘गोलकादौ’ क्षणविनाशि‘दीपादौ । स्पष्टावभासनात्’ । (५०४)

....2.505 प्रतीतभेदेप्यध्यक्षा धीः कथन्तादृशी भवेत् ॥
तस्मान्न प्रत्यभिज्ञानाद्वर्णाद्येकत्वनिश्चयः ॥ ५०५ ॥

प्रत्यक्षात् ‘प्रतीते भेदे’ सा प्रत्यभिज्ञा ‘तादृशी’ एकत्वाध्यवसायिनी दृश्यमाना‘ध्यक्षाधीः कथं[1207] भवेत्’ । प्राप्नोति च प्रत्यभिज्ञा प्रत्यक्षवादिनो म[1208] ते । ‘तस्मान्नास्ति प्रत्यभिज्ञानाद् वर्णाद्ये [1209] कत्वनिश्चयः’ । (५०५)
[270/s]

....2.506 पूर्व्वानुभूतस्मरणात्तद्धर्मारोपणाद्विना ।
स एवायमिति ज्ञानं नास्ति तच्चाक्षजे कुतः ॥ ५०६ ॥

यस[1210] मा‘त्पूर्व्वानुभूतस्यार्थस्य’ स्मरणा‘त्तद्धर्मस्य’ विद्यमानत्वे‘नारोप[1211] णात् विना स एवायमिति’ ज्ञानमेकत्वविषयं नास्ति(।) तच्च पूर्व्वानुभूतस्मरणं तद्धर्मारोपणञ्चाक्षजे वर्तमानवस्तुबलभाविनि कुतः सम्भवति । (५०६)

## (ख. अविच्छिन्नं वर्णादिदर्शनम्)

स्यादेतद् (।) अर्थज्ञानयोर्युगपत्स[1212] म्भवे सत्यविच्छिन्नं वर्णादिदर्शनं स्यादित्याह (।)

....2.507 न चार्थज्ञानसम्वित्योर्युगपत्सम्भवो यतः ।
लक्ष्येते प्रतिभासौ द्वौ नार्थार्थज्ञानयोः पृथक् ॥ ५०७ ॥

...2.508a न ह्यर्थाभासि च ज्ञानमर्थो बाह्यश्च केवलः ।

---

1204 १ जैमिनीयः ।
1205 २ विकल्प एव प्रत्यभिज्ञा ।
1206 ३ विषयज्ञानन्तदनुभवज्ञानञ्च परो भ्रान्त्या ।
1207 ४ एकत्वसाधनाभिमतस्यानेकत्रापि दर्शनात् ।
1208 ५ इति साध्यं हेतुः परं ।
1209 ६ रूपादिः ।
1210 १ स्वीकृत्येन्द्रियत्वं दूषयित्वा ऐन्द्रियस्वभावमधुनाह ।
1211 २ अतीतारोपं विना स एवायमिति नास्ति ।
1212 ३ बौद्धेन स्वीकृतयुगपज्ज्ञानसम्भवे सति ।

न चार्थज्ञानयोर्ये सम्वित्ती तयो'र्युगपत्सम्भवो'स्ति (।) यतोर्थस्या'र्थज्ञान'स्य द्वौ 'प्रतिभा-[1213] सौ पृथग्न' भेदन 'ल[1214] क्ष्यते' । (५०७) न ह्य'र्थाभासि' तत् 'ज्ञानं । अर्थो बाह्यश्च केवेलो' बुद्धिव्यतिरिक्त इति द्वौ प्रतिभासौ सम्भवतः ।

स्यादेतत् । अर्थज्ञानज्ञानयोर्भिन्नावेव प्रतिभासौ केवलं तदुत्तरया विकल्पबुद्ध्या एकत्वेन गृह्येते अत्राह (।)

...2.508b एकाकारमतिग्राह्ये भेदाभावप्रसङ्गतः ॥ ५०८ ॥

'एकाकारया मत्या' विकल्पिकया 'ग्राह्ये'ऽर्थज्ञानयोर्ज्ञाने यदि तदा तयोर्भेद[1215] स्या-'भावप्रसङ्गत' एकत्वमेवाभ्युपगन्तव्यं । अर्थज्ञानज्ञानयोः प्रतिभास'भेदाभावात्' । (५०८)

....2.509 सूपलक्षेण भेदेन यौ सम्वित्तौ न लक्षितौ ।
अर्थार्थप्रत्ययौ पश्चात् स्मर्येते तौ पृथक् कथम् ॥ ५०९ ॥

[271/s]

अर्थश्चार्थप्रत्ययश्चा'र्थार्थप्रत्ययौ सूपलक्षेण भेदेन संवित्तावनुभवे, न लक्षितौ । तौ पश्चात् कालान्तरे पृथग्' भेदेनायमर्थोऽर्थज्ञा[1216] नश्चेदमिति 'कथं स्मर्येते' युगपदर्थज्ञानतज्ज्ञानयोरुत्पादे प्रतिभासनानात्वप्रसङ्गात् । (५०९)

....2.510 क्रमेणानुभवोत्पादेप्यर्थार्थमनसोरयम् ।
प्रतिभासस्य नानात्वचोद्यदोषो दुरुद्धरः ॥ ५१० ॥

अर्थार्थमनसोः 'क्रमेणानुभवोत्पादेपीष्यमाणेऽयं प्रतिभासस्य नाना[1217] त्वचोद्य'लक्षणो 'दोषो दुरुद्धरः' । द्वयप्रतिभासस्य क्रमेणाभ्युपगमात् । (५१०)

....2.511 अर्थसंवेदनं तावत्ततोर्थाभासवेदनम् ।
न हि संवेदनं शुद्धं भवेदर्थस्य वेदनम्[1218] ॥ ५११ ॥

....2.512 तथा हि नीलाद्याकार एक एकं च वेदनम् ।
लक्ष्यते न तु नीलाभे वेदने वेदनं परम् ॥ ५१२ ॥

न चार्थज्ञानं ज्ञानश्च कदाचिद् भेदेन प्रतीयते[1219] । (५११) 'तथा हि नीलाद्याकार एको' ग्राह्यतया 'एकश्च' तद्ग्राहकं 'वेदनं लक्ष्यते न तु नीलाभे वेदने' पृथग् ग्राहक'मपरं वेदनं' लक्ष्यते । तस्माज्ज्ञानस्य विदितस्यान्येनानुभवासम्भवे स्ववेद[1220]नमेव तदिति व्यवतिष्ठते ॥ (५१२)

किञ्च (।)

...2.513a ज्ञानान्तरेणानुभवो भवेत्तत्रापि च स्मृतिः ।
दृष्टा; तद्वेदनं केन तस्याप्यन्येन चेत्;

1213 ४ बौद्धेन स्वीकृतयुगपज्ज्ञानसम्भवे सति ।
1214 ५ उपलब्धिलक्षणप्राप्तस्यानुपलब्धेः ।
1215 ६ बुद्ध्याकाराभेदादर्थभेदेन ।
1216 १ स्मर्येते च तस्मान्न युगपद् द्वयं ।
1217 २ पूर्व्वेन्द्रियज्ञानस्य मनसानुभवेपि युगपद् भानम्मा भूद्विच्छिन्नमुत्पद्येत ।
1218 * त्विकृतात्त्वविवृतैषा ।
1219 ३ अर्थज्ञानं ज्ञानज्ञानारूढमिति ।
1220 ४ एकोऽर्थाकारः सम्वेदनाकारश्चेत्यप्रसङ्गोऽत्र ।

नीलादिविषयस्य ज्ञानस्य ‘ज्ञानान्तरेणानुभवो भवेत्[1221] । तत्रापि ज्ञान-’ ज्ञानेपि हि[1222] ‘स्मृति’र्दृष्ट । यदा ज्ञानान्तरालम्बकं ज्ञानं क्रमेण स्मर्यते न चागृ[272/s] हीतं स्मर्यते इति तस्य ज्ञानज्ञानस्य वेदनं वक्तव्यं । ‘तत् केनास्तु वेदनं’ यदि स्वसम्वेदनेन ‘तदा पूर्व्वकस्यापि’ तथा स्थितिर्व्यर्थमन्येन वेदनाङ्गीकरणं (।) ‘तस्याप्यन्येन[1223] चेद्वेदनं’ तदा (।)

...2.513b इमाम् ॥ ५१३ ॥

....2.514 मालां ज्ञानविदां कोयं जनयत्यनुबन्धिनीम् ॥
पूर्व्वा धीः सैव चेन्न स्यात्सञ्चारो विषयान्तरे ॥ ५१४ ॥

ज्ञानवृत्तीनामि‘मां’ (५१३) ‘मा[1224] लामनुबन्धिनीं’ प्रबन्धप्रवृत्तां ‘को जनयति । न’ तावदर्थेन्द्रियादिसामग्री तस्या अर्थज्ञानमात्रजननव्यापारत्वात् । ‘सैव’ ग्राह्या ‘धीः’ पूर्व्विका स्वग्राहिकां धियं जनयति सा च स्वग्राहिकामिति । प्रबन्धप्रवृत्तिरिति ‘चेत्’ । एवं सति स्वकारणग्रहणप्रवणत्वा‘द्विषयान्तरे’ ज्ञानादन्यस्मिन्नर्थे ‘सञ्चारो’ ग्राहकत्वेन प्रवृत्तिर्न ‘स्यात्[1225]’ । (५१४)

तथा हि (।)

....2.515 तां ग्राह्यलक्षणप्राप्तामासन्नां जनिकां धियम् ।
अगृहीत्वोत्तरं ज्ञानं गृह्णीयादपरं कथम् ॥ ५१५ ॥

[53b/MA]

‘जनिकां धियमासन्नां ग्राह्यलक्षणप्राप्ता’मगृहीत्वोत्तरं ‘ज्ञानमपरं’ विषयं ‘कथं गृह्णीयात्’ । (५१५)

प्रत्यासन्नेनार्थेन प्रतिबद्धशक्तित्वात् पूर्व्वा धीरर्थग्राहकमेव ज्ञानं जनयति न स्वग्राहकमिति चेत् । आह (।)

....2.516 आत्मनि ज्ञानजनने स्वभावे नियताञ्च ताम् ।
को नामान्यो विबध्नीयाद् बहिरङ्गोऽन्तरङ्गिकाम् ॥ ५१६ ॥

‘आत्मनि विज्ञानजनने’ स्वग्राहकज्ञानोत्पादके ‘स्वभावो नियतां’ व्यवस्थितां च तामिमाम‘न्तरङ्गिकामन्य’निरपेक्षत्वात् ‘को नामान्योर्थो बहिरङ्गः’ स्वज्ञानजनने चक्षुर्मनस्काराद्यपेक्षित्वा‘द्विबध्नीयात्’ । स्वग्राहकज्ञानजननप्रवृत्तां तिरस्कुर्य्यात् । येन विषयान्तरसञ्चारो धियः स्यात् । (५१६)

....2.517 बाह्यः सन्निहितोप्यर्थः तां विबध्नन् हि न प्रभुः ।
धियं नानुभवेत् कश्चिदन्यथार्थस्य सन्निधौ ॥ ५१७ ॥

[273/s]

---

[1221] ५ शास्त्रकृत् स्वयं परित्यज्याचार्यीयमाह (।) न ह्यसौ स्मृतिरभावितेषु जात इत्याचार्येण स्वसम्वित्तिसाधनायोक्तं । परेणात्र सिद्धसाधनमुक्तं विनापि स्वसंवित्तिं ज्ञानान्तरेण संविद् भविष्यतीति सिद्धान्तितमत्र । ज्ञानान्तरेणानुभवेऽनिष्टा तत्रापि हि स्मृतिः विषयान्तरसञ्चारस्तथा स्यात् स चेत् स इति व्याचष्टे ।

[1222] ६ भवतु नाम, तथापि चात्र स्मृतिर्दष्टासीन् मे ज्ञानज्ञानमिति सा न स्यात् स्वयन्तस्याननुभवात् ।

[1223] १ अनवस्था स्यादेवं ।

[1224] २ स्वकं विषयान्तरासञ्चारन्तावदाह त्यक्त्वाचार्यीयं ।

[1225] ३ एकार्थविषयैव ज्ञानपरम्पराऽसञ्चारं स्यात् ।

तस्माद्वा'ह्यः सन्निहितोप्यर्थस्तां' स्वग्राहकज्ञानजनने शक्तां 'धियं विबध्नन्' प्रतिहातुं 'न' प्रभुः शक्तः । 'अन्यथा' यद्येवं नाभ्युपगम्यते 'तदार्थस्य सन्निधौ' तत् ज्ञानस्यैवोत्पादनात् ज्ञानज्ञानस्यानुत्पादाद्धियं कश्चिन्नानुभवेत् । (५१७)

....2.518 न चासन्निहितार्थास्ति दशा काचिदतो धियः ।
उत्खातमूला स्मृतिरप्युत्सन्नेत्युज्ज्वलं मतम् ॥ ५१८ ॥

'न च काचिद्दशा सन्निहितार्था/?/[1226] /?/स्ति' यत्र ज्ञानज्ञानमुत्पद्येत नार्थज्ञानमिति न स्यादनुभवो बुद्धेः । तस्माद् 'धियः स्मृतिरप्यु त्खातमूला उत्सन्ना' बुद्धिस्मरणस्य हि मूलं बुद्ध्यनुभव 'इति' ज्ञानाननुभवे कुतः स्मरणमिति ज्ञानान्तरेण ज्ञानानुभववादिना'मुज्ज्वलं मतमि'त्युपहसति । (५१८) किञ्च (।)

....2.519 अतीतादिविकल्पानां येषां नार्थस्य सन्निधिः ।
सञ्चारकरणाभावादुत्सीदेदर्थचिन्तनम् ॥ ५१९ ॥

येषामतीताद्यर्थ[1227] विषयाणां विकल्पानामर्थस्य सन्निधिर्नास्ति यः पूर्व्वकस्य ज्ञानस्य स्वग्राहकज्ञानजननशक्तिं प्रतिबध्नीयात् येन विषयान्तरग्राहिणो विकल्पाः स्युः । तत्र सञ्चारकारणस्यार्थस्य विकल्पविषयस्याभावात् कस्यचि'दतीतादेरर्थ'स्य चिन्तनं 'विकल्पनमुत्सीदे'त् । (५१९)

स्यादेतत् (।)

...2.520a आत्मविज्ञानजनने शक्तिसंक्षयतः शनैः ।
विषयान्तरसञ्चारो यदि;

तज्ज्ञानानामा'त्मनि' ग्राहक'ज्ञानजनने शनैः' क्रमेण स्वग्राहकज्ञानजनिकायाः 'शक्तेः संक्षयतः' तथाभूतज्ञानानुत्पत्तौ 'विषयान्तरे सञ्चारो' ज्ञानप्रवृत्ति'र्यदि' कथ्यते ।

...2.520b सैवार्थधीः कुतः ॥ ५२० ॥

...2.521a शक्तिक्षये पूर्वधियो न हि धीः प्राग्धियां विना ।

तदा पूर्व्वधियः शक्तिक्षये सति 'सैवार्थ'ग्राहिका 'धीः कुतो' जा[1228] यते । (५२०) न हि प्राग्धिया पूर्व्विकां धियं समर्थां विनोत्तरमर्थज्ञानमुत्पद्यते ।

...2.521b अन्यार्थाशक्तिविगुणे ज्ञाने ज्ञानोदयागतेः ॥ ५२१ ॥

[274/s]

यदि च सा-शक्तत्वात् स्वग्राहिकाम्धियं कर्त्तुमसमर्थार्थधियमपि न कुर्य्यात् ।[1229] तथा ह्यन्यस्मि'न्नर्थे आसक्ति'रभिष्वङ्गस्तया 'विगुणे' पूर्व्वे 'विज्ञाने' तदुत्तरस्य 'ज्ञानस्योदयागतेः' जन्माप्रतीतेः पूर्व्वबुद्धेः सामर्थ्यादुत्तरबुद्धेर्जन्मेति निश्चीयते (।) ततः समर्था पूर्व्वबुद्धिः स्वग्राहिणीमेव धियं जनयेत् । तत्र परापेक्षाविरहात् । (५२१)

न[1230] न्वा ल य वि ज्ञा नात् सकृत् षट् प्रवृत्तिविज्ञानानि जायन्त इतीष्यते ततत्सान्यर्थाशक्तिवैगुण्येपि पू[1231] र्व्वचेतस आलयज्ञानान्तरं जायेरन् आलयज्ञानस्याव्याहतशक्तित्वा-

[1226] १ पञ्चस्कन्धके भवे सदैवार्थः ।

[1227] २ भवतु नामाध्यक्षेषु विषयेषु सञ्चारोऽतीतानागतविकल्पे तु नार्थो यः ।

[1228] ३ अर्थबुद्धिजननापेक्षया पूर्व्वाऽन्त्या तस्याः क्षये सर्व्वा बुद्धिं न जनयेदविशेषात् ।

[1229] १ कुत एतदिति युक्तिमाह । सन्निहितेपि विषये ज्ञानोत्पादानुपलब्धेः ।

दित्याह[1232] (।)

....2.522 सकृद्विजातीयजातावप्येकेन पटीयसा ।
चित्तेनाहितवैगुण्यादालयान्नान्यसम्भवः ॥ ५२२ ॥

सकृद्विजातीया[1233] नां प्रवृतिज्ञानानां जातावप्यालयज्ञानादिष्टायामेकेन चित्तेन 'स्वविषयासक्तेन' पटीयसा विषयान्तरज्ञानजननं प्रत्याहितमारोपितं 'वैगुण्यं यस्य तस्मादालयादन्य'स्य विषयान्तरग्राहिज्ञानस्य 'सम्भवो न' भवति । (५२२)

न ह्यालयज्ञानमित्येव प्रवृत्तिज्ञानानि भवन्ति (।) किन्तु मनस्कारसाद्गुण्यम'पेक्षन्तेऽन्यथा' यद्येवं नेष्यते तदा (।)

....2.523 नापेक्षेतान्यथा साम्यं मनोवृत्तेर्मनोन्तरम् ।
मनोज्ञानक्रमोत्पत्तिरप्यपेक्षा-प्रसाधनी ॥ ५२३ ॥

[54a/MA]

'मनसः समनन्तर'प्रत्ययस्य वृत्तेः 'साम्य[1234] म'र्थान्तरानासक्तत्वेनानुकूल्यमुत्पित्सु 'मनोऽन्तरं नापेक्षे'त । अपेक्षते च । ततो मनस्कारानुकूलता-सापेक्षादालयात् ज्ञानोत्पत्तिः । तथा 'मनोज्ञानानां' विकल्पानां 'क्रमेणोत्पत्ति'र्युगपदनुत्पादो'प्यु'त्तरज्ञानानां 'पूर्व्वज्ञानापेक्षा प्रसाधनी' । (५२३)

....2.524 एकत्वान्मनसोन्यस्मिन्सक्तस्यान्यागतेर्यदि ।
ज्ञानान्तरस्यानुदयो न कदाचित्सहोदयात् ॥ ५२४ ॥

[275/s]

अविगुणपूर्व्वज्ञानानपेक्षायामालयादिन्द्रियज्ञानानीव विकल्पज्ञानान्यपि सह जायेरन् ।[1235] अणुपरिमाणस्य नित्यस्यैकस्य 'मनसोऽन्यस्मिन्नि'न्द्रिये 'सक्तस्यान्यत्रेन्द्रियान्त'रेऽगतेरगमनादिन्द्रियान्तरजस्य 'ज्ञानान्तरस्यानुदयो' यदि सम्मतः । सो पि न युक्तः । 'कदाचिद्' नर्तकीदृष्ट्यवस्थादिष्वनेकविषयसन्निपाते चक्षुरादि[1236]ज्ञानानां सहोदयात् ।(५२४)

यदा च न पटीयान् कश्चिद्विषयः प्रत्युपतिष्ठते पुरुषस्य च न क्वचिद्विशेषेणेच्छा भवति तदा[1237] (।)

....2.525 समवृत्तौ च तुल्यत्त्वात्सर्व्वदान्यागतिर्भवेत् ।
जन्म चात्ममनोयोगमात्रजानां सकृद् भवेत् ॥ ५२५ ॥

अर्थपुरुषेच्छायाः 'समा'यां साधारणायां 'वृत्तौ च' मनस एकेन्द्रियसम्बद्धस्य तुल्यत्वाद्विषयान्तरे प्रेरकाभावात् उदासीनत्वात् 'सर्व्वदा' तदिन्द्रियज्ञानोत्पत्तौ सत्या'मन्य'स्येन्द्रिया-

1230 २ विज्ञानवादिन आलय (विज्ञानं) विविधवासनाभावितं नदीस्योतोवदविरतं इन्द्रियज्ञानानां प्रवर्तकं ।

1231 ३ मनसः ।

1232 ४ न च प्रवर्तन्ते इति मन एवोपादानं नालयं ।

1233 ५ आलयाद्विजातीयत्वं । मनसो व्याकृतत्वेन, ऐन्द्रियाणां च कादाचित्कत्वेन ।

1234 ६ आलयाद्विजातीयत्वं । अवैगुण्यं साम्यं ।

1235 १ यतो विषयान्तरादिदुक्षुः स्यात् ।

1236 २ सकृदपि दीर्घशष्कुलीसमर्मरर्ध्वानं समुद्वहद्वहलामोदां धवलादिरसान्वितां अतिस्पर्शवतीं कुड्यां मिश्रतो (? ता) नेकेन्द्रियज्ञानस्य सम्वेदनात् स्फटिकतुल्ये समनन्तरे सकृत्संगतसर्व्वार्थेष्विन्द्रियेष्वसत्स्वपीत्यादो साधितं प्राक् ।

1237 ३ वैशेषिक आह (।) अणु मनोद्रव्यं पृथिव्यादिद्रव्येषु पतितं । ज्ञानन्त्वात्मगुणो नवस्वात्मगुणेषु मध्ये पाठात् ।

न्तरज्ञानज्ञेयस्या'गतिर्भवेत्' प्रतीतिर्न स्यात् । अस्ति च क्वचिदनासक्तस्य विषयान्तरेष्वेकस्याप्यनेकार्थदर्शनं ।[1238] 'आत्ममनोयोगमात्रजानां' विषयानिरपेक्षाणां सुखादिज्ञानानामिन्द्रियमनोयोगविशेषस्य निया[1239] मकस्याभावात् 'सकृद्' वा 'जन्म' स्या त् । (२२५)

....2.526 एकैव चेत्क्रियैकः स्यात् किन्दीपोऽनेकदर्शनः ।
क्रमेणापि न शक्तं स्यात्पश्चादप्यविशेषतः ॥ ५२६ ॥

न हि रूपादिबुद्धीनामेव सुखादिबुद्धीनामिन्द्रियमनोयोगविशेषात् प्रतिनियमः शक्यो वक्तुं एकस्मान्मन[1240]स 'एकैव' सुखादिबुद्धिलक्षणा 'क्रिया' जायते न च द्वे इति 'चेत्' । यद्येवं 'किं' कस्मा'द्दीप' एको'ऽनेकदर्शनो'ऽनेकद्रष्टृज्ञानजनकः । द्रष्टुर[276/s] नेकत्वादेको[1241] प्यनेकज्ञानजनक इति चेत् । ज्ञेयस्यानेकत्वात्तद्ग्राहकानेक[1242]ज्ञान जन[1243] कोपि स्यादिति समानं । किञ्च (।) मनो नित्यमेकदापि सर्व्वज्ञानजननशक्तं न वा । शक्तश्चेत् सर्व्वज्ञानानि सकृत् कुर्यात् । अशक्तश्चेत् । 'क्रमेणापि' तज्जनने 'न शक्तं' स्यात् । पूर्व्वावस्थितस्याशक्तस्य रूपस्य 'पश्चादप्यविशेषतो विशेषाभावात्[1244]' । (५२६)

....2.527 अनेन देहपुरुषावुक्तौ संस्कारतो यदि ।
नियमः स कुतः पश्चात् बुद्धेश्चेदस्तु सम्मतम् ॥ ५२७ ॥

'अनेन' मनसः शक्तत्वाशक्तत्वविकल्पाद्दोषद्वयेन 'देहपुरुषौ' शरीरात्माना'वुक्तावु'क्तोत्तरौ । तयोरपि तथा[1245] विकल्पे तथादोषसद्भावात् ज्ञानजातज्ञानहेतोः 'संस्कारतो' बुद्धीनामसकृद्-'भावनियमो यदीष्ट'स्तदा संस्कारस्य 'कुतः पश्चा[1246] दु'त्पन्नो बुद्धीर्नियमयेत् । बुद्धेः पूर्व्विकाया उपपद्यत इति चेत् (।) अस्तु पूर्व्वस्या 'बुद्धे'र्व्वासनासंज्ञकस्य संस्कारः स बुद्ध्यात्मनो जन्म 'सम्मत'मस्माकं (।) तथा च यदुक्तं न हि धीः प्राग् धिया विने??ति तदेव प्रसाधितं स्यात् । ततश्च बुद्धेर्बुद्ध्यन्तरजन्मनः सामर्थ्यादुत्तरया धिया पूर्व्वबुद्धिर्गृह्येतेति न स्याद्विषयान्तरसञ्चारोस्याः । (५२७)

स्यादेतत् । बुद्धेरुपादानतामात्रं बुद्ध्यन्तरं प्रति न तद्ग्राह्यता ततो विषयान्तरसञ्चारो भवेदित्याह (।)

...2.528a न ग्राह्यतान्या जननाज्जननं ग्राह्यलक्षणम् ।
अग्राह्यं न हि तेजोस्ति;

'न' बुद्ध्यन्तर'जननादन्या' तद्ग्राह्यता । किन्तर्हि जननमेव 'ग्राह्यस्य लक्षणं' । तच्चेदस्ति कुतो ग्राह्यताया अभावः (।) 'न हि तेजो' ज्योतिर्बुद्धेर्जनकतयाऽ[277/s] 'ग्राह्यमस्ति' ।

1238 ४ यत्रात्मा मनसा तदिन्द्रियेण तद्विषयेण तत्र क्रमोत्पत्तिकल्पनैवं स्यादपि । आत्ममनसोर्नित्यत्वादविशेषात्तत्प्रतिबद्धसन्निकर्षोप्यविशिष्टः ।

1239 ५ न क्रमनियामकं मन एकत्वात् सकृदात्मसंयोगात् ।

1240 ६ आत्मानं कर्त्तारमपेक्ष्य कारणभूतात् ।

1241 १ मनसः करणानां न स्वातन्त्र्यं कर्तृवशवृत्तेः कर्त्रैरैक्ये (इ) न्द्रियैक्यमनेकत्वे तु एककरणेनाप्यनेका क्रिया परस्य ।

1242 २ पूर्व्वानुवाद (:) । न तर्हि मनो नियामकं ज्ञानानामात्मैव सवासनो नियामकः स्यात् ।

1243 ३ युगपत्

1244 ४ न सहकार्यपेक्षाप्यनाधेयातिशयस्य ।

1245 ५ एकदेहादिकज्ञानं वैभाष्यस्य पुद्गलनामा पुरुषोपि । स सांख्यस्यात्मा इष्टः ।

1246 ६ नित्यत्वे सकृद्भाव एव अनित्यत्वे तु प्रश्नः ।

तस्मा[1247] दिदमेव बुद्धिं प्रति ग्राह्यत्वं ग्राह्यस्य यत्तत् ज्ञानं नाम ॥
[54b/MA]

ननु च तेजसो बुद्धिजनकस्य सूक्ष्मो व्यवहितः सन्निहिततरश्च कश्चिदवयवो यथा न गृह्यते तथा जनिकापि बुद्धिर्न गृह्येतेत्याह[1248] ।

...2.528b न च सौक्ष्म्याद्यनंशके ॥ ५२८ ॥

'अनंशके' निरवयवे ज्ञाने 'सौक्ष्म्यं' सूक्ष्मत्वं नास्ति । आदिशब्दात् स्वसन्तानवर्तित्वा-व्यवधानात्यासत्त्यादयश्चानुपल (म्भ) हेतवो न सन्ति । (५२८)

स्यादेतत् (।) ज्ञानस्य द्वे शक्ती ज्ञानजननशक्तिर्ग्राह्यताशक्तिश्चतत्र क्रमेण ग्राह्यताशक्तिहानौ जननशक्तिमात्रमवतिष्ठत इत्याह (।)

....2.529 ग्राह्यताशक्तिहानिः स्यात् नान्यस्य जननात्मनः ।
ग्राह्यताया न खल्वन्यज्जननं ग्राह्यलक्षणे ॥ ५२९ ॥

'अन्यस्य' ज्ञानकार्यभूत'जननात्मनो' जनकस्वभावस्य पूर्व्वज्ञानस्य 'ग्राह्यताशक्तिहानिर्न स्यात्' । जननस्य ग्राह्यलक्षणत्वात्तस्य च सत्त्वात् । तथाहि 'ग्राह्यलक्षणे'ऽक्षवि[1249] द्युपलभ्यमाने[1250] 'न खलु ग्राह्यताया अन्यत्' साक्षा'ज्जननं' । यदेवोत्तरोत्तरज्ञानस्य साक्षाज्जननं तदेव तद्ग्राह्यत्वं (।) ततो जननसत्त्वे नास्ति ग्राह्यत्वहानिः । (५२९)

....2.530 साक्षान्न ह्यन्यथा बुद्धे रूपादिरुपकारकः ।
ग्राह्यतालक्षणादन्यस्तद्भावनियमोस्य कः ॥ ५३० ॥

न 'ह्यन्यथा साक्षा'ज्जननादन्येन प्रकारेण 'रूपादिर्दृ'श्यमानो 'बुद्धे'र्ग्राहिकाया 'उपकारकः' । परस्परोपकारिणोपि ग्राह्यत्वे रूपकारणग्रहणमपि स्यात् । अनुपकारकस्य ग्राह्यत्वे सर्व्वग्रहणप्रसङ्गः । तस्मा'दस्य' रूपादे'र्ग्राह्यतालक्षणाद्दे'शाद्यवि[1251] प्रकर्षिणः साक्षाज्जनकत्वादन्यः 'कस्तद्भावनियमो' ग्राह्यत्वनियमः । (५३०)

....2.531 बुद्धेरपि तदस्तीति सापि सत्त्वे व्यवस्थिता ।
ग्राह्योपादानसंवित्ती चेतसो ग्राह्यलक्षणम् ॥ ५३१ ॥

[278/s]

'तत्साक्षा'ज्जनकत्वलक्षणं ग्राह्यत्वं 'बुद्धेरप्यस्तीति सा'प्युत्तरबुद्धिजनिका 'तथैव' तद्ग्राह्यत्वे 'व्यवस्थिता' रूपादिषु कारणत्वेपि देशाद्यविप्रकर्षश्चक्षुराद्युपयोगश्चापेक्ष्य तद्ग्राह्यतेष्यते । 'चेत'सस्तु देशादिविप्रकर्षाभावाच्चश्चुराद्युपयोगाभावाच्च ग्राहिणो ज्ञानस्योपादानमुपादानकारणता सम्वित्तिरनुभवात्मता ते 'ग्राह्यलक्षणं' । स्वसम्वेदनस्वभावतायां सत्यामुपादानकारणतोत्तरबुद्धिग्राह्यतेत्यर्थः । (५३१)

## (५) क. योगिनां ज्ञानम्

[1247] १ आलोको यदि न ग्राह्यो न जनयेदेव बुद्धिं ।

[1248] २ आलोकेप्यग्राह्यत्वं जनकत्वेन दृष्टमेव । अभ्युपगम्याह । आलोकः सावयव इति स्यादप्यग्राह्यता न त्वमूर्त्ते ज्ञाने ।

[1249] ३ ग्राहके रूपज्ञानादौ सति ।

[1250] ४ व्यवधानाभावात् स्वभावविशेषसंमुखीभावात् कारणान्तरसाकल्याच्च ।

[1251] ५ न बुद्धिमात्रं परबुद्धिसत्त्वात् । नोपादानमात्रमिन्द्रियत्वात् परमते । तस्माद् द्वयं ।

ननु सूक्ष्मव्यवहितासन्नरूपाद्यनुपादानश्च ज्ञानश्चेन्न ग्राह्यं तदा कथं यो[1252]गिनां तेषां ग्रहणमित्याह (।)

....2.532 रूपादेश्चेतसश्चैवमविशुद्धधियं प्रति ।
ग्राह्यलक्षणचिन्तेयमचिन्त्या योगिनां गतिः ॥ ५३२ ॥

रूपादेरसूक्ष्मस्याव्यवधानादिविशिष्टस्य बुद्धिकारणत्वं । 'चेतसश्चानुभ'वात्मत्वे सत्युपादानता ग्राह्यत्वमिति । एवमनेन प्रकारेण 'ग्राह्यलक्षणचिन्तेयं' प्रक्रान्ता 'अशुद्धधियं' वासनोपप्लुतबुद्धिमदर्व्वाग्दर्शिनं जनं प्रति न तु विशिष्टबुद्धीन् योगिनः प्रति (।) यस्मा[1253] 'द्योगिनां' सूक्ष्मव्यवहितपरचित्तदिगतिरचिन्त्या । भावसत्तामात्रं योगिज्ञानापेक्ष्यं ग्राह्यलक्षणमित्यर्थः । (५३२)

....2.533 तत्र सूक्ष्मादिभावेन ग्राह्यमग्राह्यतां व्रजेत् ।
रूपादि बुद्धेः किं जातं पश्चाद् यत् प्राङ् न विद्यते ॥ ५३३ ॥

'तत्रे'तादृशे ग्राह्यलक्षणद्वये स्थिते सति रूपं स्थूलमव्यवधानादिभावे सति 'ग्राह्यं' सत्पश्चात् 'सूक्ष्मादिभावेनाग्राह्यतां व्र'जेदिति युज्यत एवैतत् ।[1254] बुद्धेरेकदा ग्राह्यायाः 'पश्चाद'ग्रहणकाले 'किं' सूक्ष्मत्वाद्यग्राह्यताकारणं 'जातं यत् प्रागु'पलम्भकाले 'न विद्यते' । न हि स्वसन्तानवर्तितनश्चेसो निरवयवस्य सर्व्वदा किञ्चि[279/s] दुपलम्भकारणमस्ति । तादृशस्य यद्यनुपलम्भः कदाचिन्नोपलभ्येत । उपलभ्यते चेह कदाचित्सर्व्वदोपलम्भप्रसङ्गः ॥ (५३३)

....2.534 सति स्वधीग्रहे तस्मात्सैवानन्तरहेतुता ।
चेतसो ग्राह्यता सैव ततो नार्थान्तरे गतिः ॥ ५३४ ॥

'तस्मा'च्चित्तान्तरेण 'स्वधीग्रहे सति चेतसो' यैवान'न्तरहेतुता' बुद्ध्यन्तरं प्रति 'सैव ग्राह्यता' सा च नापैति 'तत' उत्तरोत्तरबुद्धेः पूर्व्वपूर्व्वबुद्धिग्रहणमेव व्यापार[55a/MA] इत्यर्था'न्तरे' न स्या'द् ग[1255] तिः' ॥ (५३४)

## ख. ग्राह्यताशक्तिहानादपि न जननशक्तिः

ननु भावा अनेकशक्तियो[1256] गादनेककार्यकारिण एकशक्तियोगादेककार्यकारिणः तत् ज्ञानस्य ग्राह्यताश[1257] क्तिरप्यन्या । अन्या च जनन[1258] शक्तिः । ततो ग्राह्यताशक्तिहानादपि जननशक्तिर्भविष्यतीत्याह (।)

....2.535 नानेकशक्त्यभावेपि भावो नानेककार्यकृत् ।
प्रकृत्यैवेति गदितं; नानेकस्मान्न चेद्भवेत् ॥ ५३५ ॥

[1252] १ यदि सौक्ष्म्यादेरग्राह्यं रूपादिरचित्तश्चानुपादानभूतत्त्वात्तदा योगिनां तदुभयं न ग्राह्यं स्यात् (।) भवति च तद् व्यभिचारि लक्षणं ।

[1253] २ समाधिबलेनैकजन्मकुशलेनापि देवेष्वष्टगुणैश्वर्यादिः किं पुनश्चिरेण वीतावरणानां ।

[1254] ३ रूपमग्राह्यं स्यादपि बुद्धेस्त्वेतत् सर्व्वं नास्तीति कथमग्राह्यता ।

[1255] १ न विषयान्तसञ्चार इत्युपसंहारः ।

[1256] २ दर्शकवादी ।

[1257] ३ कर्मरूपा ।

[1258] ४ कर्तृरूपा ।

'नानैकशक्त्यभा[1259] वेपि' भावव्यतिरिक्ताऽनेकासां शक्तीनामेकस्याश्च शक्तेरभावेपि भावः स्वहेतोर्नानैककार्यकारणस्वभावतयोत्पन्नो 'नानैककार्यकृत् प्रकृत्यैव' भवती'ति गदि[1260] तं' ।

ननु नानैकं कार्यमेकस्मात्कारणान्न भवेत्सिद्धा[1261] न्तविरोधादिति चेत् । (५३५)

### (६) हेतुसामग्र्याः सर्वसम्भवः

...2.536a न किञ्चिदेकमेकस्मात्सामग्रयाः सर्व्वसम्भवः ।

सत्यमेतन्न किञ्चि'त्कार्य'मेकस्मात्कारणाज्जायते किन्तु सामग्र्या जन्मानेकोपादानसहकारिभावसञ्चयात्मिकायाः सर्व्वस्यैकस्यानेकस्य च कार्यस्य सम्भवः ।

कथन्तर्ह्येकमनेकस्यं[1262] हेतुरुच्यत इत्याह (।)

...2.536b एकं स्यादपि सामग्र्योरित्युक्तं तदनेककृत् ॥ ५३६ ॥

[280/s]

चक्षुरूपालोकमनस्कारादिषु जायमानरूपक्षणेन्द्रियज्ञानकार्यद्वयापेक्षयाऽवान्तरभिन्तसामग्र्योरेकस्य रूपस्योपादानसहकारिभावेनोपयोगात् एकस्मादप्यनेकं कार्यं जायत इति तत एकमनेककार्यकृदित्युच्यते (।) न त्वेकस्मादसहायादनेकं कार्यं जायते इत्यभिप्रायात् (५३६)

स्यादेतत् (।)

...2.537a अर्थं पूर्व्वञ्च विज्ञानं गृह्णीयाद् यदि धीः परा ।

'धी'र्जायमाना 'पूर्व्वञ्च विज्ञानमर्थञ्च' तत्कालसन्निपतितं यदि 'गृह्णीयात्' तदा विषयान्तरसञ्चारः सम्भवेत् । अत्राह (।)

...2.537b अभिलापद्वयं नित्यं स्याद् दृष्टक्रममक्रमम् ॥ ५३७ ॥

पूर्व्वगृहीतस्य वर्णस्य चिन्तादावादिशब्दात् प्रत्यक्षेप्येकस्मिन् 'चेतसि' दृष्टः क्रमो यस्य तत् दृष्टक्रम'मभिलापद्वयं' वर्णद्वयं 'नित्यम'क्रमं 'स्यात्' युगपत्प्रतीयेतेत्यर्थः । (५३७) किं कारणमित्याह (।) 'पूर्व्वापरार्थभासित्वा[1263] त् चिन्तादि'ज्ञानेन हि पूर्व्ववर्णग्राहकज्ञानं गृह्येत इति तत्प्रतिभासी वर्णो गृह्येत । तत्का[1264] लोपनिपतितश्चान्यो वर्ण इति क्रमोपलभ्ययोर्युगपद् ग्रहणप्रसङ्गः ।

....2.538 द्विर्द्विरेकं च भासेत भासनादात्मतद्धियोः ॥ ५३८ ॥

एकश्च वर्णादि'र्द्विर्द्विर्भासेत' । आ[1265] त्मतद्धियोर्भासनात् । तद्दर्शने तत् ज्ञानदर्शने तु तदृष्टमिति द्विधा दर्शनप्रसङ्गः[1266] । (५३८)

---

[1259] ५ भिन्ना शक्तिरयुक्ता ।

[1260] ६ प्राक् ।

[1261] ७ स्वयूथ्याः ।

[1262] ८ तथानेककृदेकोपि तद्भावपरिदीपन इत्यत्र ।

[1263] १ प्रसङ्गसाधनमिदं यदि पूर्व्वापरावर्थावेकत्र भासेते इत्यर्थः ।

[1264] २ अवर्णचिन्तने अग्राहिज्ञानग्राहकं यदुत्तरमिवर्णग्राहकं तत्रेकारश्च पूर्व्वज्ञानारूढाकारश्च भासत इत्यभिलापद्वयमेकचित्तं स्यात् । न चास्ति ।

[1265] ३ विषयरूपमात्मा, तदिति तदालम्वनं ज्ञानं तयोः । एकदा ह्यकारः स्वग्राहिज्ञाने भाति पुनरिकारज्ञाने स्वज्ञानारूढः इत्येकवर्णचिन्तैव न स्यात् ।

[1266] ४ स्वयं सिद्धसाधनं परिहृत्याचार्यीयं समन्वयते परिहारं ।

## (७) आत्मानुभूतं प्रत्यक्षम्

....2.539 विषयान्तरसञ्चारे यद्यन्त्यन्नानुभूयते ।
परानुभूतवत्सर्व्वाननुभूतिः प्रसज्यते ॥ ५३९ ॥

अथ विषयज्ञाने वृत्ते तज्ज्ञाने चोत्पन्ने विषयदर्शनस्य निष्पन्नत्वात् [281/s] ज्ञानान्तरं विषयान्तरग्राहकमिति स्या'द्विषया[1267] न्तरसञ्चार' इत्यभिमते 'यद्यन्त्यं' ज्ञानं ज्ञानानुभवितृ 'नानुभूयते' तदा 'सर्व्व'स्यार्थस्य तत् ज्ञानस्य 'चाननुभूतिः प्रसज्यते' परानुभूतवत् । पुरुषान्तरानुभूतार्थतज्ज्ञानयोरिव (५३९) ।

ननु आत्मनाऽनुभूतमर्थ-तत्-ज्ञानं-प्रत्यक्षं न परैरनुभूतमिति यद्युच्यते ।

....2.540 आत्मानुभूतं प्रत्यक्षं नानुभूतं परैः यदि ।
आत्मानुभूतिः सा सिद्धा कुतो येनैवमुच्यते ॥ ५४० ॥

नन्वन्त्यज्ञानाननुभवेऽर्थज्ञानस्याननुभवात् । तदनुभवाभावे 'चार्थानुभवासिद्धेरात्मानुभूतिः सा कुतः सिद्धा । येनैवमुच्यते । आत्मानुभूतं प्रत्य[1268] क्षं' न परानु-[55b/MA] भूतमिति । (५४०)

ननु चक्षुरादावनर्थभूते चक्षुरादिना रूपाद्यनुभूतमिति यथा तथा ज्ञानाननुभवेप्यर्थो ज्ञात इति भविष्यतीत्याह (।)

....2.541 व्यक्तिहेत्वप्रसिद्धिः स्यात् न व्यक्तेर्व्यक्तमिच्छतः ।
व्यक्त्यसिद्धावपि व्यक्तं यदि व्यक्तमिदं जगत् ॥ ५४१ ॥

अर्थव्य'क्तिहेतो'श्चक्षुरादेरर्थदर्शनेप्य'प्रसिद्धिर'व्यक्तिः स्यात्[1269] यतो न कारणदर्शनपूर्व्वकं कार्यदर्शनं । 'न तु व्यक्ते'रूपलब्धेर्व्य'क्तमर्थमिच्छतो' व्यक्त्यसिद्धिर्युक्ता । 'यदि' पुन'र्व्यक्तेरसिद्धावपि व्यक्तं' वस्तूच्यते तदा सर्व्व'मिदं जगद् व्यक्तं'[1270] स्यात् । अव्यक्तव्यक्तिकत्वेन विशेषाभावात्[1271] तथा ह्यर्थो न सत्तामात्रेण प्रतीत उच्यते । प्रतिपत्तिसंयोगात् (।) नापि ज्ञानसत्तामात्रेण परचित्तज्ञानेनापि संवेदनप्रसङ्गात् किन्तु ज्ञानानुभवेनार्थप्रतीतिर्व्वाच्या । न चान्येन सम्वेदनं ज्ञानस्योपपद्यत इति स्वप्रकाशमेव स्वभावतस्तद्वक्तव्यमिति स्वसम्वेदनसिद्धिरिति । (५४१)

आचार्यश्री म नो र थ न न्दि कृतायां वार्त्तिकवृत्तौ प्रत्यक्षपरिच्छेदो द्वितीयः ॥
[282/s]

# 3 तृतीयः परिच्छेदः : स्वार्थानुमानं

प्रत्यक्षमाख्यायावसरप्राप्तमनु[1272] मानमिदानीम्वक्तव्यं (।) तच्च द्विविधं (।) स्वार्थं परा-

[1267] १ ज्ञानज्ञानादन्त्यवर्तिनो ज्ञानान्तरेणाननुभूताद्विषयान्तरसञ्चारस्तस्य स्ववेदनमवश्याभ्युपेयं । तस्याननुभवे प्राक्तनमगृहीतमिति सर्व्वलोपः ।

[1268] २ अनुभवसिद्धौ ह्यात्मपरविभागः ।

[1269] ३ अज्ञातस्यापि बीजस्याङकुरजननदृष्टेः ।

[1270] ४ सर्व्वे सर्व्वज्ञाः स्युः ।

[1271] ५ न च भवति तस्मात् स्ववेदनमेष्टव्यम् ।

[1272] १ निरोधमार्गप्राप्तिदुःखसमुदयपरिहारार्थत्वादस्यैव ।

र्थश्च । तत्र स्वार्थमिदानीं वक्तव्यं एतत्पूर्वकत्वात् परार्थस्य ।

## 3.1 १---हेतुचिन्ता

### (१) हेतुलक्षणम्

तल्लिङ्गे विप्रतिपत्तयः सन्तीति तासां निराकरणेन तद्व्यवस्थापनार्थमाह ।

...v.3.1a पक्ष[1273] धर्मस्तदंशेन व्याप्तो हेतुः ;

पक्षो धर्मिधर्मसमुदायोनुमेयः । तदेकदेशत्वादुपचारेण[1274] धर्मी पक्ष उक्तः । तस्य धर्मः (।) अनेन पक्षधर्मत्वमुक्तं । धर्मिधर्मो हेतुरित्यनुमाने सर्व्वस्य धर्म्मिधर्म्मो हेतुः स्यादित्युपचाराश्रयणं । तथा चाक्षु[1275] षत्वादिः शब्दे धर्मिणि न हेतुः । तदंशेन पक्षस्य धर्मेण[1276] सिसाधयिषितेन व्याप्तो हेतुर्बोद्धव्यः । द्विविधा चेयं व्याप्तिर्व्यापकव्याप्यधर्मतया । तत्र व्याप्ये सति व्यापकस्यावश्यम्भाव[1277] स्तस्य व्याप्तिः । व्याप्यस्य च व्यापक एव[1278] सति भावो नाम तस्य व्याप्तिः । आभ्यां [283/s] यथाक्रममन्वयव्यतिरेकावुक्तौ । व्याप्यसद्भावे व्यापकस्य सत्वनियमस्यान्वयरूपत्वात् । व्यापकाभावे व्याप्याभावस्य च व्यतिरेकरूपत्वात् (।)

### (२) हेतुस्त्रिधा एतेन त्रिरूपत्वं हेतोर्लक्षणमुक्तं ॥

...v.3.1b त्रिधैव सः ।

'त्रिधैव' त्रिप्रकार एव कार्यस्वभावानुपलम्भभेदेन 'स[1279] हेतुः । यथाग्निरत्र' धमात् । वृक्षव्यवहारयोग्योयं शिंशपात्वात् । नेह प्रदेशे घट उपलब्धिलक्षणप्राप्तस्यानुपलब्धेरिति संख्यानियम उक्तः ।

कस्मात् पुनस्त्रिविध एव हेतुरित्याह ।

...v.3.1c अविनाभावनियमात्;

'अविनाभावस्य' साध्याव्यभिचारित्वस्य त्रिविध एव हेतौ 'नियमात्' नियतत्वात् । संयोग्यादिषु चाभावात् सत्येवाविनाभावे हेतुत्वं स च व्याप्त्या कथितः । अनेन संख्यानियमकारणमुक्तं ।

### (३) हेत्वाभासाः

हेतव उक्ताः । के पुनर्हेत्वाभासा इत्याह (।)

---

[1273] २ श्लोकेत्र लिङ्गलक्षणं संख्या(त्रिधैव)नियमः (अविनाभावनियमात्) संख्यानियमकारणं विपक्षनिवृत्ति(हेत्वाभास)श्लोक्तो

[1274] ३ तदंशत्वेन सम्बन्ध उक्तः ।

[1275] ४ यथा रूपमिति दृष्टान्तधर्मिधर्म एव हेतुः स्यादन्यथा ।

[1276] ५ धर्मिमात्रस्य पक्षत्वाद् धर्मी च वन्ह्यादिः साध्य एव तदंशो विवक्षावशाद् यदा तु समुदायः पक्षस्तदा तदंश एकदेश एव ।

[1277] ६ इति व्याप्यधर्म उक्तो व्याप्ये धर्मिणि व्याप्तिर्द्धर्मः ।

[1278] ७ व्यापकधर्मोऽत्र व्याप्तिमत्वात् धर्मत्वं व्याप्तेः ।

[1279] १ पक्षधर्मत्त्वेन यथोक्तव्याप्त्या च युक्तः ।

...v.3.1d हेत्वाभासास्ततोऽपरे ॥ १ ॥ [56a/MA]

हेतुवदाभासन्त इति ‘हेत्वाभासा’ हेतुप्रतिरूपकाः (।) ‘तत’स्त्रिविधाद्धेतोरपरेऽन्ये संयोग्यादयः । अविनाभावे सति हेतुत्वं स च तादात्म्यात् तदुत्पत्तेश्च । ये तु तद्विकलास्तेऽविनाभावविरहात् हेत्वाभासा इत्यर्थः (। १)

यदि[1280] तदुत्पत्त्या गम्यगमकभावस्तदा धूमत्वविशेषवत् सामान्यधर्माः पार्थिवत्वादयोपि गमकाः स्युः । तथाऽग्नेः सामान्यधर्मवच्चान्दनत्वादयोपि विशेषधर्म्मा गम्याः स्युः । सर्व्वथा कार्यकारणभावादित्याह ।

...v.3.2a कार्यं स्वभावैर्यावद्भिरविनाभावि कार्यवत् ।

[284/s]

‘कार्य स्वभावैर्याव’द्भिर्व्विशिष्टैर्द्धूम[1281] वत्वादिभि‘रविनाभावि’ विना न भवतीति कारणे कारणविषयेऽवधारितं तैरेव विशिष्टैः स्वभावैर्हेतुर्न साधारणैः पार्थिवत्वादिभिः । अग्निमन्तरेणापि तेषां भावात् । तथा कारणेऽधिकरणे याव[1282] द्भिः स्वभावैरग्नित्वादिभिः सामान्यधर्मैरविनाभावि कार्य धूमादिनिश्चितं तेषां सामन्यधर्माणां हेतुर्न विशेषधर्माणां चान्दनत्वादीनां । तान्यन्तरेणापि धूमादेर्दर्शनात् । यदि धूमत्वविशेषितं पार्थिवत्वं हेतुः क्रियते तदेष्टमेव व्यभिचाराभावात् (।) यदि च कारण[1283] गतचान्दनत्वादिविशेषजनितो धूमस्य विशेषः शक्यो निश्चेतुं तदा चान्दनत्वादयो गम्या इष्यन्ते । न हि कार्यकारणभावः सत्तामात्रेण गम्यगमकभावनिमित्तं किन्तु निश्चयापेक्षः । स च यावन्निश्चीयते तथागम्यगमकभावः ।

‘भावोपि’ स्वभावोपि हेतुः स्वभावे साध्ये कीदृशे हेतोर्भावः केवलो भावमात्रं तदनुरोद्धुमनुवर्त्तितुं शीलमस्येति भावमात्रानुरोध तस्मिन् । यस्य सत्तामात्रेण यो धर्मोऽवश्यं भवति न हेत्वन्तरमपेक्षते । तस्मिन् साध्ये स्वभावाख्यो हेतुर्नान्यत्र यथा वस्त्वत्वं रागे(।) एवञ्च विधिसाधनत्वं कार्यस्वभावयोर्दर्शितं ।

## 3.2 २ अनुपलब्धिचिन्ता

### (१) दृश्यानुपलब्धिफलम्

इदानीं तृतीयहेतोः प्रतिषेधफलत्वमाह ।

...v.3.2b अप्रवृत्तिः प्रमाणानां[1284] ;

[285/s]

[1280] २ दिङ्नागोक्तं परं प्रति सर्व्वथा गम्यगमकत्वं कार्यहेतौ शङ्कते ।

[1281] १ इत्थंभूतलक्षणा तृतीया । स्वगतैः सामान्यैः धर्मैः कार्य्यस्यास्तु विशेषधर्मा गमकाः स्वभावे कृतकत्वेन प्रमेयत्वं गमकं ।

[1282] २ कारणस्थैः ।

[1283] ३ एवमङ्गेन जन्यजन(क)त्वं स्यादिष्यते च सर्व्वथा । आह ज्ञापकहेतुरयं ।

[1284] ४ प्रत्यक्षपृष्ठभाविना निश्चयेनाधूमव्यावृत्तिरूपावधारणेन धूमादिस्वलक्षणं भासमानं तार्णादिविशेषानवधारणेन चानेकस्वलक्षणरूपं सामान्यलक्षणं लिङ्गं प्रत्यक्षविषयो व्यवस्थाप्येत लिङ्गि च ।

व्यक्तिभेदेन मानबहुत्वात् आगमापेक्षया वा आगमस्यापि निवृत्तिर्नाभावं साधयतीति वक्ष्यते ।

प्रमाणनिवृत्तिरूपाऽनुपलब्धिरसति सद्व्यवहारातिक्रान्तत्वादसदविशिष्टे देशकालस्वभावविप्रकृष्टे सु-मे-त्वी-दौ (।) सज्ज्ञान[1285] शब्दव्यवहाराणां प्रवृत्तिप्रतिषेधोऽप्रवृत्तिस्तत्फला-(।) एतच्चाप्रवृत्तिफलत्वं दृश्यादृश्यानुपलब्ध्योः साधारणंज्ञानपूर्वकत्वात्[1286] (।) सत् ज्ञानशब्दव्यवहारस्य ज्ञानाभावे तदभावस्य न्यायप्राप्तत्वात् ।

दृश्यानुपलब्धेः फलान्तरमाह । काचित् प्रमाणनिवृत्तिरसत्ज्ञानमभावज्ञानं तत्फला । कथमित्याह ।

[56b/MA]

...v.3.2c हेतुभेदव्यपेक्षया ॥ २ ॥

'हेतु'रनुपलम्भस्तस्य 'भेदो' विशेषणमुपलब्धिलक्षणप्राप्तविषयत्वं तस्य 'व्यपेक्षया' कांक्षया उपलब्धिलक्षणप्राप्तानुपलब्धिरित्यर्थः ॥

ननु[1287] यद्यनुपलब्ध्याऽभावः साध्यते तदोपलब्ध्यभावोपि तत एवेत्यन[1288] वस्थानादभावाप्रतिपत्तिः स्यात् । दृष्टान्तश्च न स्यादन्यस्याभावसाधनस्याभावादनुपलब्धेश्चान[1289] वस्थाप्राप्तत्वात् । अथ पदार्थान्तरोपलब्धिरेवानुपलब्धिस्तयाऽध्यक्षसिद्ध्याऽभावः साध्यते तस्मान्न दोषः । यद्येवमर्थान्तरादपि किन्नाभावः साध्यते (।) तदपि ह्यनुपलब्धिरूपं प्रत्यक्षसिद्धश्च । को वान्योपलम्भाभावेन सम्बन्धः ।

उच्यते । एकज्ञानसंसर्गि वस्त्वन्तरं तदुपलब्धिश्चानुपलब्धिर्विवक्षितोपलब्धेरन्यत्वादभक्षास्पर्शनीयवत् । स एवाभावः तदतिरिक्तस्य विग्रहवतोऽभावस्याभावात् । तस्मात्तादात्म्यमभावानुपलम्भयोः सम्बन्धः ।

एवं तर्ह्यनुपलब्धिसिद्धिरेवाभावसिद्धिः किं साध्यते ॥

[286/s]

सत्यं (।) नाभावः साध्यः सिद्धत्वादस्य । किन्तर्हि (।) विषयोपदर्शनेन विषयी व्यवहारः साध्यते । यथा गोव्यवहारविषयोऽयं सास्नादिसमुदाया[1290] त्मकत्वात् । (२)

## (२) अनुपलब्धिश्चतुर्विधा

सा च प्रयोगभेदाद'नुपलब्धिश्चतुर्विधा' कथमित्याह ।

...pv.3.3 विरुद्धकार्ययोः सिद्धिर/?/ हेतु/?/भायोः ।
दृश्यात्मनोरभावार्थानुपलब्धिश्चतुर्विधा ॥ ३ ॥

विरुद्धश्च कार्यश्च विरुद्धकार्ये कार्यश्च । प्रत्यासत्तेर्विरुद्धस्यैव बोद्धव्यं । 'तयोर्दृश्यात्मनोर्हेतुभावयोः' कारणस्वभावयोश्च दृश्यात्मनोर्यथाक्रमं सिद्धिरुपलब्धिरसिद्धिरनुपलब्धिश्च ।

[1285] १ उपलब्धिः कर्मधर्मश्चेद्वस्तुयोग्यता । कर्तृधर्मश्चेज्ज्ञानं । उपलि(? लब्धि): सत्वमेव । असताञ्चानुपलब्धिरसत्वं । मुख्यं सत्वमनेन दृश्यानुपलब्ध्याऽक्षेपः । अदृश्यानुपलब्धिः । दृश्यानुपलब्धौ वस्तुवशान्निवृत्तं सत्वं स्वनिमित्तं ज्ञानादि निवर्त्तयति । अदृश्येप्यभीष्टकार्याकरणादसत्कल्पे प्रतिपत्त्यध्यवसायान्निवृत्तं सत्वं स्वनिबंधनं निवर्तयति (।)

[1286] २ उपलब्धिः कारणं सद्व्यवहारस्य । तदभावे कार्याभाव उक्तः ।

[1287] ३ अभावप्रमाणस्वीकारे यद् दूषणं तदिहातिदिश्य परिह(र)ति ।

[1288] ४ यस्य विषयस्याभावः साध्यते तदुपलब्धेरप्यभावोन्ययानुपलब्ध्या तस्या अप्यन्ययेति ।

[1289] ५ येनैव पक्षधर्मेण साध्यधर्मिण्यभावः साध्यते । तेनैव दृष्टान्तधर्मिण्यपि । तत्राप्यपर(ा) दृष्टान्त इति ।

[1290] १ सिद्धमेतदस्यैव गोत्वात् ।

'विरुद्धो'पलब्धिर्यथा नात्र शीतस्पर्शोऽग्नेः । व्याप्यव्यापकयोर्वस्तुतस्तादात्म्यात् । [1291] 'व्यापक'विरुद्धोपलब्धिरप्यनेनैवोक्ता भवति । यथा नात्र तु[1292] षारस्परर्शोऽग्नेः । 'विरु[1293] द्धकार्यो'पलब्धिर्यथा नात्र शीतस्पर्शो धूमात् । कारणा[1294] नुपलब्धिर्यथा नात्र 'धूमो'ऽनग्नेः । 'स्वभावा'नुपलब्धिर्यथा नात्र धूमोनुपलब्धेः । अनेन 'व्यापकानु'पलब्धिरप्युक्ता[1295] यथा नात्र शिंशपा वृक्षाभावात् ।

चतुर्व्विधाप्यनुपलब्धिरभावार्था प्रतिषेधफला (।) तत्र स्वभावानुपलब्धिः स्वयमेव प्रतिषेध्याभावरूपतया सिद्धाऽभावव्यवहारसाधनी । इतरास्तु निषेध्याभावाव्यभिचारिण्यःतदभावमभावव्यवहारञ्च साधयन्ति । तस्यासिद्धत्वात् । (३)

यदि विरुद्धकार्योपलब्ध्याऽभावसिद्धिस्तदा विरुद्धकारणोपलब्ध्यापि किं न साध्यत इत्याह ।

...pv.3.4 तद्विरुद्धनिमित्तस्य योपलब्धिः प्रयुज्यते ।
निमित्तयोर्विरुद्धत्वाभावो हि व्यभिचारवान् ॥ ४ ॥

[287/s]

'तद्विरुद्धनिमित्तस्य' निषेध्य(=शीतस्पर्शवह्नि)विरुद्धकारण(=काष्ठ)स्य 'योपलब्धिः प्रयुज्यते' (।) यथा न शीतस्पर्शोत्र काष्ठादिति सा निषेध्यस्य विरुद्धस्य च ये निमित्ते तयो[1296] र्व्विरुद्धत्वाभावे व्यभिचारिणी अनै[1297] कान्तिकी । विरोधे तु निमित्तयोरिष्यत एव[1298] (।) यथा नास्य[1299] रोमहर्षादि[1300] विशेषाः[1301] सन्ति सन्निहितदहनविशेष[1302] त्वात् (।) रोमहर्षतदभावयोर्व्विरोधः । तत्कारणयोश्च शीत[1303] -[57a/MA] दहनयोरिति युक्तेयमनुपलब्धिः । तथा निषेध्य(=रोमहर्ष)विरुद्ध(=ताप)कारण(=दहन)काय(=धूर्मो/?/)पलब्धिर्यथा । 'न रोम[1304] हर्षयुक्तपुरुषवानयं' प्रदेशो[1305] धूमादित्युक्ताष्टविधानुपलब्धिः । (४)

अनया दिशाऽपरा अपि बोद्धव्याः ।

...pv.3.5 इष्टं विरुद्धकार्येपि देशकालाद्यपेक्षणाम् ।

---

[1291] २ कारणाभावस्यैव ख्यापनात् ।

[1292] ३ अस्य व्यापकं शीतं ।

[1293] ४ एकप्रकारैवेयं ।

[1294] ५ प्रभेदोस्याः कारणविरुद्धोपलब्धिः कारणविरुद्धकार्य्योपलब्धिश्च प्रतिषेध्यकारणानुपलम्भसाधनात् । वह्निर्विरुद्धं शीतं निवर्त्तयन् तत्कार्यं निवर्त्तयति (।)

[1295] ६ स्वभावाभावस्यैव प्रतिपादनात्

[1296] १ काष्ठतुषारयोः

[1297] २ यद्यप्यग्निजनकान्त्यकाष्ठेन शीतनिमित्तस्य विरोधस्तथापि तस्य कार्यदर्शनादेव निश्चय इति कार्यविरोध एव ।

[1298] ३ कारणविरुद्धोपलब्धिः ।

[1299] ४ दन्तवीणादि ।

[1300] ५ शीतकार्या न पिशाचादिकृताः ।

[1301] ६ रोमहर्षापनयक्षम ।

[1302] ७ संताप ।

[1303] ८ रोमाश्चतापनिमित्तयोः

[1304] ९ कारणविरुद्धकार्योपलब्धिरियं ।

[1305] १० धूमादित्यस्य पक्षधर्मत्वदर्शनाय पुरुषे धर्मिणि न स्यात् । धूमस्य प्रदेशधर्मत्वात् । अत्र धूमोपलब्ध्याऽग्निविरुद्धशीतकार्यरोमहर्षाद्यभावः ।

अन्यथा व्यभिचारी स्यात् भस्मेवाशीतसाधने ॥ ५ ॥

'वि[1306] रुपद्धकार्ये' विरुद्धकार्योपलब्धावपि[1307] विषये निर्देशात् (।) देशस्य सन्निहितस्य कालस्य वर्त्तमानस्य क्वचिदतीतापेक्षण'मिष्टं'[1308] (।) अन्यथा व्यभिचारि स्याल्लिङ्गं (।) उदाहरणमाह (।) 'भस्मेवाशीतस्य' शीताभावस्य 'साधने' (।) यथा नासीत् क्वचित्[1309] शीतस्पर्शो, नास्ति वात्र भस्मन इति भस्मानैकान्तिकं। देशविशेष्येऽतीतकालापेक्षया तु स्याद्धेतुर्नासीदत्र शीतस्पर्शो भस्मन इति ॥ (५)

ननु (।)
[288/s]

...pv.3.6 हेतुना यः समग्रेण कार्योत्पादोनुमीयते ।
अर्थान्तरानपेक्षत्वात् स स्वभावोनुवर्णितः ॥ ६ ॥

'हेतुना समग्रेण यः कार्योत्पादोनुमीयते' (।) स कस्मिन् हेताव[1310] न्तर्भवतीत्याह (।) 'स स्वभाव'हेतुर'नुवर्णितः' । न हि समग्राद्धेतोः कार्यसम्भवोनुमीयते (।) किन्तर्हि (।) कार्याजनयोग्यत्वं (।) तच्चार्थान्तरानपेक्षत्वाद्धेतुसाकल्यमात्रानुबन्ध्येवेति तस्मिन् साध्ये हेतुसाकल्यं स्वभावहेतुरेव । (६)

कस्मात् पुनः कार्यमेव नानुमीयत इत्याह ।

...pv.3.7 सामग्रोफलशक्तीनां परिणामानुबन्धिनि ।
अनैकान्तिकता कार्ये प्रतिबन्धस्य सम्भवात् ॥ ७ ॥

कार्येऽनुमेयेऽनैकान्तिकता हेतुसाकल्यस्य । कीदृशे (।) 'सामग्र्याः' फलश्च ताः [उत्तरक्षणं] (।) 'शक्त'यश्च तासां 'परिणामः'[1311] कार्योत्पादानुगुणस्तारतम्ययोगी क्षणप्रबन्धः । 'तदनुबन्धिनि' तदपेक्षिणि । अत एव प्रतिबन्धस्य सम्भवादित्युक्तं । (७)

न खलु कार्यं हेतवो मिलिता इत्येव भवति (।) किं त्वेषां विशेषमपेक्षतेऽत्रान्तरे च शक्तिव्याघातो मन्त्रतन्त्रादिना वैकल्यञ्च सम्भवतीति कार्यस्यावश्यभावान्न तदनुमानं ।

...pv.3.8 एकसामग्र्यधीनस्य रूपादे रसतो गतिः ।
हेतुधर्मानुमानेन धूमेन्धनविकारवत् ॥ ८ ॥

या च 'रसतो' मधुरादिकात् (।) 'रूपादे'रादिशब्दाद् गन्धस्य स्पर्शस्य च 'एकसामग्र्यधीनस्य' रसादिना [1312]सहैकसामग्रयायत्तस्य गतिः सा कथमित्याह(।) [289/s] 'हेतुधर्मानुमानेन' रसकारणस्य 'धर्मो रसादिसहचररूपजनकत्वं (।)तदनुमानेन रसाद्' रूपादिगतिः । न

---

[1306] ११ चिरविनष्टेऽप्यग्नौ धूमसंभवात् कथं न व्यभिचार इत्याह ।

[1307] १२ अपिशब्दात् कार्यहेतावपि (।)

[1308] १३ आदिशब्दादवस्थाविशेषापेक्षा ।

[1309] १४ देशानपेक्षा ।

[1310] १ अप्रतिबद्धसामर्थ्याच्चेत् कार्यमुत्पन्नं दुश्येतैव । कारणकारणात्तु व्यभिचार इत्याह ।

[1311] २ यथा तानवितानवतस्त(न्तू)न् व्यापारवत्पुंसाधिष्ठितान् दृष्ट्वा पटानुमानं । कारणाख्यं नानुपलब्धि(त्रिधैवेति इष्यते)र्विधिसाधनात् । कारणस्वभावत्वान्न कार्यं । अन्येनान्य(ानु)मानान्न स्वभावोपि हेतुरित्याह । नात्र कार्योत्पादानुमानं किन्तु समग्राणां कार्योत्पादनयोग्यता । स्वभावविशेषः कार्यमुत्पद्यतेऽस्मादिति श्लोकेप्यर्थः प्रयोगो या समग्रा सोत्तरपरिणामात् कार्योत्पादनयोग्या यथोत्पादितकार्यसामग्री (।)

[1312] ३ पुनस्त्रिधैवेति त्रस्यति (।) अकार्यकारणभूते नानुमेयादन्येनान्धकारे मातुलुङ्गादिरसमास्वाद्य चम्पकगन्धमाघ्राय वह्निस्पर्शमनुभूय तेषां रूपसामान्यमनुमीयते । सा कथमनुमेयादन्येनानुमानान्न स्वभावहेतुः ।

हि कार्यं रसः कारणमन्तरेण । कारणञ्चास्य[1313] रससहकारि रूपजनकं पुञ्जात् पुञ्जोत्पत्तेः । अतः तस्मिन्ननुमितेऽनुमितमेव रूपं 'धूमेन्धनविकार-' वत् । धूमाद्धेतुधर्मानुमानेनेन्धनविकारस्याङ्गारादेर्द्धूमसहचरस्योवानुमानं । (८)

एतदेव स्फुटयन्ना (।)

...pv.3.9 शक्तिप्रवृत्त्या न विना रसः सैवान्यकारणम् ।
इत्यतीतैककालानां जायते कार्यलिङ्गतः ॥ ९ ॥

रसहेतोः 'शक्तिप्रवृत्त्या' शक्त्याभिमुख्येन 'विना न रस' उत्पद्यते (।) सैव रसहेतोः शक्तिप्रवृत्तिरन्यस्य रूपादेः 'कारणं' इतरसमानकालरूपादिजनकत्वेन 'रस'हेतोर[1314] 'तीतस्य' हेतो'रेककालानां' रससहचराणां च रूपादीनां 'गतिः' तस्य रसरूपहेतोः 'कार्याद्' रसाल्लिङ्गाज्जाता ॥

एवं पिपीलिकोत्सरणादि[1315] दर्शनात् वर्ष(ा) पिपी[1316] लिकादिक्षोभहेतोर्भूतपरिणामविशेषस्यानुमानात् वर्षानुमानं कार्यलिङ्गजं वेदितव्यं । नदीपूरादेर्व्वर्षकार्यत्वं व्यक्तमेव ॥ (९)

...v.3.10 हेतुना योऽसमग्रेण कार्योत्पादोऽनुमीयते ।
तच्छेषवदसामर्थ्याद् देहाद् रागानुमानवत् ॥ १० ॥

'यः' पुन'र्हेतुना'ऽसमग्रेण कार्योत्पादः कार्योत्पादनयोग्यत्वमनुमीयते[1317] तच्छेषवदनैकान्तिकमसामर्थ्यात् । समर्थं हि कार्योत्पादनयोग्यं न च व्यग्राणां समर्थता ।[57b/MA] देहात्[1318] बुद्धीन्द्रियादेश्च हेतो रागानुमानवत् । देहादीनां कथञ्चिद्[1319] रागहेतुत्वेपि[1320] [290/s] नायोनिशोमनस्कार[1321] रहितानां कारणत्वं सहितानामेव[1322] हेतुत्वात् । ततःकेवलाद् देहाद् रागानुमानमनैकान्तिकं । (१०)

तथा (।)

...v.3.11 विपक्षेऽदृष्टिमात्रेण कार्यसामान्यदर्शनात् ।
हेतुज्ञानप्रमाणामं वचनाद् रागितादिवत् ॥ ११ ॥

'विपक्षेऽदृष्टिमात्रेण कार्यसामान्यस्य[1323]' क्वचिद् धर्मिणि 'दर्शनात् । हेतुज्ञानं'[1324] यत् 'प्रमाणाभं' सन्दिग्धविपक्षव्यावृत्तिकं तत् 'वचनाद्' रागितादिवत्[1325] । यथा वचनस्य वीतरा-

[1313] १ इति कार्यात् कारणविशेषानुमानं ।

[1314] २ रसोपादानसमानकालभाविनोतीताः । लिङ्गभूतरससहभाविन एककालाः । इति अनेन द्वारेण । नानागतगतिः(।)

[1315] ३ योग्यतानुमानं ।

[1316] ४ मत्स्योत्पतनात् । गृहीताण्डस्यान्यत्र गतिः बलाकातस्तोयं (।)

[1317] ५ मीमांसाकादिभिः ।

[1318] ६ कार्यं सर्वथाऽसम्बद्धं योग्यतापि नास्ति क्षणपरिणामेनापि रागादिमानयं देह इन्द्रियबुद्धिमत्वात् ।

[1319] ७ अदेहादे रागादृष्टेः

[1320] ८ अहं ममेत्यात्मात्मीयाभिनिवेशपूर्व्वकत्वात् (।)

[1321] १ योनिशो मनो नैरात्म्यज्ञानं (।) तद्विरुद्धमात्मादिज्ञानं ।

[1322] २ रागे साध्ये तत्र हितोपलंबिपक्षस्तत्र देहाद्यदृष्टेरस्ति (।)

[1323] ३ वक्तुकामताजस्य राग्यरागिगतवचनस्य (।) वक्तुकामतैव रागश्चेदिष्टन्तत् । अभिष्वङ्गो नो रागः ।

[1324] ४ नैवं करुणाधर्मालम्बनत्वात् । न वाग्विशेषात् सरागोपि वीतरागवदित्यनिश्चयात् ।

[1325] ५ द्वेषमोहादि ।

गेऽदर्शनात् क्वचिद् दर्शनाद् रागानुमानमनैकान्तिकं (।) न हि रागवचनयोः कार्यकारणभावः सिद्धः । वक्तुकामता[1326] हेतुत्वात् तस्य । सा च वीतरागस्य करुणया[1327] संभवति । यद्यपि वक्तरि रागो दृश्यते तथापि क्वचिद् वक्तुकामतासत्वेपि रागाभावे वचनाभावासिद्धेर्न तत्कार्यतासिद्धिरुपलखण्डाद् वक्तुकामतानिवृत्तेरेव वचनाभावो न तु रागाभावात् (।) ततो वीतरागात् सन्दिग्धोस्य व्यतिरेकः ॥ (११)

...v.3.12 न चादर्शनमात्रेण विपक्षेऽव्यभिचारिता ।
संभाव्य व्यभिचारित्वात् स्थालीतंडुलपाकवत् ॥ १२ ॥

'न च विपक्षे'[1328] हेतोरदर्शन'मात्रेण' साध्याभावप्रयुक्तसाधनाभावनिश्चयरहितेन साध्या-'व्यभिचारिता' साध्यते सम्भाव्यव्यभिचा(रि)त्वात् । यदि विपक्षाद्धेतुनिवृत्तिनिश्चय एवं व्यभिचारशङ्कानिरासः । स तु नास्तीति तस्याप्यभावः । [291/s] 'स्थालीतण्डुलपाकवत्' । स्थाल्यन्तर्गतानां तण्डुलानां[1329] पाकस्येवानुमानं । तदितरेषां पाकादर्शनात् शेषवत् ॥ (१२)

## (क) शेषवदनुमाननिरासः

किं पुनः शेषवदित्युच्यते[1330] । इत्याह ।

...v.3.13 यस्यादर्शनमात्रेण व्यतिरेकः प्रदर्श्यते ।
तस्य संशयहेतुत्वाच्छेषवत्तदुदाहृतम् ॥ १३ ॥

'यस्य' लिङ्गस्या'दर्शनमा'त्रेण विपक्षे[1331] 'व्यतिरेकः प्रदर्श्यते' । न तु कारणव्यापकनिवृत्त्या तस्य संशयहेतुत्वात् साध्यानिश्चायकत्वात् शेषवत् तदुदाहृतं । सन्दिग्धविपक्षव्यावृत्तिकत्वं शेषवदुच्यते प्रतिबन्धाभावादित्यर्थः ।(१३)

## (ख) त्रिषु हेतुरूपेषु निश्चयः

...v.3.14 हेतोस्त्रिष्वपि रूपेषु निश्चयस्तेन वर्णितः ।
असिद्धविपरीतार्थव्यभिचारिविपक्षतः ॥ १४ ॥

सूत्रमुक्तं (।) अस्यायमर्थः (।) यो गुणः स द्रव्याश्रयी तद्यथा रूपादिः । अपाकजानुष्णाशीतस्पर्शश्य (? स्य) गुणः तस्मात् तस्याश्रयभूतेन द्रव्येण भवितव्यं । (।) न चायं दृष्टानां पृथिव्यादीनां गुणः (।) तेषां पाकजानुष्णाशीतस्पर्शादिगुणत्वात् (।) ततो यस्यायं गुणः स वायुर्भविष्यतीत्युक्ते वैशेषिकेण (।) तत्राचार्य दि ग्ना गेनोक्तं (।) यद्यदर्शनमात्रेण

[1326] ६ अविशिष्टं विवक्षामात्रं ।

[1327] ७ नेयमभिष्वङ्गो धर्मालम्बनत्वात् ।

[1328] ८ विपक्षे दृष्ट्या व्यभिचारी न च विरागे वचनं दृष्टमित्याह । अनैकान्तिकस्यादर्शनमात्रेणानिरासादनैकान्तिकविपक्षेण यद्वचनं तेन वैशेषिकेण वायोः सत्वसाधनार्थं स्पर्शश्च न च दृष्टानामिति (वैशे॰ सू १० । अ॰ २ । आ॰ १)

[1329] १ बाहुल्येन पक्षदर्शनेपि पक्षसमहेतवः पक्षा इति युक्तं वैधर्म्ये ।

[1330] २ पूर्ववच्छेषवत्सामान्यतो दृष्टमिति (न्यायसू॰१।१।५) शेषवल्लक्षणं नैयायिकस्य विरुद्धं कारणात् कार्यानुमानं पूर्ववत् । शेषः कार्यं यस्यास्ति तच्छेषवत् (।) कार्यात् कारणानुमानं । अतः पृच्छति किमिति (।)

[1331] ३ क्वचित् ।

दृष्टेभ्यः (स्पर्शस्य) प्रतिषेधः क्रियते न च सोपि युक्त इति दृश्यादृश्यसमुदायस्य सामान्येन निषेधात् (।) यदेतदुक्तं तद्विरुध्यत इति वा र्ति क का रो दर्शयन्नाह दृष्टेत्यादि । यद्यदृष्ट्या निवृतिः स्यात् तदाऽदृष्टेन दर्शनात् कारणादपाकजस्यानुष्णाशीतस्पर्शस्य दृष्टाऽयुक्तिः (।) दृष्टेषु पृथिव्यादिष्वसङ्गतिर्या वर्णिता वै शे षि कैः यस्या आचार्येणायुक्तत्वमुक्तं सा स्यादविरोधिनी युक्तैव स्यादित्यर्थः । वायुप्रकरणे पृथिव्यादिभ्यः यदि स्पर्शादिर्गुणत्वं सिद्धं स्यात् ततो वायुद्रव्यानुमानं स्यात् । सैव त्वसिद्धा स्वातन्त्र्येण प्रतीतेः स्पर्शाविशेषोस्माकं वायुः (।) आचार्येण तु स्पर्शव्यतिरिक्तं वायुमभ्युपगम्यायुक्तत्वमुक्तं परे ।

[292/s]

'तेन' प्रतिबन्धस्यावश्याभ्युपगन्तव्यत्वेन 'हेतोस्त्रिष्वपि' पक्षधर्मा[1332] न्वयव्यतिरेकेषु 'निश्चय' आचार्य 'दि ग्ना गे न' वार्ण्णितः । कथमुक्त इत्याह । 'असिद्धस्य विपरीता'र्थस्य 'विरुद्धस्य व्यभिचारिणो'ऽनैकान्तिकस्य 'विपक्षेण'[1333] । तत्रासिद्धत्वविपक्षेण पक्षधर्मत्वस्य निश्चय उक्तः । विरुद्धविपक्षेणान्वयस्य । अनैकान्तिकविपक्षेण व्यतिरेकस्य ॥ (१४)

## (३) व्याप्तिचिन्ता

### (क) प्रतिबन्धो दिग्नागेष्टः

न ह्य सति प्रतिबन्धे विपक्षाद् व्यतिरेकः शक्यनिश्चयः । उक्तश्च निश्चयस्ततः प्रतिबन्धोप्याचार्येणेष्ट इति प्रतीयते । अन्यथा (।)

...v.3.15 व्यभिचारिविपक्षेण वैधर्म्यवचनं च यत् ।
यद्यदृष्टिफलं तच्च तदनुक्तेपि गम्यते ॥ १५ ॥

प्रतिबन्धानिष्टौ व्यभिचारिणोऽनैकान्तिकस्य विपक्षेण वैधर्म्यस्य व्यतिरेकस्य वचनं यदाचार्यस्य[1334] (।) एष तावन्न्यायः यदुभयं वक्तव्यं[1335] विरुद्धानैकान्तिकप्रतिपक्षेणेत्युभयमन्वयव्यतिरेकौ । तच्च यद्यदृष्टिफलमदर्शनमात्रफलं तददर्शनमात्र'मनुक्तेपि'[1336] व्यभिचारिविपक्षेण व्यतिरेको गम्यते (।) हेतुत्रैरूप्यनिर्देशादेव विपक्षेऽदर्शनमात्रस्य गतत्वात् । तस्माद् 'वैधर्म्यवचनेन'[1337] विपक्षे हेत्वभावः कथ्यते । स चादर्शनमात्रेण न सिध्यति ॥ (१५)

नास्तीति वचनादेव सिध्यतीति चेत् ।

...v.3.16 न च नास्तीति वचनात् तन्नास्त्येव यथा यदि ।
नास्ति स ख्याप्यते चायमुक्तौ नेति गतिस्तदा ॥ १६ ॥

[293/s]

'न च नास्तीति वचनादेव' तत्साधनं विपक्षे 'नास्त्येवेति' युक्तं । तदपि ह्यनुपलम्भमेव ख्यापयति[1338] (।) स च सर्व्वस्माद्विपक्षाद्धेत्वभावप्रतीतावशक्तः ।[58a/MA] (कथन्तर्हीत्याह)

[1332] १ प्रसिद्धस्तु द्वयोरपि साधनमित्यादिना वादिविवादिनोः ।

[1333] २ तृतीया आद्यदिग्धातु सिविपक्षत (?) इत्यत्र ।

[1334] ३ तद्ग्रार्थमित्याकूतं

[1335] ४ न्यायमुख आचार्येणोक्तं साधर्म्यं वैधर्म्यं चोभयं ।

[1336] ५ वैधर्म्यस्य ।

[1337] ६ अनैकान्तिकस्यादर्शनमात्रेणानिरासादनैकान्तिकविपक्षेण यद्वचनं तेन ।

[1338] १ विशिष्टकारणानुमानं ।

यथा येन प्रकारेण साध्यसाधनयोः प्रतिबन्धो सति साध्याभावेन साधनं विपक्षे नास्ति स न्यायो यदि ख्याप्यते व्यभिचारिविपक्षेण वैधर्म्योक्त्या तदा नास्तीति गम्यते नान्यथा ॥ (१६)

किञ्च (।)

...v.3.17 यद्यदृष्टौ निवृत्तिः स्याच्छेषवद् व्यभिचारि किम् ।
व्यतिरेक्यपि हेतुः स्यान्न वाच्याऽसिद्धियोजना ॥ १७ ॥

'यद्यदृष्टौ' विपक्षाद्धेतो'र्निवृत्तिः' स्यात् 'शेषवत्' सन्दिग्धविपक्षव्यतिरेकं[1339] 'व्यभिचारि' किमिष्टमा चा र्ये ण । एवञ्च सरसान्येतानि फलानि रूपाविशेषादिति । सर्व्वस्य तादृग्रूपस्य पक्षीकृतत्वात् न व्यभिचारदर्शनं विपक्षे चादर्शनमस्तीति प्राप्तमदर्शनमात्रद् व्यतिरेकवादिनो हेतुत्वमस्य ॥

'व्यतिरेक्यपि हेतुः स्यात्' । नेदं निरात्मकं जीवच्छरीरमप्राणादिमत्वप्रसङ्गादि ति । बौ द्धं प्रति सात्मकस्य कस्यचिदसिद्धेरन्वयाभावात् । निरात्मकेभ्यश्च पटादिभ्यो निवृत्तेः प्राणादि[1340] र्व्यतिरेकी स हेतुः स्यात् । अदर्शनाद् व्यतिरेकसिद्धेरनिष्ट[1341] श्चाचार्येण ॥

किञ्च (।) वादिप्रतिवादिनोरसिद्धस्यान्यतरासिद्धस्य सन्दिग्धस्याश्रया[1342] सिद्धस्य सन्दिग्धाश्रयासिद्धस्य असिद्धस्य च निरासं पक्षधर्मत्वनिश्चयेन प्रतिपाद्यान्वयव्यतिरेकनिश्चयवचनेन सपक्षविपक्षयोर्हेतोरन्वयस्य व्यतिरेकस्य च विपरीताया-असिद्धेश्चतुर्व्विधाया योजना आचार्येण सपक्षे सन्नसन्नित्येवमादिष्वपि यथायो[1343] गमुदाहार्य्यमित्यादिना निर्दिष्टा (।) सापि न वाच्या । अदर्शनस्य व्यतिरेकनिश्चयहेतुत्वे सन्दिग्धव्यतिरेकस्य हेतुत्वात् ॥ (१७)

अपि च (।)

[294/s]

...v.3.18 विशेषस्य व्यवच्छेदहेतुता स्याददर्शनात् ।
प्रमाणान्तरबाधा चेन्नेदानीन्नास्ति-तादृशः ॥ १८ ॥

विशेषस्यासाधारणस्य[1344] श्रावणत्वादेर्नित्येऽनित्ये चादर्शनादुभयतो व्यावृत्तेः शब्दे धर्मिणि द्वयव्यवच्छेदन[1345] हेतुता स्यात् । 'प्रमाणान्तरबाधा चेत्'[1346] अन्योन्यव्यवच्छेदरूपयोरेकप्रतिषेधस्यापरविधिनान्तरीयकत्वात् उभयव्यवच्छेदो[1347] नुमानबाधितः । 'नेदानीं'[1348] (बाधसंभवे) नास्ति तादृशः । एवं तर्ह्यदृष्टेरभावनिश्चयो नास्तीति वक्तव्यं । यथा श्रा-

---

[1339] २ उपभुक्तान्यफलानि पक्वानि मधुरादिरसानि वा । रक्तादिरूपाविशेषादुपभुक्तफलवत् । एकशाखाप्रभवत्वाद्वा ।

[1340] ३ अपानोन्मेषनिमेषादि ।

[1341] ४ घटादावपि नैरात्म्यासिद्धेर्बौद्धाभ्युपगमाच्चेत् आत्मा न स्यात् ।

[1342] ५ आचार्येण ह्युक्तं पक्षधर्मो वादिप्रतिवादिनिश्चितो गृह्यते । तेनैषां निरासः ।

[1343] ६ अन्यतरासिद्धादीनां सपक्षादिष्वसम्भवात् यथायोगं ।

[1344] १ अदर्शनमात्राद् व्यावृत्तिरिष्टाऽस्ति च नित्यानित्ययोरदर्शनं ।

[1345] २ प्रतिषेधहेतुत्वं ।

[1346] ३ श्रावणत्वस्य कृतकत्ववद् वस्तुधर्मत्वान्नित्यादस्त्येव व्यतिरेको बाधकात् । परे तु नित्यमपि वस्त्विच्छन्ति तदपेक्षयोच्यते नित्यानित्यव्यावृत्तिः ।

[1347] ४ वस्तु भवत्तत्वमन्यत्वम्वा नातिक्रामति (।)

[1348] ५ यद् विरुद्धं न तस्यैकत्र युगपत्सम्भवो यथा शीतोष्णयोर्विरुद्धश्च नित्यानित्ययो र्युगपदेकत्र धर्मिणि व्यवच्छेदो यथोक्तविधानेनेति व्यापकविरुद्धं ।

वणत्वेनोभयव्यावृत्ततया निश्चितेन प्रसाध्यमानस्योभयव्यवच्छेदस्य प्रमा (णा) न्तरेण बाधा । (१८)

### (ख) आचार्योयमतनिरासः

...v.3.19 तथान्यत्रापि संभाव्यं प्रमाणान्तरबाधनम् ।
दृष्टाऽयुक्तिरदृष्टेश्च स्यात् स्पर्शस्याविरोधनी ॥ १९ ॥

तथान्यत्रापि विपक्षाद्धेतो[1349] र्व्यतिरिकेपि ‘संभाव्यं प्रमाणान्तरबाधनं’ । अदर्शनमात्रस्य निमित्तस्य समानत्वात् । तथा दृष्टाऽयुक्तिरदृष्टेश्च[1350] स्यात् स्पर्शस्याविरोधिनी । दृष्टेषु पृथिव्यादिष्वपाकजस्यानुष्णाशीतस्पर्शस्यायुक्ति[1351] र्योगाभावः (।) अदृष्टेरदर्शनात् वै शे षि क स्येष्टाऽनुपलम्भाद् व्यास्या निवृत्त्या निश्चयादा चार्येण प्रतिक्षिप्ता च । [1352] यद्यदर्शनमात्रणे दृष्टेभ्यः[1353] प्रतिषेधः क्रियते न च सोपि युक्त [295/s] इत्यादिनाऽ‘विरोधीनो’ विरोधरहिता स्यात् । एवमा चा र्यी यः[1354] कश्चन प्रतिबन्धमनभ्युपगच्छन् विरोधादुपालब्धः ॥ (१९)

संप्रति परान् प्रत्याह (।)

...v.3.20 देशादिभेदाद् दृश्यन्ते भिन्ना द्रव्येषु शक्तयः ।
तत्रैकदृष्ट्या नान्यत्र युक्तस्तद्भावनिश्चयः ॥ २० ॥

‘देशादिभेदात्’ देशकालसहकारिभेदात् ‘दृश्यन्ते भिन्ना’ नानाप्रकारा ‘द्रव्येषु शक्तयः’[1355] (।) ‘तत्रैक’स्मिन् देशादावेकस्य द्रव्यस्य शक्तिविशेषवतो ‘दृष्ट्याऽन्यत्र’ देशादौ[1356] ‘तस्य’ शक्तिविशेषवतो द्रव्यस्य ‘भावनिश्चयो न युक्तः’ प्रतिबन्धमन्तरेण । न ह्येकत्र यथौषधयो दृष्टास्तथैवान्यत्रापि ताः शक्यन्ते व्यवस्थापयितुं क्षेत्रादिविशेषाद् विशिष्टतररस[1357] वीर्यादिदर्शनात् । (२०)[58b/MA]

### (क) वैशेषिकमतनिरासः

किञ्च ।

...v.3.21 आत्ममृच्चेतनादीनां योऽभावस्याप्रसाधकः ।
स एवानुपलम्भः किं हेत्वभावस्य साधकः ॥ २१ ॥

---

[1349] ६ लक्षणयुक्ते बाधासम्भवे तल्लक्षणमेव दूषितं स्यादिति सर्व्वत्रानाश्वासः । नैवं मानद्वये ।

[1350] ७ अध्यक्षं किञ्चिद् दृष्ट्वा यत् किञ्चिद् पृथिव्यादि तत् सर्व्वमनुष्णाशीतरहितं तन्न तूलोपलपर्ण्णवादिवद् भेदसम्भवात् । अदर्शनमात्रे प्रत्यक्षवाधा ।

[1351] ८ आसङ्गतिः ।

[1352] ९ यद्यदृष्ट्या निवृत्तिस्तदाऽदृष्टेरदर्शनादनुष्णाशीतस्य स्पर्शस्य दृष्टो युक्तिः दृष्टेषु पृथिव्यादिष्वसङ्गतिर्या वैशेषिकोक्ता । यस्याचार्येणायुक्तत्वमुक्तं स्यादविरोधिनी, युक्तेव ।

[1353] १० दृष्टमेव स्वीकृत्यादृष्टेपि ।

[1354] १ शिष्योऽज्ञोऽदर्शनेनाभाववादी ।

[1355] २ अनेकशक्तिद्रव्येषु तत्र ।

[1356] ३ हेतोर्व्विरोधादनुयुक्ते ।

[1357] ४ वीर्यदोषापनयशक्तिः परिणामो विपाकः संस्कारः क्षीरसेकादि ।

'आत्ममृच्चेतनादीनां योऽभावस्याप्रसाधकः' । आत्मनोनुपलभ्यमानस्य च योऽनुपलम्भोऽभावस्याप्रसाधको वै शे षि क स्ये ष्टः (।) तथा मुदश्चेतनायाः स्वभावभूताया योऽनुपलम्भोऽभावाप्रसाधकश्चा र्वा क स्येष्टः ।[1358] [1359] तथा क्षीरादौ दध्याद्यभावस्य योनुपलम्भोऽप्रसाधक इष्टः सां ख्य स्य । स एवानुपलम्भः किं कस्माद् विपक्षे हेत्वभावस्येष्टो वै शे षिका दिभिः (।) यथा घटादौ प्राणादिमत्वाभावो वैशेषिकस्य । वक्तृत्वाभावो विपक्षे[1360] चा र्वा क स्य । संघात[1361] त्वाभावो वा विपक्षे सां ख्य स्यानुपलम्भादिष्टः । [296/s] उक्तः परेषाञ्च न्यायव्याघातः[1362] परस्परविरोधश्च[1363] (।) (२१)

यस्माददर्शनमात्रत् न व्यतिरेकसिद्धिः ।

...v.3.22 तस्मात् तन्मात्रसम्बन्धः स्वभावो भावमेव वा ।
निवर्तयेत् कारणं वा कार्यमव्यभिचारतः ॥ २२ ॥

'तस्मात् तन्मात्रसम्बन्ध'स्तत्साधनं केवलं तन्मात्रं तेन सम्बद्धः । हेतु[1364] सत्तामात्रेण कारणान्तरापेक्षारहितेन सम्बन्धो यस्येत्यर्थः[1365] । 'स्वभावो' व्यापको धर्मो निवर्त्तमानो भावं व्याप्यमेव वा निवर्त्तयेत् । यथा वृक्षत्वं शिंशपां वृक्षविशेषत्वाच्छिंशपायाः । 'कारणं वा' निवर्त्तमानं 'कार्यं निवर्त्तयति अव्यभिचारतः' (।) न हि व्याप्यं कार्यं च व्यापकेन कारणेन विना भवतः तत्स्वभावत्वात् तदधीनत्वाच्चेति । (२२)

तादात्म्यतदुत्पत्ती अवश्याश्रयणीये ॥

...v.3.23 अन्यथैकनिवृत्यान्यविनिवृत्तिः कथं भवेत् ।
नाश्ववानिति संदेहे किं न वा पशुसंशयः ॥ २३ ॥

'अन्यथैकस्य' साध्यस्य 'निवृत्याऽन्यस्य' साधनस्य 'विनिवृत्तिः कथम्भवेत्' स्वतन्त्रत्वात् । न हि मर्त्योऽश्वरहित इति गोरहितोपि भवति । (२३)

तथा (।)

...v.3.24 सन्निधानात् तथैकस्य कथमन्यस्य सन्निधिः ।
गोमानित्येव मर्त्येन भाव्यमश्ववतापि किम् ॥ २४ ॥

तथा 'सन्निधानादे'कस्य हेतोः[1366] 'कथमन्यस्य' साध्यस्य 'सन्निधिः । गोमा[1367] नित्येव मर्त्येन भाव्यमश्ववतापि किं' । गवाश्वस्य परस्परमप्रतिबद्धत्वादेकभावे नान्यभावः । तथा शिंशपाऽवृक्षादावपि स्यात् (।) यस्मात् कारणव्यापकनिवृत्त्या कार्यव्यापकनिवृत्तिर्दर्शनीया वि[1368] पक्षे (। २४)

[297/s]

1358 ५ लोकायतिकस्य ।

1359 ६ आदिना ।

1360 ७ असर्वज्ञाविरागयोः ।

1361 ८ अपरार्थेषु च शशविषाणादिषु (परार्थाश्चक्षुरादय इत्यभिधाय) संघातत्वस्यादर्शनाद् व्यतिरेकः को हि संहतस्य परार्थत्वे नियमः ।

1362 १ भिन्ना द्रव्येष्विति ।

1363 २ आत्मन्यस्वीकृतिः ।

1364 ३ ज्ञापको लिङ्गं ।

1365 ४ साध्यस्य ।

1366 ५ स्वभावेनासम्बद्धस्य ।

1367 ६ यस्मात् ।

1368 ७ यस्माद् व्याप्तिग्राहकं प्रमाणं नान्यत् स्वभावप्रतिबन्धग्राहकात् । तेनैव साधनस्य साध्यायत्तत्वग्रहात्

...v.3.25 तस्माद् वैधर्म्यदृष्टान्ते नेष्टोवश्यमिहाश्रयः
तदभावे च तन्नेति वचनादपि तद्गतिः ॥ २५ ॥

'तस्माद् वैधर्म्यदृष्टान्ते नेष्टो[1369] ऽवश्यमिहाश्रयः' वस्तुभूतो धर्मी । तस्य कारणव्यापकस्य साध्यस्याभावे च तत्कार्यवायप्यं 'साधनं नेति वचनादपि' तस्य साध्याभावे साधनाभावस्य गतिः । वस्तुनि वस्तुनिवृत्तिः सन्दिग्धा वस्तुसम्बन्धाविरोधात् । अवस्तुनि तु वस्तुसत्ता विरुध्यते निवृत्तिस्तु युक्ता । अतः स धर्मिणमन्तरेणापि वोङ्मात्रतोपि गम्यत एव (। २५)
यतः ।

...v.3.26 तद्भावहेतुभावौ हि दृष्टान्ते तदवेदिनः ।
ख्याप्येते विदुषां वाच्यो हेतुरेव हि केवलः ॥ २६ ॥

तद्भावहेतुभावौ 'दृष्टान्ते ख्याप्येते' (।) तस्य साधनस्य भावस्तादात्म्यं साध्यस्य हेतुभा-[1370] वश्च । ख्याप्यते वैधर्म्यदृष्टान्ते साध्यनिवृत्त्या 'साधननिवृत्ति'कथनेन तयोस्तादात्म्यतदुत्पत्तिबन्धमजानतो याह्यन्यनिवृत्त्येतरनिवृत्तिः । सा वस्तुभूतमाश्रयमन्तरेणापि शक्यते निर्देष्टुं । ये तु प्रतिबन्धं विदन्ति[1371] तेषां 'विदुषां हेतुरेव केवलो वाच्यः'[1372] । न दृष्टान्तः तत्र दर्शनीयस्य[1373] प्रतिबन्धस्य सिद्धत्वात् । यस्माद् दृष्टान्ते प्रतिबन्धः कथ्यते । (२६)

...v.3.27 तेनैव ज्ञातसम्बन्धे द्वयोरन्यतरोक्तितः ।
अर्थापत्या द्वितीयेपि स्मृतिः समुपजायते ॥ २७ ॥

'तेनैव' कारणेन 'ज्ञातसम्बन्धे' हेतौ साधर्म्यवैधर्म्यदृष्टान्तयो'रन्यतरस्योक्तितोऽर्थापत्त्या' सामर्थ्येन 'द्वितीयेपि स्मृतिः समुपजा'यते इति न तस्य निर्देशः कर्त्तव्यः (।) तथा हि यत् कृतकं तदनित्यं[1374] यथा घट इति (।) तादात्म्ये निर्ज्ञाते नित्यत्वाभावे[59a/MA] [298/s] कृतकत्वाभावः सामर्थ्यादाकाशादौ गम्यते । तथा वैधर्म्यदृष्टान्तेन तादात्म्ये कथिते सामर्थ्यादन्वयो घटादौ गम्यते ॥

एवं साधनभावे साध्यस्यावश्यं भावो यदि साध्याभावे हेत्वभावः । तथा साध्याभावे हेत्वभावस्तदा भवति । (२७)

यदि साधनभावेऽवश्यं साध्यभावः । एवं कार्यानुपलम्भयोरपि योज्यं ॥

...v.3.28 हेतुस्वभावाभावोतः प्रतिषेधे च कस्यचित् ।
हेतुर्युक्तोपलम्भस्य तस्य चानुपलम्भनम् ॥ २८ ॥

---

। साध्याभावेऽभावो गृहीत एव । केवलं तदविनाभावग्राहकं प्रमाणं विस्मृतत्वाद् दृष्टान्ताभ्याँ साधर्म्यवैधर्म्ययोः प्रदर्श्यते ।

[1369] १ नियमेन कार्यस्वभावे हेतौ ।

[1370] २ स्वभावहेतौ साध्यस्य तद्भावः साधनव्यापकत्वं । कार्यहेतौ साध्यस्य हेतुभावः कारणत्वं ।

[1371] ३ अविस्मृतेः ।

[1372] ४ पक्षधर्ममात्रनिश्चयार्थं ।

[1373] ५ अन्वयव्यतिरेकनिश्चायकस्य ।

[1374] ६ यदैककार्यकरणं प्रति सामर्थ्यं तत् तदैव न पूर्वं न पश्चात् तत्कार्याभावात् (।) सामर्थ्यञ्च तदव्यतिरिक्तमेवमुत्तरोत्तरकार्योत्पत्तावपि सामर्थ्यभेदेन पदार्थभेदात् क्षणिक एव क्रमाक्रमनियमः । अन्यथा एकदैककार्यकरणेऽनेककृतौ वान्यदाऽवस्तुत्वं कार्याभावात् पुनः कृतोक्रम एव । अथ प्रकारान्तरेण नैकदा नापि पुनः पुनः करोति तदास्यावस्तुत्वं नित्यस्याकर्तृत्वात् ।

यतः कारणव्यापकनिवृत्तिभ्यां कार्यव्याप्यनिवृत्तिः अतो हेतोः[1375] 'स्वभावस्य' व्यापकस्या-'भावः । कस्यचित्' कार्यस्य व्याप्यस्य च 'प्रतिषेधे'ऽभावे[1376] ऽभावव्यवहारे च हेतुः । तथा 'तस्य' प्रतिषेध्यस्य[1377] 'युक्तो[1378] पलम्भस्य' उपलब्धिलक्षणप्राप्तस्या'नुपलम्भनं' प्रति[1379] षेधे[1380] प्रतिषेधव्यवहारे हेतुः[1381] । तस्य स्वयमेवाभावरूपत्वात् ॥ (२८)

...v.3.29 इतीयन्त्रिविधोक्ताप्यनुपलब्धिरनेकधा ।
तत्तद्विरुद्धाद्यगतिगतिभेदप्रयोगतः ॥ २९ ॥

'इति' निर्दिष्टक्रमेणे'यम'नुपलब्धिः कारणव्यापकस्वभावानुपलब्धिभेदेन 'त्रिविधा[1382] प्यनेकधा' बहुप्रकारा 'तत्तद्विरुद्धाद्यगतिगतिभेदप्रयोगतः । ते च' कारणव्यापकस्वभावा'स्तेषां' विरुद्धादयश्च तत्तद्विरुद्धादय आदि[1383] शब्दाद् विरुद्धकार्यादयश्च तेषां यथाक्रममगतिगतयः कारणव्यापकस्वभावानामनुपलब्धय (:।) तेषां विरुद्धादीनामुपलब्धयश्च तासामन्योन्यं भेदो नानात्वं तस्य प्रयोगतः । शब्दस्याभिधाव्यापारात् । यथोक्तं[1384] प्राक् । सैषाऽनेकप्रकारापि त्रिविधानुपलब्धिः संगृहीतेत्यर्थः ॥ (२९)

उक्तमर्थं श्लोकाभ्यां संगृह्णन्नाह ।

...v.3.30 कार्यकारणभावाद्वा स्वभावाद्वा नियामकात् ।
अविनाभावनियमोऽदर्शनान्न न दर्शनात् ॥ ३० ॥

[299/s]

'कार्यकारणभावात्' तदुत्पत्तेर्वा 'नियामकात्' साधनस्य साध्याव्यभिचारकारणात् 'स्वभा-वात्' तादात्म्याद्वा नियाम'कादवि[1385] नाभावनियमः' साध्याव्यभिचारित्वनियमः साधनस्य । विपक्षे हेतो'रदर्शनात्' न सपक्षे 'दर्शनात्' । दर्शनादर्शनयोर्व्यभिचारिण्यपि हेतौ सम्भवात् नियमहेतुत्वाभावाच्च ॥ (३०)

...v.3.31 अवश्यंभावनियमोऽन्यथा परस्य कः परैः ।
अर्थान्तरनिमित्ते वा धर्मे वाससि रागवत् ॥ ३१ ॥

'अन्यथा' तादात्म्यतदुत्पत्त्योरव्यभिचारनिबन्धनयोरस्वीकारे 'परस्य' साध्यस्य 'परैः' सा-धनैः 'कोऽवश्यंभावनियमो' न कश्चित् ।उत्पादकादन्योर्थो'ऽर्थान्तरं तन्निमित्ते वा धर्मे'[1386] ऽस्वभावभूते कोऽवश्यम्भावनियमः । 'वाससि रागवत्'। यथा[1387] र्थान्तरनिमित्तस्य रागस्य

[1375] १ कारणस्य ।
[1376] २ च शब्दात् ।
[1377] ३ स्वभावस्य ।
[1378] ४ न्याय्य ।
[1379] ५ कारणव्यापकानुपलब्धी तु प्रतिषेधतद्व्यवहारयोः ।
[1380] ६ इत्यर्थः परः ।
[1381] ७ किं कारणं प्रतिषेधस्य न हेतुरित्याह ।
[1382] ८ समासात् ।
[1383] ९ कारणविरुद्धकार्योपलब्धिरादिना ।
[1384] १० प्रागत्राष्टधोक्तवत् ।
[1385] १ अविनाभावेनैव सिद्धे पुनर्नियमग्रहणं परनिरासाय । स ह्यन्यं नियममिच्छति ।
[1386] २ कृतकस्य हेतोरर्थान्तरस्य मृद्वादेर्निमित्तत्वमनित्यं प्रतीष्यते यत् तस्य कुतो नियमः ।
[1387] ३ कुसुम्भादि ।

वस्त्वे[1388] नावश्यंभावनि[1389] यमः ॥ (३१)

(ख) अविनाभावनियमः

...v.3.32 अर्थान्तरनिमित्तो हे धर्मः स्यादन्य एव सः ।
पश्चाद्भावान्न हेतुत्वं फलेप्येकान्तता कुतः ॥ ३२ ॥

वस्त्वोत्पादका'दर्थान्तरनिमित्तो' रागद्रव्यकारणो 'हि धर्मो' रागः[1390] प्रागुत्पन्नाद् वस्त्वा-'दन्य एव स्याद्' भिन्नकालत्वाद् भिन्नहेतुकत्वाच्च (।) इत्थ[1391] मपि यद्येकत्वं[59b/MA] विश्वमेकं भवेत् । ततश्च सहोत्पत्तिनाशौ स्यातां । सर्वत्र सर्व्वं चोपयुज्यते । एकत्वाभिमानस्तु सदृशापरापरोत्पत्तेर्भ्रान्त्या । तस्य[1392] चा[1393] र्थान्तरनिमित्त[1394]स्य धर्मस्य वस्त्वोत्पादात् 'पश्चाद्भावान्न हेतुत्वं' वस्त्वं प्रति । अतः कारणतयापि नास्त्यनुमानं रागोत्पत्तौ वस्त्वं सहकारिकारणं । अतः कार्यतया रागानुमानं चेत् [300/s] 'फलेपि' कारणादनुमीयमाने 'एकान्तता कुतः' । न ह्यवश्यं कारणानि कार्यवन्ति भवन्ति ॥ (३२)

यदि दर्शनादर्शने नान्वयव्यतिरेकबुद्धिहेतुर्द्धूमोग्निन्न व्यभिचरतीति न स्यात प्रतिपत्तिरित्याह ।

...v.3.33 कार्यं धूमो हुतभुजः कार्यधर्मानुवृत्तितः ।
तस्याभावे तु स भवन् हेतुमत्तां विलंघयेत् ॥ ३३ ॥

'कार्यं धूमो हुतभुजः' कार्यधर्मस्य कारणान्वयव्यतिरेकानुविधायित्वस्य त्रिविध[1395]दर्शनादर्शननिश्चितस्यानुवृत्तितः स[1396] धूमस्तस्याग्नेर'भावे तु' भवन् 'हेतुमत्ताम्वि[1397] लंघयेदति'क्रामयेत् ॥ (३३)

...v.3.34 नित्यं सत्त्वमसत्त्वं वाऽहेतोरन्यानपेक्षणात् ।
अपेक्षातश्च भावानां कादाचित्कस्य सम्भवः ॥ ३४ ॥

अहेतुत्वे च धूमस्य 'नित्यं सत्त्वमा'काशस्येव स्यात् । 'असत्त्वं' शशविषाणादेरिव । 'अहेतोरन्यापेक्षणा'भावात् 'अपेक्षातश्च भावानां कादाचित्कस्य सम्भवः' । ततो यद्यहेतुर्भावस्तदा नित्यं स्यात् । असदेव वा स्याद्धेत्वभावात् (।) तस्माद् धूमस्य[1398] कादाचित्कत्वदर्शनात् हेतुमत्वं । अग्न्यन्वयव्यतिरेकानुविधानदर्शनात् तत्कार्यत्वञ्च । यश्च यस्य कार्यं स तं न व्यभिचरति । तदधीनस्वरूपत्वात्[1399] ॥ (३४)

अतश्च (।)

---

[1388] ४ पूर्व्वनिष्पन्ने ।
[1389] ५ दूषणान्तरमाह । अर्थान्तरनिमित्तमनित्यत्वं कृतकादन्यदेव स्यात् ।
[1390] ६ अयमेव हि भेदो भेदहेतुर्व्वा यदुत विरुद्धधर्माध्यासः कारणभेदश्च ।
[1391] ७ त्रैगुण्यादैक्यमिति चेदाह ।
[1392] ८ अहेतुफलस्य साध्यस्यासंबन्धाद्धेतुः फलम्वा स्यादित्याह ।
[1393] ९ कृतकादर्थान्तरनिमित्तस्यानित्यस्य न हेतुत्वं ।
[1394] १० फले नित्ये पश्चाद्भाविनि च नैकान्तता कृतकस्य ज्ञापकहेतोः ।
[1395] १ प्रागदृष्टौ क्रमात् पश्यन् वेत्ति हेतुफलस्थितिं । दृष्टौ वा क्रमशोऽपश्यन्नन्यथा त्वनवस्थितिः ॥
[1396] २ धूमस्यान्यत्राग्निजन्यत्वे न किञ्चिद् बाधकमस्ति । तदेवेदमिति च प्रतीतेस्तत्सामान्यं प्रतीतमुच्यते ।
[1397] ३ न वाग्निसम्बन्धितयात्यक्षमीक्षेताकारणान् सकृदप्यनुदयात् ।
[1398] ४ नापि स्वभावतो भवति । अनिष्पन्नस्यासत्वादेव ।
[1399] ५ तद्विकारणमकारणं ।

...v.3.35 अग्निस्वभावः शक्रस्य मूर्धा यद्यग्निरेव सः ।
अथानग्निस्वभावोसौ धूमस्तत्र कथं भवेत् ॥ ३५ ॥

'अग्निस्वभावः शक्रस्य मूर्द्धा' वल्मीको 'यद्यग्निरेव स' तदा न हि वह्निस्वरूपतां विहायान्यद् वह्ने रूपं । 'अथा'न्यथा प्रतीयमानत्वाद'नग्निस्वभावोसौ' तदा 'धूमो' वह्नेर्जन्यस्वभाव'स्तत्र शक्रमूर्ध्नि कथं भवेत्' । न हि वह्निजन्योन्यस्माद् भवितु[301/s] मर्हति तदधीनत्वात् । ततः शक्रमूर्ध्नो धूमोत्पत्तिरिति भ्रान्तिरेषा[1400] । वह्नेरेव तद्देशवर्तिनोऽनुपलक्षितादुत्पत्तिः ॥(३५)
किंच (।)

...v.3.36 धूमहेतुस्वभावो हि वह्निस्तच्छक्तिभेदवान् ।
अधूमहेतोर्धूमस्य भावे स स्यादहेतुकः ॥ ३६ ॥

'धूमहेतुस्वभावस्तच्छक्ति[1401] भेदवान्' धूमजननशक्तिविशेषयुक्तो 'वह्निः' प्रतीतः । 'अधूमहेतो'रदहनात् 'धूमस्य भावे स' धूमो'ऽहेतुकः स्यात्' । हेतुं प्रमाणनिश्चितमन्तरेणैवोत्पादात् । अहेतुत्वे च नित्यं सत्त्वमसत्त्वम्वां स्यादित्युक्तं ॥(३६)

स्यादेतत्(।) शालूकादि स्वबीजाद् विजाती'याच्च' गोमयादेर्दृश्यते (।) तत्कथमवह्नेर्धूमोत्पादेऽहेतुत्वप्रसङ्ग इत्याह (।)

...v.3.37 अन्वयव्यतिरेकाद्यः यस्य दृष्टोनुवर्तकः ।
स्वभावस्तस्य तद्धेतुरतो भिन्नान्न सम्भवः ॥ ३७ ॥

'अन्वय[1402] व्यतिरेकाद् यः स्वभावो यस्यानुवर्त्तको'ऽपेक्षको दृष्टस्तंस्य स्वभावस्य तदनुवर्त्त्यमानं हेतुरतो भिन्नाद् विजातीयान्न संभवः कस्यचि[1403] द् । यद्धि शालूकादि स्वबीजप्रभवं यच्च विजातीयप्रभवं तयोः सदृशत्वप्रतीतावपि न तादृशत्वं रसवीर्यविपाक[1404] भेदात् । यदि तु हेतुभेदेप्यभेदो विश्वात्मकं द्रव्यं स्यादित्याद्युक्तं[60a/MA] प्रसज्येत ॥(३७)

## (४) सामान्यचिन्ता

...v.3.38 स्वभावेप्यविनाभावो भावमात्रानुरोधिनि ।
तदभावे स्वयम्भावस्याभावः स्यादभेदतः ॥ ३८ ॥

[302/s]

---

[1400] १ वाष्पे वर्षासु । ..........

[1401] २ खद्योतादिसकाशात् ।

[1402] ३ कार्यहेतुमधि ।

[1403] ४ उत्पद्यमानस्य पूर्व्वापररूपविविक्तस्य प्रत्यक्षेण ग्रहात् क्षणिकग्रह एव । न त्वक्षणिकग्रहः पूर्व्वापरकालयोरभासात् तत्सम्बन्धितयाऽभानमिदानीं पूर्व्वस्य विनाशः । अन्यस्वभावस्य भानमेवोत्पाद इति कथमुच्यते पूर्वोत्तरक्षणानां विनाशोत्पादादृष्टेरक्षणिक इति । नाप्यनेकक्षणरूप इदानीन्तनः तत्त्वे ह्यतीतादित्वमस्य स्यात् । तत्र चासत्त्वादेवाभानं । भासश्च वर्त्तमानस्यैव सत्त्वात् । तेन स्पष्टवस्तुभानमेव क्षणिकत्वं भ्रान्तेस्तु नाध्यवसायः प्रथममनुपलब्ध्या प्राक् सत्त्वं । अन्यत आगमनं तत्सिन्निहि (त) कुड्यादेर्हेतुत्वनिषेधः । एतावद्भिर्धूमो नाग्निजन्यः स्यात् । प्रथमप्रत्यक्षपक्षे यत्संनिधानात् कार्यप्रवृत्तिस्तन्मध्ये यदभावे कार्याभावस्तत्करणं ज्ञेयं गर्दभादेः ।

[1404] ५ यदा कदलीबीजकन्दोद्भवा स्फुटमेव तादृशो लोको विवेचयत्याकारभेदात् ।

स्वभावे[1405] पि हेतावविनाभावः । क्व (।) साध्ये 'भावमात्रानुरोधिनि' साधनस्वरूपमात्रानुवर्त्तिनि व्यापके यथा कृतकत्वस्यानित्यत्वे (।) यत'स्त'स्य व्यापकस्या'भावे भावस्य' व्याप्यस्य कृतकत्वादेः 'स्वयमभावः स्यात् । अभेदत' ऐकात्म्याद् वस्तुतः ॥ (३८)

यदि य एव कृतकः स एवानित्यो भेदाभावात् तदा[1406] प्रतिज्ञा[1407] र्थैकदेशो हेतुः स्यादित्याह ।

...v.3.39 सर्वे भावाः स्वभावेन स्वस्वभावव्यवस्थितेः ।
स्वभावपरभावाभ्यां व्यावृत्तिभागिनो यतः ॥ ३९ ॥

'सर्व्वे भावाः स्वभावेन[1408] स्वस्वभावव्यवस्थितेः' । आत्मात्मीयरूपवस्थितत्वात् । स्वभावपरभावाभ्यां सजातीयाद् विजातीयाच्च व्यावृत्ति[1409] भागिनो यस्मा[1410] न्न केनचिन्मिश्राः । (३९)

...v.3.40 तस्माद् व्यावृत्तिरर्थानां यतश्च तन्निबन्धनाः ।
जातिभेदाः प्रकल्प्यन्ते तद्विशेषावगाहिनः ॥ ४० ॥

तस्मात् 'यतो' यतोऽस्वरूपादर्था[1411] द् 'व्यावृत्तिरर्थानां तन्निबन्धनाः'[1412] तत्तद्व्या-
[303/s]
वृत्तिनिमित्ता 'जाति[1413] भेदास्त[1414] द्विशेषावगाहिनः' तत्स्वलक्षणाश्रयाः 'कल्प्यन्ते' शब्दैः स्ववाच्यतया ॥ (४०)

यतः शब्दः काश्चिद् अर्थक्रियाः कुर्वन्नतत्कारिणोऽशब्दादकृतकान्नित्यादेश्च व्यावृत्त इति तत्तद्व्यवच्छेदप्रतिपादनार्थं शब्दकृतकानित्यत्वाद्या जातयोऽनन्यशब्दवाच्यतया कल्प्यन्ते ।

...v.3.41 तस्माद् विशेषो यो येन धर्मेण संप्रतीयते ।
न स शक्यस्ततोन्येन तेन भिन्ना व्यवस्थितिः ॥ ४१ ॥

'तस्मात्' स्वभावाभेदेपि कृतकत्वानित्यत्वादीनां 'येन' धर्मेण नाम्नाऽनित्य इत्यनेन 'यो विशेषो' नित्याद् व्यावृत्तिः 'संप्रतीयते न' स विशेषः 'शक्यः ततो'ऽनित्यशब्दा'दन्येन' कृतकशब्देन प्रत्येतुं (।)। 'तेन' कारणेन साध्यसाधनयो'र्भिन्ना व्यवस्थितिः' । यद्यपि शब्द एव कृतकोऽनित्यश्च तथाप्यशब्दव्यावृत्ततया निश्चितो धर्मी कृतकतया च हेतुः । अनित्यतया

---

[1405] १ स्वभावे भावोपीत्युक्तेपि प्राक् तदनूद्य पक्षैकदेशासिद्धिनिवृत्त्यर्थं पुनराह ।

[1406] २ एकं सन्धित्सतोऽपरं प्रबाधते ।

[1407] ३ पक्षनिर्देशः प्रतिज्ञा तस्या अर्थो धर्म्मधर्म्मिसमुदायः । तदेकदेशः साध्यधर्मात्मको हेतुः स्यादसिद्धः (।) अत्र च पूर्ववृत्तेन धर्मकल्पनाबीजं द्वितीयेन धर्मकल्पना तृतीयेन प्रतिज्ञार्थैकदेशगतापरिहार इति समासार्थः ।

[1408] ४ जात्यादिभिर्भावा भिद्यन्ते न स्वभावेनेति परः (।) तन्न (।) भावा भिन्नाभिन्नभेदकारणे भावस्य न कि(ञ्चि)त् ॥ सर्व्वभावा भिन्ना इति नाध्यक्षानुगम्यमिति बहवः । तन्न ।

तत्वमुक्तं प्रतिद्रव्यं भिन्नरूपोपलम्भनात् ।
न ह्याख्यातुमशक्यत्वाद् भेदो नास्तीति गम्यते ॥
गवाश्वादीनां स्वरूपेणोत्पत्तिरेव भेदः ।

[1409] ५ यदि न वस्तुतो धर्मधर्मिभावः कथम्बुद्धिभेद इत्याह ।

[1410] ६ नित्याकृतकादेः ।

[1411] ७ शब्दादयः ।

[1412] ८ नित्यो नेति वासनातोऽनित्यबुद्धिरेवेति बुद्धिभेदः ।

[1413] ९ अनित्यकृतकादयः ।

[1414] २ स्वलक्षणस्य ये विशेषा अकृतकादिव्यावृत्ताः ।

चासिद्धः साध्यः[1415] । ततो धर्मिसाध्यसाधनानां भेदः कल्पितो न तु तान्येव कल्पितानि तेषां सत्त्वात् । ततः कल्पितधर्मिणि कल्पितात् साधनात् कल्पितस्य साध्यस्य[1416] सिद्धिमाचक्षाणः प्रत्याख्यातः (।) 'तस्मान्न' प्रतिज्ञार्थैकदेशो हेतुः । साध्यसाधनयोर्भिन्नव्यवच्छेदरूपत्वात् ॥ (४१)

कस्मात् पुनर्व्यवच्छेदः शब्दलिङ्गाभ्यां प्रतिपाद्यत इतीष्यते न तु 'वस्त्वेव' विधिरूपेणेत्याह[1417] (।)

...v.3.42 एकस्यार्थस्वभावस्य प्रत्यक्षस्य सतः स्वयम् ।
कोन्यो भागो न दृष्टः स्यात् यः प्रमाणैः परीक्ष्यते ॥ ४२ ॥

'एकस्यार्थस्वभावस्य स्वयमात्मना प्रत्यक्षस्य सतः कोन्यो भागो न दृष्टः स्यात् यः प्रमाणैः[1418] परीक्ष्यते' निर्णीयते । यदि प्रमाणान्तरैः शब्दान्तरैश्च वस्त्वेव विषयीकर्त्तव्यं[1419] तदा तत् प्रत्यक्षेण शब्दान्तरेण च दृष्टमेवेति व्यर्थानि प्रमाणानि स्युः । (४२)

[304/s]

त्वन्मतेपि प्रत्यक्षेण दृष्टे धर्मिणि प्रमाणान्तरवैफल्यं स्यात् (।) नेत्याह ।

...v.3.43 नो चेद् भ्रान्तिनिमित्तेन संयोज्येत गुणान्तरम् ।
शुक्तौ वा रजताकारो रूपसाधर्म्यदर्शनात् ॥ ४३ ॥

दृष्टे सर्वथा वस्तुनि 'नो चेद् भ्रान्तिनिमित्तेन' सादृश्यादिना 'संयोज्ये'तारोप्येत 'गुणान्तरं' धर्म्मान्तरमसदेव[1420] शुक्तौ वा शुक्ताविव 'रूपसाधर्म्यदर्शनात्' भ्रान्ति[60b/MA] निमित्ताद् रजताकारस्तदा सर्व्वथा वस्तुनिश्चयात् प्रमाणान्तरशब्दान्तरवैफल्यं स्यात् । (४३)

एतदेवाह (।)

...v.3.44 तस्माद् दृष्टस्य भावस्य दृष्ट एवाखिलो गुणः ।
भ्रान्तेर्न निश्चय इति साधनं संप्रवर्त्तते ॥ ४४ ॥

'तस्माद्[1421] दृष्टस्य भावस्य दृष्ट एवाखिलो गुणः' धर्मः । तथापि भ्रान्तेर्व्विपरीताकारारोपिकाया न निश्ची[1422] यत इत्यारोपितव्यवच्छेदार्थं 'साधनं' शब्दान्तरञ्च 'संप्रवर्त्तते ॥' (४४)

न केवलं प्रत्यक्षाद् वस्तुग्रहे साधनान्तरशब्दान्तरवैफल्यं किन्त्वनुमानादपीत्याह ।

...v.3.45 वस्तुग्रहेनुमानाच्च धर्मस्यैकस्य निश्चये ।
सर्वग्रहो ह्यपोहे तु नायं दोषः प्रसज्यते ॥ ४५ ॥

---

[1415] ३ अतो भिन्नविषया विकल्पाः शब्दाश्च तत्समविषया अपर्यायाः ।

[1416] ४ सर्व्वगत आत्मा सर्व्वत्रोपलभ्यमानगुणत्वादित्यादि ।

[1417] ५ सामान्यं खलु नात्माधि (ष्ठि)तोपि कल्पितो धर्मधर्मिभावोन्यथापि साध्यते ।

[1418] ६ धर्मधर्मिनिरंशस्य दृष्टस्यानुमानैर्व्यक्त्यपेक्षया बहुवचनं ।

[1419] ७ यथाऽनित्ये साध्ये शब्दो धर्मी प्रत्यक्षतः सर्व्वाकारं सिद्धः स्यात् ।

[1420] १ विकल्पेन सदृशापरोत्पत्त्या भ्रान्त्या नारोप्येत स्थिरत्वादि (ति) चेत् । अनुभूतानिश्चिते तु प्रमाणान्तरं प्रवर्त्तत एवारोपनिवृत्तये । तच्च लिङ्गं स्वव्यापकं विधिरूपेण निश्चितत्वादन्यसमारोपं निषेधति । अन्यथा समारोप एव व्यावृतेरल्पवृत्तिर्न स्यात् ।

[1421] २ अनंशस्यैकदेशदर्शनायोगात् ।

[1422] ३ दृष्टोपि ।

‘वस्तुग्रहेनुमानाच्च धर्मस्यैकस्य’ कृतकत्वादेः प्रत्ययभेदाभेदित्वादिकृते ‘निश्चये सर्व’स्यानित्यत्वादे‘र्ग्रहः’ स्यात् । एकरूपत्वात् । कृतकत्वादिसाधनान्तरवैयर्थ्यं । ‘अपोहे[1423] त्व’न्यव्यवच्छेदे शब्दलिङ्गविषये स्वीक्रियमाणे ‘नायं’ प्रमाणान्तरादिवैफल्य[305/s] ‘षः प्रसज्यते’[1424] । न खलु ‘प्रत्यग्रदृष्टं वस्त्वन्तरं शब्दलिङ्गाभ्यां विषयीक्रियते[1425]’ किन्त्वन्यव्यवच्छेदः । एकस्मिँश्च व्यवच्छेदे सिद्धेप्यसिद्धं व्यवच्छेदान्तरं लिङ्गान्तरतः शब्दान्तरतश्च साध्यत इति न कश्चिद् दोषः ॥ (४५)

...v.3.46 तस्मादपोहविषयं लिङ्गमिति प्रकीर्तितम् ।
अन्यथा धर्मिणः सिद्धौ किमतः साधकं परम् ॥ ४६ ॥

‘तस्मा’दाचार्येणा‘पोहविषयं लिङ्गमि[1426] ति प्रकीर्तितं’ । लिङ्गमुपलक्षणं शब्दश्च । ‘अन्यथा’ यदि वस्तुविषयं[1427] लिङ्गं तदा ‘धर्म्मिणः’ सर्वात्मना प्रत्यक्षतः ‘सिद्धौ किमतो’ धर्मिणः ‘परम’सिद्धमस्ति यत्प्र‘साधकं’ लिङ्गम्प्रमाणं स्यात् ॥ (४६)

...v.3.47 क्वचित् सामान्यविषयं दृष्टे ज्ञानमलिङ्गजम् ।
कथमन्यापोहविषयं तन्मात्रापोहगोचरः ॥ ४७ ॥

ननु ‘क्वचि’न्नीलादावसमारोपितोऽन्यो विपरीतांशो यस्मिन् । तस्मिन् प्रत्यक्षेण ‘दृष्टे यज्ज्ञानमलिङ्गजं’ विकल्पकं ‘सामान्यविषयं’ भवति । तदारोपाभावात् । कथमन्यापोहविषयं । आह[1428] ‘तन्मात्र’स्यानीलमात्रस्या‘पोहो’ विजातीयाद् व्यावृत्तिर्व्यवच्छेदः स ‘गोचरो’ यस्य तत्तथा । नीलविकल्पस्यानीलव्यवच्छेद एव विषय इत्यर्थः ॥ (४७)

कस्मादेवमित्याह (।)

...v.3.48 निश्चयारोपमनसोर्बाध्यबाधकभावतः ।
समारोपविवेकेऽस्य प्रवृत्तिरिति गम्यते ॥ ४८ ॥

[306/s]

‘निश्चयारो[1429] पमनसोर्बाष्यबाधकभावतः ।’ समारोपस्य ‘विवेके’ व्यवच्छेदेऽस्य निश्चयस्य ‘प्रवृत्तिरिति गम्यते’ ॥ (४८)

तस्माद् (।)

...v.3.49 यावन्तोंऽशसमारोपा निश्चयास्तन्निरासतः ।
तावन्त एव शब्दा भिन्नव्यवच्छेदगोचराः ॥ ४९ ॥

1423 ४ अपोह्यतेऽनेनेति बाह्यतया आरोपित आकारः । अपोह्यतेस्मिन् स्वलक्षणम्वाऽपोहः ।

1424 १ न विकल्पानां स्वरूपेण बाह्यो ग्राह्योपि तु स्वाकारेण सहैकीकृत एव बाह्यो विषयः स चासत्योऽपोह्यतेऽनेनान्यदित्यपोहः ।

1425 २ अकस्माद् धूमादग्निप्रतिपत्तावपि विपर्यासोस्ति । अग्निमन्तं प्रदेशमनग्निमत्वेन (धूमदर्शनात् प्राक् दर्शने साग्निदेशादन्योयमिति) ग्रहात् तस्मान्न धर्म्मबुद्धिर्वस्तुग्राहिणीत्यपोहविषया लिङ्गादनुमेयमनुसरन्नवश्यं संशयितो विपर्यस्तो वा स्यात् ।

1426 ३ उक्तेन प्रकारेण न साक्षात् ।

1427 ४ नापोहविषयं ।

1428 ५ स्वलक्षणं स्वाकाराभेदेन गृह्णत् प्रत्यक्षव्यापारमात्मन्यारोपयति । बाह्याध्यवसाय एव योज्यते तेन नीलमिति नीलसजातीये विहितं सर्व्वमन्यद् व्यवच्छिनत्ति । रूपनिश्चयेपि क्षणि (कत्वा) निश्चयात् ।

1429 १ प्रत्यक्षपृष्ठभाविन्यारोपि ।

'यावन्तोऽ'शस्य[1430] धर्मस्य 'समारोपास्तस्य निरास'निमित्तं वि'निश्चयाः' शब्दाश्च 'तावन्त' एव (।) तेन ते निश्चयाः शब्दाश्च 'भिन्नव्यवच्छेदगोचराः' ॥ (४९)

...v.3.50 अन्यथा वस्तु विषयीकुरुत एकेन वा धिया ।
एकत्र नान्यो विषयोस्तीति स्यात् पर्यायता ॥ ५० ॥

'अन्यथा' यदि शब्दनिश्चयौ सर्वात्मना वस्तु विषयीकुरुतः तदेकेन शब्देन 'बुद्ध्या वा' विकल्पिकया व्याप्ते सर्वात्मना विषयीकृते वस्तु'न्येकत्र नान्यो'ऽप्रतिपन्नो 'विष'यो'स्ती'ति 'पर्यायता' शब्दानां 'स्यात्' विकल्पानाञ्चैकविषयता भवेत् ॥ (५०)

ननु द्रव्यादुपाधयः परस्परञ्च भिन्नास्तन्निमित्ता विकल्पाः शब्दाश्च तेषु तदाधारे वा द्रव्ये वर्त्तन्त इत्याह ।

...v.3.51 नानोपाधिविशिष्टस्य भेदिनोर्थस्य ग्राहिका ।
उपकाराङ्गशक्तिभ्योऽभिन्नात्मनिश्चयग्रहे ॥ ५१ ॥

'यस्यापि नै या यि का दे'[1431] र्मते 'नानोपाधे'र्द्रव्यत्वाद्यनेकधर्म'विशिष्ट'[1432] स्यात [61a/MA] एवोपाधि[1433] भेदाद् 'भेदिनोर्थस्य[1434] ग्राहिका' विधिरूपेण[1435] धीः (।) तस्यापि[1436] मतेन नानाप्रकाराणामुपाधी'नामुपकारस्याङ्गं[1437]' याः 'शक्त'यस्ताभ्यो'ऽभिन्नात्मन' उपाधिमतो द्रव्यस्य 'निश्चय'ज्ञानेन 'ग्रहे' ॥ (५१)
[307/s]

...v.3.52 सर्वात्मना कृते ग्राहे को भेदः स्यादनिश्चितः ।
तयोरात्मनि सम्बन्धादेकज्ञाने द्वयग्रहः ॥ ५२ ॥

'सर्व्वात्मना' कृते सत्युपकार्यस्योपाधिकलापस्य मध्ये को 'भेद' उपाधिविशेषः 'स्यादनिश्चितः ।' यथा द्रव्यमेकमुपाधिमुपकरोति । तथा परानपि (।) तत एकोपाध्युपकारकत्वे विधिरूपेण गृह्यमाणे[1438] सर्व्वोपाध्युपकारकत्वं गृह्येत । तथा च सर्व्वोपाधिग्रहणप्रसङ्गः । न हि यत्सापेक्षं यद्रूपं तद[1439] ग्रहणे तद् गृहीतुं शक्यं ॥

ननु धूमापेक्षं वह्नेः कारणत्वं न च तद्ग्रहे धूमग्रहः । नैतद् युक्तं (।) तथाहि (।)

किं पुनः कारणत्वमिष्टं वह्नेर्यद्यविद्यमानत्वाद् धूमात् पूर्व्वकालभाविता । धूमासाहित्यं वर्त्तमानकालसत्ता । न तद् धूमापेक्षं स्वकारणात् तथोत्पत्तेः । धूममन्तरेणैव च भावात् । न च तद्ग्रहे धूमग्रहो विरुद्धत्वात् । न हि धूमग्रहणे तस्मात् प्राग्भावित्वस्य तदसाहित्यस्य च ग्रहणं । अथ धूमस्यायं हेतुरिति निश्चयविषयत्वं कारणत्वमिष्टन्तदाऽस्त्येवेदृशकारणत्वस्य ग्रहे धूमप्रतीतिरुभयप्रतीत्याकारत्वादस्य निश्चयस्य द्वयान्वयव्यतिरेकग्रहणसापेक्षत्वाच्च ॥

ननु च गृहीततदुत्पत्तेरग्निमात्रदर्शनात् कारणत्वप्रतीतिर्न च तदा 'धूमप्रतीतिः' ॥

---

[1430] २ यतो वस्त्वध्यवसायेन शब्दादेर्वृत्तः न वस्तुस्वरूपग्रहेण ततः ।
[1431] ३ वैशेषिकादेः भिन्नं पारमार्थिकं धर्मधर्मित्वं निन्दति ।
[1432] ४ घटादेः ।
[1433] ५ उपाधिषु वा शब्दधियौ वर्त्तेते इति न पर्यायताप्रसङ्गः ।
[1434] ६ नानाभेदयोगात् स्वयमभिन्नस्य ।
[1435] ७ प्रत्युपाधिभिन्ना ।
[1436] ८ दूषणमाशङ्क्य परिहरति
[1437] ९ कारणं ।
[1438] १ सति सम्बन्धाद् द्वयग्रह उपाध्युपाधिमतोः
[1439] २ स्वाग्रहणे स्वाम्यग्रहवत् ।

(सिद्धान्ती ।) न च तत्र प्रत्यक्षात् कारणत्वस्य प्रतीतिः किन्त्वग्निरू[8]पमात्रस्य (।) अन्यथा सर्व्वस्य तद्दर्शिनः कारणत्वप्रतीतिप्रसङ्गः ।[1440] किन्तु व्याप्तिग्रहसापेक्षा आनुमानिकी तत्प्रतीतिः । तथा हि गृहीततदुत्पत्तेरेवेयं भवति नान्यस्य । तदुत्पत्तिग्रहे च यदेवं रूपं तदेतत्कारणमिति गृहीता व्याप्तिरनुमानप्रतीतौ च धूमकारणं वह्निरिति व्यवच्छेदद्वयमन्योन्यसापेक्षं प्रतीयत एव इत्यलं तत्प्रसङ्गेन । न ह्यनुत्खातितकार्यः कारणत्वनिश्चयः । अत्यन्तमभ्यासाच्च व्याप्तिग्रहसंस्कारस्य प्रबुद्धत्वादपेक्षा नास्तीत्यतत्वविवेकिनां नानुमानत्वप्रबोधः । न ह्यनुमानमहमित्युत्पन्नमनुमानमुच्यते । किन्तु त्रिरूपलिङ्गजमनुमेयविषयं कारणत्वज्ञानञ्च तादृशमेव । द्रव्यन्तु येनैव रूपेण एकमुपाधिमुपकरोति तेनैवापरानपीत्येकोपोध्युपकारकत्वे गृह्यमाणे नानेकोपाध्युपकारकत्वस्य ग्रहणात् सर्व्वोपाधिग्रहणप्रसङ्गः परस्परसापेक्षत्वात् । ततश्च 'तयो'रुपाधिकलापतदुपकारकत्वयो'रात्मनि सम्बन्धात्' । [308/s] द्रव्यस्य सम्बन्धा'देक'स्योपाध्युपकारकत्वस्य 'ज्ञाने द्वयस्य ग्रहः' स्यात् । एकनियता प्रतीतिर्न भवेदित्यर्थः ॥ (५२)

अथ द्रव्यादुपाध्युपकारिकाः शक्तयो भिन्ना एव द्रव्यग्रहणे तासामग्रहणात् न सर्व्वोपाधिग्रहणप्रसङ्ग इत्याह ।

...v.3.53 धर्मोपकारशक्तीनां भेदे ताः तस्य किं यदि ।
नोपकारस्ततः तासां तथा स्यादनवस्थितिः ॥ ५३ ॥

'धर्मा'णामुपाधीना 'उपकार'स्य निमित्तभूतानां 'शक्ती'नां द्रव्याद् 'भेदे' स्वीक्रियमाणे 'ताः' शक्तय'स्तस्य' द्रव्यस्य 'किं' कस्मात् (।) यदि 'नोपकारस्ततो' द्रव्यात् 'तासां' शक्तीनामुपकारमन्तरेण सम्बन्धेऽतिप्रसङ्गात् (।) अथ तासां शक्तीनां द्रव्येणोपकारः क्रियते स्वरूपेण तदा शक्त्युपकारत्वस्य ग्रहणाच्छक्तीनां ग्रहः । तद्ग्रहाच्च सर्व्वोपाधिग्रहप्रसङ्गः तदवस्थः ।

[61b/MA]

स्यादेतत् (।) शक्तीरपि भिन्नाभिःशक्तिभिरुपकरोति 'तथा स्यादनवस्थितिः' । तथा हि यास्ताः शक्त्युपकारिकाः शक्त्यपस्ता द्रव्यस्योपकारद्वारा[1441] द् (?) यदीष्टास्तदास्वरूपेणोपकारकत्वे सर्व्वोपाधिग्रहप्रसङ्गभयादन्याः शक्तय एष्टव्याः । तथा चानवस्था व्यक्ता । (५३)

उक्तमर्थं संगृह्णन्नाह ।

...v.3.54 एकोपकारके ग्राह्येऽदृष्टाः तस्मिन्न सन्ति ते ।
सर्वोपकारकं ह्येकं तद्ग्रहे सकलग्रहः ॥ ५४ ॥

'एक'स्योपाधे'रुपकारके' द्रव्ये 'ग्राह्ये'ऽभिमते तत एकोपाध्युपकारकद्रव्यस्वभावादपरे उपाध्यन्तराणामुपकारका उपकारशक्तिभेदा दृष्टे 'तस्मिन्ने'कोपाध्युपकारके द्रव्येऽदृष्टा ये 'ते न सन्ति' (।) एकमेव हि रूपं सर्व्वोपाध्युपकारकमतस्त'स्यैको'पाधिमतो 'ग्रहे सकलोपाधिग्रहः' स्यात् ॥ (५४)

[309/s]

## क. न्यायमीमांसामतनिरासः

---

[1440] ३ कथन्तर्हि तत्प्रतीतिरित्याह ।

[1441] १ यदोपाधिष्वेव शब्दादिवृत्तिस्तदा नोक्तो दोषः किन्तु शब्दादेरनाक्षेपादुपाधिमति प्रवृत्तिर्न स्यादिति व्यर्थः शब्दप्रयोगः । अर्थक्रियाश्रयो हि व्यवहार उपाध (य) श्चात्र व्यवहारेऽसमर्थाः (।) समर्थश्चोपाधिमान्नोच्यते (।) किञ्च (।) निश्चयगृहीतेप्यर्थे भ्रान्तिनिवृत्यर्थं प्रमाणान्तरमिच्छता निश्चयविषयश्च न च निश्चित इत्यभ्युपेतं स्यात् अन्यथा भ्रान्त्ययोगात् (।) तच्चायुक्तमित्याह ।

## (क) व्यावृत्तस्वभावा भावाः

...v.3.55 यदि भ्रान्तिनिवृत्त्यर्थं गृहीतेप्यन्यदिष्यते ।
तद्व्यवच्छेदविषयं सिद्धन्तद्वत् ततोऽपरम् ॥ ५५ ॥

सर्व्वात्मना विकल्पेन 'गृहीतेपि' वस्तुनि भ्रान्त्या तथा न निश्चय इति 'यदि भ्रान्तिनिवृत्त्यर्थमन्यत्' प्रमाणान्तर'मिष्यते' (।) तद्भ्रान्तिनिवर्त्तकं प्रमाणान्तरं 'व्यवच्छेदविषयं सिद्धं'[1442] भ्रमारोपितत्वापोहविषयत्वाद् । 'ततो' भ्रान्तिनिवर्त्तकाद'परं' यत् पूर्व्वमुत्पन्नम्वस्तुविषयमिष्टं 'तद्व'दपोहविषयं सिद्धं ॥ (५५)
कस्मादित्याह (।)

...v.3.56 तद्विपक्षसमारोपविषये यदि निश्चयैः ।
निश्चीयते न यद् रूपं तत्तेषां विषयः कथम् ॥ ५६ ॥

अविद्यमानान्यसमारोपे 'विषये वृत्तेः' । विकल्पो हि व्यवच्छेदविषयं निश्चिन्वन् तद्विपक्षसमारोपविषये न भवति । किन्तु तद्व्यवच्छेदनिश्चयारोपमनसोर्ब्बाध्यबाधकभावत इत्युक्तं ।
अपि[1443] च निश्चयैरेकाकारप्रवृत्तै[1444]'र्यद् रूपं न निश्चीयते तत्तेषाम्विषयः क'थमुच्यते । निश्चितश्चाप्रतिपन्नं चेति विप्रति'सि' (? षि) द्धं । यदि कृतकत्वनिश्चयेऽनित्यत्वाद्यपि निश्चितं कथं तस्याप्रतिपत्तिः । कृत (क) त्वस्यापि वा माभूत् ॥ (५६)
एवन्तर्हि प्रत्यक्षगृहीते वस्तुनि निश्चयानिश्चयौ न स्यातामित्याह ।

...v.3.57 प्रत्यक्षेण गृहीतेपि विशेषेंशविवर्जिते ।
यद्विशेषावसायेस्ति प्रत्ययः स प्रतीयते ॥ ५७ ॥

'प्रत्यक्षेण गृहीतेपि विशेषे' स्वलक्षणे सर्व्वतो व्यावृत्तें'ऽशै'र्भागै'र्व्विवर्जिते' यस्य 'विशेष'स्य व्यवच्छेदस्या'वसाये'स्ति 'प्रत्ययः' सहकारी प्रकरणाभ्यासपाटवादिः 'स' [310/s] 'प्रतीयते' नेतरः । न खल्वस्मन्मते प्रत्यक्षं निश्च[1445] यात्मकं नाप्यनुभवमात्राधीनो निश्चयो[1446] येन सर्व्वथा निश्चयप्रसङ्गः । किन्तु यत्र व्यवच्छेदे[1447] ऽभ्यासादयः[1448] सहकारिणः प्रत्यक्षस्य सन्ति स निश्चीयते नान्य इति युक्तो विभागः । (५७)

...v.3.58 तत्रापि चान्यव्यावृत्तिरन्यव्यावृत्त इत्यपि ।
शब्दाश्च निश्चयाश्चैव निमित्तमनुरुन्धते ॥ ५८ ॥

'तत्रापि' चान्यापोहेपि शब्दविकल्पविषये'ऽन्यव्यावृत्तिरन्यव्यावृत्त इत्यपि (।) ये शब्दाश्च निश्चयाश्चैव' भिन्नविषया इव प्रवर्तन्ते न ते व्यावृत्तिव्यावृत्तयोर्व्वास्तवभेदनिबन्धनाः किन्तर्हि

[1442] १ उत्पित्सुसमारोपनिषेधद्वारेण ।
[1443] २ किञ्च ।
[1444] ३ यदेषां स्वविषयनिश्चयनमेव स्वार्थे वृत्तिः ।
[1445] १ कथमिदानीमनिश्चीयमानं प्रत्यक्षेणापि ग्रहीतमिति चेन्न प्रत्यक्षं निश्चयेन गृह्णाति किन्तु तत्प्रतिभासेन (।) शब्दप्रतिपत्योर्भेदस्तु संकेतभेदान्न तत्त्वतो वाच्यभेदः । संकेतभेदश्चानन्तरं भेदान्तरेत्याद्युक्तः ।
[1446] २ अनुभवो हि पटीयान् स्मृतिबीजमाधत्ते निश्चयः स्मृतिरूपः ।
[1447] ३ यथोपाध्याये पितर्यागच्छति पिता मे आगच्छतीति तत्रापि तारतम्यात् पूर्व्वपरविकल्पजननशक्तिः ।
[1448] ४ अथ गोरश्वादव्यावृत्तिर्व्यावृत्तो गौरिति वा यदा क्रियते तदा व्यावृत्तितद्वतोर्व्वस्तुतो भेदे सामान्यं नामान्तरेणोक्तं स्यात् व्यावृत्तिरिति । अभेदेपि ज्ञानशब्दयोर्भेदो (स्वलक्षणात्) न स्यादित्याह (।) एकमानेन सर्वसिद्धौ मानान्तरादिवैयर्थ्यं तदवस्थं ।

संकेतमेव भेदव्यवहारव्यस्थापकं वक्ष्यमाण'निमित्तमनुरुन्धते'ऽनुवर्त्तन्ते । यदि गोरन्याऽगोव्यावृत्तिस्तदा यथा गौरगोरश्वादेर्व्यावृत्तस्तथाऽगोव्यावृत्तेरपि व्यावृत्तः । ततश्चाश्वादिवद् गोरगौरेव स्यात् । यो ह्यगोव्यावृत्तेर्व्यावृत्तः सोऽगौर्यथाश्वादिर्गौश्च तथेति स्यात् । तथाऽगोव्यावृत्ति[6]रपि न प्राप्नोति । सर्व्वस्यैवागोत्वात् । गोरगोरन्यत्वे हि तस्माद् व्यावृत्तिः स्यात् । यदा तु गौरेव नास्ति तदा कस्य कस्माद् व्यावृत्तिः । तस्मान्न व्यावृत्तिव्यावृत्तयोर्व्वस्तुतो भेदः । (५८)

ततश्च ॥

...v.3.59 द्वयोरेकाभिधानेपि विभक्तिर्व्यतिरेकिणी ।
भिन्नमर्थमिवान्वेति वाच्यते स विशेषतः ॥ ५९ ॥

'द्वयो'र्व्यावृत्तिव्यावृत्तयोरेकस्यार्थस्या'भिधानेपि' वस्तुतो 'विभक्तिः' षष्ठ्यादि'र्व्यतिरेको' वाच्यभेदः तद्वती । व्यावृत्तस्य व्यावृत्तिरिति 'भिन्नमिवार्थमन्वे'त्यनु[311/s] गच्छति वाचकत्वेन । वाच्यस्य लेशविशेषतो[1449] ऽल्पभेदात् साङ्केतिकादभिन्ने-[62a/MA] प्यर्थे ॥ (५९)

किमर्थं संकेतभेदः कश्च वाच्यविशेष इत्याह ।

...v.3.60 भेदान्तरप्रतिक्षेपाप्रतिक्षेपौ तयोर्द्वयोः ।
पदं सङ्केतभेदस्य ज्ञातृवाञ्छानुरोधिनः ॥ ६० ॥

'भेदान्त'रस्य[1450] प्रतिपाद्यमानाद् व्यवच्छेदादन्यस्य व्यवच्छेदस्य 'प्रतिक्षेपः[1451]' । सामानाधिकरण्यस्य स्वभावोऽ'प्रतिक्षेप'स्तत्सम्भवः । 'तौ[1452] तयोर्द्वयो'र्व्यावृत्तिव्यावृत्त[1453] शब्दयोः[1454] 'संकेतभेदस्य ज्ञातृवाञ्छानुरोधिनः' पदं कारणं (।) ज्ञाता[1455] हि कदाचित् गौरनश्वत्वं निष्कृष्टधर्मान्तर[1456] सम्बन्धयोग्यत्वं जिज्ञासते[1457] (।) तदा गोत्वमस्येत्युच्यते न तु गोत्वमस्य शुक्लमिति । यदा तु व्यावृत्ति[1458] रेवानिष्कृष्टधर्मान्तरसम्बन्धयोग्या जिज्ञासिता भवति (।) तदा व्यावृत्तशब्दसंकेतो यथा गौरयमिति धर्म्मान्तरसामानाधिकरण्यञ्च गौः[1459] शुक्ल इत्यादि[1460] ॥ (६०)

...v.3.61 भेदोयमेव सर्वत्र द्रव्यभावाभिधायिनोः ।
शब्दयोर्न तयोर्वाच्ये विशेषस्तेन कश्चन ॥ ६१ ॥

'भेदोयमेव' संकेतकृतो धर्मान्तर[1461] प्रतिक्षेपाप्रतिक्षेपप्रतिपत्तिफलो 'द्रव्य[1462] भावा-

---

[1449] १ शब्दा हीच्छाधीना न वस्त्वधीनाः ते यथा प्रयोक्तुमिष्यन्ते भेदेऽभेदे वा तथा वाचकाः (।) यथा राज्ञः पुरुष आत्मात्मनो द्रष्टिति ।

[1450] २ गोत्वापेक्षया द्रव्यत्वपार्थिवत्वादेः ।

[1451] ३ अस्वीकारः ।

[1452] ४ यथाक्रमं ।

[1453] ५ धर्मधर्मिवाचिनोः ।

[1454] ६ प्रयोजनं ।

[1455] ७ श्रोता ।

[1456] ८ (अमहिषत्वादि) किमस्याश्वाद् व्यावृतं रूपमस्तीति ।

[1457] ९ न सामानाधिकरण्यम्बिशेषणविशेष्यभावो वा त्यक्त्वा भेदान्तरत्वादेव गोत्वशुक्लत्वाभ्यां युक्तमेकं धर्मिणं गृहीत्वा बुद्धेरप्रतिभासनात् ।

[1458] १० कुतोस्य व्यावृत्तिरिति तदा भेदान्तराक्षेपात् तत्साकांक्षत्वाच्च ।

[1459] ११ अनेकधर्मवन्तं धर्मिणमेकमिव दर्शयन्ती बुद्धिरत्र यस्मात् ।

[1460] १२ अयं नीलादि ।

[1461] १३ नापरं सामान्यगुणादिकं बाधितत्वात् ।

[1462] १४ सर्व्वत्र सामान्यतद्वति गुणतद्वति क्रियातद्वति ।

भिधायिनो'र्द्धर्मिधर्मवाचिनोः 'शब्दयोर्न' वास्तवः । 'तेन तयोर्व्वाच्ये' निश्चयविषये 'न क'श्चिद् 'विशेषः' । भेदान्तरप्रतिक्षेपाप्रतिक्षेपाभ्यामेकस्यैव प्रत्यायनात् ॥ (६१)

[312/s]

...v.3.62 जिज्ञापयिषुरर्थं तं तद्धितेन कृतापि वा ।
अन्येन वा यदि ब्रूयात् भेदो नास्ति ततः परः ॥ ६२ ॥

तथा व्यवहर्त्ता 'जिज्ञापयिषुरर्थं तं' साङ्केतिकं भेदं 'तद्धितेन कृतापि वा[1463]' पाचकत्वमस्य पाचकोयम्पाकः पाक्यो वेत्यादि । 'अन्येन वा' स्वयंकृतेन समयेन 'यदि ब्रूयात्' (।) तथापि 'ततो' भेदप्रतिपादकात् तद्धितादे'र्भेदः' परो वास्तवो 'नास्ति'॥ (६२)

...v.3.63 तेनान्यापोहविषये तद्दोषोपवर्ण्णनम् ।[1464]
प्रत्याख्यातं पृथक्त्वे हि स्याद् दोषो जातितद्वतोः ॥ ६३ ॥

'तेन' व्यावृत्तिव्यावृत्तयोरभेदे'नान्यापोहविषये' जातिमान् शब्दवाच्य इति पक्षः तद्वत् पक्षभूर्दोषोऽन्यापोहेपि स्यादिति । 'तद्दोषोपवर्ण्णनं प्रत्याख्यातं' । तद्वत् पक्षो हि जातिमभिधाय शब्दस्तद्वति वर्त्तत इति तद्वचने[1465] स्वातन्त्र्यम[1466] स्य न स्यात् सामानाधिकरण्यञ्च न भवेत् (।) गौः शुक्ल इति जातेरशुक्लत्वात् (।) न चोपचाराश्रयेण स्वातन्त्र्यं सामान्याधिकरण्यञ्चास्खलद्वतियुक्तमित्यादि 'जातितद्वतोः पृथक्त्वे हि स्याद् दोष एषः' । न तु व्यावृत्तिव्यावृत्तिमतोर्भेद इति नात्र तत्पक्षोक्तदोषः ॥ (६३)

यदि[1467] व्यावृत्तितद्वतोर्न भवेस्तदा गोर्गोत्वं शुक्लत्वसास्नादिमत्वादयश्चेति षष्ठीवचनभेदादि न प्राप्नोतीत्याह ।

...v.3.64 येषां वस्तुवशा वाचो न विवक्षापराश्रयाः ।
षष्ठीवचनभेदादि चोद्यं तान् प्रति युक्तिमत् ॥ ६४ ॥

'येषां' बाह्यानां मते 'वस्तुवशा' वस्त्वायत्ता 'वाचो न विवक्षापर आश्रयः' कारणं यासां तास्तथा । 'षष्ठीवचनभेदादि चोद्यं तान् प्रति युक्तिमत्' ॥ (६४)

...v.3.65 यद् यथा वाचकत्वेन वक्तृभिर्विनियम्यते ।
अनपेक्षितबाह्यार्थं तत् तथा वाचकं वचः ॥ ६५ ॥

[313/s]

अस्माकं यद्वचो 'यथा' धर्मान्तरस्य प्रतिक्षेपेणाप्रति'वाचकत्वेन वक्तृभिर्नियम्यते' विशेषेण व्यवस्थाप्यते'ऽनपेक्षितवाह्यार्थं' संकेतमात्रानुरोधित्वात् 'तद्वचस्तथा वाचकमि'ष्टमिति न चोद्यावकाशः ॥ (६५)

...v.3.66 दाराः षण्णगरीत्यादौ भेदाभेदव्यवस्थितेः ।
खस्य स्वभावः खत्वं वेत्यत्र वा किं निबन्धनम् ॥ ६६ ॥

---

[1463] १ जातिगुणक्रियासम्बन्धैश्चतुष्टयी वृत्तिरुक्तानेनैव ।

[1464] * तद्वत्पक्षोपवर्ण्णनम् ।

[1465] २ जाति ।

[1466] ३ शब्दस्य ।

[1467] ४ कथमिदानीमेकस्याननुगमादन्यव्यावृत्तिः सामान्यं । स्वलक्षणानुभवोत्तरमेककार्येष्वेकमाकारमादर्श (य) न्विकल्पः सामान्यं अतत्कार्येभ्यो भिद्यमाना अर्थाः सामान्यादिव्यवहारविषय इत्यन्यापोहविषयत्वं ।

यस्य तु वास्तव एव शाब्दो व्यवहारस्तस्य ‘दाराः षण्णगरी[1468] त्यादा-’वादिशब्दात् गृहा विंशतिरित्यादौ च यथाक्रममभिन्ने भिन्ने च वस्तुतो ‘भेदा-भेदयो’र्बहुवचनैकवचननिमित्तयो‘र्व्यवस्थितेः । खस्य स्वभावः खत्वं वेत्यत्र’ धर्मिधर्मभेदस्य ‘किम्वा’ निमित्तं न किञ्चन । न ह्येकस्या (:) स्त्रिया बहुत्वं षण्णां नगराणां वा एकत्वमा-काशस्य स्वभावो भि[1469] न्नः सामान्यं वास्ति । अथ चास्ति शब्दवृत्तिस्ततः कल्पित एव तद्विषयो वक्तव्यः ॥ (६६)

यदि सर्वतो व्यावृत्तस्वभावा भावा न तेषु सामान्यमस्ति कथं गोत्वमित्यादिसामान्यप्रती-तिरित्याह ।

...v.3.67 एकार्थप्रतिभासिन्या भावानाश्रित्य भेदिनः ।
रूपं परेषां व्यावृत्तं सा धीः संवृतिरुच्यते ॥ ६७ ॥

‘भेदिनः’ सर्व्वतो व्यावृत्तान् ‘भावानाश्रित्य’ परम्परापातेभ्य[1470] उत्पद्य ‘यया’ धिया ‘एकार्थप्रतिभासिन्या’ एकार्थाध्यवसायस्वाकारया स्वरूपेण स्वप्रतिभासेन ‘परेषां’ स्वलक्षणानां ‘रूपं’ सर्व्वतो व्यावृत्तं[1471] संव्रियते प्रच्छाद्यते ‘सा[1472] बुद्धिः’[62b/MA] ‘संवृतिरुच्यते’ ॥ (६७)

[314/s]

...v.3.68 तया संवृतनानात्वाः संवृत्या भेदिनः स्वयम् ।
अभेदिन इवाभान्ति भेदा[1473] रूपेण केनचित् ॥ ६८ ॥

‘तया’ संवृत्या ‘स्वय’मात्मना ‘भेदिनः’ स्वस्वभावव्यवस्थिता भावाः ‘संवृतनानात्वाः’ स्थगितभेदाः ‘केनचिद् रूपेण’ विजातीयव्यावृत्त्युपकल्पितेन गोत्वादिनाऽ‘भेदिन इवाभान्ति’ ॥ (६८)

...v.3.69 तस्या अभिप्रायवशात् सामान्यं सत्प्रकीर्तितम् ।
यथा तयोपकल्पितं तदसत परमार्थतः ॥ ६९ ॥

‘तस्या’ बुद्धेः सामान्यरूपतयाऽध्यवसिताकारायाऽ (?‘अ’) ‘भिप्रायवशात्’ सामान्यं ‘सत् प्रकीर्त्तितं’ । विजातीयव्यावृत्तेर्व्वस्तुष्वभावात् । तदुपकल्पितं गोत्वादि सामान्य रूपेण बुद्ध्याकारमध्यव‘श्य’ (? स्य) न्ति व्यवहर्त्तारः । अध्यवसायानुरोधेन च सामान्यं सदित्युच्यते (।) ‘यथा’ वस्तुत्वेन ‘तत्’ सामान्यं ‘तया’ संवृत्तिबुद्ध्या कल्पितं ‘तथाऽसत् परमार्थतः’ ॥ (६९)

तदेवासत्त्वमाह ।

---

[1468] १ क्रियातो गुणतो वा समाहारो द्रव्याश्रितः । नगरन्तु विजातीयानारम्भादद्रव्यं ।

[1469] २ भेदान्तरादिना एतदुक्तम्भवति । अतश्वत्वामहिषत्वादिषु भेदान्तरेष्वेकपिण्डनिष्ठेषु सत्स्वप्यनपेक्षितभेदा-न्तरमश्वव्यवच्छेदलक्षणमनश्वत्वमात्रमनश्वत्वशब्दस्य धर्मवचनस्य संकेतकारणं । अत्यक्तभेदान्तरन्तु तदेवानश्वत्वं अनश्व इति धर्मिवचनस्य संकेतभेदे कारणं (।) एतच्च पूर्व्वश्लोकावतारणेन ज्ञेयं ।

[1470] ३ तदन्यव्यतिरेकिणः पदार्थानाश्रित्य ।

[1471] ४ तदेवं समारोपपक्षे परोक्तं दूषणं परिहृत्यान्यव्यावृत्तिपक्षे तानभ्युपगमादेवं व्यावृत्ताभावा एकत्वेना-ध्यवसिताः सामान्यमित्युक्त्वा बुद्ध्याकारे सामान्ये परदूषणमपनयति । तत्तु बुद्ध्याकारश्च बुद्धिस्थो नार्थबुद्ध्यन्तरानुगः । नाभिप्रेतार्थकारी च सोपि वाच्यो न तत्वतः ॥ अनुप्रवेशे सामान्यं न स्यादित्यव्यतिरिक्तदूषणं ।

[1472] ५ प्रकृत्या एकाकारपरामर्शहेतून् भावानाश्रित्य विकल्पबुद्धिरेकाकारोत्पद्यमाना यं एकमाकारं भा-वेष्वर्प्ययति स एव बुद्ध्याकारः शब्दप्रवृत्यङगः सामान्यं सिद्धान्तिनापि बीजमस्य वाच्यमनाश्रयस्यानुत्पत्तेरित्याह ।

[1473] १ PH. भावाः

...v.3.70 व्यक्तयो नानुयन्त्यन्यदनुयायि न भासते ।
ज्ञानादव्यतिरिक्तं वा कथमर्थान्तरं व्रजेत् ॥ ७० ॥

'व्यक्तय'स्ताव'न्न' परस्पर'मनुयन्ति' भेदात्[1474] । तास्व'नु[1475] यायि' च किञ्चिन्न 'भासते' व्यक्तिमात्रवेदनात् । यच्च 'ज्ञानादव्यतिरिक्त'माकार[1476] स्वरूपं तत्क'थमर्थान्तरं' ज्ञानान्तरं[1477] 'वा व्रजेत्' स्वलक्षणरूपत्वादस्य ॥ (७०)

...v.3.71 तस्मान्मिथ्याविकल्पोयमर्थेष्वेकात्मताग्रहः ।
इतरेतरभेदोस्य बीजं संज्ञा यदर्थिका ॥ ७१ ॥

'तस्मादर्थरूप'स्य ज्ञानरूपस्य च सामान्यस्य योगा'न्मिथ्याविकल्पोयम'र्थशून्य एष विकल्पोयम'र्थेष्वेकात्मतायाः' सामान्यरूपताया 'ग्रहः । अस्य'[1478] चैकात्मतया प्रति[315/s] भासिनो मिथ्याविकल्पस्य 'बीजं' हेतुरितरस्मादतत्कार्य[1479] कारिणो 'भेदो' व्यावृत्तिः । 'यदर्थिका संज्ञा' शब्दोपि विजातीयव्यावृत्तौ संकेत्यते तद्विषयश्च ॥ (७१)

## (ख) भिन्नानामभिन्नं कार्यम्

कथं पुनर्भिन्नानामभिन्नं कार्यमित्याह ।

...v.3.72 एकप्रत्यवमर्शार्थज्ञानाद्येकार्थसाधने ।
केचिद् भेदेपि नियताः स्वभावेनेन्द्रियादिवत् ॥ ७२ ॥

'एकप्रत्यवमर्श' एकाकाराध्यवसायोऽ'र्थज्ञानं' रूपादि'ज्ञानं'[1480] च त'दादि'र्यस्य ज्वरहरणादेः । तस्यैकार्थस्य 'साधने' करणे 'स्वभावेन' प्रकृत्या स्वहेतुदत्तया 'भेदेपि' भेदाविशेषेपि 'केचिद्' बाहुलेयादयो 'नियता' न कर्कादय 'इन्द्रियादिवत्[1481]' । यथा चक्षूरूपालोकमनस्कारादय[1482] एव भेदाविशेषेपि रूपविज्ञानं जनयन्ति न श्रोत्रशब्दादयः ॥ (७२)

एतदेव दृष्टान्तेरेण दृढयन्नाह ।

...v.3.73 ज्वरादिशमने काश्चित् सह प्रत्येकमेव वा ।
दृष्टा यथा वौषधयो नानात्वेपि न चापराः ॥ ७३ ॥

'ज्वरादिशमने' कर्त्तव्ये 'काश्चित्' गूडूच्यादयः 'सह' परस्परं 'प्रत्येकम्वा दृष्टा । नानात्वेपि न चापराः । यथा' गूडूचीमुस्तादयो भिन्नास्तथा त्रपुषादयोपि । तथापि काश्चिज्ज्वरं शमयन्ति न सर्व्वाः । एवं शाबलेयादय एकप्रत्यवमर्शं कुर्व्वन्ति । 'न' कर्कादयः ॥ (७३)

स्यादेतत् । तास्वोषधीषु सामान्यं किञ्चिदस्ति तत् ज्वरादिशमनं करोति । तन्नैष दृष्टान्त (: ।) इत्याह ।

---

[1474] २ व्यतिरिक्ते ।
[1475] ३ विकल्पप्रतिभासेपि दोषश्चेत् समानाकारो भात्येव यथा प्रतिभासश्चास्त्येवावस्तुत्वात् ।
[1476] ४ विकल्पबुद्ध्याकारोस्तु सामान्यं स च ज्ञानवद् वस्तुसन्नित्यत्राह ।
[1477] ५ बाह्यव्यक्तेर्ज्ञानस्य चाव्यापने स्यात् सामान्यं ।
[1478] ६ एकप्रत्यवमर्षज्ञानसाधने नियता इति साध्यमुक्तम् ।
[1479] १ वाहदोहाद्यकारिणः ।
[1480] २ पूर्व्वेण सह द्वन्द्वः ।
[1481] ३ अर्थज्ञानादिदृष्टान्तः ।
[1482] ४ असत्यप्येककार्यनियते सामान्ये ।

...v.3.74 अविशेषान्न सामान्यमविशेषप्रसङ्गतः ।
तासां क्षेत्रादिभेदेपि ध्रौव्याद्यानुपकारतः ॥ ७४ ॥

'अविशेषात्' सामान्यस्याक्रियावस्थातः क्रियावस्थायां 'न सामान्यं' काश्चिदर्थक्रियामुपकल्पयति । 'तासां' गूडूच्यादिव्यक्तीनां 'क्षेत्रादिभेदेपि' सामान्यस्य कार्यिणोऽविशिष्टत्वात् ज्वरशमनादेः कार्यस्या'विशेषप्रसङ्गतः' चिरक्षिप्रप्रशमनाद्यभावासक्तेः ।[1483] 'ध्रौव्याद्यानुपकारतः' । सामान्यस्य नित्यत्वात् । अन्येभ्यः सहकारिभ्य उपकाराभावात् सकृत् तत्कार्याणि स्युः ॥ (७४)

[316/s]

## (ग) अपोहस्य विजातीयव्यावर्त्तकत्वम्

अपोहविषयत्वे शब्दविकल्पयोः सामान्यं विशेषणविशेष्यभावं धर्मिधर्मभावञ्च व्यवस्थापयितुमाह ।

...v.3.75 तत्स्वभावविकल्पा धीस्तदर्थे वाप्यनर्थिका ।
विकल्पिकाऽतत्कार्यार्थभेदनिष्ठा प्रजायते ॥ ७५ ॥

'तस्यो'त्पलादेः शब्दादेश्च स्वलक्षणस्य 'स्वभाव'ग्रहादूर्ध्वं या 'विकल्पिका धीः प्रजायते' वस्तुतो'ऽनर्थि'कापि 'तदर्थेव' स्वलक्षणविषयेवाऽध्यवसायानुरोधात् परमार्थता[1484] 'ऽतत्कार्येभ्यो अर्थेभ्यो भेदो' व्यावृत्तिस्तत्र 'निष्ठा'ऽवस्थानं यस्या सा तथा विजातीयव्यावृत्तिविषयेत्यर्थः ॥ (७५)

...v.3.76 तस्यां यद्रूपमाभाति बाह्यमेकमिवान्यतः ।
व्यावृत्तमिव निस्तत्वं परीक्षानङ्गभावतः ॥ ७६ ॥

...v.3.77 अर्था ज्ञाननिविष्टास्त एवं व्यावृत्तरूपकाः ।
अभिन्ना इव चाभान्ति व्यावृत्ताः पुनरन्यतः ॥ ७७ ॥

[63a/MA]

'तस्यां' विकल्पबुद्धौ 'यद् रूपं' य आकारो दृश्यविकल्पयोरेकत्वाध्यवसायाभ्यासदार्ढ्यादबाह्यमपि बाह्यमिवासाधारणमप्येकमिव सर्वव्यक्तिषु सदृशवृत्तेः । यथा यथा व्यक्तयो दृश्यन्ते तथा तथैवाध्यवसायात् व्यावृत्तमिव विजातीयव्यावृत्तवस्त्वभेदेन निश्चयात् । न च तद्व्यावृत्तं गोरूपत्वप्रसङ्गात् । अत एव निस्तत्वं निःस्वरूपं यथाभूतरूपतिरोधानेनान्यथाध्यवसायात् । तथा चापरीक्षाया विचारस्या'नङ्गभावा'दनाश्रयान्निस्तत्वं तत्[1485] द्विविधं त्वर्थो ज्ञानं वा । न चैतत् तथा । यतः[1486] कारणात् तेन कल्पितेन सामान्यरूपेण 'तेऽर्था' एकार्थक्रिया-

---

[1483] ५ प्रसङ्गात् ।

[1484] १ तेन यद् [कुमारिल] भ ट्टः (।) अन्य निवृत्तिमात्रापोहे अनीलादिव्यावृत्तावनुत्पलादिव्यावृत्त्यभावः । एवमनुत्पले ततो न विशेषणविशेष्यता । नापि सामानाधिकरण्यमपोहयोर्भेदात् (।) न च स्वलक्षणं शब्दविषयः । अपोहयोर्व्वाऽप्रतीतेः । तन्निरस्तं । बाह्याभिन्नस्य स्वाकारस्य शब्दादिविषयत्वेनेष्टत्वात् (।) तेन नीलोत्पलादिशब्दे शबलार्थाभिधानमेव ।

[1485] २ परीक्षाङ्गं ।

[1486] ३ यतो बुद्धिप्रतिभासि रूपं निस्तत्वमतस्तद्विषयो व्यवहारोपि मिथ्यार्थ इत्याह ।

कारिणोऽतत्कार्य[1487]भ्यो [317/s] 'व्यावृ'त्तस्वभावा 'ज्ञाननिविष्टा' विकल्पबुद्ध्यारूढा 'अभिन्ना इवा[1488] भान्त्युत्पलत्वादिना' शब्दत्वादिना 'च' ।

एतेन सामान्यव्यवस्थो[1489] क्ता (।) त[1490] एवैकज्ञा[1491] त्यवसिताऽन्यतोऽनीलात् नित्याच्च नीलमित्यादिविकल्पाकारेण एकेन तत्कारिता[1492] व्यावृत्तरूपताऽध्यवसायविषयेण विशेषिता व्यावृत्ता आभान्ति नीलोत्पलमिति शब्द[1493] स्यानित्यत्वमिति ॥ (७६, ७७)

...v.3.78 त एव तेषां सामान्यसमानाधारगोचरैः ।
ज्ञानाभिधानैर्व्यवहारो मिथ्यार्थः प्रतन्यते ॥ ७८ ॥

'तेषा'मुभयव्यावृत्तिविशेषितानां विकल्पारूढानामर्थानां 'सामान्ययो'र्विशेषणविशेष्यभूतयोर्द्धर्मधर्मिरूपयोश्च सामानाधिकरण्यं 'समानाधारो' भावप्रधानत्वान्निर्देशस्य । स 'गोचरो' येषान्ते'र्ज्ञानाभिधानै'र्विकल्पशब्दैर्विशेषणविशेष्यभावस्य धर्मिधर्मभावस्य 'व्यवहारो मिथ्यार्थः प्रतन्यते' विस्तार्यते ॥ (७८)

...v.3.79 स च सर्वः पदार्थानामन्योन्याभावसंश्रयः ।
तेनान्यापोहविषयः तदतत्कार्यकारिणाम् ॥ ७९ ॥

....3.80a वस्तुलाभाश्रयो;

'स च' ज्ञानाभिधानलक्षणो विशेषणविशेष्यभावादिव्यवहारः 'सर्व्वः पदार्थानां' तदतत्कार्यकारिणा'मन्योत्यस्य' इतरेतरस्या'भावो' व्यवच्छेदः[1494] 'संश्रयो' विषयो यस्य स तथा । 'तेन' व्यवच्छेदविषयत्वेना'पोहविषयो' व्यवस्थाप्यते । 'वस्तुनो[1495] लाभस्य' प्राप्तेश्चा'श्रयो' निमित्तं स व्यवहारो भवति ॥[1496] (७९)

....3.80b यत्र यथोक्तानुमित्तौ यथा ।
नान्यत्र भ्रान्तिसाम्येपि दीपतेजो मणौ यथा ॥ ८० ॥

यत्र व्यवहारे वस्तुनः सम्बन्धः परंपरया तदुत्पत्तेरस्ति[1497] 'यथोक्तानुमितौ' [318/s] यादृशी साध्यप्रतिबद्धकार्यस्वभावानुपलम्भलिङ्गजानुमितिरुक्ता । तत्र 'यथा' परंपरयावस्तुसम्बन्धाद् वस्तुप्रा'प्तिर्नान्यत्र[1498] भ्रान्तिसाम्येपि दीपतेजो मणौ यथा' । कुञ्चिकाविवरदेशस्थे दीपतेजसि भ्रान्त्या समारोपिते मणौ[1499] परम्परयापि वस्तुसम्बन्धाभावान्न

[1487] ४ यतो विजातीयाद् व्यावृत्तिरूपवन्तः । यथाऽनुत्पलाद् व्यावृत्तिरुपिण उत्पलार्थाः ।
[1488] १ न वस्तुतो बुद्धिरूपस्यालीकत्वात् ।
[1489] २ व्यवहारनिमित्तं ।
[1490] ३ त एवेति परिकारिकाया आकृष्टं ।
[1491] ४ त एव ज्ञान (नि) विष्टा व्यावृत्ताः सन्तः पुनरन्यतः सजातीयादपि व्यावृत्ता भान्ति यथा नीला अनीलादतश्च व्यावृत्तिद्वयस्य भानात् सामानाधिकरण्यबीजमुक्तं ।
[1492] ५ व्यावृत्तभाव ।
[1493] ६ उत्पलानित्यमात्रजाती बुद्ध्या नीलशब्देन विशेषिते ।
[1494] ७ व्यावृत्तपदार्थानुभवद्वारेणोत्पत्तेः ।
[1495] ८ विधिविषयत्वादस्य ।
[1496] ९ न सर्व्वः किन्तु ।
[1497] १० उदाहरणमाह ।
[1498] १ स्थिरादिविकल्पे तत्र प (।) रंपर्येणापि वस्त्वसम्बन्धात् वस्तुनोऽस्थिरादित्वाद् ।
[1499] २ अधिगन्तव्ये ।

प्राप्तिः । एवं यद्यपि सर्व्वस्य विकल्पस्य स्वप्रतिभासेऽनर्थेर्थाध्यवसायेन वृत्तेर्भ्रान्तत्वं तथापि यो वस्तुसम्बन्धवान् स तत्प्रापको नेतर इति युक्तो विभागः ॥ (८०)

ननु यदि ज्ञाननिविष्टानामर्थानां सामर्थ्यादिव्यवहारस्तदा बाह्येषु स न स्यादित्याह ।

...v.3.81 तत्रानेकोपि कार्यैका न तत्कार्यपराश्रयैः ।
ज्ञानाभिधानैरेकत्वात् व्यवहारः प्रतार्यते ॥ ८१ ॥

'तत्र' गवाश्वादिव्यक्तिषु मध्ये'ऽनेकोपि' सा (?शा) वलेयबाहुलेयादिरेकमभेदावसायादिकार्यं यस्य 'ज्ञानाभिधानैः' कीदृशैस्तद्वाहाद्यकार्यं 'कार्यं' न भवति येषां कर्कादीनां तेभ्योऽन्यता तद्व्यवच्छेदः स 'आश्रयो' विषयो येषां 'तैरेकत्वेन व्यवहारं प्रतार्यते' प्राप्यते । शावलेयादिर्विजातीयव्यावृतौ व्यावृत्त्याश्रयैः शब्दज्ञानैरेकत्वेन व्यवह्नियते इत्यर्थः ॥ (८१)

...v.3.82 ततश्चैकोप्यनेककृत् तद्भावपरिदीपनात् ।
अतत्कार्यार्थभेदेन नानाधर्मः प्रतीयते ॥ ८२ ॥

'ततश्[1500] चैकोपि दीपादिरा'लोकान्धकारापनयनवर्तिदाहा'द्यनेककार्यकृत्' (।) [63b/MA] 'तद्भावस्या'नेककार्यकारित्वस्य 'परिदीपन'निमित्त'मतत्कार्यार्थे'भ्य एकैककार्यसमर्थेभ्यो 'भेदेन' व्यवच्छेदेन 'नानाधर्मः प्रतीयते' शब्दविकल्पैः । यथाऽनालोककारिभ्यो भेदादालोककृदनन्धकारहन्तृभ्यो भेदादन्धकारहन्ता दीप उच्यत इत्यादि ॥ (८२)

...v.3.83 यथाप्रतीति कथितः शब्दार्थोसावसन्नपि ।
सामानाधिकरण्यं च वस्तुन्यस्य न सम्भवः ॥ ८३ ॥

[319/s]

तदेवं 'यथा[1501] प्रतीति' संव्यवहारानतिक्रमेण[1502] 'शब्दार्थः' सामान्यलक्षणः सामानाधिकरण्यं 'विशेषणविशेष्यभावश्च च शब्दात् कथितोऽसन्नपि परमार्थतः । यतो वस्तुन्यस्य शब्दार्थस्य सामान्यादेः पारमार्थिकस्यासंभवः । सर्व्वतो व्यावृत्तस्य वस्तुमात्रस्याध्यक्षेणोपलम्भात् । तद्व्यावुत्त्याश्रयेण कल्प्यमानं सामान्यं तत्सामानाधिकरण्यं' चावस्त्वेव ॥ (८३)

...v.3.84 धर्म्मधर्म्मिव्यवस्थानं भेदोऽभेदश्च यादृशः ।
असमीक्षिततत्वोर्थो यथा लोके प्रतीयते ॥ ८४ ॥

तथा 'धर्म[1503] धर्म्मिणोर्व्यवस्थानियमः' शब्दो धर्म्येव कृतकत्वं 'धर्म एव । तयोर्भेदः[1504]' शब्दो धर्मी कृतकत्वं धर्म इत्य'भेद'श्च कृतकोऽनित्यश्च शब्द 'इत्यादि (।) यादृशो' धर्मान्तरप्रतिक्षेपाप्रतिक्षेपाभ्यामुक्तोऽ'समीक्षित[1505] तत्वोर्थो'ऽलक्षिततत्वो यथा[1506] लोके 'प्रतीयते' ॥ (८४)

...v.3.85 तं तथैव समाश्रित्य साध्यसाधनसंस्थितिः ।
परमार्थावताराय विद्वद्भिरवकल्प्यते ॥ ८५ ॥

---

1500 ३ तथेत्यन्तरं सामान्यव्यपेक्षया सामानाधिकरण्यविशेषणविशेष्यभावव्यवहारश्च बाह्येष्वेवेति दर्शयन्नाह ।
1501 १ यदि बाह्ये सामान्यादिव्यवहारस्तर्हि वास्तवः प्राप्त इत्याह ।
1502 २ विकल्पबुद्ध्यनुरोधेन ।
1503 ३ अयमपि ज्ञानप्रतिभासिन्यर्थ इत्याह ।
1504 ४ शब्दस्य कृतकमिति ।
1505 ५ विकल्पारोपितत्वात् ।
1506 ६ बुद्ध्यारूढोप्यध्यवसिततद्भावतया ।

'तं' धर्म्मिधर्म्मादिविभागं 'तथैव समाश्रित्य साध्यसाधनसंस्थितिर्व्विद्वद्भिरवकल्प्यते' (।) 'परमार्थे' वस्तुस्वभावभूते क्षणिकत्वादा'ववताराय' लोकस्य वस्तुत्वक्षणिकत्वयोर्भेदः परः कल्पितः वस्तु तु क्षणिकमेव । तच्च साध्यसाधनकल्पनया शक्यं प्रत्येतुं ॥(८५)

कस्मात् पुनर्व्वस्तुनि सामान्यधर्मिधर्मादि नास्तीत्याह (।)

...v.3.86 संसृज्यन्ते न भिद्यन्ते स्वतोर्थाः पारमार्थिकाः ।
रूपमेकमनेकञ्च तेषु बुद्धेरुपप्लवः ॥ ८६ ॥

'पारमार्थिका अर्थाः स्वतः' स्वरूपेण 'न संसृज्यन्ते' (।) यतः सामान्यं वस्तु स्यात् । 'नापि भिद्यन्ते' कृतकत्वशब्दत्वादिना यतो धर्मिधर्मभेदो भवेत् । यत्तु 'तेषु'[1507] 'रूपमेकं' गोत्वाद्यनुयायि । 'अनेक'ञ्च [1508]शब्दकृतकत्वादि व्यवह्रियतेऽसौ बुद्धेरनादिवासनोपहताया 'उपल्पवो' मिथ्योपदर्शनं ॥ (८६)
[320/s]

...v.3.87 भेदस्ततोपि बौद्धेऽर्थे सामान्यं भेद इत्यपि ।
तस्यैव चान्यव्यावृत्त्या धर्मभेदः प्रकल्प्यते ॥ ८७ ॥

'ततो'यं विशेष इदं 'सामान्य'मिति 'भेद' इदं साध्यमिदं साधनमित्यपि भेदो 'बौद्धे' बुद्धिपरिकल्पितेऽ'र्थे' न वस्तुनि । कथन्तर्हि स्वलक्षणे कृतकत्वादि'भेद' इत्याह । 'तस्यैव' स्वलक्षणस्यान्यस्मादकृतकादे'र्व्यावृत्या' तदाश्रयेण 'धर्मभेदः प्रकल्प्यते ॥'(८७)

कस्मात् कल्पितभेदद्वारेण साध्यसाधनभाव इष्टो न वस्तुभेदेनेत्याह ।

...v.3.88 साध्यसाधनसंकल्पे वस्तुदर्शनहानितः ।
भेदः सामान्यसंसृष्टो ग्राह्यो नात्र स्वलक्षणम् ॥ ८८ ॥

'साध्यसाधनसंकल्पे' इदं साध्यमिदं साधनमिति विकल्पे क्रियमाणे 'वस्तुदर्शनस्य हानितः' कल्पित एव भेदः । न खलु विकल्पे वस्तुदर्शनमस्ति कल्पितगोचर[1509] त्वात् तस्य । आलोचनाज्ञानं वस्तुविषयं न किञ्चित् तद् विभजति ।

नन्वाचार्यादि ग्रा स्य 'भेदः सामान्यसंसृष्टो ग्राह्य' इष्टः । 'अत्र' भेदः सामान्यसंसृष्टः प्रतीयते इत्यस्मिन् वचने 'न स्वलक्षणं' ग्राह्यतया निर्दिष्टं किन्त्वध्यवसेयतया[1510] ॥ (८८)

कस्मादेव[1511] मित्याह ।

...v.3.89 समानभिन्नाद्याकारैर्न तद् ग्राह्यं कथञ्चन ।
भेदानां बहुभेदानां तत्रैकस्मिन्नयोगतः ॥ ८९ ॥

'समानभिन्नाद्याकारैः' सामान्याकारधर्मिधर्मभेदाकारसामानाधिकरण्याद्याकारैश्च 'तत्' स्वलक्षणं 'कथञ्चन ग्राह्यं' न भवति । किं कारणमित्याह । 'भेदानां'[1512] धर्माणां कृतकत्वादीनां 'बहुभेदा'नामनेकप्रकाराणां 'तत्र' स्वल[1513] क्षण 'एकस्मिन्नयोगतः' ॥ (८९)
[321/s]

---

[1507] ७ बहुष्वर्थेषु ।
[1508] ८ एकत्रार्थ ।
[1509] ९ कुतः स्वलक्षणस्य सामान्यसहितस्य ग्रह इति वा ।
[1510] २ बाह्य एव भेदास्तेनापोहलक्षणेन सामान्येन संसृष्टा अध्यवसीयन्ते ।
[1511] ३ तत्र बोद्धव्यं ।
[1512] ४ वस्तुरूपाणां ।
[1513] ५ निरंशत्वात् ।

...v.3.90 तद्रूपं सर्वतो भिन्नं तथा तत्प्रतिपादिका ।
न श्रुतिः कल्पना वास्ति सामान्येनैव वृत्तितः ॥ ९० ॥

तस्मात् तस्य स्वलक्षणस्य 'रूपं सर्व्वतः' सजातीयविजातीयाद् 'भिन्नं तथा' तेन सर्व्वतो भिन्नेन रूपेण 'तत्प्रतिपादिका श्रुतिः कल्पना वा नास्ति । सामान्येनैव' कल्पितेन रूपेण शब्दविकल्पयो'र्वृत्तितः' ॥ (९०)

किं पुनः स्वलक्षणमेव शब्दैर्नोच्यते इत्याह[1514] ।

...v.3.91 शब्दाः संकेतितं प्राहुर्व्यवहाराय स स्मृतः ।
तदा स्वलक्षणं नास्ति सङ्केतस्तेन तत्र न ॥ ९१ ॥

[64a/MA]

'शब्दाः संकेतित'मर्थमा'हुर्न' यं कश्चित् ।[1515] 'स' संकेतो 'व्यवहाराय स्मृतः' (।) संकेतित[1516] मर्थं शब्दादुच्चरितात् प्रतिपद्येयमिति संकेतग्रहणं । 'तदा' व्यवहारकाले च 'स्वलक्षणं'[1517] संकेतविषयो 'नास्ति तेन तत्र' स्वलक्षणे 'संकेतो न' युक्तः ॥ (९१)

एवन्तर्हि सामान्ये[1518] व्यवहारकालानुयायिनि संकेतः [1519] स्यादित्याह ।

...v.3.92 अपि प्रवर्त्तेत पुमान् विज्ञायार्थक्रियाक्षमान् ।
तत्साधनायेत्यर्थेषु संयोज्यन्तेऽभिधाक्रियाः ॥ ९२ ॥

'अपि[1520] प्रवर्त्तेत पुमान्' शब्दाद् 'विज्ञायार्थक्रियाक्षमान्' । तस्या अर्थक्रियायाः 'साधनायेति' । एतदर्थम'र्थेषु संयोज्यन्ते' संकेत्यन्ते शब्दा न व्यसनितया ॥ (९२)

...v.3.93 अत्रानर्थक्रियायोग्यो नास्ति तद्वानलं स च ।
साक्षान्न योज्यते कस्मादानन्त्याच्चेदिदं समम् ॥ ९३ ॥

तत्रैवं सत्यनर्थक्रियायां योग्योऽर्थक्रियायां शक्ता जातिरिति न तत्र सङ्केतो युक्तः । 'तद्वान्' जातिमान् विशेषो'ऽलं' शक्तो[1521]र्थक्रियायामिति तत्र संकेत इति चेत् । 'स' विशेषश्च 'साक्षात्' संङ्केते 'कस्मान्न योज्यते' (।) किं जातिव्यवधि[322/s] स्वीकारेण अनर्थक्रियाकारित्वादस्याः स्वलक्षणस्य च विपर्ययात् । व्यक्तीना'मानन्त्यान्न' तत्र शक्य इति 'चेत् । इद'मानन्त्यं 'समं'[1522] जातिमद्व्यक्तिष्वपि[1523] ॥ (९३)

...v.3.94 तत्कारिणामतत्कारिभेदसाम्ये न किं कृतः ।
तद्वद्दोषस्य साम्याच्चेदस्तु जातिरलं परा ॥ ९४ ॥

---

1514 १ येन तत्प्रतिपादिका न श्रुतिः ।

1515 २ सामान्येनैवेत्युक्तेप्यधिकपरिहारायोपन्यासः ।

1516 ३ संकेतविषयीकृतं ।

1517 ४ एकस्वलक्षणस्यापि क्षणिकत्वान्नानुगमोऽक्षणिकस्यापि संकेतज्ञानाजनकत्वात् । किमुत देशकालभिन्नेषु ।

1518 ५ वै शे षि क स्य व्यतिरिक्ते सां ख्य स्याव्यतिरिक्ते ।

1519 ६ भवतु ।

1520 ७ कथं नाम ।

1521 ८ सामान्येन शब्दलक्षितेन सम्बन्धाद् व्यक्तिरपि लक्ष्यते

1522 ९ न हि गोशब्दाद् गोत्वबुद्ध्या व्यक्तिबोधोस्ति । सामान्ये वातोदिते कथं व्यक्तौ वृतिः । न हि सम्बन्धेपि दण्डं (ि) च्छन्धीति दण्डिनं छिनत्ति कश्चित् ।

1523 २ जातौ कृते संकेते व्यक्तावप्रतीतिर्न च जातितद्वतोः सम्बन्धोऽतदुत्पत्तेः ।

किञ्च यामर्थक्रियामुद्दिश्य शब्दनियोग'स्तत्कारिणा'मर्थाना'मतत्कारि'भ्यो यो 'भेदो' व्यवच्छेदस्तदेव 'साम्यं' सामान्यमन्यापोहः साधारणत्वात् । तत्र 'किं' संकेतो न कृतः सामान्यवदपोहोपि साधारणोऽनर्थक्रियाकारी स्वलक्षणसम्बन्धात् तदुपलभ्यरूपश्चः । 'तद्वद्दोषस्य' जाति[1524] मति संकेतविषये आनन्त्यात् संकेताकरणस्य 'साम्याच्चेदस्तु' दोषः समानत्वात् (।) द्वयोरस्त 'जातिः पराऽलमनु'पयुक्ता जातिमभ्युपेत्यापि विजातीयव्यवच्छेदोऽ[1525] वश्याश्रयणीयः । यदि गौरश्वादिभ्यो न व्यवच्छिन्नस्तदाऽश्व एव स्यात् । यश्चैकस्य व्यवच्छेदः[1526] स सर्व्वस्य (।) स एव सङ्केतविषयो[1527] ऽस्तु किं प्रमाणबाधितजातिस्वीकारेण । अत एव तद्वद्दोषोपि न सम्भवति । अभ्युपगम्य तु सांप्रतमापादितं ॥ (९४) किञ्च (।)

...v.3.95 तदन्यपरिहारेण प्रवर्त्तेतेति च ध्वनिः ।
तेन तेभ्योऽव्यवच्छेदे प्रवर्त्तेत कथञ्च सः ॥ ९५ ॥

तस्मा[1528] देकार्थक्रियाकारिणो[1529]'ऽन्य'स्य 'परिहा'रेण शब्दात् 'प्रवर्त्तेतेति ध्व'निरुच्यते । 'तेन' ध्वनिना 'तेभ्यो'ऽतत्कारिभ्योऽ'स्य' तत्कारिणोऽव्यवच्छेदे [323/s] व्यवच्छेदेऽक्रियमाणे 'कथं' स श्रोता प्रतिनियतपदार्थार्थी[1530] प्रवर्त्तेत 'विषयानभिधानात्' ॥ (९५)

अथ शब्दैर्व्यवच्छेदः क्रियत एव प्रवृत्तिविषयस्तु जातिरुच्यत इत्याह ।

...v.3.96 व्यवच्छेदोस्ति चेदस्य नन्वेतावत् प्रयोजनम् ।
शब्दानामिति किं तत्र सामान्येनापरेण वः ॥ ९६ ॥

'अस्य' जातिमतो 'व्यवच्छेदोऽस्ति चेत् । नन्वेतावदन्यव्यवच्छेदे[1531] न प्रवर्त्तनं शब्दानां प्रयोजन'मिष्ट'मिति सामान्येनापरेण' किं कार्यं वः । तदन्तरेण च शब्दादन्यव्यवच्छेदाभिधानेपि प्रवृत्तिसंभवात् ॥ (९६)

## (६) सामान्याभावे प्रत्यभिज्ञासंगतिः

यदि नास्ति जातिस्तदा भिन्नस्वभावेषु भावेषु स एवायं गौरित्यादि प्रत्यभिज्ञानं न स्यादित्याह ।

...v.3.97 ज्ञानाद्यर्थक्रियां तांस्तां दृष्ट्वा भेदेन कुर्वतः ।
अर्थान्तदन्यविश्लेषविषयैर्ध्वनिभिः सह ॥ ९७ ॥

'ज्ञानमादि'र्यस्या बाह्य'द्यर्थक्रिया'यास्तामेकाकारपरामर्शविषयां 'भेदेन' नानात्वेपि 'कुर्व्वतो'र्थान् 'दृष्ट्वा तदन्य'स्माद् यो 'विश्लेषः' स 'विषयो' येषां 'तैर्ध्व् वनिभिः सह' ॥ (९७)

---

[1524] ३ जातिमत्पक्षें यो [दिग्] नागोक्तदोषः । तद्वतो नास्वतन्त्रत्वादित्यादिना तद्दोषावताराद् भेदेन्यव्यावृत्तिलक्षणे न शब्दनियोगः जातिकल्पनमनर्थनिर्व्वन्ध एव नित्यव्यापिताद्ययोगादयमाशयो व्यावृत्त्यमिधाने नागस्य जातिर्न प्रवृत्तियोग्या तद्द्वातोदितेपि न वृत्तिरित्युक्तेः अर्थाशक्तेः ।

[1525] ४ भावानामन्यव्यावृत्त्यभावे वस्तुभूताऽनेकासमवेता जातिरपि न स्यात् ।

[1526] ५ विजातीयाद् भेद एव सजातीयाभेदः इति आनन्त्यादिदोषः खण्डितः स्यात् जातिधर्मश्च दर्शित इति व्यवच्छेदं त्यक्त्वा ।

[1527] ६ व्यवच्छेदविशिष्टोर्थः ।

[1528] ७ अधुना शब्देनावश्यं व्यावृत्तिश्चोदनीयेत्याह ।

[1529] ८ श्रोत्रा प्रतिपादकेन ।

[1530] ९ आनयेति सर्व्वस्य अग्निमिति व्यवच्छेदवैयर्थ्यं अव्यवच्छेदेनाभिधाने ।

[1531] २ तदस्वीकारे न जातिरित्युक्तं ।

...v.3.98 संयोज्य प्रत्यभिज्ञानं पूर्वदृष्टान्यदर्शने ।
परस्यापि न सा बुद्धिः सामान्यादेव केवलात् ॥ ९८ ॥

'संयोज्य' स एवायं गौरित्यादि'प्रत्यभिज्ञानं पूर्वदृष्टा'दर्थाद् विलक्षणस्य 'दर्शनेपि' कुर्यात् । तदन्यविश्लेषस्य सर्व्वत्र साम्यात् ॥

किञ्च (।) यदि नानात्वात् प्रत्यभिज्ञानमयुक्तं तदा 'परस्यापि न सा' प्रत्यभिज्ञा 'बुद्धिः सामान्यादेव केवलादिष्टा' किन्तु सामान्यविशेषाभ्यां[1532] । (९८)
कस्मादित्याह (।)

....3.99a नित्यं तन्मात्रविज्ञाने व्यक्त्यज्ञानप्रसङ्गतः ।

'नित्य'तया 'तस्य' सामान्य'मात्रस्य विज्ञाने व्यक्त्यज्ञानप्रसङ्गतः' ॥
[324/s]

## (ङ) तद्वत्तानिश्चयः

....3.99b तदा कदाचित् सम्बद्धस्यागृहीतस्य तद्वतः ॥ ९९ ॥

...3.100a तद्वत्तानिश्चयो न स्याद् व्यवहारस्ततः कथम् ।

यदा सामान्यज्ञानस्य न विशेषो विषय'स्तदा कदाचिदगृहीतस्य सम्बद्धस्य' सामान्येन 'तद्वतो' विशेषस्य (९९) 'तद्वत्तानिश्चय' इदमस्य सामान्यमिति ज्ञानं 'न स्यात्' । ततस्तद्वत्ता-व्यवहारः कथं त्वन्मते ॥

...3.100b एकवस्तुसहायाश्चेद् व्यक्तयो ज्ञानकारणम् ॥ १०० ॥

....3.101 तदेकं वस्तु किं तासां नानात्वं समपोहति ।
नानात्वाच्चैकविज्ञानहेतुता तासु नेष्यते ॥ १०१ ॥

[64b/MA]

एकं वस्तु सामान्यं तत्सहायाश्चेद् व्यक्तयो ज्ञानस्य प्रत्यभिज्ञानस्य कारणमिष्यन्ते (।) 'तदेकं' सामान्यं 'वस्तु किन्तासां' व्यक्तीनाममिश्रस्वभावानां 'नानात्वं समपोहति' (।) येन प्रत्यभिज्ञानहेतुत्वे ।[1533] 'नानात्वाच्चैकस्य[1534]' प्रत्यभिज्ञा'ज्ञानस्य हेतुता तासु' त्वया 'नेष्यते' । तच्चेत् तथैव[1535] न[1536] स्यात्[1537] प्रत्यभिज्ञानम् ॥ (१००, १०१)

....3.102 अनेकमपि यद्येकमपेक्ष्याभिन्नबुद्धिकृत् ।
ताभिर्विनापि प्रत्येकं क्रियमाणान्धियं प्रति ॥ १०२ ॥

...3.103a तेनैकेनापि सामान्यात् तासां नेत्यग्रहे धिया ।

---

1532 ३ मी मां स क स्य मतेन ।
1533 १ किं पुनस्तासां नानात्वापोहः भाष्यत इत्याह ।
1534 २ ह्यर्थे चः ।
1535 ३ व्यक्तिषु ।
1536 ४ पूर्ववद् व्यक्तिग्रहः ।
1537 ५ च एवार्थे ।

'अनेकमपि' व्यक्तिरूपं 'यद्येकं' सामान्य'मपेक्ष्याभिन्नबुद्धिकृत्' प्रत्यभिज्ञानकारीष्यते । 'ताभि'र्व्यक्तिभिः प्रत्येकं[1538] 'विनैकै'कया प्रेरितेन सामान्येनैकेन 'क्रियमाणां धियं' प्रत्यभिज्ञां प्रतिभासां व्यक्तीनां[1539] सामर्थ्यं नेति तया धिया तासामग्रहः । केवलं सामान्यग्रहणे च तद्वत्ता निश्चयो न स्यादिति दुःपरिहरं ॥ (१०२)

ननु यथा नीलादीनामेकैकापायेपि चक्षुर्विज्ञानं दृष्टं तत्समुदायेपि दृश्यते । एवं यद्यपि प्रत्येकं व्यक्तीनां व्यभिचारस्तथापि यदा सर्वा[1540] तदा विषयत्वमित्याह ॥

[325/s]

...3.103b नीलादेर्नेत्रविज्ञाने पृथक् सामर्थ्यदर्शनात् ॥ १०३ ॥

'नीलादेर्नेत्रविज्ञाने' कार्ये 'पृथक्' प्रत्येकं 'सामर्थ्यदर्शनात्' । (१०३)

...3.104a शक्तिसिद्धिः समूहेपि नैवं व्यक्तेः कथञ्चन ।

'शक्तिसिद्धिः समूहेपि युक्ता । एवं व्यक्तेर्न' प्रत्यभिज्ञानजनने सामर्थ्यं कथञ्चन दृष्टं येन समुदायेपि सामर्थ्यकल्पना स्यात्[1541] ॥

...3.104b तासामन्यतमापेक्ष्यं तच्चेच्छक्तं न केवलम् ॥ १०४ ॥

'तासां' व्यक्ती'नामन्यतमापेक्ष्यं' तत् सामान्यं प्रत्यभिज्ञाने 'शक्तं' न 'केवलमिति चेत्'[1542] ॥ (१०४)

....3.105 तदेकमुपकुर्युस्ताः कथमेकान्धियश्च न ।
कार्यश्च तासां प्राप्तोसौ जननं यदुपक्रिया ॥ १०५ ॥

तत्सामान्य'मेकं' कथन्ता व्यक्तय 'उपकुर्युः' (।) 'न त्वेका'न्धियमनुपक्रियमाणस्य समवेतत्वेऽतिप्रसङ्गाद् व्यक्तिभिः सामान्यमुपकर्त्तव्यं । तथा धीरप्येकोपकर्त्तव्या । यच्च सामान्यादिरुपक्रियते व्यक्तिभिः 'कार्यश्च तासां प्राप्तोसौ यद'स्मा'दुपक्रिया' जननमेव । न ह्युपक्रियमाणादन्यस्मिन्नुपकाराख्ये वस्तुनि कृतेपि तस्य किञ्चित् । तत्सम्बन्धाच्चेत् । सम्बन्धो भिन्न एवेति किन्तस्य जातं । 'अभिन्ने' तूपकारे स एव कृतः स्यात् । तथा जननमेवोपकारः ॥ (१०५)

....3.106 अभिन्नप्रतिभासा धीर्न भिन्नेष्विति चेन्मतम् ।
प्रतिभासो धिया भिन्नः समाना इति तद्ग्रहात् ॥ १०६ ॥

एकसामान्याभावे'ऽभिन्नप्रतिभासा' एकाकारा 'धीर्न भिन्नेष्विति चेन्मतं' । ननु [1543] 'प्रतिभासो धिया भिन्नो' नैकाकारः 'समाना' इमा 'इति ता'सां व्यक्तीनां 'ग्रहात्' ।[1544]

---

[1538] ६ न समस्ताभिः किन्तु प्रत्येकं शावलेयाभावे बाहुलेये गोबुद्धिस्तदभावेन्यत्र (।) एवं सर्व्वासां प्रत्येकमभावेपि ।

[1539] ७ प्रत्येकं व्यक्त्यभावेपि ज्ञानभावात् ।

[1540] ८ बाह्यमध्यवस्यतीत्यलीकेति न सम्वाद इत्याह ।

[1541] १ नीलादिस्वस्वरूपभेदवत् ज्ञानान्यपि भिन्नान्याकारभेदात् । नैवं शुक्लादिसहितसामान्यजनिते ज्ञाने भेदः ।

[1542] २ एवं सति ।

[1543] ३ व्यतिरिक्ताव्यतिरिक्तसामान्ययोगाद् भ्रान्तिरेव व्यक्तिष्वेकाकारः प्रतिभास इत्युक्त्वा नैवास्त्येकप्रतिभासो व्यक्तिष्वित्याहाधुना ।

[1544] ४ न ह्येकस्मिन् प्रतिभासे समाना इति युक्तं किन्तु तदेवेति ।

न हि भूत[1545] कण्ठगुणवदेकं सामान्यं[1546] सर्व्वानुपा (?या) यि व्यक्तिव्यतिरिक्तं प्रतिभाति । किन्तु गौर्गौरिति सामान्यमवसीयते तच्च भेदाधिष्ठानमेव ॥ (१०६)

[326/s]

....3.107 कथन्ता भिन्नधीग्राह्याः समाश्चेदेककार्यता ।
साटृश्यं ननु धीः कार्यं तासां सा च विभिद्यते ॥ १०७ ॥

[1547] ननु समाश्चेद् व्यक्तयोध्यवसीयन्ते । ‘कथं ता भिन्नधीग्राह्याः’ । [1548] न खलु ‘सम’त्वमेकत्वं कि‘न्त्वेककार्यतासाटृश्यं’ (।) न हि स एवायं तदत्र वेति नि‘श्चयः’ । अपि त्वयमपि गौरित्यध्यवसायः । तथा चैकार्थक्रियाकारित्वमेव साटृश्यं । ‘ननु धीः कार्यं तासां’ व्यक्तीनां ‘सा च’ प्रतिव्यक्ति ‘भिद्यते’ तत्कथमेकार्थक्रियाकारित्वं साटृश्यं[1549] । (१०७)

अत आह ।

....3.108 एकप्रत्यवमर्शस्य हेतुत्वाद् धीरभेदिनी ।
एकधीहेतुभावेन व्यक्तीनामप्यभिन्नता ॥ १०८ ॥

यद्यपि प्रतिव्यक्ति भिन्ना तथाप्येक‘प्रत्यवमर्शस्य’[1550] हेतुत्वाद् धीरभेदिन्येकाऽभिधीयते (।) तथाविधायाश्चैकस्या धियो[1551] हेतुभावेन ‘व्यक्तीनामभिन्नतो’च्यते ॥ (१०८)

....3.109 सा चातत्कार्यविश्लेषस्तदन्यस्यानुवर्तिनः ।
अदृष्टेः प्रतिषेधाच्च संकेतस्तद्विदर्थिकः ॥ १०९ ॥

‘सा चा’भिन्नता‘ऽतत्का’र्येभ्यः पदार्थेभ्यो ‘विश्लेषो’ व्यवच्छेदस्तत्कारिणां वस्तुभूतजातिरेव किन्नेष्यते इत्याह । ‘ततो’ व्यवच्छेदा‘दन्यस्य’ (अनुवर्त्तिनः) सामान्यस्य ‘वस्तुसतोऽदृष्टेः’ स्वभावानुपलब्ध्या ‘प्रतिषेधाच्च[1552]’ । ततश्च ‘संकेतस्तद्विदर्थिक’[1553] स्तस्य व्यवच्छेदस्य विदर्थो यस्यास्ति स तथा ॥ (१०९)

....3.110 अतत्कारिविवेकेन प्रवृत्यर्थतया श्रुतिः ।
अकार्यकृतितत्कारितुल्यरूपावभासिनीम् ॥ ११० ॥

[327/s]

संकेत‘श्चातत्कारिविवेकेन प्रवृत्त्यर्यतया’ प्रवृत्तिप्रयोजनत्वेन कृतः ।[1554] ततश्च श्रुतिरपि धियं जनयन्त्यर्थेन विसंवादिकेति सम्बन्धनीयं । कीदृशीं ‘धियं’ (।) स्वाकारे‘ऽकार्यकृति’

[1545] ५ नवग्रहं ।
[1546] ६ व्यक्तिविशिष्टसामान्यग्रहोपि न युक्त इत्याह ।
[1547] १ परोत्र विरोधमाह समाश्चेत् (।) कथम्भिन्नधीग्राह्या एकाभिन्नधीग्राह्या अपि स्युर्व्यक्तिसामान्ये समाना इति अन्यथा घटपटादिवदभेद एव स्यात् ।
[1548] २ न समानतान्यथानुपपत्त्या स्वहेतुभ्यस्तथोत्पत्तेः केषाञ्चित् ।
[1549] ३ उदकाहरणादि प्रतिव्यक्ति भिन्नं अनुभवज्ञानमेव व्यक्तिकार्यं तदपि भिन्नमेव न विकल्पकं व्यक्त्यभावेपि भावात् धीरविकल्पापि ।
[1550] ४ स्वविषयस्यैकाकारप्रत्ययस्य ।
[1551] ५ अध्यवसितैकरूपायाः प्रत्येकं व्यक्तिग्राहिधियां भेदेपि प्रत्यभिज्ञया तासामेकत्वमध्यवसीयत इत्यर्थः एतदेवैककार्यतासाटृश्यं ।
[1552] ६ पूर्व्वोक्तात् ।
[1553] ७ विकल्पाध्यस्तबाह्यप्रतिपत्त्यर्थः ।
[1554] १ शब्दजनिता धीः स्वाकारं बाह्यमध्यवस्यतीत्यलीकेति न सम्वादः इत्याह ।

। कार्यकारणासमर्थे ‘तत्कारि’ तुल्यरूपावभासिनीमेकार्थक्रियाकारि-[65a/MA] सर्व्ववस्तुसाधारणैकरूपाध्यवसायिनीं ॥ (११०)

....3.111 धियं वस्तुपृथग्भावमात्रबीजामनर्थिकाम् ।
जनयन्त्यप्यतत्कारिपरिहाराङ्गभावातः ॥ १११ ॥

‘वस्तु’[1555] नस्तत्कारिणोऽतत्कारिभ्यश्च ‘पृथग्भाव’ एव केवलः ‘स बीजं कारणं यस्या’स्ता‘मनर्थिका’मर्थशून्यां[1556] परमार्थतः ।

कथमविसम्वादिका तर्हि सेत्याह ।

‘अतत्का’रिणां विजातीयानां ‘परिहार’स्या‘ङ्गभावतः’ कारणत्वात् ‘तद्व्यवच्छे’दस्य विषयत्वात्[1557] तत्र प्रवृत्तिः ॥ (१११)

....3.112 वस्तुभेदाश्रयाच्चार्थे न विसंवादिका मता ।
ततोन्यापोहविषया तत्कर्त्राश्रितभावतः ॥ ११२ ॥

वस्तुभेदाश्रयाच्च वस्तुविषयस्य परंपरया हेतुत्वात् तत्र प्रवर्त्तयन्ती श्रुतिरर्थे न विसंवादिका मता ।[1558] ततोन्यायोहविषया तत्कर्त्राश्रितभावतः । तत्कार्यकर्तृ वस्त्वाश्रितत्वात्[1559] ॥ (११२)

....3.113 अवृक्षव्यतिरेकेण वृक्षार्थग्रहणे द्वयम् ।
अन्योन्याश्रयमित्येकग्रहाभावे द्वयाग्रहः ॥ ११३ ॥

ननु संकेतकाले‘ऽवृक्षव्यतिरेकेण वृक्षार्थ’स्य ‘ग्रहणे द्वयमन्योन्याश्रयं’ वृक्षो[1560]ऽवृक्षश्चान्योन्यापेक्ष इत्येकस्य वृक्षस्यावृक्षस्य चाव्यवस्थितत्वात् ‘ग्रहाभावे द्वयाग्रहः’ [328/s] प्राप्तः । निश्चिते हि वृक्षे तदभावः शक्यो निश्चेतुं । अवृक्षत्वे च निश्चिते वृक्षो निश्चेय इत्येकानिश्चयाद् द्वयानिश्चयः ॥ (११३)

...3.114a सङ्केतासम्भवस्तस्मादिति केचित् प्रचक्षते ।
तेषामवृक्षास्सङ्केते व्यवच्छिन्ना न वा;

‘सेङ्केतासम्भवस्तस्मादिति केचि’ ज्जै मि नी याः ‘प्रचक्षते । तेषामेव’[1561] वादिनां जातावपि ‘सङ्केते’ क्रियमाणेऽ‘वृक्षा व्यवच्छिन्ना न वा’ ।

...3.114b यदि ॥ ११४ ॥

....3.115 व्यवच्छिन्नाः कथं ज्ञाताः प्राग्वृक्षग्रहणादृते ।
अनिराकरणे तेषां सङ्केते व्यवहारिणाम् ॥ ११५ ॥

‘यदि व्यवच्छिन्ना’ इष्यन्ते ‘कथं’ संकेतात् प्राक् ‘ज्ञाता वृक्षग्रहणा’दृते संकेताद् वृक्षस्याज्ञातत्वाद् अवृक्षाः कथं ज्ञाताः । अथ न व्यवच्छिन्नाः तदाऽनिराकरणे ‘तेषां’ संकेते ‘व्यवहारिणां’ व्यवहारकाले[1562] ॥ (११५)

---

1555 २ एतेन बहिः प्रवृत्यङ्गत्वं श्रुतेः ।
1556 ३ विधित्वेन वस्त्वध्यवसा (या)त् कथमन्यापोहविषयतेत्याह ततोऽतत्कारिपरिहारे हेतुत्वात् ।
1557 ४ अन्यव्यावृत्तवस्त्वध्यवसायिबुद्धिजननात् स्वलक्षणे प्रवर्त्तयति ।
1558 ५ विधित्वेन वस्त्वध्यवसा (या) त् कथमन्यापोहविषयतेत्याह (।) ततोऽतत्कारिपरिहारहेतुः ।
1559 ६ स्वार्थाभिधानाच्छु तेरपोहे कर्त्तृत्वं व्यवहारे संकेते वस्तुभेदाश्रयत्वादपोहाश्रितत्वं ।
1560 ७ यावद् गां नाबुद्ध तावद् गां न बुध्यते इति परः तत्सामन्यमेष्टव्यं ।
1561 १ तुल्यदोषतामाह ।
1562 २ न हि संकेते पराव्यवच्छेदेन निवेशिच्छब्दाद् व्यवहारे तत्परिहारेण प्रवृत्तिः ।

....3.116 न स्यात् तत्परिहारेण प्रवृत्तिर्वृक्षभेदवत् ।
अविधाय निषिध्यान्यत् प्रदर्श्यैकं पुरः स्थितम् ॥ ११६ ॥

...3.117a वृक्षोयमिति संकेतः क्रियते तत् प्रपद्यते ।
व्यवहारेपि तेनायमदोष इति चेत्;

तेषामवृक्षाणां 'परिहारेण न स्यात् प्रवृत्तिः वृक्षभेदवद्' (।) यथा वृक्षविशेषाणा-वृक्षसंकेतेऽव्यवच्छिन्नत्वात् प्रवृत्तिविषयत्वमेवमवृक्षाणामपि स्यात् । नन्वे[1563] 'कं' शाखादिमन्तं 'पुर (:) स्थितं प्रदर्श्य' तस्मा'दन्यदविधाय निषिध्य' च । (११६) 'वृक्षोयमिति च संकेतः क्रियते' वस्तुसामान्यादिभिः 'तत्' संकेतविषयं सामान्यं[1564] तत्सम्बन्धिबाह्यलक्षणं 'व्यवहारे प्रपद्यते तेनायम'नन्तरोक्त'दोषो न' भवतीति 'चेत्' ॥

...3.117b तरुः ॥ ११७ ॥

...3.118a अयमप्ययमेवेति प्रसङ्गो न निवर्त्तते ।
एकप्रत्यवमर्शाख्ये ज्ञाने;

[329/s]

अत्र चा'य[1565] मपि' शाखादिमांस्तरुर'यमेव' तरु'रिति' पूर्व्वकोऽवृक्षाव्यवच्छेद'प्रसङ्गो न' निवर्त्ततेऽत्र चोक्त एव दोष इति द्वयोरप्येकाग्रहात् द्वयासम्भवात् सङ्केतासम्भवः समानः । इदानीं परिहर्तुमाह ।[1566] 'एकप्रत्यवमर्शा'ख्ये 'ज्ञाने' भेदाविशेषेपि केचिदेव भावा एकाकाराध्यवसायहेतवो नेतरे ॥ (११७)

...3.118b एकत्र हि स्थितः ॥ ११८ ॥

....3.119 प्रपत्ता तदतद्धेतूनर्थान् विभजते स्वयम् ।
तद्बुद्धिवर्तिनो भावान् भातो हेतुतया धियः ॥ ११९ ॥

....3.120 अहेतुरूपविकलानेकरूपानिव स्वयम् ।
भेदेन प्रतिपद्येतेत्युक्तिर्भेदे नियुज्यते ॥ १२० ॥

त'त्रैक'स्मिन्नेकाकारज्ञानाध्यवसाये 'स्थितः प्रतिपत्ता' पुरुष'स्तदतद्धेतूनर्थान् विभजते स्वयं' । यानेकाकारपरामर्शविषयबुद्ध्यादिहेतूनध्यवस्यति । यआँश्चान्यथा तान् यथाक्रमं तद्धेतूनतद्धेतूंश्च भेदेन व्यवस्थापयति संकेतात् 'प्रागेव[1567] तद्बुद्धिवर्त्तिन' एकाकारपरामर्शविषयान् 'भवान्' शाखादिमतो 'धिय' एकाकाराया 'हेतुतया भातः' प्रतिभासमाना 'न हेतो'रेकाकारबुद्ध्यकारणस्य शाखादिमत्वरहितस्य 'रूपेण विकलान्' परमार्थभिन्ना'नप्येकरूपानिव[1568] स्वयमा'त्मना संकेतयिता मन्यमानः प्रतिपाद्योपि तानतत्कारिभ्यः शाखादिमत्वरहितेभ्यो

1563 ३ वस्तुसामान्यवादी प्राह ।

1564 ४ सामान्ये कृतो व्यक्तिषु व्यापकः स्यात् ।

1565 १ तरुरयमपीति पक्षेऽन्यस्यापि तरुत्वमनिषिद्धमिति व्यवहारो न नियतः । अयमेवेति पक्षेऽतरुव्यवच्छेदः स्यात् । तत्र चोक्तं प्रतिपाद्येन संकेते वृक्षावृक्षौ कथं ज्ञाताविति तदवस्थो दोषः ।

1566 २ न दृष्टविपरीतस्य सुज्ञानात् । व्यवच्छेदे तु नैवमनन्वयात् एकत्र दृष्टस्य क्व (चि) दपि । एतत्तुल्यं यस्मादित्याह ।

'भेदे'[1569] नासंकरेण 'प्रतिपद्येतेति । उक्तिः' शब्दो 'भेदेऽ'न्यापोहे 'नियुज्यते' ।[1570] (११८-२०)

...3.121 तं तस्या धीर्विकल्पिका भ्रान्त्यैकं वस्त्विवेक्षते ।
क्वचिन्निवेशनायार्थे विनिवर्त्य कुतश्चन ॥ १२१ ॥

...3.122a बुद्धेः प्रयुज्यते शब्दस्तदर्थस्यावधारणात् ।
व्यर्थोन्यथा प्रयोगः स्यात्;

[330/s]

'तं' भेदं 'तस्या' उक्तेरुच्चारिताया वाच्यतया प्रतियती 'धीर्व्विकल्पिका' प्रकृति'भ्रान्त्या एकमिव वस्त्वीक्षते' । तस्मात् कुतश्चनाकार्यकारिणो[1571] ऽर्थाद् विनिवर्त्त्य [65b/MA] 'क्वचिदे'कार्थक्रियाकारिण्यर्थे 'बुद्धेर्निवेशनाय शब्दः प्रयुज्यते' (।) 'तदर्थस्य' शब्दार्थस्या'वधारणात्' । घटेनोदकमानयेत्यादौ प्रतिपदमवधारणमिष्टं । 'व्यर्थोऽन्यथा प्रयोगः स्यात्' । यदि येन केनचिदानयनमिष्टमुदकमानयेत्युच्येत । यदि[1572] शब्दानां व्यवच्छेदो वाच्यस्तदा 'ज्ञेयादिपदानां' सर्व्वस्य ज्ञेयत्वेन व्यवच्छेद्याभावात् । (१२१, १२२)

अर्थो न स्यादित्याह[1573]

...3.122b तज्ज्ञेयादिपदेष्वपि ॥ १२२ ॥

...3.123a व्यवहारोपनीतेषु व्यवच्छेद्योस्ति कश्चन ।

यस्माद् व्यवच्छेदमन्तरेण न शब्दप्रयोगः तत् तस्माज्ज्ञेया[1574] दिपदेष्वपि कुतश्चित् प्रकरणात् 'व्यवहारोपनीतेषु'[1575] विशेषविषयेषु 'कश्च'न तदितरोस्ति कल्पितो वा ।[1576]

...3.123b निवेशनं च यो यस्माद् भिद्यते तन्निवर्तनात् ॥ १२३ ॥

...3.124a तद्भेदे भिद्यमानानां समानाकारभासिनि ।

'यो यस्माद'तत्कारिणो भिद्यते (।) तमतत्कारिणम्विनिवर्त्य 'भिद्यमानानां तद्भेदे'ऽतत्कारिभेदे 'समानाकार[1577] भासिनि निवेशनश्च शब्दानां[1578]' ॥

...3.124b स चायमन्यव्यावृत्या गम्यते तस्य वस्तुनः ॥ १२४ ॥

---

[1567] ३ अतद्धेतुभ्यस्तद्धेतून् विभज्य स्थापयति या बुद्धिः ।

[1568] ४ नियुंक्ते

[1569] ५ एकव्यक्तौ गोशब्दसङ्केते सत्यपि संकेतविषयस्य व्यक्त्यन्तरेऽनुगमात् स एवायं गौरिति स्यात् प्रतीतिः ।

[1570] ६ सङ्केत्यते ।

[1571] १ ज्ञेयादिदोषे व्यतिरेक उक्तो राद्धान्तः ।

[1572] २ अन्यापोहे शब्दार्थे परोऽव्यापित्वमाह । अज्ञेयाद् विज्ञेयस्य भेदेन विषयीकरणं वाच्यं ततोऽज्ञेयोपि ज्ञेयः स्यादविषयीकृताद् व्यवच्छेदाशक्तेः । एकाद्यसर्वश्चेन्न व्यतिरिक्तसमुदायास्वीकृतेरनर्थकता स्यात् । यत्परः शब्द स शब्दार्थ इति विधायकस्य व्यवच्छेदोप्यर्थ इत्यर्थः ।

[1573] ३ अन्यथा यदि शब्देन कश्चिदर्थो न व्यवच्छिद्यते व्यर्थः शब्दप्रयोगः स्यादुक्तयुक्त्या ।

[1574] ४ ज्ञेयाः सर्व्वपदार्थाः सर्वज्ञज्ञानस्येत्यत्रापि यदज्ञेयत्वमाशङ्कितन्तद्व्यवच्छेद्यं ।

[1575] ५ विधिप्रतिषेधप्रयोगस्थेषु ।

[1576] ६ यदि विधिशब्दार्थोर्थादन्यनिषेधस्तर्हि नागोक्तम्विरुद्धमित्यत आह वृक्षस्यायं भेदो न स्याद् घटवत् ।

[1577] ७ विकल्पेनैकत्वेनारोप्य सर्व्वत्र ।

[1578] ८ सङ्केतेपि विधिरुक्तोऽनेन ।

[331/s]

‘स चायमन्य’व्यवच्छेदः प्रोक्त आ चा र्ये ण ‘अन्यव्यावृत्त्या’ऽन्यव्यावृत्तत्वेन ‘गम्यते तस्य वस्तुनः’ (॥ १२४)

...3.125a कश्चिद् भाग इति प्रोक्तो रूपं नास्यापि किञ्चन ।

‘कश्चिद् भागो’ धर्म ‘इत्य’र्थवाचकेन शब्दोऽर्थान्तरनिवृत्तिविशिष्टानेव भावानाहेत्यादिना ग्रन्थेन[1579] । न ह्यन्यव्यावृत्तिर्नाम काचिदन्या । तद्विशिष्टश्च वस्तु वाच्यमिति किन्त्वाक्षिप्तव्यावृत्तिको धर्म एव कश्चित् कल्पितभेदो बहिरध्यवसायविषयः शब्दवाच्यः । वस्तुतो ‘रूपं नास्यापि किञ्चनास्ति’ ।

...3.125b तद्गतावेव शब्देभ्यो गम्यतेन्यनिवर्त्तनम् ॥ १२५ ॥

‘शब्देभ्यस्तस्य’ धर्मस्य नीला‘देर्गतावेव[1580] गम्यते अन्य’स्य ‘निवर्त्त’नमसंकरप्रतीतिसामर्थ्यात् । (१२५)

....3.126 न तत्र गम्यते कश्चित् केनचिद् भेदवान् परः ।
न चापि शब्दो द्वयकृदन्योन्याभाव इत्यसौ ॥ १२६ ॥

‘न तत्र’ शाब्द्यां बुद्धौ ‘कश्चि’न्नीला[1581] दिः ‘केनचिद्’ व्यावृत्त्यादिना विशिष्टः ‘परो गम्यते । न चापि[1582] शब्दो’ द्वयस्य व्यावृत्तिवचनस्य तद्विशिष्टवचनस्य मुख्यतः कृत् कर्त्ताऽसंकीर्ण्णधर्म वदन् सामर्थ्याद् व्यावृत्तिश्चाह । तदेवाह (।) ‘अन्योन्याभाव इति’ (।) यस्मात् परस्पराभावरूपः सर्व्वो धर्मस्तस्मात् तद्वचने व्यावृत्तिरपि सामर्थ्यादुक्ता । (१२६)

....3.127 अरूपो रूपवत्त्वेन दर्शनं बुद्धिविप्लवः ।
तेनैवापरमार्थोसावन्यथा न हि वस्तुनः ॥ १२७ ॥

यश्चायं भेदोसावरूपो ‘रूपवत्वेन’ यत् ‘तद्दर्शन’[1583] मस्य स ‘बुद्धिविप्लवः ।[1584] तेनैव’ बुद्धिविप्लवेनापरमा‘परमार्थो’ऽसत्योसौ भेदः । ‘अन्यथा’ परमार्थत्वे व्यावृत्तिर्व्व‘स्तुनो’ न वस्तु स्यात् । (१२७)

तच्चायुक्तं ।

[332/s]

...3.128a व्यावृत्तिवस्तु भवति भेदोस्यास्मादितीरणात् ।

न हि वस्तुनो ‘व्यावृ[1585] त्तिर्व्वस्तु’ भवितुमर्हति । ‘अस्मा’देव वृक्षा‘दस्य’ वृक्षस्य ‘भेद इतीरणाद्’ विकल्पनात् भेदस्य वस्तुत्वे भिद्यमाना शिंशपैव वा भेदः स्याद् वस्त्वन्तरं वा । न तावच्छिंशपा धवादेरवृक्षाद् भेदाभावप्रसङ्गात् । न हि शिंशपास्वभावलक्षणो भेदो धवादेरस्ति येन तेप्यवृक्षस्य भेदाः स्युः ॥

1579 १ प्रोक्तो निर्द्दिष्टो गम्यत इति सम्बन्धः ।

1580 २ यदि भेदस्य नीरूपत्वं कथं तर्हि निवृत्तिविशिष्टं वाच्यमित्याह तद्गतेति ।

1581 ३ अन्यतो भेदस्यानुयायिनः शब्दवाच्यत्वे सामान्यं तदेव स्यादित्याह असाविति शब्दविशेषयोर्भेदः ।

1582 ४ नन्वेकः शब्दो विधिप्रतिषेधकृत् कथमित्याह ।

1583 ५ एतावन्मात्रेण व्यावृत्तिविशिष्टत्वं न दण्डिवत्

1584 ६ दृश्यविकल्पैक्येन वक्तृश्रोत्रोः ।

1585 १ अभिन्ना वाऽवृक्षाद् वृक्षस्य भिन्ना वा उभयथापि दूषणमाह निवृत्तिररूपत्वेनाबुद्धत्वात् सङ्केतावृत्तेश्च न शब्दविषयत्वमनुभवात्तु वृक्षोयं नावृक्ष इति निश्चय (:।) तेनान्यनिवृत्तिः प्रतिषेधविकल्पेन कल्पितावृक्षादौ च वृत्तेः शब्दोन्यनिवृत्तमाक्षिपति । तेनान्यनिवृत्तिविशिष्टत्वमुक्तमाचार्येण ।

सर्व्वत्र एव हि भिद्यमानाभावास्तदात्मन इति चेत् । न तर्ह्येको भेदस्तत्कारिणामतत्कारिभ्यो यः शब्दवाच्यः । व्यक्तिस्वभावस्य तु भेदस्य संकेताविषयत्वादवाच्यतैव । अथ वस्त्वन्तरं भेदस्तदा तस्माद् भेदाख्या (ना) द् वस्त्वन्तराद् भिद्यमानस्य शिंशपादेर्भेदो[1586] वक्तव्यः अन्यथा वस्त्वन्तरत्वायोगात् । एवञ्चावृक्षव्यावृत्तेद्वर्यावृत्तत्वात् शिंशपादिरवृक्षः कर्कादिवत् । भेदस्य च वृक्षाद् भिन्नत्वं भेदान्तरोपाधिकमेवेति द्रव्यान्तरवर्ण्णभेदः स्यात् । न ह्यन्योन्यस्य भेदः सम्बन्धाभावेनातिप्रसङ्गात् । सति सम्बन्धे कार्यकारणभाव एवासौ । ततः सर्व्वं कार्यं [66a/MA] स्वकारणस्य भेदः (व्यावृत्तिः) स्यात् ।[1587] तस्माद् योऽयं भेदः शब्दव्यवहारविषयोऽनुयायी स कल्पितोऽपरमार्थः । स्वस्वभावव्यवस्थितास्तु भावाः पारमार्थिको भेदः ॥

ननु यदि वस्त्वेक[1588] रूपं तदेकेन शब्देन लिङ्गेन वा वस्तुनि प्रतिपादिते[1589] शब्दप्रमाणान्तरवृत्तिर्न स्यात् ॥

...3.128b एकार्थश्लेषविच्छेद एको व्याप्रियते ध्वनिः ॥ १२८ ॥

...3.129a लिङ्गं वा तत्र विच्छिन्नं वाच्यं वस्तु न किञ्चन ।

'एकस्य' नित्यत्वादेरर्थस्य 'श्लेषः' सम्बन्धस्तस्य 'विच्छेदे' व्यावृत्ता[1590]वेको 'ध्वनि-' [333/s] 'र्लिङ्गं' वा व्याप्रियते[1591] । तत्र ध्वनौ 'लिङ्गो' वा 'विच्छिन्नं' सर्व्वतो व्यावृत्तं 'न किञ्चन वाच्यमस्ति' एका व्यावृत्तिः शब्देन 'लिङ्गेन' वा प्रतिपाद्यते न वस्त्वित्यर्थः ।

...3.129b यस्याभिधानतो वस्तुसामर्थ्यादखिले गतिः ॥ १२९ ॥

...3.130a भवेन्नानाफलः शब्द एकाधारो भवत्यतः ॥

'यस्य' वस्तुनोऽ'भिधानतो वस्तुसामर्थ्यादखिले' कृतकानित्यादिवस्तुरूपे 'गतिर्भवेत्' । येन शब्दप्रमाणान्तरवैयर्थ्यं स्यात् । 'अतः शब्दो' भूयान्नानाफलोऽनेकधर्मप्रतीतिफल 'एकाधार' एकधर्मिनिष्टो 'भवति' ।

साध्यसाधनभावादिमाख्याय सामानाधिकरण्यन्दर्शयितुमाह ।[1592]

...3.130b विच्छेदं सूचयन्नेकमप्रतिक्षिप्य वर्त्तते ॥ १३० ॥

...3.131a यदान्यत्; तेन स व्याप्त एकत्वेन न भासते ।

'विच्छेद'मनीलादिव्यवच्छेद'मेकैकं' नीलादिशब्दः 'सूचयन् यदाऽप्रतिक्षिप्यान्यदनुत्पलव्यवच्छेदादौ वर्त्तते (।)' तद्वाचक[1593] शब्दप्रयोगे सति 'तेन व्याप्तः' श्लिष्ट एकत्वेन च भासते ।

...3.131b सामानाधिकरण्यं स्यात् तदा बुद्ध्यनुरोधतः ॥ १३१ ॥

'तदा सामानाधिकरण्यं स्या'न्नीलोत्पलमित्युभयव्यावृत्तिविशिष्टैकवस्तुव्यवसायिकाया 'बुद्धेरनुरोधतः' ॥ (१३१)

किञ्च ।

---

[1586] २ भेदशिंशपयोर्मध्येऽपरः ।

[1587] ३ अतदो व्यावृत्तिस्तेनैवं न चैवं तद्भेदाभिमतेपि मा भूत् ।

[1588] ४ पूर्व्वयुत्त्या न व्यतिरिक्ता व्यावृर्त्तिर्नापि सामान्यं ।

[1589] ५ अखण्डे स्वीक्रियमाणे तस्माद् यो येन धर्मेणेत्युक्तेपि प्रागधिकविधानायाह (।) अ (? आ) कारान्तरसमारोपोत्र (?) श्लेषः (।) स च प्रतिपत्तिभेदेनानेकः ।

[1590] ६ बुद्धिप्रतिभासिनि धर्मिणि बाह्यभिन्नतयाध्यस्ते शब्दस्य (? मा) त्रेण वृत्तेरिति तत्राभिप्रायः ।

[1591] १ स्वार्थाभिधाद्वाराऽरोपखण्डेन शब्दप्रमान्तरसाफल्यमित्यर्थः ।

[1592] २ यदि वस्त्वेव शब्दादेर्विषयस्तदा सर्वाकारप्रतीतिप्रसंगोऽसमानाधिकरण्यादयश्चेत्यन्यापोहे विषयत्वमाह ।

[1593] ३ अनुत्पलप्रयोगेऽनेन व्याप्तो नीलशब्दः ।

....3.132 वस्तुधर्मस्य संस्पर्शो विच्छेदकरणे ध्वनेः ।
स्यात् सत्यं सति तत्त्वे हि नैकवस्त्वभिधायिनि ॥ १३२ ॥

'ध्वनेर्विच्छेदकरणे' व्यावृत्ति[1594] प्रतिपादकत्वेऽवस्थिते 'वस्तुधर्मस्य' नीलादेः 'संस्पर्शः' प्रवृत्तिविषयत्वं 'स्यात्' । स विच्छेदो हि यस्मात् तत्र वस्तुनि 'सत्यं' सन् तस्मात् सूचने तद्वती प्रवृत्तिर्युक्ता । 'एकं' सामान्यं 'वस्तु तदभिधायिनि' तु ध्वनौ न वस्तुसंस्पर्शः ॥ (१३२)

हेतुमाह (।)

[334/s]

....3.133 बुद्ध्यावभाससमानस्य दृश्यस्याभावनिश्चयात् ।
तेनान्यापोहविषयाः प्रोक्ताः सामान्यगोचराः ॥ १३३ ॥

...3.134a शब्दाश्च बुद्धयश्चैव वस्तुन्येषामसंभवात् ।

'बुद्ध्यावभाससमान्यस्य दृश्यस्य' सम्मतस्य तस्य स्वभावानुपलब्धेर'भावनिश्चयात्' । न वस्तुनि सत्त्वमिति कथं तत्प्रतिपादिकायाः श्रुतेर्वस्तुनि वृत्तिः । 'तेन'[1595] व्यवच्छेदस्य वस्तुनि सत्त्वेन 'सामान्य [1596] गोचराश्शब्दाः बुद्धयश्च' कल्पिका 'अन्या[1597] पोहविषया' आ चा र्ये ण प्रोक्ता (:) । अपोहः शब्दलिङ्गाभ्यां प्रतिपाद्यत इति ब्रुवता । न तु भूतसामान्यविषया । 'वस्तु'न्येषां नीलत्वादीनामनुपलब्धिबाधितत्वेना'सम्भवात्' ।

...3.134b एकत्वाद् वस्तुरूपस्य भिन्नरूपा मतिः कुतः ॥ १३४ ॥

...3.135a अन्वयव्यतिरेकौ वा नैकस्यैकार्थगोचरौ ।

यदि वाच्यं 'तदेक[1598] त्वाद् वस्तुरूपस्य' । तस्मिन् 'भिन्नरूपा'[1599] अनित्यकृतकत्वाद्या 'मतिः कुतः' ।[1600] एकत्वाद् विषयस्यैकरूपवद् बुद्धिर्युक्ता विशेषश्च सर्वतो व्यावृत्त इति तदात्मभूतं सामान्यमपि तथा स्यात् । ततश्चैकस्य सामान्यस्यान्वयव्यतिरेकानुवृत्त्यननुवृत्ती 'एकार्थगोचरौ' व्यक्त्यन्तरविषयौ न सम्भवतः । तथा हि सामान्यं व्यक्त्यन्तरानुयायि न व्यक्तिरिति वदता व्यक्त्यभिन्नात्मनः सामान्यस्यान्वय'व्यतिरेकौ' विरुद्धावभ्युगतौ स्यातां । तच्चायुक्तं ।

...3.135b अभेदव्यवहाराश्च भेदे स्युरनिबन्धनाः ॥ १३५ ॥

अथवा[1601] व्यक्त्यात्मनो व्यक्तिरूपवद् 'भेदे' च सामान्यस्या'भेद[1602] व्यवहारा-अनिबन्धनाः स्युरे'कस्यानुयायिनोऽभावात् ।

अस्मन्मते तु (।)

...3.136a सर्वत्र भावाद् व्यावृत्तेर्नैते दोषाः प्रसङ्गिनः ।

1594 ४ स्वार्थाभिधानद्वारेण ।
1595 १ यतो वस्तुनि शब्दार्थे दोषः ।
1596 २ विकल्पिका इत्यर्थः ।
1597 ३ अन्योऽपोह्यतेऽनेनेति विकल्पाकारोपोहः ।
1598 ४ तच्छब्दवाच्यं सामान्यं स्वलक्षणाद् भिन्नमभिन्नं वाऽतः प्राह । वैशेषिकसाङ्ख्यादेः ।
1599 ५ स्वसामान्याकारा ।
1600 ६ अखण्डं यदि शब्दवाच्यं ।
1601 ७ भेदपक्षे दोषमाह ॥
1602 ८ सामान्याधिकरण्यादयः ।

[335/s]

'सर्व्वत्र' व्यक्तिषु 'भावात् व्यावृत्तेः' सजातीयाद्[1603] विजातीयाच्चैते 'दोषा' भिन्नाभास[1604] बुद्धिविषत्वाभावान्वय[1605] व्यतिरेकादि[1606] विरुद्धधर्माध्यासा 'अप्रसङ्गिनो'[1607] भवन्ति । शब्दविकल्पानां भिन्नभिन्नव्यावृत्तिविषयत्वात् विजातीयव्यावृत्त्याश्रयेणान्वयबुद्धिविषयत्वात् । सजातीयव्यावृत्त्याश्रयेण व्यतिरेकबुद्धिविषयत्वाच्चेति ॥

कस्मात् पुनरन्यव्यावृत्तौ शब्दसङ्केतो न स्वलक्षण इत्याह ।[66b/MA]

...3.136b एककार्येषु भावेषु तत्कार्यपरिचोदने ॥ १३६ ॥

....3.137 गौरवाशक्तिवैफल्याद् भेदाख्यायाः समा श्रुतिः ।
कृता वृद्धैरतत्कार्यव्यावृत्तिविनिबन्धना ॥ १३७ ॥

'एक[1608] कार्येष्वे'कत्वाध्यवसायविषयकार्यकारिषु भावेषु 'तत्कार्यपरि[1609] चोद'ननिमित्तं प्रतिव्यक्ति 'भेदाख्याया' भिन्नस्य शब्दस्य योजनेन संकेतक्रियाया व्यक्त्यानन्त्याद् 'गौरवाद'शक्ते[1610] वैफल्याच्च । 'समा' एका 'श्रुति'रतत्कार्येभ्यो वा व्यावृत्तिस्तन्निवन्धना तदाश्रया 'वृद्धैः[1611] कृता' संकेतिता । (१३६, १३७)

....3.138 न भावे सर्वभावानां स्वस्वभावव्यवस्थितेः ।
यद् रूपं शावलेयस्य बाहुलेयस्य नास्ति तत् ॥ १३८ ॥

'न भावे' स्वलक्षणे कस्मादित्याह । 'सर्व्वभावानां स्वस्वभावव्यवस्थितेः[1612]' कारणतः । 'यद्रूपं शावलेयस्य बाहुलेयस्य नास्ति तद्' रूपं । (१३८)

...3.139a अतत्कार्यपरावृत्तिर्द्वयोरपि च विद्यते ।

'अतत्कार्येभ्यः परावृत्तिश्च द्वयोः' शावलेयबाहुलेययो'रपि विद्यते' ।[1613] ततस्तत्रैव संकेतो न स्वलक्षणे ।

स्वलक्षणान्येव तर्ह्यभिन्नस्य[1614] शब्दस्य वाच्यानि स्युरित्याह ।

[336/s]

...3.139b अर्थाभेदेन च विना शब्दाभेदो न युज्यते ॥ १३९ ॥

'अर्थ'स्या'भेदेन' च 'विना शब्द'स्या'भेदो न युज्यते'ऽतिप्रसङ्गात् । (१३९)

एवन्तर्ह्येककार्यतैव भिन्नशब्दवाच्या स्यादित्याह ।

1603 १ सजातिभावो विजातिव्यावृत्तिरिति सम्बन्धः ।
1604 २ अनित्यकृतत्वादि ।
1605 ३ व्यक्तिरूपत्वे ।
1606 ४ अभेद्यव्यवहाराः ।
1607 ५ यथैको गौरगोर्भिन्नस्तथान्येपीति नासामान्यतादोषः ।
1608 ६ विजातीयव्यावृत्तं भावं सर्व्वत्र बुद्धा स्वाकाराभेदेनाध्यस्तमेकं शब्दाभिधेयमुक्त्वाधुनाऽभिन्नाकारम्विनाप्येककार्येषु च भावेषु कः शब्दो नियोज्यत इत्याह ।
1609 ७ एककार्याणां चोदनार्थं त्रिकालस्थानां ।
1610 ८ स्वलक्षणस्याबाध्यत्वात्
1611 ९ व्यवहारज्ञैः ।
1612 १० असांकर्यात् ।
1613 ११ सवार्थभेदः शब्दाभेदस्य कारणमेष्टव्यं ।
1614 १२ एकस्य सर्व्वसजातीये

...3.140a तस्मात् तत्कार्यतापीष्टाऽतत्कार्यादेव भिन्नता ।

यस्मादर्थाभेदाच्छब्दाभेदः कार्यश्च प्रतिव्यक्ति भिन्नमिति तत्कार्यताप्येककार्योच्यते । साप्यतत्कार्याद् भिन्न[1615] तैव स चापोहः ।

अतत्कार्यव्यावृत्तौ संकेतक्रियां द्रढयितुं दृष्टान्तमाह ।

...3.140b चक्षुरादावनेकत्र रूपविज्ञानके क्वचित् ॥ १४० ॥

....3.141 अविशेषेण तत्कार्यचोदनासंभवे सति ।
सकृत् सर्व्वप्रतीत्यर्थं कश्चित् साङ्केतिकीं श्रुतिम् ॥ १४१ ॥

...3.142a कुर्यादृतेपि तद्रूपसामान्याद् व्यतिरेकिणः ।

'यथा चक्षुरादा'वनेकत्र 'क्वचिद् रूपविज्ञान'फले विषयभूते'ऽविशेषेण' सामान्येन[1616] 'तस्य' चक्षुरादि'कार्य'स्य कारणवाचकैकशब्दद्वारेण 'चोदना'याः परेभ्यः प्रकाशनायाश्चक्षुरालोकादिष्वेकसामान्यभावेपि 'संभवे सति कश्चित्' सन्धेयव्यवहाररुचिः 'सकृत् सर्व्वस्य' चक्षुरादेः 'प्रतीत्यर्थं[1617] सांकेतिकीं' श्रुतिं 'कुर्यात्' (।) कुतो रूपं[1618] विज्ञानमिति 'ऋते'विना'पि तद्रूपाद्' रूपविज्ञानजनकात् 'सामान्या'च्चक्षुरादि'व्यतिरेकिणः' ।

...3.142b एकवृत्तेरनेकोपि यद्येकश्रुतिमान् भवेत् ॥ १४२ ॥

...3.143a वृत्तिराधेयता व्यक्तिरिति तस्मिन्न युज्यते ।
नित्यस्यानुपकार्यत्वात् नाधारः;

अथैकस्य सामान्यस्य 'वृत्तेरनेकोपि'[1619] विषयो 'यद्येकश्रुतिमान् भवेत्' तदा को दोषः ।[1620] ननु केयम्वृत्तिरिष्टा (।) किमाधेयता उत व्यक्तिरभिव्यक्तिः । इत्येतद् द्वयमपि तस्मिन् सामान्ये न 'युज्यते' । कथमित्याह । 'नित्य'स्यानाधेयाति[337/s] शयस्या[1621] विशिष्टरूपस्य केनचिद'नुपकार्यत्वात् नाधारः' कश्चित् न ह्यनुपकारक आधारोऽतिप्रसङ्गात् ।[1622]

ननु वदरस्यानुपकारकमपि कुण्डमाधार इत्याह ।

...3.143b प्रविसर्प्पतः ॥ १४३ ॥

....3.144 शक्तिस्तद्देशजननं कुण्डादेर्ब्बदरादिषु ।
न संभवति साप्यत्र तदभावेप्यवस्थितेः ॥ १४४ ॥

'बदरादिषु' गुरुतया 'प्रविसर्प्पतो' विसर्प्पणात् । प्रतिक्षणमसमान[1623] देशोत्पत्तेः 'कुण्डादेः' सहकारिणः 'तद्देशजननं'[1624] बदरोपादानदेशजननं 'शक्तिः' कारणत्वमाधारता (।) सापि शक्तिलक्षणाधारतात्र सामान्ये 'न' संभवति जन्यत्वाभावात् । सामान्यस्य स्थितिं कुर्व्वन् विशेष आधारः स्यादित्याह । 'त'स्य विशेषस्या'भावेप्यवस्थितेः' (। १४३,१४४)

1615 १ न तु तत्कार्यता नाम सामान्यमस्ति ।
1616 २ असाधारणकारणचोदने तु चक्षुरादीनां नैकाश्रुतिः ।
1617 ३ व्यवहारलाघवार्थं । अविशेषेण सामग्रीप्रश्ने ।
1618 ४ परो रूपविज्ञानहेतुः सरो वेति ।
1619 ५ एककार्यत्वेनैकः शब्दो बहुषु सामान्येन वेत्यविशेषं मन्यते परः ।
1620 ६ उपलभ्यत्वेऽनुपलब्धिरनुपलभ्यत्वे च बहुष्वेकशब्दः तुल्यज्ञानश्च नेत्युक्तं ।
1621 १ इह गोत्वमिति समवायश्चेन्न स समवेतस्य क्वचित् स्यात् तच्च तदायत्तत्वे तदुत्पत्त्यान्यस्य ।
1622 २ पूर्व्वत्रानेकान्तमाह परः ।
1623 ३ कुण्डात् तुल्यदेशे ।
1624 ४ कुण्डवदरक्षणाद् विशिष्टदेशजत्वेनैकसामग्रयधीनत्वमुक्तं ।

...3.145a न स्थितिः साप्ययुक्तैव भेदाभेदविवेचने ।

न स्थितिर्व्विशेषात् सामान्यस्य स्वरूपातिरिक्ताया स्थितेर्निष्क्रियत्वेनाभावात् स्वरूपस्थितिः । तच्च प्रत्येकं व्यक्त्यपायेप्यस्तीति नासौ ततः । अस्तु वा स्थितिः 'साप्ययुक्तैव भेदाभेदविवेचने' क्रियमाणे । तथा ह्याश्रयहेतुका स्थितिः सामान्याभिन्नाऽभिन्ना वा स्यात् । भिन्ना चेत् तस्याः कारणत्वादाश्रय स्यात् । न तु सामान्यस्य स्थितिरसम्बन्धात् । सामान्यस्यापि चेद् भेदे सति कोऽनयोः सम्बन्धः । न कार्यकारणभावः स्थितेराश्रयादुत्पत्तेः । सामान्यादुत्पत्तौ वा न व्यक्तिराधारः स्यात्(।) स्थितिहेतुत्वाभावात् । सामान्यश्च[1625] नित्यत्वादकार्यमेव । न चान्यः[1626] सम्बन्धोस्ति निराकरणात् ।

एवं गमनप्रतिबन्धादिष्वपि वाच्यं । तदेवं न तावदाधेयता वृत्तिः ।

व्यक्तिरपि न युक्ता (।)

[338/s]

...3.145b विज्ञानात्पत्तियोग्यत्वायात्मन्यन्यानुरोधि यत् ॥ १४५ ॥

....3.146 तद् व्यङ्ग्यं योग्यतायाश्च कारणं कारकं मतम् ।
प्रागेवास्य च योग्यत्वे तदपेक्षा न युज्यते ॥ १४६ ॥

[67a/MA]

'यत्' स्वरूपेण स्थितमेव (सामान्यं) स्वविषय'विज्ञानोत्पत्तियोग्यत्वायात्मन्यन्यानुरोधि' परापेक्षं 'तद् व्यङ्ग्यमु'च्यते । यच्च योग्यतायाः स्वरूपभूतायाः कारकं[1627] तत् कारणं मतं । व्यतिरिक्तयोग्यताकरणे तु न स्यात् सामान्य[1628] स्योपलब्धिः । उपलम्भायोग्यस्वभावत्वात् । योग्यतासम्बन्धेप्यनुपलभ्यस्वभावानपायात् तदवस्थोऽनुपलम्भः । अथ व्यञ्जकाभिमतैर्व्विशेषैर्न योग्यता क्रियते तदा सा प्रागेवास्तीति स्यात् । तथा 'च प्रागेवास्य योग्यत्वे तदपेक्षा' व्यञ्जकापेक्षा 'न युज्यते' (। १४५, १४६)

...3.147a सामान्यस्याविकार्यस्य तत्सामान्यवतः कुतः ।

'तत्' तस्मात् 'सामान्यवतो' विशेषस्य सकाशात् 'सामान्यस्याविकार्यस्य' व्यक्तिरपि कुतः सम्भवति ।

अथ न सामान्यस्य संस्काराद् व्यक्तिर्व्यञ्जिका किन्त्विन्द्रियस्याञ्जनवदित्याह ।

...3.147b अञ्जनादेरिव व्यक्तेः संस्कारोऽक्षस्य न भवेत् ॥ १४७ ॥

...3.148a तत्प्रतिपत्तेरभिन्नत्वात् तद्भावाभावकालयोः ।

'अञ्जनादेरिवे'न्द्रियस्य 'न' संस्कारो 'व्यक्तेः' सकाशात् । 'त[1629] त्प्रतिपत्ते'स्तस्या व्यक्ते[1630] 'र्भावाभावकालयोरभिन्नत्वात्' । न हि यथेन्द्रियस्याञ्जनसंस्कारभावाभावयोरर्थप्रतिपत्तेः

1625 ५ अभेदपक्षे स्थितिक्रिया सामान्यक्रियैव सा चायुक्ता ।

1626 ६ व्यक्तिसामान्ययो (:) स्थितेरन्यः ।

1627 १ दीपादि । पूर्वमयोग्यस्य योग्यत्त्वेनोत्पादनात् ।

1628 २ व्यञ्जकात्तु कारकस्य विशेषो जननमात्रं न ज्ञानजननयोग्यता धूमेनाजनकेनापि न व्यभिचारोत्र वह्निर्जनको धूमजत्वाज्ज्ञानस्यान्यथाग्निस्वलक्षणाकारत्वं स्यात् ।

स्पष्टास्पष्टलक्षणो विशेषः तथा व्यक्तिभावाभावकालयोः सामान्यप्रतीतेः सर्व्वदा तुल्याकारत्वात् तस्याः ॥

किञ्च ।

...3.148b व्यञ्जकस्य च जातीनां जातिमत्ता यदीष्यते ॥ १४८ ॥

...3.149a प्राप्तो गोत्वादिना तद्वान् प्रदीपादिप्रकाशकः ।

[339/s]

'व्यञ्जकस्य'[1631] विशेषस्य 'जातीनां जातिमत्ता यदीष्यते' (।) तदा 'गोत्वादिना' सामान्येन 'प्रदीपादि'[1632] स्तस्य 'प्रकाशकः तद्वान्' सामान्यवान् प्राप्तः[1633] व्यञ्जकलक्षणत्वात् तद्वतः । तस्मान्न वृत्तिरभिव्यक्तिरपि तत्कथमेकवृत्तेरनेकोप्येकशब्दवान् स्यात् ॥

किञ्च (।) [1634]

...3.149b व्यक्तेरन्याथवानन्या येषां जातिस्तु विद्यते ॥ १४९ ॥

...3.150a तेषां व्यक्तिष्वपूर्वासु कथं सामान्यबुद्धयः ।

व्यक्तेरन्याऽथवाऽनन्या अव्यतिरिक्ता येषां वै शे षि क सां ख्या दीनां जातिर्व्विद्यते[1635] एवेति मतं (।) तेषां मते व्यक्तिष्वपूर्व्वासु कथं सामान्यबुद्धयः स्युः ।

तथा हि (।)

...3.150b एकत्र तत्सतोन्यत्र दर्शनासम्भवात् सतः ॥ १५० ॥

...3.151a अनन्यत्वेऽन्वयाभावादन्यत्वेप्यनपाश्रयात् ।

अनन्यत्वे एकत्र व्यक्तौ तदात्मनः सतः सामान्यस्यान्यत्र व्यक्त्यन्तरेऽ'न्वयाभावात्' दर्शनासम्भवात् । कथं सामान्यबुद्धिः । अन्यत्वेपि जातेर'नपाश्रया'दुक्तयुत्त्या[1636] ऽश्रयत्वाभावात् न व्यक्तिष्वपूर्व्वासु तन्निबन्धना धीः स्यात् ।

अपि च[1637] सामान्यं स्वाश्रयगतं वा[1638] कल्प्यते सर्व्वगतं वा आकाशादिवत् । तत्र प्रथमपक्षं दूषयितुमाह (।)

...3.151b न याति न च तत्रासीदस्ति पश्चान्न चांशवत् ॥ १५१ ॥

...3.152a जहाति पूर्व्वं नाधारमहो व्यसनसन्ततिः ।

---

[1629] ३ ज्ञानस्य व्यक्त्यसत्वेप्यभेदात् स्पष्टत्वेन ।

[1630] ४ व्यञ्जिकायाः ।

[1631] १ व्यञ्जिकात्वेपि व्यक्तेर्जातिमत्वमयुक्तमतिप्रसङ्गादित्याह ।

[1632] २ आदिनेन्द्रियमनस्कारादि ।

[1633] ३ शावलेयादिवत् ।

[1634] ४ यद्वा सर्व्वगतत्वेपि व्यक्तिः सत्तानुरोधतः । व्यक्तिशून्येऽदर्शनं व्यञ्जकाभावात् अत एव ।

[1635] ५ वस्तुसतीत्यर्थः ।

[1636] ६ आधाराधयेत्वनिषेधात् ।

[1637] ७ केनचिद्यात्मनैकत्वं नानात्वञ्चास्य केनचिदिति ?? भिन्नाभिन्नपक्षोप्ययुक्त इत्याह । यद्वस्तुत्वे सत्यतद्रूपं तस्य ततोन्यत्वमेव । यथा सुखाद् दुःखस्य । वस्तुत्वे सत्याशक्तिरूपञ्चेष्यते सामान्यमित्येतद्रूपत्वेनान्यत्वे व्यवहारस्य साध्यत्वात् स्वभावहेतुः ॥ तच्चेत् सामान्यस्य रूपमनन्यत्तदेव तद् भवति । अतत्वेऽन्यत्वात् । अनन्यत्वेन्वयाभावस्यैव दोषः ।

[1638] ८ पिण्डेष्वेव च सामान्यं नान्तरा गृह्यते यत इति ?? ।

[340/s]एकव्यक्तिस्थितं सामान्यं व्यक्त्यन्तरमुत्पद्यमानं निष्क्रियत्वा'न्न याति ।[1639] न तत्र' व्यक्त्युत्पत्तिदेशे प्रागा'सीत्' । व्यक्तिमात्रनिष्ठत्वात् । 'अस्ति' च 'पश्चादु'त्पत्तेः सामान्यं[1640] सामान्य[1641] शून्याया व्यक्तेः स्थित्यनुपगमा'न्न चांशवत्' (।) न हि सामान्यं सावयवं येन क्वचिदेकेनावयवेन समवेतं सद् अवयवान्तरैरुत्पद्यमानव्यक्तिभिः सम्बध्यते । 'न च पूर्व्वो'त्पन्न'माधारं जहाति'[1642] (।) उत्पित्सुव्यक्त्यन्तरेण सम्बन्धार्थमन्यत्र स्थितस्यापरसम्बन्धस्तद्देशागमनं किल न युज्यत 'इत्यहो व्यसनसन्ततिः' स्वाश्रयगतसामान्यवादिनां ।

किञ्च (।)

...3.152b अन्यत्र वर्त्तमानस्य ततोन्यस्थानजन्मनि ॥ १५२ ॥

...3.153a स्वस्थानादचलतोन्यत्र वृत्तिरयुक्तिमत् ।

'अन्यत्र' पूर्व्वस्थितायां व्यक्तौ 'वर्त्तमानस्य' सामान्यस्य स्वस्मात् स्था'नादा-' श्रयाद'चलतः ततः' पूर्व्वव्यक्ते'रन्यत्र' स्थाने 'जन्म' यस्य तत्र द्रव्ये 'वृत्तिरित्ययुक्तिमत्' । न हि व्यक्त्यन्तरस्थितस्य व्यक्त्यन्तरमनागच्छतस्तेन सहानुत्पद्यमानस्य च तत्सम्बन्धो युक्तः ।

तथा[1643] (।)

...3.153b यत्रासौ वर्त्तते भावस्ते न संबध्यतेपि न ॥ १५३ ॥

...3.154a तद्देशिनश्च व्याप्नोति किमप्येतन्महाद्भुतम् ।

'यत्र' देशेऽसौ[1644] शावलेयादि'र्भावो वर्त्तते' तेन देशेन सामान्यं न सम्बध्यते स्वव्यक्तिनिष्ठत्वात् तस्य । 'तद्देशिनं' सामान्यसम्बन्धरहितो देशो यस्य तं विशेषश्च [67b/MA] 'व्याप्नोती'ति 'किमपि महाद्भुतमेतत्' दुर्बुद्धिविलपितेषु ॥

[341/s]

...3.154b व्यक्त्यवैकत्र व्यक्ताऽथ सर्वगा जातिरिष्यते ॥ १५४ ॥

...3.155a सर्वत्र दृश्येताभेदात् सापि न व्यक्त्यपेक्षिणी ।

'अथ[1645] सर्व्वत्रगा' जातिरिष्यते 'तदैकत्रैव' देशे 'व्यक्त्या व्यक्ता' सा जातिः 'सर्व्वत्र'[1646] देशे 'दृश्येताभेदात्' । एकव्यक्तिव्यक्तं रूपं 'सर्व्वत्र' विद्यमानमभिन्नमित्युपलब्धिप्रसङ्गः । व्यङ्ग्यव्यञ्जकभावश्चायुक्त इत्युक्तं[1647] (।) भवतु वा तथापि न 'सा' जाति'र्व्यक्त्यपेक्षिणी' ।

---

[1639] १ न प्रतिबिम्बवदवस्तुत्वात्

विरुद्धपरिमाणेषु वज्रादर्शतलादिषु ।
पर्वतादिस्वभावानां भावानां नास्ति सम्भवो

. यतः ।

[1640] २ यैः प्रकारैर्व्यक्त्यन्तरे सम्भवस्तेनेष्यन्ते सामान्यश्चात्रेति व्याघातः (।) व्यक्तिसमवेतभानमनुत्पादेपीति किमुत्पादेनेति चेन्न । प्रतिभासोऽलीकः सामान्याभावेपीति न तन्मात्रात् सत्त्वत्वमिति नेष्टसिद्धिः ।

[1641] ३ न व्यक्तिसहोत्पन्नं नित्यत्वात् । न व्यक्त्युत्पाद एव तदुत्पादाभेदात् ।

[1642] ४ अनंशम्वा

[1643] ५ पूर्व्वव्यक्तिदेशादविचलदपि ततोन्यदेशद्रव्यं व्याप्नोतीत्यत्राह ।

[1644] ६ पश्चाद्भावी ।

[1645] १ स्वाश्रयेन्द्रियसंयोगात् पक्षत्वात्तच्छून्येन दृश्यते जातिरिति समाधातुरपि ।

[1646] २ व्यक्तिशून्येपि नो चेत् स्वभावनानात्वप्रसङ्गः ।

[1647] ३ वृत्तिराधेयतेत्यादिना ।

तथा हि ।

...3.155b व्यञ्जकस्याप्रतीतौ न व्यङ्ग्यं सम्यक् प्रतीयते ॥ १५५ ॥

...3.156a विपर्ययः पुनः कस्मादिष्टः सामान्यतद्वतोः ।

व्यञ्जकस्य[1648] प्रदीपादेर'प्रतीतौ न व्यङ्ग्यं' घटादिः 'संप्रतीयत' इति तावत् स्थितं । 'सामान्यतद्वतोः पुनः कस्माद् विपर्यय इष्टः' । यदि व्यक्तिः सामान्यस्य व्यञ्जिका तदा व्यक्तेर्ग्रहे सामान्यं न गृह्येत । इह तु सामान्यस्य व्यङ्ग्यस्य प्राग् ग्रहणं (।) ततस्तद्विशिष्टत्वेन व्यक्तिर्गह्यत इति किमिष्यते । व्यञ्जकाग्रहे व्यङ्ग्याग्रहणात् ।

किञ्च (।)

...3.156b पाचकादिष्वभिन्नेन विनाप्यर्थेन वाचकः ॥ १५६ ॥

यदि सामान्यमेवाभिन्नाभिधानहेतुर्न व्यक्तयः तदा 'पाचकादिष्वभिन्नेनार्थेन' पाचकत्वादि[1649] सामान्येन 'विनैव' त्वन्मतेपि पाचकादिशब्दः कथं 'वाचकः' ।

प्रत्ययश्चानुयायी । कर्म पचनादि[1650] तद्धेतुरिति चेत्[1651] । आह ।

...3.157a भेदान्न हेतुः कर्मास्य न जातिः कर्मसंश्रयात् ।

[342/s]

भेदान्न हेतुः कर्मादि । कर्मापि प्रतिव्यक्त्येकस्यामपि पौर्व्वापर्येण भिन्न[1652] मेव तत्कथं व्यक्तिवदेकाभिधानहेतुः । कर्मसामान्यं[1653] हेतुश्चेदाह । अस्य कर्मणो जातिर्नाभिन्नाऽभिधानहेतुः। तस्याः कर्मसंश्रयात् । कर्मणि[1654] समवेतत्वात् तत्रैवाभिधानहेतुता स्यान्न द्रव्ये[1655] ।

अथ कर्मसामान्यं कर्मणि सम्बद्धं तच्च द्रव्य इति परम्परया तत्सम्बद्धं तन्निमित्तः शब्दो द्रव्ये वर्त्तत इत्याह ।

...3.157b श्रुत्यन्तरनिमित्तत्वात् कर्मणो न निमित्तता ॥ १५७ ॥

...3.158a असंबंधान्न सामान्यं नायुक्तं शब्दकारणात् ।
अतिप्रसंगात् ;

'श्रुत्यन्तरस्य' पाचकादिशब्दादन्यस्य पाक[1656] इत्यादिशब्दस्य 'निमितत्वा'त् 'कर्मणो' द्रव्ये पाचकशब्दवृत्तौ नास्ति निमित्तता परंपरयापि । तथाऽनित्यत्वात् स्थित्यभावाच्च[1657] कर्मणस्तस्मि[1658] न्निवृत्ते पाचकादिप्रतिपत्ति[1659] र्न्न स्यात् । अपचत्यपि तद्व्यपदेशो दृश्यते । नित्यत्वात् कर्मसामान्यं पाचकव्यपदेशे हेतुश्चेदाह (।) असम्बन्धात्[1660] । द्रव्येण कर्मसामान्यस्य न सम्बन्धः साक्षात् तत्रासमवायात् । नापि परंपरया कर्मणा तत्समवेतस्य नष्टत्वात्[1661]

[1648] ४ नागृहीतविशेषणा विशेष्ये बुद्धिरिति सामान्यग्रहद्वारा व्यक्तिग्रह इष्टः (।) स च न्यायविपरीतः ।

[1649] ५ पाचकादिरन्यत्रापीत्यनुवृत्तप्रत्ययः ।

[1650] ६ अध्ययनादि ।

[1651] ७ व्यक्तिभ्य एव प्रत्यययोस्तु किं कर्मादिना ।

[1652] १ भिन्नमभिन्नप्रत्ययहेतुर्न भवतीत्येकं सामान्यमिष्टं तद् यदि भिन्नमपि कर्माभिन्नं प्रत्ययं जनयेत् व्यक्तिभिः कोपराधः कृतः ।

[1653] २ कर्मणः पाकक्रियासमवेतं ।

[1654] ३ द्रव्यादर्थान्तरभूते ।

[1655] ४ पाचकशब्दादिना द्रव्यस्यैव परिच्छेदः ।

समवायिना सामान्येन सम्बन्धाभावात् । न[1662] सामान्यं 'शब्द'स्य पाचकादेः 'कारणान्नायुक्तं' किंत्वयुक्तमेवाति'प्रसङ्गात्' । कर्मत्वस्य सम्बन्धव्यतिरेकेण व्यपदेशहेतुत्वे सर्वत्र तथात्वप्र[1663] सङ्गः (१५७) ॥

अपचत्यपि पुरुषेऽतीतानागतं कर्म तद्व्यपदेशनिमित्तमिति चेत् । आह (।)
[343/s]

...3.158b कर्मापि नासज्ज्ञानाभिधानयोः ॥ १५८ ॥

...3.159a अनैमित्तिकतापत्तेः ;

न कर्मासदपि ज्ञानाभिधानयोर्हेतुरनैमित्तिकताया[1664] आपत्तेः । हेतुं विनाभवतोऽहेतुकत्वप्रसङ्गात् (।) अतीतानागतश्च कर्माविद्यमानत्वादसदेव ।

पाकादिनिर्वर्त्तिका शक्तिः पाचकादिव्यपदेशहे[1665] तुरिति चेत् । आह (।)

...3.159b न च शक्तिरनन्वयात् ।

'शक्ति'र्हि द्रव्यादभिन्ना भिन्ना वा प्रतिपन्ना । अभिन्ना चेत् तदा द्रव्यव'दनन्वयान्न' चान्वयिनोऽन्वयिशब्दहेतुता[1666] । अथ भिन्ना तदा[1667] ऽनुपकारकयोः सम्बन्धानुपपत्तेर्द्रव्येणोपक्रियमाणा शक्तिस्तत्सम्बन्धिनीति वक्तव्यं (।) अत्रापि द्रव्यं शक्त्यन्तरेण स्वयमेवासमर्थस्वभावतया शक्तिमुपकरोतीति वाच्यं । आद्येऽनवस्था द्वितीये तु कार्यमेव किन्न करोतीत्यलं शक्तिस्वीकारेण[1668] ॥
[68a/MA]

...3.159c सामान्यं पाचकत्वादि यदि प्रागेव तद्भवेत् ॥ १५९ ॥

....3.160 व्यक्तं सत्तादिवन्नो चेन्न पश्चादविशेषतः ।
क्रियोपकारापेक्षस्य व्यञ्जकत्वेऽविकारिणः ॥ १६० ॥

...3.161a अतिशये वा ह्यप्यस्य क्षणिकत्वात् क्रिया कुतः ।

अभिन्नाभिधाने निमित्तं 'सामान्य'मेव[1669] 'पाचकत्वादि यदी'ष्यते तदा पाकादिक्रियातः 'प्रागेव तत्' पाचकत्वादि सामान्यं द्रव्योत्पत्तावेव 'व्यक्तं भवेत्'[1670] (।) नो चेत् प्रागव्यक्तं न 'पश्चा'दपि व्यक्तं 'स्याद[1671] विशेष'तो विशेषाभावात् (।) नित्यैकरूपस्य सामान्यस्य क्रियायाः कर्मणः पाकादि न 'उपकार'स्तदपेक्षस्य द्रव्यस्य पाचकत्वादिसामान्य'व्यञ्जकत्वे'

1656 ५ पाकः पाक इति हि ततः कर्मजातेः स्यान्न पाचक इति ।
1657 ६ पचत एव कर्मास्ति न सर्वदा कर्म ।
1658 ७ कर्मणि
1659 ८ कर्मनिमित्तत्वे सति पाचक इति नोच्येत उच्यते च तन्न वस्तुभूतक्रियानिमित्तको व्यपदेशः ।
1660 ९ नष्टे कर्मणि सामान्यं न कर्मणि न कर्त्तरीति सम्बद्धसम्बन्धोपि नेत्यसम्बन्धान्न शब्दज्ञानहेतुः ।
1661 १० कर्मणः ।
1662 ११ असम्बद्धमपि हेतुरित्याह ।
1663 १२ गोत्वमप्यश्वज्ञानहेतुः स्यात् ।
1664 १ अहेतुकौ ज्ञानशब्दौ स्यातां ।
1665 २ पाचकस्था ।
1666 ३ अन्वयित्वात् शब्दज्ञानादेरपि ।
1667 ४ शक्तेरेवोपयोगाद् द्रव्यानुपयोगासङ्गः ।
1668 ५ द्रव्यश्च नान्वेतीत्यन्वयी शब्दो न स्यात् ।

चेष्यमाणे‘ऽविकारिणः’ स्थिरस्य[1672] द्रव्यस्यापेक्षा नास्ति । ‘अतिशये वा’ प्रागवस्थातः स्वी-क्रियमाणे क्षणिकत्वं स्यात् । ‘क्षणिकत्वा’[344/s] दुत्पत्त्यनन्तरविनाशित्वात् ‘क्रिया’ कर्म कुतः सम्भवति । उत्पत्त्यनन्तरं स्थितो हि कर्म कुर्यात् । सा च क्षणिकस्य नास्तीति न तेनोपकारोपि ।

...3.161b तुल्ये भेदे यया जातिः प्रत्यासत्त्या प्रसर्पति ॥ १६१ ॥

...3.162a क्वचिन्नान्यत्र सैवास्तु शब्दज्ञाननिबन्धनम् ।

वस्तुभूतसामान्यवादिनोपि व्यक्तीनां ‘तुल्ये भेदे’ परस्परमेकार्थकरणादिकया ‘यया प्रत्या-सत्त्या क्वचिद्’ व्यक्तौ शावलेयबाहुलेययो‘र्जातिः प्रसर्प्पति[1673] । नान्यत्र कर्कादौ[1674]’ । सैव प्रत्यासत्तिरभिन्नस्य ‘शब्दज्ञानस्य निबन्धम’स्तु किं प्रमाणान्तरबाधितजातिस्वीकारेण ॥

## ख. सांख्यमतनिरासः

सां ख्या[1675] प्राहुः ।

...3.162b न निवृत्तिं विहायास्ति यदि भावान्वयोपरः ॥ १६२ ॥

...3.163a एकस्य कार्यमन्यस्य न स्यादत्यन्तभेदतः ।

‘यदि निवृत्तिं’ विजातीय[1676] व्यवच्छेदं ‘विहाय भावानां’ सत्वरजस्तमःसाम्यावस्था-स्वभावप्रकृत्यात्मनाऽद्वय एकरूपोऽ‘न्वयोऽपरो नास्ति’ (।) ‘तदेकस्य कार्य’मङ्कुरो‘ऽन्यस्य’ क्षित्यादेर्न ‘स्यात्’ । बीजक्षित्यादीनाम‘त्यन्तभेदतः’ । अङ्कुरकारकं यद् रूपं बीजस्य तच्चेत् क्षित्यादेर्न्नास्ति न स्यादसौ तत्कारकः । अस्तित्वे चैकरूपान्वयः (।)

सिद्धान्तवाद्याह ।

...3.163b यद्येकात्मतयानेकः कार्यस्यैकस्य कारकः ॥ १६३ ॥

...3.164a आत्मैकत्रापि वास्तीति व्यर्थाः स्युः सहकारिणः ।

‘यद्येकात्मतयाऽनेको’ बीजश्च(?स)लिलादिः ‘कार्यस्या’ङ्कुर‘स्यैकस्य कारकस्त-’ दा-ङ्कुरकारक ‘आत्मा’ऽनुयायी । ‘एकत्रापि’ बीजेऽन्यत्र वा‘स्तीति व्यर्थाः सहकारिणः स्युः’ एकत्र विद्यमानेनैव तेनात्मना कार्योत्पत्तेः ।

[345/s]

...3.164b नापैत्यभिन्नं तद् रूपं विशेषाः खत्वपायिनः ॥ १६४ ॥

1669 ६ पाचकादिद्रव्येषु ।
1670 ७ यदेव वस्तु तदेव गोत्वादिसत्तादियोगात् यथा सत्ता द्रव्यत्वादि यावद्द्रव्यभावि ।
1671 ८ सामान्याश्रयद्रव्यस्य ।
1672 ९ अक्षणिकत्वान्न सहकार्यपेक्षा ।
1673 १ व्याप्य वर्त्तते विना सामान्यं ।
1674 २ नाश्वविशेषादौ ।
1675 ३ तस्माद्व्यावृत्तेरेवैकत्वाध्यवसायाद्भावेष्वन्वय इति स्थितम् ।
1676 ४ यद् बीजस्याङ्कुरजनकं रूपं न तत्पृथिव्यादावस्ति यदस्ति बुद्ध्यारोपितव्यावृत्तत्वं न तज्जनकं निःस्वभा-वत्वात् । सां ख्य स्तु यज्जनकं रूपं बीजे तच्चेदन्यस्यापि स्यात् मतेन स्वभावेन ततोऽभिन्न इत्यन्वयमाह । भेदेपि केचित् नियता इत्यत्र व्यभिचारः ।

...3.165a एकापाये फलाभावाद् विशेषेभ्यस्तदुद्भवः ।

सह[1677] कारिणामभावेपि बीजसत्त्वे'ऽभिन्नं तत्' प्रधानं[1678] कर्त्तृ'रूपं नापैति'[1679] नित्यत्वात्[1680] व्यक्ति[1681] सत्त्वाच्च । 'विशे[1682] षाः खलु नूनमपायिनो' न प्रधानं ।[1683] 'एकस्य' सहकारिणो विशेषस्या'पाये'पि फलस्या'भावात् । विशेषेभ्यस्त'स्य कार्यस्य 'उद्भवो' निश्चीयते न प्रधानात् (।) विशेषस्यान्वय[1684] व्यतिरेकानुविधानात् । सामान्यस्य[1685] विपर्ययात् ।

...3.165b स पारमार्थिको भावो य एवार्थक्रियाक्षमः ॥ १६५ ॥

...3.166a स च नान्वेति योन्वेति न तस्मात् कार्यसम्भवः ।

स एव 'पारमार्थिको भावो योर्थक्रियाक्षमः । स च' विशेषोर्थक्रियाक्षमो 'नान्वेति' परस्परं भेदात् (।) 'योऽन्वेति' प्रधानाख्यो भावो 'न तस्मात् कार्यस्य सम्भवः' ।

यद्येकरूपा[1686] ननुगमस्तदा विशेषेष्वपि केचिज्जनयन्ति नापर इति कुतोयं[1687] विभाग इत्याह ।

...3.166b तेनात्मनापि भेदे हि हेतुः कश्चिन्न चापरः ॥ १६६ ॥

...3.167a स्वभावोयमभेदे तु स्यातां नाशोद्भवौ सकृत् ।

येनैक[1688] रूपान्वये सहकारिवैकल्यप्रसङ्ग'स्तेन' कारणेना'त्मना' स्वरूपेण बीजजलशिलानलादीनां 'भेदेपि कश्चित्' क्षितिश(? स)लिलबीजादिरङ्कुरस्य 'हेतुर्न चापरः' शिलानलादिः । 'हि' यस्मात् 'स्वभावोयम'ङ्कुरजननशक्तः । 'तदितरश्च' प्रमाणदृष्टो बीजादीनां शिलादीनाञ्च नात्र पर्यनुयोगावतारः । कुत उत्पन्न इति चेत् । स्वस्वहेतोः । सोपि कस्मात् तज्जनक इति चेत् । स्वहेतोः (।) 'तत्रापि' [346/s] 'प्रश्ने तदेवोत्तरं' । अनादिश्च हेतुफलपरंपरैकरूपानुगमाद्(।) विशेषाणा'मभेदे[1689] तु' [68b/MA] स्वीक्रियमाणे 'सकृदे'कस्य 'नाशोद्भवौ[1690] स्यातां' (।) विशेषान्तरयोर्यथासंभवं नाशो जन्मनि च तदपरस्य विशेषस्य तदभिन्नरूपतया नाशोद्भवौ स्याता[1691] (।)

...3.167b भेदोपि तेन नैवं चेद् य एकस्मिन् विनश्यति ॥ १६७ ॥

---

[1677] १ एतदेव द्रढयन्नाह ।
[1678] २ सामान्यं ।
[1679] ३ अस्य न विशेषो विशेषेऽभेदहानेः ।
[1680] ४ एकस्य अप्यन्ते ।
[1681] ५ त्रैगुण्यस्य सर्व्वात्मना सर्व्वत्र सर्वदा सत्त्वात् ।
[1682] ६ व्यक्तिभेदाः ।
[1683] ७ अत एकव्यक्तिसत्त्वेपि कार्यं स्यान्न चास्त्यतः ।
[1684] ८ पाथपृथिव्यादेरङ्कुरेण ।
[1685] ९ एकविशेषस्थितावप्यविकलस्य ।
[1686] १० प्रधानस्य ।
[1687] ११ सर्व्वं सामान्यं निरस्य पृथिव्यादेर्जनकत्वे न कोप्यजनक इत्याशयः ।
[1688] १२ एकस्य कार्यमन्यस्य न स्यादत्यन्तभेवत ?? इत्यत्राह । ज्वरादिशमन ?? इत्याद्युक्तेप्यधिकार्थं ।
[1689] १ भिन्नानां कश्चिद्धेतुर्नान्यः स्वभावादित्यत्र न किञ्चिद् बाधकं भवतु बाधेत्याह ।
[1690] २ उपलक्षणमेतत् सूत्रे सर्व्वत्र सर्व्वोत्पादिरपि ज्ञेयः ।
[1691] ३ व्यपदेशोपि सर्व्वं हि वस्तु रूपेण भिद्यते
न परस्परं । तन्मतं सामान्यं सर्व्वत्र स्थितं विशेषा नश्यन्ति ।

...3.168a तिष्ठत्यात्मा न तस्यातो न स्यात् सामान्यभेदधीः ।

अथ परस्परं विशेषाणामेकान्तेन नाभेदः (।) किन्तर्हि 'भेदो' विशेषरूपतया । 'तेन' भेदे'नैवं' सकृन्नाशोद्भवप्रसङ्गो 'न चेत्' । यद्येक'स्मिन्' विशेषे 'विनश्यति' (।) 'तिष्ठत्यात्मा'नुयायी प्रधानाख्यस्तदा स 'तस्य' विशेषस्यात्मा न भवति (।) न हि यस्मिन् विनश्यति यो 'न' नष्टः स तस्य स्वभावो विरुद्धधर्माध्यासलक्षणत्वादभेदस्य । 'अतः' परस्परं सर्व्वथा भेदा'न्न स्यात् सामान्यभेदधीः'[1692] । अन्वयि सामान्यमनन्वयी भेद उच्यते (।) यदा च सामान्यं भेदाद् भिन्नं तदाऽनुगामिव्यक्तिस्वरूपं न सामान्यं (।) न च तदात्मको भेदः । अतस्तद्बुद्धिरपि न भवेत् ।

नन्वन्यनिवृत्तावपि समानमेतत् । भावे नश्यति अन्यनिवृत्तिर्नश्यति न वा । यदि नश्यति न स्याद् व्यक्त्यन्तरे तद्बुद्धिः (।) अथ न नश्यति तदाऽत्यन्तभेदात सामान्यभेदबुद्धिर्न स्यादित्याह ।

...3.168b निवृत्तेर्निःस्वभावत्वात् न स्थानास्थानकल्पना ॥ १६८ ॥

...3.169a उपप्लवश्च सामान्यधियस्तेनाप्यदूषणा ।

'निवृत्ते[1693] र्निःस्वभावत्वात् न स्थानास्थानयोः' स्थितिनिवृत्त्योः 'कल्पना' युक्ता । कल्पिता ह्यन्यनिवृत्तिः निःस्वभावा सा किं भावाद् भिन्नाऽभिन्ना वेति न युक्ता कल्पना । न हि शशविषाणं भिन्नमभिन्नम्वेति युक्तं कल्पियितुं[1694] । उपप्लवो [347/s] मिथ्यात्वञ्च सामान्यधियो विषयाभावात् (।) तेन[1695] नाप्यदूषणा ॥

...3.169b यत्तस्य जनकं रूपं ततोन्यो जनकः कथम् ॥ १६९ ॥

...3.170a भिन्ना विशेषा जनकाः ;

[1696] ननूक्तं यदि भावाः सर्व्वथा भिन्नास्तदा 'यत्तस्य' बीजस्य 'जनकं रूपं न' तदन्यस्य क्षित्यादेरिति 'ततोन्यो जनकः कथ'मिति । अत्रोत्तरमप्यु[1697] क्तमभिन्नरूपान्वयव्यतिरेकानुविधानाभावाद् भिन्ना[1698] 'विशेषा' एव 'जनका'स्तदन्वयव्यतिरेकानुविधानात् कार्यस्य सर्व्व एव ते तत्कार्यस्योत्पादकतयोत्पन्नास्तदुत्पादयन्ति ।

...3.170b अप्यभेदोपि तेषु चेत् ।
तेन तेऽजनकाः प्रोक्ताः ;

तेषु विशेषेष्वन्वयिना रूपेणाभेदोप्यस्ति तेनैव ते जनका इति चेत्(।) तेनान्वयिरूपेण ते विशेषा अजनकाः प्रोक्ताः[1699] एकत्रापि विशेषे तद्भावात् सहकारिवैफल्यप्रसक्तेः । तदन्वयव्यतिरेकानर्थविधानाद् विशेषस्य विपर्ययाच्चेति[1700] ।

---

[1692] ४ परस्परसम्बद्धा

[1693] ५ विजातिव्यावृत्तदाह्यं स्वाकाराभेदेनाध्यस्तं शब्दविकल्पविषयमपोहं मुक्त्वाऽन्यनिवृत्तिमात्रे प्राह (दिग्)नागाभिमते वा ।

[1694] ६ विकल्पबुद्ध्यारोपितसामान्येपि विशेषे नश्यतीत्यादिनेत्याह यः सामान्याकारोऽनेकपदार्थाभिन्नः स भ्रान्तो बहिर्वास्ति ।

[1695] १ न प्लवत्वेन हेतुना नास्या युक्तदूषणं सामान्यबुद्धौ ।

[1696] २ तुल्यदोषत्वमपनीय प्रकारान्तरेण प्रक्रान्तचोद्यापनया(या)ह ।

[1697] ३ एकापाये फलाभावाद् विशेषेभ्यस्तदुद्भव ?? इति प्रसाधनं प्रागुक्तं स्मारयति ।

[1698] ४ नात्र विरोधोस्ति ।

[1699] ५ सामान्यान्वयव्यतिरेकाननुविधानादिति नापैत्यभिन्नमित्यादिना ।

[1700] ६ स्यातां नाशोद्भवौ सकृदित्यादिना ?? भेदं प्रसाध्य प्रतिभासभेदेनापि भेदमाह ।

किञ्च (।)

...3.170c प्रतिभासोपि भेदकः ॥ १७० ॥

...3.171a अनन्यभाक् स एवार्थस्तस्य व्यावृत्तयोपरे ।

'प्रतिभासोप्यनन्यभाग्[1701] भेदको' विशेषाणामसंकीर्ण्णरूपव्यवस्थापनात् । अपि शब्दा-दुत्पत्तिस्थितिविनाशादयश्च समानाः । ततश्च विशेष एवार्थः पारमार्थिकः । ये 'त्वपरे' सा-मान्यादयो धर्मास्ते 'तस्य' शेषस्य विजातीयाद् 'व्यावृत्तयः' कल्पिता अनर्थक्रियाकारिणः ।

[348/s]

...3.171b तत् कार्यं कारणञ्चोक्तं तत्स्वलक्षणमिष्यते ॥ १७१ ॥

...3.172a तत्त्यागाप्तिफलाः सर्वाः पुरुषाणां प्रवृत्तयः ।

अर्थक्रियाकारि तु[1702] यद् रूपं तत्कार्य 'कारणञ्चोक्तं तत्स्वलक्षणमिष्यते (।) तस्य त्यागाप्तिस्तत्फलाः पुरुषाणाम'र्थानर्थप्राप्तिपरिहारैषिणां 'प्रवृत्तयः सर्व्वाः' ।

किञ्च[1703] (।)

...3.172b यथाऽभेदाविशेषेपि न सर्वं सर्व्वसाधनम् ॥ १७२ ॥

...3.173a तथाऽभेदाविशेषेपि न सर्व्वं सर्व्वसाधनम् ।

सां ख्य स्यापि मते 'यथाऽभेद'स्य प्रधानात्मतया सर्व्वभावेष्व'विशेषेपि न सर्व्वं' व्यक्तं 'सर्व्वं'स्य कार्यस्य 'साधनं' हेतुः । 'तथा भेदाविशेषेपि[1704] न सर्व्वं' क्षितिबीजानलशिलादिकं 'सर्व्वं'स्य तापाङ्कुरादेः 'साधनं' ।

...3.173b भेदे हि कारकं किञ्चिद् वस्तुधर्मतया भवेत् ॥ १७३ ॥

विशेषान्तराद् 'भेदे हि' सति 'वस्तुधर्मतया'[1705] वस्तुस्वभावत्वात् 'किञ्चिद्' वस्तु 'कारकं भवेत्' । न सर्व्वमिति युक्तं स्वहेतुबलायातत्वाद् भिन्नशक्तिकत्वस्य ।(१७३)

...3.174a अभेदे तु विरुध्येते तस्यैकस्य क्रियाक्रिये ।

'अभेदे तु' सर्व्वभवानां 'विरुध्येते तस्यै[1706] कस्या'ङ्कुरादेः 'क्रियाक्रिये' बीजरूपतया प्रधानमङ्कुरकारकमकारकञ्च दहनरूपतया । विप्रतिषिद्धञ्चैतत् [69a/MA] कथमेकस्य युक्तं ॥

...3.174b भेदोप्यस्त्यक्रियातश्चेत् न कुर्युः सहकारिणः ॥ १७४ ॥

व्यक्तीनां मिथो व्यक्तिरूपतया 'भेदोप्यस्ति' । व्यक्त्यन्तरसाध्यस्य कार्यस्या'क्रियातश्चेत्' । तदा भेदात् 'सहकारिणः' कार्यं 'न कुर्युः' । एकस्य यः कारकः स्वभावस्तस्यान्यत्राभावात् । (१७४)

...3.175a पर्यायेणाथ कर्त्तृत्वं स किं तस्यैव वस्तुनः ।

[1701] ७ प्रतिव्यक्तिभिन्नः ।

[1702] १ विशेषरूपं ।

[1703] २ एवं मी मां स का दि मतेन प्रातिभासिकं सामान्यं निरस्यानुमानिकं पूर्व्वोक्तं प्रत्याह ।

[1704] ३ बौद्धस्य ।

[1705] ४ अभेदे तु तस्य सर्व्वत्राभिन्नत्वात् क्रियाक्रिये विरुद्धे ।

[1706] ५ त्रैगुण्यस्य बीजदहनाद्यात्मकस्य ।

[349/s]

अथ[1707] कारकैकस्वभावानुगमात् सहकारिणां 'पर्यायेण कर्त्तृत्वं' । स पर्यायस्तस्यान्वयिन एकस्य [1708] 'वस्तुनः किं' (कस्मात्) युक्तः । न ह्येकं वस्तु कार्य कुर्व्वत पर्यायेण न करोतीति युक्तं व्यपदेष्टुं तेनैव क्रियमाणत्वात् । सहकारिणां बहूनां पर्यायेण क्रिया सम्भाव्यते । तेषु चैकस्य कारकं रूपमन्यत्र नास्तीति न ते कुर्युः । सर्व्वेषाञ्च स्वहेतुवलायात एककार्यकारकः स्वभावोऽस्माभिरिव सां ख्यै र्नेष्यते॥

किञ्च[1709] ।

...3.175b अत्यन्तभेदाभेदौ तु स्यातां तद्वति वस्तुनि ॥ १७५ ॥

'तद्वति' सामान्यविशेषवति 'वस्तुनि' स्वीक्रियमाणे'ऽत्यन्तमे'कान्तेन सामान्यविशेषयोर्भेदाभेदो 'स्यातां' । सामान्यस्वरूपत्वाद् भेदस्य सामान्यमेव भवेन्न भेदो भेदात्मत्वात् सामान्यस्य भेद एव भवेत् सामान्यं ।[1710] (१७५)

अथ तयोः कथञ्चन[1711] भेदोप्यस्तीति चेदाह (।)

...3.176a अन्योन्यं वा तयोर्भेदः सदृशासदृशात्मनोः ।

'तयोः' सामान्यविशेषयोः 'सदृशासदृशात्मनोः [1712] साधार'णासाधारणस्वरूपयोरन्योन्यं 'भेद' एव 'वा' भवेत् । न कथञ्चिदेकत्वं ।

एतदेव स्फुटयितुं पूर्व्वपक्षयति (।)

...3.176b तयोरपि भवेद् भेदो यदि येनात्मना तयोः ॥ १७६ ॥

...3.177a भेदः सामान्यमित्येतद् यदि भेदस्तदात्मना ।
भेद एव;

[350/s]

न सर्व्वात्मनाऽभेद[1713] 'स्तयोः' सामान्यविशेषो'रपि' कथञ्चिद् 'भेदो भवेद् यदि' (।) अन्यथा सामान्यविशेषभावानुपपत्तिः । अत्राह । 'येनात्मना' स्वरूपेण साधारणेन चासाधारणेन च 'तयोः' सामान्यविशेषयो'र्भेदः सामान्यं' विशेष 'इत्येतद्' व्यवस्थाप्यते । तेनात्मना साधारणासाधारणेन 'यदि भेदस्तदा' भेद एव 'तयोः' स्यात् भिन्नलक्षणत्वात् ।

...3.177b तथा च स्यान्निःसामान्यविशेषता ॥ १७७ ॥

...3.178a भेदसामान्ययोर्यद्वद् घटादीनां परस्परम् ।

'तथा च निःसामान्यविशेषता' समान्यविशेषरूपताऽभावः सामान्यविशेषयो[1714] रभितयोः 'स्यात् । यद्वद् घटादीनां' विशेषाणां 'परस्परं' न सामान्यविशेषता ।[1715] विशेषः स्व(लक्षण)रू-

[1707] १ यवबीजञ्चे (त्) शाल्यङ्कुरकारणं पर्यायेण यदा तच्छालिबीजत्वेन परिणमेत् । प्रधानशक्त्यधिष्ठितभेदपरिणामे प्रधानशक्तेर्भेदत्वेन परिणामे वा सर्व्वत्र सर्व्वोपयोगात् ।

[1708] २ शालिबीजस्य यवबीजत्वेन परिणामो न युक्त इत्यर्थः भेदाधिष्ठानत्वात् पर्यायस्य ।

[1709] ३ परिणामं निरस्याभिन्नं भिन्नं भिन्नाभिन्नं सर्व्वसु चोत्तरोत्तरावस्यास्वनुयायित्वादूर्ध्ववृत्तिर्वा समं सर्व्वासु व्यक्तिष्वनुयायित्वात् तिर्यग्वृत्ति वा सामान्यं सांख्यमीमांसकनैयायिकादेर्दू षयितुमाह किञ्चेति ।

[1710] ४ निरस्तमभिन्नं ।

[1711] ५ स्वभावाभेदेपि लक्षणभेदात् अवस्थायाः ।

[1712] ६ अनुगतव्यावृत्तयोरश्लेषात् ।

[1713] १ सामान्यं विशेष इति भेदस्थापनात् ।

पमनुगामि सामान्यं तदेवानुगामि विशेष उच्यते (।) यदि तु तयोर्भेद एव न सामान्यविशेषभावः स्यात् ।[1716]

...3.178b यमात्मानं पुरस्कृत्य पुरुषोयं प्रवर्तते ॥ १७८ ॥

...3.179a तत्साध्यफलवाञ्छावान् भेदाभेदौ तदाश्रयौ ।
चिन्त्यते स्वात्मना भेदः ;

अपि चायं व्यवहारी 'पुरुषो यम'र्थस्या'त्मानं' स्वभावं 'पुरस्कृत्य' प्रवृत्तिविषयत्वेनाग्रहं कृत्वा 'तत्साध्यफलवाञ्छावान्' अर्थसाध्यफलसमीहायुक्तः सन [1717] 'प्रवर्त्तते (।) तदाश्रयौ' तदर्थविषयौ 'भेदाभेदौ' शास्त्रकारैश्चिन्त्येते । न त्वर्थक्रियानुपयुक्तसामान्यविषयौ (।) तेषाञ्चार्थक्रियाकारिणां पुरुषप्रवृत्तिविषयाणामर्थानां 'स्वात्मना' स्वरूपेण 'भेदः' ।[1718]

कथं तर्ह्येकबुद्धिशब्दविषयतेत्याह ।

...3.179b व्यावृत्त्या च समानता ॥ १७९ ॥

...3.180a अस्त्येव वस्तु नान्वेति प्रवृत्त्यादिप्रसङ्गतः ।

[351/s]

'विजातीयाद् व्यावृत्या च सा समानताऽस्त्येव' । स्वस्वभावनियतन्तु स्वलक्षणं 'वस्तु नान्वेति' सर्व्वत्र 'प्रवृत्त्यादिप्रसङ्गतः' । अग्निरपि 'श' (=स) लिल[1719]स्वभाव एवेति 'श' (=स) लिलार्थी तत्रापि प्रवर्त्तेत । तस्मात् स्थितमेतत् (।) न किञ्चित् किमप्यन्वेतीति[1720] ।

## ग. जैनमतनिरासः

...3.180b एतेनैव यदाह्रीकाः किमप्ययुक्तमाकुलम् ॥ १८० ॥

...3.181a प्रलपन्ति प्रतिक्षिप्तं तदप्येकान्तसम्भवात् ।

'एतेन सां ख्य' मतनिराकरणे'नैवाह्रीका' दि ग म्ब रा[1721] 'यत्' स्यादुष्ट्रो दधि वस्तुत्वात् । न वा स्यादुष्ट्रो[1722] विशेषरूपतये ति । 'किमप्ययुक्त'तया हेयोपादेयविषयापरिनिष्ठाना'दाकुलं प्रलपन्ति तदपि प्रतिक्षिप्तमेकान्तस्य भेदस्य सम्भवात्' ।

आकुलत्वमेवाख्यातुमाह ।

...3.181b सर्वस्योभयरूपत्वे तद्विशेषनिराकृतेः ॥ १८१ ॥

---

1714 २ भेदो निःसामान्यः सामान्यं निर्व्विशेषः ।

1715 ३ अजन्यजनकत्वेन सम्बन्धाभावात् ।

1716 ४ दिगम्बरस्योर्ध्वतासामान्यं सांख्यस्य तिर्यक् एकदोषेण (देशिनं) निरस्य तिर्यक्सामान्यं पुनराह ।

1717 ५ अर्थार्थिनः सामान्यस्य भेदाभेदचिन्तया न कि(ञ्चि)दनर्थत्वात् ।

1718 ६ आत्यन्तिकोस्त्येव ।

1719 १ अथ स्वलक्षणमन्वेष्यतीति किं कल्पितव्यावृत्त्यापीत्यपि न परस्परं भेदात् । यदि घटः पटे स्यादुदकार्थी पटेपि प्रवर्त्तेत न चास्तीति न प्रवृत्त्यादिना तुल्योत्पत्तिनिरोधादि ।

1720 २ सामान्यविशेषयोर्वस्तुत एकत्वात् कृतकानित्यत्वानि वा व्यभिचारो व्यावृत्तस्वलक्षणस्यैव सामान्यत्वात् बौद्धे ।

1721 ३ सर्वः सर्वस्वभावो न च सर्वस्वभावः ।

1722 ४ दध्यवस्थायां ।

...3.182a चोदितो दधि खादे ति किमुष्ट्रं नाभिधावति ।

'सर्व्वस्य' वस्तुन 'उभयरुपत्वे'[1723] स्वपररूपत्वे सति 'तद्विशेष'स्य दध्येव दधिनोष्ट्र[69b/MA] उष्ट्र एवोष्ट्रो न दधीत्यस्य भेदस्य 'निराकृतेः । दधि खादेति चोदितो' नियोज्यः 'किमुष्ट्रं' प्रति 'नाभिधावति' ।

...3.182b अथारस्त्यतिशयः कश्चिचद् येन भेदेन वर्त्तते ॥ १८२ ॥

...3.183a स एव विशेषोऽन्यत्र नास्तीत्यनुभयं परम् ।

'अथास्ति' दध्नः सकाशाद् उष्ट्रस्या'तिशयो' विशेषः 'कश्चिद् येन' विशेषेण चोदितेन 'भेदेन' प्रतिनियमेन दधिशब्दाद् दध्नेव उष्ट्रशब्दादुष्ट्र एव 'प्रवर्त्तते' (।) एवर्त्तर्हि 'स' विशेष एवान्यत्रासम्भवी उष्ट्रो विशेषो दधिलक्ष'णोऽन्यत्र' वस्तुनि 'नास्तीति' सर्व्वं व'स्त्वनुभयं'[1724] न स्वपररूपं किन्तु 'पर'मेव परस्मात् ।
[352/s]

किञ्च (।)

...3.183b सर्व्वात्मत्वे च सर्व्वेषां भिन्नौ स्यातां न धीध्वनी ॥ १८३ ॥

...3.184a भेदसंहारवादस्य तदभेदादसम्भवः ।

'सर्व्वेषां' भावानां 'सर्व्वात्मत्वे च भिन्नौ धीध्वनी' न स्यातामेकविषयत्वात् । तयोर्धी-ध्वन्यो'रभेदात् भेदसंहारवादस्यासम्भवः' स्यात् । उष्ट्राद् भिन्नं दधीति भेदव्यवहारो दध्येवोष्ट्र इति च तदात्मतोपसंहारव्यवहारश्च बुद्धिशब्दयोरभेदान्न स्यात् । न हि बुद्धिशब्दयोर्भेदव्यवहारो युक्तः । तन्निबन्धनत्वात् तस्य । तदभावेपि भावे चातिप्रसङ्गात् । भेदप्रतीत्योर्भावात् तादा-त्म्योपसंहारश्च कथं तदधीनत्वात् तस्य ।

## 3.3 ३. शब्दचिन्ता

...3.184b द्रव्याभावादभावस्य शब्दा रूपाभिधायिनः ॥ १८४ ॥

...3.185a नाशङ्क्या एव सिद्धास्तेऽतोव्यवच्छेदवाचकाः ।

उक्तं तावद् भावादिशब्दानां व्यवच्छेदविषयत्वं । येप्यभावादिशब्दा 'अभावस्य' स्वरूपा'भा-वात्' तेपि 'रूपाभिधायिनो' वस्तुवाचका 'नाशङ्क्या एव' । सम्भवद् वस्तु वाच्यं स्यान्न वेति चिन्त्येतापि ।[1725] यत्र तु वस्त्वेव नास्ति तत्र का चिन्ता । 'अतस्ते'ऽभावादिशब्दा 'व्यवच्छेदस्य' भावव्यावृत्ते'र्व्वाचकाः सिद्धाः' । तस्मात् स्थितमेतत् स्वभावहेतोर्व्वस्तुतः साध्यात्मकत्वेपि न प्रतिज्ञार्थैकदेशो हेतुः । साध्यसाधनधर्मिध्वनिविकल्पानां भिन्न[1726] व्यवच्छेदविषय[1727] त्वात् । न च साध्यादीनां कल्पितत्वं भेदस्य कल्पनात् । शब्दत्वेन निश्चितो धर्मी सत्त्वेन च हेतुः (।) क्षणिकत्वेन निश्चितः साध्यः । इत्यकल्पिता एव धर्म्यादय इत्युक्तं ।

[1723] ५ दध्यादेरुष्ट्रादिषु तादात्म्यानुगमात् ।

[1724] ६ स्वरूपभेदवल्लक्षणभेदश्चेत् न च द्रव्यत्वं द्रव्यादिव्यतिरिक्तं भावि ।

[1725] १ यथाऽविषयशब्दाभावाग्राहकत्वादपोहविषयाः सिद्धा इति दृष्टान्तेन परः साध्यस्तथाभावविषया-अप्यपोहविषयाभावस्वरूपाग्राहकत्वात् (।) केवलमध्यवसायात्तु तद्विषयत्वं ।

[1726] २ कारणैर्न कृत इति द्वितीयादिक्षणस्थायीति शब्दे भिन्नभिन्नारोपव्यवच्छेदकत्वेन ।

[1727] ३ वस्तुविषयत्वे स्यात् प्रतिज्ञार्थैकदेशता ।

स चायं स्वभावो हेतुः ॥

...3.185b उपाधिभेदापेक्षो वा स्वभावः केवलोऽथवा ॥ १८५ ॥

...3.186a उच्यते साध्यसिध्यर्थं नाशे कार्यत्वसत्त्ववत् ।

[353/s]

क्वचिदुपाधिभेदो विशेषणविशेषो भिन्नो[1728] ऽभिन्नो[1729] वा तदपेक्षः । 'केवलो' विशेषणरहितः शुद्धो'थवा साध्यसिध्यर्थमुच्यते[1730] नाशे कार्यत्वसत्त्ववत्' । नाशे साध्ये कार्यत्वं भिन्नविशेषणा'पेक्षः स्वभावः' तज्ज्नन्यपेक्षितपरव्यापारस्य कार्यत्वात् । एवं प्रत्ययभेदभेदित्वादयो द्रष्टव्याः । उत्पत्तिमत्वं पुनरभिन्नविशेषणमुत्पत्त्या स्वभावभूतया कल्पितभेदया विशेषणात् । सत्त्वन्तु केवलं नाश एव साध्ये स्वभावो विशेषणानुपादानात् ।

...3.186b सत्तास्वभावो हेतुश्चेत् सा सत्ता साध्यते कथम् ॥ १८६ ॥

...3.187a भेदेनानन्वयात् सोयं व्याहतो हेतुसाध्ययोः ।

ननु 'स[1731] त्तास्वभावो हेतुश्चेद'भिमतः सामान्यरूपो विशेषस्यानन्वयात् । 'तदा सा सत्ता' प्रधाना[1732] ख्या सर्व्वव्यक्तिव्यापिनी 'कथं साध्यते'ऽचे[1733] तनत्वादिहेतोः । अथ भेदानां परस्परमत्यन्तं 'भेदेनानन्वयान्न' साध्यते तदा 'सोयं' भेदानामनन्वयो हि 'हे[1734]तुसाध्ययोर्व्याहितः' ।

अर्थानन्वयिनः साध्यता न युक्ता तथा साधनतापि । तत् कथं सत्त्वं साधनं (।) तस्मात् सत्ता सामान्यं साध्यश्च [1735] साधनश्चानन्वयात् स्यात् [1736] ।

अत्राह ।

...3.187b भावोपादानमात्रे तु साध्ये सामान्यधर्मिणि ॥ १८७ ॥

...3.188a न कश्चिदर्थः सिद्धः स्यादनिषिद्धश्च तादृशम् ।

'भावः' सत्ता सा 'उपादानं' विशेषणं यस्य स भावोपादानः । स एव केवलस्त'न्मात्रं' तस्मिन् 'साध्ये सामान्यधर्मिणि' सामान्यधर्मवति 'न कश्चिदर्थः' प्रधान-[70a/MA] [354/s] सिद्धिलक्षणः सां ख्य स्य [1737] 'सिद्धः स्यात्' (।) सत्वमात्रविशेषणस्य धर्मिणः साधनात् । 'अनिषिद्धश्च तादृशं' साध्यं भेदानां सत्वस्येष्टत्वात्[1738] ॥

...3.188b उपात्तभेदे साध्येस्मिन् भवेद्धेतुरनन्वयः ॥ १८८ ॥

...3.189a सत्तायां तेन साध्यायां विशेषः साधितो भवेत् ।

---

1728 १ यद्यपि कृतके सत्त्वमस्ति तथापि हेतुकृतोयं कृतक एतन्मात्रम्विवक्षितं न सामर्थ्यं ।

1729 २ स्थानकारणादिप्रत्ययभेदित्वपुरूषप्रयत्नजत्वं स्वभावभूतधर्मभेदेनोत्पत्तिमत्त्वं ।

1730 ३ अनित्ये कृतकमुपाधिभेदापेक्षं सत्त्वमनपेक्षं ।

1731 ४ सत्त्वे

1732 ५ सांख्यस्यास्ति प्रधानमिति साध्यं ।

1733 ६ अथ सत्तायाः सामान्ये साध्ये सिद्धसाध्यताऽतो विशेषः साध्यः तत्रान्वयात् साध्यशून्यो दृष्टान्तोतो न सत्ता ।

1734 ७ सत्त्वहेतावसाध्यशून्यो दृष्टान्तविशेषाणां दुष्टो हेतौ साध्यं च ।

1735 ८ असिद्धत्वात् ।

1736 ९ इति सांख्योक्तौ बौद्धो दोषमाह ।

1737 १ त्रैगुण्यादिर्यतो नित्यः

1738 २ सिद्धसाध्यतोक्ता

अथैकसुखाद्यात्मकमित्यप्रधानविशेष (ण) विशेषितं सत्त्वं साध्यं । तदो'पात्तभेदे साध्येऽस्मिन्'[1739] सत्त्वे भवेद्धेतुरनन्वयोऽन्वयरहितः प्रधानस्य क्वचिदन्वयासिद्धेः (।) सामान्यमेव पुनः किन्न साध्यते । सामान्ये साध्ये सिद्धसाधनदोषात् । 'सत्तायां साध्याया'मिष्टायां 'तेन' वादिना 'विशेष' एवाभिमतः 'साधितो भवेत्' ।

अत्र चानन्वयदोष उक्तः ।

अस्माकन्तु[1740] (।)

...3.189b अपरामृष्टतद्भेदे वस्तुमात्रे तु साधने ॥ १८९ ॥

...3.190a तन्मात्रव्यापिनः साध्यस्यान्वयो न विहन्यते ।

'अपरामुष्टो'ऽनध्यवसितः तस्य वस्तुनो[1741] 'भेदो' यस्मिन् तस्मिन् 'वस्तुमात्रे तु साधने तन्मात्रव्यापिनः साध्यस्या'नित्यत्वस्या'न्वयो न विहन्यते'ऽतः साधनत्वं सत्त्वस्य युक्तं ।

ननु धूमादग्निसाधनेपि समानमेतत् । तथा हि यदि धूमादग्निसत्तामात्रं साध्यते तदा सिद्धसाध्यता । अथ पर्व्वतेऽस्तीति साध्यते तदाऽन्वयासिद्धिः । नैतदस्ति । [1742] न हि पक्षायोगव्यवच्छेदस्तमग्निं विशेषी[1743] करोति । अनग्निव्यावृत्तस्य साधनात् । सत्तासाधने तु तद् (सत्त्व) विशेष एव प्रधानाख्यः साध्यः ।

किञ्च (।)

...3.190b नासिद्धे भावधर्मोस्ति व्यभिचार्युभयाश्रयः ॥ १९० ॥

...3.191a धर्मो विरुद्धोऽभावस्य सा सत्ता साध्यते कथम् ।

[355/s]

सत्तायां साधनमचेतनत्वादीष्टं सद्भावधर्मोऽभावधर्म उभय धर्मो वा भवेत् । तत्र साधनात् प्राग'सिद्धे' भावे 'भावधर्मो' नास्तीत्यसिद्धासौ । 'उभयाश्रयो' भावाभावधर्मश्च 'व्यभिचार्य'नैकान्तिकः । न ह्युभयधर्म एका[1744] न्तेनैकसत्तां गमयति । अमूर्तत्वमिव वस्तुतां[1745] । 'अभावस्य' तु 'धर्मो विरुद्धो'ऽसत्त्वसाधनात्[1746] । ततस्त्रिविधदोषदुष्टत्वात् साधनस्य[1747] 'सा सत्ता कथं साध्यते' ।

साधनपक्षेतु सत्ता धर्मिणि सिद्धत्वान्नासिद्धा । अनित्यताव्याप्तिप्राप्तेः[1748] विरोधव्यभिचारौ चापास्तौ । तस्माद् ।

...3.191b सिद्धः स्वभावो गमकोऽतो गम्यस्तस्य व्यापकः ॥ १९१ ॥

...3.192a सिद्धः स्वभावनियतः स्वनिवृत्तौ निवर्तकः ।

[1739] ३ निरन्वयविनाशाभावान्नित्ये त्रिगुणत्वात् सुखदुःखमोहात्मके कर्तृत्वादियुक्ते धूमाग्न्योस्त्वयोगव्यवच्छेदेन व्याप्तिः प्रदेशनिष्ठताऽसिद्धा साध्येति न दोषः ।

[1740] ४ दोषमाह ।

[1741] ५ सत्तायाः ।

[1742] ६ यत्र धूमस्तत्राग्निरित्यग्निमात्रेण व्याप्तोग्निनान्तरीयो धूमः सिद्धो यत्रैव दृश्यते तत्रैवाग्निर्बुद्धिं जनयति तत्र च साध्यनिर्देशेन न किञ्चित् ।

[1743] ७ पक्षोग्नेर्न विशेषणं ।

[1744] १ यो भावस्य धर्मः स्वभावः स कथं न भावस्य ।

[1745] २ प्रसङ्गस्याश्रितत्वादत्र मूर्त्तनिवृत्तिमात्रं भावे विज्ञानेपि निरूपाख्येपीति विपक्षादव्यावृत्तेरगमकं ।

[1746] ३ हेतुसिद्धिं स्वीकृत्यानेकान्तविरुद्धतोक्तिरिहासिद्धावभावात् ।

[1747] ४ यत् किंञ्चित् साधनमुपादीयते तस्य ।

[1748] ५ निश्चयात् ।

'व्याप्यस्वभावः' साध्यात्मतया 'सिद्धो' (निश्चितो) गमकः । तस्य व्याप्यस्य व्यापकः स्वभावः सिद्धो गम्यः । व्यापकस्य तत्र भाव एव । व्याप्यस्य च तत्रैव भाव इत्युभयधर्मरूपाया व्याप्तेः सिद्धत्वात् ।

'अतश्चायं' [1749] व्यापकः 'स्वनिवृत्तौ' तस्य व्याप्यस्य 'निवर्त्तकः' । अनेन साधर्म्यवैधर्म्यप्रयोगावुद्दिष्टौ ।

(१) निर्हेतुकविनाशः

उदाहरणमाह ।

...3.192b अनित्यत्वे यथा कार्यमकार्यं वाऽविनाशिनि ॥ १९२ ॥

...3.193a अहेतुत्वाद् विनाशस्य स्वभावादनुबन्धिता ।

'अनित्यत्वे' साध्ये 'कार्य'[1750] हेतु'र्यथा' यत् कृतकं तदनित्यं तथा घटः कृतकश्च शब्द इति साधर्म्यप्रयोगः । अकार्यमकार्यस्वभावो वा'ऽविनाशिनि' नाशाभाव इति । अनित्यत्वनिवृत्तौ कृतकत्वनिवृत्तिर्यथाकाशे कृतकश्च शब्द इति वैधर्म्यप्रयोगः । कथं पुनर्गम्यते सत्त्वमात्रानुबन्धिनी नश्वरतेत्याह (।) 'अहेतुत्वात्' अ[1751] हेतुकृतत्वाद् [356/s] 'विनाशस्य स्वभावाद्' वस्तुसत्तामात्रेणा'नुबन्धिता'[1752] ।

कस्मादेवमित्याह ।

...3.193b सापेक्षाणां हि भावानां नावश्यम्भावितेक्ष्यते ॥ १९३ ॥

...3.194a बाहुल्येपीति चेत् तस्य हेतोः क्वचिदसम्भवः ।

'सापेक्षाणां भावानां हि' यस्माद'वश्यंभाविता[1753] नेक्ष्यते' रागस्येव वाससि । ततश्च कश्चिद् घटो न विनश्येदपि । विनाशकानां हेतूनां बाहुल्यादवश्यं इति चेत् । 'बाहुल्येपि' तस्य नाशकस्य हेतोः[1754] क्वचिद् घटादावसम्भवः स्यात् । तद्वा[70b/MA] घातकानामपि बाहुल्यात् ।

...3.194b एतेन व्यभिचारित्वमुक्तं कार्याव्यवस्थितेः ॥ १९४ ॥

...3.195a सर्वेषां नाशहेतूनां हेतुमन्नाशवादिनाम् ।

'एतेन' नाश[1755] हेतूनां प्रतिरोधसम्भवेन हेतु[1756] मन्नाशवादिनां मतेन 'नाशहेतूनां' मुद्गरादीनां 'सर्व्वेषां' नाशे कार्येऽनुमापयितव्ये 'व्यभिचारित्वमुक्तं' बोद्धव्यं । 'कार्याव्यवस्थितेः' । विनाशहेतोर्विनाशस्योत्पत्तिनियमाभावात् ।

कथं पुनर्व्विनाशस्याहेतुतेत्याह ।

---

[1749] ६ गम्यगमकत्वमुक्त्वा निवर्त्यनिवर्त्तकमाह ।

[1750] ७ कृतकत्वं ।

[1751] ८ व्याप्तिविषयं प्रमाणं विपक्षे आधकमाह पुष्टः परेण ।

[1752] १ भावस्तावदित्यादिना निर्हेतुकत्वे सिद्धे स्वरसते (।) निवर्त्तमाने घटे मुद्गरादिसहाये कपालजनके सदृशक्षणानारम्भान्मन्दमतीनां सहेतुत्वावसायो मुद्गराच्छेदात् संतानस्य न प्रतीतिबाधापि ।

[1753] २ नित्योपि स्यात् कश्चित् ।

[1754] ३ सर्व्वज्ञसत्वे तु न दोषो यतः यदुपदिश्यते तज्ज्ञानपूर्व्वं यथान्यत् उपदिश्यते च चतुरार्यसत्त्यं स ज्ञानी सर्व्ववित्

[1755] ४ लिङ्गत्वेनोपात्तानां ।

[1756] ५ ये यद्भावं प्रत्यनपेक्षास्ते तद्भावनियता यथाऽसम्भवत्प्रतिबन्धान्त्या सामग्री कार्योत्पादनेऽन्यानपेक्षश्च कृतको विनाशे इति स्वभावहेतुः ।

...3.195b असामर्थ्याच्च तद्धेतोर्भवत्येव स्वभावतः ॥ १९५ ॥

...3.196a यत्र नाम भवत्यस्मादन्यत्रापि स्वभावतः ।

'असामर्थ्याच्च तद्धेतो'र्विनश्वरस्य वा भावस्य विनाशः क्रियते नाशहेतुना । तत्र विनश्वरस्य स्वयमेव विनाशादलं नाशहेतुना । अविनश्वरस्य नाशं कर्त्तुं न कश्चित् समर्थः । च शब्दात् क्रिया[1757] प्रतिषेधः स्यात् । तथा ह्यभावो यदि पर्युदासो [357/s] भावान्तरं कपालादिकं तदा तस्य मुद्गरादिहेतुतेष्यत एव । तदुत्पादेपि घटस्य न किञ्चिदिति प्राग्वदुपलब्ध्यादिप्रसङ्गः । तस्मादभावं करोति. भावं न करोतीति स्यात् । तथा चाकर्त्तुरहेतुतैव । तस्माद् विनाशहेतोरयोगात् एव विनाशः स्वभावतः स्वहेतोर्भवति 'अस्मादि'ति[1758] भावो हेतुः । 'यत्र नाम' विनाशो 'भव'तीति मुद्गरात् कपालोत्पत्तौ लोकाभिमानस्तत्र विनाशकायोगात् स्वहेतोरेव विनश्वरस्वभावतयोत्पत्तेर्द्वितीये क्षणे न भवतीति वक्तव्यं । तस्मादहेतु[1759] त्वव्यवस्थानादन्यत्रापि यत्र विसदृशानुत्पत्त्या विनाशोत्पत्त्यभिमानो नास्ति तत्रापि 'स्वभावतः' स्वहेतोरेव विनश्यतीति विनाश एकक्षणस्थायी भावो जायते ।

तथाविधे च भावमात्रानुरोधिनि विनाशे सत्वं हेतुरव्यभिचारः कार्यस्य कारणे तदधीनत्वादित्युक्तं । तदेवाह[1760] ।

...3.196b या काचिद् भावविषयाऽनुमितिर्द्विविधैव सा ॥ १९६ ॥

...3.197a स्वसाध्ये कार्यभावाभ्यां सम्बन्धनियमात् तयोः ।

'या काचि[1761] द् भावविषयानुमितिः' सा 'द्विविधैव कार्यभावाभ्यां' हेतुभ्यां कारणव्यापकविषया भवन्ती 'तयोः' कार्यस्वभावयोः एव 'स्वसाध्ये सम्बन्धस्य नियमात् ।' अन्यस्य तु साध्येऽनापत्तेरतदात्मत्वाच्च नाव्यभिचारनियम: ।

## (२) अनुपलब्धिचिन्ता

### क. अनुपलब्धेः प्रामाण्यम्

अनुपलब्धेरप्युपलब्धिनिवृत्तिमात्रलक्षणायाः प्रामाण्यमाख्यातुमाह ।

...3.197b प्रवृत्तेर्बुद्धिपूर्वत्वात् तद्भावानुपलम्भने ॥ १९७ ॥

...3.198a प्रवर्त्तितव्यं नेत्युक्ताऽनुपलब्धेः प्रमाणता ।

सज्ञानशब्दव्यवहाराणां'प्रवृत्तेर्बुद्धिपूर्व्वकत्वात् त'स्या बुद्धे[1762] 'र्भावानुपलम्भने' कारणाभावात् प्रवर्तितव्यं नेति सामर्थ्यात् सिध्यति (।) न हि कारणाभावं कार्यं युक्तं । अतोऽनुपलब्धेरुपलब्धिनिवृत्तिरुपायाः प्रवृत्तिनिषेधे साध्ये प्रमाणतोक्ता चा र्ये ण । न पिशाचादिकं घटादिकं सदिति वक्तव्यमनुपलब्धेरिति सद्व्यवहारप्रतिषेधमात्रं साध्यते न त्वसत्त्वव्यवहारः ।

---

[1757] ६ कारकत्वं ।

[1758] १ स्वभावमात्रभावात् ।

[1759] २ हेतुनिरपेक्षत्वात् ।

[1760] ३ अत्र द्वौ वस्तुसाधनाविति प्रागुक्तमुपसंहरति ।

[1761] ४ विधि ।

[1762] ५ तस्य प्रवृत्तिविषयस्य भावस्यानुपलम्भने प्रत्यक्षानुमानाभ्यां प्रेक्षावता ।

[358/s]

यत्र तर्हि प्रत्यक्षानुमानयोः शास्त्रस्य निवृत्तिस्तस्याभाव एव साधयितुं युक्त इत्याह ।

...3.198b शास्त्राधिकारासम्बद्धा बहवोर्था अतीन्द्रियाः ॥ १९८ ॥

...3.199a अलिङ्गाश्च कथन्तेषामभावोनुपलब्धितः ।

'शास्त्राधिकारे[1763] ऽसम्बद्धा' अनेन शास्त्रविषयत्वमाह (।) 'बहवोऽर्था' अनियतकारणोपनिपातजन्याः सूक्ष्मा दुर्लक्षभेदा मनोवृत्तयो जन्मिनां । देशफलव्यवहिता वाऽनुत्पन्ना द्रव्यविशेषा 'अतीन्द्रियाः' । अनेन प्रत्यक्षाविषयतामाह । लिङ्गाद्यानुमेयतामाह । 'तेषाम'र्थानां प्रत्यक्षानुमानशास्त्रनिवृत्तिलक्षणाया 'अनुपलब्धितः कथमभावः' साधयितुं युक्तः । सत्यप्यनुपलम्भे तेषां सत्त्वसम्भवात् ।

अत ईदृश्यनुपलब्धिः ।

...3.199b सदसन्निश्चयफला नेति स्याद् वाऽप्रमाणता ॥ १९९ ॥

...3.200a प्रमाणमपि काचित् स्याद् लिङ्गातिशयभाविनी ।

'सतोऽसन्निश्चयफला नेति अप्रमाणता[1764]' वाऽस्याः स्यात् । सत्त्वप्रतिषेधे साध्ये 'काचित्' त्वनुपलब्धिर्लिङ्गजा प्रतीतिरस्मिन्नेव[1765] साध्ये 'प्रमाणमपि स्याल्लिङ्गाति[71a/MA]शयभाविनी' लिङ्गविशेषप्रभवा । यथोक्तं प्राग्घेतुभेदव्यपेक्षयेति (।) उपलब्धिलक्षणप्राप्तानुपलब्धिलिङ्गजेत्यर्थः ।

...3.200b स्वभावज्ञापकाज्ञानस्यायं न्याय उदाहृतः ॥ २०० ॥

यत् पुनरुक्तमप्रमाणमनुपलब्धिरिति ।[1766] यस्य कस्यचित् 'स्वभा'वस्य ज्ञापकस्य[1767] लिङ्गस्य चा'ज्ञानस्या'नुपलब्धे[1768] 'रयं न्याय उदाहृतः' । न हि स्वभावो नोपलभ्यत[1769] इत्येव नास्ति । देशकालस्वभावविप्रकृष्टानामदर्शनेपि सत्त्वाविरोधात् । ततो [359/s] नास्ति विरक्त[1770] चेत इत्याद्य[1771] युक्तं (।) न च कारणमित्येव कार्याण्यव्यवधानतो भवन्ति (।) ततो नास्ति दानहिंसाविरतिचेतनानामभ्युदयहेतुता 'फलानन्तर्या'भावादित्ययुक्तं[1772] । (२००)

...3.201a कार्ये तु कारकाज्ञानमभावस्यैव साधकम् ।

---

[1763] १ शास्त्राधिकारो यत्र प्रकरणे तत्रान्तरीयकाः ।

[1764] २ सन्निश्चयफला न सद्व्यवहारनिमित्ताभावात् । नाप्यसन्निश्चयफला सन्देहात् । इति हेतोः स्याद्वाऽस्या अप्रमाणता । निश्चयफलं हि प्रमाणं ।

[1765] ३ शास्त्रं हि पुरुषार्थमधिवृत्तं तत्र च न सर्वमधिकृतं पुरुषचेतोवृत्तीनां प्रत्येकमानन्त्येनाशक्यवचनत्वादनियतान्निमित्ताद् भवनशीलत्वाच्च बहुत्वं । देशादिविप्रकृष्टाः पुरुषानुपयोगिनो न निर्देश्याः । लिङ्गस्यानुपलब्धेरतिशये उपलब्धिलक्षणप्राप्तत्वं तद्भावो यत्रास्ति ।

[1766] ४ भस्मविशेषेण किन्तु पिशाचादेः ।

[1767] ५ स्वभावज्ञापकयोरज्ञानं तस्य ।

[1768] ६ अदृश्यविषयायाः ।

[1769] ७ स्वभावाज्ञानेन प्रत्यक्षनिवृत्तिरुक्ता ।

[1770] १ अनुमानिवृत्तिरुक्ता लिङ्गाज्ञानेन ।

[1771] २ हिंसाविरतिचेतनादेर्नाभ्युदयहेतुतादि ।

[1772] ३ मूषिकादिविषविकारवद् व्यवहितं फलं स्यात् ।

कारकाज्ञान[1773] न्तु कार्येऽभावस्यैव साधकं (।) न ह्यसति कारणे कार्यसंभवः[1774] ॥

...3.201b स्वभावानुपलम्भश्च स्वभावेर्थस्य लिङ्गिनि ॥ २०१ ॥

...3.202a तदभावः प्रतीयेत हेतुना यदि केनचित् ॥

तथा'र्थस्य' व्यापकतया निश्चितस्य 'स्वभावस्यानुपलम्भश्च स्वभावे' व्याप्ये लिङ्गिन्यसत्तया साध्ये साधनंतदा च कारणव्यापकानुपलब्धी गमिके 'यदि केन' चिद्धेतुनोपलब्धिलक्षणप्राप्तानुपलम्भेनान्येन वा तयोः कारणव्यापकयोरभावः प्रतीयते (।) न तूपलम्भाभावमात्रेण सन्दिग्धासिद्धत्वात् ।

## ख. स्वभावानुपलब्धिः

स्वभावानुपलम्भमाह ।

...3.202b दृश्यस्य दर्शनाभावकारणाऽसम्भवे सति ॥ २०२ ॥

...3.203a भावस्यानुपलम्भस्य भावाभावः प्रतीयते ।

'दृश्यस्य' वस्तुनो 'दर्शनाभाव'स्य यत् 'कारणं' व्यवधानेन्द्रियवैकल्यादि तस्या'सम्भवे' सति 'भावस्या'नुपलब्धस्य 'भाव' (='सत्ता')'ाभावः' स्वभावानुपलब्धेः 'प्रतीयते' ॥

## ग. अनुपलब्धिरेवाभावः

...3.203b विरुद्धस्य च भावस्य भावे तद्भावबाधनात् ॥ २०३ ॥

...3.204a तद्विरुद्धोपलब्धौ स्यादसत्ताया विनिश्चयः ।

[360/s]

'विरुद्धस्य'[1775] निवर्त्तकस्य वह्न्यादे'र्भावस्य भावे त'स्य 'श'(?स)लिलादेर्निवर्त्यस्य 'भावबाधनात् । तद्विरुद्धोपलब्धौ' सत्याम'सत्ता[1776] या विनिश्चयः' स्यात् ।

नन्वनुपलब्धेरभावसाधने को दृष्टान्तः । व्योमकुसुमादिरिति चेत् । अत्रापि यद्यनुपलब्धेरभावसिद्धिस्तदा दृष्टान्तान्तरापेक्षायामनवस्थाप्रसङ्गः । तदनपेक्षायातदनुपलब्धिरभावाख्यं प्रमाणमस्तु ।

---

[1773] ४ कारणानुपलम्भः साध्येऽनुपलब्धिर्या दृश्योपि ।

[1774] ५ यदि कथञ्चित् कारणाभावः सिध्येत् तदा कार्याभावः साध्यः यथा नात्र धूमोनग्नेः ।

[1775] १ यदभावः साध्यस्तद्विरुद्धस्यानयोरुपादानयोरन्योन्यवैगुण्यस्याश्रयत्वेनारम्भविरोधात् ।

[1776] २ प्रतिषेध्यस्य ।

असम्बद्धमेतत् । न ह्यभावोऽनुपलब्ध्या साध्यते । अनुपलब्धि[1777] रेव ह्यभावः स च सिद्ध एव । तथापि तु मूढः[1778] तमव्यवहरन् निमित्तो[1779] पदर्शनेन व्यवहार्यते[1780] । तथा च भावो[1781] ऽभावस्य दृष्टान्तः[1782] । तयोः स्वनैमित्तिक[1783] प्रवर्त्तनस्य सिद्धत्वात् ।
ननु यदिदं[1784] न सन्ति प्रधानादयोऽनुपलब्धेरिति तत्र कथमसद्व्यवहारविधिः सद्व्यवहारप्रतिषेधो वा । प्रधानादिशब्दवाच्यस्य प्रतिषेधे त[1785] च्छब्दाप्रयोगात्[1786] ।
अत्राह ।

...3.204b अनादिवासनोद्भूतविकल्पपरिनिष्ठितः ॥ २०४ ॥

...3.205a शब्दार्थस्त्रिविधो धर्मो भावाभावोभयाश्रयः ।

'अनादिवि'कल्पाभ्यास'वासनाया उद्भूतविकल्पे परिनिष्ठितः' प्रतिभासमानः शब्दार्थो धर्मो त्रिविधः । कथ[1787] मित्याह (।) 'भावाभावोभयाश्रयः' । सदसदुभय[361/s] विकल्पवासनाप्रभवत्वात् । तदध्यवसायेन तद्विषयत्वात् । 'तत्र भावोपादानो' विकल्पः पटादिरभावोपादानः शशवि'शा' (?षा) णादिः । 'उभयोपादानः प्रधाने'श्वरादिः ।

...3.205b तस्मिन् भावानुपादाने साध्येऽस्यानुपलम्भनम् ॥ २०५ ॥

...3.206a तथा हेतुर्न तस्यैवाभावः शब्दप्रयोगतः ।

'तस्मिन्' शब्दार्थे प्रधानादौ 'भावानुपादाने' भावभूतप्रधानाश्रये 'साध्ये'ऽस्य[71b/MA] प्रधाना[1788] दे'स्तथा' (बाह्य) भावाश्रयत्वेना'नुपलम्भनं हेतु[1789]'र्व्यवहारसाधनः । न तु 'तस्य'[1790] शब्दार्थस्यैवाभावः प्रधानादि'शब्द'स्य तत्प्रतिपादकस्य 'प्रयोगतः'[1791] ॥
यदि तु वस्त्वेव शब्दविषयस्तदा (।)

...3.206b परमार्थैकतानत्वे शब्दानामनिबन्धना ॥ २०६ ॥

...3.207a न स्यात् प्रवृत्तिरर्थेषु दर्शनान्तरभेदिषु ।

[1777] ३ उपलब्धिलक्षणप्राप्तस्य ।
[1778] ४ अभावतत्स्वभावानुपलब्धावभावव्यवहार एव साध्यते ।
[1779] ५ अनुपलम्भेन ।
[1780] ६ व्यवहारं ।
[1781] ७ निरुपाख्योपि ।
[1782] ८ यथा दृश्यः सन् दृश्यते तथा दृश्योऽसन्ननुपलब्धेः ।
[1783] ९ उपलब्ध्यनुपलब्ध्योर्भावाभावव्यवहारप्रवर्त्तनस्य । यस्य यत्र निमित्तं सकलमप्रतिबद्धमस्ति तत्र तेन भवितव्यं यथाऽङ्कुरादि । अस्ति चोपलब्धिलक्षणप्राप्तस्यानुपलब्धावसद्व्यवहारनिमित्तमिति स्वभावहेतुः अनुपलब्धिः ।
[1784] १० (दिग्) नागादिनोक्तं ।
[1785] ११ वाच्यम्विना वाचकाप्रयोगात् प्रधानं ।
[1786] १२ प्रधानशब्दाप्रयोगे प्रतिषेधोपि प्रतिषेध्याकीर्त्तनान्निर्विषयस्याप्रयोगादयुक्त इति चोदकाशयः ।
[1787] १३ कथं भावाश्रयोर्थजन्यत्वेनाविकल्पत्वप्रसङ्गात् कथमभावाश्रयस्तस्याकारणत्वात् । उभयेऽहेतुकत्वात् त्यक्तः ।
[1788] १ बुद्धिवर्त्तिनो धर्मिणः ।
[1789] २ प्रधानादिविकल्पप्रतिभासस्य बाह्योपादानत्वानुपलम्भोस्तीति नापक्षधर्मः ।
[1790] ३ विकल्पस्थस्य ॥
[1791] ४ यदि स्वलक्षणमभिधेयं स्यात् तदा तत्प्रतिषेधेऽनर्थकस्य शब्दस्याप्रयोगः स्यात् न चैतत् ।

‘परमार्थै[1792] कतानत्वे’ परमार्थैकपर(वृत्ति)त्वे ‘शब्दानामर्थेषु दर्शनान्तरभेदिषु’ प्रतिदर्शनं भिन्नाभ्युप[1793] गमेन नित्यत्वानित्यत्वत्रिगुणीमयत्वादिकल्पि‘तभेदेषु अनिबन्धना’ परमार्थनिबन्धनरहिता ‘प्रवृत्तिर्न स्यात्’ । न हि परस्परविरुद्धा बहवो धर्मा एकत्र सन्ति ।

...3.207b अतीताजातयोर्वापि न च स्यादनृतार्थता ॥ २०७ ॥

...3.208a वाचः कस्याश्चिदित्येषा बौद्धार्थविषया मता ।

‘अतीताजातयोर्व्वप्यसतोर्न’ स्याच्छब्दवृत्तिः । ‘न च कस्याश्चिद् वाचोऽनृतार्थता स्यात्’ । अर्थमन्तरेण शब्दाभावात् । यस्मादेते दोषा वस्तुविषयत्वे वाच इति तस्मादेषा ‘बौद्धा[1794] र्थविषया’ कल्पि[1795] तार्थगोचरा मता ।

यश्च शब्दार्थः तस्य भावानुपादानत्वं साध्यते न तु स एव निषिध्यतेऽन्यथा (।)

...3.208b शब्दार्थापह्नवे साध्ये धर्माधारनिराकृतेः ॥ २०८ ॥

...3.209a न साध्यः समुदायः स्यात् सिद्धो धर्मश्च केवलः ।

[362/s]

‘शब्दार्थस्यापह्नवे साध्ये धर्माधार’[1796] स्य धर्मिणो[1797] ‘निराकृतेः समुदायः साध्यो न स्यात्’ । धर्मिधर्मसमुदायश्चानुमेयः । धर्म एव केवलः साध्यते इति चेत् ‘सिद्धो[1798] धर्मश्चा’भावादिः ‘केवलः’ (।) किमर्थं साधनीयः प्रधानादिविकल्पस्य भावानुपादानत्वं तु न सिद्धं तदेव साध्यं युक्तं ।

किञ्च[1799] (।)

...3.209b सदसत्पक्षभेदेन शब्दार्थानपवादिभिः ॥ २०९ ॥

...3.210a वस्त्वेव चिन्त्यते ह्यत्र प्रतिबद्धः फलोदयः ।

‘सदसत्पक्षभेदेन वस्त्वेव’ व्यवहारिभिः शब्दार्थानपवादिभिः चिन्त्यते नावस्तु । हि यस्माद् ‘अत्र’ वस्तुनि ‘फल’स्यार्थक्रियाया ‘उदयः प्रतिबद्धः’ ।

ततश्च (।)

...3.210b अर्थक्रियाऽसमर्थस्य विचारैः किं तदर्थिनाम् ॥ २१० ॥

...3.211a षण्ढस्य रूपे वैरूप्ये कामिन्या किं परीक्षया ।

‘अर्थक्रियायामसमर्थस्य’ शब्दार्थादे‘र्व्विचारैः’ सदसत्पक्षचिन्ताभि‘स्तदर्थिना’मर्थक्रियार्थिनां ‘किं’ न किञ्चित् प्रयोजनं[1800] (।) ‘षण्ढस्य’ नपुन्सकस्य ‘रूपे वैरूप्ये’ वा कामिन्या वृषस्यन्त्या योषितः ‘किं परीक्षया’ ।[1801]

---

[1792] ५ स्वलक्ष (त्वे)
[1793] ६ सिद्धान्त (त्वे) ।
[1794] ७ वाक् ।
[1795] ८ विकल्पभासी ।
[1796] १ नास्तित्वं साध्यो धर्मः सिद्धान्ती ।
[1797] २ प्रधानादिशब्दार्थस्य ।
[1798] ३ नास्तित्वमात्रस्य क्वचित् सिद्धत्वात् ।
[1799] ४ प्रतिज्ञा ।
[1800] ५ दृष्टान्तमाह ।
[1801] ६ उ द्यो त क रा द्युक्तदोषनिरासाय पृच्छति नागेन (? दिग्नागः ) ।

### घ. कल्पितस्यानुपलब्धिर्धर्मः

यत् पुनराचार्येणोक्तं कल्पितस्यानुपलब्धिर्द्धर्म्मं इति तस्य कोर्थः ।[1802]

...3.211b शब्दार्थः कल्पनाज्ञानविषयत्वेन कल्पितः ॥ २११ ॥

...3.212a धर्मो वस्त्वाश्रयाऽसिद्धिरस्योक्ता न्यायवादिना ।

'कल्पनाज्ञान'स्य 'विषयत्वेन कल्पित' इष्टः प्रधानादि'शब्दार्थः । अस्य[1803]' कल्पितस्य 'वस्त्वा[1804]श्रयाऽसिद्धि'र्वस्त्वाधिष्ठानत्वानुपलब्धि'र्द्धर्मो न्यायवादिना'चार्येणोक्ता ।

## 3.4 ४. आगमचिन्ता

[363/s]ननु यदुक्तं (।) प्रमाणत्रय[1805] निवृत्तावपि नार्थाभावनिश्चय इति तन्मा 'भूत्' प्रत्यक्षानुमानयोरसर्व्वविषयत्वात् तन्निवृत्त्या (ऽ) भावनिश्चयः । आगमस्तु सर्व्वविषय इति तन्निवृत्तौ युक्तोऽर्थासत्त्वनिश्चय इत्याह[1806] ।

...3.212b नान्तरीयकताऽभावाच्छब्दानां वस्तुभिस्सह ॥ २१२ ॥

...3.213a नार्थसिद्धिस्ततस्ते हि वक्त्त्वभिप्रायसूचकाः ॥

'नान्तरीयकता'या अविनाभावस्या'भावाद् वस्तुभिः सह शब्दानां । ततः' शब्देभ्यो 'नार्थस्य सिद्धि'र्निश्चयः । किन्तर्हि तेभ्यो गम्यत इत्याह[1807] । 'वक्तुरभिप्रायस्य' विवक्षाया'स्ते' शब्दाः 'सूचका'स्तदन्वयव्यतिरेकानुविधायित्वात् । न च विवक्षा यथार्थं भवति[1808] येन परंपरया तत्सम्वादः स्यात् । विसम्वादाभिप्रायादज्ञानाद् वाऽन्यथापि विवक्षासम्भवात् ।
[72a/MA]

...3.213b आप्तवादाविसंवादसामान्यादनुमानता ॥ २१३ ॥

यद्येवं सर्व्वमेव वचनं प्रवृत्तिकामानां परीक्षार्हं स्यात् । कश्च सम्वादार्थः कथञ्चाप्तवादसामान्यादनुमानतास्या चा र्ये णोक्तेत्याह ।[1809]

---

[1802] ७ उत्तरमाह ।

[1803] ८ प्रधानादिशब्दार्थस्य ।

[1804] ९ वस्तुनो बाह्यस्य प्रधानस्याश्रयणं तेनासिद्धिरनुपलब्धिर्द्धर्म उक्तो लिङ्गभूतो भावानुपादानत्वे साध्ये प्रमाणेन चेत् सत्त्वं प्रधानस्य । नानुपलब्धिः धर्मः । असत्त्वेप्यसत्त्वादिति परोक्तमपास्तमनेन शब्दार्थस्यैव कल्पितत्वात् ।

[1805] १ आगमेन सह ।

[1806] २ सिद्धान्ती ।

[1807] ३ ...शास्त्राधिकार ?? इत्यत्र नागमे सर्व्वार्थनिबन्धनमुक्तं यत् तद् बाह्यार्थे यद्यपि घटविवक्षातः पटशब्दस्योत्पत्तिस्तथापि स्थानकरणाभिधातादेरेव साक्षात्कारणादुत्पत्तेर्व्यभिचाराभावान्नाहेतुकत्वं ।

[1808] ४ आगमप्रामाण्यमभ्युपगम्यात्र तु नैव बाह्यार्थेऽस्य प्रामाण्यमित्युक्तम् ।

[1809] ५ यो य आप्तवादः सोऽविसंवादी यथा क्षणिकाः सर्व्वसंस्कार इत्यादिकः । आप्तवादश्चायमत्यन्तपरोक्षेप्यर्थे इत्यविसम्वादसामान्यादागमस्य बाह्येर्थे (दिग्)नागेनानुमानमुक्तमित्यभ्युपेतबाधामाह । उच्यते न पुरुषोऽनाश्रित्यागमप्रामाण्यमसितुं समर्थः । प्रत्यक्षफलाया हिंसादिविरतेः स्वर्गादिश्रुतेरविरतेर्नकादिश्रुतेः । तद्भावे विरोधाभावच्च । तत् सति प्रवर्त्तितव्ये वरमेवं प्रवृत्त इति परीक्षया प्रामाण्यमाह (।) तच्च शास्त्रं न सर्व्वमधिकृतं किन्तु ।

....3.214 सम्बद्धानुगुणोपायं पुरुषार्थाभिधायकम् ।
परीक्षाधिकृतं वाक्यमतोनधिकृतम्परम् ॥ २१४ ॥

'सम्बद्ध'वाक्यानां परस्पराभिसम्बद्धानामेकार्थोपसंहारात् (।) न च दशदाडिमादिवाक्यमिवैकार्थानभिधायि । 'अनुगुणोणायं' शक्यानुष्ठानोपेयसाधनं न तु [364/s] विषशमनतक्षकफणारत्नालङ्कारोपदेशकमिव 'पुरुषार्थस्य' स्वर्गापवर्गस्या'भिधायकं' न तु काकदन्त'परीक्षो'पदेशकमिव परीक्षायां प्रवृत्त्यर्हविषयम'धिकृतं वाक्यं । अतोऽपरमनधिकृतम'नवधानार्हत्वात् ।

....3.215 प्रत्यक्षेणानुमानेन द्विविधेनाप्यबाधनम् ।
दृष्टादृष्टार्थयोरस्याविसंवादः तदर्थयोः ॥ २१५ ॥

अस्य च परीक्षार्हस्य वाक्यस्याविसम्वादः 'तदर्थयो'[1810] रागमाभिधेययो'र्दृष्टादृष्टयोः'प्रत्यक्षाप्रत्यक्ष[1811] योरर्थयोः 'प्रत्यक्षेणानुमानेन' च 'द्विविधेने'ति वस्तुबलभाविनाऽगमाश्रयेण चा'बाधन'मन्येषाञ्च बाधनं नाम । यथा प्रत्यक्षत्वेन सम्मतानां पञ्चानां स्कन्धानां प्रत्यक्षेणाबाधनं सिद्धिरेव अप्रत्यक्षत्वेनेष्टानां शब्दादि[1812] त्रिगुणमयत्वद्रव्यकर्मसामान्यसंयोगादीनाञ्च तेन बाधनं[1813] । अनुमेयत्वेनेष्टानां चतुरार्यसत्यानां वस्तुबलप्रवृत्ते[1814] नानुमानेनाबाधनं सिद्धिरेव । अननुमेयत्वेनेष्टानाञ्चात्मेश्वरादीनामनुमानेन[1815] बाध एव । अत्यन्तपरोक्षाणां रागादिहेतुकाऽधर्मप्रहाणादीनामागमाश्रयानुमानेनाबाधनं सिद्धिरेवं[1816] रागादिहेतुत्वेनेष्टस्य हेतुत्वानुपरोधिनः स्नानोवासाग्निहोत्रादेः प्रहाणोपायतयाऽनुपदेशात् हेतुव्याघातस्योपायत्वेनोपदेशाच्चैवं विधमबाधनम'विसम्वाद' इष्टः ।

....3.216 आप्तवादाविसंवादसामान्यादनुमानता ।
बुद्धेरगत्याऽभिहिता निषिद्धाप्यस्य गोचरे ॥ २१६ ॥

तस्यैवं भूतस्या'प्तवाद'स्यादृष्टव्यभिचारस्या'विसम्वादसामान्यात्'[1817] प्रत्यक्षानुमानागम्येप्यर्थे उत्पन्नाया 'बुद्धे'रविसम्वादा'दनुमानता' चा चार्य दि ग्ना गे ना'भिहिता'[365/s] 'गत्या' । अत्यन्तपरोक्षेष्वर्थेषु दानहिंसाचेतनादिष्वर्थानर्थश्रवणादागमप्रामाण्यमनाश्रित्य स्थातुमसामर्थ्यादितद्भावे विरोधाभावाच्च सत्यां प्रवृत्तौ[1818] वरमेवं प्रवृत्तिरित्यगत्या[1819] ऽनुमानतोक्ता । न तु वस्तुतो वचनानामर्थेषु नान्तरीयकत्वाभावात् । (२१६)
किम्वा[1820] (।)

....3.217 हेयोपादेयतत्त्वस्य सोपायस्य प्रसिद्धितः ।

---

1810 १ गुणत्रययुक्तश्च यद्यविसंवादि तदा प्रवर्तित्तव्यमित्यविसम्वादमाह ।

1811 २ प्रत्यक्षानुमानविषययोः ।

1812 ३ सां ख्ये शब्दादिस्वभावानां सुखदुःखमोहानां प्रत्यक्षेणाप्रतीतेः । वैशेषिकादेर्द्रव्यमाकाशादि । अनेकद्रव्यञ्च द्रव्यमवयवी । कर्मोत्क्षेपणादि । सामान्यं सत्ता गोत्वादि । आदिना विभागादि ।

1813 ४ नीलादिव्यतिरेकेणानुपलब्धेः ।

1814 ५ आगमापेक्षेण ।

1815 ६ लिङ्गाभावान्नानुमेयता ।

1816 ७ रागद्वेषादिस्वभावमधर्मन्तदुत्थं कायकर्मादि चाधर्ममभ्युपेत्य स्नानाद्यनुक्तेः ।

1817 ८ शक्यपरिच्छेदेऽविसम्वादवत्परोक्षेप्याप्तवादाल्लिङ्गादुत्पन्नायाः सम्वादबुद्धेरनुमानता ।

1818 १ न तु प्रमाणगम्य एवार्थे विसंवादकात् ।

1819 २ अतोन्यथापरोक्षे प्रवृत्त्यसंभवात् ।

1820 ३ अथवा ।

प्रधानार्थाविसम्वादादनुमानम्परत्र वा ॥ २१७ ॥

'हेय'स्य दुःखसत्यस्य 'उपादे'यस्य निरोधसत्यस्य[1821] 'सोपायस्य' यथाक्रमं समुदयसत्यस्य समार्गसत्यस्य चागमोक्तवस्तुबलप्रवृत्तेनानुमाने 'प्रसिद्धितो' निश्चयात् । सत्यचतुष्टयाधिगमस्य निर्व्वाणहेतुत्वेन 'प्रधानार्थ'स्या'विसम्वादात्' । 'परत्रा'त्यन्तपरोक्षेप्यर्थे भग वद्वचनादुत्पन्नं ज्ञानम'नुमानं' युक्तमिति वा पक्षान्तरं । (२१७)

....3.218 पुरुषातिशयापेक्षं यथार्थमपरे विदुः ।
इष्टोयमर्थः प्रत्येतुं शक्यः सोतिशयो यदि ॥ २१८ ॥

'अपरे' नै या यि का दयः 'पुरुष'स्या'तिशयापेक्षं' यथाभूतार्थदर्शि तदाख्यात् पुरुषप्रणीतं वचनं 'यथार्थं' सत्यार्थं प्रतिजानीयुः (।)

सिद्धान्तमाह (।) पुरुषातिशयप्रणीतं वचनम प्रमाणमिती'ष्टोऽयमर्थो यदि' पुरुषाणा- 'सोतिश'यो ज्ञातुं शक्यः स्यात् ।

## (१) पौरुषेयत्वे

### क. पुरुषातिशयप्रणीतं वचनं प्रमाणम्

किन्तु (।)

....3.219 अयमेवं न वेत्यन्यदोषानिर्दोषतापि वा ।
दुर्लभत्वात् प्रमाणानां दुर्बोधेत्यपरे विदुः ॥ २१९ ॥

'अयं' पुमा'नेवं'दोषवान् 'न वा' निर्दोष इत्यन्यस्य 'दोषा निर्दोषतापि वा प्रमाणाना-[1822] दुर्लभत्वाद् दुर्बोधे[1823] त्यपरे' सौ ग ता 'विदुः' । दुर्ब्बोधेत्यन्यदोषा इत्यनेन[72b/MA] लिङ्ग[1824] वचनविपरिणामेन सम्बन्धनीयं ।

[366/s]तत्किमशक्योच्छेदा दोषा नेत्याह ।

....3.220 सर्व्वेषां सविपक्षत्वान्निर्ह्रासातिशयं श्रितः ।
सात्मीभावात् तदभ्यासाद् हीयेरन्नास्रवाः क्वचित् ॥ २२० ॥

'सर्व्वेषा'मास्रवाणां रागादीनांप्रतिपक्षसंमुखीभावाभावयोर्न्निर्ह्रासातिशयावुपचयापचयौ श्रयन्त इति 'निर्ह्रासातिशयं श्रित'स्तेषां 'सविपक्षत्वात्' प्रतिपक्ष[1825] सम्भवात् तस्य प्रतिपक्षस्या'भ्यासात् सात्मीभावादास्रवा' क्व1चिच्चित्तसन्ताने 'हीयेरन्नि'ति खलु निर्दोषपुरुषापलापः क्रियते किन्तु तदवधारणोपायो नास्तीत्युच्यते । इच्छाधीनस्य व्याहारस्यान्यथापि कर्त्तुं शक्यत्वात् । न ततस्तथार्थनिश्चयः ।

अथ सात्मीयभूतप्रतिपक्षस्य मार्गाभ्यासान्निर्दोषतायामपि सत्यां विपक्षाभ्यासात् पुनर्दोषोत्पत्तिरित्याह ।

....3.221 निरुपद्रवभूतार्थस्वभावस्य विपर्ययैः ।
न बाधा यत्नवत्वेऽपि बुद्धेस्तत्पक्षपाततः ॥ २२१ ॥

[1821] ४ तत्त्वमविपरीतं रूपं ।
[1822] ५ अन्यगुणदोषनिश्चायकानां ।
[1823] ६ चैतसानामतीन्द्रियत्वात् नापि रागाद्यनुमेयाः कायवचसां प्रतिसंख्ययान्यथात्वस्य शक्यत्वात् ।
[1824] ७ पुल्लिङ्गबहुवचनं कृत्वा ।
[1825] १ नैरात्म्यस्य ।

'निरुपद्रव'स्य दोषराशेरुद्वेजकस्य प्रहाणात् । 'भूतार्थ'स्य प्रमाणपरिदृष्टा[1826] र्थविषयत्वात् । 'स्व[1827] भाव'स्यानारोपितत्वात् (।) मार्गसात्म्यस्य विपक्षेण 'न बाधा यत्नवत्वेपि' । यत्न एव तावन्न सम्भवति विपक्षाभ्यासे दोषदर्शनात् । 'यत्नवत्वेपि' तु 'बुद्धेस्तत्र' मार्गसात्म्येऽभिरुचिविषयत्वेन 'पक्षपाततो[1828] न बाधा' । न हि रज्वां निवृत्तसर्प्पभ्रमः सर्प्पं भावयितुं यतते कश्चित् (।) भूतार्थस्य दर्शनात् ।

ख. सत्कायदर्शनं दोषकारणम्

कः पुनर्दोषाणां हेतुर्यत्प्रहाणादमी प्रहीयन्त इत्या3ह ।

...3.222a सर्व्वासां दोषजातीनां जातिः सत्कायदर्शनात् ।

'सर्व्वासां दोषजातीनां' दोषप्रकाराणां 'जाति'र्जन्म 'सत्कायदर्शनादा'त्माभिनिवेशात् ।

नन्वविद्याहेतुकाः क्लेशा भ ग व तो क्तो इत्याह ।

...3.222b साऽविद्या तत्र तत्स्नेहस्तस्माद् द्वेषादिसम्भवः ॥ २२२ ॥

[367/s]

'साऽविद्या' सत्कायदर्शनमेवाविद्याऽन्यत्रोच्यत इति नास्ति विरोधः । 'तत्र' सत्कायदर्शने सति तेष्वात्मीयेषु 'स्नेहस्तस्मा'दात्मीयेषु स्नेहात् तदपकारिषु 'द्वेषादी'नां 'सम्भव' इति दोषोत्पत्तिक्रमः । अतो नैरात्म्यदर्शनं मार्गो युक्तः सत्कायदृष्टिप्रतिपक्षत्वात् ।

यतश्च सत्त्वदृष्टिरविद्या ।

...3.223a मोहो निदानं दोषाणां अत्र एवाभिधीयते ।
सत्कायदृष्टिरन्यत्र;

'अत एव मोहो'ऽविद्या 'दोषाणां निदानमभिधीयते' । भगवताऽविद्या हेतुकाः सर्वे क्लेशा इति पुनरन्यत्र प्रदेशे सत्कायदृष्टिर्दोषनिदानम 'भिधीयते' ।

नन्वन्येपीन्द्रियविषया योनिशोमनस्कारादयो दोषहेतवस्तत्किमविद्यासत्कायदृष्टी एवाभिहिते इत्याह ।

...3.223b तत्प्रहाणे प्रहाणतः ॥ २२३ ॥

तस्य मोहस्य 'सत्कायदृष्टि'लक्षणस्य 'प्रहाणे' दोषाणां 'प्रहाणतः' प्राधान्यात् स एवोक्तो नेतर इत्यर्थः ॥ (२२३)

## 3.5 ५. अपौरुषेयत्वे

(१) वेदप्रामाण्यनिरासः

वेदप्रमाण्यं निराचिकीर्षन् परमतमुत्थापयति ।

[1826] २ भूतार्थत्वादेव मार्गश्चित्तस्य स्वभाव उक्तः ।
[1827] ३ दोषप्रतिपक्षस्य विपर्ययैः सो यत्राभूतार्था स्वभावैर्दोषैः न बाधार्थः श्रोत्रियः सन् कापालिको भवति तस्य पूर्व्वा घृणा यथाऽयत्नमशक्यनिवर्त्त्या तद्वत् ।
[1828] ४ बहुमानतः ।

....3.224 गिराम्मिथ्यात्वहेतूनां दोषाणां पुरुषाश्रयात् ।
अपौरुषेयं सत्यार्थमिति केचित् प्रचक्षते ॥ २२४ ॥

'गिरां' वाचां 'मिथ्यात्वं'[1829] स्य 'हेतूनां दोषाणाम'ज्ञानविसम्वादाभिप्रायादीनां वा- 'पुरुष'स्या'श्रया'दाश्रयणत्वात् 'अपौरुषेयं' वाक्यं मिथ्यात्वहेतोः पुरुषदोषस्याभावात् 'सत्यार्थमिति केचित्' जै मि नी याः 'प्रचक्षते' ॥ (२२४)

[368/s]

....3.225 गिरां सत्यत्वहेतूनां गुणानां पुरुषाश्रयात् ।
अपौरुषेयं मिथ्यार्थं किं नेत्यन्ये प्रचक्षते ॥ २२५ ॥

तानेव[1830] प्रति गिरां 'सत्यत्वस्य हेतूनां[1831]' दयाधर्मपरत्वादीनां 'गुणानां पुरुष'स्या- 'श्रयादपौरुषेयं' वाक्यं सत्यता[1832] हेतोः पुरुषगुणस्याभावात् 'मिथ्यार्थं किं न' भवतीत्यन्ये सौ ग ताः प्रचक्षते ॥ (२२५)

किञ्च (।)

....3.226 अर्थज्ञापनहेतुर्हि सङ्केतः पुरुषाश्रयः ।
गिरामपौरुषेयत्वेप्यतो मिथ्यात्वसम्भवः ॥ २२६ ॥

सङ्केतमन्तरेणापौरुषे[1833] यादपि वाक्यादर्थप्रतीतेरभावात् । 'अर्थज्ञापनहेतु'रिह'सङ्केतः' स्वीकर्तव्यः । स च पुरुषकृतत्वात् 'पुरुषाश्रयः । अतः' संकेतस्य[73a/MA] पुरुषाश्रयत्वात् 'गिरामपौरुषेयत्वेपि मिथ्यात्वस्य सम्भवः' । संकेतवशेन वाचोऽर्थं ब्रुवते । स च दोषाश्रयेण पुरुषेण क्रियत इति तासां न विसंवादशङ्कानिरासः । पौरुषेयवाक्यवदिति व्यर्थमपौरुषेयत्वकल्पनं । (२२६)

## क. अपौरुषेयत्वेप्यप्रामाण्यम्

अथ शब्दार्थ[1834] योः सम्बन्धो न पौरुषेयः किन्तु स्वाभाविकः ततो न मिथ्यात्वसम्भवः । तदा (।)

...3.227a सम्बन्धापौरुषेयत्वे स्यात् प्रतीतिरसंविदः ।

---

[1829] १ मृष (ा)र्थत्वस्य ये हेतवो दोषा रागादयस्तेषां वाचश्च पुरुष आश्रयस्तैः पुरुषस्य परिगृहीतत्वादप्रमाणत्वं (।) द्विधा शब्दार्थो निसर्गसिद्धो वेदादौ औपाधिकः पुरुषाधीनोन्यत्र । न मिथ्यात्वं वेदे पुरुषनिवृत्तेः । न संशयोऽप्रतिभासात् । नाज्ञानं वेदादर्थगतेः (।) पुरुषकारणाभावान्मिथ्यात्वकार्याभावसिद्धिः ।

[1830] १ मी मां स कानेव शास्त्रकारः परमुखेनाह ।

[1831] २ दयादीनां ।

[1832] ३ पुरुषनिवृत्त्या सत्त्वकारणनिवृत्तेः कार्यस्यापि सत्त्वस्य निवृत्तितः शब्दे सत्यत्वमिथ्यात्वयोः पुरुषायत्तत्वात् पुरुषनिवृत्तौ सत्त्यवन्मिथ्यात्वं च स्यात् ।

[1833] ४ वस्तुतः पुंनिवृत्त्या सत्त्यमिथ्यार्थत्वनिवृत्तेरानर्थक्यादनुत्पत्तिलक्षणमानर्थक्यं सङ्केतकाभावात् स्वभावतोर्थबोधानुपपत्तिः ।

[1834] ५ शब्दार्थानादितेव सम्बन्धोनादिः (।) स च त्रिप्रमाणकः श्रोतुर्ब्बाधाये केन शब्दे प्रयुक्ते पार्श्वस्थः प्रयोक्तारं वाच्यं वाचकञ्च बुध्यतेऽध्यक्षेण । श्रोतुश्च प्रतिपन्नत्वं प्रवृत्तिलिङ्गानुमानेन । अर्थप्रतिपत्त्यन्यथानुपपत्त्या च शब्दार्थाश्रितां वाच्यवाचकशक्तिमवगच्छत्यर्थापत्त्येति त्रीणि प्रमाणानि सम्बन्धस्य बोधे ।

'सम्बन्धापौरुषेयत्वे'पीष्यमाणे1 'स्याद'र्थानां 'प्रतीतिरसंविदो'ऽविद्यमानसङ्केतप्रतीतेः पुंसः । न चेच्छब्दार्थयोः सांकेतिको वाच्यवाचकतासम्बन्धः किन्तु स्वाभाविकः । तदाऽगृहीतश्च (?स) ङ्केतोपि श्रुताच्छब्दादर्थं प्रतिपद्येतेति ।
[p369/s]

अथ संकेतात् सतोपि तस्य सम्बन्धस्याभिव्यक्ति (ः) प्रदीपादिवद् घटादेरतो नागृहीतव्यञ्जकस्य व्यङ्ग्यप्रतीतिः । तदा (।)

...3.227b संकेतात् तदभिव्यक्तावसमर्थान्यकल्पना ॥ २२७ ॥

'संङ्केतात् त'स्य सम्बन्धस्या'भिव्यक्ता'विष्यमा[1835] णायां संकेता'दन्य'स्य सम्बन्धस्य 'कल्पनाऽसमर्था' सम्बन्धव्यवस्थापनाय । संकेतादेव वाच्यवाचकभावस्य कल्पितस्य घटमानत्वात् हस्तसंज्ञादेरिवार्थप्रतिपादनस्य । (२२७)

किञ्च (।) वाचा किमेकेनार्थेन सह वाच्यवाचकसम्बन्धः । अथानेकैः । तत्र[1836] (।)

...3.228a गिरामेकार्थनियमे न स्यादर्थान्तरे गतिः ।

'गिरामेक'स्मिन्नर्थे वाचकतया 'नियमे' सति संकेतवशादन्य'त्रार्थे न स्याद् गतिः' । दृश्यते च विवक्षातोऽनेकार्थाभिधानम्[1837] ॥

...3.228b अनेकार्थाभिसम्बन्धे विरुद्धव्यक्तिसम्भवः ॥ २२८ ॥

'अने'कैर'र्थै'र्वाचकत्वा'भिसम्बन्धे विरुद्ध'स्यार्थस्य 'व्यक्तेः[1838]' प्रतीतेः 'सम्भवः' स्यात् । अग्निष्टोमः स्वर्गस्य साधनमिति विपर्ययोप्यवसीयेत[1839] (।) ततश्चाप्रवृत्तिरेव स्यात् स्वर्गार्थिनः । (२२८)

अथानेकार्थाभिधाय्यपि शब्दः पुरुषेण सङ्केतादभिमतार्थाभिधायित्वेन नियम्यते तदा (।)

....3.229 अपौरुषेयतायाश्च व्यर्था स्यात् परिकल्पना ।
वाच्यश्च हेतुर्भिन्नानां सम्बन्धस्य व्यवस्थितेः ॥ २२९ ॥

'अपौरुषेयतायाश्च व्यर्था परिकल्पना स्यात्' । तदभ्युपगमेपि पुरुषस्वातन्त्र्याभ्युपगमात् । तदार्थेभ्यो 'भिन्नानां' शब्दानां तैः सह 'सम्बन्धस्य व्यव'स्थितेः[1840] । हेतुश्च [370/s] वाच्यो[1841] येनाव्यभिचारः । न हि शब्दार्थयोस्तादात्म्यं भेदात् । नापि तदुत्पत्तिरर्थमन्तरेणापि विवक्षातः शब्दोत्पत्तेः । अन्यथा चाव्यभिचाराभावात् । (२२९)

उक्तमर्थं संगृह्णान्नाह ।

....3.230 असंस्कार्यतया पुंभिः सर्वथा स्यान्निरर्थता ।
संस्कारोपगमे मुख्यं गजस्नाननिभं भवेत् ॥ २३० ॥

[1835] १ प्रतीत्यन्यथानुपपत्त्या सम्बन्धकल्पनमत्यर्थेपि चेन्न प्रतीतिः किन्तत्कल्पनया संकेत एवान्वयव्यतिरेकात् ।

[1836] २ नित्ये सम्बन्धदोषमाह ।

[1837] ३ अनेकार्थप्रतिपादनस्य दर्शनात् सर्वे सर्वार्थवाचकाश्चेत् ।

[1838] ४ अभिमत एव समय इत्यनियमात् सर्ववाचकत्वे किं स्वर्गसाधन एवाग्निहोत्रादिसंकेतः किम्वा तद्विरुद्धे बुद्धिमान्द्यादिति संशयात् ।

[1839] ५ द्विधा शब्दविषयः साक्षाज्जातिस्तल्लक्षिता च व्यक्तिरिति व्यक्त्या सम्बन्धे सम्बन्धीत्यादि ।

[1840] व्यवस्थाय (ा)ः षष्ठी ।

[1841] १ शब्दार्थसम्बन्धवादिना ।

यदि सङ्केतनिरपेक्षाणां स्वत एव वाचकत्वं शब्दानां तदा[1842] 'पुंभिरसंस्कार्यतया' सङ्केतद्वारेण नियम्यतया 'सर्व्वथा निरर्थता स्यात्' । पुरुषसङ्केतनिरपेक्षाच्छब्दादर्थप्रतीतेरभावात् । एतद्दोषभयात् 'संस्कारस्योपगमे' स्वीकारे इदमपौरुषेयत्वं मुख्यमनुपचरितं 'गजस्नान[1843] म्भवेत्' । गजो हि स्नाने पङ्कमपनीय पुनस्तेनात्मानं लिम्पति । तथाऽपौरुषेयत्वं सम्बन्धस्य स्वीकृत्यापि पुनः सङ्केते पुरुषापेक्षेति व्यक्तं साम्यं । (२३०)

## ख. सम्बन्धचिन्ता

### (क) सम्बन्ध्यनित्यत्वे सम्बन्धनित्यता

...3.231a सम्बन्धिनामनित्यत्वान्न संबन्धेस्ति नित्यता ।

तथा 'सम्बन्धिनाम'र्थाना'मनित्यत्वात् संबन्धे नित्यता नास्ति' न ह्याश्रयापाये भवत्याश्रितं ।

किञ्च (।)

...3.231b नित्यस्यानुपकार्यत्वादकुर्वाणश्च नाश्रयः ॥ २३१ ॥

...3.232a अर्थैरतः स शब्दानां संस्कार्यः पुरुषैर्धिया ।

'नित्यस्य' सम्बन्धस्या'नुपकार्यत्वात् । अकुर्व्वाणो'ऽनुपकुर्व्वाणः शब्दोऽर्थश्चा'श्रयो न' युक्तः । यतः स्वाभाविकसम्बन्धानुपपत्ति'रतः' सम्बन्धो'ऽर्थैः' सह 'शब्दानां'[73b/MA] पुरुषैर्व्यवहर्तृभिरर्थप्रतिपादनाभिप्रायान्वयव्यतिरेकानुविधानमाश्रित्य 'धिया' कल्पिकया[1844] 'संस्कार्यो' व्यवस्थाप्यः ।
[371/s]

अथानित्य एव सम्बन्धस्तदा सम्बन्धिनां नाशे सम्बन्धस्य नष्टत्वान्निरर्थकः शब्दः स्यात् । अथवा (।)

...3.232b अर्थैरेव सहोत्पादे न स्वभावविपर्ययः ॥ २३२ ॥

...3.233a शब्देषु युक्तः ;

वाच्यै'रर्थै'रेव 'सह' सम्बन्धस्यो'त्पाद' इष्यते (।) तदोत्पाद इष्यमाणेपि पूर्व्वमर्थेन सह सम्बन्धस्य विनष्टत्वात् । अर्थसम्बन्धरहितात्मसु 'शब्दे'षु स्वभावस्य सम्बन्धविकलस्य 'विपर्ययः' सम्बन्धयोगी 'न युक्तः'[1845] । न हि नित्यस्य पूर्व्वापरैकस्वभावस्यान्यथात्वं युक्तं । अन्यथा नित्यताहानिप्रसङ्गात् ।

### (ख) सम्बन्धः कल्पितः

अस्मन्मते तु (।)

[1842] २ सत्यमिथ्यार्थत्वयोः पुरुषसंस्कारप्रतिबद्धत्वात् ।

[1843] ३ मिथ्यार्थतापि स्यात् । जातिचोदनेपि न प्रयोजनं निर्लोठितमेतदन्यापोह अपि प्रवर्त्तेत पुमान् विज्ञायार्थक्रियाक्षमान् । ?? ।

[1844] ४ शब्दार्थावसंबन्धिनावपि सम्बद्धौ पुरुषस्य प्रतिभासेते विकल्पबुद्धौ अनादिव्यवहाराभ्यासादर्थकार्यः शब्दास्तद्वानुविधायित्वादित्यध्यवसायवशात् सम्बन्धव्यवस्था ।

[1845] १ अर्थेन सहोत्पन्नस्यानुपकारिणि शब्देनाश्रयणाच्च ।

...3.233b सम्बन्धे नायं दोषो विकल्पिते ।

विकल्पिते कल्पनानिर्मिते सम्बन्धेऽयं स्वभावान्यत्वप्रसङ्गदोषो न भवति । न हि कल्पना-क्लृप्तो धर्मः स्वभावं वस्तुतः स्पृशति ।

...3.233c नित्यत्वादाश्रयापायेप्यनाशो यदि सम्मतः ॥ २३३ ॥

...3.234a नित्येष्वाश्रयसामर्थ्यं किं येनेष्टः स चाश्रयः ।

सम्बन्धस्य[1846] 'नित्यत्वात् आश्रय'स्य वाच्यस्या'पाये'प्य'नाशो' यदि जाते[1847] रिव 'सम्मतः' तदा 'नित्येषु' जाति[1848] सम्बन्धादिष्वा'श्रय'स्य वाच्यस्या वाचकस्य 'च किं सामर्थ्य-' मुपकारविशेषाधायकं 'येन' सामर्थ्येन स वाच्यदिरा'श्रय इष्टः' । न ह्यनुपकार्यमाश्रितमतिप्रसङ्गात् । नित्यस्य चोपकारासम्भवः । भेदाभेदकल्पनायामयुक्तत्वात्
अथ नित्यस्यापि जातिसम्बन्धादेराश्रयेणाभिव्यक्तिलक्षण उपकारः क्रियते । न चाव्यक्तिहेतुः कारको दीपादिवत् घटादेरित्याह ।

...3.234b ज्ञानोत्पादेन हेतूनां सम्बन्धात् सहकारिणाम् ॥ २३४ ॥

...3.235a तदुत्पादनयोग्यत्वेनोत्पत्तिर्व्यक्तिरिष्यते ।
घटादिष्वपि युक्तिज्ञैः ;

[372/s]

'ज्ञानोत्पादेन हेतूनां' दीपादीनां 'सहकारिणां[1849]' सम्बन्धात् 'तदुत्पादनयोग्यत्वेन' ज्ञानोत्पादनसमर्थत्वेनोत्पत्ति'र्घटादिष्वपि' भावेषु 'युक्तिज्ञै'र्न्यायविद्भि'र्व्यक्तिरिष्यते-' ऽन्यथा ज्ञानोत्पादनयोग्यस्य स्वभावस्यानुत्पत्तौ ज्ञानोत्पादनं न स्यात् (।)

...3.235b अविशेषेऽविकारिणाम् ॥ २३५ ॥

...3.236a व्यञ्जकैः स्वैः कुतः कोर्थो व्यक्तास्तैस्ते यतो मताः ।

नित्यानां जातिसम्बन्धादीनाम'विकारिणां' कुतश्चिदविशेषे विशेषासम्भवे स्वैर्व्यञ्जकैराश्रयाभिमतैः 'कोर्थः' स्वभावान्यथात्वादिः 'कुतो' न कश्चित् । 'यतो'ऽर्थात् कृतात् तै'र्व्यञ्ज'कैस्ते जात्यादयो 'व्यक्ता मताः' ।

## (ग) भेदाभेदव्यवस्थातोऽपि सम्बन्धस्यावस्तुत्वम्

किञ्च [1850] (।)

...3.236b सम्बन्धस्य च वस्तुत्वे स्याद् भेदाद् बुद्धिचित्रता ॥ २३६ ॥

...3.237a ताभ्यामभेदे तावेव नातोन्या वस्तुनो गतिः ।

---

[1846] २ सम्बन्धिनामनित्यत्वादित्यादौ परः ।

[1847] ३ नित्यत्वादाश्रयनाशेप्यनाशवत् ।

[1848] ४प्रसिद्धिमात्रं तन्निर्वस्तुकं ।

[1849] १ योग्यदेशावस्थानात् ।

[1850] २ न च सम्बन्धस्त्रिप्रमाणक इति दर्शयन्नाह वर्णा न वाचकास्तेन वाच्यवाचकसम्बन्धस्यावृत्तिर्वर्णेषु निरर्थकत्वात् तद्वृतौ सम्बन्धस्य वाचकाङ्गत्वं स्यात् ।

यदि 'सम्बन्धस्य वस्तुत्व'न्तदा वस्तुत्वे सति भेदोऽभेदो वाऽभ्युपगन्तव्यः । तत्र 'भेदाद्[1851] बुद्धेश्चित्रता' स्यात् (।) वाच्यवाचकौ सम्बन्धश्चेति त्रितयं दृश्येत[1852] । न चेक्ष्यते । अथ द्वितीयः पक्षः तदा 'ताभ्यामभेदे' सम्बन्धस्य 'तौ' वाच्यवाचका'वेव' स्यातां न तु सम्बन्धो नाम कश्चित् । अथ सम्बन्धो न भिन्नो नाप्यभिन्नः[1853] । 'अतो' भेदाभेदाभ्या'मन्या' वस्तुनो 'गति'र्नास्ति । अन्योन्यवच्छेदात्मकत्वादनयो राश्यन्तरासम्भवान्नान्यः प्रकारोस्ति वस्तुनः । तस्माद् (।)

...3.237b भिन्नत्वाद् वस्तुरूपस्य सम्बन्धः कल्पनाकृतः ॥ २३७ ॥

...3.238a सद्द्रव्यं स्यात् पराधीनं सम्बन्धोन्यस्य वा कथम् ।

[373/s]

भिन्नत्वाद् 'वस्तुनोः' सम्बन्धिनोः 'रूपस्य सम्बन्धः' श्लेषलक्षणः 'कल्पनया कृतो' न वास्तवः । अन्यथा 'सद्द्रव्यं' सम्बन्धाख्यं 'पराधीनं' सम्बन्धायत्तं 'कथं स्यात् ।[1854] कथम्वा' भिन्नयोः सम्बन्धिनोः श्लेषलक्षणः 'सम्बन्धः' परस्परममिश्रस्वभावत्वात् सर्व्वस्य तथापि सम्बन्धेतिप्रसङ्गात् ।

## (६) वर्णपदादिषु सम्बन्धस्यासद्भावः

किञ्च (।)

...3.238b वर्ण्णा निरर्थकाः सन्तः;

अयं सम्बन्धो वर्त्तमानो वर्ण्णेषु पदादिषु वा वर्त्तेत । तत्र 'वर्ण्णाः सन्तो[1855] निरर्थकाः' प्रत्येकं तेषामर्थप्रतिपादकत्वाभावात् । नानाप्रयोक्तृप्रयुक्तेभ्योऽर्थाप्रतिपत्तेश्च व्यतिक्रमप्रयुक्तेभ्यश्च स[1856] रो रस इत्यादिभ्य[1857] स्तुल्या स्यात् प्रतिपत्तिस्तत्समुदायस्य चासम्भवः क्रमेणोपलम्भात् । न च समुदायो नाम समुदायिभ्यो भिन्नोऽनुपलम्भबाधितत्वात् । तेषाञ्च वाचकत्वादेकस्मादपि[74a/MA] प्रतीतिः स्यात् । प्रत्येकं न चेद् वाचकाः समुदितेभ्योपि तेभ्यो न स्यात् प्रतीतिस्तदाप्यन्यस्याभावात् ।

अथ क्रमेण वर्ण्णेषु गृहीतेषु तत्संस्कारसहायेनाध्यक्षेण गृहीतादन्त्यवर्ण्णादर्थप्रतीतिः[1858] । तत्किमन्त्य एव वर्ण्णो वाचको नान्ये । तथा तेद् व्यर्थं तेषामुच्चारणं । सर्व्वेषु प्रतीतेष्वर्थप्रतीतिरिति चेत् । किमन्त्यवर्ण्णग्राहिकया बुद्ध्या1 सर्व्वत्र ग्रहणं । अन्यान्यबुद्ध्यैव चेत् । ताः किं बुद्धयोऽन्त्यवर्ण्णबुद्धिकाले भवन्ति । येन तदार्थप्रतीतिरुच्यते । अन्यान्यकाल एवेति चेत् ।

---

[1851] ३ सम्बन्धिभ्यां सम्बन्धस्य भेदात् ।

[1852] ४ यत्सम्बन्धाभ्यां(?)भेदेन नोपलभ्यते तत्ततो नान्यत् यद् दृश्यं नोपलभ्यते तन्नास्ति ।

[1853] ५ तत्त्वान्यत्त्वरहितः सम्बन्ध इत्यत्राह ।

[1854] १ एतेनार्थान्तरत्वे सम्बन्धस्याश्रितत्वं श्लेषश्च गतः ।

[1855] २ वस्तुसन्तो विद्यमाना अपि ।

[1856] ३ साहित्याभावेन । नानुमानाल्लिङ्गाभावान्न हि केचिद् दृष्टान्ते सम्बन्धं कार्याऽर्थप्रतीतिः सम्बन्धस्यातीन्द्रियत्वेनेन्द्रियादिवत् साधनापेक्षणात् ।

[1857] ४ क्रमविशेषेणैकप्रयोक्तृप्रयुक्ता वर्ण्णा एव वाचका इति न दोषश्चेत् । न क्रमस्य नार्थान्तत्वेन यद् रूपं सरे तद्रूपं रसेपीति तुल्या प्रतीतिः स्यात् ।

यदि ताभिर्व्वाचका वर्ण्णा गृह्यन्ते (।) एकैकवर्ण्णग्रहणेप्यर्थप्रतीतिः स्यात् । वाचकेषु सर्व्वेषु गृहीतेषु प्रतीतिरिति चेत् । तदा तु न प्रत्येकं वाचकस्तदतिरिक्तश्च समुदायो नास्ति ॥
[374/s]

प्रत्येकं समर्थाः स्थितिबीजादयोऽङ्कुरजनने न च केवलाजनयन्तीति चेत् । ये समर्था न तेषां क्षणिकत्वात् पृथग्भाव इत्यसमानं । समुदिता एव तु समर्थाः । न त्वेवं वर्ण्णानां क्वापि समुदायः क्रमोपलभ्यत्वात् । तदा चेद् प्रतिपादका अवाचका एव । पूर्व्ववर्ण्णग्रहणसंस्कारेपि किमन्त्यवर्ण्णबुद्धौ सर्व्वे प्रतिभान्ति न वा । न तावदुपलभ्यन्ते ततस्तदुपदर्शमपि व्यर्थं सर्व्वेषु क्रमात् प्रतीतेषु स्मृतिः समुदायविषया भवतीति चेत् । किम्वर्ण्णानां समुदायोस्ति प्रतीतो वा यः स्मर्यते केवलं कल्प्यते । कल्पितस्य वाचकत्वाभ्युपगमे न विवादः । तस्मान्न वर्ण्णे सम्बन्धवृत्तिः ।

पदवाक्यादिषु तर्हि स्यादिति चेत् ।

...3.238c पदादिपरिकल्पितम् ॥ २३८ ॥

...3.239a अवस्तुनि कथं वृत्तिः सम्बन्धस्यास्य वस्तुनः ।

[1859] न हि क्रमोच्चारितेभ्यो वर्ण्णेभ्यो व्यतिरिक्तं पदादिकमुपलभ्यते (।) केवलं कल्पनाबुद्ध्या[1860] क्रमोच्चारितानां वर्ण्णानां समुदायः कल्पितः पदं । पदानाञ्च समुदायः कल्पितो वाक्यमुच्यते । तच्च कल्पितत्वादवस्तु । 'अवस्तुनि सम्बन्धस्य वस्तुनः कथम्वृत्तिः' । न हि शशवि'शा' (?षा)णस्य नीलादिर्द्धर्मो युक्तः । तदेवं न सम्बन्धो नित्योऽनित्यो वा युक्त इति स्थितं ॥

## ग. नापौरुषेयता

...3.239b अपौरुषेयतापीष्टा कर्त्तॄणामस्मृतेः किल ॥ २३९ ॥

...3.240a सन्त्यस्याप्यनुवक्तार इति धिग्व्यापकं तमः ।

वेदवाक्यानाम'पौरुषेयतापि' केनचि न्मी मां स क[1861] प्रवरेणेष्टा 'कर्त्तॄणामस्मृतेः' । लिङ्गात् 'किल' । अक्षमायां किल शब्दः । अस्याप्यर्थस्य न्यायाद् दूरमायातस्या[375/s]नुवक्तारः पण्डितंमन्याः[1862] सन्ति । तस्यैव[1863] तावदीदृशं[1864] प्रज्ञास्खलितं कथम्वृत्तमिति सविस्मयानुकम्पन्नश्चेतः । तदप्यपरेऽनुवदन्ती[1865] ति निर्दयाक्रान्तभुवनं धिगव्यापकन्तमः । तथा हि कर्त्तुः स्मरणमसिद्धं स्मरन्ति सौगता मन्त्राणां कर्तॄन् अष्टकादीन् । का णा-[1866] दा श्च वि धा ता रं । मिथ्या तत्स्मरणञ्चेत् । कु मा रस म्भ वा देरपि का लि दा सादिकर्त्तृस्मरणं मिथ्येति तदप्यपौरुषेयं । तत्रैकं स्मरणमप्रमाणमन्यच्चान्यथेति नात्र

[1858] ५ न वर्ण्णानुभवाहितसंस्कारस्य वर्ण्णेष्वेव स्मृतिहेतुत्वान्नार्थे न हि गवानुभवाहितसंस्कारोऽश्वस्मरणमादधति । दृष्टत्वादित्यपि न संकेतं विनाऽसत्यात् । संकेतश्च सामान्यविषयो न वर्ण्णस्वलक्षणे ।

[1859] १ वैयाकरणानां वर्ण्णादिव्यतिरिक्तं पदादि निरस्यते ।

[1860] २ भिन्नवर्ण्णानुभवात् कथमेकपदाद्यवभासौ विकल्पः । अस्ति चेत्यनुभवोस्तीत्याह क्रमवर्ण्णानुभवदृष्टभाविमनोविज्ञानं वर्ण्णान्यदादित्वेनैकस्वभावानध्यवस्यति मिथ्याविभ्रमोऽनादिः ।

विभागकारणं । बहूनां संप्रतिपत्तिविप्रतिपत्तयश्च न प्रमाणेतरलक्षणे सम्वादसत्वेन सिध्यतः । ततश्चास्मृतकर्त्तृकमित्यशक्यनिश्चयं सन्दिग्धविपक्षव्यावृत्तिकत्वात्[1867] ।

## घ. न नित्यता

### (क) a गुर्वध्ययनपूर्वकत्वादपि न

...3.240b यथायमन्यतोऽश्रुत्वा नेमं वर्णपदक्रमम् ॥ २४० ॥

...3.241a वक्तुं समर्थः पुरुषस्तथान्योपीति कश्चन ।

यदापि वेदानधीयानो यथायमिदानीन्तनो माणवकोऽ'न्यत' उपाध्याया'दश्रुत्वा इम'मुच्यमानं 'वर्ण्णपदयोः क्रम'मानुपूर्व्वीविशिष्टां वेदाख्यां 'वक्तुमसमर्थो' वेदकपाठकत्वात् । 'तथाऽन्य' उपाध्यायस्तदुपाध्यायोपीत्यनादिरेष क्रम इति[74b/MA] कश्चि 'न्मी मां स कः' । सर्व्वस्यैव वेदपाठः परोपदेशादिति नित्यतैव वेदानां ।

तत्राप्याह ।

...3.241b [376/s]अन्यो वा रचितो ग्रन्थः सम्प्रदायाद् ऋते परैः ॥ २४१ ॥

...3.242a दृष्टः कोऽभिहितो येन सोप्येवं नानुमीयते ।

'अन्यो वा' वेदादितरः काव्यादि'ग्रन्थो रचितः' कविप्रभृतिभिः 'संप्रदायाद् ऋते' उपदेशाद्विना परैरध्येतृभिर'भिहितः को दृष्टो' न कश्चित् (।) 'येन' परोपदेशेऽसत्यशक्याध्ययनत्वेन 'सोपि' काव्यादि'रेवं' नित्यं 'नानुमी'यते[1868] । तत्रापि हेतुरयं सिद्ध एव । अथ पुरुषेण तत्करणाविरोधात् सन्दिग्धव्यतिरेकताऽस्य हेतोस्तदा वेदेपि दुष्टत्वमस्या (ः) कथं निवार्यं ।

अपि च (।)

...3.242b यज्जातीयो यतः सिद्धः सोऽविशिष्टोग्निकाष्ठवत् ॥ २४२ ॥

...3.243a अदृष्टहेतुरप्यन्यस्तद्भवः संप्रतीयते ।

---

[1861] ३ बहूनां जीर्ण्णकूपादीनां कर्त्ता न स्मर्यते न च तावताऽकर्त्तृता । इति व्यभिचारादयुक्तं लिङ्गं जैमि(नि)नोक्तं ।

[1862] १ कुमारिलादयः ।

[1863] २ यः कर्त्तुरस्मरणादपौरुषेयतामाह जै मि नि (ः) एवमेतदिति निःकृपमाक्रान्तं जगत् येन तमसा । अज्ञानस्यैव धिग्वादो न प्राणिनः ।

[1864] ३ यत इदं साधनमसिद्धमनेकश्चेत्याह ।

[1865] ४ अतिस्थूलं सह विस्मयेनानुकम्पया च वर्त्तते श्रुतवतोपीदृशमविद्याविलसितमिति सविस्मयं । गाढेनाविद्याबन्धेन सत्वाः पीड्यन्त इति सानुकम्पं अपरे तन्मतानुगाः ।

[1866] ५ वैशेषिकाः ।

[1867] ६ साधनान्तरं निरस्यति ।

> वेदस्याध्ययनं सर्व्वं गुर्व्वध्ययनपूर्व्वकम् ।
> विद्या (?वेदा) ध्ययनवाच्यत्वादधुनाध्ययनं यथे

ति ?? दूषयन्नाह ।

[1868] १ विनोपदेशं पाठाशक्तेः काव्येपि सत्त्वात् ।

'यज्जातीयो' यद्द्रव्यसमानजातीयो 'यः' पदार्थो 'यतो' हेतोः 'सिद्धो'ऽन्वयव्यतिरेकाभ्यां निश्चितः 'स' तज्जातीयत्वेना'विशिष्टो अन्योऽदृष्टहेतुरपि' तद्धेतुकत्वेन संप्रतीयते (।) किमिव । 'अग्निकाष्ठवत्' । काष्ठकार्यत्वेन वह्नेर्निश्चितत्वात् (।) (।) वह्निदर्शनाददृष्टमपि काष्ठमनुमीयते[1869] । न च[1870] वैदिकपौरुषेयवाक्यानां कश्चिद्भेदः (।) सर्व्वेषां दुर्भणत्वादीनां मन्त्रादिसामार्थ्यानाञ्च साधारणत्वात् ।

इदानीम्वेदकरणसमर्थपुरुषादर्शनं भा र तादिष्वपि समानं[1871] । ततोऽसत्यवान्तरभेदे भेदाद्धेतूपन्यासो न युक्तः । सति तु वस्तुतः (।)

...3.243b तत्राप्रदर्श्य ये भेदं कार्यसामान्यदर्शनात् ॥ २४३ ॥

...3.244a हेतवः प्रवितन्यन्ते सर्वे ते व्यभिचारिणः ।

तत्र साधनीकृते[1872] वस्तुन्यवान्तरभेदे भेद[1873] 'मप्रदर्श्य कार्यसा[1874] मान्य'स्य विजातीयव्यावृत्तिमात्रस्य 'दर्शनात्' । ये 'हेतवो' यद्वेदाध्ययनं तद्वेदाध्ययनपूर्व्वकं न करणपूर्व्वकं[1875] यथा यः पथिकाग्निः[1876] स ज्वालापूर्व्वको न वारणिनिर्मथनपूर्व्वक [377/s] इत्यादयः 'प्रवितन्यन्ते' विस्तार्यन्ते 'सर्व्वे ते व्यभिचारिणोऽनैकान्तिकाः न हि[1877]' वेदाध्ययनमित्येवाध्ययनपूर्व्वकं 'कृत्वा' करण[1878] पूर्व्वकस्याप्यध्ययनस्योपपत्तेः । अरणिनिर्मथनस्य च वह्नेर्भावाविरोधात् ।

भवतु वा

...3.244b सर्व्वथाऽनादिता सिद्ध्येदेवं नापुरुषाश्रयः ॥ २४४ ॥

...3.245a तस्मादपौरुषेयत्वे स्यादन्योप्यनराश्रयः ।

एवं वेदाध्ययनमध्ययनपूर्व्वतासा धनं[1879] तथापि 'सर्व्वथाऽनादिता' वेदाध्ययनस्य 'सिध्येत्' डिम्भकपांशुक्रीडादीनामिव 'नापुरुषाश्रयः' पुरुषाश्रयणाभावस्तु 'न' सिध्येत् । डिम्भकपांशुक्रीडा[1880] दयो हि दर्शनपूर्व्वका अनादयश्च न चापौरुषेयाः डिम्भकैरेव क्रियमाणत्वात् । एवं शब्दा अप्यध्येतृभिरेव क्रियन्ते न तु स्वयमात्मानं ध्वनयन्ति येनापौरुषेयाः स्युः । अनादिस्तादृक् करणक्रमः पुरुषपरंपराया अनादेरागतत्वात् । अथानादित्वादेवापौरुषेयतेत्याह । तस्यानादित्वा'दपौरुषेयत्वे साध्ये स्यादन्यो[1881]' प्यपौरुषेयो'ऽनराश्रय' इति प्रसङ्गः ।

b. तमेवाह ।

[1869] २ अपौरुषेयत्वप्रतिज्ञाया अनुमानबाधोक्तानेन ।
[1870] ३ काष्ठहेतुकोयमग्निरिति ।
[1871] ४ इदानीन्तदकारणात् ।
[1872] ५ एतस्मिन्न्याये स्थिते ।
[1873] ६ लौकिकवैदिकयोः ।
[1874] ७ पुरुषकार्यैः शब्दैः सामान्यस्य तुल्यस्य वैदिकशब्देषु दर्शनात् ।
[1875] ८ स्वयमकृत्वा वेदस्य अध्ययनं दार्ष्टान्तिकमग्नेर्दृष्टान्तो नैकान्तिकत्वसाधनस्य ।
[1876] ९ आद्योपि पथिककृतोग्निरदृष्टहेतुत्वात् कालान्तरहेतुकः पथिकाग्नित्वात् ज्वालान्तरसंभूतदृश्यमानाग्निवत् ज्वालारणिजन्मनोरबाध्यबाधकत्वादनैकान्तिको वह्निसामान्ये ।
[1877] १ वेदक्रियाशक्तिरहितस्योपदेष्टृपूर्व्वकाध्यायदृष्टिर्न्न ब्रह्मादेरपि तथात्वं स्वयं रचयित्वाध्ययनसंभवाविरोधात् ।
[1878] २ यद्वेदाध्ययनमित्यादौ वा । ७ स्वयं कृत्वा ।
[1879] ३ अभ्युपगम्याह ।
[1880] ४ आदिना भोजनादि बालस्य ।
[1881] ५ लोकव्यवहारः ।

...3.245b म्लेच्छादिव्यवहाराणां नास्तिक्यवचसामपि ॥ २४५ ॥

...3.246a अनादित्वाद् तथाभावः ;

'म्लेच्छादेर्व्यवहाराणां' मा[1882] तृविवाहमुक्तिप्रापणमारणादीनां 'नास्तिक्यवचसा[1883]मपि' परलोककर्मफलाद्यपवादिनामनादित्वात् तथाभावोऽपौरुषेयत्वं स्यात् ।

यदि पौरुषेयाः कथमनादय इत्याह ।

...3.246b पूर्वसंस्कारसन्ततेः ।

[378/s]

'पूर्व्वसंस्काराद'नादेः 'सन्ततेः' सन्तानेन प्रवृत्तेः ।

अथानादित्वात् म्लेच्छादिव्यवहाराणाञ्चापौरुषेयतास्तित्वाह ।

...3.246c तादृशेऽपौरुषेयत्वे कः सिद्धेपि गुणो भवेत् ॥ २४६ ॥

'तादृशे' म्लेच्छादिव्यवहारसाधारणेऽ'पौरुषे'यत्वे 'सिद्धेपि को गुणः' अविसम्वा-[75a/MA]दकलक्षणो भवेत् । पौरुषेयवाक्यानां विसम्वादादर्शनादपौरुषेयत्वमिष्टं । स च त-स्मिन्नपि सति म्लेच्छादिव्यवहाराणामिव दुष्परिहरः ।

### (ख) a. अनादित्वेऽर्थसंस्कारभेदेन संशयः

अथ वेदवाक्यानामेवानादित्वादपौरुषेयत्वं तदा (।)

...3.247a अर्थसंस्कारभेदानां दर्शनात् संशयः पुनः ।

अर्थस्य 'संस्कारो' व्याख्यानं तस्य 'भेदानां' विकल्पानां प्रकृतिप्रत्ययानेकार्थ[1884] त्वात् रूढेर्निरुक्तादिभ्यश्च यथाप्रतिभं पुंसान्द'र्शनात् संशयो'ऽर्थनिश्चयाभावः ।

b. कस्य चापौरुषेयत्वमिष्टं किम्वर्णानामुत पदवाक्यानामित्याह[1885] ।

...3.247b अन्याविशेषाद् वर्णानां साधने किं फलं भवेत् ॥ २४७ ॥

'अन्यै'र्लौकिकैर्वर्णैर्वैदिकानाम'विशेषात्'प्रत्य'भिज्ञा'यमानत्वेनैकत्वादपौरुषेयत्वस्य 'साधने किं फलं भवेत्' (।) तथात्वे लौकिकानामर्थव्यभिचारात् ।

....3.348 c. वाक्यं भिन्नं न वर्णेभ्यो विद्यतेऽनुपलम्भतः ।
अनेकावयवात्मत्वे पृथक् तेषां निरर्थता ॥ २४८ ॥

...3.249a अतद्रूपे च ताद्रूप्यं कल्पितं सिंहतादिवत् ।

'वाक्यं' पदञ्च 'वर्णेभ्यो भिन्नं न विद्यतेऽनुपलम्भात्' (।) तत्कथमस्यापौरुषेयत्वं[1886] साध्यं । अभिन्नं चेत् तदा'नेकावयवात्मत्वे' वाक्यस्य तेषामवयवानां पृथक् प्रत्येकं निरर्थक-तेति पदात्मकमनर्थकमेव स्यात् । ततश्चातद्रूपेऽवाचक[379/s] रूपे ताद्रूप्यं वाचकत्वं कल्पितं

---

[1882] ६ मृते भर्त्तरि पुत्रेण मातृविवाहः कार्यः । वृद्धादीनां मारणं संसारमोचनार्थं आदिना मदनत्रयोदश्यां मदनोत्सवः पुत्रादिजन्मोत्सवः ।

[1883] ७ लोकायतिकानां ।

[1884] १ अपौरुषेयत्वं कल्पयित्वापि पुनः संशय एव यतो वेदार्थव्याख्याविकल्पानामाचार्यभेदेन भेदः ।

[1885] २ वर्णविकल्पमधिकृत्य ।

कल्पनाबुद्धिनिर्मितं माणवकादाविव सिंहतादि । ततः[1887] पौरुषेयमेव वाचकत्वं स्यादिति प्रस्तुतक्षतिः ।

d. अथ प्रत्येकमवयवानां सार्थकत्वं तदा (।)

...3.249b प्रत्येकं सार्थकत्वेपि मिथ्यानेकत्वकल्पना ॥ २४९ ॥

...3.250a एकावयवगत्या च वाक्यार्थप्रतिपद् भवेत् ।

प्रत्येकं सार्थकत्वे[1888] पि मिथ्यानेकत्वस्यानेकावयवात्मकस्य कल्पना[1889] एकस्मादर्थप्रतीतेः ।[1890] तथैकस्यावयवस्य गत्या वाक्यार्थस्य प्रतिपत् प्रतीतिर्भवेत् (।) एकस्यापि वाचकत्वात् । तत्समुदायो वाचक इति चेत् । स किन्तेभ्यो भिन्नः । स च प्रत्युक्तः (।) अवयवा मिलिताः समुदाय इति चेत् । स च[1891] न सम्भवत्येव । तद् यदि प्रत्येकं वाचकत्वमेव तदेषां प्रत्येकं वाचकत्वे चैकस्मादपि स्यादर्थप्रतीतिः ।

अथ । (।)

...3.250b सकृच्छ्रुतौ च सर्वेषां कालभेदो न युज्यते ॥ २५० ॥

'एकावयवगत्याऽर्थप्रतिपत्ते'रवयवान्तरवैफल्यदोषात् सर्व्वावयवानां सकृच्छ्रुतिरिष्यते । तदा सर्व्वेषामवयवानां 'सकृच्छ्रुतौ' चाभिमतायामवयवश्रवणस्य 'कालभेदो[1892] न युज्यते' । दृश्येत च ।

## (ग) स्फोटनिरासः

अथानवयवमेकं वर्णेभ्यो व्यतिरिक्तं स्फोटरूपं वाक्यं तच्च क्रमवद्भिर्न्नियतानुपूर्व्वीकैर्ध्वनिभिः क्रमेण व्यज्यते । व्यक्त्यनुक्रमेणैव च क्रमवत् प्रतीयते तद्रूपाविभागेन नाद[1893] रूपाणाम्वर्ण्णानां ग्रहणात् वर्ण्णविभागवच्च लक्ष्यते । वस्तुतस्तथारहितमपीति केचित् ।

...3.251a एकत्वेपि ह्यभिन्नस्य क्रमशो गत्यसम्भवात् ।

'तदेकत्वेपि ह्यभिन्नस्या'नवयवस्य स्फोटरूपस्य वाक्यस्य प्रथमध्वनिनापि व्यक्तत्वात् 'क्रमशो गतेः[1894]' प्रतीतेर'सम्भवात्' सकृत् प्रतीतिप्रसङ्गः[1895] । यदि प्रथमव्यक्तौ न प्रतीतिरपरास्वपि न स्यात् । तदेकव्यञ्जकत्वाद् व्यक्तीनां ।

[380/s]

किञ्च (।) वाक्यन्तन्नित्यमनित्यम्वा स्यात् ।

---

[1886] ३ प्रत्येकं वर्ण्णानर्थक्यादर्थप्रतीतिकार्यान्यथानुपपत्त्यास्ति पदादीति चेन्न यावान्वर्ण्णसमुदायोर्थप्रतीतये संकेतस्तावतोर्थप्रतीत्यभाव एतस्मान्न चैवं दृश्यानुपलम्भाच्च पदादेः ।

[1887] १ वाचकत्वस्य पुरुषेण कल्पितत्वात् ।

[1888] २ वाक्यार्थेन ।

[1889] ३ एकस्याप्यवयवस्य वाक्यार्थवत्वादवयवान्तरापेक्षा न स्यात् ।

[1890] ४ यदा चैकोप्यवयवोर्थवान् तदा ।

[1891] ५ परवर्ण्णोच्चारणे पूर्व्वध्वंसात् ।

[1892] ६ एकावयवबोधकाले सर्व्वत्र श्रवणात् ।

[1893] ७ नादानां भेदात् ।

[1894] ८ गृहीतागृहीतयोरभेदात् ।

[1895] ९ जातिस्फोटस्तु जात्यभावादेव निरस्तः ।

...3.251b अनित्यं यत्नसम्भूतं पौरुषेयं कथन्न तत् ॥ २५१ ॥

...3.252a नित्योपलब्धिनित्यत्वेऽप्यनावरणसम्भवात् ।

'यद्यनित्यं पौरुषेयं कथं न तत् यत्नसम्भ'वात्[1896] घटादिवत् । 'नित्यत्वेप्युपलब्धिर्नित्या' भवेत् । वाक्यानाम'नावरण'सम्भवात् । आवरणायोगात् । यदि नित्यं कदाचिदुपलभ्यते तदा तस्यानावृतस्वभावताऽभ्युपगन्तव्या । तादृशं नित्यमुपलभ्येताभिमतकाल इव । आवृतस्वभावे तु सर्व्वदाऽनुपलम्भः स्यात् । तस्मात् कालभेदेनोपलभ्यानुपलभ्यस्वभावत्वादेकस्य नाशादन्यस्योदय इति स्यात् । तथा च नित्यत्वक्षतिः ।

एकस्वभाव एव शब्दः परं (।)

...3.252b अश्रुतिर्व्विकलत्वाच्चेत् कस्यचित् सहकारिणः ॥ २५२ ॥

...3.253a काममन्यप्रतीक्षोक्तिर्नियमस्तु विरुध्यते ।[75b/MA]

'कस्यचित् सहकारिणो' ज्ञानजनकस्य 'वैकल्यादश्रुति'रिति 'चेत्' । काममन्य'स्य सहकारिण उपकारकस्य प्रतीक्षापेक्षणमस्तु नियमः पूर्व्वापरैकस्वभावतावरणन्तु शब्दानां 'विरुध्यते' । न ह्येकस्वभावः परमपेक्षते चेति क्षमं । उपकारकस्यापेक्षणीयत्वात् । उपकारान्तरस्य च स्वभावान्तरलक्षणत्वात् ।

अपि च शब्दा अव्यापिनो व्यापिनो वा स्युः । तत्र (।)

...3.253b सर्वत्रानुपलम्भः स्यात् तेषामव्यापिता यदि ॥ २५३ ॥

...3.254a सर्वेषामुपलम्भः स्यात् युगपद् व्यापिता यदि ।

'यद्यव्यापिता तेषां सर्व्वत्र देशेऽऽनुपलम्भः स्यात्' । न ह्येकदेशस्थितः शैलः सर्व्वत्रोपलभ्यते । योग्यतातिशयलाभाद् व्यञ्जकेभ्यो दृश्यते एवेति चेत् । एवन्तर्हि सर्व्वैः सर्व्वदेशस्थैरुपलभ्येत । तथा 'व्यापिता यदि[1897] सर्व्वेषां' शब्दानां 'युगपदुपलम्भः स्यात्' । व्यापित्वात् सर्व्वेषां सर्व्वत्र भावात् ।

अथ व्यापित्वेपि य एवाभिव्यक्त्या संस्कृतः[1898] स एवोपलभ्यते नेतरः ।
[381/s]

...3.254b संस्कृतस्योपलम्भे च कः संस्कर्त्ताऽविकारिणः ॥ २५४ ॥

...3.255a इन्द्रियस्य स्यात् संस्कारः शृणुयान्निखिलञ्च तत् ।

'संस्कृतस्य चोपलम्भे च' स्वीक्रियमाणे नित्यत्वाद'विकारिणः कः संस्कर्त्ता' नाम । न ह्यनुपकुर्व्वन् संस्कर्त्ता अनुपकार्यो वा संस्कार्यः । अथेन्द्रियमनित्यत्वात् संस्कार्य ततः संस्कृत एव पश्यति नान्य इति विभागः । सत्यमिन्द्रियस्य स्यात् संस्कारः । किन्तु तदिन्द्रियं 'निखिलं च' शब्दग्रामं 'शृणुयात्' न त्वेकशब्दं ।[1899]

---

[1896] १ अवश्यं ह्युत्पत्तिमदनित्यं कुतश्चित् स्यान्निर्हेतुकत्वे देशादिनियमाभावात् तच्च पुरुषप्रयत्नान्वयव्यतिरेकानुविधायिपौरुषेयमेव स्यात् । किञ्चिदेव प्रतिनियतं वस्तुस्थित्यास्ति तत्कदाचित् कस्यचिद् भवति तेन क्वचित् कदाचिच्छ्रवणं ।

[1897] २ श्रोत्रजप्रतिज्ञया नित्यत्वं व्यापित्वञ्च शब्दानामित्याह ।

[1898] ३ प्रयत्नाभिहतवायुना संस्कृतस्य शब्दस्य संस्कृतेनैवेन्द्रियेणोपलब्धेर्न प्रसङ्गः ।

[1899] १ अथा यथा शब्दप्रतिपत्त्यन्यथानुपपत्त्येन्द्रियस्य संस्कारकल्पना तथा संस्कारभेदो यतः प्रतिविषयं भिन्नत्वादिन्द्रियस्यैकशब्दस्य ग्रहणं । प्रतिनियता हि संस्काराः शब्दानां तत्र केनचित् संस्कृतमिन्द्रियं कस्य(चि)देव ग्राहकं ।

...3.255b संस्कारभेदभिन्नत्वादेकार्थनियमो यदि ॥ २५५ ॥

...3.256a अनेकशब्दसंघाते श्रुतिः कलकले कथम् ।

'संस्कार'स्य शब्दविषयस्य 'भेदा'त् प्रतिनियमाद् 'भिन्नत्वा'दिन्द्रियसंस्काराणा-'मेक'स्मि'न्नर्थे' शब्दे 'नियमः' श्रुति'र्यदी'ष्यते तदा'नेकशब्दसंघाते कलकले श्रुति'रने'केषां' शब्दानां 'कथंसंस्कारप्रतिनियमादिन्द्रियं' नानेकशब्दग्राहि स्यात् [1900] ।

अथ (।)

...3.256b ध्वनयः केवलं तत्र श्रूयन्ते चेन्न वाचकाः ॥ २५६ ॥

...3.257a ध्वनिभ्यो भिन्नमस्तीति श्रद्धेयमविवक्षितम् ।

'तत्र' कलकले 'ध्वनयः' शब्दव्यञ्जकाः 'केवलं श्रूयन्ते न वाचकाः' शब्दाः[1901] (।) 'ध्वनिभ्यः' श्रूयमाणेभ्यो 'भिन्न[1902]' शब्दरूप'मस्तीति' यत्किञ्चिदिदमति'श्रद्धेयं' । श्रद्धावशाद् यद्येतदङ्गीक्रियते न तु प्रमाणबलात् ।

किञ्च (।)

...3.257b स्थितेष्वन्येषु शब्देषु श्रूयते वाचकः कथम् ॥ २५७ ॥

कलकले ध्वनिमात्रं यदि श्रूयते न शब्दः तदा बहूनां व्याहर्त्तॄणां तूष्णीम्भा'वादन्येष्वप्येषु शब्देषु स्थितेषु' एकस्मिन् पुरुषे व्याहरति 'कथं वाचकः श्रूयते' [382/s] [1903] कलकलइव ध्वनिमा[1904] त्रश्रुतिस्तदापि स्यात् । अथ वाचकस्योलब्धिप्रत्ययभावा[1905] दुपलब्धिस्तदा कलकलेपि स्याद् विशेषाभावात् (।)

यदि चेन्द्रियाणां संस्कारविशेषाच्छब्दविशेषोपलब्धिप्रतिनियमस्तदा (।)

...3.258a कथं वा शक्तिनियमाद् भिन्नध्वनिगतिर्भवेत् ।

शक्तिनियमस्तदा 'शक्तिनियमादि'न्द्रियाणां 'कथं भिन्नध्वनिगतिर्भवेत् ।[1906]' शब्दविशेषवत् ध्वनिविशेषस्यैव ग्राहकमिन्द्रियं स्यात् तत्कथं कलकलध्वनिप्रतीतिः ।

किञ्च (।)

...3.258b ध्वनयः संमता यैस्ते दोषैः कैरप्यवाचकाः ॥ २५८ ॥

...3.259a ध्वनिभिर्व्यज्यमानेस्मिन् वाचकेपि कथं न ते ।

'यैः कैरपि दोषैर्ध्वनयोऽवाचकाः सम्मतास्ते' दोषा 'व्यज्यमानेपि' वाचके'स्मिन् कथन्न' भवन्ति । तथाहि । यथा प्रत्येकमवाचकत्वाद्वाच(क)त्वे 'वा' ध्वन्यन्तरवैफल्यात् साहित्याभावाच्च ध्वनयोऽवाचकास्तथा ध्वनिभिः प्रत्येकं वाचकानभिव्यक्तेरभिव्यक्तौ वा ध्वन्यन्तरे वैफल्यात् साहित्याभावाच्च नाभिव्यज्येत[1907] शब्दः । अनभिव्यक्तश्च कमर्थं प्रतिपादयेत् ।

[1900] २ तस्मात् ताल्वादिना शब्दकरणमेव तेन यावन्तः श्रूयन्ते ।

[1901] ३ वाचक एव प्रतिनियतशक्तीन्द्रियं न ध्वनिषु ।

[1902] ४ वर्णपदादिशब्दस्य ध्वनिविशेषत्वात् ।

[1903] १ अवाचकश्रवणादेव । वाचकेन सह पृथग्वा ध्वनेरपि श्रवणं स्यादित्यर्थः ।

[1904] २ कलकलेपि वाचकश्रुतिः स्यात् पदवाक्यच्छेदबाधात् ।

[1905] ३ पूर्वपूर्वध्वनिभागस्योत्तरोत्तरेण ध्वनिभागेनासन्धानाद् वैयाकरणाद्यैरवाचका इष्टा ते दोषाः । तस्मादनुपलब्धिवादितो ध्वनिः

[1906] ४ गतौ वा युगपन्नानारूपध्वनिश्रुतिवच्छब्दानामपि स्यात् न हि तैः किञ्चिदपराद्धं ।

[1907] ५ तन्न वर्णाद्यपौरुषेयता ।

## (घ) a. वर्णानुपूर्विचिन्ता

...3.259b वर्णानुपूर्वी वाक्यं चेन्न वर्णानामभेदतः ॥ २५९ ॥

...3.260a तेषाञ्च न व्यवस्थानं क्रमान्तरविरोधतः ।

'वर्णानामानुपूर्व्वी' परिपाटिविशेषो 'वाक्यं[1908]' । तच्चोपलभ्यत एवेति 'चेत्' । न वर्णाना'मानुपूर्व्याया 'अभेदतः' । न हि वर्णेभ्यो भिन्ना आनुपूर्व्वी प्रतीति[383/s] विषयः । ततश्च वर्णा एव वाक्यमिति स्यात् । तेषाञ्च लोकवेदयोर्न विशेष इति सर्व्वत्र प्रामाण्यं । अथाप्रामाण्यम्वा स्यात् । अथ विशेषानुपूर्व्वीका वर्णा एव वेदवाक्यं नेतर इत्याह [1909] 'तेषाञ्च' वर्णानां 'न व्यवस्थान'[1910] क्रमनियमः ।[76a/MA] 'क्रमान्तरस्य' लौकिकस्य 'विरोधतः' । तथा हि वर्णवदानुपूर्व्वी नित्या न च वर्णा बहवः [1911] सन्ति । समानजातीया वा एकत्वाद् वर्णस्य । ततश्चाग्निरित्येवा[1912]कारगकारनकाराणामानुपूर्व्वीविशिष्टः स्यात् नगमित्यन्यथा न भवेत् । कृतकानामपि बीजाङ्कुरपत्रादीना[1913] मृतुसं[1914] वत्सरादीनां विशिष्टानुपूर्वी नान्यथा भवति किम्पुनर्नित्यानां ।

सा चेयमानुपूर्व्वी वर्णानां (।)

...3.260b देशकालक्रमाभावो व्याप्तिनित्यत्ववर्णनात् ॥ २६० ॥

'देश'कृता वा [1915] पिपीलिकानामिव पंक्ती स्यात् । 'काल'कृता वा [1916] बीजाङ्कुरादीनामिव । द्वयोरपि 'देशकालक्रमयोरभावो' वर्णानां 'व्याप्तिनित्यत्वयोर्व्वर्णनात्' । अन्योन्यदेशपरिहारेण । वृत्तिर्हि देशपौर्वापर्य । तच्च सर्व्वगानामसम्भवि । तथान्योन्यकालपरिहारेण वृत्तिः कालपौर्वापर्यश्च नित्यानामसम्भवि । (२६०)

अथानुपूर्व्वी समर्थनार्थमनित्यताऽव्यापितेष्यते ।

...3.261a अनित्याव्यापितायाश्च दोषः प्रागेव कीर्त्तितः ।

'अनित्या[1917] व्यापितायाश्च दोषः प्रागेवोक्तः' । अनित्यत्वे पौरुषेयता । अव्यापित्वे च सर्व्वत्रोपलब्धिश्च न स्यात्[1918] ।

...3.261b व्यक्तिक्रमोपि वाक्यं न नित्यव्यक्तिनिराकृतेः ॥ २६१ ॥

...3.262a व्यापारादेव तत्सिद्धेः करणानां च कार्यता ।

[384/s]

---

1908 ६ न वर्णव्यतिरिक्तं तच्चापौरुषेयं ।

1909 १ अथ क्रमो वर्णानां धर्ममात्रं न वस्त्वन्तरं ततोयमदोष इत्याह ।

1910 २ न व्यवस्थितक्रमत्वं

1911 ३ येन केनचिद् व्यवस्थि(त)क्रमा वैदिकाः स्युरन्ये लौकिका यथेष्टपरावृत्तयः ।

1912 ४ कर्ण्ण एकत्र एवाकारगकारो गकारश्च करणं ।

1913 ५ हेमन्तादि ।

1914 ६ शौक्रवार्हस्पत्यादि आदिना ग्रहादि ।

1915 ७ देशकालाभ्यां कृतो यः क्रमस्तस्य वर्णेष्वभावः ।

1916 ८ बीजकाले नाङ्कुरस्तत्काले न पत्रादि ।

1917 ९ अनित्यं यत्नसंभूतं पौरुषेयं कथन्न तदि??त्यादिना ।

1918 १० न वर्णानुपूर्व्वी वाक्यं येनायं दोषः स्यात् किन्तु वर्णव्यक्तेरित्याह ।

इति नित्यव्यापिनामपि शब्दानां 'व्यक्ते'रभिव्यक्ते[1919] प्रतिनियतदेशकालायाः 'क्रमो वाक्यं न' युक्तः । 'नित्यस्य व्यक्तिनि[1920] राकृते'र्ज्ञानोत्पादनहेतूनामित्यादिना । तस्मात् 'करणानां व्यापरादेव' 'ते'षाम्वर्ण्णानां सिद्धेः 'कार्य'तैषां युक्ता न व्यङ्ग्यता ।

b. किञ्च (।)

...3.262b स्वज्ञानेनान्यधीहेतुः सिद्धेर्थे व्यञ्चको मतः ॥ २६२ ॥

...3.263a यथा दीपोन्यथा वापि को विशेषोस्य कारकात् ।

'सिद्धे' विद्यमानेऽर्थे [1921] 'स्वज्ञानेन' कारणेना[1922] 'न्य'स्य ज्ञानहेतु'र्व्यञ्जको मतः । प्रदीपो' घटस्य 'यथा । अन्यथा वापीति' यदि व्यङ्ग्यः प्राक् सिद्धो न भवेत् तदास्य [1923] व्यञ्जकस्य 'कारका'द्धेतोः 'को विशेषो' न कश्चित् । अपूर्व्वप्रतिपत्तिहेतुत्वाविशेषात् ।

c. तथा (।)

...3.263b करणानां समग्राणां व्यापारादुपलब्धितः ॥ २६३ ॥

...3.264a नियमेन च कार्यत्वं व्यञ्चके तदसम्भवात् ।

करणानां समग्राणां व्यापारात् नियमेनोपलब्धितश्च कार्यत्वमेव वर्ण्णानां व्यञ्चके दीपादौ तस्य व्यङ्ग्योपलब्धिनियमस्यासम्भवात् । न हि दीप इत्येव घटप्रतीतिः [1924] करणसामग्र्यन्तु कार्यमवश्यम्भावयतीति करणसामग्र्ये नियतोपलम्भस्य कार्यतैव ।

...3.264b d. तद्रूपावरणनां च व्यक्तिस्ते विगमो यदि ॥ २६४ ॥

...3.265a अभावे करणग्रामसामर्थ्यं किं नु तद्भवेत् ।

[385/s]

'तेषा'म्वर्ण्णानां 'रूप'स्य स्तिमितवायवीयावयवसंयोगरूपाणामा'वरणानां' प्रयत्नप्रेरितेन वायुना 'विगमो' यदि 'व्यक्तिस्ते मी मां स क' स्येष्टा तदा पूर्व्वावस्थात्यागे नातिशयो न व्यक्तिरनित्यत्वासक्तेः । उपलम्भावरणविगमो वा शब्दालम्बनं ज्ञानम्वा व्यक्तिः स्यादित्यत्राह कार्यं व्यक्तिरशक्या यस्मादावरणविगमेऽभावे नीरूपे 'करणग्रामस्य किं नु' तत् 'सामर्थ्यं भवेत्' । क्वचित् कर्त्तव्ये सामर्थ्यं स्यात् । न तु कर्त्तव्याभावे [1925] । यदि समस्तका'त्वर्य' (? र्यत्व)सम्भवेपि शब्दानां न कार्यता तदा (।)

...3.265b शब्दाविशेषादन्येषामपि व्यक्तिः प्रसज्यते ॥ २६५ ॥

...3.266a तथाभ्युपगमे सर्व्वकारकाणां निरर्थता ।

---

[1919] १ यदा कार्यस्याक्रिया व्यक्तिः ।

[1920] २ व्यञ्जककृतेन साक्षाज्ज्ञननत्त्युपधानेन ज्ञानजननासमर्थानां कार्यविशेष एव व्यक्तिः ।

[1921] ३ स्वकारणादुत्पन्ने व्यङ्ग्ये ।

[1922] ४ दीपः स्वज्ञानद्वारा धटं बोधयति ।

[1923] ५ शब्दो वा घटादिवत् कार्यवत् कार्य एव ? यः परार्थं प्रयुज्यते स प्रयोगात् प्राग् विद्यमानो यथा वाश्या( ?वास्या)दि च्छिदायां । प्रयुज्यते च शब्दः परप्रत्यायनाय । प्रत्यभिज्ञयापि सिद्धः ॥ ग्रहे क्षणिकेपि कर्मणि प्रयोगो दीपादौ च प्रत्यभिज्ञेत्यनेकान्ता एते ।

[1924] ६ घटशून्ये देशेऽनुपलब्धे ।

[1925] १ नित्यस्यानाधेयातिशयत्वान्नावरणमित्युक्तेश्च ।

'शब्दादविशेषा[1926] दन्य'व्यापारान्तरादुपलभ्यमानत्वनियमेनान्येषां घटादीना'मपि' 'व्यक्तिः प्रसज्येत' कार्यता न स्यात् । [1927] 'तथाभ्युपगमे' च [1928] 'सर्व्वेषां कारकाणां' व्यञ्ज[1929] काभिमतानां 'निरर्थकता' । उत्पादकं हि कारणमिष्यते न तु व्यञ्जकं शब्दानामिव ।

...3.266b e. साधनं प्रत्यभिज्ञानं सत्प्रयोगादि यन्मतम् ॥ २६६ ॥

...3.267a अनुदाहरणं सर्व्वभावानां क्षणभङ्गतः ।

यच्च[1930] नित्यत्वसिद्धये वर्ण्णानां 'प्रत्यभिज्ञानं[1931] सत्प्रयोग' आदिशब्दादुच्चार्यमाणत्वादि 'साधनं मतं' सन्नेव हि प्रयुज्यते । यथा वास्यादि च्छिदायां (।) ततः प्रयोगात् प्रयोगेपि विद्यमानत्वाद् वर्ण्णा नित्या एव । त'दनुदाहरणं' दृष्टान्तविकलं[1932] 'सर्व्वे'षा'म्भावानां क्षणभङ्गतः' ।

...3.267b दूष्यः कुहेतुरन्योपि ;

अनयैव दिशा परैरुच्यमानः 'कुहेतुर'न्यो[1933] पि दूष्यः ।[76b/MA]
[386/s]

f. अथ बुद्धिरभिव्यक्तिर्व्वर्ण्णानां सा च क्रमवती वाक्यमिष्टं तदा[1934] वाक्यस्यापौरुषेयत्वेनेष्टत्वाद् बुद्धिरपौरुषेयी स्यात् । तत्र (।)

...3.267c बुद्धेरपुरुषाश्रये ॥ २६७ ॥

...3.268a बाधाभ्युपेतप्रत्यक्षप्रतीतानुमितैः समम् ।

'बुद्धेरपुरुषाश्रये' पुरुषानाश्रयणे'[1935] बाधा' । कैरित्याह । 'अभ्युपेतप्रत्यक्षप्रतीतानुमितैः समं' एककालमेव बुद्धेरपुरुषाश्रयत्वस्याभ्युपेतेन पुरुष[1936] गुणत्वाभ्युपगमेन प्रत्यक्षप्रतीतेन च पुरुषकार्य[1937] त्वेन । तत्प्रयत्नका[1938] र्यत्वेन वा कादाचित्कत्वानुमितेन कार्यत्वेन च बाधा ।

g. वर्ण्णानामानुपूर्व्वी वाक्यं स्यादित्याह ।

...3.268b आनुपूर्व्याश्च वर्ण्णेभ्यो भेदः स्फोटेन चिन्तितः ॥ २६८ ॥

...3.269a कल्पनारोपिता सा स्यात् कथं वाऽपुरुषाश्रया ।

---

[1926] २ न किञ्चिदपि कार्यं स्यात् ।

[1927] ३ सर्व्वस्य व्यञ्ज्यत्वमिष्टश्चेत् ।

[1928] ४ व्यक्तेः पक्षत्रयानतिक्रमात् तस्यात्रासंभवाज्ज्ञानस्य सिद्धत्वात् ।

[1929] ५ व्यञ्जकविकल्पत्रये द्वयं निरस्तं । न ज्ञानकरणात् सत्कार्यका (?वा) दे वस्तुवत् । असत्कार्ये तु सर्व्वस्य कार्यतासक्तिर्ज्ञानवत् स्यात् ।

[1930] ६ किञ्च ।

[1931] ७ अष्टकृत्वो गोशब्द उच्चारितो नाष्टौ गोशब्दाः । यत्प्रयुज्यते तत्प्राक् सद् यथा वास्यादि । यत्परार्थं प्रत्यायत्तमुच्चार्यते । उच्चरितप्रध्वंसित्वे परप्रत्यायनं न स्यात् ।

[1932] ८ विनाशस्याकारणत्वादिना ।

[1933] ९ ........... साधनार्थः ।

[1934] १ ......ज्ञानं व्यक्तिरित्यत्र बुद्धीनां अनुक्रमो वाक्याव्यक्तीनां क्रमवत्वात् । तच्चायुक्तन्न बुद्धिरूपत्वाद् वाक्यस्य अभ्युपगम्य दोषमाह ।

[1935] २ साध्ये प्रतिज्ञायाः ।

[1936] ३ तीर्थस्य ।

[1937] ४ भावस्यैव कार्यत्वात् ।

[1938] ५ तद्भावभावित्वात् ।

'वर्णेभ्य आनुपूर्व्या भेदश्च स्फोटेन' चिन्तितेन एकत्वेन ह्यभिन्नस्य क्रमश्च इत्यादिना 'चिन्तितः' । न हि वर्णेभ्यो व्यतिरिक्ता आनुपूर्वी काचिदुपलभ्यते । अभेदपक्षे च सरो रस इत्यादौ प्रतिपत्तेर्भेदाभावप्रसङ्गः । प्रकारान्तरस्य चाभावः । तस्माद् वस्तुभूतानुपूर्व्याऽयोगात् 'कल्पना''रोपिता' सा 'स्यात्' । तथा 'चापुरुषाश्रया कथमुच्यते' ।

### (ङ) निर्हेतुको विनाशः

कथं पुनरवगम्यते ध्वनिरवश्यमनित्य इत्याह ।

...3.269b सत्तामात्रानुबन्धित्वात् नाशस्यानित्यता ध्वनेः ॥ २६९ ॥

...3.270a अविनाशात् स एवास्य विनाश इति चेत् कथम् ।
अन्योर्थोन्यस्य नाशोस्तु काष्ठं कस्मान्न दृश्यते ॥ २७० ॥

'सत्तामात्रानुबन्धित्वान्नाशस्य ध्वनेरनित्यता' । न खल्वसतामन्यस्मान्ना'शोत्पत्तिः' स्वहेतोरेव तु विनश्वरस्वभावतयोत्पन्ना भावा विनश्यन्ति ।[1939] विनाशो हि क्रियमाणो भावाद् व्यतिरिक्तो वा भवेत् । अव्यतिरेकपक्षे भाव एव क्रियत [387/s] इति स्यात् । तच्चाशक्यक्रियमुत्पन्नत्वात् । व्यतिरेकेप्यग्नेः सकाशात् अर्थान्तरस्य विनाशाख्यस्योत्पत्तौ काष्ठस्य दर्शनम्भ'वेदविनाशात्' ।

स एवाग्निजन्माऽर्थोऽस्य[1940] 'विनाशस्तेनादर्शनमिति चेत्[1941] कथमन्योर्थोन्यस्य' विनाशो युक्तः । एवं ह्यति[1942] प्रसङ्गः स्यात् । काष्ठेऽग्निकृतः स्वभावो[1943] विनाशो न सर्व्व इति चेत् । काष्ठविनाशयोः कः सम्बन्धः । नाश्रयाश्रयिभावो निषेत्स्यमानत्वात् । कार्यकारणभावश्चेत् अग्नेरपि स विनाशः स्यात् । तस्यापि कार्यत्वात् । तस्मान्न भावान्तरमर्थस्य नाशः (।) 'अस्तु वा नाशः काष्ठश्चेद-' प्रच्युतप्राचीनस्वभावं 'कस्मान्न दृश्यते' ।

ननु योसावर्थान्तरस्वभावो वह्निकृतः[1944] स काष्ठस्य नाशो नाशरूपतया प्रतीतेः । विनाशश्चाभावो यश्चाभावः स काष्ठविरोधिरूप एव क्रियते । न चायमर्थान्तरत्वाद् घटवद् विरोधिरूपता कर्त्तुमशक्यः । न हि घटवदर्थान्तरत्वाद् धूमोऽग्निकार्यो न भवति । तस्माद् यथान्तररूपोपि धूमोऽग्निना क्रियते तथा विरोधिरूपोपि विनाशीक्रियेत । ययोश्च परस्परपरिहारेण विरोधस्तयोरेकभाव एवापरस्परस्यादर्शनमिति कथमग्निकृतस्यार्थान्तरस्य विनाशसंज्ञितस्य विरोधिनो भावे काष्ठस्य दर्शनमुच्यते ।

अत्रोच्यते । योसावर्थान्तरस्वभावो नाशस्तेन सह काष्ठस्य को विरोधः ।[77a/MA] यदि सहानवस्थानलक्षणः सम्भाव्यत एव । तद्भावयोर्निवर्त्त्यनिवर्त्तकभावदर्शनादग्निशीतयोरिव । किन्तु भावान्तरस्य यदि काष्ठविनाशकत्वं । स च नाशः किमर्थान्तरनिवृत्तिः । अर्थान्तरत्वे तुल्यः प्रसङ्गः ।[1945] निवृत्तिश्च निःस्वभावा न तत्र हेतुव्यापार इति वक्ष्यते । परस्परपरिहारस्थितिलक्षणश्चेद् विरोधः । एवमप्यतिप्रसङ्गः । यथा काष्ठाद् भिन्नमभिमतपदार्थान्तरं तथान्यदपि घटादिकमिति तदपि काष्ठस्य विनाशः स्यात् ।

[1939] ६ अभ्युपगम्याह ।
[1940] १ काष्ठस्याभावोऽभूतत्वान्न दृश्यते ।
[1941] २ भवत्वग्निजार्थस्याभाव इति नाम तथापि ।
[1942] ३ सर्व्वे पदार्थाः काष्ठस्य विनाशः स्युः ।
[1943] ४ ततो नातिप्रसङ्गः ।
[1944] ५ तेन परिग्रहात् स्वीकारात् काष्ठं न दृश्यते ।
[1945] ६ तदुत्पादेपि काष्ठं तथैव दृश्यते ।

ननु य एव काष्ठस्य नाशरूपतया विरोधिरूपतया च स्वहेतुभिः क्रियते स एव नाशो न तु यः कश्चिदर्थ इति कथमतिप्रसक्तिः ।
[388/s]

तदप्ययुक्तं । परस्परपरिहारेण हि विरोधी नाश इष्टं । स च परस्परपरिहारोऽभिमतपदार्थवद् घटादीनामपीति न विशेषः । अथ य एव काष्ठनिवृत्तिरूपः स एव तन्नाशो नान्यः । किमिदं निवृत्तिरूपत्वं काष्ठादन्यत्वं निवृत्तिमात्रात्मकत्वम्वा । अन्यत्वञ्चेत् तदितरस्यापि समानं । निवृत्तिमात्रात्मकत्वञ्च भावान्तरस्यायुक्तं स्वभावाविशेषवत्वात् । यदुत्पत्तौ यन्निवृत्तिः स विरोधी नाशश्चेति चेत् । अन्या तर्हि विनाशान्निवृत्तिः । तत्र च समानः सर्व्व एव प्रसङ्गः । तस्मात् काष्ठं स्वरसनिरोधितया निवर्त्ततेऽग्निकाष्ठादिसामग्रयास्त्वङ्गारादिकं जायत इति युक्तं । अर्थान्तरस्वभावे तु सति नाशे काष्ठं कस्मान्न दृश्यत इत्यनिवार्यः प्रसङ्गः ।

...3.271a तत्परिग्रहतश्चेन्न तेनानावरणं यतः ।
विनाशस्य विनाशित्वं ;

'तेन' विनाशाख्येन भावान्तरेण 'परिग्रहतो'वष्टब्धत्वात् काष्ठादर्शनमिति 'चेत् । न तेन' भावान्तरेण काष्ठस्या'नावरणं यत'स्ततः काष्ठस्यापरिग्रहः । न हि नाशो वस्त्वावरणम'विनाशित्वप्र'सङ्गात् । न च पूर्व्वापरैकस्वभावस्यवरणं युक्तमित्युक्तं । किञ्च (।)

...3.271b स्यादुत्पत्तेस्ततः पुनः ॥ २७१ ॥

...3.272a काष्ठस्य दर्शनं ;

भावान्तरभूतस्य नाशस्य यद्युत्पत्तिरिष्यते तदोत्पत्तिलिङ्गाद् विनाशित्वं नाश[1946] स्य स्यात् घटादिवत् । ततः काष्ठनाशस्य नाशात् पुनः काष्ठदर्शनं भवेत् ।

...3.272b हन्तृघाते चैत्रापुनर्भवः ।
यथात्राप्येवमिति चेत् हन्तुर्न्नामरणत्वतः ॥ २७२ ॥

ननु 'चैत्रस्य' हन्तुर्व्याघाते कृते चैत्रस्य 'पुनर्भावो' नास्ति 'यथा', तथा'त्रापि' काष्ठनाशनिवृत्त्या न काष्ठपुनर्भाव 'इति चेत् । न हन्तुरमरणत्वतः ।' न हि हन्ता मरणं चैत्रस्य । किन्त्वन्य एवेन्द्रियायुर्निरोधः । येन हन्तृमरणे चैत्रपुनरुज्जीवनप्रसङ्गः । यदि त्विन्द्रियादिनिरोधनिवृत्तिः स्यात् स्यादेवोज्जीवनं तच्च त्वन्मते प्राप्तं । निरोधस्योत्पत्तिभावयोरिष्टः । (२७२)
[389/s]

....3.273 अनन्यत्वे विनाशस्य स्यान्नाशः काष्ठमेव तु ।
तस्यासत्वादहेतुत्वं नातोन्या विद्येते गतिः ॥ २७३ ॥

अथ न भावाद्भिन्नो नाशः किन्तर्ह्यभिन्नः । अनन्यत्वे विनाशस्य नाशः काष्ठमेव तु स्यात् (।) तस्य काष्ठ[1947] स्याग्निसन्निधानात् (।) प्रागेव सत्वादहेतुत्वं नाशकाभिमतस्य । नातो भेदाभेदप्रकारादन्या गतिरुत्पत्तिमतोस्ति । द्विधापि च नाशहेत्वयोगः [1948] । (२७३)

....3.274 अहेतुत्वेपि नाशस्य नित्यत्वाद् भावनाशयोः ।
सहभावप्रसङ्गश्चेदसतो नित्यता कुतः ॥ २७४ ॥

[1946] १ यदुत्पत्तिमत् तद्विनश्वरं ।
[1947] १ अहेतोरुत्पन्नस्य न वह्न्यादिभिः किञ्चित्कर्त्तव्यमिति नाशोऽस्तु ।
[1948] २ प्रध्वंसाभावं नाशं गृहीत्वा परतोद्यमाशङ्कतेऽहेतुहिते क्षणिकवादिनः नित्यं भवेत् भावकालेपीति सहभावः स्यात् ।

‘अहेतुत्वेपि नाशस्य नित्यत्वादा’काशादिवत् ‘भावनाशयो’रन्योन्याभावस्वभावयोः ‘सहभावप्रसङ्गश्चेत्’ (।) ननु नाशस्यासतो नीरूपत्वान्नित्यता कुतः । वस्तु हि नित्यमनित्यम्वा स्यात् । यत्तु न किञ्चित् तत्कथमु[1949] च्यतां (। २७४)

....3.275 असत्वेऽभावनाशित्वप्रसङ्गोपि न युज्यते ।
नाशेन यस्माद् भावस्य न विनाशनमिष्यते ॥ २७५ ॥

अतश्चानित्यत्वा‘दसत्वे’ नाशस्याभाव‘नाशित्व’स्य ‘प्रसङ्गो[1950] पि न युज्यते यस्माद् भावस्य’ काष्ठादे‘र्नाशेन’ हेतुना ‘नाशनं नेष्यते’ । यदि हि नाशेन नाशः क्रियते इतीष्यते तदा नाशाभावे वस्तुनाशो न स्यात् । किन्तु [1951] स्वहेतुत एव भावा एकक्षणस्थितिधर्माण उत्पन्ना द्वितीये क्षणे न भवन्ति न तु नाम कश्चिद् भवति । यस्य नित्यत्वानित्य(त्व)योर्दोषावकाशः । (२७५)

a. कथन्तर्हीदानीमहेतुको नाशो भवतीत्युच्यत [1952] इत्याह (।)

....3.276 नश्यन् भावः परापेक्षो न तस्य ज्ञापनाय सा ।
अवस्थाऽहेतुरुक्तास्या भेदमारोप्य चेतसा ॥ २७६ ॥

[390/s]

[77b/MA]‘नश्यन् भाव’ एव क्षणस्थितिधर्मतया स्वहेतोरुत्पत्तेर्द्वितीये क्षणेऽभवन्न ‘परापेक्षः’ कारणान्तरनिरपेक्ष इति । ‘तस्य’ कारणान्तरानपेक्षनाशित्वस्य ‘ज्ञापनाय सा’ भावानाम‘वस्थाऽहेतुरुक्ता’ । अहेतुको विनाशो भवतीत्यादि वचसैवा‘स्या’ अवस्थाया धर्मिणः सकाशात्[1953] भेदान्तरप्रतिक्षेपेण ‘चेतसा’ विकल्पकेन[1954] ‘भेदमारोप्य’ न तु वस्तुतो नाशो नाम कश्चित् भावाद् भिन्नस्वभावो भवति । (२७६)

....3.277 स्वतोपि भावेऽभावस्य विकल्पश्चेदयं समः ।
न तस्य किञ्चिद् भवति न भवत्येव केवलम् ॥ २७७ ॥

[1955] स्वतोप्य‘भाव[1956] स्य भावेऽय’न्तत्वान्यत्व‘विकल्पः समश्चेत्’ । तथा हि यदि भावाद् भिन्नोप्यभावो ज्ञातो भावः किमिति न दृश्यतेऽभेद तु भाव एव नाश इति कथं नष्टः । अत्राह (।) ‘न तस्य’ भावस्य ‘किञ्चिद्[1957]’ विनाशोऽन्यो[1958] वा ‘भवति’ । किन्तर्हि स ‘एव केवलं’ न भवति । व्यवहर्त्तव्यैकरूपत्वात् तस्य । तत्र च भेदाभेदविकल्पानवतारः । (२७७)

...3.278a भावे ह्येष विकल्पः स्याद् विधेर्वस्त्वनुरोधतः ।

हि यस्मात् भावे विकल्प एष भेदाभेदात्मकः स्यात् विधेर्वस्त्वनुरोधतः । ‘नाशस्तु’ प्रसज्यप्रतिषेधरूपो निःस्वभावत्वात् भेदाभेदविकल्पाक्षमः । यदि च प्रसज्यप्रतिषेधेपि

[1949] ३ विनाशस्य भावनिवृत्तिलक्षणत्वात् ।

[1950] ४ बौद्धस्य यदि नाशोऽसन्निष्टस्तदा भावस्य नाशित्वं न स्यात् कथमसन् विनाशो भावं नाशयेदिति असतो व्यापारायोगात् ।

[1951] ५ कथन्तर्हि भावो नष्ट इति व्यपदेश इत्याह ।

[1952] ६ भावस्य नाश इति व्यतिरेकः कथं यस्य स्वभाव एव नास्ति तस्य किमहेतुकः सहेतुको वेति चिन्तया ।

[1953] १ अर्थान्तरमिव नाशं ।

[1954] २ भावस्य नाशः किमन्यस्मान्न वेति जिज्ञासायां ।

[1955] ३ ननु यस्याहेतुको नाशो बौद्धस्य तन्मते ।

[1956] ४ नाशस्य ।

[1957] ५ व्यतिरिक्तमव्यतिरिक्तम्वा ।

[1958] ६ स्थित्यन्यथात्वादिर्द्धर्मः ।

वस्त्वन्तरविधिस्तदा पर्युदासान्न भिद्येतोभयत्रापि विधेः प्राधान्यात् । पर्युदासो वा न सिध्येत् एकनिवृत्तावपरविधाने स स्यात् निवृत्त्यसिद्धौ तु कथं युक्तः[1959] ।

...3.278b न भावो भवतीत्युक्तमभावो भवतीति न ॥ २७८ ॥

यदा च भावनिवृत्तिर्विनाशार्थः तदा'ऽभावो भवतीत्यादि' वाक्येन 'भावो न भवती-'त्युक्तं[1960] । अभावस्य भावायोगात् । अतश्च हेतुरपि नाशस्य न कश्चित् । (२७८)

....3.279 b. अपेक्षेत परः कार्यं यदि विद्येत किञ्चन ।
यदकिञ्चित्करं वस्तु किं केनचिदपेक्ष्यते ॥ २७९ ॥

[391/s]

यस्मात् परः कारणाभिमतोऽपेक्ष्यत[1961] यदि किञ्चन कार्यं विद्येत । अन्यथा यदकिञ्चित्करं वस्तु तत् केनचित् किमपेक्ष्यते । (२७९)

....3.280 एतेनाहेतुकत्वेपि ह्यभूत्वा नाशभावतः ।
सत्तानाशित्वदोषस्य प्रत्याख्यातं प्रसञ्चनम् ॥ २८० ॥

'[1962] एतेन' नाशस्य निःस्वभावत्वकथनेना'हेतुकत्वेपि[1963]' सत्य'भूत्वा नाशस्य भावतः[1964] । सत्तानाशित्वदोषस्य प्रसञ्जनं[1965]' घटादाविव[1966] प्रत्याख्यातं[1967] । न ह्यभावो नाम कश्चिद् भवति यस्याभूत्वा भावात् सत्त्वं नाशित्वम्वा स्यात् ॥ (२८०)

....3.281 c. यथा केषाञ्चिदेवेष्टः प्रतिघो जन्मिनां तथा ।
नाश(ः)स्वभावो भावानां नानुत्पत्तिमतां यदि ॥ २८१ ॥

ननु 'यथा जन्मिनां' बुद्ध्यादीनां मध्ये 'केषाञ्चिदेव' घटादीनां प्रतिघः स्वदेशे वस्त्वन्तरोत्पत्तिव्याघात 'इष्टः' । न बुद्ध्यादीनां । तथा 'यदि' सतामुत्पत्तिमतामेव 'नाशः स्वभावः' स्यात् 'नानुत्पत्तिमतां' शब्दाकाशादीनां तदा[1968] कथमुक्तं सत्ता[1969]मात्रानुबन्धित्वात् नाशस्यानित्यता ध्वनेरिति । (२८१)

अत्राह (।)

....3.282 स्वभावनियमाद्धेतोः स्वभावनियमः फले ।
नानित्ये रूपभेदोस्ति भेदकानामभावतः ॥ २८२ ॥

---

[1959] ७ इति पर्युदासोपि न स्यात् ।

[1960] ८ एवं हि भावो निवर्त्तितो भवति यदि किञ्चिन्न विधीयते ।

[1961] ९ विनश्यता भावेनापेक्षेत यदि भावस्य कर्तव्यं स्यात् ।

[1962] २ परता हेतुकेपि नाशेऽभूत्वा भावात् सत्ताऽनित्यत्वञ्च दुर्न्निवारं अभूत्वा भवन्नहेतुकं इत्यपि विरुद्धं कादाचित्कस्य सहेतुत्वात् ।

[1963] ३ नाशस्य स्वीकृते ।

[1964] ४ स नाशो अभूत्वा भवतीतु हेतोः सत्ता च नाशित्वञ्चेति ।

[1965] ५ यत्परेण ।

[1966] ६ तदेतेनैव ।

[1967] ७ नाशे कस्यापि भावानभ्युप (ग) मात् ।

[1968] ८ एतेन सत्वञ्चानश्वरञ्चेति व्यभिचारः ।

[1969] ९ ननु नाशस्वभावो भावानां नानुत्पत्तिमतां यदीति प्रकृतं चोद्यं न चात्र नानित्येत्यादिः परिहारः । नाकाशादेः स्वहेतुतो नश्वरताऽनुत्पत्तिमत्वात् ॥ अत्र सिद्धान्त्येवम्मन्यते । यथा सत्वं व्यभिचार्युक्त(ः)तथा कृतकोपि कश्चिन्नश्वरः कश्चिन्नेत्याशङ्क्यते । तेनादौ कृतकव्यभिचारं परिहरति ॥ सत्वेप्युच्यते । ये क्वचित् कदाचित् केनचिदज्ञाता ज्ञायन्ते पुनर्न ज्ञायन्ते तेषां सत्तानुबन्धी नाश इति व्याप्तिः । अन्यथा नित्त्यत्वात् सदा ज्ञानजननप्रसङ्गः । सहकार्यपेक्षापि न । नित्त्यत्वात् पूर्व्वमेव निष्पत्तेर्ज्ञानज (न) कस्य ।

[392/s]

‘हेतोः स्वभाव’स्य विशिष्ट[1970] कार्योत्पादनयोग्यताया ‘नियमात् । फले’ कार्ये ‘स्वभावस्य’ प्रतिघाप्रतिघादे‘र्नियमः’ । ततो नित्यत्वाभिमतानाश्च हेतुमन्तरेण स्वभावनियमायोगात् हेतुरेष्टव्यः । कृतके ‘पुनरनित्ये’ वा भावे ‘रूप’स्य नश्वरानश्वरस्य ‘भेदो नास्ति’ । कस्मादित्याह । नित्यानित्यस्वभावतया कृतकस्य ‘भेदकानां’ हेतूनाम‘भावतः’ । न हि कश्चिदेव हेतुरनित्यं जनयति[1971] नापरः सर्व्वेषां कृतकानामर्थक्रियाकारित्वात् । तस्य चानित्यताव्याप्तेः । (२८२)

....3.283 d. प्रत्याख्येयाऽत एवैषां सम्बन्धस्यापि नित्यता ।
सम्बन्धदोषैः प्रागुक्तैः शब्दशक्तिश्च दूषिता ॥ २८३ ॥

‘अतः[1972]’ सर्व्वभावक्षणिकत्वसाधकात् प्रमाणादे‘वैषां’ शब्दानामर्थ‘सम्बन्धस्यापि नित्यता प्रत्याख्येया’ । सम्बन्धस्य वस्तुत्वे क्षणिकत्वात् । या च शब्दशक्ति[78a/MA]र्योग्यताख्याऽर्थप्रतिपत्त्याश्रयो वर्ण्यते[1973] सा[1974] च शब्दाद् व्यतिरिक्तैवेति तद्व[1975]दनित्या । अथ भिन्ना[1976] तादृशी च ‘सम्बन्धदोषैः’ सम्बन्धिनामनित्यत्वान्न सम्बन्धे[1977] अस्ति नित्यते ??त्यादिना ‘प्रागुक्तैर्दूषिते’ति न पुनरुच्यते ।[1978] (२८३)

## (२) a नव्यमीमांसक(भाट्ट)मतनिरासः

### क. अपौरुषेयत्वेऽपि दोषाः

#### (क) अपौरुषेयत्वान्न याथार्थ्यसिद्धिः

‘न’ तावदपौरुषेयं वचनमस्तीत्युक्तं । भवतु वा । तथापि (।)

....3.284 नाऽपौरुषेयमित्येव यथार्थज्ञानसाधनम् ।
दृष्टोऽन्यथापि वह्न्यादिरदुष्टः पुरुषागसा ॥ २८४ ॥

[392/s]

[1970] १ अयं सप्रतिघस्य जनकोऽयं नेति ।
[1971] २ सर्व्वेषां विनश्वरस्वभावस्यैव जननात् ।
[1972] ३ अनन्तरोक्तात् वस्तुमात्रानुबन्धात् ।
[1973] ४ जैमिनीयैः ।
[1974] ५ व्यतिरिक्त एव नास्तीत्यतोधुना ।
[1975] ६ शब्दवत्
[1976] ७ शब्दशक्तिः सम्बन्ध ।
[1977] ८ अव्यतिरेकात् ।
[1978] ९ तदेवं ।

'नापौरुषेयमित्येव वचनं यथाऽर्थ'स्याविसम्वादिनो 'ज्ञान'स्य 'साधनं'[1979] यस्मात् पुरुषस्या'गसा' दोषेणा'दुष्टोपि वह्न्यादि[1980]'र्नीलोत्पला[1981] 'ऽदावन्यथा अपरार्थज्ञानहेतु'र्दृष्टः ।[1982] (२८४)

## (ख) अकृतकत्वे ज्ञानहेतुत्वाभावः

किञ्च (।)

....3.285 न ज्ञानहेतुतैव स्यात् तस्मिन्नकृतके मते ।
नित्येभ्यो वस्तुसामर्थ्यात् न च जन्मास्ति कस्यचित् ॥ २८५ ॥

'तस्मिन्' शब्देऽ'कृतके मते[1983] ज्ञानहेतुतैव न स्यात् न' हि 'नित्येभ्यो वस्तु[1984]सामर्थ्यात्' कार्यजन्माशक्तेः 'कस्यचित्' ज्ञानस्यान्यस्य वा[1985] 'जन्मास्ति' (।) क्रमाक्रमयोर्व्यापकयोर्नित्यान्निवृत्तेः । तद्व्याप्यस्य सामर्थ्यस्याभावात्[1986] । (२८५)

## (ग) शब्दे समारोपितगोचरा बुद्धयः

तस्मात् (।)

....3.286 विकल्पवासनोद्भूताः समारोपितगोचराः ।
जायन्ते बुद्धयस्तत्र केवलं नार्थगोचराः ॥ २८६ ॥

तत्रानित्यात्मन्युच्चरिते शब्देऽनाद्यन्तेन 'विकल्पने' चित्तसन्ततावारोपिताया 'वासनाया' विकल्पिका 'बुद्धयो जायन्ते[1987] समारोपित[1988] गोचराः' कल्पितार्थ[394/s] 'विषया नार्थगोचरा' न स्व[1989] लक्षणविषयाः । तथार्थत्वे शब्दप्रमाणान्तरवैफल्यस्योक्तेः ।[1990] (२८६)

## ख. कृतकत्वेऽपि न दोषः

## (क) कृतकत्वान्न मिथ्यात्वनियमः

---

[1979] १ शक्यनिश्चयः ।

[1980] २ ज्योत्स्नादि ।

[1981] ३ न हि रागादि पुंदोषसंस्कारादेवार्थेषु ज्ञाप्येषु ज्ञापकानां शब्दानां ज्ञानभ्रमः प्रकृत्यापि मिथ्याज्ञानजननस्य संभाव्यत्वाद् वने दवो रात्रौ नीलोत्पलो रक्तप्रतिभासि ज्ञानहेतु ज्योत्स्ना पीते शुक्लज्ञानहेतुरिति विना पुरुषश्च दृष्टेर्वनदवादेः;

[1982] ४ वह्न्यादेः सहकारि बलादस्त्वन्यथात्वं नित्ये तु नैवमिति चेन्न शब्देपि सङ्केतसहकार्यपेक्षत्वादनपेक्ष्य ज्ञानजननस्वभावत्वे सङ्केतकरणव्यापारम्विनापि वेदादर्थज्ञानं सर्वस्य सदा स्यान्न चैवं तन्न स्थितस्वभावतेति मिथ्याज्ञानहेतुत्वं तदवस्थं ।

[1983] ५ इष्टे सति ।

[1984] ६ प्रतीत्य जन्मकाले यत् तदजनकं रूपं तत्स्थस्याजनकत्वात् ।

[1985] ७ एतत्परिहाराय नित्यं स्वकार्यजननञ्च मिथ्याऽदर्शनात्

[1986] ८ नित्याकाशादिभ्यो बुद्धयो भवन्तीत्यपि मृषा न ता (:) तद्भावभाविन्यः क्रमयौगपद्यार्थक्रियाविरोधात् ।

[1987] ९ स्वागमसंस्कारकल्पनाया बाह्यत्वेन ततः ।

[1988] १० आकाशाद्याकारः ।

[1989] १ आकाशादि ।

[1990] २ सत्यार्थं वेदवाक्यमकृतकत्वादित्यत्रान्वयाभावात् व्यतिरेकिप्रयोगमाह ।

ननु (।)

....3.287 मिथ्यात्वं कृतकेष्वेव दृष्टमित्यकृतं वचः ।
सत्यार्थं व्यतिरेकस्य विरोधिव्यापनाद् यदि ॥ २८७ ॥

....3.288 हेतावसम्भवे भावस्तत् तस्यापि शङ्क्यते ।
विरुद्धानाम्पदार्थानामपि व्यापकदर्शनात् ॥ २८८ ॥

'मिथ्यात्व'मर्थशून्यत्वं 'कृतकेष्वेव' वाक्येषु 'दृष्टमि[1991] त्यकृतं वचः' (।) 'सत्यार्थं यदि' स्यात् तदा को दोषः । कस्मादेवमित्याह परः । अकृतकत्वस्य साधनस्य विरोधिना कृतकत्वेन साध्य[1992] विपर्ययस्य मिथ्यात्वस्य व्यापनात्[1993] । अत्राह । विपक्षान्मिथ्यात्वादकृतकस्य हेतोरसंभवेऽसंभवनिमित्तं हेतौ बाधकप्रमाणेऽनुक्ते तस्याकृतकत्वस्यापि मिथ्यात्वे विपक्षे भावः शंक्यते बाधकप्रमाणादर्शनात् ।

ननु मिथ्यात्वं कृतकेषु दृष्टं तदकृतकेषु विरोधिषु कथं स्यादित्याह । 'विरुद्धानामपि' हि व्याप्यानां 'पदार्थानामे'कस्य 'व्यापक'स्य 'दर्शनात्' । यथा प्रयत्नानन्तरीय'कत्वयोरेकेन' कृतकत्वेनानित्यत्वेन वा व्याप्तिः । (२८७,२८८)

किञ्च (।)

....3.289 नासत्ता सिद्धिरित्युक्तं सर्वतोनुपलम्भनात् ।
असिद्धायामसत्तायां सन्दिग्धा व्यतिरेकिता ॥ २८९ ॥

'सर्व्वतो' विपक्षाद्धेतोरसत्ताया 'अनुपलम्भात्' प्रतिबन्धमन्तरेण 'न सिद्धिरित्युक्तं प्राक्' । न चादर्शनमात्रेण विपक्षेऽव्यभिचारिते ??त्यादिना । 'असिद्धायाम्वासत्यायां' विपक्षाद् 'व्यतिरेकिता सन्दिग्धा' (।)

[395/s]

कस्मात् पुनर्व्यतिरेकनिश्चयापेक्षा । न हि साधनतयोपात्तो 'धर्मं' इत्येव साधनं । (२८९) किन्तर्हि (।)

....3.290 अन्वयो व्यतिरेको वा सत्त्वं वा साध्यधर्मिणि ।
तन्निश्चयफलैर्ज्ञानैः सिद्ध्यन्ति यदि साधनम् ॥ २९० ॥

'अन्वयः' सपक्षे[1994] 'व्यतिरेको' विपक्षात्[1995] । 'साध्यधर्मिणि सत्व[1996] म्वा' त'न्निश्चयफलै'रन्वयादिनिश्चयप्रयोजनै'र्ज्ञानैः' प्रमाणात्म'भिर्यदि सिध्यन्ति' तदा 'साधनं भवति' । निश्चितत्रैरूप्यस्यैव हेतुत्वात् । (२९०)

यदपि व्यतिरेकी हेतुरित्युक्तं तद्यायुक्तमित्याह [1997] ।

....3.291 यत्र साध्यविपक्षस्य वर्ण्णते व्यतिरेकिता ।
स एवास्य सपक्षः स्यात् सर्वो हेतुरनन्वयी ॥ २९१ ॥

---

[1991] ३ हेतोः ।
[1992] ४ सत्यार्थत्वस्य ।
[1993] ५ वेदे कृतकनिवृत्तौ मिथ्यानिवृत्तेः सत्यता सेष्टैव ।
[1994] १ स्वसाध्येन हेतोर्व्याप्तिः ।
[1995] २ व्यावृत्तिर्व्वा ।
[1996] ३ हेतोः पक्षधर्मत्वं ।
[1997] ४ य एव मिथ्यात्वव्यवच्छेदस्य विषयः ।

'यत्र' धर्मिणि 'साध्यविपक्षस्य' मिथ्यात्वस्य साधनाविपक्षव्यतिरेकाद् 'व्यतिरेकिता वर्ण्यते' । यत् कृतकं न भवति तन्मिथ्यार्थश्च न भवतीति 'स एव' साध्यसाधनविपर्ययनिवृत्तिदर्शनविषयो धर्मी 'सपक्षः स्यादस्या'कृतकत्वस्य हेतोः । विपर्ययनिषेधेन विधेरेव प्रतिपादनात् । यत्र च साध्यसाधनसत्त्वनिश्चयः स एव पक्षः । 'अतः सर्व्वो हेतुरनन्वयी' न केवलव्यतिरेकी । (२९१)

## (ख) समयत्वान्मन्त्राणां कृतकारिता

ननु [1998] पक्षस्य वेदस्य कथं सपक्षता सपक्षलक्षण[1999] योगात् । एवं तर्हि सर्व्वः पक्षः सपक्षः स्यात् । भवत्येव किमन्येनेति चेत् । अन्यस्यापि लाक्षणिकं तत्कथं त्यज्यतां । किञ्च (।)

...3.292a समयत्वे हि मन्त्राणां कस्यचित् कार्यदर्शनम् ।

किञ्चित्कार्य[2000] कारिणो मन्त्रा अपौरुषेयाश्चेति व्याहतं (।) तथा हि[78b/MA] कस्यचित् सत्यतपःप्रभावतः पुंसः समयत्वे संकेतत्वे मन्त्राणामभ्युपगम्यमाने [396/s] कार्यस्य मन्त्रप्रयोगनिस्प (? ष्प)ाद्यत्वेनेष्टस्य साधनं सिद्धिः स्यात् । केनचिच्छक्तिविशेषवता मत्प्रणीतं मन्त्रमेवंप्रयुञ्जानस्यायमर्थः सेत्स्यतीति समयस्य कृतत्वात् सिद्धिः स्यात् । कविसमयादिवत् काव्यापाठकस्या[2001] र्थसिद्धिः ।

...3.292b अथापि भावशक्तिः स्यादन्यथाप्यविशेषतः ॥ २९२ ॥

'अथापि भावशक्तिः सादृश्यपौरुषेयाणां स्यात्' । यया-[2002] भिमतसिद्धिः । एवन्तर्ह्य'न्यथा' प्रयुक्ते'पि' मन्त्रे [2003] स्यादभिमतम'विशेषतो' वर्ण्णात्मकस्य मन्त्रस्य । (२९२)

## (ग) वर्णक्रमो मन्त्रेष्वकिञ्चित्करः

वर्ण्णानां क्रमविशेषो मन्त्रः ततस्तद्ग्रहणेन फलमिति चेत् ।

....3.293 क्रमस्यार्थान्तरत्वञ्च पूर्व्वमेव निराकृतम् ।
नित्त्यं तदर्थसिद्धिः स्यादसामर्थ्यमपेक्ष्यते ॥ २९३ ॥

'क्रमस्य' वर्ण्णेभ्यो'ऽर्थान्तरत्व'ञ्च 'पूर्व्वमेव निराकृतं' । वर्ण्णानुपूर्व्वी वाक्यञ्चेदित्य ??त्रान्तरे । अस्तु वा क्रमः तस्य नित्यत्वात् तदर्थस्य तन्नि'स्पा' (? ष्पा) द्यस्या'र्थस्य नित्यं सिद्धिः' स्यात् । न ह्यविकले [2004] कारणे कार्यक्षेपो युक्तः । अथ प्रयोगविधानाद्यपेक्षास्ति साप्ययुक्ता । अपेक्षणे कस्यचित् सहकारिणो'ऽसामर्थ्यं' स्वभावतः स्यात् । समर्थस्यान्यापेक्षाऽयोगात् । अपेक्षणीयात् समर्थस्वभावोत्पत्तौ तु स्यादपेक्षा । (२९३)

किञ्च (।)

---

[1998] ५ साध्यधर्मसामान्येन समानोर्थः सपक्षः ।
[1999] ६ साधर्म्यदृष्टान्त उच्यते न चायमिहास्ति साध्यत्वेनान्वय एव सपक्ष उच्यते ।
[2000] ७ सङ्केतत्वादेव पौरुषेयत्वमाह ।
[2001] १ मत्काव्यं यः पठति तस्मै मयेदं देयमिति समयात् कर्त्तुः ।
[2002] २ विधिना नियोगं ।
[2003] ३ तस्य तद्रूपविशिष्टं विधिशून्ये विपरीतपाठादौ च ।
[2004] ४ आधेयातिशयस्य ।

...3.294a सर्वस्य साधनं ते स्युर्भावशक्तिर्यदीदृशी ।

मन्त्राणां भावशक्तिर्यदीदृशी कार्यविशेषसाधिका तदा सर्व्वस्य यजमानस्य इतरस्य[2005] च ते मन्त्रा अभिमतार्थसिद्धेः साधनं स्युः । न हि कार्यकारिता तेषां कश्चिदेव प्रति नेतरान् साधारणत्वाद् भावस्वभावस्य ।

### ग. नित्यत्वे दोषः

#### (क) असंस्कार्यस्य न प्रयोक्तृभेदापेक्षा

अथ प्रयोक्तुर्विशेषमपेक्ष्य फलप्रायाः । तच्चासत् ।
[397/s]

...3.294b प्रयोक्तृभेदापेक्षा च नासंस्कार्यस्य युज्यते ॥ २९४ ॥

प्रयोक्तुर्भेदो यजमानत्वं तदपेक्षा च नित्यस्य परैरसंस्कार्यस्य न युज्यते । (२९४)

....3.295 संस्कार्यस्यापि भावस्य वस्तुभेदो हि भेदकः ।
प्रयोक्तृभेदान्नियमः शक्तौ न समये भवेत् ॥ २९५ ॥

संस्कार्यस्यापि भावस्य[2006] वस्तुनः[2007] संस्कर्त्तुर्भेदो हि भेदको भवितुमर्हति । न तु ब्राह्मणशूद्रादीनां वस्तुतो जातिभेदः कश्चिदस्ति व्यवहा/?/रमात्रत्वात् तस्य । ततश्च प्रयोक्तुर्भेदादपि मन्त्राणां शक्तौ नियमो न सम्भवति । ननूपलभ्यते नियता मन्त्राणां शक्तिः । सत्यमुपलभ्यते किन्तु सा पुरुषकृते समयेऽभ्युपगम्यमाने भवेत् न त्वकृतत्वे । [2008] यो हि ब्राह्मण इति प्रसिद्धः तस्यैवायं विधिप्रयुक्तो मन्त्रः फलप्रदो नेतरस्येति कर्त्रा पुरुषेण शक्तिविशेषवता समितत्वान्मन्त्रस्य । (२९५)

#### (ख) नित्यानां मन्त्राणां प्रयोजको निरर्थकः

किञ्च (।)

....3.296 अनाधेयविशेषाणां किंकुर्वाणः प्रयोजकः ।
प्रयोगो यद्यभिव्यक्तिः सा प्रागेव निराकृता ॥ २९६ ॥

नित्यानामनाधेयविशेषाणां प्रयोक्ता[2009] पुरुषः किंकुर्व्वाणः प्रयोजक इष्टः । अनुपकारकस्य प्रयोजकत्वे सर्व्वस्य तथात्वप्रसङ्गात् । यद्यभिव्यक्तिः प्रयोग उच्यते[2010] साऽभिव्यक्तिर्नित्यानां प्रागेव सामान्यप्रस्तावे निराकृता । न हि स्वरूपपरिणाम[2011] आवरणविगमो वा सा[2012] नित्यातां घटते । (२९६)

---

[2005] ५ पातक्यादेश्च ।
[2006] १ आधेयातिशयस्य ।
[2007] २ कारणस्य ।
[2008] ३ यदा तु समयो मन्त्रस्तदा समयकर्त्ता वस्त्वनपेक्षः समयं करोतीत्याह ।
[2009] ४ अन्यथापि न कश्चित् फलमश्नुतेऽन्यो न शूद्रादिरिति कुतोयं विभागः ।
[2010] ५ नोत्पादनं ।
[2011] ६ नित्त्यस्य तदनुपपत्तेः नित्त्यस्य तु युक्तापेक्षा ।
[2012] ७ अभिव्यक्तिर्न घटते ।

## (ग) नित्यस्य व्यक्तिरसिद्धा

बुद्धिः कदाचित् सम्भाव्यते[2013] । तदा (।)

....3.297 व्यक्तिश्च बुद्धिः सा यस्मात् स फलैर्यदि युज्यते ।
स्याच्छ्रोतुः फलसंबन्धो वक्ता हि व्यक्तिकारणम् ॥ २९७ ॥

[398/s]

तद्'व्यक्तिश्च बुद्धि'रुच्येत । 'सा[2014] यस्माद्' वक्तु[2015] र्भवति 'स फ लेन युज्यते यदि' तदा नातिप्रसङ्गः । नन्वेमपि 'श्रोतुः फलसम्बन्धः[2016]' स्यान्न वक्तुरेव ।[2017] 'वक्ता हि व्यक्ते'र्ज्ञानस्य 'कारण[2018] मिति' फले युज्यते । तच्च[2019] ज्ञानहेतुत्वं श्रोतुरप्यस्त्येव ।[2020] (२९७)

किञ्च (।)

....3.298 अनभिव्यक्तशब्दानां करणानां प्रयोजनम् ।
मनोजपो वा व्यर्थः स्याच्छब्दो हि श्रोत्रगोचरः ॥ २९८ ॥

'अनभिव्य[2021] क्तो'ऽनिवेदितः[2022] 'शब्दो' यैस्तेषां 'करणा'दीनां 'प्रयोजनं' प्रयोगः [79a/MA] यदा । तदा ताल्वादिकरणप्रस्पन्दमात्रयो[2023] पांशुजपः क्रियते न तु व्यक्तमुच्यते । यदा च तामपि विना[2024] मनोमात्रेण 'मनोजपो वा' क्रियते तदा द्वावपि जपाविमौ 'व्यर्थौ' स्यातां ।[2025] 'शब्दो हि श्रोत्रगोचर' उच्यते न च जपयोरनयोः श्रोत्रगोचरः कश्चिदस्ति । (२९८)

....3.299 पारम्पर्येण तज्ज्ञत्वात् तद्व्यक्तिः सापि चेन्मतिः ।
ते तथा स्युस्तदर्था चेदसिद्धं कल्पनान्वयात् ॥ २९९ ॥

[399/s]

---

[2013] ८ नित्यत्वान्न योग्योत्पत्तिः किन्तु शब्दविषया बुद्धिः ।

[2014] १ व्यक्तिः ।

[2015] २ पुरुषात् ।

[2016] ३ यो वक्ता पठ्यमानं मंत्रं शृणोति ।

[2017] ४ यस्मात् ।

[2018] ५ नित्ये शब्दे बुद्धिजन्मार्थं पुंसो व्यापाराभा (वा) दनुपकार्योपकारकत्वान्न वक्ता श्रोतुरुपकार इति विशेषोनयोर्नास्ति ।

[2019] ६ मन्त्रविषयं ।

[2020] ७ किं न फलेन युज्यते ।

[2021] ८ श्रोत्रविषयं न नीतः यैस्ताल्वादिभिः ।

[2022] ९ प्रयोगो व्यर्थः स्यादिति संबन्धः । यत्रौष्ठप्रस्पन्दमात्रेण उपांशुजपः क्रियते सोपि व्यर्थः स्यादित्यादावुत्पत्य व्यक्तिं नित्येषु अनाधेयातिशयेषु ।

[2023] १० यदपि विशिष्टः प्रयोक्ता मन्त्रफलमश्नुत इति तत्रापि समीरितार्थोत्पादयोग्योत्पादनमुत्पन्नस्य उत्तरोत्तरविशेषोत्पादनम्वार्थः सविशेषजन्मनि स्यात् ।

[2024] ११ ताल्वादिकरणप्रस्यन्दमात्रां ।

[2025] १२ यस्माच्छ्रोत्रग्राह्य एव शब्दः तत्स्वभावश्च मन्त्रः । उपांशुमनोजपयोश्च श्रोत्रग्रहणाभावादशब्दत्वं तत्त्वादमन्त्रः कथं फलवान् । अयमाशयः शब्दात्मनां मन्त्राणां व्यक्तिहेतुः शब्दग्राहिज्ञानहेतुपुरुषः प्रयोक्ता तस्य फलेन सम्बन्धः चेत् । तदोपांशुमनोजापी न फलयोगी स्यादभिव्यक्त्यहेतुत्वात् । मन्त्रस्य श्रोत्रग्राह्यापौरुषेयं नित्यत्वाभ्युपगमात् ।

ननु याप्युपांशुमनोजपकाले शब्दाभासा धीः सापि[2026] मतिः 'पारम्पर्येण तज्जत्वात्' तस्य 'व्यक्ति'रिति चेत् । यद्येवं शब्दाविकल्पवदर्थविकल्पा [2027] अपि तत्प्रभवा इति 'ते'पि [2028] 'तथा' शब्दव्यक्तयः 'स्युः' । परः न केवलाच्छब्दप्रभवत्वात् तद्यक्तिः[2029] किन्तु 'तदर्था' शब्दविषया सतीति 'चेत्' न चार्थविकल्पः शब्दविषयः । शब्दविकल्पस्य [2030] शब्दविषयत्वमसिद्धं 'कल्पनाया' वाच्यवाचकयोजनाया 'अन्वयात्' सम्बन्धात् न च कल्पना वस्तुविषयेति [2031] कथ्यते । (२९९)

### घ. समयकाण्णामुक्त्या फलविशेषः

अस्माकन्तु मते (।)

....3.300 स्वसामान्यस्वभावानामेकभावविवक्षया ।
उक्तेः समयकाण्णामविरोधो न वस्तुनि ॥ ३०० ॥

स्वसामान्यस्वभावानां शब्दस्वलक्षणसामान्यलक्षणानां प्रत्यक्षविकल्पबुद्धिविषयाणामेक[2032]त्वाध्यवसायवशादेकभावस्यैकत्वस्य । विवक्षया समयकाराणां समयकर्तृभिः शक्तिमत्पुंभिर्मन्त्राणामुक्तेरविरोधः । उपांशुजपमनोजपयोर्वैफल्य[2033]विरोधाभावो दृश्यविकल्प्यावेकाध्यवसायादेककार्यकारित्वेनाधिष्ठितत्वात् तत्कुरुतः । ये तु वस्तुभूतं मन्त्रमिच्छन्ति तेषाम्विरोध एव तदाह । न वस्तुनि विरोधाभावः । न ह्युपांशुजपादिविषयो वस्तुकल्पितत्वात्[2034] । (३००)
[400/s]

### ङ वर्णानुपूर्विचिन्ता

### (क) आनुपूर्व्यभावे नार्थभेदः

अथ त्वन्मतेपि (।)

....3.301 आनुपूर्व्यामसत्यां स्यात् सरो रस इति श्रुतौ ।
न कार्यभेद इति चेद् अस्ति सा पुरुषाश्रया ॥ ३०१ ॥

आनुपूर्व्या वर्णव्यतिरिक्तायामसत्यां सरो रस इति प्रसिद्धानुलोमविलोम क्रमायां श्रुतौ कार्यस्य स्वज्ञानस्य भेदो न स्यादिति चेत् । अस्त्यस्मन्मते सानुपूर्वी पुरुषाश्रया[2035] पुरुषकृता प्रतिपदं[2036] भिन्ना ततो न ज्ञानभेदप्रसङ्गः । (३०१)

तथा हि (।)

---

[2026] १ तद्यक्तिस्तस्य शब्दस्य व्यक्तिर्ज्ञानं पूर्वशब्दजज्ञाना हि संस्कारस्य मनोजपे शब्दप्रतिभासात् मन्त्रत्वं ।

[2027] २ संकेतात् किल वादिनो मनोजपादिसाफल्यमाह दृश्यविकल्प्यैक्यात् ।

[2028] ३ विकल्पा अपि मन्त्रा इति तत्प्रयोक्तापि फलभाग् स्यात् । एतेनातिप्रसङ्ग उक्तः ।

[2029] ४ यतस्तद्वान् प्रयोक्ता स्यात् ।

[2030] ५ स्वलक्षणाविषयत्वाद् विकल्पस्य समयकाराभिप्रायसंवादनात् फलप्राप्तेः । न तु वस्तुन्यविरोधः शब्दात् फले मननमशब्दो यतः ।

[2031] ६ वासनाप्रबाधादुत्पत्तेर्बाह्यासत्त्वेपि ।

[2032] ७ दृश्यविकल्पैक्यात् ।

[2033] ८ समयकाराभिप्रायसम्पादनात् फलप्राप्तेः न तु वस्तुन्यविरोधः शब्दात् फले मननमशब्दो यतः ।

[2034] ९ यदुक्तं वर्णा एव मन्त्रस्तत्र ।

[2035] १ वर्णाव्यतिरिक्ता ।

[2036] २ तत्रैकत्वाध्यवसायः परं मन्दानां ।

....3.302 यो यद्वर्णसमुत्थानज्ञानजाज्ज्ञानतो ध्वनिः ।
जायते तदुपाधिः स श्रुत्या समवसीयते ॥ ३०२ ॥

यो ध्वनिर्जायते तद्वर्णसमुत्थो ज्ञानतः । यश्चासौ वर्णश्च यद्वर्णस्तस्य समुत्थानं कारणं तच्च तत् ज्ञानञ्च यद्वर्णसमुत्थानज्ञानं तस्माज्ज्ञातं यद्वर्णसमुत्थानज्ञानजं तस्मात् ज्ञानमतः । अयमर्थ आद्यस्य वर्ण्ण[2037] स्य यत्समुत्थापकं विवक्षात्मकं ज्ञानं तेन समनन्तरप्रत्ययेन सता द्वितीयवर्ण्णसमुत्थापकं ज्ञानं जन्यते तेन च द्वितीयो वर्ण्ण एवं द्वितीयवर्ण्णसमुत्थापकात् ज्ञानात् तृतीयवर्ण्णेत्थापकज्ञानोत्पत्तौ तृतीयवर्णोत्पत्तिरिति कारणक्रमाद्वर्णोत्पत्तिक्रम उक्तः[2038] । पुनः कार्यक्रमेण क्रमं दर्शयितु माह[2039] । स उत्तरो वर्णस्तदुपाधिः पूर्णवर्णविशेषणस्तदनन्तर इत्यर्थः । श्रुत्या श्रवणज्ञानेन ग्राह्यवर्णकार्येण श्रोतृसन्तानवर्त्तिना समवसीयते । क्रमोत्पन्ना वर्णाः स्वस्वजनितज्ञानैरसहभाविन एव गृह्यन्ते । (३०२)

ननु क्रमभाविनां सहदर्शनाभावात्कथं पूर्ववर्णोपाधि[2040] ग्रहणमित्याह (।)
[401/s]

....3.303 तज्ज्ञानजनितज्ञानः स श्रुतावपटुश्रुतिः ।
अपेक्ष्य तत्स्मृतिं पश्चात् स्मृतिमाधत्त आत्मनि ॥ ३०३ ॥

तस्य पूर्व्ववर्णस्य 'ज्ञानेन' ग्राहकेणोत्तरवर्ण्णसहकारिणा 'जनितं' ग्राहकं[2041] 'ज्ञानं' यस्मिन् स तत् ज्ञानजनित उत्तरो वर्ण्णः मन्दमुच्चार्यमाणत्वात्[2042] श्रुतौ श्रवणज्ञानेऽ'पटश्रुति'र्मन्दचारि[2043] श्रवणज्ञानः । तस्य पूर्व्ववर्ण्णस्य 'स्मृतिमपेक्ष्या[2044]त्मनि' स्मृतिं पूर्व्ववर्णानन्तरत्वेनाधत्ते (।) यस्मात् पूर्व्ववर्णानन्तरत्वेनोत्तरः स्मर्यते (।) तस्मात्तदनन्तर एवासौ गृहीत इत्यर्थः । (३०३)

## (ख) आनुपूर्वी पौरुषेयी

....3.304 इत्येषा पौरुषेय्येव तद्धेतुग्रीहिचेतसाम् ।
कार्यकारणता वर्णे ह्यानुपूर्वीति कथ्यते ॥ ३०४ ॥

इत्येवमुक्तेन क्रमेण [2045] वर्ण्णेषु क्रमभाविषु तद्धेतुचेतसां वर्ण्णो[2046] त्थापकचेतसा-
[79b/MA] वक्तृसन्तानवर्तिनां । 'तद्ग्राहिचेतसां' वर्ण्णग्राहकचेतसां श्रोतृसन्तानवर्तिनां 'कार्यकारणतैषा' यथायोगं वर्ण्णापेक्षा क्रमवती कारणता कार्यता चा'नुपूर्वी' कथ्यते (।) सा च पुरुषनिर्वर्त्त्यत्वात् 'पौरुषेय्येव' । (३०४)

---

[2037] ३ वक्तृस्थं पूर्वपूर्ववर्ण्णसमुत्थापकहेतु ।

[2038] ४ कारणभेदात्कार्यभेदमुक्त्वा ।

[2039] ५ वर्णाश्च क्रमेणोत्पन्नाः श्रोतृसंतानस्थानां स्वविषयज्ञानानां क्रमेण हेतवो भवन्तो जायन्त इति दर्शयन्नाह ।

[2040] ६ परकाले पूर्ववर्णध्वंसात् ।

[2041] १ साकारालम्बनं ज्ञानकाल एवाकारसमुत्थापकचित्तेनाकारो जनित इति समकालता ।

[2042] २ शनैरुच्चारितो यदा वर्ण्णः ।

[2043] ३ यो मनसापि जपेत् तदर्थकरोहमिति यत्र विभक्ता वर्ण्णा अवधार्यन्तेवस्थायां ।

[2044] ४ त्वरिते क्रमश्रुतिः कुतः ।

[2045] ५ एवं रेफाकारविसर्जनीयोत्थापकानि पूर्वपूर्वसमनन्तरप्रत्ययानि ।

[2046] ६ कार्यजन्यत्वात् ।

....3.305 अन्यदेव ततो रूपं तद्वर्ण्णानां पदे पदे ।
कर्त्तृसंस्कारतो भिन्नं सहितं कार्यभेदकृत् ॥ ३०५ ॥

यतो न नित्यत्वं 'ततोन्यदेव वर्ण्णानां तद्रूपं पदे पदे' प्रतिपदमेकाध्यवसायविषयत्वेपि[2047] 'कर्त्तृ[2048] संस्कारतो' वर्ण्णसमुत्थापकचित्तशक्तिभेदाज्ञातं 'भिन्नं[2049]' । क्रमेण चानुभूय स्मृत्या 'सहितं' स्मृतं सत् 'कार्यभेदकृदर्थ'प्रतिपत्तिविशेषकारि । (३०५)
[402/s]

....3.306 सा चानुपूर्वी वर्ण्णानां तद्धेतुग्राहिचेतसाम् ।
इच्छाऽविरुद्धसिद्धीनां स्थितिक्रमविरोधतः ॥ ३०६ ॥

....3.307 कार्यकारणतासिद्धेः पुंभ्यो वर्णक्रमस्य च ।
सर्वो वर्णक्रमः पुंभ्यो दहनेन्धनयुक्तिवत् ॥ ३०७ ॥

'सा च वर्णानामानुपूर्व्वी[2050]' तद्धेतुग्राहिचेतसां रचनाकृतः पुरुषात्प्रवृत्तेति न स्थितक्रमा वर्णाः पुरुषेच्छयाऽविरुद्धसिद्धीनां वर्ण्णानां स्थितस्य क्रमस्य विरोधात् (।) न हि स्थितक्रमाणां हिमवद्विन्ध्यमलयानामिच्छया विपरीतक्रमः शक्यः (।) वर्ण्णास्त्विच्छया विपर्य्यास्यन्तें विकल्पक्रमानुविधायित्वाच (।) तद्वत् कल्पितोप्यर्थो न प्रमाणं 'कार्यकारणतायाः सिद्धेः (।) सर्व्वो' वैदिकोऽन्यश्च 'वर्ण्णक्रमः[2051] पुंभ्यो[2052]' भवतीत्यवधारणं । 'दहनेन्धनयुक्तिवत्' (।) [2053] यथैकस्य दहनस्य इन्धनपूर्व्वकत्वदृष्ट्या सर्व्वोऽग्निरिन्धनपूर्व्व इति न्यायः । (३०६, ३०७)

....3.308 असाधारणता सिद्धा पुंसां च क्रमकारिणां ।
अतो ज्ञानप्रभावाभ्यामन्येषां तदभावतः ॥ ३०८ ॥

अतएव च मन्त्राख्य वर्ण्णक्रमकारिणां पुंसां ज्ञान[2054] प्रभावाभ्यां पुरुषान्तरैः सहासा-'धारणता'ऽसमानता[2055] 'सिद्धा । अन्येषा[2056] न्तयोर्ज्ञानप्रभा'वयो'रभावतः' । (३०८)

## च. आप्तचिन्ता

### (क) आप्तसिद्धिः

a. ननु तन्त्रज्ञा रत्थापुरुषा अपि मन्त्रं किञ्चित् कार्यसमर्थ प्रणयन्तो दृश्यन्ते । ततो मन्त्रकरणा[2057] न्नातिशयसिद्धिरित्याह ।

[2047] ७ अन्यथा देशाद्यनियमान्नियमे च देशादेरेवेन्धनत्व ।
[2048] ८ क्रमभेद एव वर्ण्णभेदः केवलं रसपदात्र स पदान्तरस्याभेदो नावधार्यते ।
[2049] ९ यतः ।
[2050] १ (वर्ण्णनिरर्थकत्वेपि एकविकल्पेन विषयीकृताः क्रमिणो वर्ण्णाः सहिता उक्ताः) ।
[2051] २ (पुरुषः कारणं वर्ण्णक्रमस्येति) ।
[2052] ३ पुंविकल्पानुक्रमे सति भावादसति वा भावात् ।
[2053] ४ तथा लोकवर्ण्णक्रमवद् वैदिकः साध्यते ।
[2054] ५ समीहितफलसाधनवर्ण्णक्रमज्ञानं समीहितसंपादनशक्तिप्रभावः ।
[2055] ६ तदयं क्रमवत्त्वेन ज्ञातुः स परोक्षदृश्यस्ति ।
[2056] ७ प्राक्तनानाम् ।
[2057] ८ एवमन्योपि स्यात् कथं पुरुषातिशयसिद्धिः ।

....3.309 येपि मन्त्रविदः केचिन् मन्त्रान् कांश्चन कुर्व्वते ।
प्रभोः प्रभावस्तेषां स तदुक्तन्यायवृत्तितः ॥ ३०९ ॥

[403/s]

'यपि' केचित् साधारणा 'मन्त्रविदो' मन्त्रशास्त्रज्ञाः 'कांश्चन मन्त्रान्' विषादिशमनान् 'कुर्व्वते तेषां' प्रभोर्मन्त्रप्रणेतुरतिशयितशक्तेः 'स प्रभावः' सामर्थ्यं[2058] 'तदुक्त'स्य न्यायस्य समयानुष्ठानादे'र्वृत्तितः' । आराधितस्य प्रभोः प्रभावादीदृगक् शक्तिलाभ इत्यर्थः[2059] । (३०९)
तस्मात् (।)

....3.310 कृतकः पौरुषेयाश्च मन्त्रा वाच्याः फलेप्सुना ।
अशक्तिसाधनं पुंसामनेनैव निराकृतम् ॥ ३१० ॥

कृतकाः पौरुषेयाश्च मन्त्रा वाच्याः । 'फलेप्सुना' सर्व्वेण येन पुरुषाः शक्तिविशेषवन्तो मन्त्रान् प्रणेतुमीशते (।) [2060] 'अनेनैव' मन्त्रादिप्रणयनं प्रति 'पुंसामशक्तिसाधनं' यत् किमपि मी मां स कैरिष्टं त'न्निराकृतं' बोद्धव्यं । (३१०)
एतदेव स्फुटयितुमाह (।)

....3.311 बुद्धीन्द्रियोक्तिपुंस्त्वादिसाधनं यत्तु वर्ण्यते ।
प्रमाणाभं यथार्थास्ति न हि शेषवतो गतिः ॥ ३११ ॥

'[2061] बुद्धीन्द्रियोक्तिपुंस्त्वादिसाधनं' शक्तिविशेषनिराकरणं 'यत्तु वर्ण्यते' तत् 'प्रमाणाभमनै'कान्तिकं (।) न हि बुद्धिमत एकस्य शक्तिविशेषो न दृष्ट इत्यन्यस्यापि तथा । अभ्यासाधीनो हि प्रकर्षो गुणेषु तदभिलाषादभ्यासोपि सम्भवी (।) दृश्यते च प्रज्ञादिगुणानामतिशयितः प्रकर्ष इति बुद्धिमत्त्वाद्यसाधनं ।[2062] 'न हि शेषवतो' लिङ्गात् (।) 'यथार्था-'नुमेयस्य 'गति'र्भवितुमर्हति । (३११)

b. अपि च (।) पुरुषातिशयमनिच्छतां जैमिनीयानां महत् दुःश्लिष्टं । तथा हि (।)

....3.312 अर्थोयं नायमर्थो न इति शब्दा वदन्ति न ।
कल्प्योयमर्थः पुरुषैस्ते च रागादिसंयुताः ॥ ३१२ ॥

[404/s]

'अयमर्थो'ऽस्य शब्दस्यायं 'नेति' न ताव'च्छब्दाः' स्वयं 'वदन्ति' । तस्मात् 'पुरुषैरयमर्थः कल्पः । ते च रागादियुक्ता' नावधार[2063] णपटवः । (३१२)

....3.313 स एकस्तत्त्वविन्नान्य इति भेदश्च किंकृतः ।
तद्वत् पुंस्त्वे कथमपि ज्ञानी कश्चित् कथं न वः ॥ ३१३ ॥

अथ रागिष्वपि कश्चि ज्ज्ञै मि न्या दिर्जानात्येव । तत्रे'कस्त[2064] त्त्वविदन्यो नेति भेदश्च किंकृत' एषः । रागित्वाविशेषात् सर्व्व एवाज्ञः प्राप्तो न वा कश्चित् । अथ पुरुषत्वसाम्येपि जैमिन्यादिरतीन्द्रियार्थदर्शित्वाद् वैदिकशब्दानामतीन्द्रियार्थसम्बन्धवेत्ता कल्प्यते (।) तदा 'पुंस्त्वे'

[2058] १ प्रभुस्तुष्टस्तत्प्रणीतानप्यधितिष्ठतीति भावः ।
[2059] २ अपि च केचित् मन्त्र(ान्) कुर्व्वते न सर्व्व इति वदता पुरुषातिशय एव समर्थितः स्यात् ।
[2060] ३ मन्त्रकर्त्तुर्ज्ञानातिशयसाधनेन वस्तुबलायातस्य निवारणसाधनाभावात् ।
[2061] ४ सत्त्वादिन्द्रियत्वाद् वचनात् पुंस्त्वन्तस्या(?)पुरुषवदित्यत आह । आदिना प्राण्यादिमत्वात् ।
[2062] ५ विपक्षवृत्तेः सन्दे(हे)न सर्वस्य शेषवत्वात् ।
[2063] १ तत्कल्पितो न प्रमाणं पुरुषातिशयाभावप्रतिज्ञापि विरोधिता त्वयं ।

सत्यपि कश्चिदन्योपि 'ज्ञानी' ज्ञानातिशयवान् 'कथमप्य-' भ्यासादिना 'तद्वज्जैमिन्या'दिवत् । 'कथम्वो[2065]' मीमांसकानां नाभिमतः । (३१३)

## (ख) आप्तलक्षणम्

स्यादेतन्न वयं पुरुषप्रमाण्याद् व्याख्यानमनुमन्यामहे । किन्तु (।)

....3.314 प्रमाणमविसंवादि वचनं सोर्थविद् यदि ।
न ह्यत्यन्तपरोक्षेषु प्रमाणस्यास्ति सम्भवः ॥ ३१४ ॥

'यस्य प्रमाणमविसम्वादि वचनं सोर्थवित्' वेदार्थज्ञाता 'यदी'ष्यते । नन्व'त्यन्त'[80a/MA] 'परोक्षेषु' वेदार्थेषु 'प्रमाणस्य सम्भवो न हि' कस्यचि'दस्ति' तत्कथं सम्वादादर्थविद् व्यवस्थाप्यते । (३१४)

अपि च[2066] (।)

....3.315 यस्य प्रमाणसंवादि वचनं तत्कृतं वचः ।
स आगम इति प्राप्तं निरर्थाऽपौरुषेयता ॥ ३१५ ॥

'यस्य प्रमाणसम्वादि वचनं' स यदि व्याख्याता तदा सम्वाद आगमलक्षणमिति 'तेन संस्कृतं[2067] वच आगम इति[2068] प्राप्त'मिति 'निरर्थाऽपौरुषेयता' वेदानां कल्पिता । (३१५) [405/s]

## (ग) परपक्षे दोषाः

a. तथा (।)

....3.316 यद्यत्यन्तपरोक्षेर्थेऽनागमज्ञानसम्भवः ।
अतीन्द्रियार्थवित् कश्चिदस्तीत्यभिमतं भवेत् ॥ ३१६ ॥

'यद्यत्यन्तपरोक्षेर्थे' स्वर्गसम्बन्धादौ 'जै मि न्या देरनागम'स्यागमनिरपेक्ष[2069] स्य 'ज्ञानस्य सम्भवः' । तदाऽ'तीन्द्रियार्थ'दर्शी[2070] 'कश्चिदस्तीत्यभिमतं भवेत्' । ततस्तत्प्रतिक्षेपो न युक्तः । (३१६)

यदि तु न कश्चिदतीन्द्रियार्थदर्शी तदा (।)

....3.317 स्वयं रागादिमान्नार्थं वेत्ति वेदस्य नान्यतः ।
न वेदयति वेदोपि वेदार्थस्य कुतो गतिः ॥ ३१७ ॥

[2064] २ ज्ञानवानन्यो प्रसक्तः ।

[2065] ३ मन्त्रकर्त्तुर्ज्ञानातिशयसाधनेन वस्तुबलागतस्य निवारणे को दोषः (?) ।

[2066] ४ बहुषु व्याख्यातृषु यः प्रमाणं प्रत्यक्षादि संस्यन्दयति तद्भाषितं गृह्यत इति ब्रुवताऽपौरुषेयत्वादागमलक्षणादन्यदेवमागमलक्षणं स्यादित्याह ।

[2067] ५ प्रमाणानुगृहीतत्वे ख्यापनं संस्कृतत्वं ।

[2068] ६ न प्रकाशयति जैमिनिशवरस्वाम्यादिवैयर्थ्यासङ्गात् ।

[2069] १ परोक्षे ।

[2070] २ अनुमानस्याध्यक्षपूर्वत्वात् ।

'स्वयं रागादिमान्' पुमान् 'वेदस्यार्थं न वेत्ति न चान्यतः[2071]' अन्यस्यापि रागादिमत्वेऽज्ञानत्वात् । 'वेदोपि' स्वार्थ 'न [2072] वेदयति' ततश्च 'कुतो वेदार्थस्य गतिः' । न कुतश्चिदिति पुरुषा एव यथाप्रतिभं कल्पयेयुः । (३१७)

....3.318 तेनाग्निहोत्रं जुहुयात् स्वर्गकाम इति श्रुतौ ।
खादेच्छ्वमांसमित्येष नार्थ इत्यत्र का प्रमा ॥ ३१८ ॥

'तेनाग्निहोत्रं जुहुयात् स्वर्गकाम इति श्रुतौ[2073]' वेदवाक्ये 'श्वमांसं स्वादेदित्येष नार्थ इत्यत्र का प्रमा' । इत्यपि कल्पयितुं शक्यत्वात्[2074] । (३१८)

b.

....3.319 प्रसिद्धो लोकवादश्चेत्तत्र कोतीन्द्रियार्थदृक् ।
अनेकार्थेषु शब्देषु येनार्थोयं विवेचितः ॥ ३१९ ॥

अग्निर्दाहादिसमर्थः तस्मिन् घृतादिप्रक्षेपश्च हवनमिति 'प्रसिद्धो लोकवादः' ततो नान्यार्थकल्पनेति चेत् । 'तत्र' लोके रागादिमति 'कोऽतीन्द्रियार्थदृगस्ति येनानेकार्थे'ष्वनेकार्थाभिधानयोग्येषु 'शब्देष्व'यमभिमतो'[2075] र्थो विवेचितो' वाच्यतया विशेषणव्यवस्थापितः । यदि दाहकद्रव्ये घृतप्रक्षेपस्य स्वर्गेण सम्बन्धः श्वमांसभक्षणेन [406/s] च नास्तीति केनापि दृष्टं स्यात् स्यादयमर्थविवेकः । तद्दर्शी तु रागादिमत्वात् कश्चिन्नेष्ट इति नास्ति विपरीतकल्पनानिरासः । (३१९)

न च लोकप्रसिद्धानुसाराद् वेदार्थव्यवस्था । तथा हि (।)

....3.320 स्वर्गोर्वश्यादिशब्दश्च दृष्टोरूढार्थवाचकः ।
शब्दान्तरेषु तादृक्षु तादृश्येवास्तु कल्पना ॥ ३२० ॥

'स्वर्गोर्वश्यादिशब्दश्चारूढार्थवाचको[2076] दृष्टः' । मनुष्यातिशायिपुरुषविशेषनिकेतोऽतिमानुषसुखाधिष्ठानो नानोपकारणः स्वर्गः । तत्स्थाऽप्सरा उ र्व शी ति प्रसिद्धो लोकवादः[2077] । तमुल्लंध्य दुःखेनासम्भिन्ना निरतिशया प्रीतिः स्वर्गः । उर्वशी चारणिः पात्री वेत्यप्रसिद्धार्थकल्पनेति । 'शब्दान्तरे[2078]'ष्वग्निहोत्रादिषु 'तादृक्षु' सर्वार्थयोग्येषु 'तादृश्येवा'प्रसिद्धार्थैव 'कल्पनास्तु' न्यायस्य तुल्यत्वात् । (३२०)

किञ्च (।)

....3.321 प्रसिद्धश्च नृणां वादः प्रमाणं स च नेष्यते ।
ततश्च भूयोर्थगतिः किमेतद् द्विष्टकामितम् ॥ ३२१ ॥

---

2071 ३ न ह्यन्धेनाकृष्यमाणोन्धोवगच्छति वर्त्म ।

2072 ४ अज्ञातार्थत्वेन वेदस्य ।

2073 ५ क्वचिदप्यर्थे प्रत्यासत्तिविप्रकर्षरहितायां ।

2074 ६ अनुमानस्याप्यध्यक्षपूर्वत्वात् ।

2075 ७ अयमर्थो वेदस्य नान्य इति विभक्तो ।

2076 १ वेदवादिना कृतो ।

2077 २ पौरुषेये नायं दोषः संप्रदायसम्भवात् । लोकसंकेतप्रसिद्धशब्दानुविधानात् । शब्दानामनेकार्थत्वेपि । पुरुषोपयोगिनमेवागमार्थं चतुःसत्यं निश्चिन्वन्ति सौगता न प्रवादमात्रं वृद्धस्येत्यतोप्यदोषः ॥ एतत् त्रयं वेदेनेति त्याज्यन्तदित्याह ।

2078 ३ प्रदेशान्तरे वन्हौ घृतहवनमुक्तं ततो निश्चय इत्यपि न तस्याप्यसिद्धार्थत्वात् । श्वमांसकल्पनैवास्तु ।

'प्रसिद्धश्च नृणाम्वाद' एव न त्वन्यथा काचित् । 'स च' पुरुषप्रवर्त्तितत्वात् 'प्रमाणं नेष्यते' भवता । 'भूयः' पुन'स्ततो' जनवादा'दर्थ'स्य 'गति'रिति 'किमेतत्' द्विष्ठकामितं । लोकवादोऽप्रमाणत्वात् द्विष्ठः संप्रति काम्यते इति व्यक्तो विरोधः । (३२१)

....3.322 अथ प्रसिद्धिमुल्लंध्य कल्पने न निबन्धनम् ।
प्रसिद्धेरप्रमाणत्वात् तद्ग्रहे किं निबन्धनम् ॥ ३२२ ॥

'अथ' लोकस्य 'प्रसिद्धिमुल्लंध्य' श्वमांसभक्षणाद्यर्थ'कल्पने न निबन्धनमस्ति । ननु प्रसिद्धेरप्रमाणत्वात्' तस्या 'ग्रहे[2079] किं निबन्धनं' विचारकस्य न किञ्चित् । (३२२)

किञ्च (।)

....3.323 उत्पादिता प्रसिद्ध्यैव शङ्का शब्दार्थनिश्चये ।
यस्मान्नानार्थवृत्तित्वं शब्दानां तत्र दृश्यते ॥ ३२३ ॥

[407/s]

प्रसिद्ध्यैव शब्दार्थनिश्चये विपरीतार्थकल्पनाया शङ्कोत्पादिता । यस्मान्नानार्थवृत्तित्वं शब्दानां गवाक्षप्रभृतीनां तत्र प्रसिद्धौ दृश्यते (। ३२३)

c. तथा (।)

....3.324 अन्यथासम्भवाभावात् नानाशक्तेः स्वयं ध्वनेः ।
अवश्यं शङ्कया भाव्यं नियामकमपश्यताम् ॥ ३२४ ॥

'नानाशक्ते'रनेकार्थप्रतिपादनयोग्यस्य 'ध्वनेः स्वय'मात्मनाऽन्यथासम्भवस्य एकार्थप्रतिपादन[2080] योग्यतासम्भवस्यासम्भवात् । 'अवश्य'मर्थान्तर'शङ्कया भाव्यं' । कथमित्याह । 'नियामकमपश्यताम'नेकार्थस्य शब्दस्य एकवृत्तिनियमकारणमपश्यतां पुंसां ।[2081] (३२४)

d. किञ्च (।)

....3.325 एष स्थाणुरयं मार्ग इति वक्तीति कश्चन ।
अन्यः स्वयं ब्रवीमीति तयोर्भेदः परीक्ष्यताम् ॥ ३२५ ॥

स्वयमर्थप्रतिपादनशून्यो नेता[2082] नभिमतार्थद्योतकत्वेन प्रतिपादयन् कर्त्तुर्न्न[80b/MA] भिद्यते । तस्याप्येवं व्यापारत्वात् । यथा केनचित् 'कश्चन[2083]' पन्थानं पृष्ठ आह । नाहं जाने किन्तु 'स्थाणुरेष[2084] वक्ति (।) अयं मार्ग इति । अन्यः' पुनः प्रत्याह (।) अहं 'स्वयं ब्रवीमि' (।) 'अयं' मार्ग 'इति' (।) 'तयोरेवं' वादिनोः प्रतिपादकत्वस्य 'भेदः परीक्ष्यतां' (।) एको निरभिप्राय[2085] वचनं वक्तृत्वेन व्यपदिशति । अन्यस्तु नेति वचनवैदग्ध्य[2086] मेवानयोर्भिद्यते नोपदेशप्रवृत्तिनिवृत्ती । तथा स्वयमर्थ प्रतिपादयतोपि वेदार्थविशेषाभिधायिनोऽभिदधत् कर्त्तेव वाचकतायाः । (३२५)

e. अथ तदर्थप्रतिपादने योग्या एव शब्दाः । नन्वेवं (।)

---

[2079] ४ प्रसिद्धिग्रहोपि मा भूत् ।

[2080] १ साध्यार्थादन्यत्र वृत्तिरन्यथा । तदसम्भवो यस्तस्याभावादिति द्वौ निषेधौ सम्भवोन्यथापि ।

[2081] २ यत एव तस्मादज्ञातार्थशब्देष्वप्रमाणकार्यारोपन्निश्चित्य व्याचक्षाणो जैमिनिस्तद्व्याजेन स्वमतमेवाहेत्यर्थं दर्शयन्नाह ।

[2082] ३ वैदिकशब्दान्...वैकत्वे नियमः ।

[2083] ४ पाटलिपुत्रस्य ।

[2084] ५ मार्गोपदेशसामर्थ्यशून्यस्थाणुव्याजेन मार्गमाह ।

[2085] ६ स्थाणोः ।

[2086] ७ जडस्य प्रतिपत्तिमान्द्यादन्यत्र विशेषो नानयोः ।

....3.326 सर्व्वत्र योग्यस्यैकार्थद्योतने नियमः कुतः ।
ज्ञाता वातीन्द्रियाः केन विवक्षावचनादृते ॥ ३२६ ॥

[408/s]

'सर्व्वत्रार्थे योग्यस्य' शब्दस्य 'एकार्थद्योतेने' नियमः 'कुतो' जातः (।) पुरुषश्चेन्नियामको न भवति । स्यादेतत् (।) प्रतिनियता एवार्थास्तेषां न ते पुरुषेण नियम्यन्ते । एवमपि [2087] 'ज्ञाता वा अतीन्द्रियाः' प्रतिनियता अर्थाः[2088] 'केन' पुरुषेण रागादिमता 'विवक्षा-'या(ः) प्रकाशकात् 'वचनात्' प्रतिपादना'दृते (।) न' हि वेदेषु कस्यचिद् विवक्षास्ति (।) तदवगतिमन्तरेण च प्रतिनियतार्थता न शक्या बोद्धुं । न हि शब्दाः स्वयं स्वार्थनियमं कथयन्ति संकेतमन्तरेण(।) स च पौरुषेयः । न चार्थनियमावगमं विना संकेतकरणं अर्थनियमप्रतीतिश्च विना संकेतं नास्तीति 'व्यक्त'मितरेतराश्रयत्वं । (३२६)

f. अपि च (।)

....3.327 विवक्षानियमे हेतुः सङ्केतस्तत्प्रकाशनः ।
अपौरुषेये सा नास्ति तस्य सैकार्थता कुतः ॥ ३२७ ॥

'विवक्षार्थ'स्य 'नियमे हेतुः संकेतः तत्प्रकाशनो'ऽर्थनियमबोधनः । 'अपौरुषेये च' वेदे 'सा' विवक्षा नास्ति पुरुषप्रयोज्यत्वात् तस्याः । ततस्तत्प्रसाध्या सा 'एकार्थता' वेदस्य 'कुतः' । (२२७)

अथ (।)

....3.328 स्वभावनियमेन्यत्र न योज्येत तया पुनः ।
सङ्केतश्च निरर्थः स्याद् व्यक्तौ च नियमः कुतः ॥ ३२८ ॥

'स्वभावतः' शब्दाः क्वचिदर्थे नियता[2089] स्तदा स्वभावनियमे[2090] 'ऽन्यत्रार्थे' वाचकत्वेन 'तया' विवक्षया 'न योज्येत पुनः' । न हि स्वभावेन प्रतिनियताविषयोन्यथा कर्तुं शक्यते[2091] । 'संकेतश्च निरर्थः स्यात्' स्वभावप्रतिनियमे सति न हि चक्षुरिन्द्रियं रूपग्रहणप्रतिनियतं तत्र सङ्के[2092] तमपेक्षते ।[2093] सङ्केताद् वाचकताया[2094] 'व्यक्ता'विष्यमाणायां 'नियमः कुतः' (।) अयमेवास्य शब्दस्यार्थ इति नियमो न युज्यते पुरुषाधीनसङ्केतापेक्षायां । (३२८)

तथाहि (।)

[409/s]

....3.329 यत्र स्वातन्त्र्यमिच्छाया नियमो नाम तत्र कः ।
द्योतयेन् तेन सङ्केतो नेष्टामेवास्य योग्यताम् ॥ ३२९ ॥

---

[2087] १ तथापि तं ज्ञातुमशक्तः पुरुषः ।

[2088] २ पुरुषातिशयानिष्टेः ।

[2089] ३ न विवक्षातः ।

[2090] ४ स शब्दो यथेष्टं सम्वादितं तुल्यरसमिति ।

[2091] ५ चक्षुरिव रूपे ।

[2092] ६ संकेतापेक्षप्रतीतयस्तु स्वप्रतीत्यर्थसंकेतितराजचिह्नवत् ।

[2093] ७ वैदिकार्थो निसर्गसिद्धः संकेतेन व्यज्यत इत्याह ।

[2094] ८ स्वभावविशेषस्य ।

यत्र[2095] पुरुषस्य स्वात न्त्यमिच्छायास्तत्र नियमो नाम कः सङ्गतः । [2096] तेनेच्छाधीनत्वेन संकेतो नेष्टामेव[2097] योग्यतामुद्द्योतयेत् । अनभिमतामपि व्यञ्जयेदित्यर्थः । तदेवमपौरुषेयत्वमागमलक्षणं ब्रुवाणा मी मां स काः प्रतिक्षिप्ताः । (३२९)

## (२ ) b. बुद्धमीमांसक(जैमिनि)मतनिरासः

### क. वेदैंकदेशसंवादित्वे न सर्वस्य प्रामाण्यम्

[2098] संप्रति बृ द्ध मी मां स कानां मतं दूषयितुमुत्थापयति ।

....3.330 यस्मात् किलेदृशं सत्यं यथाग्निः शीतनोदनः ।
वाक्यं वेदैकदेशत्वादन्यदप्यपरोऽब्रवीत् ॥ ३३० ॥

[2099] यथा वैदिकं वाक्यमग्निर्हिमस्य भेषजमिति 'सत्यं शीतनोदनत्वेन वह्नेः' प्रमाणसिद्धत्वात् तथाऽन्यदपि[2100] 'वाक्य'मग्निष्टोमेन जुहुयात् स्वर्गकाम इत्यादि (।) 'वेदैकदेशत्वात्[2101]' 'सत्य'मित्य'परो' मी मां स को[2102] ऽब्रवीदुक्तवान् (।) 'किल' शब्दोऽक्षमायां । (३३०)

....3.331 रसवत् तुल्यरूपत्वादेकभाण्डे च पाकवत् ।
शेषवद् व्यभिचारित्वात् क्षिप्तं न्यायविदेदृशम् ॥ ३३१ ॥

ईदृशमनुमानं 'शेषवद'नैकान्तिकं 'व्यभिचारित्वान्न्यायविदाचार्य'[2103] दि ग्नागे न प्रति'क्षिप्तं रसवत् तुल्यरूपत्वात्' । स्वादितफलेन तुल्यरूपत्वात् फलान्तरस्य तादृग्[2104] रसानुमानवत् । 'एकभाण्डा'न्तर्गत्वात् दृष्ट'पाक'तण्डुला[2105] नुमानवत् ।[81a/MA] [410/s] न ह्येतादृशस्य हेतोः साध्यप्रतिबन्धोस्ति विपर्ययबाधकप्रमाणादिति विपश्चितं प्राक् [2106] । (३३१)

### ख. वेदप्रामाण्यघोषणा जैमिनेर्धाष्र्ट्यम्

दृश्यते च बहुतरविषये विसम्वादो वेदस्य कथमेकसत्यतया सर्वत्र तथात्वं । तथा [2107] च (।)

....3.332 नित्यस्य पुंसः कर्तृत्वं नित्यान् भावानतीन्द्रियान् ।
ऐन्द्रियान्विषमं हेतुं भावानां विषमां स्थितिम् ॥ ३३२ ॥

[2095] १ संकेते ।
[2096] २ अनियतत्वेन ।
[2097] ३ वैदिकशब्दस्य ।
[2098] ४ तदेवमपौरुषेयत्वं नागमलक्षणमित्युक्त्वा एकदेशाविसम्वादनमागमलक्षणं दूषयितुमाह ।
[2099] ५ यस्मात् सत्यं तन्न दूष्यमिति परः
[2100] ६ विशेषस्य पक्षीकरणात् साध्यमाह । यत्र बौद्धस्य विप्रतिपत्तिरेकदेशे तदवितथमिति ।
[2101] ७ हेतुः सामान्यं प्रतिज्ञार्थतानिरासाय ।
[2102] ८ वृद्धः चक्षुर्दोषोपहतत्वात् ।
[2103] ९ नैयायिकशेषवदनुमानव्यभिचारमुद्भावयता (प्रमाण) समुच्चये ।
[2104] १० अस्वादितं तुल्यरसमिति ।
[2105] ११ एकभाण्डे पचनात् । अदृष्टा अपि तण्डुलाः पक्वा इति साध्यं ।
[2106] १ यस्यादर्शनमात्रेण व्यतिरेकः प्रदर्श्यत ?? इत्यादिना ।
[2107] २ शक्यपरिच्छेदेपि विषये प्रमाणविरोधादयुक्तत्वमेवाह ।

....3.333 निवृत्तिं च प्रमाणाभ्यामन्यद् वा व्यस्तगोचरम् ।
विरुद्धमागमापेक्षेणानुमानेन वा वदत् ॥ ३३३ ॥

....3.334 विरोधमसमाधाय शास्त्रार्थं चाप्रदर्श्य सः ।
सत्यार्थं प्रतिज्ञानानो जयेद् धाष्टर्येन बन्धकीम् ॥ ३३४ ॥

परैरनाधेयविशेषस्य 'पुंस' आत्मनः क्रमजन्मसु कर्मादिषु [2108] 'कर्तृत्वं' वद[2109] च्छास्त्रं । तथा 'नित्यान् भावान्' दिक्कालाकाशादीनर्थक्रियारहितान् सतो [2110] वदत् । वस्तुतो'ऽतीन्द्रियान्' गुणकर्मसामान्यादीन् 'ऐन्द्रियान्' [2111] प्रत्यक्षान् वदत् । तथा 'भावानां विषमं हेतुं' प्राग[2112] जनकं वदत् । तथा 'विषमां स्थितिं निस्प' (? ष्प) न्नानां भावानामाश्रयवशेन [2113] 'स्थितिं' वदत् । 'निवृत्तिश्च विषमां' स्वतोऽनश्वरस्वभावा[2114] नामन्यकृतां निवृत्तिं वदत् । 'अन्यद्वा' [2115] वस्तु 'व्यस्तगोचरं प्रमाणाभ्यां' प्रत्यक्षानुमानाभ्यां निरस्तावकाशं वदत् । 'आगमापेक्षेणा'गमसिद्धलिङ्ग[411/s] त्रैरूप्येणा'नुमानेन' च विरुद्धमग्निहोत्रस्नानादेः पापशमनं 'वदत्' । [2116] न हि रागादिप्रभवो धर्मस्तदपनयनमन्तरेण स्नानादेर्निवृत्तिमर्हति । एवम्विधविसम्वादभाजमर्थं वदत् शास्त्रं 'विरोधं' [2117] प्रामाणिक'मसमाधाय' अपरिह्यत्य प्रवृत्तिकामोचितं 'शास्त्रार्थमनु'[2118] गुणोपायं पुरुषार्थलक्षण'श्चाप्रदर्श्य स' जर न्मी मां स क एकदेशसम्वाददर्शनात् 'सत्यार्थं प्रतिजानानो धाष्ट्र्येन बन्धकीं' साक्षाद्दृष्टव्यलीकां स्वपतिं स्वशीलप्रामाण्योद्भावनेन भ्रान्तमावेदयन्तीं 'जयेत्' । (३३२-३३४)

किञ्च (।)

....3.335 सिध्येत् प्रमाणं यद्येवमप्रमाणमथेह किम् ।
न ह्येकं नास्ति सत्यार्थं पुरुषे बहुभाषिणि ॥ ३३५ ॥

'यद्येवं[2119]' दृष्टैकदेशसम्वादस्यावयवत्वादन्यदपि 'प्रमाणं सिध्येत् । अथेह' न्याये 'किमप्रमाणं' शास्त्रं भविष्यति । 'न हि बहुभाषिणि पुरुषे' सत्यार्थ'मेकं' वचे 'नास्ति' किन्त्वस्त्येव । तेनैव दृष्टान्तेन तद्वचनं प्रमाणं स्यात् । (३३५)

....3.336 नायं स्वभावः कार्यं वा वस्तूनां वक्तरि ध्वनिः ।
न च तद्व्यतिरिक्तस्य विद्यतेव्यभिचारिता ॥ ३३६ ॥

---

[2108] ३ तत्फलभोक्तृत्वं ।

[2109] ४ वददिति सर्वत्र योज्यं त्रिभिः श्लोकैरत्र सम्बन्धः । सुखदुःखादिसम्वित्तिसमवायस्तु भोक्तृता । तन्न नित्यानां कार्यकरणत्वस्य निरस्तत्वात् ।

[2110] ५ अक्षणिकस्य क्रमयौगपद्यार्थक्रियाविरोधने वस्तुधर्मातिक्रमादयुक्तं तत् ।

[2111] ६ तदयुक्तमनध्यक्षस्याध्यक्षत्वविरोधात् ।

[2112] ७ अर्थक्रियाः प्रागजनकं पश्चात् सहकार्यपेक्षया जनकं तदयुक्तं नित्यस्याविशेषात् ।

[2113] ८ संश्च सर्व्वनिराशंसो भावः कथमपेक्षते परं ।

[2114] ९ विनाशस्याहेतुत्वोक्तेः ।

[2115] १० अन्यदप्यभावादिकं सदित्याह ।

[2116] १ आगमाश्रयानुमानबाधितमेतदित्याह ।

[2117] २ शक्यविचारे वस्तुनि ।

[2118] ३ पुरुषप्रवृत्तिनिमित्तं ।

[2119] ४ सर्व्वः पुरुषः सर्व्वत्रार्थे प्रमाणं स्यादित्याह ।

'नायं' ध्वनिर्व्व'स्तूनां स्वभावः । कार्यम्वा [2120]' यस्माद् 'वक्तरि ध्वनिर्भवति' । न हि वस्तुनः स्वभावोन्यत्र धर्मिणि वर्त्तते । कार्यम्वाऽन्यतो भवितुमर्हति । 'न च तद्व्यति रिक्तस्य' कार्यस्वभावाभ्यामपरस्या'व्यभिचारि'ता 'विद्यत' इति निवेदितं । (३३६)
स्यादेतद् (।)

....3.337 प्रवृत्तिर्वाचकानाञ्च वाच्यदृष्टिकृतेति चेत् ।
परस्परविरुद्धार्था कथमेकत्र सा भवेत् ॥ ३३७ ॥

'वाचकानां' शब्दानां 'प्रवृत्तिर्व्वाच्यदृष्टिकृता' अभिधेयदर्शनागता ततः परंपरया[2121] [412/s] तत्कार्यतैवेषामि'ति चेत्' । एवं तर्हि सा शब्दप्रवृत्ति'रेकत्र' वस्तुनि 'परस्परविरुद्धार्था-कथम्भवेत्' । (३३७)
यदि यथा[2122] वस्त्वेव शब्दस्तदा वस्तुत एकरूपेण[2123] शब्दे नित्यः किमयमनित्यो वेत्यादि शब्दसन्दर्भो न भवेत् ।

....3.338 वस्तुभिर्नागमास्तेन कथञ्चिन्नान्तरीयकाः ।
प्रतिपत्तुर्न सिध्यन्ति कुतस्तेभ्योऽर्थनिश्चयः ॥ ३३८ ॥

'तेन'[2124] प्रतिबन्धाभावेन 'वस्तुभिः' सह 'नान्तरीयका आगमा प्रतिपत्तु'रर्थं शब्दात् प्रतिपद्यमानस्य 'कथञ्चिन्न' सिध्यन्ति । तत् कुतस्तेभ्य आगमार्थनिश्चयः । (३३८)

....3.339 तस्मान्न तन्निवृत्त्यापि भावाभावः प्रसिध्यति ।
तेनासन्निश्चयफलाऽनुपलब्धिर्न सिध्यति ॥ ३३९ ॥

यस्मात् प्रवर्त्तमानादागमान्नास्त्यर्थसिद्धिस्त्'स्मात् त'स्यागमस्य 'निवृत्त्यापि भावस्याभावो न सिध्यति । तेन' प्रमाणत्रयनिवृत्तिलक्षणाप्य'नुपलब्धि'रर्थाना'मसन्निश्चयफला न सिध्यति' । ततो युक्तमुक्तं सदसन्निश्चय[2125] फला नेति स्याद् वाऽप्रमाणतेति । सद्व्यवहारसाधने चाधिकृते व्यवस्थितेत्यवस्थितं ॥ (३३९)

---

[2120] ५ विना वाच्यं न शब्दवृत्तिश्चेत् ।

[2121] ६ पदानां सङ्गतिः सम्बन्धः । शक्यसाधन उपायोनुगुणः । अभ्युदयादिः पुरुषार्थ इति शास्त्रधर्मा प्रदर्श्य विरोधमसमाधाय चात्यन्तप्रसिद्धसत्यार्थतामात्रेण प्रज्ञाप्रकर्षेणापि दुरवगाहेपि सत्यार्थतां साधयन् दुश्चारिणीं जयेत् । सा स्वामिना परेण सङ्गता त्वमित्युपालब्धाऽह । पश्यत पुंसो वैपरीत्यं धर्मपत्न्या प्रत्ययमकृत्वा स्वनेत्रबुद्बुदयोः प्रत्येति । जरत्काणग्राम्यकाष्टहारेण प्रार्थिताऽसङ्गता । रूपगुणानुरागेण किल मन्त्रिमुख्यदारकं कामयेहमिति तुल्यं दृष्टविरोधस्यातिपरोक्षेऽविसम्वादानुमानेन ?? ।

[2122] १ वाच्यार्थस्य गमको हि तज्जन्यस्तत्स्वभावो वा स्यादित्याह शब्दस्त्विच्छायत्तो न बहिरधीनः (।) सति वाच्ये तद्दर्शनं दृष्टेर्विवक्षा । ततो वचनं परम्परा(?)

[2123] २ आगम्यते तेन ।

[2124] ३ शब्दानां वस्त्वसम्बन्धेन ।

[2125] ४ सर्व्वविषयत्वादागमस्य सति वस्तुन्यविसम्वादेनावृत्तेस्तन्निवृत्तिलक्षणानुपलब्धिरभावसाधनमित्ययुक्तमेव परस्य । विनापि वस्त्वागमप्रवृत्तेः सर्व्वविषयत्वञ्च निरस्तमप्रस्तुतावचनात् ।

आचार्य म नो र थ न न्दि कृतायां वार्तिकवृत्तौ तृतीयः परिच्छेदः ॥

# 4 चतुर्थः परिच्छेदः[2126]: परार्थानुमानं

[413/s]

स्वार्थानुमानं व्याख्याय परार्थानुमानं व्याख्यातुमाह (।)
[81b/MA]

तत्र परार्थानुमानं[2127] स्वदृष्टार्थप्रकाशनमित्याचार्यीयलक्षणं । स्वेन[2128] दृष्टः स्वदृष्टः । स्वदृष्टश्चासावर्थश्चेति त्रिरूपो हेतुः । तस्य प्रकाशनम्वचनं अनुमानहेतुत्वादित्यर्थः ।

## 4.1 १. परार्थानुमानलक्षणम् (दिग्नागस्य)

(१) तत्र स्वदृष्टग्रहणफलम्

क. परमतनिरासाय

ननु त्रिरूपलिङ्गाख्यानमित्येवास्तु किं स्वदृष्टग्रहणेनेति शङ्कायां परमतनिरासार्थतामस्य दर्शयितुमाह ।

...pv.4.1 परस्य प्रतिपाद्यत्वात् अदृष्टोपि स्वयं परैः ।
दृष्टसाधनमित्येके तत्क्षेपायात्मदृग्वचः ॥ १ ॥

'परस्य' परार्थानुमानेन 'प्रतिपाद्यत्वात्' साधनवादिना स्वयम'दृष्टोपि प्रमाणेन परैः' प्रतिवादिभिरागमाद् 'दृष्टसाधनं' लिङ्ग'मित्येके' सां ख्याः । ते हि सुखादीनामुत्पत्तिमत्वादनित्यादचेतनत्वं रूपादीनामिव बौद्धं प्रत्याहुः । 'न ह्यसत' उत्पत्तिमत्वं सतश्च निरन्वयविनाशोऽनित्यत्वं हेतुः सांख्यासिद्धः । बौद्धस्य पुनरागमात् [414/s] सिद्धः । तावतैव हेतुरिति मन्यन्ते । तस्य परमतस्य 'क्षेपाय' प्रतिषेधाया'त्मदृश्र/?/वचः' अदृष्टवचनं सूत्रे । न प्रतिवादिमात्रसिद्धस्य हेतुत्वं किन्तूभयसिद्धस्यैवत्यर्थः ॥ (१)

ख. अनुमानविषये नागमस्य प्रामाण्यम्

न चागमात् प्रतिवादिनोपि साधनसिद्धिर्युक्तेति वक्तुमाह ।

...pv.4.2 अनुमाविषये नेष्टं परीक्षितपरिग्रहात् ।
वाचः प्रामाण्यमस्मिन् हि नानुमानं प्रवर्तते ॥ २ ॥

[2126] १ चतुर्थो व्याख्यायते । तत्र सम्बन्धमन्तरेण वाक्यार्थावृत्तेरिति तृतीयपरिच्छेदं व्याख्यायानेनोत्तरसम्बन्धं कथयन् प्रतिपर्तृसुखार्थमन्त्यपरिच्छेदे सर्वमेव शास्त्रशरीरमनुक्रमेण वृत्तिकृत् कथयति अनुमानमित्यादि ।

[2127] २ [तत्रैव]---परार्थमनुमानं तु ।

[2128] ३ वादिप्रतिवादिभ्यामिति प्रकरणात् ।

'अनुमानस्य' वस्तुबलप्रवृत्तस्य 'विषये' यस्मादनुमानज्ञानमुत्पद्यते (।) स च त्रिरूपो हेतुः (।) तत्र प्रतिपाद्ये 'वाच' आगमात्मिकायाः 'प्रामाण्यं' नेष्टमर्थप्रतिबन्धाभावादित्युक्तं ।

किञ्च (।) प्रमाणान्तरसम्वादात् 'परीक्षितस्य' प्रमाणोपपन्नस्यागमार्थस्य 'परिग्रहात्' स्वीकारान्नेष्टं वचनप्रामाण्यं । यदि वचनमित्येव प्रमाणन्तदा प्रतिज्ञापदादेव साध्यस्य सिद्धेर्निष्फलं हेतुदृष्टन्तादिवचनं स्यात् । प्रमाणान्तरसम्वादापेक्षा च न भवेत् । सम्वादज्ञानस्यैवार्थभावानुविधायित्वात् तस्मिन्नागमार्थे प्रामाण्यं । वचनस्य तु विपर्ययात् । यदि ह्यागम इत्येव प्रमाणं (।) तदा प्रमाणान्तरसम्वादापेक्षा न स्यात् । हि यस्मात् । 'अस्मिन्ना'गमार्थे प्रमाणप्रतिपादितत्वान्निश्चितेऽ'नुमानं न प्रवर्त्तते' (।) यदि ह्यागमार्थः सन्दिह्येत तदा तन्निश्चयार्था प्रमाणान्तरवृत्तिरपेक्ष्येत ॥ (२)

...pv.4.3 बाधनायागमस्योक्तेः साधनस्य परं प्रति ।
सोप्रमाणं तदाऽसिद्धं तत्सिद्धमखिलन्ततः ॥ ३ ॥

यदि चाग'मस्य' सुखादिचैतन्यप्रतिपादकस्य 'बाधनाय साधन'स्योत्पत्तिमत्वादेः सां ख्ये न 'परं बौद्धं प्रत्युक्तिः' ततः कारणात् 'स' आगमोऽ'प्रमाणं । तदा' । न हि प्रमाणस्य बाधो युक्तः । तत आगमाप्रामाण्यात् तेनागमेन साक्षात् पारंपर्याभ्यां 'सिद्ध'मुत्पत्तिमत्वादि साध्यं चाचैतन्य'मखिलमिदमसिद्धं' ॥ (३)

ग. प्रमाणेन बाध्यमानस्यागमस्य न सिद्धिः

...pv.4.4 तदागमवतः सिद्धं यदि कस्य क आगमः ।
बाध्यमानः प्रमाणेन स सिद्धः कथमागमः ॥ ४ ॥

स च सुखाद्युत्पत्तिमत्वप्रतिपादक आगमः (च) 'तदागमः' तद्वतस्तत्सम्बन्धिनो 'बौद्धस्य सिद्ध'मुत्पत्तिमत्त्वादिलिङ्गमिति चेत् । 'कस्य' पुरुषस्य क आगमः सम्बन्धी । न [415/s] तावदवयवत् आगमोपि पुरुषस्य सहजसम्बन्धेन सम्बद्धः[2129] । नापि युक्त्युपपन्नयतो[2130]पाधिना[2131] प्रत्यक्षानुमानवत् सम्बन्धः । तथा हि 'प्रमाणे'नोत्पत्तिमत्वादिलिङ्गजेनानुमानेनागमप्रतिपादितस्य सुखादिचैतन्यस्य बाधनात् 'बाध्यमान' आगमः हेतुः । 'स कथमागमसिद्धो' येन युक्तिसम्वादोपाधिनापि पुरुषेण सम्बन्धमनुभवेत् । (४)

स्यादेतत् । सुखादीनामचैतन्यं तेनैवागमेन प्रदेशान्तरे दर्शितमतोऽबाध्यत्वात् प्र7माणादस्मात् साधनविधिर्युक्त इत्याह ।[82a/MA]

...pv.4.5 तद्विरुद्धाभ्युपगमस्तेनैव च कथं भवेत् ।
तदन्योपगमे तस्य त्यागांगस्याप्रमाणता ॥ ५ ॥

तस्माच्चैतन्यात् प्रतिपादिताद् 'विरुद्ध'स्याचैतन्यस्या'भ्युपगमस्तेन' चैतन्यप्रतिपादकेनैव चागमेन 'कथम्भवेत्' । सम्भवे वा विरुद्धार्थाभिधायित्वेनाप्रमाणादागमाद्धेतुसिद्धिरयुक्तैव (।) आगमप्रतीतेनोत्पत्तिमत्त्वादिना । तस्मादागमोक्त 'चैतन्यादन्य'स्याचैतन्यस्यो'पगमे' स्वीकारे वा प्रतिवादीना क्रियमाणे 'तस्या'गमस्य 'त्यागांगस्याप्रमाणता'ऽभ्युपगता स्यात् (।) यदेवागमप्रामाण्यस्य बाधके हेतावाद्रियते तदैव तत्र संशयितः । न चाप्रमाणाद्धेतुसिद्धिः ॥ (५)

किञ्च (।)

2129 १ तादात्मा(?त्म्या)भाव उक्तः ।

2130 २ तदुत्पत्तेः ।

2131 ३ अस्येदमिति ।

...pv.4.6 तत् कस्मात् साधनं नोक्तं स्वप्रतोतिर्यदुद्भवा ।
युक्त्या ययागमो ग्राह्यः परस्यापि च सा न किम् ॥ ६ ॥

अयम्वादी तावत् स्वयम्प्रतीतमेवाचैतन्यं 'पर'[2132] स्मै प्रतिपादयति । 'व च साधन'मन्तरेणैव प्रतीतिः । ततः प्रतिपादयितुः[2133] स्वस्य 'प्रतीतिश्चै'तन्यविषया यस्मात् साधनादुद्भवो यस्याःसा यदुद्भवा । 'तत्साधनं' स्वागमादिकं कस्मात्[2134] प्रतिपाद्यं प्रति 'नोक्तं' । स्वयं प्रतिपन्नसामर्थ्यमेव साधनं वक्तुमुचितं । तथा निर्युक्तिकस्यागमस्याप्रामाण्यात् 'यया युक्त्यो'पपन्न 'आगमः' साधनत्वेन 'गाह्यो' वादिना सा युक्तिः 'परस्य' प्रतिपाद्यस्यापि किन्न साधनयेन तत्परित्यज्यान्यदप्रमाणसिद्धमुत्पत्त्याद्युच्यते । (६)

अथ योगबलजेन प्रत्यक्षेण सुखादीनामचैतन्यं प्रतीतं[2135] न तदन्यथा प्रतिपादयितुं परस्य शक्यत इति परोपगतं साधनमुच्यते ॥

[416/s]

ननु तथापि नाकस्मिको बुद्धिसुखाद्यचैतन्यविषयस्य निश्चयः । तत्साक्षात्कारिप्रत्यक्षतत्साधनयोगानुष्ठानयोः [2136] साध्यसाधनभावावधारणश्चावश्यकर्त्तव्यं । तन्निश्चयमन्तरेण योगानुष्ठानायोगात् । तथा च (।)

...pv.4.7 प्राकृतस्य सतः प्राग् यैः प्रतिपत्त्यक्षसंभवौ ।
साधनैः साधनान्यर्थशक्तिज्ञानेस्य तान्यलम् ॥ ७ ॥

'प्राकृत'स्यार्व्वाग्दर्शनस्य सतो यैः 'साधनैः' सुखाचैतन्यादिविषयं तद्ग्राहि 'प्रत्यक्ष'तत्साधनयोः सम्बन्धश्च निश्चित्य प्रवृत्तस्योपाये प्रतिपत्तुरनुष्ठानस्य । तत्फलस्याक्षस्य प्रत्यक्षस्याचैतन्यादिविषयग्राहिणः सम्भवौ भवतः (।) 'तानि' 'साधनान्यर्थ'स्योपायाभ्यासस्य 'शक्ते'रचैतन्यग्राहिप्रत्यक्षजनिकाया 'ज्ञाने' कर्त्तव्ये'ऽस्य' प्रतिपाद्यस्यालं समर्थानि । ततस्यान्येव साधनान्युच्यन्तां [2137] किं स्वयमदृष्टसाध्य[2138] प्रतिपादन'सामर्थ्येनोत्प'त्तिमत्वादिनोक्तेन ॥ (७)

स्यादेतत् । प्रत्यक्षस्याचैतन्यादिविषयस्य योगाद्यभ्यासेन सह साध्यसाधनसम्बन्धो विप्रकृष्टत्वात् सामान्याकारेणापि न प्रतीयते ततोस्यानुपदर्शनमित्याह ।

...pv.4.8 विच्छिन्नानुगमा येपि सामान्येनाप्यगोचराः ।
साध्यसाधनचिन्तास्ति न तेष्वर्थेषु काचन ॥ ८ ॥

'येपि विच्छिन्नो' विप्रकृष्टोऽ'नुगमः' सम्बन्धो येषां ते प्रत्यक्षतदुपायादयः 'सामान्ये'नाविशेषाकारेणा'प्यगोचरास्तेष्वर्थेष्विदं' साधनमिदं साध्यमिति च 'साध्यसाधनचिन्ता काचन नास्ति' । ततोऽर्व्वाग्दर्शनस्याबुद्धिविषयीकृतयो रूपयोरुपयोपेययोरेकत्रानुष्ठानावपरत्र निष्या-

[2132] ४ अज्ञातं ममेति वचने उपहसनीयः स्यात् ।
[2133] ५ सांख्यस्य ।
[2134] ६ तदुत्पत्तेः ।
[2135] ७ कपिलऋषिणा ।
[2136] १ ज्ञात्वा हि लिङ्गैस्तदुपायोनुष्ठीयतेऽन्यथा भावनानुपपत्तेः ।
[2137] २ यथास्माभिर्द्वितीयपरिच्छेदे उक्तं परो मोक्षेऽविद्या(सत्काय)तृष्णाभ्यांक्षेपि जन्मेति सम्बन्धः शून्यतादृष्टिस्तयोः प्रतिपक्ष इति यथेह तृष्णया प्रवृत्तिरविद्याप्रेरणया ।
[2138] ३ यत्रैव स्कन्धेऽविद्यादयस्तत्रानारोपितेऽविद्याशून्यमिति सम्बन्धः ।

दनमिति कुतः ॥ (८)

'किञ्च' (।) अप्रमाणकादागमादिच्छामात्रेण प्रतिपाद्यो हेतुं कुर्वन् पुनरिच्छया तमेव परिहरन् हेतुतदाभासयोरिच्छाधीनतां स्वीकुर्यादित्याख्यातुमाह ।

...pv.4.9 पुंसामभिप्रायवशात् तत्त्वातत्त्वव्यवस्थितौ ।
लुप्तौ हेतुतदाभासौ तस्य वस्त्वसमाश्रयात् ॥ ९ ॥

[82b/MA]

'पुंसामभिप्रायवशादि'च्छानुरोधात् 'तत्त्वातत्त्व'योर्हेतुतदाभासत्वयो'र्व्यवस्थिता'विष्यमाणायां 'हेतुतदाभासौ लुप्तौ' स्यातां अव्यवस्थितत्वात् 'तस्य' पुरुषाभिप्रा[417/s] यस्य 'वस्त्व'संश्रयाद् यथावस्तुप्रवृत्तिनियमाभावात् ॥ (९)

अपि च (।)

...v.4.10 सन्नर्थो ज्ञानसापेक्षो नासन् ज्ञानेन साधकः ।
सतोपि वस्त्वसंश्लिष्टाऽसंगत्या सदृशी गतिः ॥ १० ॥

'सन्नर्थो ज्ञानसापेक्षः' साध्य'साधकः' प्रतीतो यथा धूमादिः । 'नासन्न'र्थो 'ज्ञानेन' प्रतीतिमात्रेण 'साधकः' साध्यस्य यथा कल्पितो धूमः । अथाचैतन्यम्वस्तुतोस्त्येव तद् यथा कथञ्चित् परस्मै प्रतिपादनीयं । अतः पराभ्युपगतो हेतुः क्रियत इत्याह । 'सतोप्य'चैतन्यस्य 'वस्त्वसंश्लिष्टा' वस्तुभूतलिङ्गाप्रतिबद्धा गतिरस'ङ्गत्या'ऽसतः प्रतीत्या 'सदृशी' सम्यक् प्रतीतत्वाभावत् । अन्येत्वसद्गत्या दोषवत्प्रतीत्या सदृशीति व्याचक्षते (।) तेषां सतोप्यवस्तुकृता प्रतिपत्तिरसत्प्रतिपत्तिं नातिशेते । अप्रत्ययत्वादिति विनिश्चयग्रन्थेन सह एकवाक्यता न स्यात् ॥ (१०)

किञ्च (।)

...v.4.11 लिङ्गं स्वभावः कार्यं वा दृश्यादर्शनमेव वा ।
सम्बद्धं वस्तुतस्सिद्धं तदसिद्धं किमात्मनः ॥ ११ ॥

लिङ्गं साध्यार्थ'सम्बद्धं' नान्यत् व्यभिचारात् । तच्च 'स्वभावः कार्यं दृश्यादर्शन'मनुपलब्धिरेवान्यस्य प्रतिबन्धाभावादित्युक्तं । तदुत्पत्त्यादिकं यदि त्रिषु हेतुष्वन्तर्भूतं तदा 'वस्तुतः' परमार्थतः 'सिद्धं' प्रतिपाद्यस्य 'किं' कस्मा'दात्मनः' सां ख्य स्य वादिनो[2139] 'ऽसिद्धं' । उत्पत्तिमत्वादिस्वभावहेतुः स्यात् । स च धर्मिग्राहकात् प्रमाणादन्यतो वा शिंशपा-[2140] त्ववत् कृतकत्वादिवदर्थान् प्रतिवादिन इव वादिनोपि सिऽध्येत् । (११)

अथ[2141] त्रिविधे हेतौ नान्तर्भवति उत्पत्त्यादि तदा (।)

....4.12a परेणाप्यन्यतो गन्तुमयुक्तं;

'परेण' प्रतिवादिनापि त्रिविधाद्धेतो'रन्यतो' हेतोरचैतन्यं 'गन्तुं' प्रत्येतु'मयुक्तं' (।) यदि पराभ्युपगमसिद्धमसाधनं तदा प्रसङ्गहेतुरहेतुः स्यादित्याह ।

....4.12b परकल्पितैः
प्रसङ्गो द्वयसम्बन्धादेकापायेन्यहानये ॥ १२ ॥

[2139] १ उभयसिद्धमस्तु ।

[2140] २ वृक्षं ग्राहयति ।

[2141] ३ पराभ्युपगतेन दूषयित्वा प्रमाऽनन्तर्भावमाह ।

[418/s]

'परकल्पितैः' साधनैः 'प्रसङ्गः' क्रियते यथा सामान्यस्य परोपगतानेकवृत्तित्वाद् अनेकत्वमापाद्यते न त्वयं पारमार्थिको हेतुस्त्रैरूप्याभावात् । यद्ययं न हेतुः तदा किमर्थमुच्यत इत्याह । 'द्वयोः' साध्यसाधनयोः 'सम्बन्धाद्' व्याप्यव्यापकभावात् स्फारिता'देकस्य' साध्यस्यापायेऽन्यस्य साधनस्य 'हान'ये । यथा चानेकं[2142] सामान्यं तस्मान्नानेकवृत्तीति विपर्ययप्रयोगे साध्याभावे साधनाभावः कथ्यते । प्रसङ्गविपर्ययोत्र मौलो हेतुः साध्यसाधन्यव्याप्तिग्राहकप्रमाणस्मारकस्तु प्रसङ्गे प्रयोग इत्यर्थः । भिन्नदेशकालादिष्वनेकासु व्यक्तिषु वृत्तस्य तदतद्देशत्वादिविरुद्धधर्माध्यासादनेकत्वसिद्धेरनेकवृत्तत्वानेकत्वयोर्व्याप्तिसिद्धिर्बोद्धव्या । (१)

उक्तं स्वदृष्टग्रहणस्य साफल्यं [2143] ॥

(२) अर्थग्रहणफलम्

अर्थग्रहणस्येदानीं वक्तव्यं । अदृष्टार्थप्रकाशनमित्यत्र सूत्रे यदुपात्तं (।)

...v.4.13 तदर्थग्रहणं शब्दकल्पनारोपितात्मनाम् ।
अलिङ्गत्वप्रसिद्ध्यर्थमर्थादर्थस्य सिद्धितः ॥ १३ ॥

'तदर्थग्रहणं शब्देन [2144] कल्पनया चारोपित आत्मा' येषां पक्षसपक्षान्यतरत्वादीना- 'तेषामलिङ्गत्वप्रसिद्ध्यर्थं' बोद्धव्यं । कस्मात् पुनः कल्पितस्यालिङ्गत्वमित्याह । 'अर्थाद्' वस्तुभूताल्लिङ्गादर्थस्य साध्यस्य 'सिद्धितः' ॥ (१)

...v.4.14 कल्पनागमयोः कर्त्तुरिच्छामात्रानुवृत्तितः ।
वस्तुनश्चान्यथाभावात् तत्कृता व्यभिचारिणः ॥ १४ ॥

'कल्पनाया आगमस्य' शब्दस्य च 'कर्त्तुः' पुरुष'स्येच्छामात्र'स्या'नुवृत्तितो'नुरोधात् । 'वस्तुनश्चान्यथाभावात्' । कर्त्तुरिच्छानुवृत्ते'स्ताभ्यां' शब्दकल्पनाभ्यां 'कृता' हेतवो 'व्यभिचारिणो' नैकान्तिकाः । (१४)

उक्तमर्थग्रहणप्रयोजनं ॥

स्वदृष्टार्थप्रकाशनशब्देन त्रिरूपलिङ्गवचनमिष्टं । न पक्षवचनमपीति वक्तव्यं ॥ 5

## 4.2 २. पक्षचिन्ता

[419/s]

(२) पक्षहेतुवचनमसाधनम्

क. हेतुवचनं न साधनम्

[2142] १ पक्षधर्मोपसंहार एषः ।

[2143] २ उभयसिद्धो हेतुः सूचितः प्रमोपपत्तिः ।

[2144] ३ यथा सर्व्वगत आत्मा सर्व्वत्रोपलभ्यमानगुणत्वादाकाशवत् ॥ नित्योऽनित्यो वा शब्दः पक्षसपक्षान्यतरत्वात्परमाणुवद् घटवद्वा ।

यदि साक्षात् पारम्पर्येण वा पक्षवचनं साध्यप्रत्तिपत्तावुपयुज्यते । तदो-[83a/MA] च्येत किन्त्वेतन्नास्तीत्याह ।

...v.4.15 अर्थादर्थगतेः शक्तिः पक्षहेत्वभिधानयोः ।
नार्थे तेन तयोर्न्नास्ति स्वतः साधनसंस्थिति ॥ १५ ॥

[2145] साक्षात् तावत पक्षाभिधानस्य हेत्वभिधानस्य च 'प्रतिपाद्येऽर्थे शक्तिर्न' विद्यते (।) किं कारणमित्याह ।

'अर्थाद्' वचनप्रतिपाद्या'दर्थ' साध्यस्य 'गतेर्न' वचनात् । 'तेन' साक्षादर्थप्रतिपादकत्वाभावेन तयोः 'पक्षहेत्वभिधानयोः स्वतः' स्वरूपेण 'साधनसंस्थितिः' । साधनत्वव्यवस्था 'नास्ति' [2146] यतश्च पक्षवचनं साक्षादर्थे न प्रमाणं ॥ (१५)

## ख. पक्षवचनमसाधनम्

...v.4.16 तत् पक्षवचनं वक्तुरभिप्रायनिवेदने ।
प्रमाणं संशयोत्पत्तेस्ततः साक्षान्न साधनम् ॥ १६ ॥

तत्तस्मात् 'पक्षवचनं' 'वक्तुरभिप्रायनिवेदने प्रमाणं' शब्दप्रामाण्यमा चा र्य स्य वदतोऽभिमतमिति बोद्धव्यं । तत्पक्षवचनात् साध्येर्थ 'संशयोत्पत्तेरनिश्चयान्न साक्षात्' साधनमर्थस्य तत् ॥ (१६)

परंपरया साध्यसाधनात् प्रमाणं पक्षवचनं वक्तुरभिप्रायनिवेदने प्रमाणन्तर्हि स्यादित्याह ।

...v.4.17 साध्यस्यैवाभिधानेन पारंपर्येण नाप्यलम् ।
शक्तस्य सूचकं हेतुवचोऽशक्तमपि स्वयम् ॥ १७ ॥

[420/s]

'पारम्पर्येणापि' पक्षवचन'मलं' समर्थं 'न' साध्यसिद्धौ । 'साध्यस्यैव' केवल'स्याभिधानात्' । न हि पक्षवचसा साधकं किञ्चिदुच्यते साध्यमात्रस्यैवाभिधानात् । [2147] त्रिरूपस्य 'हेतोर्व्वचो' वचनन्तु 'स्वयं' साक्षात् सिद्धाव'शक्तमपि' (।) 'शक्तस्य' त्रिरूपलिङ्गस्य 'सूचकं' प्रतिपादकमिति साधनमुचितं ॥ (१७)

## ग. (दिग्नागस्य) पक्षवचनमसाधनत्वेनेष्टम्

नन्वाचार्यस्य पक्षवचनमसाधनत्वेनेष्टमिति कथं ज्ञायत इत्याह ।

...v.4.18 हेत्वर्थविषयत्वेन तदशक्तोक्तिरीरिता ।
शक्तिस्तस्यापि चेद्धेतुवचनस्य प्रवृत्तनात् ॥ १८ ॥

[2145] १ पञ्चावयवत्वात् परे पक्षहेतुवचनयोः साधनत्वमाहुः । तन्निषेधायाह । साधनं भवत् साक्षात् पारंपर्येण वा स्यात् तत्र प्रतिज्ञाहेतुदृष्टान्तउपनयनिगमनाख्यं ।

[2146] २ ननु आचार्येण शाब्दं प्रमाणमिष्टं कथन्ततो नार्थ इत्याह ।

[2147] १ हेतुवचोवत् पारंपर्येण स्यादौपचारिकं साधनं तत्तु साध्यस्यासिद्धस्याभिधायकमिति नोपचरितोपि साधनं उक्तश्च ।
तत्रानुमेयनिर्देशो हेत्वर्थविषयो मत इति ।

हेतोरर्थः साध्यः स विषयोस्येति 'हेत्वर्थविषयः' तत्वेन साध्यार्थोपदर्शकत्वेन तस्य पक्षवचनस्य साध्यसाधनं प्रत्य'शक्त'स्यो'क्तिरीरिता' निर्दिष्टाचार्येण (।) तत्रानुमेयनिर्देशो हेत्वर्थविषयो मत इत्यनेन ग्रन्थेन । ततो ज्ञायते पक्षवचनमसाधनमिष्टमाचार्यस्येति ।

ननु 'तस्य' पक्षवचनस्यापि साध्यसिद्धौ 'शक्तिरस्ति' । तत्साधकस्य 'हेतुवचनस्य' 'प्रवर्त्तनात्' । नह्यनुद्दिष्टेर्थे साधनप्रस्तावः । ततः साधनप्रस्तावनाहेतुत्वेन पक्षवचनस्य साधकत्वमस्तीति चेत् । एवं (। १८)

....4.19a तत्संशयेन जिज्ञासोर्भवेत् प्रकरणाश्रयः ।

तस्य साध्य'संशयेन' जिज्ञासा तस्याश्च सत्यां साधनमुच्यत इति[2148] 'जिज्ञासोः' 'पुंसः संशयो' जिज्ञासा च 'प्रकरणस्य' साधनप्रस्तावस्या'श्रयो' निमित्तमिति 'भवेत्' साधनं पक्षवचनवत् ॥

ननु संशयजिज्ञासे प्रतिपाद्यप्रवर्तिते पक्षवचनन्तु वादिप्रवर्तितं तत्कथं तत्समुदायस्य साधनस्य वादिना निर्देशसंभव इत्याह ।

[421/s]

....4.19b विपक्षोपगमेप्येतत् तुल्यमित्यनवस्थितिः ॥ १९ ॥

एवन्तर्हि 'विपक्ष'स्य साध्यविरुद्धस्य धर्म'स्योपगमे[2149]' पराभिप्रायेण 'नित्यशब्द' इति साध्यनिर्देशकृते पार्श्वस्थानां तथा संशयनिरासार्थं यत्कृतकं तदनित्यं यथा घटः कृतकश्च शब्द इति पुनर्वादिनैवोच्यते । तदा नित्यत्वप्रतिज्ञायास्तदनित्यत्वाव्यभिचारिकृतकत्वहेतुप्रवर्त्तकत्वं 'तुल्यमिति' नित्यत्वप्रतिज्ञाप्यनित्यप्रतिज्ञावत्[83b/MA] साधनं स्या'दित्यनवस्थितिः' साधनावयवानां[2150] ॥ (१९)

यतश्च पक्षवचनस्य साध्यसिद्धौ साक्षात् पारम्पर्येण वा 'सामर्थ्यं नास्ति ततः(।)'

...v.4.20 अन्तरङ्गं तु सामर्थ्यं त्रिषु रूपेषु संस्थितम् ।
तत्र स्मृतिसमाधानं तद्वचस्येव संस्थितम् ॥ २० ॥

अन्तरङ्गं 'सामर्थ्यं तु' शब्दोऽवधारणे भिन्नक्रमश्चेति । 'त्रिष्वेव' पक्षधर्मतादिषु रूपेषु संस्थितं । 'तत्र' त्रिरूपलिङ्गे साध्यसाधनशक्ति'स्मृतेः समा[2151] धानमारोपणं तद्वचसि' त्रिरूपलिङ्गप्रतिपादकवचन 'एव संस्थितं' । अतस्तदेव पारम्पर्येण साध्यसिद्धेरङ्गत्वात् प्रमाणन्न पक्षवचनं ॥ (२०)

ननु (।)

...v.4.21 अख्यापिते हि विषये हेतुवृत्तेरसंभवात् ।
विषयख्यापनादेव सिद्धौ चेत्तस्य शक्तता ॥ २१ ॥

....4.22a उक्तमत्र;

---

[2148] २ परस्य दशावयवं वाक्यं । तत्र जिज्ञासासंशयप्रयोजनशक्यप्राप्तिसंशयव्युदासाः पञ्च प्रवृत्यङ्गानि । प्रतिज्ञादिपञ्चावयवाः । प्रवृत्त्यङ्गैरनेकान्तमाह साधनवचनाश्रवत्वेन संशयादीनामपि साधनत्वं स्यात् ।

[2149] १ वादीना ।

[2150] २ न चैवं तस्मान्न हेतुप्रवर्त्तकत्वेन प्रतिज्ञायाः साधनत्वं ।

[2151] ३ उत्पादनं ।

'अख्यापिते'ऽप्रतिपादिते साधनस्य 'विषये' साध्ये 'हेतोर्वृत्ते'रेव 'ह्यसम्भवात्' तस्य पक्षवचनस्य 'विषयख्यापनादेव' साध्यस्य सिद्धौ पारम्पर्येण शक्ततेति 'चेत्' । (२१) उक्तमत्र संशयजिज्ञासयोरपि साधनप्रवृत्तकत्वात्[2152] साधनत्वप्रसङ्ग इति ।

किञ्च (।)

....4.22b विनाप्यस्मात् कृतकः शब्द ईदृशाः ।
सर्वेऽनित्या इति प्रोक्तेप्यर्थात् तन्नाशधोर्भवेत् ॥ २२ ॥

'अस्मात्' पक्षवचनाद् 'विनापि कृतकः शब्द ईदशा' ये कृतकास्ते 'सर्व्वेऽनित्या इति' पक्षधर्मताव्याप्तिवचने 'प्रोक्तेप्यर्थात्' तस्य शब्दस्य 'नाशधीर्भवेत्' । अनित्य[422/s] त्वाव्यभिचारि कृतकत्वं शब्दे वर्त्तमानमनित्यतां तत्र गमयत्येवेति निष्फलं [2153] 'पक्षवचनं' । (२२)

## (२) प्रतिज्ञा न साधनावयवः

तस्मात् (।)

...v.4.23 अनुक्तावपि पक्षस्य सिद्धेरप्रतिबन्धतः ।
त्रिष्वन्यतमरूपस्यैवानुक्तिर्न्यूनतोदिता ॥ २३ ॥

'पक्षस्यानुक्तावपि साध्यसिद्धेरप्रतिबन्धतः' अविरोधात् 'त्रि' पक्षधर्मतादिषु 'रूपेष्वन्यतमस्य' एकस्या'नुक्तिर्न्यूनतोदिता' साधनदोषो न तु पक्षाद्यवचनं । (२३)

यदि [2154] च प्रतिज्ञा साधनमिष्यते तदा साध्यनिर्देशः प्रतिज्ञेति प्रतिज्ञालक्षणमतिव्यापि स्यात् । असिद्धस्य हेतोर्दृष्टान्तस्य चासिद्धस्य साध्यत्वं साधनत्वञ्चास्तीति प्रतिज्ञार्थं स्यात् । यस्य तु मते प्रतिज्ञा न साधनं (।)

...v.4.24 साध्योक्तिं वा प्रतिज्ञां स वदन् दोषैर्न युज्यते ।
साधनाधिकृतेरेव हेत्वाभासाप्रसङ्गतः ॥ २४ ॥

'स साध्योक्तिं' साध्यनिर्देशं 'प्रतिज्ञां वदन्न'नन्तरोक्ते'र्दोषैर्न युज्यते । साधनाधिकृतेः' साधनत्वेनाधिकार'देव' प्रतिज्ञार्थस्य [2155] 'हेत्वाभासेष्वप्रसङ्गतः' (२४)

यस्माद् (।)

...v.4.25 अविशेषोक्तिरप्येकजातीये संशयावहा ।
अन्यथा सर्व्वसाध्योक्तेः प्रतिज्ञात्वं प्रसज्यते ॥ २५ ॥

'अविशेषोक्तिः' [2156] सामान्याभिधानम'प्येकजातीये [2157] संशयावहा' तत्त्वार्थशङ्कोपाधिका न सर्व्वत्रेति न्यायः । ततोऽसाधनमेव साध्यं प्रतिज्ञा । नत्वसिद्धहेतुदृष्टान्तादिकं तस्य साधनत्वेनेष्टत्वात् । 'अन्यथा' यद्येवं नाभ्युपगम्यते तदा 'सर्व्वस्याः साध्योक्ते'र्घटं [2158] करोती-

[2152] २ न चैवं तस्मान्न हेतुप्रवर्त्तकत्वेन प्रतिज्ञायाः साधनत्वं ।
[2153] १ द्वितीयकृतकशब्दवदुच्यमाने निग्रहस्थानं ।
[2154] २ पक्षस्यासाधनत्व गुणमाह ।
[2155] ३ साधनस्य विजातीयत्वात् ।
[2156] ४ साधनासाधनविभागं विनोक्तिः ।
[2157] ५ साध्य एव न साधने ।
[2158] ६ असिद्धस्य करणात् ।

त्यादेः 'प्रतिज्ञात्वं प्रसज्यते' । ज्ञापकहेत्वधिकारात् तत्साध्यस्यैव प्रतिज्ञात्वं न कारकहेतुसाध्यस्येति चेत् । यद्येवमसाधनभूतसाध्यनिर्देशः प्रतिज्ञा न साधननिर्देश इति सिद्धं । (२५)
[423/s]स्यादेतत् [2159] (।)

...v.4.26 सिद्धोक्तेः साधनत्वाच्च परस्यापि न दुष्यति ।
इदानीं साध्यनिर्देशः साधनावयवः कथम् ॥ २६ ॥

'परस्यापि [2160] सिद्धोक्तेः' सिद्धार्थप्रतिपादकत्वात् । 'साधनत्वाच्च' प्रतिज्ञात्वमिष्टं । अतो हेत्वाभासादि प्रतिज्ञात्वप्रसङ्गेन 'न दुष्यति । हेत्वाभासाद्यसि'-[84a/MA] द्धत्वादसाधनमसाधनत्वाच्च न प्रतिज्ञा । 'इदानी[2161]'मस्मिन्नभ्युपगमे 'साध्यनिर्देशो'ऽसिद्धत्वात् 'साधनावयवः कथं' (।) न हि प्रतिज्ञार्थः सिद्धः । तदर्थमेव साधनोपन्यासात् । असिद्धश्च न साधनं हेत्वाभासवत् ॥ (२६)
या च स्व[2162] यूथ्यानां पूर्व्वपक्षपरिहारोक्तिः (।)

...v.4.27 साभासोक्त्याद्युपक्षेपपरिहारविडम्बना ।
असम्बद्धा तथा ह्येष न न्याय्य इति सूचितम् ॥ २७ ॥

पक्ष[2163] वचनं साधनं साभास(साभासार्थ)त्वादिति चेत् । न प्रत्यक्षेणा-[2164] नेकान्तात् प्रत्यक्षं साभासमपि न कस्यचित् प्रमाणस्य साधनं/?/ वचना[2165] त्मत्वे सति साभास[2166] त्वात् साधनत्वमिति चेत् । न दूषणेना[2167] नेकान्तात् । दूषणं साभासंवचनात्मत्वेपि न साधनमितिसापि साभासोक्तिरा[2168] दिर्यस्य तौ'साभासोत्त्यादी' [424/s] 'उपक्षेपपरिहारौ' । तावेव 'विडम्वना'ऽयुक्ततया । अत एवाह (।) 'असम्बद्धा । तथा हि' साभासत्वस्य विपर्यये बाधक[2169] प्रमाणभावादेवाहेतुत्वादसम्बन्धः पूर्व्वपक्षः । ततस्तमनुम[2170] त्य प्रत्यक्षेणानेकान्ततापादनमशो[2171]भनं । पुनर्वचनात्मत्वं विशेषणं परोक्तमप्रतिक्षिप्य दूषणाभासेनानेकान्ततापादनं चायुक्तं । तदेव[2172] हि हेतोर्व्विशेषणमुपयुक्तं(।)यद्विपक्षाद्धेतुं व्यावर्त्तयति न च वचनात्मत्वाऽसाधनत्वयोः कश्चिद्विरोधो येनासाधनाद् वचनात्मत्वनिवृत्तेर्व्विशेषणसाफल्यं स्यात् । तथा ह्येष विपक्षादव्यावर्त्तकहेतुविशेषणोपन्यासो 'न न्याय्य' इति वर्ण्णितं[2173] प्राक् वेदनित्यता-

[2159] १ सिद्धो हि शब्दादिकः साध्यधर्मी । अन्यथाऽश्रयासिद्धो हेतुरपक्षधर्मत्वात् स्यात् कथं साधकः ।
[2160] २ योपि प्रतिज्ञासाधनमाह । तस्यापि हेत्वाभासवचने न प्रतिज्ञात्वं ।
[2161] ३ यद्यसिद्धाभिधानाद्धेत्वाभासा न साधनं तदा ।
[2162] ४ न्यायमुखटीकाकारादेः ।
[2163] ५ प्रयोगस्तु पक्षवचनं साधनं साधनकाले उपादानात् हेतुदृष्टान्तवत् । पूर्व्वपक्षः ।
[2164] ६ परिहारः ।
[2165] ७ तेनैव पर आशङ्क्यते ।
[2166] ८ प्रत्यक्षमवचनात्मकं ।
[2167] ९ परिहारः । साधनकाले दूषणमप्युपादीयते न च तत्साधनं ।
[2168] १० अत्र यदि परः प्रदूषयति अदूषणत्वे सति साभासोक्तिर्हेतुस्तदा नैवानेकान्तः । एवं यत्र यत्र न्याय मुखटीकाकृता व्यभिचारा उच्यते । तत्र तत्र परेण विशेषणमुच्यत इति परंपरा । विरुद्धाव्यभिचार्युपक्षेपे च पक्षवचनं न साधनमसिद्धोक्तेरसिद्धदृष्टान्तवचनवत् । इत्युक्त एव बाधितः स्यात् ।
[2169] १ वचने साभासत्वासाधनत्वयोरविरोधात् ।
[2170] २ विरुद्धाव्यभिचार्युपक्षेपादिशोभनं स्यात् सन्दिग्धं व्यतिरेकाद् भावनं न्याय्यं ।
[2171] २ विरुद्धाव्यभिचार्युपक्षेपादिशोभनं स्यात् सन्दिग्धं व्यतिरेकाद् भावनं न्याय्यं ।
[2172] ३ तत्प्रतिक्षेपोपायमाह ।
[2173] ४ युक्तं तु विशेषणं वेदचिन्तायां अपौरुषेयं ।

सिध्यर्थंमध्ययनपूर्व्वकमित्युक्ते भारताध्ययनेनानेकान्ततामापादितां प्रतिषेद्धुं वेदाध्ययनत्वे सतीति विशेषणं मी मां स केनोपन्यस्तं तदपि करण(कृति)पूर्व्वकं भारताध्ययनवद् स्यात् न कश्चिद् विरोधः । ततो विपक्षादव्यावर्त्तकं विशेषणमयुक्तमित्युक्तं प्राक् ॥ (२७)

(३) पक्षलक्षणकरणे प्रयोजनम्

ननु यदि पक्षवचनमसाधनं सामर्थ्यगम्याभिधेयश्च तदाचा र्ये ण पक्षलक्षणं कृतं किमर्थमित्याह (।)

...v.4.28 गम्यार्थत्वेपि साध्योक्तेरसंमोहाय लक्षणम् ।
तच्चतुर्लक्षणं रूपनिपातेषु स्वयं पदैः ॥ २८ ॥

'साध्यव्या'त्पपक्षवचनसामर्थ्याद् 'गम्यार्थत्वेपि साध्योक्तेः' पक्षवचनस्य 'लक्षण'मुक्तम'संमोहाय' विप्रतिपत्तिनिराकरणेन साध्यप्रतिपत्त्यर्थं । तथा ह्यात्मार्थत्वं 'साध्यमपि सां ख्या' असाध्यमाचक्षते परार्थत्वमसाध्यमपि साध्यमिति सन्ति विप्रतिपत्तयः । तच्च साध्यं 'चतुर्लक्षण'मुक्तं । स्वरूपेणैव निर्देश्यः स्वयमिष्टोऽनिराकृतः पक्ष इत्यत्र लक्षणचतुष्टयप्रतिपादके रुपनिपातेषु 'स्वयं पदै'र्यथाक्रमम् (। २८)

...v.4.29 असिद्धासाधनार्थोक्तवाद्यभ्युपगतग्रहः ।
अनुक्तोपीच्छया व्याप्तः साध्य आत्मार्थवन्मतः ॥ २९ ॥

'असिद्ध'स्या'साधन'स्यार्थो'क्त'स्य 'वाद्यभ्युपगतस्य ग्रहः' । असिद्धस्वभावत्वात् साध्यस्य न सिद्धस्य ग्रहणं । ततः सिद्धं चाक्षुषत्वादि रूपादेर्न साध्यं । निपातैव [425/s] कारकरणेनासाधनस्य ग्रहणं ततश्चाक्षुषत्वाद्यसिद्धमपि साधनत्वेन शब्देभिधीयमानं न साध्यं । दृष्टशब्देनार्थोक्तस्यापि ग्रहणं । ततोऽनुक्तमप्यात्मार्थत्वं संघातत्वाच्चक्षुरादेः सांख्यस्य साध्यं । स्वयं शब्देन वाद्यभ्युपगतस्य ग्रहणं । ततः शास्त्राभ्युपगतस्याकाशगुणत्वादेः शब्दे धर्म्मिणि वादिनाऽनित्यत्वे साधयितुमारब्धे-[84b/MA] ऽसाध्यता । अल्पवक्तव्यतयाऽर्थोक्तस्य तावत् साध्यतां समर्थयितुमाह । वादिनो'ऽनुक्तोपीच्छया व्याप्तः साध्यो मतः । आत्मार्थवत्' । यथा आत्मास्ति न वेति विवादे तत्साधनार्थं सां ख्ये न परार्थाश्चक्षुरादयः संघातत्वात् शयनाश(?स)नाद्यङ्गवत् । इत्युक्तस्य साधनस्यात्मार्थत्वमनुक्तमपि साध्यमिच्छाविषयत्वात् ॥ (२९)

नन्विष्ट शब्देनानिष्टस्य सर्व्वस्य निरासात् । शास्त्रोपगतस्यापि वाद्यनिष्ठस्यासाध्यत्वं सिद्धं । तन्निष्फलं स्वयंपदमित्याह । व्यवच्छेदफलत्वाच्छब्दा- नामिष्टशब्दात् (।)

...v.4.30 सर्वान्येष्टनिवृत्तावप्याशङ्कास्थानवारणम् ।
वृत्तौ स्वयंश्रुतेनाह कृता चैषा तदर्थिका ॥ ३० ॥

'सर्व्व'स्य वादिनोऽ'न्येन' शास्त्रोदिना इ'ष्ट'स्य 'निवृत्तौ' सिद्धाया'मपि' शास्त्रेणेष्टं वादिनोपीष्टमेवेति 'शङ्कास्थान'स्य विप्रतिपत्तिविषयस्य 'वारणं' फलं 'स्वयंश्रुते'नाचार्यो 'वृत्ता'वाह । स्वयमिति शास्त्रानपेक्षमभ्युपगमन्दर्शयति । 'एवा' स्वयंश्रुति'स्तदर्थिका' विप्रतिपत्तिनिराकरणार्था 'कृता' ॥ (३०)

(४) आत्मार्थत्वविवादे दोषः ।

2174 य एवेच्छया विषयीकृतः स (।)

2174 १ यदि वादिनेष्ट एव साध्यस्तदा धर्मविशेषविपरीतसाधनादीनां विरुद्धानामसम्भव एवेत्याह ।

...v.4.31 विशेषस्तद्व्यपेक्षत्वात् कथितो धर्मधर्मिणोः ।
अनुक्तावपि वाञ्छाया भवेत् प्रकरणाद् गतिः ॥ ३१ ॥

विशेषो 'धर्मधर्मिणोः' सम्बन्धी 1/?/ 'व्यपेक्ष'त्वात् । इच्छारचितात् सम्बन्धात् साध्यत्वेन 'कथितः' । चक्षुरादीनां संहतविषयं पारार्थ्यमिति धर्मस्य 'विशेषः' साध्यः । परार्थस्य साध्यत्वात् । परार्थाः सन्तश्चक्षुरादयोऽसंहतार्था इति धर्मिणो विशेषः साध्यः । चक्षुरादयोऽनेकाणुसञ्चयात्मिकाः क्रमेणैककालश्च संहताः । ज्ञानादि तु [426/s] कालभेदेनानेकत्वात् संहतानि । तेषां परार्थानां सतामसंहतविषयत्वमेवेच्छाविषयत्वात् साध्यं । आत्मनः सर्व्वकालमेकत्वे नासंहतत्वात् । कथं पुनरात्मार्थत्वस्यानुक्तौ तद्विषयाया वाञ्छायाः प्रतीतिरित्याह । 'वाञ्छाया अनुक्तावपि' मुख्यं शब्देन 'प्रकरणा'दात्मास्ति नास्तीति संशये सति तत्साधनोपन्यासप्रस्तावाद् 'गतिः' प्रतीति'र्भवति' ॥ (३१)

आत्मार्थत्वस्य विवादे को दोष इत्याह (।)

...v.4.32 अनन्वयोपि दृष्टान्ते दोषस्तस्य यथोदितम् ।
आत्मा परश्चेत् सोऽसिद्ध इति तत्रेष्टघातवत् ॥ ३२ ॥

'तस्ये'च्छाविषयस्यात्मार्थत्वस्य साध्या'नन्वयो दृष्टान्ते दोषः[2175]' । अपिशब्दाद्वक्ष्यमाण इष्टविधातश्च । 'यथोदित'माचार्यव सु ब न्धु ना । परार्थाश्चक्षुरादय इत्यत्र 'परश्चेदात्मा' विवक्षितः 'सोऽसिद्धो' दृष्टान्त 'इति । तत्रा'न्वये सती'ष्टविधातवत्' । साधनं इष्टात्मार्थत्वविपर्ययेणान्वयात् तत्साधकत्वात् ॥ (३२)

अथात्मार्थत्व न साध्यमित्याह (।)

...v.4.33 साधनं यद्विवादे न न्यस्तं तच्चेन्न साध्यते ।
किं साध्यमन्यथानिष्टं भवेद् वैफल्यमेव वा ॥ ३३ ॥

'य'स्यात्मनोर्थस्य 'विवादे'ऽस्ति नास्तीति सन्देहे न साधनं 'न्यस्त'मुपन्यस्तं 'तच्चेन्न साध्यते कि'मिदानीं 'साध्यं' स्यात् । 'अन्यथा' विवादविषयो यदि न साध्यं तदा'निष्टं' विपर्ययसिद्धिः स्यात् । यथा व्युत्पन्नसर्व्वशब्दवादिनं[2176] प्रत्यव्युत्पन्नसंज्ञाशब्दवादिना तदर्थवत्वसिद्ध्यर्थं साधनमुच्यते ॥

संज्ञिसम्बन्धात् प्रागर्थव[2177] च्छब्दरूपं विभक्तिदर्शनात् तदन्यशब्दवदिति । अत्र [2178] गच्छतीति गौरित्येकार्थसमवायात् क्रियोपलक्षितेन बाह्यसामान्येनार्थवान् गोशब्दः सिद्धोऽव्युत्पन्नवादिनः । नतु स्वरूपमात्रेणा[2179] र्थेनार्थवान् । अर्थमात्रजश्च साध्यत्वेनोद्दिष्टं न तु स्वरूपेणार्थेनार्थवत्वं । ततो दृष्टान्ते विभक्त्यन्तस्य वाक्यार्थवत्वेन व्याप्तिसिद्धेर्देवदत्तादावपि पक्षीकृते संज्ञाशब्दे देवैर्दत्तो देवदत्त इति वाक्यार्थवत्वं स्वरूपार्थवत्वे विरुद्धं सिध्यति ॥ [427/s]

अथवेष्टस्य साध्यत्वाभावे परार्थाश्चक्षुरादयः संहतत्वादित्यत्रात्मार्थत्वस्यासंहतपारार्थ्यस्यासाध्यत्वात् । ज्ञानहेतुत्वेन संहतपारार्थ्यस्य बौद्धेनापीष्टे । साध-[85a/MA] नवैफल्यमेव वा स्यात् । (३३)

---

[2175] १ उक्त विरुद्धत्वं ।

[2176] २ वैयाकरणं ।

[2177] ३ संज्ञी नास्तीति न संज्ञाशब्दस्तदर्थवानिति मत्वायं ।

[2178] ४ नित्ये शब्दार्थसम्बन्धे ।

[2179] ५ तस्य साध्यत्वेनानभ्युपगमात् ।

....4.34a सद्वितीयप्रयोगेषु निरन्वयविरुद्धते ।
एतेन कथिते साध्यं;

'एतेन' साध्यत्वेनेष्टस्यानन्वयदोषदर्शनेन 'सद्वितीयप्रयोगेषु' चा र्व्वा ककृतेषु यथाभिव्यक्तचैतन्यशरीरलक्षणपुरुष[2180] सद्वितीयो घटः । अनुत्पन्नत्वात् । कुड्यवदिति शरीरमेवाभिव्यक्तचैतन्यं पुरुषो नात्मा कश्चित् परलोकी तेन सद्वितीयत्वं (ससहायत्त्वं) घटस्य साध्यत इति प्रयोगफलं । तत्र च 'निरन्वयविरुद्धते कथिते' । तथा ह्यभिव्यक्तचैतन्यदेहलक्षणपुरुषेण सद्वितीयत्वं 'साध्यं' ।[2181] तेन च कुड्येन्वयो न दृष्ट इति निरन्वयता (।) घटस्य तु कुड्येऽन्वयो दृष्ट इति तेन सद्वितीयत्वसाधनात् विरुद्धता स्यात् ।

(व्यक्त्यसिद्धौ न सामान्यम्)

....4.34b सामान्येनाथ सम्मतम् ॥ ३४ ॥

...v.4.35 तदेवार्थान्तराभावाद् देहानाप्तौ न सिध्यति ।
वाच्यशून्य प्रलपतां तदेतज्जाड्यवर्णितम् ॥ ३५ ॥

'अथ सामान्येन'[2182] विशेषमनुल्लिख्य सद्वितीयत्वं साध्यं कुड्ये सद्वितीयत्वमात्रेणान्वयात् । एवमपि 'तत्सा'मान्य'मेव' न सिध्यति प्रतिवादिनः । घटादभिव्यक्तचैतन्यस्वभावतया'ऽर्थान्तराभावात्' । अर्थान्तरत्वासम्भवात् । 'देह'स्या'नाप्ता'वर्थान्तरत्वेनासिद्धौ द्वयोर्भिन्नयोरन्यतरसद्वितीयत्वं सामान्यं स्यात् ।[2183] न हि घटः स्वरुपेणैवान्यतरसद्वितीयः । देहन्तु नाभिव्यक्तचैतन्यलक्षणपुरुषमिच्छति प्रतिवादिति भेदाभावात् । तेनापि नान्यतरसद्वितीयत्वसिद्धिः । यतश्च न घटस्य स्वरूपेणैव सद्वितीयत्वसम्भवः । भेदाधिष्ठानत्वात् तस्य, नापि देहेनान्वयाभावात् । ततो वाच्यशून्यत्वमर्थशून्यत्वमन्यतरसद्वितीयत्वं 'प्रलपतां' परलोकापवादीनां 'तदेतद'न्यतरसद्वितीयत्वसाध्यवचनं 'जाड्यस्य वर्णितं' चेष्टितं ॥ (३४,३५)
[428/s]

...v.4.36 तुल्यं नाशेपि चेच्छब्दघटभेदेन कल्पने ।
न सिद्धेन विनाशेन तद्वतः साधनाद् ध्वनेः ॥ ३६ ॥

'नाशेपि' साध्ये 'शब्दघटयोः' साध्यदृष्टान्तधर्मिणोः सम्बन्धितया 'भेदेन[2184] कल्पने' शब्दसम्बन्धिनो नाशस्य घटेन्वयाभावादसाध्यत्वं । घटसम्बन्धिनश्च शब्देऽसम्भवादसाध्यतेति तुल्यमिदमिति 'चेत् । न तुल्यं वानाशेन' प्रध्वंसलक्षणेन 'सिद्धेन' निश्चितेन 'ध्वनेस्तद्वतो' विनाशवतः 'साधना'द्विनाशसामान्यं साध्यं सिद्धं केवलं तद्वत्ता शब्दस्य न सिद्धेति साध्यते । यथा विनाशे सामन्येन सिद्धे सत्यसिद्धस्तद्वान् शब्दः साध्यते[2185] । (३६)

....4.37a तथार्थान्तरभावे स्यात् तद्वान् कुम्भोपि ।

[2180] १ घटयोरन्यतरेण ।
[2181] २ प्रत्यक्षविषयत्वादनुमानमुक्तं ।
[2182] ३ अन्यतरार्थान्तरभावः सामान्यं साध्यं ।
[2183] ४ न हि गोव्यक्त्यभावे सामान्यं ।
[2184] १ शब्दानित्यता घटनित्यतेति ।
[2185] २ एवमर्थान्तभावः सिद्धो नास्ति ।

'तथार्थान्तरभावे'ऽभि[2186] व्यक्तचैतन्यस्वभावतया देहस्य घटात् वैजात्ये सिद्धे सति 'तद्वान् कुम्भोपि' सिध्येत् । न चैतत् प्रतिवादी बोधियितुं शक्यते । तेनाचैतन्यस्य भूतव्यतिरिक्तस्यैव स्वीकारात् । यदि पुनरचेतनस्वभावतया घटजातीयेनैव देहेन[2187] सद्वितीयत्वं घटस्य साध्यते तदा सिध्यत्येव । तथाविधस्य सद्वितीयत्वस्य सिद्धत्वाद् विनाशवत् । किन्तु वादिनो नेष्टिसिद्धिः । देहस्य चेतनस्वभावतयाऽसिद्धेः ॥

....4.37b अनित्यता ।
विशिष्टा ध्वनिनान्वेति नो चेन्नायोगवाण्णात् ॥ ३७ ॥

[85b/MA]

अथ ध्वनिना स्वसम्बन्धितया विशिष्टाऽनित्यता दृष्टान्तं 'ना'न्वेतीति 'चेत्' । 'ना'नन्वयदोषो विशेषणेना'योग'स्यासम्बन्धस्य 'वारणात्' ॥ (३७)

...v.4.38 द्विविधो हि व्यवच्छेदो वियोगापरयोगयोः ।
व्यवच्छेदादयोगे तु वार्ये नानन्वयागमः ॥ ३८ ॥

'द्विविधो हि व्यवच्छेदो' विशेषणेन दृष्टो 'वियोगापरयोगयोर'योगान्ययोगयो'र्व्यवच्छेदात्' । यथा चैत्रो धनुर्द्धरः पा र्थो धनुर्द्धर इति । तत्र धर्मिणा विशेषणेनायोगे । वार्येऽनित्यताया 'नानन्वयागमो'ऽनन्वयापत्तिर्न भवति । शब्दोऽनित्यो न वेत्ययोगः शङ्कितो विशेषणेनव्यावर्त्यते शब्दोऽनित्य इति । एवम्विधा चानित्यता नान्यसम्बन्धेन विरुध्यत इति नानन्वयो दृष्टान्ते ॥ (३८)

उक्तार्थसंग्रहमाह ।

[429/s]

...v.4.39 सामान्यमेव तत्साध्यं न च सिद्धप्रसाधम् ।
विशिष्टं धर्मिणा तच्च न निरन्वयदोषवत् ॥ ३९ ॥

'तद'नित्यतादि 'सामान्यमेव साध्यं' न विशेषो येनानन्वयदोषः स्यात् । नन्वनित्यतादि सामान्यं 'सिद्धमेव क्व[2188] चित्' साधने वैयर्थ्यमित्याह । 'न च सिद्धस्य' क्वचित् सत्तामात्रेणानित्यत्वस्य 'प्रसाधनं' । धर्मिण्ययोगव्यवच्छेदस्यासिद्धस्य प्रसाधनात् । न च 'धर्मिणा'ऽयोगव्यवच्छेदतो 'विशिष्टं तच्चा'नित्यतादि दृष्टान्ते 'निरन्वयदोषवत्' (।) (न च)अयोगव्यवच्छेदेन धर्मिविशेषितस्य धर्म्यन्तरसम्बन्धाविरोधात् ॥ (३९)

...v.4.40 एतेन धर्मिधर्माभ्यां विशिष्टौ धर्मधर्मिणौ ।
प्रत्याख्यातौ निराकुर्वन् धर्मिण्येवमसाधनात् ॥ ४० ॥

'एतेने'ष्टस्य साध्यत्ववचनेन 'धर्मिधर्माभ्यां विशिष्टौ धर्मधर्मिणा'वनन्वया'न्निराकुर्वन्' चार्वाको यथा न शब्दानित्यत्ववान् शब्दो नानित्यशब्दवान् वा शब्द इति । न हि शब्दानित्यत्वेनानित्यशब्देन वा क्वचिद् घटादौ दृष्टान्ते कृतकत्वस्यान्वयोस्ति तत इष्टविपर्यासिनाद् विरुद्धं कृतकत्वमिति स एवं वदन् प्रत्याख्यातः कथमित्याह । 'धर्मिणि' शब्दे 'एवं' धर्म्मिविशिष्टस्य धर्मस्य धर्माविशिष्टस्य वा धर्मिणोऽ'साधनाद'नित्यत्वमात्रस्य शब्दे साध्यत्वेनेष्टत्वात् । अन्यथाऽनित्यशब्दवति शब्दे सिद्धेपि शब्दो नानित्यः स्यात् । यदि धर्ममात्रं साध्यं तदा समुदायः साध्यो

[2186] ३ घटव्यक्त्या ।

[2187] ३ घटव्यक्त्या ।

[2188] १ विद्युदादौ ।

न स्यात्[2189] । हेतोस्तदपवादोविरुद्धस्य न स्यादित्याह । धर्ममात्रस्य धर्मि[2190]साध्यत्वात् । (४०)

...v.4.41 समुदायापवादो हि न धर्मिणि विरुध्यते ।
साध्यं यतस्तथा नेष्टं साध्यो धर्मोत्र केवलः ॥ ४१ ॥

समुदाय एव साध्यो 'हि' यस्मात् तस्माद् विरुद्धस्य हेतोरिष्ट'समुदाया[2191] पवादो न विरुध्यते' । ननु समुदायस्य साध्यत्वेऽनन्वयदोष इष्टविघातो वा स्यादित्याह (।) तथा धर्मिधर्मसमुदायोऽन्यधर्मिसम्बन्धितया 'साध्यं यतो नेष्टं' (।) तस्मान्नानन्वयो विरुद्धता वा । 'तथा ह्यत्र' शब्दादौ धर्मिणि 'धर्मो'ऽनित्यतादिः 'केवलः साध्य' इष्टः । तस्य चान्वयोस्तीति न दोषः । (४१)

[430/s]उक्तमिष्टग्रहणस्य प्रयोजनं ॥

## (५) स्वयंशब्दग्रहणफलम् ॥

स्वयं शब्दस्येदानीं वक्तुमाह ।

...v.4.42 एकस्य धर्मिणः शास्त्रे नानाधर्मस्थितावपि ।
साध्यः स्यादात्मनैवेष्ट इत्युपात्ता स्वयं श्रुतिः ॥ ४२ ॥

'एकस्य' शब्दादे'र्द्धर्मिणः शास्त्रे नानाधर्मा'णाममूर्त्तत्वानित्यताकाशगुणत्वादीनां[86a/MA] 'स्थिताव'भ्युपगमेपि वादिना 'आत्मनैव' साधनोपन्यासकाले साधयितुमिष्टो धर्मः 'साध्यः स्यात्' । नान्य 'इति स्वयं' श्रुतितिराचार्येणो'पात्ता' । (४२)

यदि पुनः (।)

...v.4.43 शास्त्राभ्युपगमादेव सर्वादानात् प्रबाधने ।
तत्रैकस्यापि दोषः स्याद् यदि हेतुप्रतिज्ञयोः ॥ ४३ ॥

'शास्त्रे'णा'भ्युपगमादेव' सर्व्वेषां धर्माणा'मादानात्' परिग्रहात् वादिना 'तत्र' तेषु मध्ये 'एकस्यापि' धर्मस्योपन्यस्तहेतुना बाधने 'हेतुप्रतिज्ञयो'र्व्विरुद्धता 'दोष' उच्यते[2192] ॥ (४३)

यथा शब्दे शास्त्रेष्टमाकाशाश्रयत्वं बाधमानस्य[2193] वादीष्टमनित्यत्वं साधयतोपि कृतकत्वस्य विरुद्धत्वं प्रतिज्ञाविरोधो वाभिधीयते । कृतकं हि क्षणिकं । न च क्षणिकमुत्पादानन्तरं क्षणमप्यस्ति । ततः कृतकत्वमाकाशाश्रयत्वबाधनं ।

...v.4.44 शब्दनाशे प्रसाध्ये स्याद् गन्धभूगुणताक्षतेः ।
हेतुर्व्विरुद्धोप्रकृतेर्न्नोचेदन्यत्र सा समा ॥ ४४ ॥

---

[2189] २ न धर्मिणा सह समुदायसाधनात् । न हि शब्दे परः शब्दानित्यत्वसमुदायः साध्यः ततः तस्य निराकरणेपि न दोषः ।

[2190] ३ आश्रयासिद्धिरन्यथा ।

[2191] ४ ॥ ° ॥ स्वयं शब्दात् । स च द्वयोरेकाभावे समुदाय एव निराकृतः स्यात् ।

[2192] १ यदि तदापरः श्लोकः ।

[2193] २ आकाशस्य नित्यत्वात् तदाश्रितश्च नित्यं स्यात् । तदनित्यत्वेन बाध्यते ।

तथा कृतकत्वात् ‘शब्द’स्य ‘नाशे सा’ध्य[2194] माने ‘गन्धस्य’[2195] कृतकत्वान्नश्वरस्य ‘भूगुणता’या : पृथिव्याश्रिततायाः शास्त्रेष्टायाश्च ‘क्षतेः’ । विपर्यासनात् ‘हेतुः’ प्रय[431/s] त्ना-नन्तरीयकत्वादि[2196] ‘विरुद्धः’ स्यात् । प्रतिज्ञा --- विरुद्धा स्यात् । उपात्तो हेतुः वादिनानिष्टं शास्त्रेष्टं बाधत इत्येव यदि विरुद्धः तदा गन्धभूगुणतां बाधमानस्य कृतकत्वस्यं शब्दे विरुद्धता स्यात् । शास्त्रेष्टबाधकताया अविशेषात् । (४४)

अथ गन्धभूगुणताया साध्यत्वेनाप्रकृतेरप्रस्तुते तद्बाधनेपि शब्दे कृतकत्वं विरुद्धं नो चेत् सा प्रकृतिरन्यत्राकाशगुणत्वेपि समा । न हि वादिना आकाशगुणत्वं साधयितुमिष्टं किन्त्वनित्यत्वं । अतोऽप्रकृतस्यास्य बाधने न विरुद्धः स्याद्धेतुः ।

...v.4.45 अथात्र धर्मी प्रकृतस्तत्र शास्त्रार्थबाधनम् ।
अथ वादीष्टतां ब्रूयाद् धर्मिधर्मादिसाधनैः ॥ ४५ ॥

‘अथात्रा’काशगुणत्वादौ ‘धर्मी’ शब्दः ‘प्रकृतः’ । ‘तत्र शास्त्रार्थ’स्याकाशगुणत्वादेः साधनं तद्बाधने च विरुद्धता हेतोः । भूगुणत्वे तु गन्धो धर्म्यप्रकृत इति तद्बाधनेपि न विरोधः । ‘नैष परिहारः । तथाहि’ न वादीष्टविपर्यासनेन दोष उक्तः । किन्तु शास्त्रार्थविरोधेन तथा च प्रकृतत्वमनुपयुक्तं । ‘अथ’ वाद्यनिष्टतयाऽप्रकृतत्वं तच्चाकाशगुणत्वयोः समानं । अथा-काशगुणत्वस्य ‘वादीष्टतां’ परो ‘ब्रूयात् धर्म्मिधर्म्मादिसाधनैः’ [2197] । साध्यधर्मिधर्मत्वात् तदेकदेशत्वाद्वाऽकाशगुणत्वमिष्टं वादिनोऽनित्यत्ववदिति । (४५)

ननु (।)

...v.4.46 कैश्चित् प्रकरणैरिच्छा भवेत् सा गम्यते च तैः ।
बलात् तवेच्छेयमिति व्यक्तमीश्वरचेष्टितम् ॥ ४६ ॥

‘कैश्चित् प्रकरणै’र्विवादादि‘भिरिच्छा’वादिनः कस्मिंश्चिद् धर्मे ‘भवेत्’ । तैरेव च प्रकरणैः ‘सा’ इच्छा ‘गम्यते’ परेणापि । न तु तस्य धर्मिणो धर्म इत्येव वादिनेष्यते । ततो धर्मिधर्मत्वादिसन्दिग्धविपक्षव्यतिरेकित्वात् शेषवत् । स्वयमनिच्छतश्च वादिनः साधनस्य ‘बलात् तवेच्छेयमिति’ यदुच्यते ‘व्यक्त’मिद‘मीश्वरचेष्टित’मित्युपहसति । (४६)

किञ्च (।)

...v.4.47 वदन्नकार्यलिङ्गां तां व्यभिचारेण बाध्यते ।
अनान्तरीयके चार्थे बाधितेन्यस्य का क्षतिः ॥ ४७ ॥

[432/s]

‘ता’मिच्छाम‘कार्यलिङ्गजां’ कार्येतरलिङ्गामनुमेयत्वेन वदन् परो ‘व्यभिचारेण बाध्यते’ । न ह्यन्योऽकार्योऽन्यं न व्यभिचरतीति नियमोस्ति । अपि च साध्यसानित्यत्वस्या‘नन्तरी-यकेऽर्थे’ आकाशगुणत्वादौ ‘बाधित’त्वेप्य‘न्यस्य’ साध्यस्य ‘का क्षतिः’ । न ह्यनित्यत्वमा-काशगुणत्वनान्तरीयकं येन तदभावे तदपि न स्यात् । कृतकत्वन्त्वनित्वत्यताऽव्यभिचारीति तस्मान्नानुमानमनैकान्तिकं । (४७)

---

[2194] ३ वैशेषिककृता यथा शब्दे आकाशगुणत्वमिष्टं एवं गन्धे पृथिवीगुणत्वमपीति कोत्र विशेषो येनैकत्र हेतुप्रतिज्ञादोषो नान्यत्रेति भावः अप्रकृतत्वाच्चेदत्रापि समानं । अनेन वेदापौरुषेयवादीनं प्रत्युक्तनित्यः शब्दः कृतकत्वात् जलादिवत् । गन्धेपि कृतकत्वादनित्यत्वे भूगुणत्वक्षतेः ।

[2195] ४ धर्मिणः

[2196] १ कृतकत्वादिरादिना ।

[2197] २ यो धर्मिणो विशेषः साध्यसमुदायैकदेशविशेषो वा स साध्यः ।

## 4.3 ३. शब्दाप्रामाण्यचिन्ता

### (१) शास्त्रविरोधोऽकिञ्चित्करः

...v.4.48 उक्तश्च नागमापेक्षमनुमानं स्वगोचरे ।
सिद्धं तेन सुसिद्ध तन्न तदा शास्त्रमीक्ष्यते ॥ ४८ ॥

अनुमाविषये नेष्टं वाचः प्रामाण्य (३।३१०) मित्यादि'नोक्तं' प्राक् । वस्तुबलप्रवृत्त'मनुमानं नागमापेक्षं स्व'स्य 'गोचरे' साध्य इति । तस्मात् 'तेन' वस्तुबलप्रवृत्तेनागमानपेक्षिणाऽनुमाने यत् 'सिद्धं सुसिद्ध'न्त'त्तदा' च 'न शास्त्रमीक्ष्यते' बाधितं न वेति वस्तुबलप्रवृत्तानुमानेन तदपेक्षाभावात् । तदानुकाले शास्त्रस्यानाश्रयणात् । (४८)

...v.4.49 वादत्यागस्तदा स्याच्चेन्न तदानभ्युपायतः ।
उपायो ह्यभ्युपायेऽयमनङ्गं स तदापि सन् ॥ ४९ ॥

[86b/MA]

'वादत्यागः स्याच्चेत्' । न वादत्यागः सिसाधयिषितैकधर्मादपरस्य शास्त्राभ्युपेतस्य 'तदा-' साधनोपन्यासका[2198] ले साध्यतयाऽ'नभ्युपायतो'ऽस्वीकारात् । ननु शास्त्राभ्युपगमाद् यदा वादः क्रियते तदा शास्त्रार्थबाधनात् वादत्यागः स्यादेवेत्याह । शास्त्रस्या'भ्युपाये[2199] ऽय'म्विचार[2200] 'उपायः' । तत'स्तदा' विचारकाले 'सन्नप्य'भ्युपगमोऽ'नङ्गं' शास्त्रार्थग्रहणे गृहीतस्य त्यागः स्यात् । न विचारात् प्राग् ग्रहणमभ्युपगमान्न्याय्यं । (४८)

कदा तर्हि शास्त्रेण बाधेष्यते इत्याह ।

...v.4.50 तदा विशुद्धे विषयद्वये शास्त्रपरिग्रहम् ।
चिकीर्षोः स हि कालः स्यात् तदा शास्त्रेण बाधनम् ॥ ५० ॥

[433/s]

'शास्त्रो'पदर्शिते 'विषय[2201] द्वये' प्रत्यक्षपरोक्षे रूप[2202] नैरात्म्यादौ तदा प्रमाणप्रवृत्त्या विशुद्धे निर्णीते सति पश्चादत्यन्तपरोक्षे स्वर्गादौ शास्त्रेण शास्त्राश्रयणेनानुमानं चिकीर्षोः सतः स हि कालोऽभ्युगम्य यदि शास्त्रबाधो न भवेत् । अत'स्तदा शास्त्रेण' 'बाधनं' साध्यसाधनादेरिष्यते । (५०)

तदपि करमाच्छास्त्रबाधेष्यत इत्याह । (।)

...v.4.51 तद्विरोधेन चिन्तायास्तत्सिद्धार्थेष्वयोगतः ।
तृतीयस्थानसंक्रान्तौ न्याय्यः शास्त्रपरिग्रहः ॥ ५१ ॥

'त'स्य शास्त्रस्य 'विरोधेन तत्सिद्धेष्वर्थेषु' लिङ्गादिष्वसिद्धकल्पेषु गमक'चिन्ताया अयोगतः' । यस्मात् प्रत्यक्षपरोक्षार्थयोर्नागमाधिकारः तस्मात् 'तृतीयस्थाने'ऽतीन्द्रिये विषये विचार'संक्रान्तो शास्त्रपरिग्रहो न्याय्यः' । प्रकारान्तराभावात् । (५१)

2198 १ वस्तुबलप्रवृत्ते ।
2199 २ स्वीकारे
2200 ३ विचार्यग्रहात् ।
2201 १ विषयास्त्रयस्तत्र प्रत्यक्षानुमानविषयो प्राग्विचारेण विशोधनीयौ । तथा विशुद्धे पश्चाच्छास्त्रग्रहं चिकीर्षा ।
2202 २ रूपाद्यक्षस्यान्यदनुमायाः ।

...v.4.52 तत्रापि साध्यधर्मस्य नान्तरीयकबाधनम् ।
परिहार्यं न चान्येषामनवस्थाप्रसङ्गतः ॥ ५२ ॥

'तत्र' शास्त्रे परि'ग्रहेपि' तदा साधयितुमारब्धस्य 'साध्यधर्मस्य यन्नान्तरीयकं' सम्बद्धं यथा क्षणिकत्वस्य नैरात्म्यं तस्य 'बाधनं' परिहार्यं । वस्तुतस्तादात्म्यादनयोर्नैरात्म्यबाधने क्षणिकत्वबाधनप्रसङ्गात् । 'न त्वन्येषां' साध्यस्याकारणाव्यापकभूतानां धर्माणां बाधनं परिहार्यमनवस्थाप्रसङ्गतः । न हि शास्त्रदर्शितसम्भवधर्मव्याप्तिलिङ्गस्य दृष्टान्ते दर्शयितुं शक्यते येन कश्चिदागमाश्रयो हेतुरवतिष्ठेत । (५२)

ननु शास्त्रमनपेक्ष्य न वादः कर्त्तव्य इति वस्तुबलप्रवृत्तानुमानेपि शास्त्रापेक्षेत्याह ।

...v.4.53 केनेयं सर्वचिन्तासु शास्त्रं ग्राह्यमिति स्थितिः ।
कृतेदानीमसिद्धान्तैर्ग्राह्यो धूमेन नानलः ॥ ५३ ॥

'सर्व्वा'सु परोक्षात्यन्तपरोक्षार्थ'चिन्तासु शास्त्रं ग्राह्यमिति केनेयं स्थितिः' कृता (।) नैतदनुमन्यन्ते विद्वान्सः । 'इदानीम'विदुषामस्मिन्नभ्युपगमेऽ'सिद्धान्तैः' सिद्धान्त[434/s] विशेषाश्रयरहितैर्गोपालकादि'भिर्द्धू मेन' लिङ्गेन 'नानलो ग्राह्यः[2203]' । (५३)

न च कस्यचित् सिद्धान्तसम्बन्धो युक्तः । तथा हि सम्बन्धो भवन् सहजो वा भवेदौपाधिको वा (।) द्वयमपि निषेद्धुमाह ।

...v.4.54 रिक्तस्य जन्तोर्ज्जातस्य गुणदोषमपश्यतः ।
विलब्धा वत केनामी सिद्धान्तविषमग्रहाः ॥ ५४ ॥

'रिक्तस्य' तुच्छस्य सिद्धान्तरहितस्य 'जन्तोर्जातस्या'नेन सहज[2204] सम्बन्धाभावनिमित्तमुक्तं । 'गुणदोषं' प्रामाण्याप्रामाण्यनिबन्धन'मपश्यतः[2205]' । अनेनौपाधिकसम्बन्धनिमित्ताभाव उक्तः । [2206] 'केनान'र्थपटीयसा 'सिद्धान्ता'[2207] एव 'विषमग्रहा' दुष्परिहारत्वा'दिमे विलब्धा' [2208] 'वत' येषु स्वामित्वेन जन्तवो व्यवहरन्ति । न हि कर्ण्णनाश(? स)मिव सिद्धान्तः प्राणसहजः । नापि दोषोर्ज्झितगुणोपपन्नः प्रमाणमिव विचारात् प्राक् सिद्धान्तः सिद्धो येन समर्थविषयः स्यात् । (५४)

किञ्च (।)

...v.4.55 यदि साधन एकत्र सर्वं शास्त्रं निदर्शने ।
दर्शयेत् साधनं स्यादित्येषा लोकोत्तरा स्थितिः ॥ ५५ ॥

'यदि साधन एकत्र सर्व्वं शास्त्रं' शास्त्रार्थं 'निदर्शने' दृष्टान्ते वादी 'दर्शयेत्' तदा तत् 'साधनं स्यात्' (।) न त्वेकस्य शास्त्रदर्शितधर्मस्यान्वये । एतच्च न क्वचित् [87a/MA] साधने कर्त्तुं शक्य'मिति लोका'तिक्रान्ता 'स्थितिरेषा' । (५५)

अपि च (।)

...v.4.56 असम्बद्धस्य धर्मस्य किमसिद्धौ न सिद्धति ।
हेतुस्तत्साधनायोक्तः किं दुष्टस्तत्र सिध्यति ॥ ५६ ॥

---

2203 १ शास्त्रापरिग्रहेण सिद्धिप्रतिबन्धात् ।

2204 २ सहजः कर्णादिवत् । औपाधिकः स्वयं गुणदोषपरीक्षयाभ्युपगच्छतः ।

2205 ३ आगमभात्रेण ।

2206 ४ उपहसति ।

2207 ५ त्याजयितुमशक्यत्वात् ।

2208 ६ अस्यायमागमो नास्येति ।

'असम्बद्धस्य' साधयितुमप्रवृत्तस्य 'धर्म'स्याकाशगुणत्वादेः कृतकत्वाद्धेतोर्व्विपर्यासनाद'सिद्धौ' सत्यां सिसाधयिषितं हेतुव्यापकमनित्यत्वं 'किं न सिध्यति' । न हि व्यापकमन्तरेण व्याप्यं भवति । 'हेतुस्त'स्य व्यापकस्य 'साधनायोक्तः किन्दुष्टः' [435/s] 'तत्र' स्वसाध्ये 'सिध्यति' साध्यप्रतिपादनं साध्यव्यापारः'तच्चेदस्ति कथं दुष्टः' ।(५६)

शास्त्रार्थबाधनेऽभिमतस्यापि न सिद्धिरिति चेत् । 'आह' ॥

...v.4.57 धर्माननुपनीयैव दृष्टान्ते धर्मिणोऽखिलान् ।
वाग्धूमादेर्जनोन्वेति चैतन्यदहनादिकम् ॥ ५७ ॥

धर्मिणो'धर्मान्' शास्त्रदर्शिता'नखिलान्' हेतुव्यापकत्वे'नानुपनीया'प्रदर्श्यं 'वाग्धूमा-'देर्हेतो'श्चैतन्यदहनादिकं' यथाक्रमं स्वसन्तान[2209] वन्महानसवच्च 'जनोऽन्वेति' प्रतिपद्यते ॥ (५७)

किञ्च (।)

...v.4.58 स्वभावं कारणं चार्थोऽव्यभिचारेण साधयन् ।
कस्यचिद् वादबाधायां स्वभावान्न निवर्तते ॥ ५८ ॥

'स्वभावं' व्यापकं वृक्षत्वादि 'कारणं' वह्न्यादि 'चार्थो' व्याप्यः शिंशपादिः 'कार्यं' धूमादिर'व्यभिचारेणा'विनाभावित्वात् 'साधयन् कस्यचित्' शास्त्रपराधीनस्य 'वा'दिनो वादस्य 'बाधायां स्वभावात्' व्यापककारणगमकान्न 'निवर्त्तते' ततः 'शास्त्रेषु' धर्मान्तरव्याहतावपि हेतुः साध्यीकृतं स्वसम्बद्धमर्थं प्रतिपादयति । (५८)

ततश्च ।

...v.4.59 प्रपद्यमानश्चान्यस्तं नान्तरीयकमीप्सितैः ।
साध्यार्थैहेतुना तेन कथमप्रतिपादितः ॥ ५९ ॥

'साध्यैरर्थैरीप्सितै'राप्तं प्रत्येतुमिष्टै'र्न्नान्तिरीय'कमविनाभाविनं 'तं' हेतुं 'प्रपद्यमानः' प्रतिपद्यमानो'न्यः' प्रतिवादी 'कथन्तेन हेतुनाऽप्रतिपादितः' साध्यनान्तरीयकतया क्वचिद्धर्मिणि साधनप्रतीतिरेव हि साध्यप्रतीतिः सा चास्ति प्रतिवादिनः ॥ (५९)

किञ्च (।)

हेतुना[2210] यः शास्त्रार्थो बाध्यते किन्तस्मिन् साध्ये वादीना हेतुरसाधूक्तः । आहोश्वि(?स्वि)त् तत्र साध्ये हेतुरुच्यतां मा वा वस्तुतस्तद्बाधकोसौ हेतुरिति दुष्टता । तत्राद्यपक्षे भवत्येव दोषो यद्येवमिष्यते (।)

अथ (।)

...v.4.60 उक्तोऽनुक्तोपि वा हेतुर्विरोद्धा वादिनोत्र किम् ।
न हि तस्योक्तिदोषेण स जातः शास्त्रबाधनः ॥ ६० ॥

[436/s]

'उक्तोऽनुक्तोपि' वा 'हेतुः' वस्तुत एव तस्य विरोद्धा प्रतिघातकस्तदा तत्र शास्त्रार्थबाधने 'वादिनः किन्दू'षणं न किञ्चित् । 'हि' यस्मात् 'तस्य' वादिन 'उक्तिदोषेण' स कृतकत्वादिहेतुः 'शास्त्र'स्य शास्त्रार्थस्याकाशगुणत्वादेः 'बाधनो बाधको न जातः' ॥ (६०)

...v.4.61 बाधकस्याभिधानाच्चेद् दोषो यदि वदेन्न सः ।

[2209] १ चेतनोयं वचनादहमिव ।

[2210] २ प्रकृतसाधकेन यथा कृतकत्वेनाकाशगुणत्वादि ।

किन्न बाधेत सोऽकुर्वन्नयुक्तं केन दुष्यति ॥ ६१ ॥

शास्त्रार्थ'बाधकस्य' हेतोर'भिधानात्' वादिनोपि 'दोषश्चेत् यदि' तं हेतुं 'न वदेत् स' वादी । तदा किमसौ हेतुः शास्त्रार्थं न 'बाधेत' । वस्तुतस्तद्विरोधित्वादवश्यं बाधते । ततश्च स वाद्य'कुर्वन्नयुक्तं केन' कारणेन 'दुष्यति' पराजितः स्यात् ॥ (६१)

ननु यदि दुष्टहेतुवचनेपि न वादिनो दुष्टता । तदाऽसिद्धादिवचनेपि न दोषः स्यादित्याह ।

...v.4.62 अन्येषु हेत्वाभासेषु स्वेष्टस्येवाप्रसाधनात् ।
दुष्येद् व्यर्थाभिधानेन नात्र तस्य प्रसाधनात् ॥ ६२ ॥

'अन्येष्व'सिद्धादिषु 'हेत्वाभासेषु' वाद्युक्तेषु 'स्वेष्टस्य' वादीष्टस्यै'वाप्रसाधनाद्' वादी 'दुष्यति । व्यर्थ'स्य साध्यसाधनानुपयुक्तस्य साधनस्या'भिधानात्'[2211] । 'अत्र' कृतकत्वे तु वाद्युक्ते वाञ्छितस्यानित्यत्वस्य 'प्रसाधनान्न' वादी दुष्यति । शास्त्रार्थे तु वाद्यनिष्टे बाध्यमाने शास्त्रमेव दुष्टं भविष्यति ॥ (६२)

यद्यपि स्वेष्टस्य तेन साधनं तथापि शास्त्रार्थस्य बाधनमिति दुष्ट एवेत्याह ।

...v.4.63 यदि किञ्चित् क्वचित् शास्त्रे न युक्तं प्रतिषिध्यते ।
ब्रुवाणो युक्तमप्यन्यदिति राजकुलस्थितिः ॥ ६३ ॥

'क्वचिद्' वै शे षि का दि'शास्त्रे' निर्दिष्टं 'यदि किञ्चि'दाकाशगुणत्वादि बाध्यमानत्वा'दयुक्तं' । तावताऽ'न्यद'नित्यत्वादि'युक्तमपि' कृतकत्वहेतुना 'ब्रुवाणः' प्रतिपादयन् 'प्रतिषिध्यते' शास्त्रार्थबाधनात् विरोधो[2212] पन्यासेनेति व्यक्तमियं 'राजकुल'[87b/MA] 'स्थितिः' । राजशासनस्यैव बलप्रवृत्तस्य युक्तायुक्तविचारणाबहिर्भावात् । (६३)

किञ्च (।)

...v.4.64 सर्वानर्थान् समीकृत्य वक्तुं शक्यं न साधनम् ।
सर्वत्र तेन सुच्छन्नेयं साध्यसाधनसंस्थितिः ॥ ६४ ॥

[437/s]

'सर्व्वान्' शास्त्रदृष्टा'नर्थान्' साध्यत्वेन 'समीकृत्य' किञ्चित् 'साधनं वक्तुमशक्यं' दृष्टान्ते शास्त्रदृष्टाखिलधर्मव्याप्त्यनुपलम्भात् । 'तेन' कारणेन 'सर्व्वत्र' धर्मिणि 'साध्यसाधनयोः संस्थिति'र्व्यव'स्थेयं सुच्छन्ना' स्यात् ॥ (६४)

### (शब्दस्य नाकाशगुणत्वम्)

यदि तर्ह्याकाशगुणत्वाभावेप्यनित्यत्वं सिध्यदबाध्यं शब्दे तदा श्रावणत्वादिहेतुना नित्यत्वमपि साध्यमानमबाध्यं स्यादित्याह ।

...v.4.65 विरुद्धयोरेकधर्मिण्ययोगादस्तु बाधनम् ।
विरुद्धैकान्तिके नात्र तद्वदस्ति विरोधिता ॥ ६५ ॥

'विरुद्धयो'र्न्नित्यत्वानित्यत्वयो'रेकत्र' शब्दे 'धर्मिण्ययोगाद् विरुद्धैकान्तिके' विरुद्धाव्यभिचारिणि श्रावणत्वादौ नित्यत्वसाधके 'बाधनमस्तु' । नह्येकत्र धर्मिणि विरुद्धौ धर्मौ भवितुमर्हतः ।

[2211] १ प्रयोगवैफल्येन ।
[2212] २ अयुक्तं त्वयोक्तमिति ।

'तद्वन्नि'त्यत्वयोरिवात्रानयोः प्रकृताप्रकृतयोरनित्यत्वाकाशगुणत्वाभावयो'र्विरोधिता' नास्ति । ततः कृतकत्वाच्छब्देऽनित्यत्वसिद्धावाकाशगुणत्वाभावो न बाध्यते ॥ (६५)

स्यादेतत् । प्रकृताप्रकृतयोरनित्यत्वाकाशगुणत्वाभावयोः परस्परं (।)

...v.4.66 अबाध्यबाधकत्वेपि तयोः शास्त्रार्थविल्पवात् ।
असम्बन्धेपि बाधा चेत् स्यात् सर्वं सर्वबाधनम् ॥ ६६ ॥

'बाध्यबाधक'त्वाभा'वेप्ये'कस्मिन्ननित्यत्वे कृतकत्वात् सिध्यति 'शब्दे धर्मिणि शास्त्रार्थस्य शास्त्रा'भ्युपगतस्याकाशगुणत्वस्य 'विप्लवात्' कारणाद् असम्बद्धे (।) अप्रकृताकाशगुणत्व'सम्बन्धरहि'तेऽनित्यत्वे'पि बाधा' भवतीति 'चेत्' । एवन्तर्हि प्रयन्तानन्तरीयकत्वाद् गन्धे पृथिवीगुणत्वबाधने 'सर्व्वं' कृतकत्वादि 'सर्व्व'स्यानित्यत्वादेः साध्यस्य 'बाधनं' 'स्यात्' । शब्दादौ धर्मिण्यप्रकृतशास्त्रार्थबाधनस्य तुल्यत्वात् ॥ (६६)

...v.4.67 सम्बन्धस्तेन तस्यैव बाधनादस्ति चेदसत् ।
हेतोः सर्व्वस्य चिन्त्यत्वात् स्वसाध्ये गुणदोषयोः ॥ ६७ ॥

अथ तत्र शब्द एव धर्मिणि आकाशगुणत्वस्य सत्त्वात् 'सम्बन्धोस्ति तेन' कृतकत्वात् 'तस्यैव बाधनाद्' विरोधः । पृथिवीगुणत्वन्तु शब्दे धर्मिण्यसम्बद्धं । ततस्तद्बाधनेपि शब्दे कृतकत्वमविरुद्धमिति 'चेत् । असदे'तत् । 'सर्व्वस्य हेतोः स्वसाध्ये' प्रकृते 'गुणदोषयोश्चिन्त्यत्वात्' । यत्पुनरप्रकृतं धर्मिसम्बद्धमपि न तत् साध्यं । तद्बाधनेपि न काचित् । क्षतिः ॥ (६७)

[438/s]किञ्च (।) धर्मिणि सत्तामात्रं न सम्बन्धः । किन्तु (।)

...v.4.68 नान्तरीयकता साध्ये सम्बन्धः सेह नेक्ष्यते ।
केवलं शास्त्रपीडेति दोषः सान्यकृते समा ॥ ६८ ॥

'साध्ये नान्तरीयकता[2213]' साध्याविनाभावित्वं 'सम्बन्ध उच्यते (।) सा' साध्यनान्तरीयता 'इह' प्रकृताकाशगुणत्वबाधने सति नेक्ष्यते [2214] (।) यद्यपि सत्वनान्तरीयकमाकाशगुणत्वं शब्दे स्यात् न बाध्येत । 'केवलं' शास्त्राभ्युपगतधर्मबाधना'च्छास्त्रपीडे'ति दोषः । 'सा' च कृतकत्वादनित्यत्वसिद्धौ दृश्यते शास्त्रपीडा'ऽन्ये'न प्रयत्नानन्तरीयकत्वादिना गन्धे पृथिवीगुणत्वबाधनेपि 'समेति' कृतकत्वं शब्दे विरुद्धं स्यात् ॥ (६८)

यदप्याहुरा'चार्यीयाः' शास्त्रमभ्युपगम्य यदा वादः क्रियते तदा शास्त्रदृष्टस्य सकलस्य धर्मस्य साध्यतेत्यत्राह ।

...v.4.69 शास्त्राभ्युपगमात् साध्यः शास्त्रदृष्टोऽखिलो यदि ।
प्रतिज्ञाऽसिद्धदृष्टान्तहेतुवादः प्रसज्यते ॥ ६९ ॥

'शास्त्राभ्युपगमाच्छास्त्रदृष्टोऽखिलो' धर्मो 'यदि साध्य' इष्यते तदाऽ'सिद्धयोः' शास्त्रोद्दिष्टयो'र्हेतुदृष्टान्तयोर्व्वादः' 'प्रतिज्ञा' साध्यं 'प्रसज्यते' । शास्त्रे दृष्टस्यासिद्धस्य साध्यत्वात् ॥ (६९)

स्यादेतत् । किन्तु (।)

...v.4.70 उक्तयोः साधनत्वेन नो चेदीप्सितवादतः ।
न्यायप्राप्तं न साध्यत्वं वचनाद् विनिवर्त्तते ॥ ७० ॥

[2213] १ साध्यस्य तदन्यनान्तरीयकता यथाऽनित्यत्वस्य दुःखादिनान्तरीयकता ।

[2214] २ केवलं संयोगादिविपर्यासनाच्छास्त्रवाचा ।

‘वादिनेप्सित’स्य साध्यत्वेन वादतः स्वयं साध्यत्वेनेप्सितः पक्षो विरुद्धत्वान्निराकृत इत्यादिकात्[2215] ‘साधनत्वेनोक्तयो’रसिद्धहेतुदृष्टान्तयोः साध्यता ‘नो चेत्’। नन्वसिद्धस्य शास्त्राभ्युपगतस्य ‘साध्यत्वं न्यायप्राप्तं वचन’मात्रादीप्सितसाध्यत्वं प्रतिपादक‘त्वान्न विनिवर्त्तते’[2216] ॥ (७०)

[439/s]

...v.4.71 अनीप्सितमसाध्यश्चेद् वादिनान्योप्यनीप्सितः ।
धर्मोऽसाध्यस्तदाऽसाध्यं बाधमानं विरोधि किम् ॥ ७१ ॥

शास्त्राभ्युपगमेपि वादिनाऽ‘नीप्सितमसाध्यं चेत्’। एवन्तर्ह्याकाशगुण-[88a/MA] त्वादिरपि ‘धर्मो वादिना’ साध्यत्वेना‘नीप्सितोऽसाध्यः’ स्यात्। ‘तदा तदसाध्य’माकाशगुणत्वं ‘बाधमानं’ कृतकत्वं ‘किं’ कस्माद् ‘विरोधि’। (७१)

## (२) अन्यथा स्वयंशब्दोऽनर्थकः

किञ्च (।)

...v.4.72 पक्षलक्षणबाह्यार्थः स्वयंशब्दोप्यनर्थकः ।
शास्त्रेष्विच्छाप्रवृत्त्यर्थो यदि शङ्का कुतोन्वियम् ॥ ७२ ॥

यदि शास्त्राभ्युपगतत्वं पक्ष[2217] लक्षणं तदा ‘स्वयंशब्दोपि पक्षलक्षणबाह्यार्थो’ भिन्नाभिधेयोऽ‘नर्थकः’ स्यात्। शास्त्राभ्युपगमे शास्त्रेष्टस्य साध्यताप्राप्तौ वादीष्टमात्रं साध्यं नान्यदिति हि स्वयंशब्दस्य प्रयोजनं। शास्त्रेष्टमात्रस्य तु ‘साध्यत्वे’ निष्फलमेव तत्। ‘शास्त्रेष्विच्छया प्रवृत्त्यर्थः’[2218] स्वयंशब्दो ‘यदि’ कथ्यते स्वयंशब्दमन्तरेण शास्त्रमिच्छया न ग्रहीतव्यमिति ‘शङ्केयं कुतो’ नु हेतोर्जाता। ‘येन’ तन्निवृत्त्यर्था स्वयंश्रुतिर्व्वर्ण्यते ॥ (७२)

...v.4.73 सोनिषिद्धः प्रमाणेन गृह्णन् केन निवार्यते ।
निषिद्धश्चेत् प्रमाणेन वाचा केन प्रवृर्त्त्यते ॥ ७३ ॥

‘स’ वादी ‘प्रमाणेन’ शास्त्रार्थबाधकेना‘निषिद्धः’ शास्त्रं ‘गृह्णन् केन निवार्यते’ न केनचित्। यतः स्वयंग्रहणं शास्त्रं ग्राहयत् सफलं स्यात्। ‘प्रमाणेन’ चेच्छास्त्रार्थबाधकेन ‘निषिद्धो’ वादी ‘वाचा’ स्वयंशब्देन शास्त्राभ्युपगमे ‘केन’ लक्षणकर्त्रा ‘प्रवर्त्त्यते’ न केनचित् ॥ (७३)

किञ्च (।)

...v.4.74 पूर्वमप्येष सिद्धान्तं स्वेच्छयैव गृहीतवान् ।
किञ्चिदन्यं स (तु) पुनर्ग्रहीतुं लभते न किंम् ॥ ७४ ॥

‘एष’ वादी ‘पूर्व्वमपि स्वेच्छेयैव सिद्धान्तं’ क णा दा दिप्रणीतं ‘गृहीतवान्’। न त्वन्यपुराणादिबलात्। स कथमिच्छया शास्त्रोद्दिष्ट(ङ्) ‘किञ्चिद्’ धर्मव्यभि[440/s] चारदर्शनादिना शास्त्रेषु सफलधर्मकलापसाध्यत्वादन्यं सिद्धान्तमाकाशगुणत्वरहितानित्यतादिकं ‘ग्रहीतुं किन्न

---

[2215] ३ साध्यत्वेनेप्सित इति कृतं अन्यत्र स्वरूपेणैवेत्यवधारणमतः ।

[2216] ४ और्ण्यमिवाग्नेः ।

[2217] १ शास्त्रार्थः सर्व्वः साध्यः ।

[2218] २ स्वीकृतशास्त्रं मुक्त्वा वादकाले शास्त्रान्तरमिच्छया लभ्यतेङ्गीकर्त्तुं ।

लभते' (।) इच्छाधीनत्वे नियमायोगात् । तस्मात् स्वयंग्रहणं शास्त्रेच्छाप्रवृत्त्यर्थमित्ययुक्तं ॥ (७४)

नन्विष्टस्यापि स्वेच्छयैव साध्यतापरिग्रहः सिद्ध इति व्यर्थं स्वयंग्रहणमित्याह ।

...v.4.75 दृष्टेर्विप्रतिपत्तीनामत्राकार्षीत् स्वयंश्रुतिम् ।
इष्टाक्षतिमसाध्यत्वमनवस्थाश्च दर्शयन् ॥ ७५ ॥

शास्त्रकारस्येष्टं साध्यमिति 'विप्रतिपत्तीनां दृष्टे'स्तन्निराकणार्थ'मत्र' पक्षलक्षणे 'स्वयंश्रुति'माचार्योऽ'कार्षीत्' । शास्त्रेष्वाकाशगुणत्वासिद्धावपि वादी'ष्टस्याक्षतिं' शास्त्रेष्टस्या-'साध्यत्वं' शास्त्रेष्टधर्मान्तरासिद्धौ हेतुबलप्रसिद्धसाध्यबाधने [2219] गन्धे भूतगुणताबाधा[2220] यां शब्दे कृतकत्वमनित्यत्वसाधनं विरुद्धं स्यादित्यादि कामन'वस्थाश्च' परस्य 'दर्शयन्नाचा' र्यः स्वयंश्रुतिमकार्षीदिति पूर्वेण सम्बन्धः ॥ (७५)

...v.4.76 समयाहितभेदस्य परिहारेण धर्मिणः ।
प्रसिद्धस्य गृहीत्यर्था जगादान्यः स्वयंश्रुतिम् ॥ ७६ ॥

'समयेन' [2221] सिद्धान्ते'नाहित' आरोपितो 'भेदो' विशेष आकाशगुणत्वादिर्यस्य 'तस्य धर्मिणः' परिहारेणागमनिरपेक्षप्रमाणबलात् 'प्रसिद्धस्य' धर्मिणः शब्दमात्रा'देर्गृहीतिरित्यर्थः' प्र-योजनं यस्तास्तां 'स्वयंश्रुतिमन्यो जगाद' । स्वं प्रसिद्धो धर्मी कार्यो नागमसिद्ध इत्यर्थः । (७६)

अत्राह ।

...v.4.77 विचारप्रस्तुतेरेव प्रसिद्धःसिद्ध आश्रयः ।
स्वेच्छाकल्पितभेदेषु पदार्थेष्वविवादतः ॥ ७७ ॥

धर्मिणि साध्यधर्मस्य भावाभाव'विचारप्रस्तुतेरे'वागममनपेक्ष्य 'प्रसिद्ध आश्रयो' धर्मी-सिद्धः स्वेच्छया 'कल्पितो भेदो' विशेषो येषां तेषु 'पदार्थेष्वविवादतो' विवादाभावात् । न हि कल्पितभेदे धर्मिणि कश्चित् प्रेक्षावान् कस्यचिद् धर्मस्य साधनं बाधनं वेहते (।) किन्तु प्रमाणप्रतीते वस्तुनि । अतस्तदर्थमपि स्वयंग्रहणमनुपयुक्तं ॥ (७७)

[441/s]

...v.4.78 असाध्यतामथ प्राह सिद्धादेशेन धर्मिणः ।
स्वरूपेणैव निर्देश्य इत्यनेनैव तद्गतं ॥ ७८ ॥

'अथ सिद्धादेशेन' प्रसिद्धार्थवाचकेन स्वयंशब्देन 'धर्मिणो[2222] ऽसाध्यतां प्राह' । यथा-ऽस्ति प्रधानं भेदाना[2223] मनुपदर्शनादिति । इदमप्ययुक्तं । यस्मात् 'स्वरूपेण' साध्यत्वेनैव 'निर्देश्य इत्यनेन' पक्षलक्षणावयवे'नैव' च 'तद्ध'र्मिणः सिद्धस्यासाध्यत्वं 'गतं' प्रतीतं ॥ (७८)

तथा ह्ययमिष्टोऽनिराकृतः पक्ष इत्यनेन (।)

...v.4.79 सिद्धसाधनरूपेण निर्देशस्य हि सम्भवे ।
साध्यत्वेनेव निर्देश्य इतीदं फलवद् भवेत् ॥ ७९ ॥

---

2219 १ तदसम्बद्धानित्यत्वे बाधाभ्युपगमे ।

2220 २ तत्परिहृतावप्येवं विरोधः स्यादित्यनवस्था ।

2221 ३ टीकाकारकल्पितार्थदूषणायाह ।

2222 १ असिद्धधर्मिपरिहारेण सिद्धधर्मिग्रहमाह ।

2223 २ धर्म्यैव प्रधानमसिद्धः क्वास्तित्वं साध्यं ।

सिद्धस्य सिद्ध[2224] रूपेण निर्देशस्य धर्मवचनस्यासिद्धस्यापि ‘साधनरूपेण’[88b/MA] ‘निर्देश’स्यासिद्धवचनस्य पक्षत्व‘सम्भवे’ हि तत्प्रतिषेधं विदधत् ‘साध्यत्वेनैव निर्देश्य’ इतीदं ‘फलवद् भवेत्’ । साध्यस्यैव निर्देशः पक्ष इति सिद्धस्य धर्मिणोऽसिद्धस्य च साधनत्वेनोक्तस्य निरासः ॥ (७९)

किञ्च (।)

...v.4.80 अनुमानस्य सामान्यविषयत्वञ्च वर्णितम् ।
इहैवं न ह्यनुक्तोपि किञ्चित् पक्षे विरुध्यते ॥ ८० ॥

‘अनुमानस्य सामान्यविषयत्वं’ स्वयमाचार्येण वर्णितं (।) यदि च ‘धर्मी’ पक्षः तदा तस्य स्वलक्षणत्वात् सामन्यविषयता व्याहन्येत । कि‘ञ्चेह’ पक्षलक्षण ‘एवमुक्त’क्र(मे)णा‘नुक्तेपि’ स्वयंशब्दे सिद्धधर्म्यसिद्धसाधनव्यवच्छेदार्थे ‘किञ्चित्’ ‘पक्षे’ प्रतिपाद्ये ‘न विरुध्यते’ ॥ (८०)

नन्वनुक्ते स्वयंशब्दे पक्षलक्षणं (।)

...v.4.81 कुर्याच्चेद् धर्मिणं साध्यं ततः किन्तन्न शक्यते ।
कस्माद्धेत्वन्वयाभावान्न च दोषस्तयोरपि ॥ ८१ ॥

‘धर्मिणं साध्यं कुर्या’दिति दोषः । ‘ततो’ धर्मिणः पक्षत्वप्रसङ्गात् ‘किन्दूषणं’ ॥ तद्धर्म्मिपक्षत्वं कर्त्तुं ‘न शक्यत’ इति अशक्यतादूषणं । ‘कस्मात्’ कारणाद् ‘धर्मी’ [442/s] पक्षो भवितु नार्हति धर्मिणः साध्यत्वेनासिद्धतायां [2225] ‘हेतो’रभावात् । विशेषस्य धर्मिणो दृष्टान्तेऽसम्भवात् (।) ‘अन्वयाभावा’च्च धर्मी पक्षः कर्त्तुं ‘न’ शक्यते । (८१)

नन्वयं दोषस्तयोर्हेतुदृष्टान्तयोर्न तु पक्षस्य ॥ तथा हि (।)

...v.4.82 उत्तरावयवापेक्षो न दोषः पक्ष इष्यते ।
तथा हेत्वादिदोषोपि पक्षदोषः प्रसज्यते ॥ ८२ ॥

साधनवाक्यस्य पक्षादु‘त्तरेऽवयवे’ हेतुदृष्टान्तादिकेऽ‘पेक्षा’ यस्यासौ ‘दोषः’ ‘पक्षे नेष्यते’ हेतुदृष्टान्तसम्बन्धित्वात् तस्य । यदि तूत्तरावयवापेक्षोपि पक्षस्य बाधनात् पक्षदोष उच्यते ‘तथा’ सति ‘हेत्वादिदोषोपि पक्षदोषः प्रसज्यते’ (। ८२)

...v.4.83 सर्वैः पक्षस्य बाधातस्तस्मात् तन्मात्रसङ्गिनः ।
पक्षदोषा मता नान्ये प्रत्यक्षादिविरोधवत् ॥ ८३ ॥

‘सर्व्वै’र्हेत्वादिदोषैः ‘पक्षस्य बाधात् तस्मात् तन्मात्रङ्गिनः’ पक्षमात्रसम्बद्धा दोषाः ‘पक्षदोषा मताः’ । ‘नान्ये’ऽवयवान्तरापेक्षाः ‘प्रत्यक्षादिविरोधवत्’ । यथा प्रत्यक्षादिबाधितत्वमवयवान्तरानपेक्षं पक्षदोषः । (८३)

तस्माद् (।)

...v.4.84 हेत्वादिलक्षणैर्ब्बाध्यं मुक्त्वा पक्षस्य लक्षणम् ।
उच्यते परिहारार्थमव्याप्तिव्यतिरेकयोः ॥ ८४ ॥

‘हेत्वादीनां लक्षणैर्ब्बाध्यं’ परिहर्त्तव्यं दोषमन्वयविरोधादिकं ‘मुक्त्वा’ पक्षमात्रानुषङ्गिणो‘रव्याप्तिव्यतिरेकयोः’ परिहारार्थं ‘पक्षलक्षणमुच्यते’[2226] व्यतिरेके आधि क्यमभिव्याप्तिरित्यर्थः ॥ (८४)

तत्र येन पदेन यद् दूषणं परिह्रियते तदाह ।

---

[2224] ३ तद्धाकार एव ।

[2225] १ आश्रयासिद्धा ।

[2226] २ अन्यथा हेत्वादिलक्षणं निर्विषयं स्यात् ।

...v.4.85 स्वयन्निपातरूपाख्या व्यतिरेकस्य बाधिकाः ।
सहानिराकृतेनेष्टश्रुतिरव्याप्तिबाधनी ॥ ८५ ॥

‘स्वयश्च निपातश्च’ एवं ‘रूपं’ स्वरूपश्चा‘ख्या’ श्रुतयः सहानिराकृतेन पदेन ‘व्यतिरेक’स्यातिव्याप्ते‘र्बाधिकाः’ । स्वयंशब्देन शास्त्रेष्टस्य निपातेनासिद्धस्यापि साधनत्वेनोक्तस्य स्वरूपशब्देन सिद्धस्य । ‘निराकृत’शब्देन प्रत्यक्षादि[443/s] निराकृतस्य पक्षत्वं सक्तं निषिध्यते । ‘इष्टश्रुतिरव्याप्तेर्बाधनी । इष्टशब्दे ह्यक्रि’यमाणे निर्द्दिष्टमेव साध्यं साध्यं स्यात् न प्रकरणापन्नमिष्टं ॥ (८५)

यदि स्वयंनिपातरूपाख्या व्यतिरेकस्य वाधिकाः प्र मा ण स मु च्च यल क्ष णे निर्द्दिष्टास्तदा न्यायमुखे साध्यत्वेनेप्सितः पक्षो विरुद्धार्थानिराकृत इति पक्षलक्षणे ता न सन्तीति कथन्तेनाव्याप्तिव्यतिरेकयोः परिहार ‘इत्याह’ साध्यत्वेनेप्सितः पक्ष इति (।)

...v.4.86 साध्याभ्युपगमः पक्षलक्षणं तेष्वपक्षता ।
निराकृते बाधनतः शेषेऽलक्षणवृत्तितः ॥ ८६ ॥

‘साध्याभ्युपगमः’ पक्ष इति ‘पक्षलक्षणम’वतिष्ठते । तथा च ‘तेषु’ शास्त्रेष्टा‘दिषु’ पश्चसु व्यावर्त्येषु मध्ये ‘निराकृते’ प्रत्यक्षादिबाधिते ‘बाधनतोऽपक्षता’ विरुद्धार्था निराकृतस्य पक्षविधानात् । ‘शेषे’ शास्त्रेष्टे वादिनाऽनिष्टे साधने च सिद्धे साधयितुमिष्ट एष्यमाणे सिद्धे च साध्यविपरीतेऽप्रस्तुते चोक्तमात्रे ‘लक्षण’स्य साध्यत्वेनेप्सितत्वस्या‘वृत्तितो’ऽपक्षता सिद्धेति परिपूर्ण्णमिदमपि लक्षणं ॥ (८६)

ननु यथा सत्यर्थेभ्यो [2227] वर्त्तमाने कृविधानादीप्सितशब्दो वर्त्तमानमिच्छा-[89a/MA] माह । तथेष्टशब्दोपि तत्र एषिष्यमाणे पक्षत्वमप्रसक्तमेव तत्किं प्र मा णस मु च्च य लक्षणेऽवधारणं कृतमित्याह ।

...v.4.87 स्वयमिष्टाभिधानेन गतार्थेप्यवधारणे ।
कृत्यान्तेनाभिसम्बन्धादुक्तं कालान्तरच्छिदे ॥ ८७ ॥

‘स्वयमिष्ट’ इत्यनयोः पदयोर‘भिधानेनावधारणे’ निपातार्थे गते प्रतीतेपि ‘कृत्यान्तेन’ निर्देश्य शब्देन सर्व्वकालसम्बन्धयोग्याभिधायिनाऽ‘भिसम्बन्धा’दिष्टशब्दस्यावर्त्तमानकालेच्छाविषयस्यापि पक्षत्वं स्यात् । यथा आगतो देवदत्तो द्रष्टव्य इति (।) यदा गमिष्यति तदा द्रक्ष्यत इत्यर्थः । अतो वर्तमानकालात् ‘कालान्तर’स्य भविष्यदादेः साध्ये साध्येच्छाविषयस्य ‘च्छिदे’ प्रतिषेधार्थ‘मुक्त’मवधारणं स्वरूपेणैवेति । (८७)

यस्मात् कृत्यान्तेनाभिसम्बन्धात् कालसामान्यवृत्तिः (।)

...v.4.88 इहानङ्गमिषेर्न्निष्ठा तेनेप्सितपदे पुनः ।
अङ्गमेव तयाऽसिद्धहेत्वादि प्रतिषिध्यते ॥ ८८ ॥

[444/s]

‘इह’ प्र मा ण स मु च्च (य)लक्षणे निष्ठा वर्त्तमानसाध्यत्वेष्टिप्रतिपादन‘मत्यनङ्ग’हेतुः । न्या य मु खे ‘तेन’ कृत्यान्तेन सम्बन्धाभावेनेप्सितपदे पुनरङ्गमेव निष्ठा वर्त्तमानसाध्येच्छाबोधने ‘तया’[2228] वर्त्तमानसाध्येच्छाबोधिकयाऽ‘सिद्धहेत्वाद्य’पीष्यमाणं साध्यत्वेन ‘प्रतिषिध्यते’ । तस्मान्न धर्मिणः साध्यता[2229] प्रतिक्षेपार्थं स्वयंग्रहणं सिद्धत्वे[2230] नैव तत्परिहारस्य लब्धत्वात्

[2227] १ मतिबुद्धिपूजार्थेभ्यः ।
[2228] १ निष्ठया ।
[2229] २ समयाहिता ह्युक्ता ।
[2230] ३ विचारप्रस्तुतेरेव प्रसिद्धः सिद्ध आश्रयः ।

॥ (८८)

नापि शास्त्रेष्विच्छाप्रवृत्त्यर्थ[2231] मिच्छामात्रेणैव तद्ग्रहणस्य सिद्धत्वादित्युक्तं ।

...v.4.89 अवाचकत्वद्वायुक्तं तेनेष्टं स्वयमात्मना ।
अनपेक्ष्याखिलं शास्त्रं तद्वादीष्टस्य साध्यता ॥ ८९ ॥

'अवाचकत्वाद्वायुक्तं' । तदर्थं 'स्वय'ग्रहणं । न हि स्वयंशब्दः स्वेच्छया शास्त्रं ग्राह्यामित्येतदर्थवाचकं किन्तु वादिन एव वाचकः । 'तेन' तद्वाचकत्वेन स्वयं वादिनाऽ'त्मना शास्त्रमखिलमनपेक्ष्य यदिष्टं त'स्य वादी'ष्टस्य साध्यते'ष्यते न शास्त्रेष्टस्येत्युपसंहारः । (८९)

...v.4.90 तेनानभीष्टसंसृष्टस्येष्टस्यापि हि बाधने ।
यथा साध्यमबाधतः पक्षहेतून दुष्यतः ॥ ९० ॥

'तेन' [2232] कारणेन वादिनो'नभीष्टे'नाकाशगुणत्वेन 'संसृष्टस्येष्टस्या'नित्यत्वस्या'पि हि बाधने'ऽभिधीयमाने 'पक्षहेतू न दुष्यतः' । किङ्काकारणमित्याह । 'यथा साध्यमबाधातः' । न हि वादिनाऽकाशगुणत्वैकार्थसमवाय्यनित्यत्वं साधयितुमिष्टं येनास्य बाधः स्यात् किन्त्वनित्यत्वमात्रं । न चास्य प्रत्यक्षादिबाधास्ति । हेतोर्वा तदपेक्षया विरुद्ध'तादिकं' । तदेवं स्वयं-निपातरूपाख्याव्यतिरेकस्य बाधिकाः सहानिराकृतेनेति व्याख्यातं ॥ (९०)

### (३) सहानिराकृतग्रहणफलम्

अनिराकृतपदं व्याख्यातुमाह ।

...v.4.91 अनिषिद्धः प्रमाणाभ्यां स चोपगम इष्यते ।
सन्दिग्धे हेतुवचनाद् व्यस्तो हेतोरनाश्रयः ॥ ९१ ॥

[445/s]

'स चो'क्तलक्षणः साध्य'स्योपगमः' पक्षः । 'प्रमाणाभ्यां' प्रत्यक्षानुमानाभ्यामनिषिद्ध इष्यते । कस्मादित्याह । संदिग्धेऽर्थे साधकबाधकप्रमाणविषये 'हेतोर्वचनाद् व्यस्तः' प्रमाणप्रतिक्षिप्तो 'हेतोरनाश्रयो'ऽविषयः । (९१)

### (४) बाधा चतुर्विधा

यदि द्विविधौ पक्षबाधौ तदा प्रत्यक्षानुमानाप्तैः प्रसिद्धेनेति कथ मा चा र्ये ण चतुर्विधा सा दर्शितेत्याह ।

...v.4.92 अनुमानस्य भेदेन सा बाधोक्ता चतुर्विधा ।
तत्राभ्युपायः कार्याङ्गं स्वभावाङ्गं जगस्थितिः ॥ ९२ ॥

'अनुमानस्य भेदेन' त्रैविध्येन प्रत्यक्षेण चैकेन 'सह सा बाधा चतुर्विधोक्ता (।) तत्र' तेषु बाधकेष्व'भ्युपाय' आप्तस्ववचने 'कार्यमङ्गं जगतः स्थिति'र्व्यवहृतिः प्रसिद्धिः 'स्वभावोऽङ्गं' हेतुः ॥ (९२)

### (५) आगमस्ववचनयोस्तुल्यबलता

[2231] ४ असाध्यतामित्याद्युक्त ।
[2232] ५ दृष्टानुमेयवचनेन ।

कस्मात् पुनराप्तवचनं स्ववचनश्चाभ्युपाय उच्यत इत्याह (।)

...v.4.93 आत्मापरोधाभिमतो भूतनिश्चययुक्तवाक् ।
आप्तः स्ववचनं शास्त्रं चैकमुक्तं समत्वतः ॥ ९३ ॥

'आत्मापरोधाभिमतो भूत'स्यार्थस्य 'निश्चयेन युक्ता' प्रयुक्ता 'वाग्' यस्य 'स आप्त' उच्यते (।) एवं परंपरयाऽर्थकार्यत्वेन 'स्ववचनं शास्त्रश्च समत्वतो'ऽभ्युपाय इति 'सम'स्य कार्यलिङ्ग'मेक[2233] मुक्तं' । (९३)

किञ्च (।)

...v.4.94 यथात्मनोऽप्रमाणत्वे वचनं न प्रवर्त्तते ।
शास्त्रसिद्धे तथा नार्थे विचारस्तदनाश्रये ॥ ९४ ॥

वक्तु'रात्मनोऽप्रमाणत्वे' प्रामाण्यनिमित्ताभावात् 'वचनं'प्रामाण्यं 'न प्रवर्त्तते' । न[89b/MA] ह्यसत्यार्थेन वचनेन परः प्रतिपादयितुं शक्यते । विसम्वादनाश्रयस्य वचनादर्थापत्तेः । ततो यथा प्रतिपादयितुः प्रामाण्य एव सति वचनं 'प्रवर्त्तते' (।) 'तथा शास्त्रसिद्धेऽर्थे त'स्य शास्त्रप्रामाण्यस्या'नाश्रयेण न विचारः' प्रवर्त्तते (।) प्रमाणविषयो [446/s] लब्धः साक्षादस्यैव प्रमाणस्य शास्त्रस्यात्यन्तपरोक्षार्थे विचारः प्रस्तूयते प्रेक्षैर्नानस्य । ततः शास्त्रस्ववचनयोः प्रामाण्येऽभ्युपगतेपि साम्यमुक्तं ॥ (९४)

साम्यमेव पुनः किमर्थमुपदर्शितामित्याह (।)

...v.4.95 तत्प्रस्तावाश्रयत्वे हि शास्त्रं बाधकमित्यमुम् ।
वक्तुमर्थं स्ववाचास्य सहोक्तिः साम्यदृष्टये ॥ ९५ ॥

'हि' यस्मात् 'तत्प्रस्ताव'स्य विचारप्रक्रमस्या'श्रयत्वेऽधि'करणत्वे सति 'शास्त्रं सिद्धे' धर्मिणि शास्त्रं प्रतिज्ञार्थविरुद्धं'बाधकं' न वस्तुबलप्रवृत्तानुमान'मित्यमुमर्थं वक्तु'मस्य शास्त्रस्य 'स्ववाचा साम्यस्य दृष्टये' दर्शनार्थं 'सहोक्ति'रनयोरभ्युपायतानिर्देशे । स्ववचनमपि ह्युच्चारणसामर्थ्यादु[2234] पगतप्रामाण्यं सिद्धे धर्मिणि विचारप्रक्रमे प्रतिज्ञार्थविषयबाधकं 'बाधकं' दृष्टं (।) न वस्तुबलप्रवृत्तानुमानेन इदमनयोः साम्यदर्शनप्रयोजनं । (९५)

...v.4.96 उदाहारणमप्यत्र सदृशं तेन वर्णितम् ।
प्रमाणानामभावे हि शास्त्रवाचोरयोगातः ॥ ९६ ॥

अत्र शास्त्रवचनयोः व्याघातेना चा र्ये 'णोदाहरणमपि' सदृशमभिन्नं 'वर्ण्णितं' । 'यथा न सन्ति प्रमाणानि' प्रमेयार्थानीति । कथं पुनरत्र शास्त्रार्थस्ववचनाभ्यां व्याघात इत्याह । 'प्रमाणानामभावे हि शास्त्रवाचोरयोगातः' । अनुपपत्तेः प्रमाणसम्भवे हि शास्त्रवचनयोः परप्रतिपादनार्थमुक्तिर्युक्ता । तस्मादुच्चारण'सामर्थ्यादभ्यु'पगतप्रामाण्यात् प्रयोगवचनादेव प्रमाणाभावप्रतिज्ञा बाध्यते ।

एतच्चोदाहरणम् (।)

...v.4.97 स्ववाग्विरोधे विस्पष्टमुदाहरणमागमे ।
दिङ्मात्रदर्शनं तत्र प्रत्येधर्मोसुखप्रदः ॥ ९७ ॥

'स्ववाग्विरोधे' स्ववचनव्याहतौ 'विस्पष्टं' तथा हि प्रमाणाभावप्रतिज्ञावचनोच्चारणसामर्थ्याभ्युपगतप्रामाण्येन वचनेनैव बाध्यते । आगमे शास्त्रे पुनरुदाहरणस्य 'दिङ्मा-

[2233] १ आप्तवाच्यं ।
[2234] १ स्वाप्रामाण्यबोधेनुच्चारणात् ।

त्रदर्शन'मुपलक्षणमात्रमेतत् । न तु मुख्यमुदाहरणं । प्रमाणस्य धर्मिण आगमसिद्धत्वाभावात् । इदं पुनर्मुख्यमुदाहरणं आगमे 'प्रेत्य' परलोके 'धर्मोऽसुखप्रदः' (।) आगमसिद्धे धर्मिणि धर्मे सामान्येऽसुखप्रदत्वस्य विशेषस्य सुखप्रदत्वेन विरुद्धेनागमसिद्धेन बाधनात् । (९७)

'किन्तु (।)'

[447/s]

...v.4.98 शास्त्रिणोप्यतदालम्बे विरुद्धोक्तौ तु वस्तुनि ।
न बाधा प्रतिबन्धः स्यात् तुल्यकक्षतया तयोः ॥ ९८ ॥

'शास्त्रिणो'ऽभ्युपगतशास्त्रस्या'तदालम्बे' शास्त्रासिद्धे[2235] प्रमाणसिद्धे 'वस्तुनि' धर्मिणि शास्त्रप्रतिज्ञा'विरुद्धस्य धर्मस्योक्तौ न सा बाधा' । यथा मी मां स क स्य गृहीतशास्त्रस्य प्रत्यक्षसिद्धे शब्दे धर्मिणि कृतकत्वादनित्यत्वोक्तावपि 'शास्त्र'प्रतिज्ञातेन नित्यत्वेन न बाधा । यदि बाधा किन्तर्हि भवतीत्याह । 'प्रतिबन्धः स्यात्' । कस्मादित्याह । 'तुल्यकक्ष'त्वात् । समबलत्वात् । यथा माता मे बन्ध्या चेति स्ववाचि तुल्यकक्षत्वात् पदयोः परस्परं प्रतिबन्धः । (९८)

ननु स्ववचनयोस्तुल्यकक्षत्वाद् युक्तः प्रतिबन्धः । आगमस्ववचनयोस्तुल्यबलतैव कथमित्याह ।

...v.4.99 यथा स्ववाचि तच्चास्य तदा स्ववचनात्मकम् ।
तयोः प्रमाणं यस्यास्ति तत् स्यादन्यस्य बाधकम् ॥ ९९ ॥

'तच्च' शास्त्रं नित्यत्वप्रतिज्ञातस्य वादिनः 'तदा' प्रसिद्धे धर्मिणि शास्त्रविरुद्ध-[90a/MA] प्रतिज्ञासमये स्वोपगमस्वीकृतप्रमाणत्वात् 'स्ववचनात्मकं' [2236] जातं वचनं शास्त्रञ्च स्वयमभ्युपगतप्रामाण्ययुक्तं तुल्यकक्षं 'यथा स्ववाचि' माता मे बन्ध्येति वचनमात्रयोः प्रतिबन्धोन्योन्यं । 'तयोः' शास्त्रवचनयोर्व्विरूद्धार्थाभिधायिनोर्मध्ये 'यस्य प्रमाण'मनुवर्त्तक'मस्ति तत्' प्रमाणवत् । 'अन्यस्या'प्रमाणकस्य 'बाधकं' भवति । यथाऽनित्यत्वं नित्यस्य शब्दे । (९९)

....4.100 प्रतिज्ञामनुमानं वा प्रतिज्ञाऽपेतयुक्तिका ।
तुल्यकक्षा यथार्थम्वा बाधेत कथमन्यथा ॥ १०० ॥

अन्यथा यदि प्रमाणसिद्धे धर्मिणि प्रमाणाननुगृहीतयोः परस्परं बाधा । प्रमाणाभावे केनेतरस्य नाबाधेतीष्यते तदा 'प्रतिज्ञा'विपरीता शास्त्रवचनाख्या'ऽपेतयुक्तिका' प्रतिज्ञा प्रमाण्याभ्युपगमात् 'तुल्यकक्षा' सती कथं बाधेत । 'यथा' शब्दे नित्यत्वप्रतिज्ञा शास्त्रोक्ता अनित्यत्व'प्रतिज्ञां' विद्यमान'मनुमानम्वा' यथार्थं । वस्तुभूतकृतकत्वलि'ङ्ग'समुत्थं नित्यत्वप्रतिज्ञया 'कथं' बाधितं [2237] स्यादनित्यत्वात् । (१००)

[448/s]

....4.101 प्रामाण्यमागमानाञ्च प्रागेव विनिवारितम् ।
अभ्युपायविचारेषु तस्माद् दोषोयमिष्यते[2238] ॥ १०१ ॥

---

[2235] १ यो न शास्त्रेण दर्शितः ।

[2236] २ इति वचनात्मत्वाविशेषः ।

[2237] ३ अपि च आगमानां प्रामाण्यं प्रागेव निवारितमिति कुतो बाधा । तस्माच्छास्त्रमभ्युपगम्य धर्मविचारेष्वयन्दोषः शास्त्रबाधाख्य इष्यते ।

[2238] * नास्ति वृत्तौ ॥

....4.102 तस्माद् विषयभेदस्य दर्शनार्थं पृथक्कृतः ।
अनुमानाबर्हिर्भूतोप्यभ्युपायः प्रबाधनात् ॥ १०२ ॥

'तस्मात्' कार्यलिङ्गत्वादनुमानादबहिर्भूतोप्यभ्युपायो 'विषयस्य भेदो' नानात्वं 'तद्दर्शनार्थ'मनुमानात् 'पृथक्कृतः' । अनुमानं सर्व्वत्र बाधकं शास्त्रन्तु शास्त्राश्रये धर्मिणीति बाधकत्वविषयभेदोपदर्शनं पृथक्करणफलं । कथं ज्ञायतेऽ'नुमानाबहिर्भूतं' शास्त्रमित्याह । स्वसिद्धे धर्मिणि स्वोपगमविरुद्धस्य धर्मस्य 'प्रबाधनात्' न ह्यप्रमाणम्बाधकं । प्रमाणञ्चाप्रत्यक्षत्वात् अनुमानमेव ॥ (१०१,१०२)

...4.103a अन्यथाऽतिप्रसङ्गः स्याद् व्यर्थता वा पृथक्कृतेः ।

'अन्यथा' यदि विषयभेदोपदर्शनफलं पृथक्करणं नेष्यते तदा प्रभेददर्शनार्थं वक्तव्यं । तथा च कार्यस्वभावानुपलम्भानां प्रभेदो यावत् [2239] सम्भवं वाच्य इत्यति'प्रसङ्गः' स्यात् ।

अथ सदपि भेदान्तरं नोच्यते तदाऽनुमानाच्छास्त्रस्य 'पृथक् कृतेर्व्यर्थता वा' स्यात् । प्रभेदवचनस्याविवक्षितत्वात् । सामान्यवचनस्यानुमानेनैव सिद्धत्वात् । यदि विषयभेदोपदर्शनार्थमनुमानात् पृथग्वचनं शास्त्रस्य तदाभ्युपगमात् स्ववचनमाचार्येण किमर्थं पृथक्कृतं (न्यायमुखे) । यथा सर्व्वमुक्तं मृषेति (।) तथा औलूक्यस्य नित्यः शब्द इति ।

अत्राह (।)

...4.103b भेदो वाङ्मात्रवचने प्रतिबन्धः स्ववाच्यपि ॥ १०३ ॥

'स्ववाच्यपि भेदः' स्ववचनस्यापि शास्त्रात् पृथक्करणं अप्रमाणकं वचनं 'वाङ्मात्रं' तस्मिन् 'प्रतिबन्धः' । उच्चारणसामर्थ्यादभ्युपगतप्रामाण्यं स्ववचनं ।

अन्यथोच्चारणमेव न स्यात् । सत्यार्थता च प्रामाण्यं तन्मृषार्थतया वाच्यया निषेध्यत इति तुल्यकक्षतया प्रतिबन्ध एवानयोर्न बाधा । तदेनं वाक्यं स्वार्थं प्रतिबध्नाति । वाक्यान्तरनिर्दिष्टम्वस्तु शास्त्रमित्यनयोर्भेद इत्युक्तं । (१०३)

स्यादेतत् (।)

[449/s]

....4.104 तेनाभ्युपागमाच्छास्त्रं प्रमाणं सर्ववस्तुषु ।
बाधकं, यदि नेच्छेत् स बाधकं किम्पुनर्भवेत् ॥ १०४ ॥

शास्त्रस्य 'तेन' वादिना'भ्युपगमात् सर्व्वत्र वस्तुषु' धर्मिषु शास्त्रसिद्धे वस्तुबलप्रवृत्ते प्रमाणनिश्चितेषु च 'शास्त्रं प्रमाणं' सत् 'बाधकमेव' स्यात् (।) विपरीतप्रतिज्ञाया न प्रतिबन्धकं । तत्कथं प्रमाणीकृतशास्त्रस्य मीमान्सकस्य शब्दे प्रत्यक्षसिद्धे कृतकत्वादनित्यत्वप्रतिज्ञायाः साध्यमानायाः शास्त्रेण प्रतिबन्धो न बाधेत्युक्तं । [2240] अथ 'स' वादी 'यदि' शास्त्रं प्रमाणं 'नेच्छेत्' तदा 'किं पुनर्द्धर्मस्यासुख'प्रदत्वस्य बाधायां प्रमाणं 'भवेत्' । न ह्यप्रमाणं क्वचित् प्रमाणीकृतशास्त्रस्य शब्दे प्रत्यक्षसिद्धे भवितुमर्हति । (१०४)

धर्मस्य सुखप्रदत्वेन निर्देशादसुखप्रदत्वे साध्ये स्ववचनविरोध एवेति चेत् । एवं तर्हि (।)

....4.105 स्ववाग्विरोधेऽभेदः स्यात् स्ववाक्शास्त्रविरोधयोः ।
पुरुषेच्छाकृता चास्य परिपूर्णा प्रमाणता ॥ १०५ ॥

[2239] १ तैरपि बाधनात् ।

[2240] १ सिद्धान्ती बन्धाति ।

‘स्ववाग्विरोधे’ऽभ्युपगम्यमाने ‘स्ववाक्शास्त्रविरोधयोरभेद’ एव ‘स्यात्’ । द्वयोरभ्युपगमसिद्धप्रमाणत्वात् । [90b/MA]‘पुरुषेच्छाकृता चास्य’ शास्त्रस्य ‘परिपूर्णा प्रमाणते’त्युपहसति । सत्यप्यागमस्ववचनयोरभ्युपगमाहितप्रामाण्यादभेदे ‘भेद’दर्शननिमित्तश्चोक्तं । (१०५)

यस्माच्छास्त्रं तत्सिद्ध एव धर्मिणि लिङ्गे च बाधकं न तु प्रमाणसिद्धेपि ।

....4.106 तस्मात् प्रसिद्धष्वर्थेषु शास्त्रत्यागेपि न क्षतिः ।
परोक्षेष्वागमाऽनिष्टौ न चिन्तैव प्रवर्त्तते ॥ १०६ ॥

‘तस्मात्’ प्रत्यक्षानुमानाभ्यां ‘प्रसिद्धेषु’ धर्मिलिङ्गसाध्यसम्बन्धादिषु सत्सु ‘शास्त्रत्यागेपि न क्षतिः[2241]’ । यथा शब्दकृतत्वानित्यत्वसम्बन्धादिषु प्रमाणसि- द्धेषु शास्त्रस्याकाशगुणत्वप्रतिपादकस्य त्यागेपि नानिष्टं । ‘परोक्षेषु’ धर्माधर्मादिषु [2242] पुनरागमस्य प्रमाणत्वेनानिष्टौ ‘चिन्तैव न प्रवर्त्तते(।) नह्यसिद्धे धर्मिणि’ विचारः । (१०६)

ननु शास्त्रत्वेन्न प्रमाणं कथन्तत्सिद्धे धर्मिणि लिङ्गादौ वा विचार इत्याह ।
[450/s]

....4.107 विरोधोद्भावनप्राया परीक्षाप्यत्र तद्यथा ।
अधर्ममूलं रागादि स्नानञ्चाधर्मनाशनम् ॥ १०७ ॥

‘अत्र’ शास्त्रे ‘परीक्षापि’ या क्रियते सा पूर्व्वापराभ्यां ‘विरोधोद्भावनप्राया न’ वास्तवी ‘तद्यथाऽधर्मस्य मूलं रागादीति’ क्वचिदुक्तं ‘स्नानञ्चा[2243] धर्मनाशन-[2244]’ मित्यत्रोच्यमानम्विरुणद्धि । रागादयो हि पापनिदानं न च निदानाविरोधे निदानिनो बाधा । तत्कथं रागाद्यविरोधि स्नानं पापविरोधि स्यात् ।[2245] अप्रमाणे शास्त्रे विरोधोद्भावनप्रायापि चिन्ता कस्मात् प्रवर्त्त्यते इति चेत् । दानादिचेतनानां प्रवृत्तेर्महानु‘संशा’(? शंसा)श्रवणात् (।) हिंसादिचेतनानां महापापश्रवणाच्च (।) अपेक्षितफलेषु दानादिष्वयं पुरुषः प्रवृत्तिकामो नागमप्रामाण्यमनाश्रित्यासितुं समर्थः । (१०७)

## (६) प्रतीतिबाधा ।

ततः (।)

....4.108 शास्त्रं यत्सिद्धया युक्त्या स्ववाचा च न बाध्यते ।
दृष्टेऽदृष्टेपि तद् ग्राह्यमिति चिन्ता प्रवर्त्त्यते ॥ १०८ ॥

‘यच्छास्त्रं दृष्टे’ प्रमाणे-विषये ‘युक्त्या’ प्रत्यक्षाद्याख्यया ‘न बाध्यते । अदृष्टे’ प्रमाणविषये च स्ववाचाऽगमाश्रये[2246] णानुमानेन न बाध्यते (।) तत्प्रमाणत्वेनादृष्टे विषये प्रवृत्तिकामस्य

[2241] २ इष्टाप्रतिबन्धात् ।

[2242] ३ आगमो ग्राह्य एव ।

[2243] १ जपहोमादि ।

[2244] २ चित्तमन्तर्गतं दुष्टं ती(र्थ)स्नानैर्न शुध्यति ।
शतशोपि तद्धौतं क्षुराभाण्डमिवाशुचि ॥
पुनः
गङ्गाद्वारे कुशावर्ते विल्वकीनीलपर्वते ।
स्नात्वा कनखले तीर्थे सम्भवेन्न पुनर्भवे ॥

[2245] ३ यद्यन्निदानं न बाधते तन्न तद्बाधकं यथा श्लेष्मणो मधुरादि ॥ येन यन्निदान बाधनास्तेभ्यः तन्निवृत्तिर्यथा शीलं दुश्चरितस्य समाधिः पर्यवस्थानस्य । प्रज्ञाऽनुशयस्य बाधिका ।

[2246] ४ अत्यन्तपरोक्षे ।

'ग्राह्यं' न तु यत्किञ्चि'दित्यनेन' प्रयोजनेन शास्त्रे विरोधोद्भावनप्राया 'चिन्ता प्रवर्त्यते' । (१०८)

शास्त्रस्ववचनविरोधौ व्याख्यातौ ।
[451/s]

(क. आप्तलक्षणम्)

प्रतीतिबाधां व्याख्यातुमाह ।

....4.109 अर्थेष्वप्रतिषिद्धत्वात् पुरुषेच्छानुरोधिनः ।
इष्टशब्दाभिधेयस्याप्तो वाक्षतवाग्जनः ॥ १०९ ॥

इष्टशब्दाभिधेयत्वस्याभिमतवाच्यत्वस्य 'पुरुषेच्छानुरोधिनः' पुरुषेच्छाधीनस्या'र्थेष्वप्रतिषिद्धत्वात्' (।) न हि पुरुषेच्छायामपि शशी चन्द्रशब्दं वाचकतया न स्वीकरोति । ततश्चात्रेष्ट'शब्दाभिधेय'त्वे विषये 'आप्तो' व्यवहर्त्ता 'जनोऽक्षतवाग'प्रतिषिद्धेष्टवचनः । अनेन शब्देनायमर्थो मयाऽ'भिधातव्य इति कल्पनाविषयत्व'मिष्टशब्दाभिधेयत्वं । तत्र च पुरुषस्यारोपेण स्वेच्छाधीना वचनप्रवृत्तिः । तस्मादिष्टशब्दाभिधेयत्वबाधः पक्षीक्रियमास्तेनैव स्वसम्वेदनसिद्धेन बाध्यते । (१०९)

....4.110 उक्तः प्रसिद्धशब्देन धर्मस्तद्व्यवहारजः ।
प्रत्यक्षादिमिता मानश्रुत्यारोपेण सूचिताः ॥ ११० ॥

चन्द्रश्चन्द्र इत्यादिशब्द'व्यवहाराज्जातो धर्मः' कल्पनाविषयो योग्यताख्य आचार्येण 'प्रसिद्धशब्देन' तद्यथा शाब्दप्रसिद्धेनेत्यादिनोक्तः । शाब्दी प्रसिद्धिर्व्यवहारः शाब्दप्रसिद्धिः तद्भवो विषयः शाब्दप्रसिद्धः तेन बाधेत्यर्थः । न केवलमिहैव प्रत्यक्षादिबाधास्त्वपि 'मानश्रुतौ[2247]' मेयस्या'रोपेण' प्रत्यक्षादिभ्यामनुमानागमाभ्यां मितार्था एव विरोधिनो वाचकत्वे पक्षस्य 'सूचिताः' । (११०)

न हि प्रत्यक्षानुमाने पुरुषचित्तवर्तिनी आगमश्च बाध्यमाने धर्मिणि सम्भवन्ति[2248] । तदुपलब्धतद्धर्म्माः सन्तो युज्यन्ते बाधकास्तस्मात्(।)

....4.111 तदाश्रयभुवामिच्छानुरोधादनिषेधिनाम् ।
कृतानामकृतानां च योग्यं विश्वं स्वभावतः ॥ १११ ॥

तस्य लोकस्याश्रयेण भुवां भवतां शब्दानां व्यावहारिकाणांइच्छानुरोधिनां(अ)[91a/MA] ऽर्थेषु वाचकत्वप्रवृत्तेः कारणात् क्वचिदपि विषयेऽनिषेधिनां निषेधरहितानां कृतानां संकेतितानामसंकेतितानाञ्च विश्वमिदं वाच्यत्वेन स्वभावादेव योग्यं ॥ (१११)

ख. योग्यता प्रसिद्धिशब्दार्थ;

यतश्चेष्टशब्दाभिधेयत्वयोग्यता सर्व्वत्र सम्भवति । अतो विशेषानपेक्षणाद् (।)
[452/s]

---

2247 १ नेह प्रत्यक्षाबाधकं किं त्वेतैर्मिताः प्रत्यक्षानुमानशास्त्रं परिच्छिन्नाः श्रावणत्वादयः प्रतिज्ञार्थस्य । प्रत्यक्षातिश्रुतौ श्रावणत्वाद्यारोपेण ।

2248 २ एषः (?।) तत्रोपलब्धात् तस्य च धर्मा (ः) ।

....4.112 अर्थमात्रानुरोधिन्या भाविन्या भूतयापि वा ।
बाध्यते प्रतिरुन्धानः शब्दयोग्यतया तया ॥ ११२ ॥

'अर्थमात्रानुरोधिन्या तया शब्दयोग्यतया भा'विसंकेतापेक्षया 'भाविन्या' । अतीतसंकेतापेक्षया 'भूतयापि वा' व्यवस्थितया तामेव ('योग्यतां प्रतिरुन्धानः' । 'यथाऽचन्द्रः' शशी सत्वादिति 'बाध्यते') । (११२)

....4.113 तद्योग्यताबलादेव वस्तुतो घटितो ध्वनिः ।
सर्व्वोस्यामप्रतीतेपि तस्मिंस्तत्सिद्धता ततः ॥ ११३ ॥

योग्यताबलादेव वस्तुतः सामर्थ्यात् सर्व्वः संकेतितोऽसंकिततश्च ध्वनिरस्यां योग्यतायाघटितः सम्बद्धः साक्षात् वाचकत्वेन तस्मिन् शब्देऽप्रतीतेपि वस्तुनि अप्रातिकूल्यलक्षणस्य योग्यत्वस्य सर्व्वदा स्थितेः । यत एवं ततस्तस्या योग्यतायः शब्दप्रसिद्धताचार्येणोक्ता । यद् यत्र समर्थ तदसंमुखीभावेपि तत् तेन व्यपदिष्य (? श्य)ते यथा पाचक इति । समर्थश्च वस्विष्टशब्दाभिधेयत्व इति कृत्वा शाब्दप्रसिद्ध इति । (११३)

....4.114 असाधारणता न स्यात् बाधाहेतोरिहान्यथा ।
तन्निषेधोऽनुमानात् स्याच्छब्दार्थेऽनक्षवृत्तितः ॥ ११४ ॥

'अन्यथा' यदि शब्दोऽसंमुखीभवन्नपि योग्यतायां न सम्बद्धः । तदेह शब्दयोग्यताप्रतिषेधे कर्त्तव्ये 'बाधाहेतोरचन्द्रः' शशी सत्वादेरित्यादेर'साधारणतोक्ता न स्यात्' । सर्व्वस्य चन्द्रशब्दयोग्यत्वे सपक्षाभावात्मत्वसाधारणं स्यान्नान्यथा । 'शब्दार्थे' योग्यतालक्षणे कल्पितेऽ'नक्षवृत्तितः' । अक्षवृत्त्यभावात् । प्रत्यक्षबाधकमिति तस्या योग्यताया 'निषेधो'नुमानात् 'स्यात्' । (११४)

....4.115 असाधारणता तत्र हेतूनां यत्र नान्वयि ।
सत्त्वमित्यस्योदाहारो हेतोरेवं कुतो मतः ॥ ११५ ॥

'तत्र' योग्यताप्रतिषेधे कर्त्तव्ये सर्व्वेषां 'हेतूनां' सपक्षाभावात् 'असाधारणता[2249]' कथमेतदित्याह (।) 'यत्र' साध्ये 'सत्त्व'मपि लिङ्गं सर्व्ववस्तुव्यापि 'नाऽन्वयि' साधारणं भवति तत्रान्यस्य का कथेति 'हेतोः' कृतक[2250] त्वस्यो'दाहार' आचार्यस्यैवं फलः 'सर्व्वहेत्वसाधारणत्वप्रतिपादनप्रयोदनो मतः' । (११५)

[453/s]कथं गम्यते सर्व्वेषां शब्दानां सर्व्वत्रार्थे सिद्धिरित्याह ।

....4.116 संकेतसंश्रयाः शब्दाः स चेच्छामात्रसंश्रयः ।
नासिद्धिः शब्दसिद्धानामिति शाब्दप्रसिद्धिवाक् ॥ ११६ ॥

सङ्केतमन्तरेण वाचकादृष्टेः 'संकेतसंश्रयाः शब्दाः स च' संकेतः पुरुषे'च्छामात्रसंश्रयः' (।) तदतिरिक्तस्यापेक्षणीयस्याभावात् । तस्मा'च्छब्दसिद्धानाम'भिधेयत्वादीनां क्वचिदप्यर्थे 'नासिद्धिः' । इति हेतोः 'शाब्दप्रसिद्धिराचार्यस्य' ॥ (११६)

एतच्च शाब्दप्रसिद्धिवचनम् (।)

....4.117 अनुमानप्रसिद्धेषु विरुद्धाव्यभिचारिणः ।
अभावः दर्शयत्येवं प्रतीतेरनुमात्वतः ॥ ११७ ॥

---

[2249] १ सर्वः शब्दो योग्यतायां स्वभावतो घटत इति न कश्चिदचन्द्रोस्ति सपक्षो यत्र वृत्तं लिङ्गमन्वयि स्यात् ।

[2250] २ अथवाऽसाधारणत्वादनुमानाभाव इत्यस्यामन्योर्थः । योऽचन्द्रत्वं प्रतिजानीते तं प्रति ब्रुवतो लोकस्यानुमानेत्युच्यते तावन्तावनिष्टौ कथमन्यत्रेष्टिः स्यात् ॥

वस्तुबलप्रवृत्तेना'नुमानेन प्रसिद्धे'ष्वर्थेषु विपरीतधर्मोपस्थापकस्य 'विरुद्धाव्यभिचारिणः' साधनान्तरस्या'भावन्दर्शयति' । कस्मादित्याह । 'एवमी[2251]'दृश्याः शब्दसिद्धाया योग्यतायाः 'प्रतीते [2252]' स्वभावलिङ्गसमुत्थत्वात् 'अनुमात्वतः' । यथा शब्दसिद्धा योग्यताऽनुमानसिद्धेति बाध्या सत्वादिहेतुना (।) तथाऽन्योपि वस्तुबलप्रवृत्तानुमानविषयः समानत्वात् न्यायस्येत्यर्थः । (११७)

....4.118 अथवा ब्रुवतो लोकस्यानुमाऽभाव उच्यते ।
किन्तेन भिन्नविषया प्रतीतिरनुमानतः ॥ ११८ ॥

अथवाऽचन्द्रःशशी सत्वादिति विप्रति[2253] पद्यमानं प्रतिपत् प्रतिपादनार्थं 'लोकस्य ब्रुवतः' शाब्दप्रसिद्धेनासाधारणत्वाद'नुमानाभाव' आचार्येणो'च्यते' । पारमार्थिकस्य बाध्यत्वस्याभावात् [2254] । कल्पितं निषेध्यं तच्च पुरुषेच्छामात्राधीनत्वात् सर्व्वत्र सम्भवतीति सर्व्वस्य चन्द्रशब्दयोग्यतायोगान्न कश्चिदचन्द्रः पक्षोस्ति यत्र वर्त्तमानंसत्त्वमसाधारणतां जह्या/?/ । एवन्दर्शिते 'किम्भ'वतीति चेत् । 'तेना'नुमानाभावाभिधा- यिना शब्दप्रसिद्धाभिधानेन शब्दसिद्धा 'प्रतीति'र्व्वस्तुबलप्रवृत्ता'नुमान'तो 'भिन्नविष'-[91b/MA] 'यो'क्ता भवति । वस्तुविषयं ह्यनुमानं कल्पितगोचरान्तरा शाब्दी प्रतीतिरित्यर्थः ॥ (११८)
[454/s]

## (ग. वस्तुबलप्रवृत्तमनुमानम्)

....4.119 तेनानुमानाद् वस्तूनां सदसत्तानुरोधिनः ।
भिन्नस्यातद्वशा वृत्तिस्तदिच्छाजेति सूचितम् ॥ ११९ ॥

'तेन[2255]' विषयभेदेन 'वस्तूनां सदसत्तानुरोधिनोऽनुमानात् भिन्नस्य' कल्पितस्यार्थस्य शब्दयोग्यत्वस्य 'वृत्तिरतद्वशा' वस्त्वनायत्ता 'तस्य' पुरुष'स्येच्छाजेति सूचितं' भवति । (११९)
किञ्च (।)

....4.120 चन्द्रतां शशिनोऽनिच्छान् कां प्रतीतिं स वाञ्छति ।
इति तं प्रत्यदृष्टान्तं तदसाधारणं मतम् ॥ १२० ॥

'शशिनः' सर्व्वजनसिद्धां व्यावहारिकीं 'चन्द्रता' चन्द्रशब्दवाच्यतां 'अनिच्छन्' परः'कामन्यां प्रतीतिं स वाञ्छति' (।) यया वाच्यतासिद्धिः क्वचित् स्यात् । मता च पारमार्थिकी वाच्यताप्रतीतिर्न क्वचिदस्ति । वस्तुतः सर्व्वस्यावाच्यताप्रदर्शनात् । कल्पिवाच्यताप्रतीतिस्तु पुरुषेच्छामात्रप्रभवत्वात् सर्व्वत्राव्याहतैव । अतः सर्व्वस्य चन्द्रशब्दवाच्यतायोगात् सपक्षो नास्तीति तं चन्द्रतापलापिनं वादिनं 'प्रति' सत्वं 'लिङ्गमदृष्टान्तमसाधारण'मुक्तमाचार्येण न तु चन्द्रस्यैकस्यान्यत्रासम्भवात् सपक्षविपक्षयोरभावादसाधारणत्वमभिप्रेतमा चा र्य स्य । अचन्द्रत्वे साध्ये घटादेः सपक्षस्य सत्वात् । चन्द्रस्तु विपक्षो मा भूत् (।) तथापि हेतुनिवृत्तिरस्मादव्याहतैव । असतोपि हेतुनिवृत्तेः साधनात् । (१२०)
अपिच (।)

2251 १ लक्षणयुक्ते बाधासंभवे लक्षणमेन दूषितं स्यात् ।
2252 २ अनुमीयतेऽनयेति प्रसिद्धेरनुमात्वात् ।
2253 ३ लोकश्चन्द्रः शशी ह्लादनाद्भासनाद्वा कर्पूरादिवत् न तत्तस्यासिद्धं ।
2254 ४ किं फलमित्याह ? वस्तुतः शशिनि चन्द्रत्वमपि शब्दबलात् ।
2255 १ भेददर्शनेपि किं फलमित्याह ।

....4.121 नोदाहरणमेवेदमधिकृत्येदमुच्यते ।
लक्षणत्वात् तथा वृक्षोऽधात्रीत्युक्तौ च बाधनात् ॥ १२१ ॥

अचन्द्रः शशी सत्त्वादित्येतदेवोदा'हरणमधिकृत्येदं' शब्दवाच्यत्वप्रतिक्षेपहेतोरसाधारणत्वं 'नोच्यते । लक्षणत्वात्[2256]' । लक्षणेन हि लक्ष्यं व्याप्तं दर्शनीयं न च द्वितीयचन्द्राभावेनोसाधरणतोक्तिरुदाहरणान्तरं व्याप्नोति । यथा वा चन्द्रतायाः प्रतीत्या बाधेष्यते 'तथाऽधात्री वृक्षः' सत्त्वात्[2257] घटादिवदित्युदाहरणो'क्तौ' [455/s] सर्व्वलोकसिद्धया पुरुषेच्छाधीनया घटादावपि वृक्षशब्दयोग्यताप्रतीत्या 'सपक्षाभावे-' नासाधारणत्वाद् वृक्षशब्दवाच्यत्वाभावस्य साधनात् (।) 'यथोक्तमेवा'साधारणत्वमाचार्यस्येष्टं । (१२१)

यदप्यु[2258]च्यते द्वितीयस्य चन्द्रस्याभावादसाधारणतेति तत्राह (।)

....4.122 अत्रापि लोके दृष्टत्वात् कर्पूररजतादिषु ।
समयाद्वर्तमानस्य काऽसाधारणतापि वा ॥ १२२ ॥

'लोके कर्प्पूररजतादिषु' गान्धिकवाचिकादीनां 'समयाद्वर्त्तमानस्य दृष्टत्वा-' दत्राचन्द्रः शशी सत्त्वादित्युदाहरणे हेतोर'साधारणतापि का वा' । यदि द्वितीयचन्द्रो न भवेत् । एवमसाधारणता स्याद् वस्तुत्वस्य । (१२२)

स्यादेतत् (।) तत्समयादपि वर्त्तमानस्य चन्द्रत्वादेर्न शब्दवाच्यता । ततो यथा न वह्निशब्दवाच्यता कर्प्पूरस्य तथा चन्द्रशब्दवाच्यता च न स्यादित्यसाधारणतैवेत्याह ।

...4.123a यदि तस्य क्वचित् सिध्येत् सिद्धं वस्तुबलेन तत् ।

'तस्यैवं'वादिनः सत्यपि सामयिके चन्द्रे 'क्वचिदर्थ'विशेषे चन्द्रशब्दवाच्यत्वं यदि सिध्येत् न तु सर्व्वत्र कर्पूररजतादौ तदा 'तच्च'न्द्रशब्दवाच्यत्व 'वस्तुबलेन सिद्धं' स्यात् । न त्वेवं दृश्यते सर्व्वस्य कर्पूरादेश्च शब्दाभिधेयत्वदर्शनात् ।

अथ यत्रैव कल्प्यते चन्द्रत्वं तदेव तच्छब्दवाच्यं प्रतीयत इति तथाभ्युपगम्यते तदा ।

...4.123b प्रतीतिसिद्धपगमेऽशशिन्यप्यनिवारणम् ॥ १२३ ॥

सामयिके चन्द्रत्वे क्वापि प्रतीत्या सिद्धस्य चन्द्रशब्दवाच्यत्वस्योपगमे । श'शिन्य'पि तच्छब्दवाच्यस्या'निवारणं' । (१२३)

....4.124 तस्य वस्तुनि सिद्धस्य शशिन्यप्यनिवारणम् ।
तद्वस्त्वभावे शशिनि वारणेपि न दुष्यति ॥ १२४ ॥

शुक्लतादिके निमित्तभूते वस्तुनि । 'तस्य' चन्द्रशब्दाभिधेयत्वस्य 'सिद्धस्य' 'शशिन्यपि' निमित्तसद्भावाद'निवारणं' तस्य निमित्तभूतस्य वस्तुनः 'शशिन्यभावे' तु[92a/MA] चन्द्रशब्दवाच्यत्वस्य वस्तुत्वाद्धेतोर्व्वारणेपि न किञ्चिद् 'दुष्यति' । निमित्ताभावे [456/s] नैमित्तिकाभावास्येष्टत्वात् । सामयिकन्तु सर्व्वत्राशक्यवारणमिति 'तच्छब्दयोग्यताप्यबाध्या' । (१२४)

....4.125 तस्मादवस्तुनियतसंकेतबलभाविनाम् ।
योग्याः पदार्था धर्माणामिच्छाया अनिरोधानात् ॥ १२५ ॥

[2256] २ सर्व्वप्रतीतिविरोधानां सामान्येन लक्षणत्वात् ।

[2257] ३ पार्थिवत्वात् ।

[2258] १ न्या य मु ख टीकाकारमुपक्षिपति ।

'तस्मादवस्तुनियतो' वस्तुन्यनियत इच्छाधीनत्वात् 'संकेत'स्तस्य बलाद् 'भाविनां धर्म्माणां' वाच्यत्वादीनां 'पदार्थाः' सर्व्वे धर्मित्वेन 'योग्याः' । इच्छातः 'पुंसः केनचिद् वाच्यत्वाद्युत्था-'पिकाया 'इच्छाया अनिरोधात्' । (१२५)

....4.126 तां योग्यतां विरुन्धानं संकेताप्रतिषेधजा ।
प्रतिहन्ति प्रतीत्याख्या योग्यताविषयेऽनुमा ॥ १२६ ॥

'तामि'ष्टशब्दाभिधेयत्व'योग्यतां' पदार्थानां सत्त्वादिकाद्धेतोर्व्वि'रुन्धानं प्रतिक्षिपन्तं' वादिनं 'प्रतीत्या'ख्या प्रतीतिसंज्ञिताऽ'नुमा प्रतिहन्ति । संकेताप्रतिषेधजेति' स्वभावलिङ्गजत्वमाह । इच्छाधीनत्वात् योग्यताविषये विपरीतधर्मोपस्थानमाह । प्रयोगः पुनः (।) यः पुरुषेच्छानुभिधायी स सर्व्वत्र सम्भवी तद्यथा विकल्पः पुरुषेच्छानुविधायि चार्थेष्विष्टशब्दाभिधेयत्वमिति । (१२६)

....4.127 शब्दानामर्थनियमः संकेतानुविधायिनाम् ।
नेत्यनेनोक्तमत्रैषां प्रतिषेधो विरुध्यते ॥ १२७ ॥

'अनेन' चेष्टशब्दाभिधेयत्वयोग्यताप्रतिषेधबाधनेन दर्शितेन 'शब्दानां संकेतानुविधायि'नाम'र्थनियमः' प्रतिनियतवाचकत्वं 'नेत्युक्त'म्भवति । ततोस्य स्वेच्छाकल्पितोऽर्थे 'एषां' शब्दानां वाचकत्वस्य 'प्रतिषेधः' सत्त्वादिहेतोः 'क्रियमाणो विरुध्य[2259] ते' । (१२७)

यद्येवन्तदा क्वचिदर्थे निषेधं कुर्व्वता शब्दो बाध्यः स्यात् । ततश्च गुणा दिकं निमित्तभूतं गुणादि[2260] शब्दानां गुणगुणिसम्बन्धादिपारमार्थिकमर्थं गुणिशब्दादीनां निषेधन् बाध्यः स्यादित्याह । येन कल्पितमर्थं शब्दानां बाधमानः प्रतिक्षिप्यते । न तु गुणादिकं तेन (।)

....4.128 नैमित्तिक्याः श्रुतेरर्थमर्थम्वा पारमार्थिकम् ।
शब्दानां प्रतिरुन्धानोऽबाधनार्हो हि वर्ण्णितः ॥ १२८ ॥

[457/s]

'नैमित्तिक्या'[2261] वस्तुभूतगुणादिनिमित्तवत्याः 'श्रुतेरर्थं गुणादिकं पारमार्थिकमर्थं' [2262] गुणिगुणादिसम्बन्धं 'शब्दानां' गुण्यादिवाचिनां 'प्रतिरुन्धानो'ऽबाधनार्हो बाधां नार्हतीत्युक्तो [2263] भवति ॥ (१२८)

यस्माच्च सांकेतिकार्थनिराकरणे प्रतीतिबाधा (।)

....4.129 तस्माद् विषयभेदस्य दर्शनाय पृथक्कृता ।
अनुमानाबहिर्भूता प्रतीतिरपि पूर्व्ववत् ॥ १२९ ॥

'तस्मात्' स्वभावलिङ्गजत्वेना'नुमानादबहिर्भूता प्रतीतिरपि' तस्मात्[2264] 'पृथक्कृता-' (।) किमर्थमित्याह । 'विषयस्य भेदः' कल्पिताकल्पितत्वं तस्य 'दर्शनाय' । कल्पितार्थविषया प्रतीतिः । वस्तुविषयन्त्वनुमानमित्यर्थः । 'पूर्व्ववदिति' । यथा आगमस्ववचनेऽभ्युपगतप्रामाण्येऽप्रत्यक्षत्वादनुमानान्तर्गतेपि विषयभेददर्शनाय पृथग्दर्शिते

[2259] १ प्रतिज्ञादोषो भवति ।
[2260] २ जात्यादि ।
[2261] १ निमित्ताभावे ।
[2262] २ न चन्द्रत्वं परमार्थतोस्तीति ।
[2263] ३ अबाधनार्हः ।
[2264] ४ अनुमानात् ।

वस्तुबलप्रवृत्तेनुमानं सर्व्वविषयविचारे त्वागमस्त्ववचने अधिकृते । तथा प्रतीत्यनुमाने अपि भिन्नविषये इत्यर्थः । (१२९)

अनुमानबाधायामन्तर्भावादनयोरभ्यु[2265] पगमप्रतीतिबाधयोः (।)

....4.130 सिद्धयोः पृथगाख्याने दर्शयंश्च प्रयोजनम् ।
एते सहेतुके प्राह नानुमाध्यक्षबाधने ॥ १३० ॥

'सिद्धयो[2266]'रपि 'पृथगाख्याने' विषयभेदलक्षणं 'प्रयोजनन्दर्शयन्ना' चा र्य 'एते' अभ्युपगमप्रतीतिबाधे 'सहेतुके प्राह[2267]' । न सन्ति [2268] प्रमाणानि प्रमेयार्थानीति[2269] प्रतिज्ञामात्रे[2270] णेति (।) अत्र प्रतिज्ञामात्रं शास्त्रस्ववचनयोः सिद्धयोरप्रामाण्यप्रतिज्ञाबाधकमुक्तम् (।) अतोप्य[2271] साधारणत्वादनुमानाभावे शाब्दप्रसिद्धेनापोद्यते न सपक्ष इति । अत्र शाब्दप्रसिद्धेन शशिनश्चन्द्रत्वेनाचन्द्रत्वप्रतिज्ञाया बाधनमुक्तं । 'अनुमाध्यक्षबाधने' तु न सहेतुके प्राह ।[2272] अश्रावणः शब्दो नित्यो घट इति तस्माद् विषयभेदोपलक्षणार्थं सहेतुत्वाहेतुत्वदर्शनं । प्रत्यक्षानुमान बाधे सर्व्वविषये ।[92b/MA] अभ्युपगमप्रतीतिबाधे तु नियतविषये इत्यर्थः ॥ (१३०)

उक्ता प्रतीतिबाधा ॥
[458/s]

## (७) प्रत्यक्षबाधा

प्रत्यक्षबाधा वक्तव्या । न केवलं शाब्दप्रसिद्धे व्यवहारधर्मप्रसिद्धौ तत्प्रतिरोद्धा बाध्यते । किन्तु (।)

...4.131a अत्राप्यध्यक्षबाधायां नानारूपतया ध्वनौ ।
प्रसिद्धस्य श्रुतौ;

'अत्राप्यध्यक्षबाधायां' व्यावहारिककल्पनावशात् 'नानारूपतया' लोके 'प्रसिद्धस्य' ख्यातस्य 'ध्वनौ श्रुतौ' श्रवणज्ञाने ॥

...4.131b रूपं यदेव प्रतिभासते ॥ १३१ ॥

....4.132 अद्वयं शबलाभासस्यादृष्टेर्बुद्धिजन्मनः ।
तदर्थोक्तिरस्यैव क्षेपेऽध्यक्षेण बाधनम् ॥ १३२ ॥

'यदेव रूपमद्वयं' धर्मादिद्वयशून्यं 'प्रतिभासते शबलाभासस्य' नानाकारस्य 'बुद्धिजन्मनोऽदृष्टेः' । यदि नानाकरता शब्दस्य वास्तवी स्यात् (।) तथैव श्रुतिज्ञाने प्रतिभासेत । 'तदर्था' तत्प्रतिपादनफलाऽचार्यस्य प्रत्यक्षानुमानार्थप्रसिद्धेन निराकृतइत्यत्रा-

---

[2265] ५ स्ववचनास्ववचनयोर्ग्रहोनेन ।
[2266] ६ अनुमानापृथ(?)त्त्वेन निश्चितयोः ।
[2267] ७ नागः ।
[2268] ८ समुच्चयमाह प्राक् प्रामाण्यमाज्ञाय विरोधमनेन ।
[2269] ९ हेतुनानेन सहेतुकमाह ।
[2270] १० शास्त्रस्ववचनप्रामाण्याख्येन ।
[2271] ११ दृष्टान्ताभावात् ।
[2272] १२ उद्योतकरादिनोक्तः । सम्बन्धो नाध्यक्ष इत्युक्त्वा ।

'र्थोक्तिरर्थ[2273]'ग्रहणमस्याध्यक्ष[2274] सिद्धस्यैव रूपस्य [2275] 'क्षेपेऽध्यक्षेण बाधन'मिष्टं । (१३१,१३२)

## 4.4 ४. सामान्यचिन्ता

(१) सामान्यं व्यावृत्तिलक्षणम्

....4.133 तदेव रूपं तत्रार्थः शेषं व्यावृत्तिलक्षणम् ।
अवस्तुभूतं सामान्यमतस्तन्नाक्षगोचरः ॥ १३३ ॥

'तत्र' श्रुतिज्ञाने 'भास'मानं 'तद्रूप'मर्थः स्वलक्षणं । तदतिरिक्तं 'शेषं' । धर्मिधर्मादि[2276] 'व्यावृत्तिलक्षण'मन्यव्यवच्छेदस्वभावम'वस्तु'भूतं सर्व्वत्र सम्भवात् 'सामा'न्यश्च । 'अतोऽ'वस्तुत्वादेस्तद्गुणजात्या'दि नाक्षगोचरः' । (१३३)

[459/s]

....4.134 तेन समान्यधर्माणामप्रत्यक्षत्वसिद्धितः ।
प्रतिक्षेपेप्यबाधेति श्रावणोक्त्या प्रकाशितम् ॥ १३४ ॥

'तेना'वस्तुत्वेन कारणेन 'सामान्यधर्माणां' प्रमेयत्वादीनाम'प्रत्यक्षत्वस्य सिद्धितः' । केनचिद्वादिना प्रत्यक्षसिद्धितः 'प्रतिक्षेपेपि' क्रियमाणे न बाध्यबाधकभाव इत्यश्रावण इत्यत्र 'श्रावणोक्त्या' निषेध्यदर्शिकया प्रकाशितं स्वलक्षणबाधने प्रत्यक्ष'बाधेत्यर्थः' ॥ (१३४)

[2277] एवं तर्हि शब्दस्वलक्षणं नास्तीत्येव कस्मान्नोच्यते । किं श्रावणत्व[2278]मुख्यं निषेध्य युक्तिरित्याह ।

....4.135 सर्व्वथाऽवाच्यरूपत्वात् सिद्ध्या तस्य समाश्रयात् ।
बाधनात् तद्बलेनोक्तः श्रावणेनाक्षगोचरः ॥ १३५ ॥

स्वलक्षणस्य 'सर्वथा' केनचिच्छब्देना'वाच्य'त्वात्[2279] मुख्यमभिधानं नास्त्येव । अथ सामान्यवृत्तिरपि स्वलक्षणशब्दोऽध्यवसायानुरोधात् स्वलक्षणमुपलक्षयति । एवं श्रावणशब्दोपीन्द्रियग्राह्यतोपलक्षणं शब्दस्वलक्षणमुपलक्षयिष्यतीति न कश्चिद्विशेषः । अथवास्त्येव श्रावणशब्देनाभिधाने प्रयोजनमित्याह । श्रोत्रेन्द्रियविषस्य या सिद्धिस्तथा भावः । तया सिद्ध्या 'तस्ये'न्द्रियज्ञानस्य 'समाश्रया'च्छब्दस्य स्वरूपव्यवस्थित्या हेतुना तेन व्यपदेश इन्द्रियज्ञानबलेन शब्दस्वरूपपावस्थितः (।) तथाभिधानमित्यर्थः । किञ्च तस्येन्द्रियज्ञानस्य 'बलेन' शब्दस्वलक्षण'विपर्ययभावस्य[2280]' 'बाधानात्' कारणात् 'श्रावणेनाक्षगोचरः' स्वलक्षण'मुक्तः' । नित्यो घट इत्यनुमाने नित्यत्वविषयेण कृतकत्वलिङ्गभुवा बाधितः पक्षः । स चासकृद्दर्शित एवेति नेह विपश्चितः ॥ (१३५)

[2273] १ श्रोत्रशब्दयोर्यः सम्बन्धो ग्राह्यगाहकलक्षणस्तद्धितवाच्यः स श्रावणशब्दस्यार्थः ।

[2274] २ स्वलक्षणस्यैव ।

[2275] ३ न ग्राह्यग्राहकत्वप्रतिषेधे सामान्यस्य वा ।

[2276] ४ जात्यादि ।

[2277] १ इन्द्रियविषयस्वभावःस्वलक्षणं स यदि श्रावणशब्देनाभिमतः ।

[2278] २ किं क्रियानिमित्तेनोच्यते ।

[2279] ३ स्वलक्षणस्य ।

[2280] ४ तथाभूतार्थप्रतिषेधकस्य पुरुषस्य ।

## (२) स्वधर्मिग्रहणप्रयोजनम्

इदानीं प्रत्यक्षानुमानाप्तप्रसिद्धेन स्व[2281] धर्मिणीति स्वधर्मिग्रहणस्य 'साफल्य'माख्यातुमाह ।

....4.136 सर्व्वत्र वादिनो धर्मो यः स्वसाध्यतयोप्सितः ।
तद्धर्मवति बाधा स्यान्नान्यधर्मेण धर्मिणि ॥ १३६ ॥

[460/s]

'सर्व्वत्र' वादकाले साध्यकाले वा 'वादिनः स्वसाध्यतया यो धर्म ईप्सितः तद्धर्भवति' धर्मिणि 'बाधा स्यात्' । यथा श्रावणत्ववति शब्दे बाधिते बाधा पक्षस्य । 'न' तु वादीष्टाद् धर्माद'न्येन धर्मेण' धर्मवति 'धर्मिणि' बाधिते बाधा पक्षस्य स्यादिति धर्मिग्रहप्रयोजनं यथाकाशगुणत्ववति शब्दे बाधितेनं पक्षबाधा । (१३६)

....4.137 अन्यथास्योपरोधः को बाधितेन्यत्र धर्मिणि ।
गतार्थे लक्षणेनास्मिन् स्वधर्मिवचनं पुनः ॥ १३७ ॥

'अन्यथा' यद्येवं नेष्यते त'दान्यत्र' धर्मे 'धर्मिणि बाधितेऽस्य' प्रकृतधर्मविशिष्टस्य धर्मिणः क 'उपरोधो' बाध[2282] ॥ ननु स्वरूपेणैव निर्देश्यः स्वयमिष्टोऽनिराकृतः पक्ष इति पक्षलक्षणेनैवानिष्टधर्मवतो धर्मिणो बाधा न पक्षबाधेति लभ्यत [93a/MA] एवेत्याह । पक्षस्य 'लक्षणेनास्मिन्' वादीष्टधर्मवति धर्मिणि बाध्यत्वेन 'गतार्थे पुनः' 'स्वधर्मिवचनं' यत्कृतं । (१३७)

....4.138 बाधायां धर्मिणोपि स्यात् बाधेत्यस्य प्रसिद्धये ।
आश्रयस्य विरोधेन तदाश्रितविरोधनात् ॥ १३८ ॥

'धर्मिणोपि[2283] बाधायां' धर्मस्य बाधने पक्ष'बाधा' यथा 'स्यादित्यस्या'र्थस्य 'प्रसिद्धये' क्वचिदा'श्रयस्य' धर्मिणो 'विरोधेन' प्रतिक्षेपेण तदा'श्रितस्य' धर्मस्य 'विरोधनात्' धर्मद्वारेण धर्मिद्वारेण वा समुदायबाधायां पक्षबाधेत्यर्थः । (१३८)

....4.139 अन्यथैवंविधो धर्मः साध्य इत्यभिधानतः ।
तद्बाधामेव मन्येत स्वधर्मिग्रहणन्ततः ॥ १३९ ॥

'अन्यथा' धर्मिद्वारेण समुदायबाधायाः संग्रहार्थं स्वधर्मिग्रहणं यदि न क्रियते 'तदैवम्विधः' साध्यत्वेनैवेष्टो 'धर्मः' साध्य 'इत्यभिधानतः' । 'त'स्यं धर्ममात्रस्यैव 'बाधां मन्येत' प्रतिपत्ता न तु धर्मिबाधामपि । ततः (।) उभयसंग्रहार्थं 'स्वधर्मि'ग्रहणमा चा र्य स्य ॥ (१३९)

....4.140 नन्वेतदप्यर्थसिद्धं सत्यं केचित्तु धर्मिणः ।
केवलस्योपरोधेपि दोषवत्तामुपागताः ॥ १४० ॥

[461/s]

'नन्वे'तदुभयसंग्रहण'मप्यर्थतः' [2284] सामर्थ्यतः 'सिद्धं' । न हि केवलो धर्मोस्ति क्वचित् । तद्बाधने तद्विशिष्टस्य 'धर्मिणो'पि बाधनात् समुदायबाधैवैषितव्या । सा च धर्मिद्वारेण वा भवतु धर्मद्वारेण वा न कश्चिद् विशेष इत्यर्थः ।

---

[2281] ५ वादिनेष्टस्य स्वस्य धर्मी स्वधर्मी तत्र ।

[2282] १ येन तदाशङ्कानिवृत्त्यर्थः स्यात् ।

[2283] २ तन्न साध्यस्यैव बाधायां बाधा किन्तु धर्मिणोपि ।

[2284] १ साक्षाद् धर्मिद्वारेण चेत्यविशेषात् ।

अत्राह सत्यमेतत् 'केचित्तु' वादिनो [2285] 'धर्मिणोः केवलस्योपरोधे साध्य-' धर्मस्याबाधायामपि पक्षस्य 'दोषवत्तामुपागताः' प्रतिपन्नाः । (१४०)

....1.141 यथा परैरनुत्पाद्यापूर्व्वरूपन्न खादिकम् ।
सकृच्छब्दाद्यहेतुत्वादित्युक्ते प्राह दूषकः ॥ १४१ ॥

'यथा परैः' सहकारि[2286] भिर'नुत्पाद्यापूर्व्वरूपं[2287] न खादिक'माकाशदिक्कालादि न भवति । अपि तूत्पाद्यपूर्व्वरूपमेव भवति । सकृदेककालन्तदुत्पाद्यस्य[2288] कार्यकालपस्य 'शब्दादेरहेतुत्वाद'विशिष्टैकरूपात् कारणात् सकृत् सर्व्वकार्योत्पत्तिप्रसङ्गा'दिति' वादि'नोक्ते' 'दूषकः' प्रतिवाद्याह[2289] । (१४१)

....4.142 तद्वद् वस्तुस्वभावोऽसन् धर्मी व्योमादिरित्यपि ।
नैवमिष्टस्य साध्यस्य बाधा काचन विद्यते ॥ १४२ ॥

'तद्वद्य'थानुत्पाद्यापूर्व्वरूप आकाशादिर्न भवति ।[2290] तथा वस्तु'स्वभावो धर्मी व्योमादिरसन्नित्यपि' स्यात् । अर्थक्रियाऽसमर्थस्य वस्तुत्वाभावादिति धर्मिणः केवलस्य बाधनं न धर्मस्य । 'एवं' धर्मिबाधनेपी'ष्टस्य साध्यस्य काचन बाधा न विद्यते' । हेतोर्व्वाऽसिद्धिः । असत्यपि कार्यानुत्पादस्य व्यवच्छेदस्य सिद्धेः । (१४२)
ततः (।)
[462/s]

....4.143 द्वयस्यापि हि साध्यत्वे साध्यधर्मोपरोधि यत् ।
बाधनं धर्मिणस्तत्र बाधेत्येतेन वर्णितम् ॥ १४३ ॥

'द्वयस्य' धर्मिधर्मसमुदायस्यापि हि 'साध्यत्वे' सति यत्र 'धर्मिणो बाधनं साध्यधर्मोपरोधि' तत्र पक्ष'बाधा' युक्तेत्ये'तेन' स्वधर्मिग्रहणेन 'वर्णितं' । न हि साध्यधर्ममात्रसाधनार्थं कश्चित् साधनमन्वेषते । तस्य जगति क्वचित् सत्तायां विवादाभावात् । तथा निश्चये प्रवृत्त्ययोगाच्च । किन्तु धर्मिविशेषनिष्ठं साध्यमिष्टं ॥ (१४३)

...4.144a तथैव धर्मिणोप्यत्र साध्यत्वात् केवलस्य न ।
यद्येवमत्र बाधा स्यात्;

तत्र यथा धर्मिविशिष्टस्य साध्यत्वं धर्मस्य 'तथैव' साध्यत्वविशिष्टत्वेन 'धर्मिणोपि साध्यत्वात् केवलस्य' धर्मस्य न क्वचित् साध्यता । ततो न केवलस्य धर्मिणो बाधने पक्षबाधा ॥ 'यदि' साध्यधर्मोपरोधिनि धर्मिणि बाधिते पक्षबाधेष्यते (।) 'एवं' सत्यत्र हेतौ सां ख्यं प्रति बौद्धेनोक्ते धर्मिबाधाद्वारेण धर्म'बाधा स्यात्' ।

...4.144b नान्यानुत्पाद्यशक्तिकः ॥ १४४ ॥

---

[2285] २ यत्र धर्मिबाधेपि साध्यस्य न क्षतिः तत्रापि दोषः ।

[2286] ३ वे शे षि (कं) प्रति सौ त्रा न्ति केन ।

[2287] ४ न क्षतस्वभावमिति साध्यं धर्मी ।

[2288] ५ शब्दहेतुराकाशं तद् यदि नित्य एकदोत्पत्तिप्रसङ्गः सदा सन्निधानात् हेतोः ।

[2289] ६ विरुद्धतां ।

[2290] ७ वस्तुस्वभाव आकाशादिर्द्धर्मो न वेति विवक्षामनङ्गीकृत्याकाशसत्त्ववादिना सौ त्रा न्ति के न सामान्येन प्रकृते आकाशादौ स्थिररूपत्वधर्मव्यवच्छेदमात्रे साध्ये युगपद्धेतुत्वव्यवच्छेदरूपे हेतौ यद्याह परः वस्तुभूताकाशाभावं । तादृशे निराकृतेपि नैवेष्टस्य व्यवच्छेदमात्रस्य बाधा प्रज्ञप्तिमति धर्मिणि व्यवच्छेद मात्रस्याव्याघातात् ।

....4.145 सकृच्छब्दाद्यहेतुत्वात् सुखादिरिति पूर्ववत् ।
विरोधिता भवेदत्र हेतुरैकान्तिको यदि ॥ १४५ ॥

तद्यथा 'सुखादिः' सुखदुःखमोहात्मकं 'प्रधानं नान्येन' सहाकारिणाऽ'नुत्पाद्यशक्तिकोऽ'नाधेयसामर्थ्यः 'सकृच्छब्दा'दीनां कार्याणामहे'हेतुत्वा'दिति । 'अत्र पूर्ववत्' परैरनुत्पाद्येत्यादिप्रयोगत्वाच्च । सुखाद्यात्मकस्य नित्यत्वस्य बाधनात् सुखादौ धर्म्मिणि बाधिते तद्धर्म्मस्य नित्यत्वस्य विरोधने विपर्ययसाधने बाधा स्यात् ।[2291] अनित्यस्वभावो हि सुखादिः साधयितुमिष्टः । सुखादिस्वभावभूतनित्यत्वबाधने च सुखादिरेव बाधित इति धर्मोपरोधिनि धर्मिणि बाधिते पक्षबाधा स्यात् । अत्राह । 'भवेदत्र' हेतौ पक्षबाधा । 'यदि' न सकृच्छब्दाद्य[2292] नुत्पादादिति[93b/MA] 'हेतुः' साध्यस्य । वस्तुभूतसुखाद्यनित्यत्वस्य । विपर्यये सुखादिधर्म्यभावादनि- त्यत्वाभावे'नैकान्तिको'ऽव्यभिचारी भवेत् । (१४४,१४५)

यावता या च (।)

[463/s]

....4.146 क्रमक्रियाऽनित्यतयोरविरोधाद् विपक्षत्तः ।
व्यावृत्तेः संशयान्नायं शेषवद् भेद इष्यते ॥ १४६ ॥

'क्रमक्रिया' हेतुः । या च साध्य'ऽनित्यता तयोरविरोधात्' । अव'स्तुभूत' ('धर्मि') सुखादिधर्मानित्यत्वे विपरीते साध्ये वस्तुभूतसुखादिधर्मानित्यत्वं 'विपक्षस्ततो' हेतोः क्रमकरण'व्यावृत्तेः संशयान्नायं' विरुद्धो [2293] हेतुः । 'शेषवद् भेदोऽ'नैकान्तिकविशेष'स्त्विष्यते' । सति च विरुद्धत्वे धर्मिबाधाद्वारेण धर्मबाधा स्यात् । (१४६)

## (३) धर्मिस्वरूपनिरासः

....4.147 स्वयमिष्टो यतो धर्मः साध्यस्तस्मात् तदाश्रयः ।
बाध्यो न केवलो नान्यसंश्रयो वेति सूचितम् ॥ १४७ ॥

'यतः' कारणात् 'स्वय'म्वादि'नेष्टो धर्मः साध्यस्तस्मात्' साध्यधर्मसा'श्रयः' यः स एव बाध्यः 'केवलो न बाध्यः' । यथा वस्तुभूताकाशबाधायामपि नित्यैकरूपत्वाभावस्य साध्यधर्मस्य न क्षतिः । साध्यधर्मा'दन्य'स्य च धर्मस्या'श्रयो न बाध्य इति' स्वयंशब्देन 'सूचितं' । यथाऽनित्यत्वे साध्ये शब्दे आकाशगुणत्वा'श्रयत्वेन' बाधायामपि न दोषः । (१४७)

तस्मात् (।)

....4.148 स्वयंश्रुत्यान्यधर्माणां बाधाऽबाधेति कथ्यते ।
तथा स्वधर्मिणान्यस्य धर्मिणोपीति कथ्यते ॥ १४८ ॥

'स्वयंश्रुत्या' साध्याद् धर्मादन्येषां 'धर्माणां' यथा 'बाधा' या सा ऽ'बाधेति कथ्यते । तथा स्वधर्मिणा' स्वधर्मिवचनेन साध्या'दन्यस्य' धर्मस्य 'धर्मिणो' बाधाऽ'बाधेति' कथ्यते ॥ (१४८)

---

2291 १ सामर्थ्यादन्याभावात् ।

2292 २ आदिना स्पर्शरूपरसगन्धग्रहः ।

2293 १ धर्मोपरोधाद् विरुद्धः सांख्यस्याचार्यविरुद्धत्वं नेह ।

## 4.5 ५---पक्षदोषाः

(१) हेतुनिरपेक्षः पक्षदोषः

तथाऽपरेपि पक्षाभासाः सन्ति ते कस्मान्नोच्यन्ते । तथा ह्यप्रसिद्धविशेष्यः कश्चित् पक्षो यथा[2294] विभुरात्मा । [2295] आत्मन एव बौद्ध स्यासिद्धत्वात् । कश्चिद्[464/s] -प्रसिद्धविशेषणः । यथा विनाशी शब्दः ॥ सां ख्यं प्रमाणं[2296] प्रति तस्य विनाशासिद्धेः । कश्चिदप्रसिद्धोभयः (।) यथा समवायिकारणमात्मा । बौद्धस्योभयासिद्धेरिति ॥

नन्वसिद्धोप्यात्मा पक्षी भविष्यति तल्लक्षणयोगात् (।) नह्यसिद्धस्य पक्षता निरस्ता । आश्रयासिद्धत्वाद्धेतोर्न पक्ष इति चेत् । न ।[2297]

साधनदोषोयं न पक्षदोषः । तथा शब्देऽनित्यत्वं विषेशणमसिद्धमिति गुण एवायं न पक्षदोषः । असिद्धस्यैव साध्यत्वात् । अथ विपर्ययसिद्ध्याऽसिद्धमुच्यते । तथापि मूढस्य विपर्ययसिद्धावपि नायं पक्षदोषः । विरोधो नाम हेतुदोष ए- वायं । प्रमाणेन च विपर्ययसिद्धौ प्रमाणबाधितत्वमेव पक्षदोषोस्तु । अलमप्रसिद्धविशेषणत्वाभिधानेन । अप्रसिद्धोभयस्य तूभयदोषाच्च सर्व्वेऽमी हेतुदोषा एवेति किं पक्षदोषा वक्तव्याः । अथ (।)

....4.149 सर्वसाधनदोषेण पक्ष एवोपरुध्यते ।
तथापि पक्षदोषत्वं प्रतिज्ञामात्रभाविनः ॥ १४९ ॥

'सर्व्वेण साधन'स्य 'दोषे'णासिद्धत्वादिना 'पक्ष एवोपरुध्यते' तेन पक्षदोषा असिद्धविशेष्यादयोऽभिधीयन्ते । यद्यपि पक्षोपरोधफलाः सर्व्वे दोषास्त'थापि प्रतिज्ञामा'त्रेण [2298] भवनशीलस्य दोषस्य 'पक्षवोषत्वमु'क्तमिष्टं । (१४९)

यस्मात् साक्षात् (।)

....4.150 उत्तरावयवापेक्षो यो दोषः सोनुबध्यते ।
तेनेयुक्तमतोऽपक्षदोषोऽसिद्धाश्रयादिकः ॥ १५० ॥

'उत्तरोऽवयवो' हेतुदृष्टान्तादिस्तद'पेक्षो यो दोषः स तेन' हेत्वादिनानु'बध्यते' । आत्मनि सम्बध्यते 'इत्युक्तं' प्राक् । उत्तरावयवापेक्षो न दोषः पक्ष इष्यत इत्या'दिना । अतोऽसिद्धाश्रयादिक' आश्रयासिद्धत्वादिरुत्तरावयवापेक्षो 'न पक्षदोषो मतः' ॥ (१५०)

नन्वश्रावणः शब्दो नित्यो घटः । नानुमानं प्रमाणं (।) अचन्द्रः शशीत्युदाहरणैरेभिर्द्धर्मस्वरूप[2299] निराकरणेन बाधा दर्शिता यथा-प्रतिज्ञातधर्ममात्रस्य विपरीतधर्मोपस्थापनेन निराकरणात् । धर्मिविशेषस्य धर्मविशेषस्य धर्मिस्वरूपस्य च बाधनेन पक्षबाधास्ति [2300] सा कथमवगन्तव्येत्याह ।

[465/s]

....4.151 धर्मिधर्मविशेषाणां स्वरूपस्य च धर्म्मिणः ।

[2294] २ वैशेषिकस्य ।
[2295] ३ सिद्धान्ती सति धर्मिणि धर्माश्चिन्त्यन्ते ।
[2296] १ बौद्धस्य ।
[2297] २ अत्राह सिद्धान्ती ।
[2298] ३ नोत्तरत्वेत्यादिदोषेण ।
[2299] ४ नित्यो घट इति प्रतिज्ञायां नित्यत्वस्य बाधितत्वात् ।
[2300] ५ अव्याख्याता स मु च्च ये ।

बाधा साध्याङ्गभूतानामनेनैवोपदर्शिता ॥ १५१ ॥

'धर्मिधर्म'यो'र्व्विशेषाणां' व्यक्तिभेदापेक्षया बहुवचनं । 'धर्मिणः स्वरूपस्य च' सर्व्वेषामेषा-'साध्यं' प्रत्य'ङ्गभूतानां बाधा । अनेनैव' धर्मस्वरूपनिराकरणपरेणो-[94a/MA] दाहरणेन साध्यते । पक्षलक्षणत्वाद्बाधो'पदर्शिता' (।) (१५१)

## (२) वा/?/क्यविनिरास

....4.152 तत्रोदाहृतिदिङ् मात्रमुच्यतेऽर्थस्य दृष्टये ।
द्रव्यलक्षणयुक्तोन्यः संयोगेर्थोस्ति दृष्टिभाक् ॥ १५२ ॥

[2301] 'तत्रा'श्रावणः शब्द इत्यादिषू'दाहरणदिङमात्रमुच्यते' । साध्याङगभू[2302] तस्य सर्व्वस्यैव बाधा भवतीत्य'र्थस्य दृष्टये' दर्शनार्थ । तत्र परस्यावयवेभ्योऽवयविनो गुरुत्वादिगुणयोगिनोऽन्यत्वेऽभिमते यदोच्यते नान्योऽवयव्यवयवेभ्यस्तुलानतिविशेषाग्रहणादिति (।) एतद्धर्मविशेषनिराकरणेनोदाहरणं बोद्धव्यं । तथाहि नात्रान्यत्वमात्रं निषेद्धुमिष्टं । तथात्वे धर्मस्वरूपनिराकरणोदाहरणमेतत् स्यात् । तस्मादन्यत्वस्य साध्यधर्मस्य नान्तरीयका गौरवादयो विशेषा निराकर्त्तुमिष्टाः । तथा च धर्मविशेषोदाहरणमेव तत् । तथाहि परैरेकस्यावयवस्यान्यान्यावयव'संयोगे' सति तदन्योऽर्थोऽवयविसंज्ञितो 'द्रव्यस्य लक्ष'णेन क्रियावद् 'गुणवत्समवायिकारणत्वे' त्यनेन युक्तो 'दृष्टिभाक्' दृश्योस्तीतीष्टमेव । (१५२)

अन्यथा (।)

....4.153 अदृश्यस्या विशिष्टस्य प्रतिज्ञा निष्प्रयोजना ।
इष्टो ह्यवयवी कार्यं दृष्ट्वाऽदृश्येष्वसम्भवि ॥ १५३ ॥

'अदृश्यस्य' संव्यवहाराविषयस्य द्रव्यलक्षणेन 'विशिष्ट'सामान्यमात्रस्यास्तित्व'प्रतिज्ञा-निष्प्रयोजना' भवेत् । तथा हि परमाणुष्वदृश्येष्वदर्शनावरणप्रतिघातादि'कार्यमसंभवि' दृष्ट्वा-ऽ'वयवी चेष्टः[2303]' । तस्मिन् दर्शनादिकार्ययोगात् । (१५३)

....4.154 अविशिष्टस्य चान्यस्य साधने सिद्धसाधनम् ।
गुरुत्वाधोगती स्यातां यद्यस्य स्यात् तुलानतिः ॥ १५४ ॥

[466/s]

यदि पुनरनिन्द्रियग्राह्यत्वं द्रव्यलक्षणेनाविशिष्टन्तदवयवि द्रव्यं साध्यते तदा'ऽविशिष्ट'स्यान्यस्य च 'साधने' बौद्धस्य न काचित् क्षतिरिति 'सिद्धसाधनं' स्यात् । तस्माद् दृश्यो द्रव्यगुणवान् भावोऽवयवीति साध्यं । ततश्चास्यावयविनो 'गुरुत्वं गुणोऽधोगतिश्च कर्म यदि स्यातां' तदा मृदादिखण्डयोः सहतोलितयोर्यावती 'तुलानति'गौरववशाद् दृष्टा ततोधिकातुलानतिः स्यात् । यदा तयोर्मृदादिखण्डयोः संयोगे सति द्रव्यान्तरमुत्पद्य ते तदा तयोः पूर्व्वावस्थितयोः पूर्व्वावस्थितं गौरवं तदोत्पन्नस्य च द्रव्यस्याधिकगौरवविशेषात् तुलानतिविशषो दृश्येत[2304] । न चैवं तस्मान्न तत्र कार्यद्रव्यसम्भव इत्यवयवी निर्गुणो निष्क्रियश्च स्यात् (।१५४)

---

2301 १ यद्येवमिदमेवोदाहरणमस्तु किमर्थं नान्याऽव(य)व्यवयवेभ्य इत्यादिकमा चा र्ये णो क्तमित्याह ।

2302 २ नान्तरीयकस्य ।

2303 ३ वैशेषिकेण ।

2304 १ परमाणवोऽदृश्या नोदकाहरणक्षमा अतोवयवी वै शे षि कस्वीकृतः । स धर्मी अन्यत्वं साध्यं तत्र नान्योवयवीत्युक्तं मृत्पिण्डयोस्तोल्ययोस्तृतीयक्षेपे गौरवान्यत्ववत् तृतीयावयविनि नेति ।

....4.155 तन्निर्गुणक्रियस्तस्मात् समवायि न कारणम् ।
तत एव न दृश्योसावदृष्टेः कार्यरूपयोः ॥ १५५ ॥

'तस्मान्निर्गुण'क्रियत्वात् गुणकर्मणोर्न 'समवायि कारण'मवयवी । 'तत एव' द्रव्यलक्षणयोगान्न तस्यावरणादि 'कार्यं स्वरूप'म्वा किञ्चित् दृश्यते (।) अदर्श'नाच्च न' दृश्योऽवयवी (। १५५)

...4.156a [तद्बाधान्यविशेषस्य नान्तरीयकभाविनः ।

'तत्' तस्मादसाववयविनो 'बाधाऽन्य'स्य [2305] 'विशेष'स्य गौरवाधोगत्यादे'र्नान्तरीयकभाविनः' साध्या[2306] न्यत्वाविनाभाविनः । बाधेति धर्मविशेषनिराकरणे निर्देशो युक्तः ।

...4.156b आसूक्ष्माद् द्रव्यमालायास्तोल्यत्वादंशुपातवत् ॥ १५६ ॥

...4.157a द्रव्यान्तरगुरुत्वस्य गतिर्नेत्यपरोऽब्रवीत् ।

'आसूक्ष्माद्' द्व्यणुका[2307] दारभ्य 'द्रव्यमालायाः' स्थूलावयविपर्यन्तायास्तो'ल्यत्वा'त् तद्द्रव्यमालावर्त्तिनः स्थूलस्य 'द्रव्यान्तर'स्य 'न गति'र्भवति । तुलाया'मंशुपातवत्' । कर्पासभारपतितस्यांशोरेकस्य यथा गुरुत्वं सदपि न प्रतीयते (।) तथा द्रव्यमालावर्त्तिनः स्थूलद्रव्यस्य 'इत्यपरो[2308] ऽब्रवीत्' ।
[467/s]

...4.157b तस्य क्रमेण संयुक्ते पांशुराशौ सकृद् युते ॥ १५७ ॥

....4.158 भेदः स्याद् गौरवे तस्मात् पृथक् सह च तोलिते ।
सुवर्णमाषकादीनां संख्यासाम्यं न युज्यते ॥ १५८ ॥

'तस्यै'वंवादिनो मते 'क्रमेण' सूक्ष्मावयवसंयोगाभिवृद्धिपरिपाट्या 'संयुक्ते' स्थूलावयवितां गते 'पांशुराशा'ववयवसंयोगाभिवृद्धिक्रममनपेक्ष्य 'सकृदे'ककालं 'युक्ते' स्थूलावयवितां 'गते भेदो गौरवे स्यात्' । तथा हि द्व्यणुकादिक्रमेण कार्यद्रव्यसंयोगपरंपरया च द्रव्यमुत्पद्यते । तत्रानेकद्रव्यभारसद्भावात् महद्गौरवं भवेत् । यत्र त्वेक एव सकृत् पांशुराशिः संयोगाज्जायते तत्रैकस्य द्रव्यस्याल्पीयो गौरवं भवति न चास्त्येतत् । किञ्च (।) 'तस्माद्' गौरवभेदात् 'पृथक्' प्रत्येकं माषकादौ 'तोलिते' पिण्डावस्थयोः 'सह चा'परैर्मास (? ष) कादिभिस्तोलिते सुवर्ण्णमास-[94b/MA] कादिभिन्नायाः संख्यायाः 'साम्यं [2309] न युज्यते' (।) मासकावयविनां विनाशे तत्संख्यानां गौरवाणां च नाशादेकं सुवर्ण्णमित्येव स्यात् । दृश्यते च प्रत्येकं माषकादीनां तुलायां यावती संख्या तावत्येव सहतोलितानामपि ॥ (१५७, १५८)

....4.159 सर्षपादामहाराशेरुत्तरोत्तरवृद्धिमत् ।
गौरवं कार्यमालाया यदि नैवोपलभ्यते ॥ १५९ ॥

[2305] २ कीदृशस्येत्याह ।
[2306] ३ यत्साध्यमन्यत्वन्तदविना ।
[2307] ४ त्र्यणुकादौ महत्वोक्तेः ।
[2308] ५ उ द्यो त क रा दिः ।
[2309] १ रक्तिकशतेऽवयविराशेः कथमेकावयविना साम्यं । एकानेकपलपिण्डवत् ।

अथ[2310] रक्तिकायाश्चतुर्थो भागः 'सर्षप'स्तस्मादारभ्य 'आमहाराशेः' स्थूलावयविनं यावत् क्रमवृद्धिमतां 'का1र्याणां मालाया उत्तरोत्तरवृद्धिमद् गौरवं सदपि' नोपलभ्यत इति यदुच्यते (। १५९) तदा (।)

....4.160 आसर्षपाद् गौरवन्तु दुर्लक्षतमनल्पकम् ।
तोल्यं तत्कारणं कार्यगौरवानुपलक्षणात् ॥ १६० ॥

'आसर्षपात्' सर्षपादारभ्य द्व्यणुकं यावत् पूर्व्वं पूर्व्वं 'गौरवं' तत् 'दुर्लक्षतमनल्पकमिति' सुतरामनुपलभ्यं स्यात् । सर्षपादुत्तरन्तु गौरवं स्वयमेव दुर्लक्षमिष्टमिति कार्यद्रव्यगौरवानुपलक्षणात् तस्य कार्यद्रव्यस्य 'कारणं' परमाणवः पारिशेष्यात् 'तोल्यं' स्यात् । न च परमाणूनां[2311] गुरुत्वादिगुणोपलम्भोस्ति 'तदनुपलक्षणेन' च नावयविनः परमाणूनाम्वोपलम्भोस्तीति सर्व्वथार्थानामप्रतिपतिः स्यात् । (१६०)

...4.161a नन्वदृष्टोंऽशुवत् सोर्थो न च तत्कार्यमीक्ष्यते ।

[468/s]

'ननु' गुरुत्वाप्रतीतावपि अंशुः प्रतीयते तद्वदवयव्यादिकमपि प्रत्येष्यत इत्याह । न च गुरुत्वानुपलक्षणे'प्यंशु'रिव 'सोऽर्थो'ऽवयव्यादिरीक्ष्यते । 'न च तत्कार्यं' गौरवा'वरणादिरीक्ष्यते' । तस्मादप्रत्यक्षतैव सर्व्वथा स्यात् ।

किञ्च (।)

...4.161b गुरुत्वागतिवत् सर्वतद्गुणानुपलक्षाणात् ॥ १६१ ॥

...4.162a माषकादेरनाधिक्यम्;

'गुरुत्वा'दिगुणा'गतिवत् सर्व्वे'षां रूपादीनामधिकानां तस्य द्रव्यस्य 'गुणाना'म'नुपलक्षणाद'वयवेभ्यो 'भाषकादे'रवयविनोर'नाधिक्यं' । यदि ह्यवयवेभ्योधिकं तदा गुरुत्वादिवत् रूपादिवत् अवयवेषु वर्द्धमानेषु वर्द्धमानं दृश्येत । (१६१)

ननु तुलानतिविशेषाग्रहणादित्युक्तमा चा र्येण तत्किं रूपादिग्रहणाभाव उच्यत इत्याह ।

...4.162b अनतिः सोपलक्षणम् ।
यथास्वमक्षेणादृष्टे रूपादावधिकाधिके ॥ १६२ ॥

'अनति'राचार्येण या निर्द्दिष्टा 'सोपलक्षण'मात्रं न तु नियमः । अनतिः क्वोपलक्षणमित्याह । 'रूपादौ' द्रव्याभिवृद्ध्या'ऽधिकाधिके यथास्वं' यस्य यदात्मीयं ग्राहकं 'तेनाक्षेणे'न्द्रियज्ञानेना'दृष्टेः' [2312] । यद्रूपादिविषयं यदिन्द्रियप्रत्यक्षं तदेव तस्य धर्मिविशेषस्य पक्षबाधकमित्यर्थः । तस्माद् गुणक्रियावत् दृश्यावयव्यभाव एवेति धर्मविशेषवाग्द्वारेणोदाहरणमुक्तं । (१६२)

....4.163 अभ्युपायस्ववागाद्यबाधायाः संभवेन तु ।
उदाहरणमप्यन्यद्दिशा गम्यं यथोक्तया ॥ १६३ ॥

'अभ्युपायो'ऽभ्युपगमः 'स्ववागादि[2313]'र्यस्य तेना'बाधायाः संभवेन त्व'न्यदप्युदाहरणं । धर्मिविशेषनिराकरणेन धर्मिस्वरूपनिराकरणेन 'यथोक्तया'ऽनयोदा'हरणदिशा गम्यं' ॥ (१६३)

तत्र [2314] परेणावयविनः सकाशादवयवानामन्यत्वे प्रतिज्ञाते यदुच्यते (।) नान्येऽवयवा अवयविनः अप्रत्यक्षत्वप्रसङ्गा[2315]दिति । तद्धर्मिविशेषनिराकरणो[469/s] दाहरणं । तथा ह्यवयवा-

[2310] २ मा भूत् संख्यावैषम्यमिति ।

[2311] ३ तदनुपलम्भादेवावयविकल्पनात् ।

[2312] १ अनुपलब्धिसाधनमुक्तं ।

[2313] २ आदिना प्रत्यक्षानुमानप्रतीतिसंभवग्रहः ।

नां भेदमिच्छन् प्रत्यक्षतामपीच्छति । अन्यत्वे च निराकृते प्रत्यक्षतायाश्च निरासात् । अवयवानां धर्मिविशेषनिराकरणोदाहरणत्वं व्यक्तं । अभ्युपगम एव चात्र बाधकः । अवयवादर्शने द्रव्यादर्शनस्वीकारात् ॥ गुणव्यतिरिक्तं द्रव्यमस्तीति परेणोक्ते यदोच्यते 'नास्ति द्रव्यं गुणद्रव्याणां द्रव्या-' द्रव्यत्वप्रस[2316] ङ्गात् । तद्धर्मिस्वरूपनिराकरणोदाहरणं (।)

[2317] तथाहि धर्मिण एव द्रव्यस्य स्वरूपमात्रं निराक्रियते (।) गुणद्रव्याणाम[95a/MA]न्योन्यं भेदः (स्वीकृतः) गुणोपि द्रव्यं स्यात् । द्रव्यश्च गुणः । भेदाविशेषादित्यभ्युपायस्य बाधकत्वं ।

## (३) नेयायिकपक्षलक्षणे दोषः

ननु [2318] साध्य[2319] निर्देशः प्रतिज्ञेति पक्षलक्षणं नै या यि का नां तत्र को दोषः । असिद्धहेतुदृष्टान्तस्यापि पक्षत्वप्रसङ्ग इत्युक्तं । ननु साध्यत इति साध्यं । हेतुदृष्टान्तौ तु साधयिष्यते ततो नानयोः पक्षत्वप्रसङ्ग इत्याह ।

....4.164 त्रिकालविषयत्वात्तु कृत्यानामतथात्मकम् ।
तथा परं प्रति न्यस्तं साध्यं नेष्टं तदापि तत् ॥ १६४ ॥

कृत्यानां प्रत्ययानां कालसामान्यविहितत्वेन 'त्रिकालविषयत्वात् साध्य'शब्देन 'कृत्या'न्तेन न साध्यमात्रस्य ग्रहणं साधयिष्यमाणस्यापि ग्रहणात् । तथा च नित्यः शब्दो मूर्तत्वात् बुद्धिवदित्या[2320] दि प्रयोगे तदा वाद[2321] काले तद्धेतुदृष्टान्तादिकम'तथात्मकं' वस्तु[2322]तोऽतत्स्वभावात्मकं (।) 'परं प्रति तथा'ऽतद्रूपत्वेन 'न्यस्त'[470/s] 'मुपन्यस्तं' वादिना यत्नतः 'साध्यं' । यद्यपि शब्दे मूर्त्तत्वं नास्ति ('अनिष्ट'श्च साध्यत्वेन) तथापि हेतुदृष्टान्तयोरुपन्यासादवश्यं साध्यं । साध्यनिर्देशश्च प्रतिज्ञेति प्रतिज्ञात्वञ्च दुर्वारं । (१६४)

## (साध्यशब्दचिन्ता)

....4.165 प्रत्यायनाधिकारे तु सर्वासिद्धावरोधिनी ।
यस्मात् साध्यश्रुतिर्नेष्टं विशेषमवलम्बते ॥ १६५ ॥

2314 ३ तदाचार्योक्तमाह ।

2315 ४ अवयवा धर्मिणः अन्यत्वं साध्यं परेण तन्मध्ये केषाञ्चित् प्रत्यक्षत्वविशेषोभिमतस्तेन । स चान्यत्वेनुपपन्नं तस्य भेदेनाभासनात् । यद्भेदेन यतो न भाति न स्वप्रत्यक्षो । यथा प्रथमस्यामहतोवयविनोऽवयवाः । न भान्ति चान्यस्याप्यवयविनोऽवयवाभेदेनेति व्यापकाभावः ।

2316 १ द्रव्यं पृथिव्यादि गुणो गुरुत्वादि ।

2317 २ सत्तायोगात् क ण भु जो द्रव्यादित्रयं सत् । पदार्थसत्करी सत्तेति वचनात् । अतो गुणानामपि द्रव्यतापत्तिः । दृष्टस्थितसत्वेन सम्बन्धात् । यद् द्रव्यसमवायिस्वभावं सत्त्वं तन्न गुण इति एकत्वहानिः सा च नेष्टेति गुणेपि द्रव्यस्थितरूपस्यैव वृत्तिरिति द्रव्यत्वप्रसङ्गः इति दृष्टान्तसूचनं । यत् सत्तावन्न तद् द्रव्यं यथा गुणः । सत्तावच्च द्रव्यमिति विरुद्धव्याप्तेन धर्मिस्वरूपनिकारणात् प्रतिज्ञादोष एवं गुणेपि योज्यं ।

2318 ३ व्याख्येयान्तर्गतत्वेन परमतमाह ।

2319 ४ सिद्धहेत्वादिनिवृत्त्यर्थः ।

2320 ५ सिद्धहेत्वादिनिवृत्त्यर्थं ।

2321 ६ नित्यत्वसाधक ।

2322 ७ नित्ये साध्येऽनित्यं ।

‘प्रत्यायन’स्य ज्ञापकस्य हेतो‘रधिकारे तु’ साधनस्य ‘सर्व्व’स्याभ्युपगमहेतुदृष्टान्तादे‘रसिद्धावरोधः’ संग्रहः (।) तद्वती यस्मात् ‘साध्यश्रुतिरिष्टं विशेषं न’ साध्य‘त्वेनावलम्बते’ परिगृह्णाति ॥ (१६५)

येन प्रत्यायनाधिकारे[2323] साधनस्यासिद्धस्य पक्षत्वप्रसङ्गः (।)

....4.166 तेनाप्रसिद्धदृष्टान्तहेतूदाहरणं कृतम् ।
अन्यथा शशश्रृङ्गादौ सर्वासिद्धेऽपि साध्यता ॥ १६६ ॥

‘तेनाप्रसिद्धाभ्यां दृष्टान्तहेतु’भ्यां प्रतिज्ञाप्रसङ्गादुदाहरणं कृतं प्राक् । तथा चासिद्धदृष्टान्तहेतुवादः प्रसज्यत इत्यनेन । ‘अन्यथा’ यदि साधनमसिद्धं विवक्षितं न स्यात् तदा ‘शशश्रृङ्गादा’वपि ‘सर्वस्यासिद्ध’स्य पक्षत्वप्रसङ्गः ॥ (१६६)

ननु साध्यं कर्म (।) कर्मणि कृत्यविधानात् । कर्म चेप्सिततमं (।) तच्च क्रियाप्यमात्रं पयसोदनं भुक्तं इत्यत्र क्रियाप्यत्वेप्यनीप्सिततमत्वात् पयः करणं । ततः साधनीयत्वेपि वादिनोऽनीप्सिततमत्वात् हेतुदृष्टान्तादिकं न प्रतिज्ञा भविष्यति । तथा [2324] चतुर्व्विधः सिद्धान्तः [2325] । सर्व्वतन्त्रसिद्धान्तः । [2326] प्रतितन्त्रसिद्धान्तः । अधिकरणसिद्धान्तः । अभ्युपगमसिद्धान्तश्च । तत्राभ्युपगमसिद्धान्तत्वं[2327] शास्त्रदृष्टस्येति । तदाश्रयेण साध्यस्य निर्देशः प्रतिज्ञा न हेतुदृष्टान्तादेः पक्षत्वप्रसङ्ग इत्याह ।

[471/s]

....4.167 सर्वस्य चाप्रसिद्धत्वात् कथञ्चित् तेन न क्षमाः ।
कर्मादिभेदोपक्षेपपरिहाराविवेचने ॥ १६७ ॥

‘सर्व्वस्य’ प्रतिज्ञाहेतुदृष्टान्तादे‘श्चाप्रसिद्धत्वात्’ । साधयितुमीप्सिततमत्वेनाभ्युपगमात् कर्मत्वं (।) कर्म च साध्यं प्रतिज्ञेति प्रतिज्ञात्वप्रसङ्गो दुर्व्वारः । अभ्युपगमश्च यथा नित्यत्वे तथा मूर्त्तत्त्वादावपि शास्त्राभ्युपगमयोश्च भेदः प्रागुक्तस्तेन कर्मत्वाविशेषेण साध्यं कर्म साधनं करणमिति ‘कर्मादिभेदस्योपक्षेपेणोपन्यासेन परिहाराविवेचने’ साध्यविशेषावगमापने कथ‘ञ्चिन्न क्षमाः’ । (१६७)

यद्यप्युच्यते यः साध्योऽवयवः [2328] तस्य निर्देशः प्रतिज्ञा । ततो हेत्वादेः सिद्धस्यावयवस्य न प्रतिज्ञात्वमिति । तदप्यसत् [2329] ।

किञ्च

....4.168 प्रागसिद्धस्वभावत्वात् साध्योवयव इत्यसत् ।
तुल्या सिद्धान्तता ते हि येनोपगमलक्षणाः ॥ १६८ ॥

लक्षणवचनात् ‘प्राक्’ साध्यासाध्ययो‘रसिद्धस्वभावत्वात्’ । लक्षणेन हि साध्यताप्रतिपत्तव्या त्रिकालविषयत्वात् (।) कृत्यप्रत्ययस्य साधयिष्यमाणेपि साध्य इति (।) साधनं च साध्यं स्यात् । ‘सिद्धान्तता’ हेतुदृष्टान्तादेरपि ‘तुल्या । ते हि’ प्रतितन्त्रादि‘सिद्धान्ता

[2323] १ यदि साध्य इति सामान्यशब्दः किमिति हेतुदृष्टान्त एव सर्व्वमसिद्धमस्तीत्याह ।

[2324] २ द्वितीयः सन्ति प्रमाणानि प्रमेयार्थानि सर्व्वसंमत्या ।

[2325] ३ यथा स्वं नित्यमनित्यम्वा ।

[2326] ४ यत् प्रसिद्धावन्यसिद्धिः सांख्यस्य वान्तराभवनिषेधे आत्मैव सञ्चरत्यशरीराऽपरीक्षिताभ्युपगमात् ।

[2327] ५ परीक्षात्मास्तित्ववत् न च तदा हेत्वादयोभ्युपगताः ।

[2328] १ प्रतिज्ञादिषु प्रक्रान्तेषु साधनविषय एव यः साध्यावयवः ।

[2329] २ तथा यदि साध्यं वस्तुत एव साधनाद्भेदेन स्यात् न चैवं ।

येन' कारणेन 'उपगमलक्षणा' अभ्युपगमस्वभावाः । यथा हि नित्यत्वमभ्युपगम्यते[2330] तथा मूर्त्तत्वादिकमपीति न विशेषः । (१६८)

किञ्च साध्यो धर्मो धर्मी द्वयम्वा स्यात् [2331] । यदि धर्मस्तदा साध्यसाधर्म्यात् [95b/MA] तद्धर्मभवीदृष्टान्त उदाहरणमिति [2332] दृष्टान्तलक्षणं विरुध्यते । न हि साध्यधर्मस्यानित्यत्वादेर्द्धर्म उत्पत्तिमत्वादिः (।) किन्तु [2333] शब्दस्य (।) ततः साध्यधर्मेण साधर्म्यात् दृष्टान्तस्य तद्धर्मभावित्वं साध्यधर्मोत्पत्तिमत्वादिभाववत्वं नास्ति ।

[472/s]अथ धर्मी साध्यः तदोदाहरणसाधर्म्यात् साध्यसाधनं हेतुरिति हेतुलक्षणं न युज्येत । न हि शब्दो धर्म्मसिद्धो येन तत्साधनात् साध्यसाधनो हेतुः स्यात् ।

अथो[2334] भयं साध्यं तदोभयपक्षभाविदोषप्रसङ्गः । समुदायस्यासिद्धत्वात् स एव साध्य इत्याह ।

....4.169 समुदायस्य साध्यत्वेप्यन्योन्यस्य विशेषणम् ।
साध्यं द्वयं तदाऽसिद्धं हेतुदृष्टान्तलक्षणम् ॥ १६९ ॥

'समुदायस्य साध्यत्वे'पीष्यमाणे'ऽन्योन्यस्य' परस्परं 'विशेषण'म्वक्तव्यं । धर्मवि[96b/MA]शिष्टो[2335] धर्मिविशिष्टो वा[2336] साध्यः । यथा शब्दविशिष्टमनित्यमिति तथाच द्वयं साध्यं स्यात् । तदा द्वयसाध्यत्वाभ्युपगमे तु हेतुदृष्टान्तयोर्लक्षणमसिद्धं स्यात् । न हि धर्मिधर्मविशिष्टेन धर्मेणानित्यशब्दसम्बन्धिना उत्पत्तिमत्वादिना घटादेः साधर्म्यमस्ति येन दृष्टान्तता भवेत् । तथा धर्मविशिष्टे धर्मिणि प्रागनुमानाद्धेतुरपि न कस्यचित् सिद्ध इति हेतुलक्षणं च न स्यात् ।

---

[2330] ३ यद्यपि तदा नाभ्युपगता सिद्धान्तता तथापि कृत्यप्रत्यनिर्देशादेवाभ्युपगन्तव्येन्तर्भावः ।

[2331] ४ अतिव्याप्तिमुक्त्वान्यदप्याह ।

[2332] ५ नैयायिकस्य ।

[2333] ६ उत्पत्तिमान् शब्दो घटश्चेति साध्यसाधर्म्यं ततः साधयितुमिष्टो धर्मस्तद्धर्मः तस्य भावः सत्ता । सोस्यास्तीति धर्मस्य धर्मान्तरासम्बन्धात् स्वरूपहानिप्रसङ्गाच्च । दृष्टान्तस्यापि तद्धर्मभावित्वं नास्ति ।

[2334] १ पृथक् पृथक् चतुर्थः समुदायपक्षो वक्ष्यमाणः ।

(१६९)
[473/s]

2335 * अत्र[[१ [आदर्शपुस्तकस्थकुण्डलीकृतो धर्मिविशिष्टो वा साध्य इत्यादि 'यदि नित्यः शब्दः सर्वस्यानित्यत्वादिति वैधर्म्यदृष्टान्तोपदर्शनमेतत्' इत्यन्तग्रन्थांशोऽत्र यथानुक्रममेवोद्धृत्य योजितः ।]]]पतितमधःपत्रपृष्टेस्ति कुण्डलीकृतं ।

[95a-1/MA]तदा[[२ १७०-१७७ कारिकाणां व्याख्यान्तरमादर्शपुस्तकस्थमधो विन्यस्तम् ।]]चासिद्धं हेतुलक्षणं धर्मिधर्मसमुदायधर्मेणोत्पत्तिमत्वादिनोदाहरणसाध र्म्याभावात् । दृष्टान्तलक्षणमप्यसिद्धं दृष्टान्ते धर्मधर्मिसमुदायेन साधर्म्याभावात् ॥

असंभवात् साध्यशब्दो धर्मिवृत्तिर्यदीष्यते ।
शास्त्रेणालं यथायोगं लोक एव प्रवर्त्तताम् ॥ १७० ॥

अथोत्पत्तिमत्वादेः समुदायधर्मत्वाभावात् साध्यशब्दो धर्मिवृत्तिरिष्यते यथा बौ द्धे नोक्त उपचारात् । तदा शास्त्रेण लक्षणेनालं किं प्रयोजनं प्रसिद्धत्वात् यथायोगं बुद्धा लोक एव प्रवर्त्ततां (।) सविकल्पकं हि ज्ञानं तस्य प्रसिद्धं । बौद्धस्तेन लोकसिद्धमनुवदति किन्तु न्यायमिति तस्य पक्षैकदेशयोग्यधर्मिणो धर्मसामान्यस्य दृष्टान्तेपि कथनार्थं जिज्ञासितविशेषो धर्मीति लक्षणं युक्तं । न च साध्यशब्दस्यासिद्धदृष्टान्तादौ प्रसङ्गात् पक्षत्वन्तूपचारात् ॥

किञ्च (।) अत्र साध्यनिर्देश एव प्रतिज्ञेति पूर्व्वावधारणन्तावन्न भवति ।

साधनाख्यानसामर्थ्यात् तदर्थे साध्यता गता ।
हेत्वादिवचनैर्व्याप्तिरनाशङ्क्यं च साधनम् ॥ १७१ ॥

यस्मात् तदर्थे सिद्धनिवृत्त्याऽसिद्धग्रहार्थे साध्यता गम्यत एव (।) सिद्धसाधनवैयर्थ्येन साधनश्चोक्तमत्रेति तत्सामर्थ्यात् ।

अपि च साध्यनिर्देश एव प्रतिज्ञेति पूर्व्वावधारणे साधनं न प्रतिज्ञेति साध्यं (।) तच्चानाशङ्क्यं तस्य हेतूदाहरणोपनयाद्यैरेव व्याप्तत्वात् (।)

पूर्व्वावधारणे तेन प्रतिज्ञालक्षणाभिधा ।
व्यर्था व्याप्तिफला सोक्तिः सामर्थ्याद् गम्यते ततः ॥ १७२ ॥

तेन पूर्व्वावधारणे प्रतिज्ञालक्षणाभिधा व्यर्था । ततः कारणात् सामर्थ्यात् साध्यनिर्देशः प्रतिज्ञैवेत्युत्तरावधारणोक्तिर्व्याप्तिफलाऽयोगव्यवच्छेदफला । इत्यसिद्धहेत्वा(दे)रपि प्रतिज्ञात्वप्रसङ्गः ॥

प्रतिज्ञाहेत्वोर्व्विरोधो नोक्तः पक्षाभाषे (? से)ष्वित्यव्याप्तिलक्षणमिति नै या यिकावकाशं भत्वा चा र्यो3 क्तं व्याख्यातुमाह । प्रतिज्ञाहेत्वोर्व्विरोधः प्रतिज्ञादोष इति यथा नित्यः शब्दः सर्व्वस्यानित्यत्वात् । अत्र यदि शब्दो नित्यः सर्व्वस्यानित्यत्वं विरुद्धमिति प्रतिज्ञया हेतोर्व्विरोधः । सर्व्वानित्यत्वे तदन्तर्गतत्वाच्छब्दस्येति हेतुर्न प्रतिज्ञाविरोधः । उत्तरमाह (।)

विरुद्धतेष्टासम्बन्धोऽनुपकारसहास्थिती ।
एवं सर्व्वाङ्गदोषाणां प्रतिज्ञादोषता भवेत् ॥ १७३ ॥

इष्टेनार्थेना[[१ साध्यधर्मेण ।]]सम्बन्धो विरुद्धतात्र स्यात् । सा चानुपकारसहास्थिती । हेतुस्तत्राभावात् साध्यं नोपकरोतीति वा स्थितहेतुना इष्टधर्मविरोधात् सहानवस्थानम्वा स्यात् । तत्र नानुपकारः । यदि हेतौ दुष्टे साध्योपरोधात् प्रतिज्ञादोष एवं सर्व्वलिङ्गदोषाणामसिद्धादीनां प्रतिज्ञादोषता स्यात् ।

पक्षदोषः परापेक्षो नेति च प्रतिपादितम् ।
इष्टासम्भव्यसिद्धश्च स एव स्यात् निराकृतः ॥ १७४ ॥

उत्तरावयवापेक्षः पक्षदोषो न भवतीति प्रागेवोक्तं ।

अथेष्टेन साध्यधर्मेणासम्भवी सहानवस्थायी हेतुर्व्विरुद्धः । तन्न (।) इष्टासम्भव्यसिद्धश्च स्याद् हेतुदोषो न पक्षे । निराकृतो हेत्वाभासेष्वेवोक्तत्वात् । अधुना हेतुप्रयोग एवायं नित्यात् । न सर्व्वानित्यत्वेन शब्दे नित्यत्वनिराक्रिया यतो विरोधः स्यात् (।) यस्मादेवं स साध्यधर्मो निराकृतः स्यात् ।

....4.170 असंभवात् साध्यशब्दो धर्मिवृत्तिर्यदीष्यते ।
शास्त्रेणालं यथायोगं लोक एव प्रवर्त्तताम् ॥ १७० ॥

यथोत्पत्तिमत्त्वादेः समुदायधर्मत्वासंभवाद्धर्मिधर्मत्वसंभवाच्च साध्यशब्दो यदि धर्मिवृत्तिरुपचारादिष्यते तदा शास्त्रेण दुर्विहितेनालं लोक एव यथाक्रमं यथायोगं यस्य यादृशं लक्षणं युक्तं तदवधार्य प्रतिज्ञाहेत्वादिषु प्रवर्त्ततां । यत्तु पक्षो धर्मी अवयवसमुदायोपचारादित्यस्माभिरुच्यते । तत्सर्वं धर्मिधर्मप्रतिषेधार्थं उपचारयोग्यपरिग्रहार्थं । तस्मादयुक्तं परस्य प्रतिज्ञालक्षणं । (१७०)

किञ्च ।

सर्ववाक्यानामवधारणफलत्वात्साध्यनिर्देश एव प्रतिज्ञेति पूर्वपदावधारणं वा स्यात् । साध्यनिर्देशः प्रतिज्ञैवेत्युत्तरपदावधारणं वा स्यात् । तत्र प्रथमपक्षे सिद्धनिवृत्याऽसिद्धपरिग्रहः प्रयोजनं । तच्चान्यथापि लभ्यते । तथा हि ।

....4.171 साधनाख्यानसामर्थ्यात्तदर्थे साध्यता गता ।
हेत्वादिवचनैर्व्याप्तेरनाशङ्क्यं च साधनम् ॥ १७१ ॥

सिद्धेऽपि साधनोपन्यासोऽनुपयुक्त इति साधनाख्यानसामर्थ्यात् तस्याः प्रतिज्ञाया अर्थेऽसिद्धे साध्यता 'प्रतीता' प्रतिज्ञालक्षणं विनापि
[474/s]

## (४) प्रतिज्ञालक्षणे दोषः

नचासिद्धे हेतुदृष्टान्तादिके प्रतिज्ञार्थप्रसंगः । तथा हि । हेत्वादिवचनैः पृथक् लक्षणप्रतिपादकैर्व्याप्तेर्विषयिकृतत्वात् साधनं हेतुदृष्टान्तं असिद्धं च प्रतिज्ञार्थे वाऽनाशङ्क्यं । (१७१)
[475/s]

---

अनित्यतवसहेतुत्वे शब्द एवं प्रकीर्त्तयेत् ॥
दृष्टान्ताख्यानतोऽन्यत् किमस्त्यत्रार्थानुदर्शनम् ॥ १७५ ॥

यद्यनित्यत्वं शब्दे स्यात् । ततोऽनित्यत्वसहेतुत्वे सति शब्दे एवं नित्यः शब्दः
सर्व्वस्यानित्यत्वादिति प्रकीर्तयेत् । न चैवं (।)हेतुलक्षणाभावात् । वैधर्म्यदृष्टान्तः परमत्र । अतोन्यत्र किञ्चिदर्थस्य प्रदर्शनं ।
तथाहि (।)

विशेषे भिन्नमाख्याय सामान्यस्यानुवर्त्तने ।
न तद् व्याप्तिः फलं वा किं सामान्येनानुवर्त्तने ॥ १७६ ॥

विशेषे शब्द एव भिन्नं विरुद्धं नित्यत्वमाख्याय सर्व्वस्यानित्यत्वादिति सामान्यस्यानुवर्त्तने । न तस्य शब्दस्य विशेषस्य व्याप्तिरनित्यताप्राप्तिर्व्विशेषपरिहारणैव वृत्तेः तक्रं कौण्डिन्याय ब्राह्मणेभ्यो दधि दीयतामितिवत् । शब्दे नित्यत्वं विधाय सर्व्वानित्यत्वमुच्यमानं न तमास्कन्दति । अतः शब्देऽनित्यत्वमभवत् कथं स्वविरुद्धमपाकुर्यात् ।
यदि शब्दव्यतिरिक्तस्यानित्यत्वं नेष्टं स्या(त्) तदा फलं वा किं सामान्यानुवर्त्तने सर्व्वस्यानित्यत्वादिति । शब्दस्यानित्यत्वादित्येव वाच्यं एवं हि स्फुटो विरोधः स्यात् (।) तस्मान्न शब्देऽनित्यत्वं (।) ।

स्यान्निराकरणं शब्दे स्थिते नैवेत्यतोब्रवीत् ।

अत एवा चार्योऽब्रवीत् समुच्चये स्यान्निराकरणं शब्दानित्यत्वेनेति । xx
2336 २ यथा सर्व्वमनित्यं न च सर्व्वं शब्दः इत्यसर्वत्वान्नित्यः ।

....4.172 पूर्वावधारणे तेन प्रतिज्ञालक्षणाभिधा ।
व्यर्था व्याप्तिफला सोक्तिः सामर्थ्याद्गम्यते ततः ॥ १७२ ॥

तेनातिप्रसंगाभावेन पूर्वस्य पदस्यावधारणे प्रतिज्ञालक्षणाभिधा व्यर्था । ततः पारिशेष्यात् सामर्थ्यात्साध्यनिर्देशः प्रतिज्ञैवेत्ययोगव्यवच्छेदफलमुत्तरपदावधारणं स्यात् । तथाचासिद्धहेतुदृष्टान्तादावपि प्रतिज्ञात्वं दुर्वारं । असिद्धस्य साधनाङ्गस्य कथमपि प्रतिज्ञात्वायोगताविरहात् निरस्तं प्रतिज्ञालक्षणं । (१७२)

परस्य प्रतिज्ञाभासलक्षणं संप्रति निराकरणीयं (।) हेतुप्रतिज्ञयोर्व्याघातः प्रतिज्ञादोषो मतः । यथा नित्यः शब्दः सर्वस्य नित्यत्वात् । यदि सर्वमनित्यं तदा शब्दस्यापि सर्वत्रान्तर्भावात् कुतो नित्यता । अथ शब्दो नित्यः कथं सर्वस्यानित्यतेति प्रतिज्ञाहेत्वोर्विरोधात् । प्रतिज्ञाविरुद्धतादोषः ।

....4.173 विरुद्धतेष्टासम्बन्धोऽनुपकारसहास्थिती ।
एवं सर्वाङ्गदोषाणां प्रतिज्ञादोषता भवेत् ॥ १७३ ॥

विरुद्धता चेष्टस्या साध्यधर्मस्य धर्मिण्यसम्बन्धो नाम । स च विचार्यमाणो [476/s] हेतुना साध्यधर्मस्यानुपकारोऽनिश्चायनं वा स्यात् । धर्मिणि साध्येन सहास्थितिर्वा स्यात् । तत्र यदि हेतोः साध्ये प्रतिपादकत्वाभावात् प्रतिज्ञादोष उच्यते (।) एवं सति सर्वेषामङ्गस्य हेतोर्दोषाणां प्रतिज्ञादोषता भवेत् सर्वैर्हेतुदोषैः प्रतिज्ञाया एव व्याहननात् ।

....4.174 पक्षदोषः परापक्षो नेति च प्रतिपादितम् ।
इष्टासम्भव्यसिद्धश्च स एवं स्यान्निराकृतः ॥ १७४ ॥

प्रतिज्ञामात्रभागी च पक्षदोषः । परापेक्षः साधनादिसापेक्षः न दोष इति च प्रतिपादितं प्रागुत्तरावयवापेक्षो न दोषः पक्ष इष्यत इत्यादिना । अथ सहास्थितिस्वभावो विरोधः । तदेष्टे पक्षेऽसम्भवी हेतुदोष एवायं न पक्षदोषः । अथ तेन हेतुना प्रतिज्ञार्थनिराकरणात् प्रतिज्ञाविरोधः पक्ष-दोष एव (।) तच्चायुक्तं तथा हि (।) साध्यधर्मो धर्मिण्येवं निराकृतः स्यात् ।

....4.175 अनित्यत्वसहेतुत्वे शब्द एवं प्रकीर्त्तयेत् ।
दृष्टान्ताख्यानतोऽन्यत् किमस्त्यत्रार्थानुदर्शम् ॥ १७५ ॥

यदि शब्दे धर्मिण्यनित्यत्वेन धर्मेण सहेतुत्वे प्रतिपाद्ये एवं सर्वस्यानित्यत्वादि [97a/MA] प्रकीर्त्तयेत् । न चेदृशं वादिनो विवक्षितं सर्व्वस्य परस्यानित्यत्वात् । शब्दो नित्य इति विवक्षितत्वात् । तथा च सामान्यविशेषभावाद् विरोधभावः । भवतु वा शब्देऽनित्यत्वनिराकरणं विवक्षितं (।) तथापि प्रमाणबाधैवापक्षतेति न प्रतिज्ञाविरोधो नाम पक्षदोषः । तस्माद्धेत्वर्थतानुपपत्तेः सर्व्वस्यानित्यत्वादित्यत्र वैधर्म्येण दृष्टान्ताख्यानतोऽन्यदर्थानुदर्शनं किमस्ति । वैधर्म्यदृष्टान्त एव सुशिक्षितैरित्थमाख्यातः । सर्व्वस्य नित्यत्वे व्याप्तिदर्शनार्थं यदि पुनर्वैधर्म्यदृष्टान्तोपदर्शनमेतन्न भवति (।) तदा ।

## (५) सामान्यचिन्ता

### क. सामान्यानुवर्त्तने निष्फलम्

....4.176 विशेषेभिन्नमाख्याय सामान्यस्यानुवर्त्तने ।
न तद्व्याप्तिः फलं वा किं सामान्येनानुवर्त्तने ॥ १७६ ॥

विशेषेण शब्दे भिन्नं नित्यत्वमाख्याय सर्व्वस्यानित्यत्वादिति व्यापित्वात् सामान्यस्यानित्यत्वस्यानुवर्त्तने क्रियमाणे तस्यानित्यत्वस्य व्याप्तिरशेषपदार्थग्रहो न भवति । यथा कौण्डिन्यस्य तक्रदानं विहितं ब्राह्मणेभ्यः सामान्येन विहितदधिदानेन न बाध्यते । प्रकल्प्यापवादविषयमुत्सर्गस्य प्रवृत्तेः । तथा शब्दे नित्यत्वस्य [477/s] विशेषविहितस्य सर्व्वानित्यत्वेन सामान्यविहितेन बाधाशङ्का नास्तीति कथं प्रतिज्ञाहेत्वोर्व्विरोधः । यदि शब्दव्यतिरिक्तस्य सर्व्वस्यानित्यत्वमिष्टं न स्यात् (।) तदा सर्व्वस्यानित्यत्वादिति सामान्येनानुवर्त्तने किं फलं स्यात् । नित्यः शब्दः शब्दस्यानित्यत्वादित्येव वाच्यं । एवं विरोधस्य वक्तव्यत्वात् शब्द एवोदाहरणम्भविष्य तीति चेत् । नानुन्मत्त एवं ब्रूयात् । यद्यात्मनोऽनित्यत्वं हेतुः सिद्धः । कथं तद्विरुद्धं साध्यं (।) तत्रैव प्रतिजानीयात् । अथासिद्धस्तदा हेतुदोष एवासौ न प्रतिज्ञादोषः (।) तस्मान्नास्ति शब्दे नित्यत्वं । अतः स्ववचनविरोधिनमपि निराकर्त्तुमशक्तं ।

...4.177a स्यान्निराकरणं शब्दे स्थितेनैवेत्यतोब्रवीत् ।

अत एवाचार्य 'शब्देस्थितेनैवा'नित्यत्वेन 'निराकरणं' नित्यत्वस्य 'स्यादित्यब्रवीत्' । तदा च स्यादत्र प्रतिज्ञार्थस्य निराकरणं ॥

यदि नित्यः शब्दः सर्व्वस्यानित्यत्वादिति वैधर्म्यदृष्टान्तोपदर्शनमेतत् । यथा नित्यत्वविशिष्ट शब्द इति । तदा हेतु-निर्देशोन स्यादित्याह (।) अ[2337] सर्वश्च शब्द इत्युपनयाद्धेतुर्वक्तव्यः ।

...4.177b विरुद्धविषयेन्यस्मिन् वदन्नाहान्यतां श्रुतेः ॥ १७७ ॥

तथाहि नित्यत्वस्य विरुद्धं शब्दादन्यस्मिन् वदन् सर्व्वस्मादन्यतां श्रुतेः 95b शब्द[2338] स्याह ।

...4.178a स च भेदोप्रतिक्षेपात् सामान्यानान्न विद्यते ।

स च सर्व्वस्माद् भेदोऽसर्व्वलक्षणः शब्दस्य न विद्यते (।) सामान्यानां व्यापिनां भेदस्याप्रतिक्षेपात् स्वीकारात् (।) निः शेषार्थसंगृहीतत्वात् सर्व्वशब्दो न किञ्चित् परिहरति ।

ननु सामान्यानां विशेषप्रतिक्षेपो दृश्यते एव । यथा किं शिंशपैव वृक्षो न वेति प्रश्ने कथ्यते न शिंशपैव वृक्षः । तदा शिंशपावृक्षत्वप्रतिक्षेपो भवत्येव ।

असदेतत् । न हि तत्र शिंशपावृक्षत्वं निषिध्यते किन्तु शिंशपैव वृक्ष इति नियमः प्रतिक्षिप्यते (।) तदितरस्यापि वृक्षत्वात् ।

...4.178b वृक्षो न शिंशपैवेति यथा प्रकरणे क्वचित् ॥ १७८ ॥

[478/s]

....4.179 सर्वश्रुतेरेकवृत्तिनिषेधः स्यान्न चेयता ।
सोसर्वः सर्वभेदानामतत्त्वे तदसम्भवात् ॥ १७९ ॥

यथा च क्वचित् प्रकरणे शिंशपामात्रवृक्षत्वप्रश्नहेतौ यथा वृक्षो न शिंशपैवेति शिंशपामात्रवृक्षत्वनिषेध इष्टः । तथा निःशेषवस्तुसंग्राहिकायाः सर्व्वश्रुतेरेकत्र शब्दमात्रवृत्तिनिषेधः स्यात्

[2337] १ साधर्म्यवैधर्म्योदाहरणापेक्षः तथा न तथेति पक्षधर्मोपसंहार उपनय इह तु वैधर्म्योपनयः । यदाह तस्मात् सर्वत्वान्नानित्य इति ।

[2338] २ सर्वमनित्यत्वेन व्याप्तं शब्दमनित्यत्वात्ततोऽन्य इत्यसर्वत्वं हेतुः स्यात् ।

(।) न चेयता स शब्दोऽसर्व्वः सर्व्वान्तर्गमात् तस्य । प्रत्येकं सर्व्वेषां भेदानां विशेषाणामतत्वेऽसर्व्वत्वे तस्य सर्व्वस्यासम्भवात् ।

अथ पारिभाषिकं सर्व्वत्वं शब्दादितरत्वं तथाऽसर्व्वत्वं शब्दे सिद्धमेवेति चेत् । तदयुक्तं[2339] (।) एवं हि सर्व्वत्वमेव सर्व्वशब्देनोक्तं स्यात् । तथाऽप्रसिद्धतैव । तथा हि ।

....4.180 ज्ञाप्यज्ञापकयोर्भेदात् धर्मिणो हेतुभाविनः ।
असिद्धेर्ज्ञापिकत्वस्य धर्म्यसिद्धः स्वसाधने ॥ १८० ॥

ज्ञाप्यज्ञापकयोर्भेदात् कारणा त् साध्याभिन्नं साधनं वक्तव्यं । ततो धर्मिणो हेतुत्वेन भाविनो हेतुर्भविष्यतो नित्यत्वेन साध्यत्वात् । ज्ञापकस्यासिद्धेः कारणात् । धर्मी साध्यत्वात् स्वस्य साधनेऽसिद्धः । असिद्धं हि साध्यं । सिद्धश्च साधनं । अनयोः कथमैकात्म्यं ॥

ननु शब्दत्वं सिद्धमेव । नित्यवत्तया तु तदसिद्धं साध्यते । न च तथैव तत्साधनं । शब्दत्वमात्रेण साधनत्वात् । तत्कथन्धर्मी स्वसाधनेऽसिद्ध उच्यते ॥ अयमभिप्रायः । न शब्दत्वमित्येव गमकत्वं किन्तु साध्यप्याप्तं तस्य चासाधारणत्वेन नान्यत्र व्याप्त्युपलम्भः । ततश्चान्यत्रानित्यत्वनियमात् शब्दे शब्दत्वं नित्यताव्याप्तं सद्धेतुर्व्वक्तव्यः । तथा च य एव साध्यः स एव हेतुरिति साध्यसिद्धेर्हेतुत्वसिद्धिश्चेति युक्तमुक्तं धर्म्यसिद्धः प्रसाधन इति ॥

## ख. सामान्यनिरासः

....4.181 धर्मधर्मिविवेकस्य सर्वभावेष्वसिद्धितः ।
सर्वत्र दोषस्तुल्यश्चेन्न संवृत्या विशेषतः ॥ १८१ ॥

नन्वेवं सति सर्व्वत्र भावेषु धर्मयाः साध्यसाधनयोर्द्धर्मिणश्च विवेकस्य भेदस्यासिद्धितः [2340] ।

[479/s]

[2341] 'सर्व्वत्र तुल्यो दोषः' । नहि शब्दादन्यत् नित्यत्वं कृतकत्वम्वा । अनित्य-[96a/MA]त्वासिद्धौ च यथा नित्यः साध्यस्तथा तदात्मवान् कृतकोपि शब्दोऽसिद्ध ऐवति चेत् । नैष दोषः (।) 'संवृत्त्या' भिन्नव्यावृत्तिविषयया साध्यसाधनधर्मिणो 'विशेषतो' भेदात् । यथा स्वं विकल्पैः संकेतवासनानुगमनियमितैकैकवृत्तिमात्रविषयार्थैः शब्दत्वकृतकत्वनित्यत्वाद्यसंकीर्णान्येव धर्मिसाधनसाध्यतया व्यवस्थाप्यन्त इति न दोषः ।

यदि धर्मधर्मिविवेकोऽस्त्येव तदा तत्त्वान्यत्वप्रतिषेधः कथं कृत इत्याह ।

....4.182 परमार्थविचारेषु तथाभूताप्रसिद्धितः ॥
तत्त्वान्यत्वं पदार्थेषु सांवृतेषु निषिध्यते ॥ १८२ ॥

सांवृतेषु कल्पनाविषयेषु धर्मिधर्मादिषु तत्त्वान्यत्वं 'परमार्थस्य' तत्त्वस्य 'विचारेषु' निषिध्यते 'तथाभूतस्य' यथाकल्पनं परस्परतो भिन्नस्य धर्मिधर्मादेः प्रमाणेना'प्रसिद्धितः' । न तु सांवृतोपि तेषां भेदाभावः । न चेयता कल्पिते धर्मिणि कल्पितात् साधनात् कल्पितस्य साध्यस्य सिद्धिरित्यनुमानादवस्तुप्रतीत्यभावप्रसङ्ग । अशब्दव्यावृत्त्या निश्चितस्य वस्तुन

[2339] १ शब्दोऽसर्व्व इति पर्यायाः । तथा च यथा नित्यः शब्दः शब्दत्वादिति प्रतिज्ञार्थैकदेशो हेतुरसिद्धस्तथेहाप्यसिद्धिरिति समुदायार्थः ।

[2340] २ तत्रैव---उपरिमस्य पतितमेतत् ।

[2341] १ स्वभावहेतौ ।

एव धर्मित्वात् । एवं कृतकत्वानित्यत्वाभ्यां निश्चितस्य तस्यैव साधनत्वात् साध्यत्वाच्चेत्युक्तेः । अन्योन्यस्य तेषां भेदः पुनः कल्पित एव ।

....4.183 अनुमानानुमेयार्थव्यवहारस्थितिस्त्वियम् ।
भेदं प्रत्ययसंसिद्धमवलम्ब्य च कल्प्यते ॥ १८३ ॥

अतो'नुमान'हेतुत्वादनुमानस्य लिङ्गस्या'नुमेयार्थ'स्यानयोरुपलक्षणत्वात् (।)

धर्मिणश्च 'व्यवहारस्थितिस्त्विय'मनित्यः कृतकत्वादित्यादौ क्रियमाणा तेषां परस्परतो 'भेद प्रत्यतेन' विकल्पकेनैकव्यावृत्तिमात्रविषयेण 'संसिद्धं' निश्चितं । अवलम्ब्याश्रित्य च कल्प्यते ॥

....4.184 यथा स्वं भेदनिष्ठेषु प्रत्ययेषु विवेकिनः ।
धर्मी धर्माश्च भासन्ते व्यवहारस्तदाश्रयः ॥ १८४ ॥

तथाहि 'यथा स्वं' यस्य य आत्मीयो ग्राह्यो 'भेदो' व्यावृत्तिस्त'न्निष्ठेषु' विकल्पेषु 'विवेकिनो धर्मी धर्माश्च' साध्यसाधनादयो 'भासन्ते । तदाश्रयो' विकल्पगोचराश्रयो धर्मिधर्मादिभेदस्य 'व्यवहारः' प्रवर्त्तते ॥

[480/s]

एवन्तर्हि नित्यः शब्दोऽसर्व्वत्वादिति । अत्रापि व्यावृत्तिभेदादेव साध्यसाधनभावो भविष्यतीत्याह ।

....4.185 व्यवहारोपनीतोत्र स एवाश्लिष्टभेदधीः ।
साध्यः साधनतां नीतस्तेनासिद्धः प्रकाशितः ॥ १८५ ॥

'अत्र' प्रयोगे 'स' शब्द 'एव साध्योऽश्लिष्टभेदधी'रसंस्पृष्टान्यादृशबुद्धिः । द्वाभ्यामपि शब्दाभ्यामेकस्या व्यावृत्तेः प्रतिपादनात् 'व्यवहारेण' व्यावृत्तिसमाश्रयेणो'पनीतः' प्रत्युपस्थापितः येन कारणेन 'साधनतां नीतः तेनासिद्धः प्रकाशितः' ।

ननु संस्कृतशब्दोऽनित्यः संस्कृतत्वादिति प्रतिज्ञार्थैकदेशस्य यथा हेतुत्वं तथा नित्यः शब्दः शब्दत्वादित्यस्यापि स्यादित्याह ।

....4.186 भेदसामान्ययोर्द्धर्मभेदादंगांगिता ततः ।
यथाऽनित्यः प्रयत्नोत्थः प्रयत्नोत्थतया ध्वनिः ॥ १८६ ॥

साध्यधर्मिमात्रनिष्ठत्वात् सर्व्वधर्मगोचरत्वाच्च 'भेदसामान्ययोर्द्धर्मभेदाद्' व्यावृत्तिभेदात् । साध्य[2342] धर्मो हि साध्यधर्मिनिष्ठत्वेन सजातीयाद् विजातीयाच्च व्यावृत्तत्वाद् विशेषः । साधनधर्मस्तु विजातीयमात्रव्यावृत्तत्वेन सामान्यं । ततो भेदसामान्यभावेन 'भेदादङ्गाङ्गिता' हेतुसाध्यता युक्ता । विशेषः साध्यः सामान्यं हेतुरिति कुतः प्रतिज्ञार्थैकदेशता । 'यथाऽनित्यः प्रयत्नोत्थो ध्वनिरिति' प्रतिज्ञा 'प्रयत्नोत्थतयेति' हेतुः । शब्दः पुनरभिन्न[2343] विषयो हेतुः साध्यश्चेति प्रतिज्ञार्थैकदेशत्वं ॥

प्रयत्नानन्तरीयकत्वस्य धर्मिविशेषणत्वात् प्रतिज्ञार्थैकदेशत्वमस्त्येवेत्याह ।

....4.187 पक्षाङ्गत्वेप्यबाधत्वान्नासिद्धिर्भिन्नधर्मिणि ।
यथाश्वो न विषाणित्वादेष पिंडो विषाणवान् ॥ १८७ ॥

[97a/MA]

2342 १ अनित्यं शब्दे ।

2343 २ नित्यः शब्दः शब्दत्त्वादित्यत्र ।

पक्षाङ्गत्वे विशेषणत्वेपि नास्त्येव तावत् साधनस्य पक्षाङ्गत्वं विशेषसाध्यत्वात् । भवतु वा तथापि नासिद्धस्य । तेन विशेषणेन 'भिन्ने' विशेषिते 'धर्मिणि' धर्म्म्यन्तरव्या[2344]वृत्ते प्रयत्नानन्तरीयकत्वस्याविरोधादबाधत्वात् धर्मिणं विशेषयदपि [481/s] प्रयत्नोत्थत्वं शब्दे प्रसिद्धमेव । 'यथा' बहुषु पिण्डेषु दृश्यमानेषु 'किमयमश्वो' नवेति संशयोऽभिधीयते 'विशा( ? षा)णवानेष पिण्डो' धर्मी 'नाश्वो' विषाणित्वादिति । विषाणित्वं धर्मिणं विशेषयदिप प्रमाणप्रतीतत्वान्नासिद्धो हेतुः ।

....4.188 साध्यकालाङ्गता वा न निवृत्तेरुपलक्ष्य तत् ।
विशेषोपि प्रतिज्ञार्थो धर्मभेदान्न युज्यते ॥ १८८ ॥

अथवा विशेषणस्य प्रयत्नोत्थत्वादेस्तच्छब्दरूपं विशेष्यत्वेनोपलक्ष्यानुमानात् प्रागेव निवृत्तेः (।) 'साध्यका'लेऽनुमेयप्रतीते कालेऽ'ङ्गता' विशेषणता नास्त्येव अप्रतीतं ह्यनुमानात् प्रत्येतव्यं । प्रयत्नोत्थत्वादिति च प्रतीतं । न च तत्र विवादः । ततो धर्मिमात्रोपलक्षणन्तत् । यथा काको देवदत्तगृहोपलक्षणत्वान्न कार्योपयोगी (।) यद्यपि[2345] विशिष्टे धर्मिणि प्रतिज्ञार्थैकदेशत्वं हेतोः । तथा नित्यः शब्दः श्रावणत्वादिति शब्दस्वभावभूतस्य श्रावणत्वस्य शब्दत्ववत् प्रतिज्ञार्थैकदेशता स्यात् नासाधारणतेत्याह । न केवलं विषाणित्वादि'र्विशेषः' श्रावणत्वादि[97b/MA]रपि 'प्रतिज्ञार्थै'कदेशो 'न युज्यते । धर्म'स्य व्यावृत्ते'र्भेदात्' । श्रावणत्वं श्रवणग्राह्यताऽश्रावणव्यावृत्तिः (।) तच्च शब्देपि क्वचित् 'कश्चित् पुरुषमपेक्ष्य भवति' । अशब्दव्यावृत्तिस्तु शब्दत्वं तच्च सर्व्वत्रास्ति ततो व्यावृत्तिभेदात् शब्दे सिद्धस्य श्रावणत्वस्यान्यत्राननुवृत्तेरसाधारणतैव युक्तेत्युक्तं सपरिकरं पक्षलक्षणम् ॥

इति पक्षलक्षण(म् । )

## 4.6 ६. हेतुचिन्ता

### (२) हेतुलक्षणम्

### म. पक्षधर्मप्रभेदकथने कारणम्

हेतुलक्षणमिदानीम्वक्तव्यं । तत्र हेतुलक्षणमेव तत्र यः सन् सजातीयेइत्यादिकं युक्तं वक्तुं । सपक्षे सन्नसन् द्वेधा पक्षधर्मः पुनस्त्रिधेत्यादिना नवधा पक्षधर्मप्रभेदस्तु कस्मादुक्त [2346] इत्याह ।

....4.189 पक्षधर्मप्रभेदेन सुखग्रहणसिद्धये ।
हेतुप्रकरणार्थस्य सूत्रसंक्षेप उच्यते ॥ १८९ ॥

[482/s]

'पक्षधर्म'स्य नवधा 'प्रभेदेन हेतुप्रकरणार्थस्य' हेतुहेत्वाभासलक्षणात्मकस्य 'सुखेन ग्रहण'स्य 'सिद्धये' तदर्थवाचकानां 'सूत्रा'णां 'संक्षेपतः' संग्रह 'उच्यते' ॥ सपक्षे सन्नित्यादिना (।)

---

[2344] ३ साध्यस्य धर्मिणो धर्मस्य वा साधनतया विरोध एकस्य ज्ञाप्यज्ञापकत्वविरोधात् (।) अत्र तु विशेषः साध्यः सामान्यं साधनं तत्त्वे प्रतिज्ञया सिद्धिप्रसक्तेः ।

[2345] १ यदि च ।

[2346] २ स मु च्च ये ।

## ख. सूत्रे निपातग्रहणफलम्

यदि पक्षस्य धर्मो हेतुस्तदा तद्विशेषणापेक्षस्य धर्मस्यान्यत्र धर्मिण्यननुवृत्तेरसाधारणता स्यात् । अथ पक्षेण न विशिष्यते तदा न पक्षधर्मो हेतुः स्यात् । असदेतत् । न ह्यन्ययोगव्यवच्छेदेनैव विशेषणमन्यथापि सम्भवादिति दर्शयितुमाह ।

....4.190 अयोगं योगमपरैरत्यन्तायोगमेव च ।
व्यवच्छिनत्ति धर्मस्य निपातो व्यतिरेचकः ॥ १९० ॥

'निपात' एवकारो 'व्यतिरेचकः' नियामकः क्वचिद् 'धर्मस्य' विशेषणस्या'योगं व्यवच्छिनत्ति' क्वचिदपरैर्विशेष्या'दन्यैर्योगं' व्यवच्छिनत्ति । क्वचि'दत्यन्तायोगं' व्यवच्छिनत्ति ॥

ननु निपातो न स्वयं वाचकः किन्तु द्योतकः । तदस्य कथमयमर्थप्रभेद इत्याह ।

...4.191a विशेषणविशेषाभ्यां क्रियया च सहोदितः ।

द्योतकत्वादेव निपातो 'विशेषणेन' सहोदितोऽयोगस्य व्यवच्छेदकः । 'विशेष्येण' सहोक्तोन्ययोगस्य । 'क्रियया च सहोक्तो'ऽत्यन्तायोगस्येति विशेषणादिपदवाच्य एवायोगव्यवच्छेदादिस्तत्सहोक्तनिपातद्योत्य इत्यर्थः ।

भवतु तावन्निपातप्रयोगे व्यवच्छेदविशेषस्य प्रतीतिः पक्ष[2347] इत्यादौ तु कथमित्याह ।

...4.191b विवक्षातोऽप्रयोगेपि सर्वोऽर्थोयं प्रतीयते ॥ १९१ ॥

....4.192 व्यवच्छेदफलं वाक्यं यतश्चैत्रो धनुर्धरः ।
पार्थो धनुर्द्धरो नीलं सरोजमिति वा यथा ॥ १९२ ॥

'अप्रयोगेपि' निपातस्य वक्तु'र्विवक्षातः' सर्व्वोयमयोगव्यवच्छेदा'दिरर्थः प्रतीयते । यतो व्यवच्छेदफलं वाक्य'मित्युक्तं प्राक् । वाक्यश्चोपलक्षणं पदमपि व्यवच्छेदफलं । न हि घटेनोदकमानयेति प्रतिपादमनवधारणेऽघटेनानयनप्रतिषेधः । पक्ष इत्यादौ तु कथमित्याह । अप्रयोगेपि निपातस्य वक्तुर्विवक्षातः सर्व्वोयमयोगव्यवच्छेदोऽनुदकानयनप्रतिषेधः अनानयननिवृत्तिर्व्वा शक्योपदर्शना । अयोग[483/s] व्यवच्छेदादीनामुदाहरणमाह । 'यथा चैत्रो धनुर्द्धरः । पार्थो धनुर्द्धरः । नीलं सरोजमिति' (।) चैत्रे धनुर्द्धरत्वसन्देहाद् विशेषणेनायोगमात्रं व्यवच्छिद्यते । 'पार्थे' धनुर्द्धरत्वं प्रसिद्धमेव (।) किन्तु तादृशमन्यस्यापि किमस्तीति सन्देहेऽन्ययोगव्यवच्छेदफलं विशेषणं । न खलु सर्व्वमेव नीलं सरोजं येनायोगव्यवच्छेदः स्यात् । नापि सरोजमेव नीलं येनान्ययोगव्यवच्छेदो भवेत् । किन्तु नीलं सरोजं संभवति न वेत्यन्तायोगसंदेहे विशेषणेन स एव व्यवच्छिद्यते ।

ननु भवतु तावच्चैत्रो धनुर्द्धर एव । पार्थ एव धनुर्द्धरः । सरोजं नीलं संभवत्येवेति निपातप्रयोगे विवक्षावशात् विशेषणादिपदानामेव वा व्यवच्छेदप्रतिपादकत्वादप्रयोगेऽपि निपातस्य चैत्रो धनुर्द्धर इत्यादिप्रयोगेषु योगव्यवच्छेदादीनां [98a/MA] प्रतीतिः । पक्षधर्म इत्यत्र पुनःपक्षो विशेषणं । धर्मो विशेष्यः । तद् यदि पक्षस्यैव धर्म इति विशेषणेन सह निपात उच्यते अप्रयोगेपि वा विशेषणस्य तदर्थवृत्तितेष्यते । उप(?) भयथाप्यन्ययोगव्यवच्छेदप्रतिपादकत्वमेव स्यात् ।

अथ धर्म एव विशेष्यो निपातसहचरः । तदर्थ वृत्तिर्व्विष्टः तदाऽयोगव्यवच्छेदो लभ्यत एव परं विशेषणसहितोऽन्ययोगं व्यवच्छिनत्तीत्युक्तेर्व्विरुध्यते । अत्रोच्यते । बाह्यो निपातः श्रूयमाणोपि

[2347] १ ...पक्षधर्मः ।

विशेष्यादिभिः सह वक्तृविवक्षावशाद् गम्यमानो वाऽयोगव्यवच्छेदको भवतीति दृष्टान्तप्रदर्शनार्थमुक्तं । तथैव चैत्रो धनुर्द्धर इत्याद्युदाहरणप्रदर्शनात् । व्यवच्छेदफलं वाक्यमित्युक्तेश्च । समासे तु विशेषणमेवायोगादिव्यवच्छेदकं विवक्षावशादिष्टं । अयोगव्यवच्छेदेन विशेषणादित्युक्तेः । पक्षधर्म इति पक्षशब्दोऽयोगव्यवच्छेदकः । पक्षासम्बद्धो न भवतीत्यर्थः । चाक्षुषं रूपमिति चाक्षुषत्वस्य रूपे विवादाभावात् (।) शब्दादीनां विशेषणेन व्यवच्छेदः क्रियते । नीलोत्पलमिति । उत्पले नीलत्वनियमाभावात् (।) परेष्वभावादयोगान्ययोगयोर्व्यवच्छेदाभावात् नीलशब्देनात्यन्तासम्भवमात्रं व्यवच्छिद्यते । इति न कश्चिद्विरोधः ।

ननु यथा पार्थ एव धनुर्द्धर इति विशेषणस्य सन्निधानात् निपातस्य विशेष्यान्तरव्यवच्छेदः । तथा विशेषणसन्निधानादवधारणस्य चैत्रो धनुर्द्धर एवेति गुणान्तरव्यवच्छेदः स्यादित्याह ।

....4.193 प्रतियोगिव्यवच्छेदस्तत्राप्यर्थेषु गम्यते ।
तथा प्रसिद्धेः सामर्थ्याद् विवक्षानुगमाद् ध्वनेः ॥ १९३ ॥

'तत्र' विशेषणादिष्व'र्थेषु' व्यवच्छेदेपि क्रियमाणे प्रकरणाद् बुद्धिविषयीकृतस्य 'प्रतियोगि'न 'व्यवच्छेदो' विशेषणेन 'गम्यते' नान्यस्य । 'तथा प्रसिद्धेः' प्रतियोगिन [484/s] एव बुद्धिस्थीकृत्य विशेषणेन व्यवच्छेदो नेतरस्येति लोकप्रसिद्धेः । 'विवक्षाया अनुगमात् ध्वने'र्व्यवच्छेदादौ 'सामर्थ्या'न्नाविवक्षितव्यवच्छेदः । यत एवायोगव्यवच्छेदोप्यस्ति (।)

....4.194 तदयोगव्यवच्छेदाद् धर्मी-धर्मविशेषणम् ।
तद्विशिष्टतया धर्मो न निरन्वयदोषभाक् ॥ १९४ ॥

'तत्' तस्माद् धर्मी पक्षो धर्मस्या'योगव्यवच्छेदाद् विशेषणं' धर्मिणो नाधर्मो[2348] हेतुरित्यर्थः । अयोगव्यवच्छेदात् तेन धर्मिणा 'विशिष्टतया धर्मो निरन्वयदोषभाग् न' भवति ।

सपक्षे घटादौ सन् शब्दानित्यत्वे साध्ये कृतकत्वं हेतुः । असन् सपक्षे व्योमादौ शब्दानित्यत्वे साध्ये कृतकत्वं हेतुः । सपक्षे द्वेधा । सन्नसँश्च (।) शब्दानित्यत्वे साध्ये यत्नजत्वं हेतुः । घटादौ सपक्षे सन् विद्युदादौ चासन् । पुनस्त्रिधा (।) सपक्षे सन् असन् सदसँश्च (।) शब्दस्य यत्नजत्वे साध्ये सपक्षे घटादावनित्यत्वं हेतुः सन् । शब्दानित्यत्वे साध्ये यत्नजत्वं हेतुरसन् विद्युदादौ सपक्षे ॥ शब्देऽयत्नजत्वे साध्येऽनित्यत्वं हेतुः सपक्षे विद्युदादौ सन् । व्योमादौ चासन् । एवं प्रत्येकमसपक्षेपि सन् असन् द्वेधा चेति योज्यं । शब्दनित्यत्वे साध्ये प्रमेयत्वं हेतुः (।) असपक्षे घटादौ सन् (।) शब्दनित्यत्वे साध्ये श्रावणत्वं हेतुरसपक्षेऽसन् शब्दनित्यत्वे साध्येऽस्पर्शवत्वं हेतुरसपक्षे घटादावसन् (।) बुद्ध्यादौ सन्निति द्विधा [98b/MA] पक्षधर्मनिर्देशः । किमर्थ हेतुप्रकरणे नवधा पक्षधर्मनिर्देशः ।---

## (२) हेतुभेदा

---सम्यग्धेतुरसिद्धविरुद्धानैकान्तिकहेत्वाभासा एव युक्तनिर्देशा इत्याह ।

....4.195 स्वभावकार्यसिध्यर्थं द्वौ द्वौ हेतुविपर्ययौ ।
विवादाद् भेदसामान्ये शेषो व्यावृत्तिसाधनः ॥ १९५ ॥

[2348] १ अपि तु धर्म एव ।

'स्वभावकार्य'योरेव हेतुत्वेन 'सिद्ध्यर्थं' तत्र 'द्वौ' शब्देऽनित्यत्वसिद्ध्यर्थं कृतकत्वप्रयत्नानन्तरीयकत्वाख्यौ हेतू निर्दिष्टौ । तथा शब्द एव नित्यत्वसाधने द्वौ 'हेतुविपर्ययौ' विरुद्धौ हेतुभावे चोक्तौ । यथा हि सम्यग्धेतोः स्वसाध्ये व्याप्यकार्यतया प्रतिबद्धस्य गमकत्वं । तथा साध्यविपर्यये व्याप्यकार्यतया प्रतिबद्धस्यैव [485/s] तद्गमकत्वेन विरुद्धता नान्यस्येत्यर्थः । व्यतिरेकी[2349] अन्वयी च हेतुरिति परेषां 'विवादात्' तत्प्रतिषेधार्थं 'भेदसामान्ये'ऽसाधारणसाधारणे श्रावणत्वप्रमेयत्वे निर्दिष्टे । यदि विपक्षे नास्तीति सात्मकत्वे साध्ये प्राणादिमत्वं हेतुस्तदा श्रावणत्वमपि स्यात् । न चैवं (।) तस्मान्न व्यतिरेकी हेतुः । यदि च केवलान्वयिनो दर्शनमात्राध्यवसिताव्यभिचारस्य हेतुत्वं तदा प्रमेयत्वस्याकाशादौ दर्शनादव्यभिचारनिश्चये सति शब्दे नित्यत्वगमकत्वं स्यान्न चैवं । ततो न केवलान्वयी हेतुः । 'शेषो'ऽप्रयत्नोत्थः शब्दोऽनित्यत्वात् । नित्यः शब्दोऽस्पर्शवत्वात् । प्रयत्नानन्तरीयः शब्दोऽनित्यत्वादिति हेतुत्रयं विपक्षाद्धेतो'र्व्यावृत्तिसाधनः' ।---

---यदि हि सपक्षे दर्शनमात्रेण गमकत्वं तदैते हेतवः प्राप्ताः (।) 'सर्व्वेषां सपक्षे' सत्वात् (।) तस्मान्नान्वयसम्बन्धमात्रेण गमकत्वं (।) किन्तु विपक्षाद् व्यतिरेकनिश्चये न चास्ति व्यतिरेकनिश्चयः (।) प्रधानं हेतुत्वनिबन्धनमित्यर्थः । कथं पुनर्ज्ञायते स्वभावहेतुः कृतकत्वं । कार्यहेतुः प्रयत्नानन्तरीयकमित्याह ।

....4.196 न हि स्वभावादन्येन व्याप्तिर्गम्यस्य कारणे ।
सम्भवाद् व्यभिचारस्य द्विधावृत्तिफलं ततः ॥ १९६ ॥

'न हि स्वभावा'द्धेतो'रन्येन' हेतुना 'गम्यस्य' साध्यस्य 'व्याप्तिः' । यत्र यत्रानित्यत्वं तत्र कृतकत्वमिति दृश्यते च व्याप्तिः (।) तस्मात् स्वभावहेतुरेव[2350] । नावश्यं कारणानि कार्यवन्ति भवन्तीति कारणे कार्यस्य 'व्यभिचारसम्भवात्' । कार्यं कारणव्यापकं न भवति ।[2351] तत्र सपक्षे 'द्विधावृत्ति'भावाभावात् प्रत्यत्ना[2352] नन्तरीयत्वं 'फलं' कार्यहेतुः[2353] प्रयत्नकार्यस्य तथाभिधानात् ।

ननु प्रयत्नजेन ज्ञानेनानित्यः शब्दोऽनुमेय इष्टः (।) शब्दाश्च नित्या एव तद्विषयज्ञानोत्पादादिना यत्नेन ते व्यज्यन्ते(।)तत्कथं कार्यहेतूदाहरणमिदमित्याह ।

....4.197 प्रयत्नानन्तरं ज्ञानं प्राक्सतो नियमेन न ।
तस्यावृत्यक्षशब्देषु सर्वथाऽनुपयोगतः ॥ १९७ ॥

प्रयत्नात् 'प्राक्' सतः शब्दस्य 'नियमेन प्रयत्नानन्तरं ज्ञानं न' यज्यते । प्रयत्नं विनापि कदाचिदुपलभ्येत । न च प्रयत्नव्यज्यता शब्दानां युक्ता । 'तस्य' प्रयत्नस्य [486/s] 'आवृता-'वुपलम्भावरणे शब्दविषयज्ञानजनके श्रोत्रे 'शब्देषु' च विषयेषु 'सर्व्वथा'ऽकिञ्चित्करत्वे'नानुपयोगत' इत्युक्तं प्राक्[2354] ।

किञ्च (।)

....4.198 कदाचिन्निरपेक्षस्य कार्याऽकृतिविरोधतः ।

[2349] १ नैयायिकस्य ।
[2350] २ कारणेपि व्याप्तिः स्यादित्याह ।
[2351] ३ स्वभावहेतौ ।
[2352] ४ शब्दोच्चारणप्रयत्नानन्तरजं शब्दालम्बनं ज्ञानं ।
[2353] ५ भवार्थे गहादित्वाच्छः प्रयत्नानन्तरीयकत्वं घटादौ सत् विद्युदादौ चासदिति सपक्षे द्विधावृत्तिर्यतः ।
[2354] १ श्रुतिपरीक्षायां ।

कादाचित्कफलं सिद्धं तल्लिङ्गं ज्ञानमीदृशम् ॥ १९८ ॥

सहकारिभिरनाधेयातिशयत्वेन्नित्यस्य ‘कदाचित्’ प्रयत्नकाले कार्यस्य ज्ञानस्य(।-)कृतिविरोधतः कारणात् तच्छ्रुतिविषयं ज्ञानं ‘कादाचित्क’स्यानित्यस्य शब्दस्य ‘फलं लिङ्गं’ कार्य‘मीदृशं’ नियमेन प्रयत्नानन्तरभावि ‘सिद्धम्’ ॥ (१९८)

### (३) कार्यस्वभावहेत्वोर्निर्देशस्य फलम्

....4.199 एतावतैव सिद्धेपि स्वभावस्य पृथक् कृतिः ।
कार्येण सह निर्देशे मा ज्ञासीत् सर्वमीदृशम् ॥ १९९ ॥

एतावता प्रयत्नानन्तरीयकत्वेनैव स्वभावहेतुनिर्देशेपि सिद्धे प्रयत्नानन्तरमुत्पादस्याभिव्यक्तेश्च तथाभिधानात् । तथापि स्वभावस्य कृतकत्वस्य हेतोर्या पृथक्कृतिः सा कार्येण सह श्लेषेण निर्देशे मा ज्ञासीत् प्रतिपत्ता सर्वं स्वभावहेतुमी[99a/MA]दृशं सपक्षे द्विधावृत्तिं कृतकत्वादेः विपर्ययव्याप्तिसम्भवात् । (१९९)

किञ्च (।)

....4.200 व्युत्पत्त्यर्था च हेतूक्तिरुक्तार्थानुमितौ कृता ।
अत्र प्रभेद आख्यातः लक्षणन्तु न भिद्यते ॥ २०० ॥

अनुमितौ स्वार्थानुमाने ‘हेतूक्तिरुक्तार्था’ऽभिहितलक्षणापि प्रतिपत्तॄणां व्युत्प‘त्त्यर्था च’ परार्थानुमाने ‘कृता’ । अत्र च ‘प्रभेद आख्यातः । लक्षणं’ पुनर्हेतोर्न ‘भिद्यते’ ।[2355] तथाविधलक्षणहेतुवचनस्य परार्थानुमानत्वात् । (२००)

....4.201 तेनात्र कार्यलिङ्गेन स्वभावोप्येकदेशभाक् ।
सदृशोदाहृतिश्चातः प्रयत्नाद् व्यक्तिजन्मनः ॥ २०१ ॥

‘तेन’ प्रयत्नान्तरीयकत्वेन ‘कार्यलिङ्गेन’ श्लेषनिर्देशात् । स्वभावहेतुधर्मभाजा ‘स्वभावोपि’ सप‘क्षैकदेशभाक्’ भवति इत्यक्तो भवति । ‘अत’ एव कार्य[487/s] स्वभावतया ‘सदृश’स्य प्रयत्नानन्तरीयकत्व‘स्योदाहृति’रा चा र्ये ण कृता । ‘प्रयत्नाद्[2356] व्यक्तेर्जन्म’नश्च भावात् । यदा प्रयत्नाद् व्यक्तिस्तदा कार्यहेतुः । यदा जन्म[2357] तदा स्वभावहेतुः । (२०१)

कार्यस्वभावयोः प्रभेदनिर्देशस्य किं फलमित्याह ।

....4.202 यन्नान्तरीयका सत्ता यो वात्मन्यविभागवान् ।
स तेनाव्यभिचारी स्यादित्यर्थं तत्प्रभेदनम् ॥ २०२ ॥

‘यन्नान्तरीयका सत्ता’ भेदे सति यमन्तरेण हेतु[2358] र्न भवति । ‘यो वा’ स्व आत्मीयः [2359] साध्या‘दविभागवान्’ (।)[2360] आत्मा स्वभावः ‘स तेन’ कारणेन ‘व्यापकेन’ वा-

[2355] २ स्वार्थानुमानोक्तात् ।
[2356] १ उपलब्धेः कार्यत्वं ज्ञानत्वात् । उत्पत्तेः स्वभावत्वं शब्दरूपत्वात् ज्ञानस्य ।
[2357] २ शब्दस्य ।

ऽ'व्यभिचारी' व्यभिचाररहितः 'स्यात्' नान्य 'इत्यर्थ'मेतत् प्रयोजनं (।) तयोः कार्यस्वभावयोः प्रभेदनं । (२०२)

एवञ्च सति (।)

....4.203 संयोग्यादिषु येष्वस्ति प्रतिबन्धो न तादृशः ।
न ते हेतव इत्युक्तं व्यभिचारस्य सम्भवात् ॥ २०३ ॥

'संयोगि'[2361] समवायि एकार्थसमवायि आकाशा'दिषु' पराभिमतेषु हेतुषु 'येषु प्रतिबन्धः तादृश'स्तादात्म्यतदुत्पत्तिलक्षणो 'नास्ति (।) न ते हेतव इत्युक्तं भवति' । अतदात्मनोऽतदुत्पत्तेश्च साध्य'व्यभिचारस्य सम्भवात्' । (२०३)

अथ संयोग्यादिषु तदुत्पत्तिप्रतिबन्धोस्ति तदा (।)

....4.204 सति वा प्रतिबन्धेस्तु स एव गतिसाधनः ।
नियमो ह्यविनाभावोऽनियतश्च न साधनम् ॥ २०४ ॥

'सति प्रतिबन्धे स एव गतिसाधनः' साध्यप्रतिपत्तिहेतुरस्तु निष्फला संयोग्यादिकल्पना (।) 'नियमो' नियतत्वं 'हि' साधनस्य साक्षा'दविनाभाव' उच्यते (।) स च तादात्म्यतदुत्पत्तिभ्यां नान्यथा (।) 'स च' तद्विकलत्वात् साध्ये'ऽनियतः' । न स साधनं । यथा संयोगित्वेपि स वह्निर्धूमस्येतिस्वभावकार्यसिद्ध्यर्थं द्वौ द्वौ हेतुविपर्ययावि ति व्याख्यातं । (२०४)

[488/s]

## (४) विवादाद् भेदसामान्य इत्यस्य व्याख्यानम्

विवादाद् भेदसामान्य इति व्याख्यातव्यं ।

स्यात् प्राणादिमत्वं हेतुर्यदि विपक्षाद्धेतुव्यतिरेकः स्यात् (।) स एव तु न सिध्यतीत्याह ।

....4.205 ऐकान्तिकत्वं व्यावृत्तेरविनाभाव उच्यते ।
तच्च नाप्रतिबद्धेषु तत एवान्वयस्थितिः ॥ २०५ ॥

विपक्षाद्भेदो 'व्यावृत्ते'र्बाधकप्रमाणनिश्चितत्वात् । 'ऐकान्तिकत्वमविनाभाव उच्यते (।) तच्च' व्यावृत्तेरैकान्तिकत्वं स्वसाध्या'प्रतिबद्धेषु' प्राणादिषु नास्ति । यदि ह्यात्मनि प्रतिबद्धाः प्राणादयः तदात्मनिवृत्तौ निवृत्ता विपक्षाद् गम्येरन् (।) अन्यथा तु पक्ष एव सन्देहः (।) किममी आत्माभावेपि वर्त्तन्ते उत नेति (।) यथा च प्रतिबन्धाद् व्यतिरेकनिश्चयः । तथा ततः प्रतिबन्धादेवा'न्वयस्य स्थितिः' । न तु सहदर्शनमात्रेण । (२०५)

तस्मात् साध्यस्य (।)

....4.206 स्वात्मत्वे हेतुभावे वा सिद्धे हि व्यतिरेकिता ।
सिध्येदतो विशेषे न व्यतिरेको न चान्वयः ॥ २०६ ॥

'स्वात्मत्वे' हेतुस्वभावात्मकत्वे 'हेतुभावे वा सिद्धे' सति (तदभावे नियमेन व्यतिरेकात्) विपक्षाद् व्यापककारणव्यतिरेके स्वभावकार्यहेत्वो'र्व्यतिरेकिता' सिध्येत् । नान्यथेति न्याय एषः

2358 ३ कार्यहेतुः ।

2359 ४ स्वभावः ।

2360 ५ हेत्वन्तरानपेक्षत्वार्थं ।

2361 ६ वैशेषिकादिकल्पिताः ।

। यतः प्रतिबन्धेनैवान्वयव्यतिरेकसिद्धिः । अतो [99b/MA]विशेषेऽसाधारणे हेतौ नान्वयो न वा व्यतिरेकः सिध्यति ॥ (२०६)

एवं तर्हि सपक्षविपक्षव्यतिरेकाभ्यां व्यावृत्तेर्विशेषः कथ मा चा र्ये णोक्तः इत्याह ।

....4.207 अदृष्टिमात्रमादाय केवलं व्यतिरेकिता ।
उक्ताऽनैकान्तिकस्तस्मादन्यथा गमको भवेत् ॥ २०७ ॥

'अदृष्टिमात्रं' बादकप्रमाणरहित'मादाय' पराभिप्रायेण सपक्षाद् 'व्यतिरेकितोक्ता' । तस्यादर्शनमात्रेण व्यतिरेकानिश्चया'दनैकान्तिक' आचार्येणोक्तः । 'अन्यथा' विपक्षाद् व्यतिरेकनिश्चये 'गमको' हेतु'र्भवेत्' । ततश्चानैकान्तिकवर्गे न प्रक्षिप्येत । (२०७)
[489/s]

(५) साध्याभावस्य साधनाभावेन न व्याप्तता

क. जीवच्छरीरं प्राणादिमत्त्वादित्यत्र दोषः

ननु साध्यनिवृत्तौ[2362] नियमेन साधनं निवर्त्तत इति 'साध्याभावः साधनाभावेन' व्याप्तः । ततश्च (।)

....4.208 प्राणाद्यभावो नैरात्म्यव्यापीति विनिवर्त्तने ।
आत्मनो विनिवर्त्तेत प्राणादिर्यदि तच्च न ॥ २०८ ॥

'प्राणादेः' साधनस्या'भावो नैरात्म्य'स्य सात्मकत्वसाध्याभावस्य 'व्यापीति' हेतो'रात्मनो' घटादेर्विपक्षाद् 'विनिवर्त्तने' सति 'प्राणादिर्विनिवर्त्त'ते । न ह्यन्यथा साधनाभावः साध्याभावस्य च व्यापको भवति । ततो यत्र प्राणादिभावनिवृत्तिस्तत्र सात्मकत्वभावनिवृत्तिरपीति यद्युच्यते 'तच्च न' युक्तं । (२०८)

...4.209a अन्यस्य विनिवृत्यान्यविनिवृत्त्येरयोगतः ।
तदात्मा तत्प्रसूतिश्चेन्नैतत्;

'अन्यस्य' कारणस्यात्मनो 'विनिवृत्त्या' प्राणादे'र्विनिवृत्तेरयोगतः' । तादात्म्यतदुत्पत्तावेव हि साध्यनिवृत्तौ साधननिवृत्तिर्युक्ता तत्स्वभावत्वात् तदायत्तत्वाच्च । सति च साध्यसाधनयोर्नियमेन निवर्त्त्यनिवर्त्तकभावे साध्याभावः साधनाभावेन व्याप्यते । प्राणादि'स्त'स्यात्मन 'आत्मा' स्वभावः । 'त'स्मात् 'प्र'सूतिर्वास्येति चेत् । 'नैतद'स्ति युक्तं[2363] । तथा हि (।)

...4.209b आत्मोपलम्भने ॥ २०९ ॥

....4.210 तस्योपलब्धावगतावगतौ च प्रसिध्यति ।
ते चात्यन्तपरोक्षस्य दृष्ट्यदृष्टी न सिध्यतः ॥ २१० ॥

'आत्मन उपलम्भने' सति 'तस्य' प्राणादे'रुपलब्धौ' सत्यामात्मनोऽ'गतौ प्राणा-'देर'गतौ च' सत्यां कार्यकारणभावः 'प्रसिध्यति । ते च दृष्ट्यदृष्टी' कार्यकारणभावसाधनेऽ'त्यन्तप'रो'क्ष'स्यात्मनो 'न सिध्यतः' । अत्यन्तपरोक्षस्य कथमदृष्टिरपि न सिध्यतीति चेत् । अभावसाधिका दृश्यानुपलब्धिर्न सिध्यत्येव । अदृष्टिमात्रन्तु नाभावसाधकं । ततः प्राणादेरात्मना सह प्रतिबन्धासिद्धेर्नात्मनिवृत्त्या प्राणादिनिवृत्तिसिद्धिः । (२०९, २१०)

किञ्च (।)

---

2362 १ तादात्म्यनिवृत्ति ।

2363 २ न चेष्टं परस्य केवलमेतावानेव प्रतिबन्धे इत्युपन्यासः ।

[490/s]

....4.211 अन्यत्रादृष्टरूपस्य घटादौ नेति वा कुतः ।
अज्ञातव्यतिरेकस्य व्यावृत्तेर्व्यापिता कुतः ॥ २११ ॥

आत्मनो'न्यत्र' जीवच्छरीरे'ऽदृष्टरूप'स्य 'घटादौ न' सत्त्व'मिति' यदुच्यते त'त्कुतः' सिद्धं । दृश्यानुपलब्ध्या ह्यभावसिद्धिः । न चादृष्टचरे तत्सम्भवः । 'अज्ञातो व्यतिरेको'ऽभावो यस्य तस्यात्मनो या 'व्यावृत्ति'र्घटादौ तस्याः प्राणादिनिवृत्त्या 'व्यापिता' व्यापनं 'कुतः' सम्भवि । येन जीवच्छरीरे प्राणादिनिवृत्त्यभावात् सात्मकत्वनिवृत्त्यभावे सत्यात्मसिद्धिः स्यात् ॥ (२११)

ननु यथा घटादौ प्राणाद्यभावनिश्चयस्तथात्माभावनिश्चयोपि किं न भवतीत्याह ।

....4.212 प्राणादेश्च क्वचिद् दृष्ट्या सत्त्वासत्त्वं प्रतीयते ।
तथात्मा यदि दृश्येत सत्त्वासत्त्वं प्रतीयते ॥ २१२ ॥

'प्राणादेः क्वचि'ज्जीवच्छरीरे 'दृष्ट्या सत्त्वं' प्रतीयते । मृतदेहे चोपलब्धिलक्षणप्राप्तस्यास्यादृष्ट्या'ऽसत्त्वं' प्रतीयते । 'तथा यदि' क्वचिद् देहे 'आत्मा दृश्येत' तदा 'तत्र सत्त्व'मस्य प्रतीयेत । अन्यत्रोपलभ्यस्वरूपस्यास्यानुपलब्धेर'सत्त्वं प्रतीयेत । न' चात्मोपलब्धिरस्ति क्वचिदिति न तदभावनिश्चयः । (२१२)

यदप्युच्यते (।) यदि न सात्मकं जीवच्छरीरं तदास्य प्राणादिविरहप्रसङ्गो नरात्म्याद् घटवदिति प्रसङ्गसाधनं । तच्चायुक्तं दर्शयितुमाह ।

....4.213 यस्य हेतोरभावेन घटे प्राणो न दृश्यते ।
देहेपि यद्यसौ न स्याद् युक्तो देहे न सम्भवः ॥ २१३ ॥

'यस्य' बुद्धिदेहातिशयप्रयत्न'देर्हेतोरभावेन घटे प्राणो न दृश्यते (।) देहेपि यद्यसौ' बुद्धिदेहातिशयप्रयत्नादि'र्न स्यात्' (।) तदा देहेपि हेतुविरहात् प्राणादेर्न[2364] [100a/MA]'संभवो युक्तो' यथा मृतशरीरे । जीवद्देहे तु बुद्ध्यादिसद्भावादेव प्राणादिरुचितसंभव इति नात्माभावे तदभावप्रसङ्गः सङ्गतः । (२१३)

अथ घटजीवच्छरीरादीनां नैरात्म्येन यथा साधर्म्यं तथा प्राणादिरहिततयापि स्यात् । न च भवति (।) तस्मान्निरात्मके घटादौ प्राणादिरदृष्टो यत्र वर्त्तते तत्र सात्मकत्वं साधयतीत्याह ।

....4.214 भिन्नेपि किञ्चित् साधर्म्याद् यदि तत्त्वं प्रतीयते ।
प्रमेयत्वाद् घटादीनां सात्मत्वं किन्न मीयते ॥ २१४ ॥

[491/s]

घटभिन्नेपि जीवद्देहे 'किञ्चि'न्मात्रेण निरात्मकत्वेन 'साधर्म्यात् यदि तत्त्वं' प्राणादिविरहिततया घटसदृशत्वं 'प्रतीयते' तदा 'प्रमेयत्वा'द्धेतो'र्घटादीनां' जीवच्छरीर'सात्मकत्वं किन्न मीयते' (। २१४)

....4.215 अनिष्टेश्चेत् प्रमाणं हि सर्वेष्टीनां निबन्धनम् ।
भावाभावव्यवस्थां कः ? कर्त्तुं तेन विना प्रभुः ॥ २१५ ॥

'अनिष्टेश्चेत्' (।) ननु 'प्रमाणं हि सर्व्वेष्टीनां निबन्धनं' । तद्वशेनार्थान्न स्थितेः । 'तेन' प्रमाणेन 'भावाभाव'यो'र्व्यवस्थां कर्त्तुं कः प्रभुः' । यदि च किञ्चित् साधर्म्यमात्रात् साधनं साध्यसाधकं । तदा प्रमेयत्वाद् घटस्यापि सात्मकत्वसाधनादनिष्टिरनुपयुक्ता । (२१५)

[2364] १ शाश्वत आत्मा तद्विपरीताः प्राणादय इति न तादात्म्यं ।

### ख. स्मृतीच्छादयः प्राणादिहेतुः

यदि तर्हि नात्मा प्राणादेर्हेतुः (।) कस्तर्हि भविष्यतीत्याह । यथा योगं (।)

...4.216a स्मृतीच्छायत्नजः प्राणनिमेषादिस्तदुद्भवः ।
विषयेन्द्रियचित्तेभ्यः ;

'स्मृतीच्छा'प्र'यत्ने'[2365] भ्यो जातः 'प्राणनिमेषादिः' समाहितस्य निरुद्धवायोः समाधिव्युत्थितस्य स्मरणात् प्राणवृत्तिर्गाढप्रहारादिभिर्व्याहतप्राणस्य इच्छाप्रयत्नाभ्यां प्राणप्रवृत्तिः । स्वस्थस्य साद्गुण्यात्[2366] निमेषादेरिच्छाप्रयत्नजत्वं व्यक्तं । तेषां च स्मृतीच्छायत्नाना'मुद्भवो विषयेन्द्रियचित्तेभ्यो' यथा[2367] योगं (।) क्वचिद् विषयाद् वदरादे रसनास्रवादिहेतो रसादिस्मृतिर्भवति । इन्द्रियाद्वा विलादेरपटुजानहेतोः प्रदीपमण्डलादिस्मरणं भवति बुद्धेरेवातद्विषयस्यातीतानुकूलतादिस्मृतिरुद्भवति ।

ननु षट् प्रवृत्तिबुद्धय एवात्मजाः प्रवृत्तिबुद्धिजाश्च स्मृत्यादयः । तद्भवाश्च प्राणादयः इति परंपराऽत्महेतुका एवेत्याह । ताः षड्बुद्धयः (।)

...4.216b ताः स्वजातिसमुद्भवाः ॥ २१६ ॥

....4.217 अन्योन्यप्रत्ययापेक्षा अन्वयव्यतिरेकभाक् ।
एतावत्यात्मभावोयमनवस्थान्यकल्पने ॥ २१७ ॥

[492/s]

'अन्योन्यप्रत्ययापेक्षा' यस्या य आत्मीयः प्रत्ययः सहकारिकारणं इन्द्रियादि तस्मिन्नपेक्षाऽयत्तिर्यासां तास्तथा सत्यः स्वजातिसमुद्भवाः समनन्तरप्रभवा न तु परंपरयाप्यात्मापेक्षिण्य इत्यर्थः । 'एताव'ति कारणकलापे'ऽयमात्मभावः' षडायतनं गृहीतो'ऽन्वयव्यतिरेकभाक्' प्रतिबद्धः कारणत्वेन ततोन्यस्य[2368] 'कल्पनेऽनवस्था' कारणानां । तस्मान्नादृष्टसामर्थ्यस्यात्मनो निवृत्तौ प्राणादिनिवृत्तिर्युक्ता ॥ (२१६, २१७)

किञ्च (।)

....4.218 श्रावणत्वेन तत् तुल्यं प्राणादि व्यभिचारतः ।
न तस्य व्यभिचारित्वाद् व्यतिरेकेपि चेत् कथम् ॥ २१८ ॥

'तत् प्राणादि'साधनं 'श्रावणत्वेन' हेतुना 'व्यभिचारतो'ऽनैकान्तिकत्वात्[2369] 'तुल्यं' । नैत[2370] दस्ति । तस्य श्रावणत्वस्य विपक्षाद् बहुलं व्यतिरेकेपि व्यतिरेकस्य 'व्यभिचारतः' । न हि श्राव(ण)त्वमनित्येभ्यः प्रायो व्यावृत्तमित्यनित्यत्वव्यतिरेकाव्यभिचारि शक्यमवसातुं ।[2371] पक्ष एवानित्येन सहाकार्यविरोधात् । प्राणादि तु नियमेन विपक्षाद् व्यतिरेकाव्यभिचारीति न युक्तं श्रावणत्वेन तुल्यमिति चेत् । पृच्छत्या चा र्यः । प्राणादिश्रावणत्वेनातुल्यं कथमिति । (२१८)

इतर आह ।

---

[2365] १ प्राणवायोः प्रेरकोऽन्तर्व्यापारः प्रयत्नः ।

[2366] २ किञ्चित् पश्यतोऽक्षान्तरप्रस्फुरणे शरीरसाद्गुण्यबुद्धिप्रयत्नादयः प्राणादिषु ।

[2367] ३ स्मृतिरनुभवात् तत इन्द्रियविकारस्फुरणे । अनुभूतस्मृत्या स्फुरणं नानास्रवः । मातुलुङ्गदर्शने ।

[2368] १ आत्मादेः ।

[2369] २ उभयत्र व्यतिरेकव्यभिचारस्य तुल्यत्वात् ।

[2370] ३ परः ।

[2371] ४ यद्यपि कुड्यादेरनित्याद् व्यावृत्तः सपक्षाकाशात् तथापि व्यभिचारोऽच्छटादिशब्देऽनित्यत्वादिति ।

....4.219 नासाध्यादेव विश्लेषस्तस्य नन्वेवमुच्यते ।
साध्येनुवृत्यभावोर्थात् तस्यान्यत्राप्यसौ समः ॥ २१९ ॥

तस्य श्रावणत्वस्यासाध्याद् विपक्षादेव न विश्लेषो व्यावृत्तिः किन्तु सपक्षादपि । प्राणादेस्तु सर्व्वस्य जीवच्छरीरस्य सात्मत्वेन साध्यत्वात् (।) सपक्ष एव नास्तीति कथन्ततो व्यावृत्तिरिति (।) अत्राह । 'नन्वेवमसाध्यादेव' श्रावणत्वस्य 'न विश्लेष' [100b/MA]इत्याख्याने 'साध्य' साध्यवति सपक्षे'ऽनुवृत्ते'रन्वयस्या'भावोऽर्था'दुक्तः स्यात् । यो हि विपक्षमात्रादव्यावृत्तः स सपक्षादपि व्यावृत्तेरन्वयरहित उक्तो भवति । तथा च प्राणादेरसौ सपक्षानुवृत्त्यभावः 'समः' । न हि प्राणादिसपक्षे क्वचित् सिद्धं । सर्व्वस्य जीवच्छरीरस्य पक्षत्वात् । (२१९)

....4.220 असाध्यादेव विच्छेद इति साध्येस्तितोच्यते ।
अर्थापत्याऽत एवोक्तमेकेनोभयदर्शनम् ॥ २२० ॥

[493/s]

'असाध्याद्' विपक्षा'देव' साधनस्य 'विच्छेदो' व्यावृत्ति'रित्य'भिधानेनार्थापत्त्यसामर्थ्येन 'साध्ये' सपक्षे'ऽस्तितोच्यते' । यदि तु सपक्षादपि व्यावृत्तिस्तदा विपक्षादेव व्यावृत्तिरित्यसङ्गतं । यतो विपक्षादेव व्यावृत्तिरिति व्यतिरेक आक्षिप्तान्वय एव भवति । अत एवा चा र्ये ण 'एकेन' व्यतिरेकेणान्वयेन वा नियमवता 'दृष्टेनोभयदर्शन'मुक्तं । अर्थापत्त्याऽन्यतरेणोभयदर्शनादिति । (२२०)

यस्मादैकान्तिको व्यतिरेक आक्षिप्तान्वय एव भवति । अतः (।)

....4.221 ईदृगव्यभिचारोतोऽनन्वयिषु न सिध्यति ।
प्रतिषेधनिषेधश्च विधानात् कीदृशोऽपरः ॥ २२१ ॥

'ईदृग्' विपक्षे व्यतिरेको (ऽ) 'व्यभिचारः अनन्वयिषु' हेतुषु 'न सिध्यति' । य एव साध्येनान्वितो हेतुस्तस्यैव विपक्षादेव व्यतिरेकः । यदि तु सत्यपि साध्ये हेत्वभावस्तदा सपक्षादपि व्यतिरेकात् कथं विपक्षादेव निवृत्तिः । किञ्च (।) प्राणादेः सपक्षे 'प्रतिषेध'स्य निवृत्ते[2372] 'निषेधो विधानादपरः कीदृशः' । प्रतिषेधनिषेधो हि विधिरेव परस्परपरिहारेणावस्थितेः । ततः प्राणादेः 'सपक्षान्निवृत्तिर्नास्तीत्य'र्थाद् वृत्तिरेवोक्ता स्यादिति न व्यतिरेकित्वं । (२२१)

स्यादेवं यदि सपक्षो भवति । किन्तु (।)

....4.222 निवृत्तिर्नासतः साध्यादसाध्येष्वेव नो ततः ।
नेति सैव निवृत्तिः किं निवृत्तेरसतो मता ॥ २२२ ॥

सात्मकत्वे साध्ये सपक्षो नास्तीत्य'सतः साध्यात्' सपक्षात् प्राणादे'र्निवृत्तिर्नास्ति ततोऽसाध्येषु' विपक्षेष्वेव 'नो' वृत्तिरिति व्यतिरेकित्वमिष्टं । एवन्तर्हि सपक्षाद'सतो' हेतो'र्निवृत्तेर्निवृत्ति'रस्माकं अस्तित्वेन येष्टा सैव 'किन्ने[2373]ति' भवतो 'मता' । यदि ह्यसन् निवृत्तेर्नाधिकरणं तदा निवृत्तनिवृत्तेः कथं भविष्यति । (२२२)

किञ्च (।)

....4.223 निवृत्त्यभावस्तु विधिर्व्वस्तुभावोऽसतोपि सन् ।
वस्त्वभावस्तु नास्तीति पश्य बान्ध्यविजृम्भितम् ॥ २२३ ॥

'असतोपि' सपक्षाद्धेतु'निवृत्ते'र्नीरूपाया अ'भावस्तु विधिर्वस्तुभावो' हेतुसम्भवः स नेष्यते (।) यद्यसति सपक्षे हेतुनिवृत्तिर्नास्ति तदा हेतुरेवास्तीत्युक्तं स्यात् । [494/s] 'वस्तुनो'

[2372] १ प्रतिषेधव्याख्या (।) प्राणादेः सपक्षेऽभावो नास्तीति ।

[2373] २ कस्मात् ।

हेतो'रभावस्तु' निवृत्तिशब्दवाच्यो 'नास्तीति पश्य बान्ध्यविजृम्भितं' परेषां । असत्यसत्त्वमविरुद्धं । विरुद्धन्तु सत्त्वमित्यर्थः । (२२३)

अपि च (।)

....4.224 निवृत्तिर्यदि तस्मिन्न हेतोर्वृत्तिः किमिष्यते ।
साऽपि न प्रतिषेधोयं निवृत्तिः किं निषिध्यते ॥ २२४ ॥

'हेतोस्तस्मिन्नस'ति सपक्षे 'निवृत्तिर्यदि' नास्ति तदा 'किं वृत्तिरिष्यते' विधिनिषेधयोरन्योन्यव्यवच्छेदात्मत्वादेकप्रतिषेधस्य तदपरविधिनान्तरीयकत्वात् । ततश्चान्वयव्यतिरेकित्वात् प्राणादिर्न व्यतिरेकी । 'सा' वृत्तिर'पि ना'सति सपक्ष इति चेत् । ननु वृत्तिनिषेधः 'प्रतिषेधोयं' निवृत्त्यात्मकः । ततश्चासतो वृत्तिनिवृत्तेरधिकरणत्वात् । तस्मि'न्निवृत्तिः किं निषिध्यते' । सत्याश्च निवृत्तौ श्रावणत्ववदसाधारणं प्राणादि स्यात् । (२२४)

ग. शाब्दो व्यवहारो विधिप्रतिषेधप्रयोजनः

अथाधिकरणतयाऽपादानतया वा सतः प्रतीतिर्नास्तीति न तस्मान्निवृत्तिरित्युच्यते । एतदर्थं हि (।)

....4.225 विधानं प्रतिषेधश्च मुक्त्वा शाब्दोस्ति नापरः ।
व्यवहारः स चासत्सु नेति प्राप्तात्र मूकता ॥ २२५ ॥

'विधानं प्रतिषेधश्च मुक्त्वाऽपरः श(ा)ब्दो' व्यवहारो 'नास्ति' तयोरेव शब्दप्रतिपाद्यत्वात् । 'स च' विधिप्रतिषेध'व्यवहारोऽसत्सु नास्तीति । अत्रा'सत्सु 'मूकतैव प्राप्ता' । तथा ह्यसति विधिव्यवहारस्तावन्नास्त्येव । प्रतिषेधोपि त्वन्मते नास्तीति युक्तं मूकत्वं । (२२५)

किञ्च (।)

....4.226 सताश्च न निषेधोऽस्ति सोऽसत्सु च न विद्यते ।
जगत्यनेन न्यायेन नञर्थः प्रलयं गतः ॥ २२६ ॥

'सताश्च' पदार्थानां 'न निषेधोस्ति' विद्यमानत्वात् । स प्रतिषेधोऽ'सत्सु न' त्वदभिप्रायाद् 'विद्यते । अनेन न्यायेन नञोर्थः' प्रतिषेधो 'जगति' विषये 'प्रलयं' [101a/MA]'गतः' । (२२६)

....4.227 देशकालनिषेधश्चेद् यथास्ति स निषिध्यते ।
न तथा न यथा सोस्ति तथापि न निषिध्यते ॥ २२७ ॥

क्वचित् सतामेवार्थानामन्ययो'र्देशकाल'योर्नञादिना 'निषेध' इष्ट'श्चेत् । यथा' [495/s] यद्देशकालसम्बद्धत्वेन 'सोऽर्थो' नास्ति तथा 'निषिध्यते' त्वदभिप्रायादतो 'निषेधायो'गात् । 'यथा' चास्ति स 'तथा'पि न निषिध्यते सत्वात् । (२२७)

....4.228 तस्मादाश्रित्य शब्दार्थं भवाभावसमाश्रयम् ।
अबाह्याश्रयमत्रेष्टं सर्वं विधिनिषेधनम् ॥ २२८ ॥

'तस्माच्छब्द'स्यार्थमारोपितबहीरूपमन्यव्यवच्छेदम'बाह्याश्र'यं बाह्यविषयरहितं य एव 'भावाभाव'योर्व्विधिप्रतिषेधविकल्पप्रतिपाद्ययोः 'समाश्रय'स्तमा'श्रित्य' व्यवहारे 'सर्व्वं विधिनिषेध[2374] नमिष्टं' । (२२८)

यदि वस्तु शब्दविकल्पाभ्यां विषयीक्रियते सर्व्वथा प्रतीतेः शब्दप्रमाणान्तरवैफल्यप्रसङ्गः । ततोन्यापोह एव विधिनिषेधसम्बन्धयोर्व्विषयः । तथा शब्दात् सत्त्वासत्त्वाभ्यां वस्तुनः प्रतीतौ

[2374] १ बौद्धार्थे ।

विधिनिषेधयोरवैफल्यप्रसङ्गः । तस्मात् भावाभावसाधारणोऽन्वयव्यवच्छेदो विधिप्रतिषेधाभ्यां सम्बध्यत इति ।

....4.229 ताभ्यां स धर्मी सम्बद्धः ख्यात्यभावेपि तादृशः ।
शब्दप्रवृत्तेरस्तीति सोपीष्टो व्यवहारभाक् ॥ २२९ ॥

'ताभ्यां' विधिप्रतिषेधाभ्यां 'स' शब्दार्थो 'धर्मी सम्बद्धः ख्याति'वस्तुतो'ऽभावेपि तादृशो' विधिप्रतिषेधसम्बद्ध[2375] स्यार्थस्य (।) न हि शब्दार्थ एव कश्चित् बाह्याबाह्यार्थयो[2376] रयोगात् । तदितर[2377] स्य चाभावादित्युक्तेः । कुत एव विधिनिषेधाभ्यां तस्या सम्बन्धः स्यात् । तथा'पि स' विधिः प्रतिषमधश्च 'शब्दप्रवृत्तेरस्तीति व्यवहारभागिष्टः' । शब्दो हि प्रवर्त्तमानो विधिप्रतिषेधव्यवहारं वस्तुतोऽसन्तमप्यविद्याभ्यासतो वासनावशादुपदर्शयतीति तदनुरोधात् सन्नुच्यते[2378] । (२२९)

....4.230 अन्यथा स्यात् पदार्थानां विधानप्रतिषेधने ।
एकधर्मस्य सर्वात्मविधानप्रतिषेधनम् ॥ २३० ॥

...4.231a अनानात्मतया;

'अन्यथा' यद्येवं नेष्यते तदा 'पदार्थानां विधानप्रतिषेधने'ऽभ्युपगम्यमाने यदि धर्माधर्मिणोऽभिन्नास्तदैकस्य 'धर्मस्य' विधाने प्रतिषेधने वा कृते 'सर्व्वेषां' धर्माणां ध'र्म्यात्म'भूतानां 'विधानप्रतिषेधनं स्यात्' । (२३०) [2379] तेषां धर्माणामेकधर्मिस्वभावत्वेनानानात्मतयैकस्वभावतयैकस्य धर्मस्य विधिः प्रतिषेधो वा सर्व्वस्य भवेत् ॥
[496/s]

...4.231b भेदे नानाविधिनिषेधवत् ।
एकधर्मिण्यसंहारो विधानप्रतिषेधयोः ॥ २३१ ॥

धर्मिणः सकाशाद् धर्माणां 'भेदे'ऽभ्युपगम्यमाने 'एक'स्मिन् 'धर्मिणि' धर्माणां 'विधानप्रतिषेधयोरसंहारः' सामानाधिकरण्यं न स्यात् । 'नानाविधिनिषेधवत्' । स्वतन्त्रानेकपदार्थविधिनिषेधाविव नैकत्र वस्तुनि सामान्याधिकरण्यभाजौ । (२३१)

अस्मन्मते तु (।)

....4.232 एकधर्मिणमुद्दिश्य नानाधर्मसमाश्रयम् ।
विधावेकस्य तद्भाजमिवान्येषामुपेक्षकम् ॥ २३२ ॥

....4.233 निषेधे तद्विविक्तञ्च तदन्येषामपेक्षकम् ।
व्यवहारमसत्यार्थं प्रकल्पयति धीर्यथा ॥ २३३ ॥

शब्दार्थ धर्मिणमेकं 'नानाधर्मसमाश्रयमेकस्य' धर्मस्य 'विधौ' क्रियमाणे 'तद्भाजमेक'धर्मसम्बद्धमि'वान्येषां' विधिप्रतिषेधाभ्यामपरामृष्टानां धर्माणामु'पेक्षकं' (।) तथैकधर्मस्य 'निषेधे' क्रियमाणे एकं धर्मिणं नानाधर्मसमाश्रयणं 'तेन' निषिध्यमानेन धर्मेण 'विविक्त'मेव 'तदन्येषां' निषिध्यमानधर्मेतरेषां धर्माणा'मपेक्षकमु'द्दिश्य 'यथा' कल्पिका 'धीर्व्यवहारं' परमार्थतो'ऽसत्यार्थं कल्पयति' । (२३२, २३३)

---

[2375] २ लक्षणस्य ।

[2376] ३ द्वयं नास्ति ।

[2377] ४ तयोरन्यस्य ।

[2378] ५ यदि न बौद्धो विधिप्रतिषेधः धर्मिणा धर्माणामभेदो भेदो वेति दूषयति ।

[2379] ६ किं कारणं ।

....4.234 तं तथैवाविकल्पार्थं-भेदाश्रयमुपागताः ।
अनादिवासनोद्भूतं बाधन्तेऽर्थं न लौकिकम् ॥ २३४ ॥

'तथैव' कल्पनानतिक्रमेण 'त'म्व्यवहारमर्थ'भेदाश्रयम'न्यव्यावृत्तिविषय'मनादि[101b/MA]वासनाया उद्भूतं' । यथा तत्त्वेन विकल्पोपगताः प्रतिपन्ना व्यवहर्त्तारो लौकिकं बौद्ध'मर्थं' शब्दप्रतिपादित'न्न बाधन्ते' व्यवहारोच्छेदप्रसङ्गात् । (२३४)

## घ. धर्मभेदव्यवहारविचारः

कथं पुनर्द्धर्मभेदो व्यवह्रियते इत्याह ।

....4.235 तत्फलोऽतत्फलश्चार्थो भिन्न एकस्ततस्ततः ।
तैस्तैरुपप्लवैर्नीतसञ्चयापचयैरिव ॥ २३५ ॥

अर्थः शब्दादिस्त'त्फलः' श्रोत्रविज्ञानादिहेतु'रतत्फलश्च'क्षुर्व्विज्ञानाद्यहेतुस्ततो गन्धादेः श्रोत्रज्ञानाहेतोः (।) 'ततो' रूपादिकाच्चक्षुर्व्विज्ञानहेतो'र्भिन्नो' व्यावृत्तस्तत्तद्व्यावृत्तिविशिष्टतया कल्पितधर्मिधर्मनानात्वः परमार्थत 'एकस्तैस्तैरुपप्लवैः' [497/s] कल्पितधर्मभेदविधिनिषेधयोर्गोचरैर्व्विकल्पैर्यथाक्रमं धर्मिधर्माणां 'नीचः प्रापितः सञ्चयोऽपच'यश्च यैस्तै'रिव' यथाध्यवसायं । (२३५)

वस्तुतः (।)

....4.236 अतद्वानपि सम्बन्धात् कुतश्चिदुपनीयते ।
दृष्टिं भेदाश्रयैस्तेपि तस्मादज्ञातविप्लवाः ॥ २३६ ॥

'भेदाश्रये'र्व्यावृत्तिविषयै'रतद्वान्' धर्मभेदेन तत्सञ्चयापचयाभ्यां रहितोपि शब्दादि'दृष्टिं' प्रतीतव्यवहारमु'पनी'यते । विकल्पास्तावद् वासनावशात् तथोपदर्शयन्ति । व्यवहर्त्तारस्तु कस्माद् विमृश्य न निवर्त्तन्त इत्याह । अर्थे 'तेषां व्यावृत्त्याश्रयेण' कल्पितधर्माणां 'कुतश्चित् सम्बन्धात्' तदर्थक्रियाप्राप्तेः परितोषादर्थक्रियार्थिनां व्यवहारिणां धर्मभेदाद् यथार्थत्वेन विमर्शादादर इति 'ते' व्यवहर्त्तारो'प्यज्ञातविप्लवा' धर्मभेदविधिप्रतिषेधव्यवहारस्येति यथार्थमेव तत् मन्यन्त इति । तस्मात् परमार्थतोऽसत्येव धर्मिणि विधिप्रतिषेधव्यवहारात् असतोपि सपक्षाद् विपक्षाद् वा हेतुनिवृत्तिः सन्दिग्धा । (२३६)

किञ्च (।) प्राणादेः सपक्षो नास्तीति ततो न व्यतिरेक इति यद्युच्यते तदसङ्गतमित्याह ।

....4.237 सत्तासाधनवृत्तेश्च सन्दिग्धः स्यादसन्न सः ।
असत्वञ्चाभ्युपगमादप्रमाणन्न यज्यते ॥ २३७ ॥

आत्मनः 'सत्तायां साधन'स्य प्राणादे'र्वृत्तेः' कारणात् वादिप्रतिवादिनोरात्मा 'सन्दिग्ध स्यात्' । न ह्यसत्तया निश्चितेऽर्थे कश्चित् साधनमाह । प्रतिवादी च तत्साधनं शृण्वन् कथमसन्दिग्धो नाम । आत्मसन्देहाच्च सपक्षो 'नासन्' तत् कथमुच्यते सपक्षासत्वात् न ततो व्यावृत्त इति व्यतिरेकी प्राणादिः । स्यादेतत् (।) प्रतिवादिनः सात्मत्वेन कस्याश्चिदनिष्टेः सपक्षाभाव उच्यते ।

ननु पराभ्युपगमप्रमाणमप्रमाणम्वा । प्रमाणञ्चेन्नैरात्म्यमेव तर्हि सिद्धं ।) अलमात्मसाधनोपन्यासप्रयासेन (।) अथा'प्रमाणं' (।) परस्याभ्युपगमात् अप्रमाणकात् सपक्षसत्वं च 'न युज्यते' । (२३७) तस्माद् (।)

....4.238 असतो व्यतिरेकेपि सपक्षाद् विनिवर्त्तनम् ।
सन्दिग्धं तस्य सन्देहाद् विपक्षाद् विनिवर्त्तनम् ॥ २३८ ॥

अ'सतः सपक्षा'द्धेतो'र्व्य'ति'रेकेप्यु'पगम्यमाने प्राणादेः सपक्षाद् 'विनिवर्त्तनं सन्दिग्धं तस्य' सपक्ष'सन्देहात्' । यदि सपक्षाभावोऽसन्दिग्ध एवं हेतुव्यावृत्तिभावो[2380]प्यसन्दिग्धः [498/s] स्यात् । तत्सन्देहे तस्यापि सन्देहः । सपक्षाद् व्यावृत्तिसन्देहे 'विपक्षाद् विनिवर्त्तनं' प्राणादेः सन्दिग्धं । (२३८)

कथमित्याह (।)

....4.239 एकत्र नियमे सिद्धे सिध्यत्यन्यनिवर्त्तनम् ।
द्वैराश्ये सति दृष्टेषु स्याददृष्टेपि संशयः ॥ २३९ ॥

'एकत्र' सपक्षे सत्त्वस्य 'नियमे सिद्धे' सति 'अन्य'तो विपक्षा'न्निवर्त्तनं सिध्यति' । यो हि पक्ष एव भवति स नियमाद् विपक्षे न भवति । यदि तु विपक्षेपि स्यात् सपक्षे सत्ता नियमो व्याहन्येत ।

ननु सात्मकत्वानात्मकत्वाभ्यां द्वैराश्यं भावानां । तत्र निरात्मकेषु घटादिषु दृष्टः प्राणादिरर्थात् सात्मकेषु व्यवतिष्ठत इति प्राणादेरतो युक्तं सात्मकत्वानुमानमित्याह । द्वैराश्ये सति भावानां घटादिषु निरात्मकेषु दृष्टेषु बहुलं प्राणादाव [102a/MA]'दृष्टेपि' देशादिविप्रकृष्टेषु प्राणादिसत्ता'संशयः' कदाचित् क्वचिन्निरात्मका अपि प्राणादियुक्ताः स्युः बाधकाभावात् । (२३९) तथाहि ।

....4.240 अव्यक्तिव्यापिनोप्यर्थाः सन्ति तज्जातिभाविनः ।
क्वचिन्न नियमोदृष्ट्या पार्थिवालोहलेख्यवत् ॥ २४० ॥

'तस्या'मेकस्यां 'जातौ' सम्भ'विनोप्यर्था' धर्मा 'अव्यक्तिव्यापिनो' निःशेषतद्व्यक्त्य'सम्भविनः सन्तिः' ततः क्वचिद् घटादौ निरात्मके प्राणादिर्नास्तीत्य'दृष्ट्या'दर्शनमात्रेण समस्तेषु निरात्मकेषु न प्राणाद्यभावस्य 'नियमः' । बहुषु 'पार्थि'वेषु काष्ठपाषाणादिषु लोहलेख्यत्वदर्शनेपि पार्थिव एव[2381] वज्रेऽलोहलेख्यत्वदर्शनेपि पार्थिव एव[2382] वज्रे'ऽलोहलेख्यत्ववत्' । अलोहलेख्यस्येव नासम्भवस्य नियमः । (२४०)

...4.241a भावे विरोधस्यादृष्टेः कः सन्तेहं निवारयेत् ।

निरात्मकत्वेन सह प्राणादे'र्विरोधस्यादृष्टे'र्निरात्मकेष्वपि भावेषु प्राणादेर्भावे सत्ताया- 'कः सन्देहं निवारयेत्' । न हि प्राणादेर्नैरात्म्येन सहानवस्थानलक्षणो विरोधः (।) क्वचिन्निवर्त्यनिवर्त्तकभावानुपलब्धेः नाप्यन्योन्यपरिहारस्थितिलक्षणः परस्परव्यवच्छेदात्मकत्वाभावात् ।

स्यादेतत् (।) नैरात्म्यविरुद्धेनात्मना व्याप्तत्वात् प्राणादेः परम्परया नैरात्म्येन विरोध इत्याह ।

...4.241b क्वचिद् विनियमात् कोन्यस्तत्कार्यात्मतया स च ॥ २४१ ॥

[499/s]

तस्यात्मनः 'कार्यतया' आत्मतया प्राणादेः 'क्वचिदा'त्मनि 'विनियमा'न्नियतत्वात् 'कोन्यः' परम्परया विरोधश्चोक्तः स्यात् । तादात्म्यतदुत्पत्तिभ्यामेव केनचित् किञ्चिद् व्याप्यते नान्यथा । (२४१)

न चात्मनोऽत्यन्तपरोक्षतया ते सिध्यतः । तत्कथन्तन्निमित्तकविरोधस्थितिः ।

[2380] १ विपक्षात् ।
[2381] १ लोहलेख्यं वज्रं पार्थिवत्वात् काष्ठवत् ।
[2382] १ लोहलेख्यं वज्रं पार्थिवत्वात् काष्ठवत् ।

...4.242a नैरात्म्यादपि तेनास्य सन्दिग्धं विनिवर्तनम् ।

‘तेन’ साक्षात्परम्परया च विरोधाभावेन ‘नैरात्म्याद्’ विपक्षा‘दपि’ शब्दान्न केवलं सपक्षा‘दस्य’ प्राणादे‘र्निवर्त्तनं सन्दिग्धं’ । सन्दिग्धान्वयव्यतिरेकः प्राणादिरित्यर्थः ।

नास्ति तावदुक्तक्रमेण नैरात्म्यात् प्राणादिनिवृत्तिः (।)

...4.242b अस्तु नाम तथाप्यात्मा नानैरात्म्यात् प्रसिध्यति ॥ २४२ ॥

‘अस्तु नामा’ङ्गीकारात् ‘तथापि’ जीवच्छरीरे‘ऽनैरात्म्यान्नै’रात्म्याभावात् प्राणादिमत्त्वसाधिता‘दात्मा न सिध्यति’ । (२४२)

यन्न विरुद्धयोरेकाभावादन्यतरस्यावश्यं सिद्धिर्भवत्येवेत्याह ।

....4.243 येनासौ व्यतिरेकस्य नाभावं भावमिच्छति ।
यथा नाव्यतिरेकेपि प्राणादिर्न्न सपक्षतः ॥ २४३ ॥

‘येन’ कारणे‘नासौ’ वादी व्यतिरेकस्या‘भावं भाव’मन्वयं ‘नेच्छति । यथा’ प्राणादिरसतः सपक्षतः । ‘अव्यतिरेके’ व्यतिरेकाभावे‘पि न सपक्षे’ सत्त्वेनेष्टः । तथा नैरात्म्यनिवृत्तावपि आत्मभावो जीवच्छरीरे न स्यात् । (२४३)

तस्मात् (।)

....4.244 सपक्षाव्यतिरेकी चेद्धेतुर्हेतुरतोन्वयी ।
नान्वय्यव्यतिरेकी चेदनैराम्त्यं न सात्मकम् ॥ २४४ ॥

‘सपक्षाव्यतिरेकी’ प्राणादिर्नैरात्म्ये निवर्त्तमानः सत्तामात्मनो गमयन् ‘हेतुश्चेदिष्ट’स्तदाऽत एव न्यायात् प्राणादि‘हेतुरन्वयी’ स्यात् । सपक्षात् प्राणादेर्निवृत्त्यभाव एव भावः । स चान्वयः (।) सपक्षा‘दव्यतिरेकी’ व्यतिरेकरहितः प्राणादि‘र्नान्वयी चेदि’ष्यते तदा तद्वद‘नैरात्म्यं’ नैरात्म्यरहितं शरीरं[2383] ‘न सात्मकं’ स्यात् । (२४४)

किञ्च (।)

....4.245 यन्नान्तरीयकः स्वात्मा यस्य सिद्धः प्रवृत्तिषु ।
निवर्त्तकः स एवातः प्रवृत्तौ च प्रवर्त्तकः ॥ २४५ ॥

‘यस्य’ स्वात्म(ा) स्वभावो ‘यन्नान्तरीयकः[2384]’ यदन्वयव्यतिरेकानुविधायी प्रतिबन्ध[500/s]कस्य वह्न्यादेः ‘प्रवृत्तिषु’ विधिषु सिद्धः । ‘स एव’ निवर्त्तमानः तस्यानुविहितान्वयव्यतिरेकस्य ‘निवर्त्तकः’ । ‘अतः’ प्रवृत्तिविषयत्वात् ‘प्रवृत्तौ’ स्वसत्तायाश्च तस्यावश्यं प्रवृत्तेः कर्त्ता हेतुर्भवति । यथा धूमो दहननान्तरीयकतया सिद्धो दहननिवृत्तिप्रवृत्तिभ्यां निवर्त्तते प्रवर्त्तते च (। २४५)

....4.246 नान्तरीयकता सा च साधनं समपेक्षते ।
कार्ये दृष्टिरदृष्टिश्च कार्यकारणता हिता ॥ २४६ ॥

‘सा च नान्तरीयकता साधनं’ निश्चायकं मान‘मपेक्षते’ गमकत्वहेत्वधिकारेऽनिश्चितगमकत्वनिबन्धस्याहेतुत्वात् । साधनञ्च ‘कार्ये’ कारणान्वयवति ‘दृष्टि’[102b/MA]स्तद्व्यतिरेकवति ‘चादृष्टिः’ । न तु सपक्षविपक्षयोर्दर्शनादर्शनमात्रकं । हि यस्मात् तत्कार्यदृष्ट्यदृष्टी कार्यकारणता कारणभावाभावप्रयुक्ते कार्यभावाभावदर्शने कार्यकारणतोक्ता (।) अन्यनिश्चयोपायतादर्शनार्थं । (२४६)

ततश्च (।)

2383 १ नात्र नैरात्म्यमस्तीति ।

2384 २ लिङ्गं धूमादिः ।

...4.247a अर्थान्तरस्य तद्भावेऽभावानियमतोऽगतिः ।

अकारणस्या'र्थान्तरस्या'त्मन'स्त'स्य प्राणादे'र्भावे'ऽभावा'नियम'तोऽवश्यम्भावा'भावात् अग'तिरप्रतीतिः ।

नन्वात्मान्वयव्यतिरेकानुविधानात् प्राणादय आत्मानं तत्कार्यतयानुमापयिष्यन्तीत्याह ।

...4.247b अभावासम्भवात् तेषामभावे नित्यभाविनः ॥ २४७ ॥

तस्यात्मनो 'नित्यभाविनः' सर्व्वकालस्थायिनः कदाचिदभावे सति 'तेषां' प्राणादीना'मभाव'स्या'सम्भवात्' (।) यदि व्यतिरेकमन्तरेणान्वयमात्रादात्मकार्यता प्राणादीनां तदा कालाकालादिकार्यतापि स्यात् (।) या यस्य समानत्वात् (।) ततश्च तानप्यनुमापयेयुः कालादिनिवृत्तिश्च प्राणादिनिवृत्त्या व्याप्यते । ततो यत्र प्राणादिनिवृत्तिरस्ति तत्र कालादिनिवृत्तिरपि स्यात् । एवं व्याप्यसद्भावात् । न च कालरहितः कश्चिदस्ति । (२४७)

## (६) क. सामग्रीशक्तिभेदाद् विश्वरूपता

किञ्च (।)

....4.248 कार्यस्वभावभेदानां कारणेभ्यः समुद्भवात् ।
तैर्विना भवतोन्यस्मात् तज्जं रूपं कथं भवेत् ॥ २४८ ॥

[501/s]'कार्यस्वभावभेदानां[2385]' यथा स्वं कारणेभ्यः[2386] 'समुद्भवात्' कारणात् केवलादन्वयात् कार्यकारणभावेपि कार्यभावाङ्गीकारात् तैः कारणै'र्विना भवतः' कार्यस्य 'रूपं तज्जं कथं भवेत्' । न हि वह्निजं युक्तं प्रत्येकं व्यभिचारादेर्हेतुत्वप्रसङ्गात् ॥ (२४८)

....4.249 सामग्रीशक्तिभेदाद्धि वस्तूनां विश्वरूपता ।
सा चेन्न भेदिका प्राप्तमेकरूपमिदं जगत् ॥ २४९ ॥

'सामग्रीणां शक्तिभेदाद्धि वस्तूनां' कार्याणां 'विश्वरूपता' नानात्मता । 'सामग्री चेत्' स्वभेदेन कार्याणां 'न' भेदिका । 'जगदिदमेकरूपं प्राप्तं' । (२४९)

ननु[2387] कारणानि कार्यणानि कार्यमात्राणि जनयन्ति । न तेषां परस्परतो भेदमपि[2388] ततो धूमः पावकादिव शक्रमूर्द्धोपि जायेत । इत्याह ।

....4.250 भेदकाभेदकत्वे स्याद् व्याहता भिन्नरूपता ।
एकस्य नानारूपत्वे द्वे रूपे पावकेतरौ ॥ २५० ॥

अस्याः सामग्रया 'भेदकत्वे' भिन्नत्वे भिन्नसामग्रीकार्यविलक्षणकार्यजनकत्वेऽभेदकत्वे च सामग्रयन्तरकार्यजनकत्वेऽभ्युपगम्यमाने एकस्याः सामग्रया 'भिन्नरूपता' नानात्माऽभ्युपगता 'स्यात्' । सा च 'व्याहता' । तथा हि 'धूमाग्न्यादिसामग्री' सामग्रयन्तरकार्यविलक्षणं जनयन्ती तस्य भेदिका प्रतीता । यदि च सामग्रयन्तरकार्यं च सा जनयेत् 'तदाऽभेदिका' च स्यात् । तथा 'चैकस्य' शक्रमूर्द्धो 'नानारूपत्वे द्वे रूपे पावकेतरौ' स्यातां । धूमजनकत्वाद् वह्नित्वं विलक्षणरूपत्वाद्यावह्निरूपत्वं । न चैते एकस्य युक्ते रूपभेदलक्षणत्वाद् वस्तुभेदस्य । (२५०)

[2385] १ अन्वयमात्रात् परो मन्यते तन्निषेधति ।

[2386] २ आकस्मिकानुपपत्तेः ।

[2387] ३ अग्नितोप्यग्निधूमादि । अग्निस्वभावकाशक्रमूर्द्धोपि धूमादिति व्यभिचार इत्यन्यत उत्पादेऽहेतुत्वं नास्ति । अग्न्यादिविलक्षणसामग्रयाश्च भेदकमभेदकश्च रूपमस्ति येन धूमञ्जनयति तदभेदकं ।

[2388] ४ जनयन्ति ।

...4.251a तत् तस्या जननं रूपमन्यस्य यदि सैव सा ।

‘तत्’ तस्मात् ‘तस्याः’ शक्रमूर्द्धादिसामग्रया ‘जननं’ धूमोत्पादकं ‘रूपं यदि’ विद्यते तदा ‘सैव’ दहनात्मिकैव ‘सा’ शक्रमूर्द्धादिसामग्री । अग्निधूमयोरन्वयव्यतिरेकदर्शनात् स एवाग्निर्यो धूमजनकः[2389] । स एव धूमो योऽग्निजन्य इति निश्चितत्वात् ।

...4.251b न तस्या जननं रूपं तत् तस्याः संभवेत् कथम् ॥ २५१ ॥

[502/s]

अथ ‘तस्याः’ शक्रमूर्द्धादिसामग्रया ‘जननं रूपं’ नास्तीति तदा ‘तद्’ धूमाख्यं रूपं वह्निजन्य‘मस्याः कथं संभवेत्’ (।) न ह्यधूमहेतोर्द्धूमजन्म युक्तं (।) यतो धूमजनक एव वह्निर्वह्निजन्यश्च धूमः । (२५१)

....4.252 ततः स्वभावौ नियतावन्योन्यं हेतुकार्ययोः ।
तस्मात् स्वदृष्टाविव तद् दृष्टे कार्येपि गम्यते ॥ २५२ ॥

‘ततो हेतुकार्ययो’रग्निधूमाद्योः ‘स्वभावौ नियतौ अन्योन्यं’ तज्जनकत्वतद्भा[103a/MA] वित्वाभ्यां (।) ‘तस्मात्’ कारणकार्ययोर्नियमादव्यभिचारहेतोः यथा ‘स्वस्य’ कारणात्मने(ा)वह्नेः ‘दृष्टौ’ तत्कारणत्वं गम्यते तद्वत् साक्षाद् दर्शनाभावे ‘कार्येपि’ धूमे ‘दृष्टे’ तत्कारणे परोक्षमनुमानबुद्ध्या ‘गम्यते[2390]’ साक्षात् परंपरया वा तदुत्पन्नेन ज्ञानेन प्रतीयमानस्य व्यभिचाराभावात् ॥ (२५२)

...4.253a एकं कथमनेकस्मात् क्लेदवद्दुग्धवारिणः ।

(पर आह ।) न यद्येकमेकस्मादेव भवति त‘दैकं’ कार्यं ‘कथमनेकस्माद्’ भवति (।) उदाहरणमाह । ‘क्लेदवत्’ तण्डुलाद्यवयवशैथिल्यमिव ‘दुग्धाद्वारिणश्च’ । अग्निसहकारि दुग्धं वारि च स्वयं पृथक् तण्डुलादेर्विक्लित्तिं जनयद् दृश्यते ॥

...4.253b द्रवशक्तेः यतः क्लेदः सा त्वकैव द्वयोरपि ॥ २५३ ॥

(सिद्धान्ती) अयुक्तमेतत् । अन्यो हि दुग्धेन जनितः क्लेदोऽन्यश्च वारिणा । रसवीर्यपरिणामाकारभेदात् । तत् कथमेकस्मादनेकोत्पादः ।

अथ सत्यप्यवान्तरभेदे विजातीयव्यावृत्त्या ‘क्लेद’ एक उच्यते तदा दुग्धवारिणोर्यतो यस्या ‘द्रव्य’जनिकायाः ‘शक्तेः’ क्लेदो जायते ‘सा’ शक्तिस्तु ‘द्वयोरपि’ विजातीयव्यावृत्ते‘रेकैव’ । तत् कथमनेकस्मादेकोत्पत्तिः ॥ (२५३)

....4.254 भिन्नाभिन्नः किमस्यात्मा भिन्नोथ द्रवता कथम् ।
अभिन्नेत्युच्यते बुद्धेस्तद्रूपाया अभेदतः ॥ २५४ ॥

(परः) यदि दुग्धस्य क्लेदजननशक्त्यात्मतया वारिणा सहाभेद इष्यते तदा ‘भिन्नाभिन्नोऽस्यात्मा किम’भ्युपगन्तव्यः । शक्त्यात्मतयाऽभेदात् । आकारभेदाच्च भेदात् । उत्तरमाह (।)

न भिन्नाभिन्न आत्मा किन्तु ‘भिन्न’ एव । ‘कथन्तर्हि’ द्वयोरपि ‘द्रवता’ऽभिन्ना क्लेदहेतुरित्युच्यते द्रवत्वस्याभेदात् । अभेदोक्तिर्भेदोक्त्या विरुध्यते ।

[503/s]

यदि नाम स्वस्वभावस्थितत्वाद् भावानां भेद एव पारमार्थिकः तथापि केचिद् भावा भिन्ना अपि स्वहेतुबलायातस्वरूपविशेषात् एककार्यकृत इति ‘बुद्धेर्विक’ल्पिकाया‘स्तद्रूपा-

[2389] ५ इति नास्त्येव व्यभिचार इत्याशयः अवह्नेरनुत्पत्तेः ।

[2390] १ इत्यव्यभिचारिकार्यलिङ्गम् ।

या' एकप्रत्यवमर्शाकाराया 'अभेदतः' कारणात् द्रवताक्लेदहेतु'रभिन्नेत्युच्यते' । तदेकव्यावृत्तिविषयस्यावसायस्यानुरोधात् । एकत्वव्यवहारो न पारमार्थिक इत्यर्थः । (२५४)

....4.255 तद्वद् भेदेपि दहनो दहनप्रत्ययाश्रयः ।
येनांशेनादधद् धूमं तेनांशेन तथा गतिः ॥ २५५ ॥

'तद्वत्' क्षीरोदकवत् । अवान्तर'भेदे' सत्यपि 'दहनो येनांशेन' स्वभावेन स्वरूपोष्णस्पर्शाद्यात्मकेनानग्निव्यावृत्तेन 'दहन' इति 'प्रत्यय'स्य व्यवहारस्य'श्रयो' विषयस्तेन स्वभावेन धूममादधत् जनयत् धूमा'श्र'यो भवति (।) 'तेन धूमाश्रयत्वेन' कारणेन धूमालिङ्गाद् दहनो हेतुः । 'तथा'ऽनग्निव्यावृत्तित्वेन गम्यते । (२५५)

तथा हि (।)

....4.256 दहनप्रत्ययाङ्गादेवान्यापेक्षात् समुद्भवात् ।
धूमोतद्व्यभिचारीति तद्वत् कार्यं तथापरम् ॥ २५६ ॥

'दहनप्रत्यय'स्या'ङ्गा'न्निमित्ता'देवा'ग्निलक्षणाद'न्यापेक्षादा'द्रेन्धनादिसहायात् 'समुदभवा-'दुत्पत्तेः कारणाद् 'धूमोऽतद्व्यभिचारीति' तद्वत् धूमवत् । 'अपरमपि[2391] कार्यं' तथास्वकारणाव्यभिचारि बोद्धव्यं । (२५६)

किं पुनर्द्धूमो वह्निं न व्यभिचरतीत्याह[2392] ।

....4.257 धूमेन्धनविकाराङ्गतापदे दहनस्थितेः ।
अनग्निश्चेदधूमोऽसौ सधूमश्चेत् स पावकः ॥ २५७ ॥

'धूम'स्येन्धन'विकारा'देर'ङ्गं' हेतुस्तस्य भावो धूमेन्धनविकाराङ्गता तस्याः पदे आश्रयवस्तुनि 'दहनस्थिते'रग्नितान्यवहाराच्छक्रमूर्धा'ऽनग्नि'र्द्धूमेन्धनविकारकारी न 'चेदि'ष्यते (।) ततो जायमानः पदार्थो'सौ' दृश्यमानोऽ'धू'मो वाष्पादिरेव । 'न' ह्यग्निजन्योऽनग्निर्भवति । सर्व्वथा साम्यात् 'सधूमश्चेदि'ष्यते तर्हि 'स' वल्मीकः 'पावक' एव धूमजनकस्यैव पावकत्वात् । देशकालस्वभावप्रतीतिनियमो हि भावानां नाकस्मिकः । तथात्वेऽतिप्रसङ्गात् । न च नानाहेतुकः प्रत्येकः व्यभिचारेऽहेतुत्वप्रसङ्गात् तस्मान्नियतहेतुकः । यदि चान्वयव्यतिरेकाभ्यामुपलब्धाग्निकारण[504/s] [103b/MA]भावो धूमः शक्रमूर्ध्नो जायते । तदा वह्नेरेव शक्रमूर्द्धा । अथानग्निस्तथाऽदृश्यमानत्वात् तथा सोपि न धूमो वास्यादिरेव आकारसाम्यात्तु धूमाभः । तस्मात्[2393] कार्यकारणभावस्य नान्तरीयक[2394] तेति स्थितं ॥ (२५७)

....4.258 नान्तरीयकता ज्ञेया यथास्वं हेत्वपेक्षया ।
स्वभावस्य यथोक्तं प्राक् विनाशकृतकत्वयोः ॥ २५८ ॥

'स्वभावस्य' च हेतो'र्नान्तरीयकता' साध्या अविनाभाविता 'ज्ञेया । यथास्वं' यस्य स्वभाव'हेतोर्य' आत्मीयस्तादात्म्यसाधको हेतुः साधनं तस्या'पेक्षया । यथा प्रागुक्तं विनाशकृतकत्वयो'स्तादात्म्यसाधनं अवश्यं हि कृतकानाम्विनाशः । न चार्थसापेक्षाणामवश्यं भावः । ततः स्वभावत एव कृतकानन्नश्वराणां विनाशं प्रत्यनपेक्षित्वादिति दर्शितं । तदेव स्वभावकार्ययोरव्यभिचारित्वाद्धेतुत्वं । न च प्राणादेरात्मकार्यत्वं सिद्धमिति कथं हेतुता । (२५८)

---

[2391] १ देशादिभिन्नं विजातीयव्यावृत्त्या त्वभिन्नं ।

[2392] २ एतदेव स्थिरयितुमाह ।

[2393] १ एवं तावत् कार्यस्य नियमः ।

[2394] २ नियमः ।

### ख. प्राणादेरुक्तो दोष आचार्येण

नन्वयं प्राणादेरुक्तो दोषकलापि आ चा र्ये णे ष्ट इति कथं गम्यत इत्याह ।

....4.259 अहेतुत्वगतिन्यायः सर्वोयं व्यतिरेकिणः ।
अभ्यूह्यः श्रावणत्वोक्तेः कृतायाः साम्यदृष्टये ॥ २५९ ॥

सर्व्वस्यासादारणस्य दोषदुष्टत्वेन 'साम्यदृष्टये' तुल्यतोपदर्शनाया चा र्ये ण 'श्रावणत्व'स्यासाधारणस्य 'योक्तिः कृता' तस्या 'एवायं व्यतिरेकिणः' प्राणादेरन्यस्य च हेतोर'हेतुत्वगतिन्यायः सर्व्वोऽभ्यूह्यः' । (२५९)

## 4.7 (७) अनुपलब्धिचिन्ता

### (१) अनुपलब्धेः पृथगग्रहणे कारणम्

ननु यथा स्वभावकार्यसिद्ध्यर्थं द्वौ हेतू उक्तौ तथाऽनुपलब्धिरपि वक्तुं युक्ता हेतुत्वात् । स्वभावानुपलब्धिस्तावत् तादात्म्यप्रतिबन्धात् स्वभावहेतोर्न भिद्यत इति स्वभावहेतुर्निर्देशादेव निर्द्दिष्टा । कारणव्यापकानुपलब्धिभ्याञ्च निषेध्यानुपलब्धिरेव प्रतिपाद्यत इति न तेपि स्वभावानुपलब्धेर्भिद्यन्ते । उदाहरणन्तर्हि कस्मान्नोक्तमित्याह ।
[505/s]

....4.260 हेतुस्वभावनिवृत्त्यैवार्थनिवृत्तिवर्णनात् ।
सिद्धोदाहरणेत्युक्तानुपलब्धिः पृथग् न तु ॥ २६० ॥

त्रिविधाप्यनुपलब्धिर्व्विपक्षा'द्धेतोः' कारणस्य 'स्वभाव'स्य व्यापकस्य निवृत्यैवार्थस्य कार्यस्य व्याप्यस्य च 'निवृत्तेर्व्वर्णनात् सिद्धोदाहरणेति न पृथगुक्ता' । स्वभा'वानुप(ल)ब्धिः' कारणव्यापकाभावसाधिका । तयोरनुपलब्धिस्तु कार्यव्याप्याभावसाधनीति त्रिविधानुपलम्भोदाहरणं सिद्धं । (२६०)

उपलब्धिलक्षणप्राप्तविषयत्वमनुपलब्धेर्व्विशेषणं कथं 'सिद्धमिति चेदाह' ।

....4.261 तत्राप्यदृश्यात् पुरुषात् प्राणादेरनिवर्तनात् ।
सन्देहहेतुताख्यात्या दृश्येर्थे सेति सूचितम् ॥ २६१ ॥

'प्राणादे'र्हेतोर'दृश्यात् पुरुषादा'त्म[2395]नोऽ'निवृत्ते'र्निवृत्त्यसिद्धे जीवच्छरीरे 'सन्देहहेतु'तया- 'आख्यात्या' कथनेन तत्रानुपलब्धावपि 'दृश्येऽर्थे' याऽनुपलब्धिः 'सा' भावसाधिका नान्ये'ति सूचितमा' चा र्ये ण । यदि त्वनुपलब्धिरित्येव प्रमाणं तदाऽत्मनि प्राणादेर्निवृत्तिः सिध्येत् । ततश्च जीवच्छरीरे वर्त्तमानमात्मानं गमयेदिति न सन्देहहेतुः स्यात् । (२६१)

ननु यथा व्यवच्छेदविषयाऽनुपलब्धिः तथा कार्यस्वभावावपीति अनुपलब्धिरेवैको हेतुः स्यादित्याह ।

....4.262 अनङ्गीकृतवस्त्वंशो निषेधः साध्यतेनया ।
वस्तुन्यपि तु पूर्वाभ्यां पर्युदासो विधानतः ॥ २६२ ॥

[2395] १ अन्यत्राट्टष्टरूपस्येत्यादिनात्मनोऽदृश्यस्याव्यतिरेकेण ।

'अनया'नुपलब्ध्या न केवल'म्वस्तुनि' अवस्तुन्यपि 'निषेधः' केवलो 'नाङ्गीकृतवस्त्वंशः' कारणव्यापकानुपलब्धिभ्यां वस्तुव्यवच्छेदमात्रं अभावव्यवहारश्च साध्यते (।) यथा प्रदेशे धर्मिणि घटाभावः । 'पूर्वाभ्यां' कार्यस्वभावाभ्यां त्वन्यव्यवच्छेदे नैकस्य 'विधानतः पर्युदासः' साध्यते (।) यथाऽनग्निव्यवच्छेदेनाग्निः । नित्यव्यवच्छेदेनानित्यत्वं । (२६२)

ननु स्वभावानुपलब्धौ कथं तादात्म्यं प्रतिबन्ध इत्याह । [104a/MA]

...4.263a तत्रोपलभ्येष्वस्तित्वमुपलब्धेर्न चापरम् ।

'तत्रोपलभ्येषु' भावेषु विचार्यमाणम'स्तित्वमुपलब्धेरपरं न' भवति । यदि ह्युपलब्धिः कर्मधर्मस्तदोपलभ्यमानतास्तित्वं । अथ कर्तृधर्मो ज्ञानं । तदा [506/s] तदन्वयव्यतिरेकानुविधानाद् भावसत्ताव्यवस्थानस्योपचारात् सैव सत्ता । यथा चोपलब्धिरेव सत्ता तथाऽनुपलब्धिरेवासत्तेति तादात्म्यमनयोः सम्बन्धः ।

### अनुपलब्धेरभावसिद्धौ लिङ्गलिङ्गिग्रहणप्रयोजनम्

एवं तर्ह्यनुपलब्धिरेवाभावसिद्धिरित्यलं लिङ्गिलिङ्गभावेनेत्याह ।

...4.263b इत्यज्ञज्ञापनायैकानुपाख्योदाहृतिर्मता ॥ २६३ ॥

अभावः सिद्धत्वान्न साधनार्हः । तस्मादभावं पश्यतोप्यव्यवहरतो'ऽज्ञ'स्य मूढस्य 'ज्ञापना'याभावव्यवहाराय 'एका' स्वभावानुपलम्भो'दाहृतिर्मता' (।) सा चानुपलब्धिर'नुपाख्या' वस्तुतोऽभावात्मिका । (२६३)

### (३) स्वभावानुपलब्ध्या विषयिणः प्रतिषेधः

यद्यभावः स्वभावानुपलब्ध्या न साध्यते किन्तर्हि साध्यत इत्याह ।

....4.264 विषयासत्त्वतस्तत्र विषयि प्रतिषिध्यते ।
ज्ञानाभिधानसन्देहं यथाऽदाहादपावकः ॥ २६४ ॥

....4.265 तथान्या नोपलभ्येषु नास्तितानुपलम्भनात् ।
तज्ज्ञानशब्दाः साध्यन्ते तद्भावात् तन्निबन्धनाः ॥ २६५ ॥

'तत्र' स्वभावानु(प)लम्भे 'विषयासत्वतो' ज्ञानाभिधान[2396]सन्देहानां विषयस्यासत्त्वतः कारणाद् 'विषयि प्रतिषिध्यते' । किन्तद्विषयीत्याह । ज्ञानमभिधानञ्च सन्देहश्च 'ज्ञानाभिधानसंदेहं' । सदिति ज्ञानं सदित्यभिधानं । अस्ति न वेति सन्देहश्चानुपलब्धिलक्षणादभावान्निषिध्यते (।) सत्त्वविषया हि सत्-ज्ञानादयः । तदभावे निषिध्यन्त इति न्याय्यं । दृष्टान्तमाह । 'यथा' गुञ्जादौ वह्नित्वसन्देहे कश्चिदाह पावकोयमिति (।) दाहादिनिमित्तो हि वह्नित्वव्यवहारः तदभावात् प्रतिषिद्धः । यथोपलब्धेरन्या नास्तिता तथोपलभ्येषूपलब्धिलक्षणप्राप्तेष्वनुपलम्भादन्या नास्तिता न भवति । किन्त्वनुपलब्धिरेव नास्तित्वं (।) तस्मात् तन्निबन्धना अनुपलब्धिनिमित्ताः तत् ज्ञानाभिधानव्यवहारास्तस्यानुपलम्भनस्य भावात् साध्यन्ते । (२६४,२६५)

यद्यनुपलम्भेन निमित्तेन नैमित्तिकोऽसत् ज्ञानादिः साध्यते तदा निमित्ते [507/s] सति नैमित्तिकभावनियमाभावात् सत्यनुपलम्भेऽसत्ज्ञानादिव्यवहार ऐकान्तिको न स्यादित्याह (।)

[2396] १ सत्ताज्ञानं । तदभिधानं । अस्ति न वेति सन्देहः ।

....4.266 सिद्धो हि व्यवहारोयं दृश्यादृष्टावसन्निति ।
तस्याः सिद्धावसन्दिग्धौ तत्कार्यत्वेपि धीध्वनी ॥ २६६ ॥

सर्व्वस्यैव 'हि दृश्यादृष्टावसन्निति व्यवहारोयं' निमित्तान्तरनिरपेक्षः 'सिद्धः । तस्या' दृश्यादृष्टेः 'सिद्धौ' सत्यां असदिति 'धीध्वनी कार्यत्वे'प्य'सदिग्धौ' नियत'प्रव'र्त्तनौ सिद्धौ । यद्यपि कार्यं न कारणेन नियतभावं तथापि यदि क्वचिद् भावव्यवहारः प्रवर्त्त्यते तदानुपलब्धिमाननिमित्तत्वादन्यत्राप्यनुपलब्धौ सत्यां स प्रवर्त्तनीय इत्यर्थः । (२६६)

....4.267 विद्यमानेपि विषये मोहादत्राननुब्रुवन् ।
केवलं सिद्धसाधर्म्यात् स्मार्यते समयं परः ॥ २६७ ॥

अभावव्यवहारस्य 'विषये' दृश्यादर्शने 'विद्यमाने'पि 'केवलं मोहादसत् ज्ञान'शब्दव्यवहारान'ननुब्रुवन्' नानुवदन् परोऽसद्व्यवहारविषयतया 'सिद्धे'न घटेन दृष्टान्तेन दृश्यादर्शनवत्तायाः 'साधर्म्यात् समयं' व्यवहारं 'स्मार्यते' । पूर्व्वमपि त्वया दृश्यादर्शनमात्रकोऽसद्व्यवहारः प्रवर्त्तितः । तत्स'द्भावा'दिहापि प्रवर्त्तयेति परः प्रतिपाद्यते । (२६७)

दृष्टान्तमाह ।

....4.268 कार्यकारणता यद्वत् साध्यते दृष्ट्यदृष्टितः ।
कार्यादिशब्दा हि तयोर्व्यवहाराय कल्पिताः ॥ २६८ ॥

'कार्यकारणता दृष्ट्यदृष्टितो' दर्शनादर्शनाभ्यामन्वयव्यतिरेकग्राहकाभ्यां 'यद्वत् साध्य'ते । न हि वस्तुतो दर्शनादर्शनाभ्यामन्या कार्यकारणता । किन्तु 'तयो'र्दर्शनादर्शनयो'र्हि' संक्षेपेण 'व्यवहाराय कार्यादिशब्दाः कल्पिताः' । (२६८) ततश्च (।)

....4.269 कारणात् कार्यसंसिद्धिः स्वभावान्तर्गमादियम् ।
हेतुप्रभेदाख्याने न दर्शितोदाहृतिः पृथक् ॥ २६९ ॥

'कारणात्' दृश्यादर्शनात् असत्ज्ञानशब्दव्यवहार'कार्य'योग्यता'संसिद्धिः' 104b 'स्वभाव'हेताव'न्तर्गमात्र' हेत्वन्तरं । तेनेयं स्वभावानुपलब्धि'र्हेतु'ना 'प्रभेदस्याख्याने' क्रियमाणे स्वभावहेतुनैव 'दर्शितोदाहृतिर्न पृथक्' निर्दिष्टा । (२६९)
भवतु तावद् दृश्यानुपलब्धेरसद्व्यवहारयोग्यतासिद्धिः । सैव तु कथं सिध्य- तीत्याह । [508/s]

....4.270 एकोपलम्भानुभवादिदं नोपलभे इति ।
बुद्धेरुपलभे वेति कल्पिकायाः समुद्भवः ॥ २७० ॥

'एक'ज्ञानसंसर्गिण एकस्य प्रदेशस[2397] यो'पलम्भानुभवात्' स्वसम्वेदनादनन्तरं घटादि नोपलभ्यते । 'इदं' प्रदेशोभ्युपल भ्यत इति 'कल्पिकाया बुद्धेः' स्ववेदन- विषयीकृतविधिप्रतिषेधानुकारिण्याः 'समुद्भवो' भवतीति स्वसम्वेदनादेवानुपलम्भ- सिद्धिः । (२७०)

## (४) विशिष्टवेदनादर्थाकां विशेषावगमः

भवतु ज्ञानं स्वसम्वेदनविषययोर्ज्ञानयोरन्योन्यभेदस्तु केन ज्ञायते इत्याह[2398] ।

---

2397 १ अनन्यसंसर्गिणः ।

2398 २ एकोपलम्भादिति वाच्येऽनुभवग्रहणप्रयोजनमाह ।

....4.271 विशेषो गम्यतेऽर्थानां विशिष्टादेव वेदनात् ।
तथाभूतात्मसंपत्तिर्भेदधीहेतुरस्य च ॥ २७१ ॥

'अर्थानां विषेशो' (? शेषो)ऽन्योन्यं भेदो गम्यते (।) 'विशिष्ट'प्रतिनियता- कारा'देव [2399] वेदनात्' । अस्य सम्वेदनस्य तयो'र्भेदा'नियताकारत्वं तस्य धियः सम्वेदनस्य तु साधनं[2400] 'तथाभूता' प्रतिनियताकारा परनिरपेक्षप्रकाशा'त्मसंपत्ति'- रपरोक्षता । (२७१)

....4.272 तस्मात् स्वतो धियोर्भेदसिद्धिस्ताभ्यां तदर्थयोः ।
अन्यथा ह्यनवस्थातो भेदः सिध्येन्न कस्यचित् ॥ २७२ ॥

'तस्माद् धियो भेदस्य स्वतः' प्रतिनियतात् अपरोक्षप्रकाशात् स्वरूपत[2401] एव 'सिद्धिः । ताभ्यां' भिन्नतया सिद्धाभ्यां तयो'रर्थयोः' सारूप्यजनकयोर्भेदसिद्धिः । 'अन्यथा' यद्येवं नेष्यते तदाऽपराभ्यां भेदसिद्धिर्वक्तव्या । तयोश्च भेदसिद्धौ भेदग्राहकता युक्तेति तद्भेदग्राहकमपरं द्वयमेष्टव्यं । एवमपरापरापेक्षाया- 'मनवस्थातः न कस्यचिद् भेदः सिध्येत्' । (२७२)

....4.273 विशिष्टरूपानुभवादन्यथान्यनिराक्रिया ।
तद्विशिष्टोपलम्भोतः तस्याप्यनुपलम्भनम् ॥ २७३ ॥

अतो 'विशिष्ट'स्य नियतस्य 'रूप'स्या'नुभवाद'न्य'थान्य'स्य 'निराक्रिया' न भवति । 'अतस्त'स्मात् प्रतिषेध्याद् 'विशिष्ट'स्य भिन्नस्य प्रदेशादे'रुपलम्भस्तस्य' प्रतिषे- ध्यस्या- 'प्यनुपलम्भनं' । (२७३)
[509/s]

....4.274 तस्मादनुपलम्भोयं स्वयं प्रत्यक्षतो गतः ।
स्वमात्रवृत्तेर्गमकस्तदभावव्यवस्थितेः ॥ २७४ ॥

'तस्मादयं' ज्ञानात्मकाऽ'नुपलम्भः स्वय'मात्मना 'प्रत्यक्षतः' स्वसम्वेदनाद् 'गतः' प्रतीतः सन् 'स्वमात्रवृत्ते'रात्ममात्रप्रतीताया'स्त'स्यानुपलभ्यमानस्या'भावव्यवस्थिते- र्गमकः' । अनुपलम्भो हि निमित्तं [2402] विषयो वाऽभावव्यवहारस्येत्युभयथापि स्वसत्तामात्रेणाभावव्यवहारहेतुः । (२७४)

....4.275 [अन्यथार्थस्य नास्तित्वं गम्यतेनुपलम्भतः ।
उपलम्भस्य नास्तित्वमन्येनेत्यनवस्थितिः ॥ २७५ ॥

'अन्यथा' यदि स्वतो नानुपलम्भसिद्धिस्तदाऽ'र्थस्य नास्तित्वमनुपलम्भस्ततो गम्यते' (।) 'उपलम्भस्य नास्तित्वम'नुपलब्धिर'न्येना'नुपलम्भेन गम्यते । सोप्य- नपलम्भान्तरेणे'ति' अपेक्षाया'मनवस्थितिः' स्यात् । (२७५)

## (५) दृश्यानुपलब्धिः सद्व्यवहारबाधिका

भवतु तावद् दृश्येष्वनुपलब्धावभावप्रतीतिरदृश्ये पुनः कथमित्याह ।

....4.276 अदृश्ये निश्चयायोगात् स्थितिरन्यत्र बाध्यते ।
यथाऽलिङ्गोऽन्यसत्त्वेषु विकल्पादिर्न सिध्यति ॥ २७६ ॥

[2399] ३ नार्थसत्तामात्रेण ।
[2400] ४ किमित्याह ।
[2401] ५ नार्थस्यैवान्यतो ज्ञानात् ।
[2402] १ ज्ञानेन निमित्तेन नैमित्तिको व्यवहारः साध्यः । अर्थो विषयोनुपलम्भश्चेद् विषयी व्यवहारः ।

'अन्यत्र' दृश्यानुपलब्धौ सत्याम'दृश्ये' विषयेऽभाव'निश्चयायोगात्' । सद्भव- हारस्य 'स्थितिर्बाध्यते' उपलम्भपूर्वकत्वात् तस्याः । 'यथाऽन्येषु सत्त्वेषु प्राणिषु' रागादिविषयो 'विकल्पो' परचित्तज्ञानादिरादिनाऽलिङ्गो लिङ्गरहितः सद्भव- हारविषयत्वेन न सिध्यति । (२७६)
किं पुनरदृश्यानुपलब्धौ सत्यामपि न सिध्यतीत्याह ।

...4.277a अनिश्चयफला ह्येषा नालं व्यावृत्तिसाधने ।

'एषा हि' सत्यप्यर्थे सम्भवन्ती अभावस्या'निश्चयफला' (।) तस्माद् 'व्यावृत्ते'- रभावस्य 'साधने नालं' शक्ता ।

...4.277b आद्याधिक्रियते हेतोर्निश्चितेनैव साधने ॥ २७७ ॥

'आद्या' दृश्यानुपलब्धिः पुनर्व्यावृत्तिसाधने'ऽधिक्रियते' । कस्मादित्याह । [510/s] [105a/MA]'हेतो'र्विपक्षात् कारणव्यापकानुपलब्धिभ्यां व्यावृत्ते'र्निश्चिते[2403] नैव' साध्यार्थ'साधने' ऽधिकारात् । न हि विपक्षादनिश्चितव्यावृत्तिको हेतुर्गमकः । न हि कारण- व्यापकानुपलब्धिभ्यामन्यो व्यावृत्तिसाधनः कारणविरुद्धोपलम्भादिष्वपि कारणा- भावादभावः प्रतिपाद्यः । (२७७ )

...4.278 तस्याः स्वयं प्रयोगेषु स्वरूपं वा प्रयुज्यते ।
अर्थबाधनरूपम्वा भावे भावादभावतः ॥ २७८ ॥

'तस्या' अनुपलब्धेः 'प्रयोगेषु स्वयं' शब्दप्रतिपादितं वा 'स्वरूपं प्रयुज्यते' । यथा स्वभावकारणव्यापकानुपलब्ध्यादिषु । निषेध्यस्यार्थस्य 'बाधनं' विरुद्धं 'वा' प्रयुज्यते यथा स्वभावकारणव्यापकविरुद्धोपलब्ध्यादिषु प्रयुज्यत इत्याह । अविकलकारणतया शीतस्य 'भावे' सत्तायां सत्यां दहनस्य 'भावात् । अभावतो' निवृत्तेः । यथा शीताभावसाधने सहानवस्थानविरुद्धो वह्नेः प्रयुज्यते नात्र शीतस्पर्शो वह्नेरिति । (२७८)

....4.279 अन्योन्यभेदसिद्धेर्वा ध्रुवभावविनाशवत् ।
प्रमाणान्तरबाधाद् वा सापेक्षध्रुवभाववत् ॥ २७९ ॥

निषेध्यविधीयमानयोर'न्योन्य'स्याभावात्मतया 'भेदसिद्धेर्वा'ऽर्थबाधनरूपं प्रयुज्यते । 'ध्रुवभावविनाशवत्' । नित्यत्वानित्यत्वयोरन्योन्याभावात्मकत्वेन भेदसिद्धौ परस्परपरिहारस्थितिलक्षणतया विरुद्धं विनाशित्वं नित्यत्वबाधने प्रयुज्यते । यथा नित्यः शब्दो विनाशित्वात् । स चायं परस्परपरिहारस्थितिविरुद्धः क्वचित् साक्षाद् वा प्रयुज्यते यथा नित्यत्वस्य विनाशित्वं । क्वचिद् धर्मान्तर- विरोधग्राहिणा 'प्रमाणान्त'रेण परम्परया 'बा'धनात् । अबाधितविरुद्धभावो 'वा' प्रयुज्यते । 'सापेक्षध्रुवभावित्ववत्' । यथा सापेक्षध्रुवभावयोः साक्षाद् विरो- धाभावेपि ध्रुवभावित्वस्य यद् व्यापकं तेन विरुद्धं सापेक्षत्वं व्याप्यव्यापक- योश्च वस्तुतस्तादात्म्यादयो यद्व्यापके विरुध्यते स तद्व्याप्येनापीति प्रमाणान्तर- बाधनादेवावधृतविरुद्धभावं सापेक्षत्वं ध्रुवभावित्वबाधने प्रयुज्यते (।) यथा न ध्रुवभावी कृतकस्य विनाशो हेत्वन्तरसापेक्षत्वादिति । (२७९)
कस्मात् पुनर्हेत्वन्तरसापेक्षो न ध्रुवभावीत्याह ।
[511/s]

[2403] १ तृतीयेन रूपेण ।

# 4.8 ८. भावस्वभावचिन्ता

(१) हेत्वन्तरसापेक्षो न ध्रुवभावः

...4.280a हेत्वन्तरसमुत्थस्य सन्निधौ नियतः कुतः ।

उत्पादकाद्धेतो'र्हेत्वन्तरसमुत्थस्य' धर्मस्य 'सन्निधौ' सन्निधाने 'नियतः कुतः' । यथा कारणान्तरसापेक्षस्य वाससि नावश्यंभावनियमो रागस्य ।

(२) न भावनश्वरस्वभावनियतो भावः

स्यादेतत् । भावहेतुरेवानित्यत्वाख्यं धर्मं भावनाशकं जनयति तेन नश्वर- स्वभावनियतो भाव इत्याह ।

...4.280b भावहेतुभवत्वे किं पारम्पर्यपरिश्रमैः ॥ २८० ॥

'भावहेतुभवत्वे'ऽनित्यत्वाख्यस्य धर्मस्य भावनाशकस्येष्यमाणे 'पारम्पर्ये परिश्रमै'रेभिः स्वीकृतैः 'किं' प्रयोजनं । (२८०)

तथा हि (।)

....4.281 नाशनं जनयित्वान्यं स हेतुस्तस्य नाशकः
तमेव नश्वरं भावं जनयेद् यदि किम्भवेत् ॥ २८१ ॥

'स' भाव'हेतुरन्यम'नित्यत्वाख्यं धर्मं 'भावनाशनं जनयित्वा तस्या'भावस्य 'नाशक' इष्यते परंपरया । 'यदि' तु 'तमेव' न'श्वरं भावं' साक्षाद् भावहेतु'र्जनयेत् । तदा- किं'न्दूषणं 'भवेत्' । न किञ्चित् । (२८१)

अपि च (।)

....4.282 आत्मोपकारकः कः स्यात् तस्य सिद्धात्मनः सतः ।
नात्मोपकारकः कः स्यात् तेन यः समपेक्ष्यते ॥ २८२ ॥

यो यावाननित्यत्वाख्यो धर्म 'आत्मा' भावस्य स किमु'पकारकः' सन् 'विनाशको' भावस्य उतानुपकारक एव । तत्राद्ये पक्षे 'सिद्धात्मनो' भावस्य 'सतः' सर्व्वतो निरा- शंस्यस्य 'क आत्मा'ऽनित्याख्यो धर्मोऽन्यो वा 'उपकारकः स्यात्' । अथ द्वितीयः पक्षः (।) तदा- ऽ'नात्मा उपकारकः' स्यात् । 'तेन' भावेन 'यो' नाशकत्वेन 'समपेक्ष्येत' । उपकारक एव ह्यपेक्ष्यते अनुपकारकत्वे का तस्यापेक्षा नाशकता वा ।[2404] (२८२)
[512/s]

(३) अनपेक्ष्य एव भावो नश्वरत्वे

अथ नाशहेत्वयोगात् । अनपेक्ष्य एव भावो नश्वरतायां, तदा (।)

....4.283 अनपेक्षश्च किम्भावोऽतथाभूतः कदाचन ।
यथा न क्षेपभागिष्टः स एवोद्भूतनाशकः ॥ २८३ ॥

[2404] १ व्यर्था नाशहेतुकल्पना

[105b/MA]‘अनपेक्षश्च’ नाशे ‘भावः किं’ कस्मात् ‘कदाचनातथाभूतो’ अनश्वरस्वभावः । सर्वदैव नश्वरस्वभावताऽस्य युक्ता । ‘यथा’ त्वन्मते ‘स एव’ कृतको भाव ‘उद्भूत- नाशक’ उन्मुखनाशकानित्यत्वस्वभावो नाशकालेऽ‘क्षेप’भागचिरविनाशी इष्टः । तथोत्पादानन्तरं नश्वरस्वभावतया विनश्येदिति । (२८३)

....4.284 क्षणमप्यनपेक्षत्वे भावो भावस्य नेति चेत् ।
भावो हि स तथा भूतोऽभावे भावस्तथा कथम् ॥ २८४ ॥

क्षणक्षयिस्वभावा भावाः स्वहेतोरेव जायन्ते । विनाशं प्रत्यन‘पेक्षत्वे भावस्य’ यथा द्वितीये क्षणे ‘भावो ना’स्ति तथा प्रथमेपि क्षणे न स्यादिति । क्षणमपि भावस्य भावो न स्यादिति चेत् । अयुक्तमेतत् हि यस्मात् ‘स भाव’स्त‘था’ नश्वरस्वभाव इष्यते । यदा तु भाव एव नास्ति तदाऽ‘भावे’ भावस्य ‘भावस्तथा’ नश्वरः ‘कथ’मुच्यते (।) ततो लब्धजन्मतो भावस्य क्षणान्तरा- ननुवृत्तेर्नश्वरता ॥ (२८३) ।

तस्मात् ।

....4.285 येऽपरापेक्षतद्भावास्तद्भावनियता हि ते ।
असम्भवद्विबन्धा च सामग्री कार्यकर्मणि ॥ २८५ ॥

‘ये’ भावा अनपेक्ष‘तद्भावाः परापेक्षां’ विना सम्भवद्धर्मविशेषसंभवाः । ‘ते तस्य भावे’ धर्मस्य ‘नियताः’ । कारणसामग्रीव ‘असम्भवद्विबन्धा’ विबन्धकारण- रहिता[2405] ‘कार्यस्य कर्मणि’ क्रियायां नियता[2406] । परनिरपेक्षाश्च भावाः स्वनाश इति । क्षणिकाः सर्व्वसंस्कारा इत्यकम्प्यः सौ ग तः सिंहनादः ॥

न यदिह तन्न न्याय्यं तेनोदितेन च किं फलं । यदिं बहुशस्तस्या वृत्तौ गुणः कथं कस्य कः ।

[513/s]

यदि परमसौ व्याख्येयार्थग्रहस्य विरोधिनी (।) विवृत्तिरचनामात्रे तस्मात् कृतोत्र भयादरः ॥

आचार्यश्रीमनोरथनन्दिकृतायां वार्त्तिकवृत्तौ चतुर्थः परिच्छेदः समाप्तः ॥

लिखितेयं पंडि (त) वि भू ति च न्द्रे ण यदत्र पुण्यं तद्भवत्वाचार्योपाध्याय- पूर्व्वङ्गमसकलसत्वराशेरनुत्तरज्ञानफलावाप्तय इति ।

[[1a साध्यहेतुदृष्टान्तोपनयनिगमनानि पञ्च ।

Placement of note uncertain ; marked with a question mark in the edition (see encoding description for details)]][[1b पा ... कस्य इत्यादौ अवयव्येकत्वं हेतुः । तेन सर्वकस्य प्रसंगः साध्यः । विपर्यये सर्वकस्य साध्यस्याभावः साधनं । तेनावयव्येकत्वस्य हेतोरभावः साध्यः । (एवं वक्षमाणेत्यादि) । अवयव्येकरूप(हेतु)त्वे एकस्यावृत्तौ सर्वस्यावृत्तिः (साध्यप्रसंगः) स्यात् । विपर्यये सर्वावृत्ते साध्यस्याभावः साधनं । तेनावयव्येकत्वस्य हेतोरभावः साध्यः । अवयव्येकरूपहेतुत्वे एकस्य रक्तत्वे सर्वस्य (प्रसंगं साध्यं) रक्तत्वं स्यात् । विपर्यये सर्वरक्तत्वस्य साध्यस्याभावः साधनं । तेनावयव्येकत्वस्य हेतोरभावः साध्यः ।

Placement of note uncertain ; marked with a question mark in the edition (see encoding description for details)]]

---

[2405] १ अन्त्या सामग्री

[2406] २ दृष्टान्तः

# The TEI Header

```
 <teiHeader xmlns="http://www.tei-c.org/ns/1.0" xml:lang="en">
<fileDesc>
  <titleStmt>
    <title type="main" subtype="base-text">Pramāṇavārttika</title>
    <title type="sub" subtype="commentary">Pramāṇavārttikavṛtti</title>
    <author role="base-author">Dharmakīrti</author>
    <author role="commentator">Manorathanandin</author>
    <funder>Deutsche Forschungsgemeinschaft</funder>
    <funder>The National Endowment for the Humanities</funder>
    <principal>
^^I^^I^^I^^I      <persName>Birgit Kellner</persName>
^^I^^I^^I^^I    </principal>
    <respStmt>
      <resp>data entry by</resp>
      <name key="name_swift">SWIFT Information Technologies, Mumbai</name>
    </respStmt>
    <respStmt>
      <resp>prepared for SARIT by</resp>
      <persName key="name_person_lo">Liudmila Olalde</persName>
    </respStmt>
  </titleStmt>
  <editionStmt>
    <p> </p>
  </editionStmt>
  <publicationStmt>
    <publisher>SARIT: Search and Retrieval of Indic Texts. DFG/NEH Project (NEH-No. HG5004113), 2013-2016 </publisher>
    <idno>2014-04-15</idno>
    <availability status="restricted">
      <p>Copyright Notice:</p>
      <p>Copyright 2014 SARIT</p>
      <licence>
```

```
^^I^^I^^I^^I^^I      <p>Distributed under a <ref target="https://creativecommons.org/licenses/by-sa/4.0/">Creative Commons Attribution-ShareAlike 4.0
^^I^^I^^I^^I^^I      <list>
        <item>Share — copy and redistribute the material in any medium or format.</item>
        <item>Adapt — remix, transform, and build upon the material for any purpose, even commercially.</item>
      </list>
^^I^^I^^I^^I^^I      <p>The licensor cannot revoke these freedoms as long as you follow the license terms.</p>
^^I^^I^^I^^I^^I      <p>Under the following terms:</p>
^^I^^I^^I^^I^^I      <list>
        <item>Attribution — You must give appropriate credit, provide a link to the license, and indicate if changes were made. You may do so in any reason
        <item>ShareAlike — If you remix, transform, or build upon the material, you must distribute your contributions under the same license as the origina
      </list>
^^I^^I^^I^^I^^I      <p>More information and fuller details of this license are given on the Creative Commons website.</p>
^^I^^I^^I^^I    </licence>
    <p>SARIT assumes no responsibility for unauthorised use that infringes the rights of any copyright owners, known or unknown.</p>
   </availability>
   <date>2014</date>
  </publicationStmt>
  <sourceDesc>
   <bibl xml:id="pvv-sankrtyayana-book">
^^I^^I^^I^^I    <title type="main">
      <persName>Dharmakīrti</persName>'s Pramāṇavārttika</title>
^^I^^I^^I^^I    <title type="sub">with a commentary by <persName>Manorathanandin</persName>
     </title>
^^I^^I^^I^^I    <author>Dharmakīrti</author>
^^I^^I^^I^^I    <author>Manorathanandin</author>
^^I^^I^^I^^I    <editor key="name_person_rs">Rāhula Sāṅkṛtyāyana</editor>
^^I^^I^^I^^I    <publisher>Bihar and Orissa Research Society</publisher>
^^I^^I^^I^^I    <pubPlace>Patna</pubPlace>
^^I^^I^^I^^I    <date>1938-1940</date>
^^I^^I^^I^^I    <note>Appendix to the Journal of the Bihar and Orissa Research Society</note>
^^I^^I^^I^^I    <note>The manuscript consulted by Sāṅkṛtyāyana is described below.</note>
```

```
~~I~~I~~I~~I     </bibl>
      <msDesc>
        <msIdentifier>
          <idno/>
          <altIdentifier>
            <idno>Manuscript nr. 237 (henceforth MA).</idno>
            <note>In : Sāṅkṛtyāyana, ”Second Search of Sanskrit Palm-leaf Mss. in Tibet”. JBORS 23,1 (1937) 1-57.</note>
          </altIdentifier>
        </msIdentifier>
        <msContents>
          <msItem>
            <author>Manorathanandin</author>
            <title>Pramāṇavārttikavṛtti</title>
          </msItem>
        </msContents>
        <physDesc>
          <objectDesc>
            <p>Written by Vibhūticandra in early old Bengali script (Sāṅkṛtyāyana refers to the script as Kuṭilā), the manuscript comprises 105 leaves of seven li
          </objectDesc>
        </physDesc>
        <history>
          <p>On July 28, 1936, Sāṅkṛtyāyana found this paper manuscript of Manorathanandin’s Pramāṇavārttikavṛtti in the hermitage Zha lu ri phug.</p>
        </history>
      </msDesc>
    </sourceDesc>
  </fileDesc>
  <encodingDesc>
    <p>In the source file, there were two types of line breaks : returns (and possible surrounding space) and hyphens+returns. These were replaced with lb-element
    <p>The folio numbers on the margins were encoded as pb-elements. The ed-attribute ”MA” refers to the manuscript used by Sāṅkṛtyāyana. The line numbers
    <p>The text is structured in three div-levels :<list>
        <item>Four chapters encoded as : div n=”...” type=”chapter” subtype=”pariccheda”</item>
```

```
        <item>Subchapters encoded as : div n="[roman numbers]" type="subchapter". The subchapter number is not reflected in the verse numbers.</item>
        <item>The lowest div-level encloses a verse (or a group of verses) and its corresponding commentary, e.g. : div n="3.121 3.122abc" for a div enclosing vers
      </list>
    </p>
    <p>The notes represent marginal notes on the manuscript MA, written by Vibhūticandra. The editor Rāhula Sāṅkṛtyāyana is responsible for linking them with
    <p>The verse numbers are those of Sāṅkṛtyāyana's edition<ref sameAs="#pvv-sankrtyayana-book"/>.</p>
    <p>Abbreviations used in the attributes ed, cRef and xml :id's in this file : <!-- this is a provisory list and has to be replaced by a refsDecl -->
^^I^^I^^I^^I<list>
        <item>Divy = Divyāvadāna ; the page number refers to P.L. Vaidya, Divyāvadāna, The Mithila Institute of Post-Graduate Studies and Research in Sanskr
        <item>MA = Sanskrit manuscript of Manorathanandin's Pramāṇavārttikavṛtti used by Sāṅkṛtyāyana</item>
        <item>ps = Pramāṇasamuccaya ; the verse numbers correspond to <ref target="http ://www.ikga.oeaw.ac.at/Mat/dignaga_PS_1.pdf">Steinkellner, Dig
        </item>
        <item>psv = Pramāṇasamuccayavṛtti ; the verse numbers correspond to to <ref target="http ://www.ikga.oeaw.ac.at/Mat/dignaga_PS_1.pdf">Steinkel
        </item>
        <item>pv = Dharmakīrti's Pramāṇavārttika</item>
        <item>pvv = Manorathanandin's Pramāṇavārttikavṛtti</item>
        <item>ns = Gautama's Nyayasutra</item>
        <item>VāPa = Bhartṛhari's Vākyapadīya</item>
        <item>śv = Kumārila's Ślokavārttika</item>
        <item>pvsv = Dharmakīrti's Pramāṇavārttikasvavṛtti</item>
        <item>ts = Tattvasaṅgraha ; the verse numbers correspond to Krishnamacharya's edition of Tattvasaṅgrahapañjikā</item>
      </list>
    </p>
  </encodingDesc>
  <profileDesc><!-- ... --></profileDesc>
  <revisionDesc>
    <change who="#lo" when="2014-05-18">I corrected the verse number of verse 2.450.</change>
    <change who="#lo" when="2014-06-04">I corrected the verse number of verse 4.116.</change>
    <change who="#lo" when="2014-06-04">I corrected the folio number 65b, which was wrong in the printed edition.</change>
    <change who="#lo" when="2014-06-30">I changed      to      on p. 214, line 15 from below.</change>
    <change who="#lo" when="2014-07-23">I corrected the verse number (     ) in footnote 345-12. In the printed edition it reads (     ).</change>
```

```
    <change who="#lo" when="2014-07-23">In footnote 370-3 I changed        to        .</change>
  </revisionDesc>
</teiHeader>
```